# "અહો શ્રુતજ્ઞાનમ્" ગ્રંથ જીર્ણોધ્ધાર ૩૯

## <u>ન્યાય ગ્રંથ</u>

## શ્રીસિદ્ધહેમચન્દ્રશબ્દાનુશાસનમ્
## સ્વોપજ્ઞશબ્દમહાર્ણવન્યાસ (બૃહન્ન્યાસ અધ્યાય-૫)

**: દ્રવ્ય સહાયક :**

પ.પૂ.તપા.ગચ્છાધિપતિ આ.ભ.શ્રી રામસૂરીશ્વરજી મ.સા.(ડહેલાવાળા)ના
સમુદાયના પ.પૂ. ગચ્છાધિપતિ આ.ભ.શ્રી અભયદેવસૂરીશ્વરજી મ.સા.ના
આજ્ઞાનુવર્તિની પ.પૂ.સા. શ્રી સૂર્યપ્રભાશ્રીજી મ. તથા
પૂ. રત્નપ્રભાશ્રીજી મ.ના શિષ્યા અક્ષયરત્નાશ્રીજી મ.ના સદુપદેશથી
શ્રી પરમાનંદ જૈન સંઘ, ડિકેબીન, સાબરમતી
બહેનોના ઉપાશ્રયના જ્ઞાનખાતાની ઉપજમાંથી

**: સંયોજક :**

શાહ બાબુલાલ સરેમલ બેડાવાળા
શ્રી આશાપૂરણપાર્શ્વનાથ જૈન જ્ઞાનભંડાર
શા. વીમળાબેન સરેમલ જવેરચંદજી બેડાવાળા ભવન
હીરાજૈન સોસાયટી, સાબરમતી, અમદાવાદ-૩૮૦૦૦૫
(મો.) ૯૪૨૬૫૮૫૯૦૪ (ઓ.) ૨૨૧૩૨૫૪૩ (રહે.) ૨૭૫૦૫૭૨૦

સંવત ૨૦૬૫ ઈ.સ. ૨૦૦૯

卐 श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम्–६१ 卐

॥ आशैशवशीलशालिने श्रीनेमीशानाय नमः ॥

कुमारपालभूपालप्रतिबोधक–सुगृहीतनामधेय-कलिकालसर्वज्ञ–श्रीहेमचन्द्रसूरिभगवत्प्रणीतं

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

[ स्वोपज्ञतत्त्वप्रकाशिकाभिधबृहद्वृत्ति–शब्दमहार्णवन्यास–तदनुसन्धानसंवलितम् ]

तत्र

## पञ्चमोऽध्यायः ॥

न्यासानुसन्धानकारः संपादकश्च–

जगद्गुरु-शासनसम्राट्-सूरिचक्रचक्रवर्त्ति-तपोगच्छाधिपति-विविधतीर्थोद्धारक-

परमपूज्याचार्यदेवेश-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारः

'व्याकरणवाचस्पति-कविरत्न-शास्त्रविशारद'

इति पदालङ्कृतः–

श्रीमद्विजयलावण्यसूरीश्वरः ॥

卐 卐 卐 卐 卐

प्रकाशिका–  R 20-00

卐 श्रीसिद्धहेम-प्रकाशन-समितिः 卐

— प्रकाशिका —

श्रीसिद्धहेम-प्रकाशन-समितिः

— कार्यवाहकश्च —

शाह नरोत्तमदास गुलाबचन्द्रः

५१ दरियास्थानगली, डेलीवालो मालो, बीजे माले, रूम नं० ३०.

वडगादी, मुंबइ ३.

| [१] | प्राप्ति-स्थानम् | [२] |
|---|---|---|
| श्रीविजयलावण्यसूरीश्वर ज्ञानमन्दिर<br>बोटाद<br>[ सौराष्ट्र ] | | सरस्वती पुस्तक भण्डार<br>रतनपोल, हाथीखाना,<br>अमदाबाद [ गुजरात ] |

वीर सं० २४९०. ]  नेमि सं० १५.  [ विक्रम सं० २०२०.





—: मुद्रक :—

श्री मस्तूरमल कुम्भट

कुम्भट प्रिन्टर्स,

घोड़ों का चौक, जोधपुर [ राजस्थान ]

# प्रकाशकीय निवेदन

श्रीविजयनेमिसूरीश्वरग्रन्थमालाना ६१ मा रत्न तरीके श्रीसिद्धहेमचन्द्रशब्दानुशासनना न्यासानुसन्धानसहित बृहद्वृत्तिनो **पंचमअध्याय** जिज्ञासु महानुभावो समक्ष मुकता अमो अतीव आनन्द अनुभवीए छीअे। श्रीसिद्धहेमव्याकरणनी भव्यता विशिष्टता अने अजोड उपयोगिता तो सर्वविदितज छे। आ अंगे कहेवायोग्य, अमे तृतीय अध्यायना प्रथम पादने आपनी सेवामां रजु करती वखते कही गया छीअे।

आगळना तमाम अध्यायो सहुना उपयोग माटे शीघ्रातिशीघ्र प्रकाशित करवाना अमारा प्रयासो झडपथी चालेज छे। २, ३, अने ४ पाद सहित तृतीय अध्यायनुं कार्य वाराणसीना सुप्रसिद्ध भार्गव भूषण प्रेसमां चाले छे, चतुर्थ अध्यायनुं कार्य मुंबइना ख्यातनाम निर्णयसागर प्रेसमां चाले छे; अने पंचम अध्याय के जे आपना करकमलमां आवे छे तेनुं सुन्दर मुद्रण जोधपुरना सुप्रतिष्ठित **कुंभट प्रेसमां** थयु छे। आ ग्रन्थने झडपथी छापवा बद्दल कुंभट प्रेसना मालिक **श्री मखतूरमलजी कुंभट** ने अमो हार्दिक धन्यवाद आपीये छीअे।

प्रस्तुत पंचम अध्यायना शब्दमहार्णवन्यासनुं संपूर्ण अनुसन्धान जगद्गुरु-शासनसम्राट्-सूरिचक्रचक्रवर्ती-तपोगच्छाधिपति-विविधतीर्थोद्धारक-प्रभूतभूपप्रतिबोधक-बालब्रह्मचारी-परमाराध्य **परमपूज्य आचार्यदेवेश श्रीमद्विजयनेमिसूरीश्वरजी म०** श्रीजीना पट्टालंकार व्याकरणवाचस्पति-कविरत्न-शास्त्रविशारद-साधिकसलक्षश्लोकप्रमाणनूतनसंस्कृतसाहित्यसर्जक-अनुपमव्याख्यानसुधावर्ती **पूज्यपाद आचार्यदेव श्रीमद्विजय लावण्यसूरीश्वरजी म०** श्रीए कर्युं छे। पंचम अध्यायमां व्याकरणशास्त्रनी विशेषताना प्रतिकसमा **कृदन्तना** अने तेनी अन्तर्गत **उणादिना** मनोरम्य विषयने अनुसन्धानकार महर्षिए खूब सुन्दर, रसप्रद शैलीए चर्च्यो छे। एटलुज नहि पण सूक्ष्मातिसूक्ष्म मर्मने पण सरळताथी चर्च्यो छे। रचनाकार महर्षिनी प्रत्येक रचनामां अनेकविध ग्रन्थोना चिन्तन, मनन, अने परिशीलननी साथे प्रकाण्डबुद्धिप्रतिभानी झळक होय छे। आ वात साक्षरगणने सुपरिचितज छे।

भावि जिज्ञासुओना बोध अने उपकारनी कल्याण कामनाथी पूज्यपाद आचार्यदेवश्री पोताना नादुरुस्त अने नाजुक स्वास्थ्यने गणकार्या सिवाय अनेकविध शासनप्रभावनाना शुभकार्योने सुसम्पन्न करवानी साथे न्यासानुसन्धानना कार्यने जल्दी परिपूर्ण करवा अविरत प्रयत्नशील रहे छे। खरेखर पूज्यपाद आचार्यदेव श्रीजीनी अप्रमत्त ज्ञानदशा सहुकोइने भावपूर्वक अभिवादन करवा योग्य छे। आवा महान् बुद्धिवैभवी परमाराध्य आचार्यदेवश्रीजीना सर्वोपयोगी अने चिरस्थायी साहित्यने प्रकाशित करवानो अमूल्य लाभ अने ज्ञानसेवानी यत्किंचित् तक मळी छे तेथी अमो पण अमारी जातने भाग्यशाळी मानीये छीअे।

परमपूज्य आचार्यदेवश्रीजीना सर्वग्रन्थोने साक्षरगणे अने जिज्ञासुमहानुभावोए जेटला आनन्दथी सत्कार्या छे अने भावपूर्वक सन्मान्या छे तेवीज रीते अधिकाधिक उपयोगसाथे आ ग्रन्थने पण सत्कारशे अने सन्मानशे एवी भावपूर्ण श्रद्धासहित विरमिए छीअे।

卐 卐 卐

श्रीविजयनेमिसूरीश्वर ग्रन्थमाला द्वारा मुद्यमाण

## * अपूर्व ग्रन्थ रत्नोनी सूचि *

[१] सिद्धहेमशब्दानुशासन बृहद्वृत्ति बृहन्न्यासादिसह चतुर्थविभाग ।

[२] सिद्धहेमशब्दानुशासन बृहद्वृत्ति बृहन्न्यासादिसह पंचमविभाग ।

[३] सिद्धहेमशब्दानुशासन बृहद्वृत्ति [ अढार हजारी ] ।

[४] उणादिगणविवृत्ति ।

[५] धातुरत्नाकर तृतीयभाग द्वितीयावृत्ति ।

[६] छन्दोऽनुशासन "प्रद्योत" टीका ।

[७] विभक्त्यर्थ प्रकाश ।

[८] स्याद्यन्तसरित् ।

[९] स्याद्यन्तपयस्विनी ।

[१०] कृत्प्रत्ययानां महायन्त्रम् ।

[११] हेमचन्द्रिका व्याकरणनो सरल गुर्जरानुवाद ।

卐 卐 卐

श्रीनेमिलावण्यसूरीश्वरग्रन्थमाला तथा नेमिलावण्यदक्षसुशील-

## * ग्रन्थमाला तरफथी ताजेतरमां प्रकाशित थनारी पुस्तिकाओ *

[१] रत्ननी माला ।

[२] भावना सारांश ।

[३] भावना समुच्चय ।

[४] शब्दरूपावलि ।

[५] समासचक्र ।

[६] सद्गुणवाक्यमाला ।

[७] चैत्यवन्दन वृत्ति ।

卐 卐 卐

उपर्युक्त त्रणे ग्रन्थमालाओना प्रकाशित थयेला प्रकाशनोनु प्राप्तिस्थान—

(१) श्रीविजयलावण्यसूरीश्वर ज्ञानमन्दिर,
बोटाद [सौराष्ट्र]

(२) सरस्वती पुस्तक भण्डार,
हाथीखाना, रतनपोल, अमदाबाद [गुजरात]

# श्रीसिद्धहेम–सूत्राणां पञ्चमाध्यायगतानामकारादिक्रमेणानुक्रमणिका ।


| | |
|---|---|
| अग्निचित्या | ५।१।३७॥ |
| अग्नेश्चे: | ५।१।१६४॥ |
| अच् | ५।१।४९॥ |
| अचित्ते॰ क् | ५।१।८३॥ |
| अजाते:॰ म्या: | ५।१।१७०॥ |
| अजाते:॰ ले | ५।१।१५४॥ |
| अदोऽन॰ त् | ५।१।१५०॥ |
| अद्यतनी | ।५।२।४॥ |
| अद्यर्था॰ रे | ५।१।१२॥ |
| अधीष्टौ | ५।४।३२॥ |
| अनट् | ५।३।१२४॥ |
| अनद्य॰ नी | ५।३।५॥ |
| अनद्य॰ नी | ५।२।७॥ |
| अनोर्जं॰ ड: | ५।१।१६८॥ |
| अन्तर्द्धि: | ५।३।८९॥ |
| अन्यथै॰ त् | ५।४।५०॥ |
| अभिव्या॰ न् | ५।३।९०॥ |
| अयज्ञे स्त्र: | ५।३।६८॥ |
| अयदि॰वा | ५।४।२३॥ |
| अयदि॰न्तो | ५।२।९॥ |
| अर्हे तृच् | ५।४।३७॥ |
| अर्होऽच् | ५।१।९१॥ |
| अवह्॰ स्रो: | ५।१।६३॥ |
| अवात् | ५।३।६२॥ |
| अवात्॰ म् | ५।३।१३३॥ |
| अविव॰ ते | ५।२।१४॥ |
| अश्रद्धा॰ पि | ५।४।१५॥ |
| असरू॰ क्ते: | ५।१।१६॥ |
| असूर्यो॰ श: | ५।१।१२६॥ |
| आङ: क्री॰ ष: | ५।२।५१॥ |
| आङ: शीले: | ५।१।९६॥ |
| आङो युद्धे | ५।३।४३॥ |
| आङो रूप्लो: | ५।३।४९॥ |
| आ तुमो॰ त् | ५।१।१॥ |
| आतो डो॰ म: | ५।१।७६॥ |
| आधारात् | ५।१।१३७॥ |
| आधारात् | ५।४।६८॥ |
| आनायो॰ म् | ५।३।१३६॥ |
| आनुलो॰ चा | ५।४।८८॥ |
| आयुधा॰ दे: | ५।१।९४॥ |
| आरम्भे | ५।१।१०॥ |
| आशिषि॰ न: | ।५।१।८०॥ |
| आशिष्य॰ न् | ५।१।७०॥ |
| आशिष्या॰ म्यौ | ५।४ ३८॥ |
| आसुयु॰ म: | ५।१।२०॥ |
| आस्यटि॰ प् | ५।३।९७॥ |
| आह्वावो॰ म् | ५।३।४४॥ |
| इकिश्ति॰ र्थे | ५।३।१३८॥ |
| इङितो॰ त् | ५।२।४४॥ |
| इङोऽ॰ द्रा | ५।३।१९॥ |
| इच्छार्थे॰ मी | ५।४।८९॥ |
| इच्छार्थे॰ म्यौ | ५।४।२७॥ |
| इणोऽभ्रे | ५।३।७५॥ |
| इरंमद: | ५।१।१२७॥ |
| इषोऽनि॰ म् | ५।३।११२॥ |
| उणादय: | ५।२।९३॥ |
| उद: प॰ रे: | ५।२।२९॥ |
| उद: श्रे: | ५।३।५३॥ |
| उदङ्को॰ ये | ५।३।१३५॥ |
| उपपी॰ म्या | ५।४।७५॥ |
| उपस॰ त: | ५।३।११०॥ |
| उपस॰ श्य: | ५।१।५६॥ |
| उपस॰ कि: | ५।३।८७॥ |
| उपस॰ श: | ५।२।६९॥ |
| उपात्॰ नै | ५।४।७२॥ |
| उवर्णा॰ के | ५।१।१९॥ |
| ऊर्ध्वात्॰ ष: | ५।४।७०॥ |
| ऊर्धादि॰ र्तु: | ५।१।१३६॥ |
| ऋदुपा॰ च: | ५।१।४१॥ |
| ऋवर्ण॰ ण् | ५।१।१७॥ |
| ऋषिना॰ णे | ५।२।८६॥ |
| एजे: | ५।१।११८॥ |
| एष्यत्य॰ गे | ५।४।६॥ |
| कथमि॰ वा | ५।४।१३॥ |
| कदाक॰ वा | ५।३।८॥ |
| करणा॰ ते | ५।१।१५८॥ |
| करणा॰ रे | ५।३।१२९॥ |
| करणेभ्य: | ५।४।६४॥ |
| कर्तरि | ५।१।३॥ |
| कर्तु: खश् | ५।१।११७॥ |
| कर्तुर्जी॰ ह: | ५।४।६९॥ |
| कर्तुर्णिन् | ५।१।१५३। |
| कदा क॰ वा | ५।३।८॥ |
| कर्मणोऽण् | ५।१।७२॥ |
| कर्मणोऽण् | ५।३।१४॥ |
| कर्मण्य॰ र्थे | ५।१।१६५॥ |
| कषोऽनि॰ ट: | ५।३।३॥ |
| कामोक्ता॰ ति | ५।४।२६॥ |
| कारणम् | ५।३।१२७॥ |
| कालवे॰ रे | ५।४।३३॥ |
| कालस्या॰ म् | ५।४।७॥ |
| कालेन॰ रे | ५।४।८२॥ |
| किंवृत्ते॰ म् | ५।३।९॥ |
| किंवृत्ते॰ न्त्यौ | ५।४।१४॥ |
| कियत्॰ र: | ५।१।१०१॥ |
| किंकिला॰ न्ती | ५।४।१६॥ |
| किरो धान्ये | ५।३।७३॥ |
| कुक्ष्यात्मो॰ खि: | ५।१।९०॥ |
| कुप्यभि॰ म्नि | ५।१।३९॥ |
| कुमार॰ न् | ५।१।८२॥ |
| कूलादु॰ ह: | ५।१।१२२॥ |
| कूलाभ्र॰ ष: | ५।१।११०॥ |
| कृग: ख॰ णे | ५।१।१२९॥ |
| कृग: श॰ वा | ५।३।१००॥ |
| कृग: सु॰ त्. | ५।१।१६२॥ |
| कृगोऽ॰ मौ | ५।४।८४॥ |
| कृग्ग्र॰ त् | ५।४।६१॥ |
| कृतास्म॰ क्षा | ५।२।११॥ |
| कृवृषि॰ वा | ५।१।४२॥ |
| क्तक्तवतू | ५।१।१७४॥ |
| क्तेटोगु॰ त् | ५।३।१०६॥ |
| क्त्वातुम॰ वे | ५।१।१३॥ |
| क्रव्यात्॰ दी | ५।१।१५१॥ |
| क्रियायां॰ | ५।३।१३॥ |
| क्रुध्-सं॰ प् | ५।३।११४॥ |
| क्लीबे क्त: | ५।३।१२३॥ |
| क्लेशादि॰ त् | ५।१।८१॥ |
| क्वचित् | ५।१।१७१॥ |
| क्विप् | ५।१।१४८॥ |
| क्षिपरट: | ५।२।६६॥ |
| क्षिप्राशं॰म्यौ | ५।४।३॥ |
| क्षुश्वो: | ५।३।७१॥ |
| क्षेपे च॰ त्रे | ५।४।१८॥ |
| क्षेपेऽ॰ ना | ५।४।१२॥ |
| क्षेमप्रि॰ण् | ५।१।१०५॥ |
| खनो ड॰ च | ५।३।१३७॥ |
| खेयमृ॰ द्ये | ५।१।३८॥ |
| ख्णम् चा॰ क्ष्ण्ये | ५।४।४८॥ |
| ख्याते दृश्ये | ५।२।८॥ |
| गत्यार्था॰ जे: | ५।१।११॥ |
| गत्वर: | ५।२।७८॥ |
| गस्थक: | ५।१।६६॥ |
| गात्रपु॰ स्न: | ५।४।५९॥ |
| गापाप॰ वे | ५।३।९५॥ |
| गायोऽ॰ क् | ५।१।७४॥ |
| गेहे ग्रह: | ५।१।५५॥ |
| गोचर॰ म् | ५।३।१३१॥ |
| ग्रह: | ५।३।५५॥ |
| ग्रहादिभ्यो॰ न् | ५।१।५३॥ |
| घ्राध्मापा॰ श: | ५।१।५८॥ |
| ङौ सास॰ ति | ५।२।३८॥ |
| चरेरा॰ रौ | ५।१।३१॥ |
| चरेष्ट: | ५।१।१३८॥ |
| चर्मोद॰ रे: | ५।४।५६॥ |
| चलश॰ त् | ५।२।४३॥ |

चितिदे० दे: ५।३।७९॥
चित्रे ५।४।१९॥
चेलार्थो० ते: ५।४।५८॥
च्व्यर्थे क० ग: ५।३।१४०॥
छन्दोनाम्नि ५।३।७०॥
जागु: ५।२।४८॥
जागुरश्च ५।३।१०४॥
जातुय० मी ५।४।१७॥
जायाप० ति ५।१।८४॥
जिविपू० ल्के ५।१।४३॥
जीण्ह० थ: ५।२।७२॥
जृषोऽतृ: ५।१।१७३॥
ज्ञानेच्छा० क्त: ५।२।९२॥
टनण् ५।१।६७॥
ट्वितोऽथु: ५।३।८३॥
ड्वितस्त्रि० म् ५।३।८४॥
णकतृचौ ५।१।४८॥
णिन् चा० र्घ्ये ५।४।३६॥
णिवेत्त्या० न: ५।३।१११॥
तत्र क्व० त् ५।२।२॥
तन्व्य० त: ५।१।६४॥
तव्यानीयौ ५।१।२७॥
तिक्कृतौ० म्नि० ५।१।७१॥
तिर्यंचा० र्गे ५।४।८५॥
तूष्णीमा ५।४।८७॥
तृन् शी० षु ५।२।२७॥
तृषिधृ० ङ ५।२।८०॥
ते कृत्या: ५।१।४७॥
तौ मा० षु ५।२।२१॥
त्यदाद्य० च ५।१।१५२॥
त्रसिगृ० क्नु: ५।२।३२॥
दंशेस्तृ० या ५।४।७३॥
दंशेस्त्र: ५।२।९०॥
दश्चाङ: ५।१।७८॥
दाट्धे० क: ५।२।३६॥
दिद्युद्द० प: ५।२।८३॥
दुःस्वीष० ल् ५।३।१३९॥
दुहेर्डुघ: ।५।१।१४५॥
दृतिना० वि: ५।१।९७॥
दृवृग्० स: ५।१।४०॥
दृश: क्व० प् ५।१।१६६॥
देववा० प: ५।१।९९॥
द्रमक० ङ: ५।२।४६॥
द्वितीयया ५।४।७८॥
द्विषन्त० पौ ५।१।१०८॥
धनुद० ह: ५।१।९२॥
धातो:० या: ५।४।४१॥
धात्री ५।२।९१॥
घाय्या० से ५।१।२४॥
धारीङो० श् ५।२।२५॥
धारेर्धर्च ५।१।११३॥
नगरा० जे ५।१।८७॥
नम्न० औ ५।१।१२८॥
नञो० पे ५।३।११७॥
नणि० क्ष: ५।२।४५॥
ननौ० त् ५।२।१७॥
नन्द्यादि० न: ५।१।५२॥
नन्वोर्वा ५।२।१८॥
नवावव० न: ५।३।४८॥
नाडी० श्च ५।१।१२०॥
नानद्य० त्यो: ५।४।५॥
नाम्ना० श: ५।४।८३॥
नाम्नि पु०च ५।३।१२१॥
नाम्नो ग० ह: ५।१।१३१॥
निम्नो व० च ५।१।३५॥
नाम्युपा० क: ५।१।५४॥
निगवा० म्नि ५।१।६१॥
निघो० त्रम् ५।३।३६॥
निन्दहिं० त् ५।२।६८॥
निन्द्ये व्या० य: ५।१।१५९॥
निमिल्या० के ५।४।४६॥
निमूला० व: ५।४।६२॥
नियश्चा० द्वा ५।३।६०॥
निरभे:० ल्व: ५।३।२१॥
निर्गो देशे ५।१।१३३॥
निषेधे० क्त्वा ।५।४।४४॥
निदाघ्० द्ट् ५।१।८८॥
नृत्० ट् ५।१।६५॥
नेर्नद० ण: ५।३।२६॥
नेर्वु: ५।३।७४॥
न्यभ्यु० श्चोत् ५।३।४२॥
न्यवाच्छापे ५।३।५६॥
न्यादो नवा ५।३।२४॥
न्याया० रम् ५।३।१३४॥
न्युदो ग्र: ५।३।७२॥
पञ्च० हेतौ ५।३।११॥
पञ्च० याम् ५।४।७७॥
पर्णेर्मनि ५।३।३२॥
पद० घञ् ५।३।१६॥
पदा० ग्रह: ५।१।४४॥
परावरे ५।४।४५॥
परिक्ले० न ५।४।८०॥
परिचा० म्नी ५।१।२५॥
परिदेवने ५।३।६॥
परिणा० च: ५।१।१०९॥
परे: क्रमे ५।३।७६॥
परे: सृ० र्य: ५।३।१०२॥
परेर्घ: ५।३।४०॥
परेर्दे० श्च ५।२।६५॥
परर्यूते ५।३।६३॥
परे वा ५।४।८॥
परोक्षे ५।२।१२॥
पर्यषेर्वा ५।३।११३॥
पर्याया० क:० ५।३।१२०॥
पाणिकरात् ५।१।१२१॥
पाणिघ० नि ५।१।८९॥
पाणिस० ज: ५।१।१८॥
पार्श्वादि० ङ: ५।१।१३५॥
पुंनाम्नि घ: ५।३।१३०॥
पुरंद० रौ ५।१।११४॥
पुराया० ना ५।३।७॥
पुरो० सर्त्ते: ५।१।१४०॥
पुव० वते ५।२।८५॥
पूङ्यजे:० न: ५।२।२३॥
पूर्वाग्रे० मे ५।४।४९॥
पूर्वात्० र्तु: ५।१।१४१॥
प्रघणं० शे ५।३।३५॥
प्रचये० स्य ५।४।४३॥
प्रणाय्यो० ते ५।१।२३॥
प्रमाण० त्यो: ५।४।७६॥
प्रवच० य: ५।१।८॥
प्रश्चा० वेञ् ५।३।११९॥
प्राक्काले ५।४।४७॥
प्राच्च० यस: ५।२।५२॥
प्राज्ज्ञश्च ५।१।७९॥
प्रात्सू० रिन् ५।२।७१॥
प्रात् सुद्रुस्तो: ५।३।६७॥
प्राद्रश्मि० श्रे ५।३।५१॥
प्राल्लिप्सायाम् ५।३।५७॥
प्रिय० वद: ५।१।१०७॥
प्रुसृ० साधौ ५।१।६९॥
प्रैषा० म्यौ ५।४।२९॥
बन्धेर्नाम्नि ५।४।६७॥
बहुलम् ५।१।२॥
बहुवि० द: ५।१।१२४॥
ब्रह्मणो० द: ५।१।१५६॥
ब्रह्मभ्रू० प् ५।१।१६१॥
ब्रह्मादिभ्य: ५।१।८५॥
ब्रुव: ५।१।५१॥
भजो विण् ५।१।१४६॥
भञ्जि० घुर: ५।२।७४॥
भविष्यन्ती ५।३।४॥
भव्य० नवा ५।१।७॥
भाववचना: ५।३।१५॥
भावकर्त्रो: ५।३।१८॥
भावे ५।३।१२२॥
भावे चा० ख: ५।१।१३०॥
भावेऽनु० त् ५।३।४५॥
भिक्षा० यात् ५।१।१३९॥
भिदादय: ५।३।१०८॥
भियो० कम् ५।२।७६॥
भीमा० दाने ५।१।१४॥

भीषि० म्य: ५।३।१०६॥
भुजि० ने ५।३।१२८॥
भुवोऽ० वा ५।३।६४॥
भूजे: ष्णुक् ५।२।३०॥
भूतव० वा ५।४।२॥
भूते ५।४।१०॥
भूश्र्यदोऽल् ५।३।२३॥
भूषा० न: ५।२।४२॥
भृगो नाम्नि ५।३।९८॥
भृगो० याम् ५।१।४५॥
भृतौ० ण: ५।१।१०४॥
भृत्रू० म्नि ५।१।११२॥
भृषा० दि ५।४।४२॥
भ्राज्य० ष्णु: ५।२।२८॥
भ्वादिभ्यो वा ५।३।११५॥
मथलप: ५।२।५३॥
मन्याण्णिन् ५।१।११६॥
मन्व० त् ५।१।१४७॥
माङ्यद्यतनी ५।४।३९॥
माने ५।३।८१॥
मूर्ति० घन: ५।३।३७॥
मूल० दय: ५।१।१४४॥
मृगयेच्छा० ५।३।१०१॥
मेघर्ति० ख: ५।१।१०६॥
य एचात: ५।१।२८॥
यजि० क: ५।२।४७॥
यजि० न: ५।३।८५॥
यज्ञे ग्रह: ५।३।६५॥
यत्कर्म० त: ५।३।१२५॥
यथा० त्तरे ५।४।५१॥
यम० र्गात् ५।१।३०॥
याज्या० चि ५।१।२६॥
यायावर: ५।२।८२॥
यावतो० व: ५।४।५५॥
युज० न: ५।२।५०॥
युदुद्रो: ५।३।५९॥
युपू० र्घञ् ५।३।५४॥
युवर्ण० ह: ५।३।२८॥
रज:० ग्रह: ५।१।९८॥
रम्यादि० रि ५।३।१२६॥
राजघ: ५।१।८८॥
रात्रौ० च ५।२।६॥
रुच्या० व्यम् ५।१।६॥
रोरुपसर्गात् ५।३।२२॥
ललाट० क: ५।१।१२५॥
लष०पद: ५।२।४१॥
लिप्स्यसिद्धौ ५।३।१०॥
लिम्पविन्द: ५।१।६०॥
लिहादिभ्य ५।१।५०॥
लूधूसू—त: ५।२।८७॥
वय:०शीले ५।२।२४॥
वर्त्स्यति० दि: ५।३।१॥
वर्त्स्यति० ले ५।४।२५॥
वर्योप० ये ५।१।३२॥
वर्ष० ग्रह: ५।३।५०॥
वर्षा० क्लीबे ५।३।२९॥
वहाभ्राल्लिह: ५।१।१२३॥
वह्यं करणे ५।१।३४॥
वाकाङ्क्षायाम् ५।३।१०॥
वाचंयमो०ते ५।१।११५॥
वा ज्वला० र्ण: ५।१।६२॥
वाटाट्यात् ५।३।१०३॥
वादेश्च० क: ५।२।६७॥
वाद्यत० वौ ५।२।१५॥
वाधारे० स्या ५।१।२१॥
वा वेत्ते: सु: ५।२।२२॥
वा हेतु क्त: ५।३।२॥
विच्छो नङ् ५।३।८६॥
विद्० णम् ५।४।५४॥
विधि० ने ५।४।२८॥
विन्द्विच्छू ५।२।३४॥
विपरि० र्ते: ५।२।५५॥
विश० क्ष्ण्ये ५।४।८१॥
विशैषा० श्रे ५।२।५॥
वृगो वस्त्रे ५।३।५२॥
वृद्भिक्षि० क: ५।२।७०॥
वृष्टिमा० वा ५।४।५७॥
वेत्ति० कित् ५।२।७५॥
वेर्थि० नम् ५।२।३॥
वेरश० ने ५।३।६९॥
वेर्दह: ५।२।६४॥
वेर्विच० न: ५।२।५९॥
वेश्च द्रो: ५।२।५४॥
वैणे क्वण: ५।३।२७॥
वोतात्प्राक् ५।४।११॥
वोद: ५।३।६१॥
व्यञ्ज० घञ् ५।३।१३२॥
व्यतिहा० ञ: ५।३।११६॥
व्यथ० मद्भय: ५।३।४७॥
व्यपाभे० ष: ५।२।६०॥
व्ययोद्रो:० णे ५।३।३८॥
व्याघ्रा० सो: ५।१।५७॥
व्याप्याच्चेवात् ५।४।७१॥
व्याप्यादाधारे ५।३।८८॥
व्याप्ये० च्यम् ५।१।४॥
व्युपाच्छीङ: ५।३।७७॥
व्रताभीक्ष्ण्ये ५।१।१५७॥
शंसं० डु: ५।२।८४॥
शंसि० यात् ५।३।१०५॥
शक० तुम् ५।४।९०॥
शकि० त् ५।१।२९॥
शकृत्० ग: ५।१।१००॥
शक्तार्हे० श्च ५।४।३५॥
शत्रा० सस्यौ ५।२।२०॥
शमष्ट० ण् ५।२।४९॥
शमो नाम्न्य: ५।१।१३४॥
शापे० थात् ५।४।५२॥
शाडू० न: ५।३।१४१॥
शीङ्० लु: ५।२।३७॥
शीलिका० ण ५।१।७३॥
शुनी० ट्घे: ५।१।११९॥
शुष्क० व ५।४।६०॥
शृक० कण् ५।२।४०॥
शृव० राह: ५।२।३५॥
शेषे० यदौ ५।४।२०॥
शोका० के ५।१।१४३॥
श्रुसद० वा ५।२।१॥
श्रो वायु० त्ते ५।३।२०॥
श्वादिभ्य: ५।३।९२॥
श्लिष० क्त: ५।१।९॥
षितोऽङ् ५।३।१०७॥
संख्याह० ट: ५।१।१०२॥
संगते० र्यम् ५।१।५॥
संघेऽनूर्ध्वे ५।३।८०॥
संचाय्य० तौ ५।१।२२॥
संनि० यम: ५।३।२५॥
संपरि० द: ५।२।५८॥
संप्रदा० य: ५।१।१५॥
संप्राद्वसात् ५।२।६१॥
संभाव० क्तौ ५।४।२२॥
संभावत् ५।४।४॥
संमद० हर्षे ५।३।३३॥
संवे: सृज: ५।२।५७॥
संस्तो: ५।३।६६॥
सति ५।२।१९॥
सतीच्छार्थात् ५।४।२४॥
सत्सामी० वा ५।४।१॥
सन्भिक्षा० रु: ५।२।३३॥
सप्तमी० के ५।३।१२॥
सप्तमी० के ५।४।३०॥
सप्त० यदि ५।४।३४॥
सप्तम्य० त्ति: ५।४।९॥
सप्तम्या: ५।१।१६९॥
सप्तम्यु० ढे ५।४।२१॥
सम: ख्य: ५।१।७७॥
समः० ज्वरे: ५।२।५६॥
समज० ण: ५।३।९९॥
समत्य० र: ५।२।६२॥
समनु० ध: ५।२।६३॥
समिणा० ग: ५।३।९३॥
समुदो० णौ ५।३।३०॥
समो मुष्टौ ५।३।५८॥

| | |
|---|---|
| समो वा | ५।१।४६॥ |
| सर्तः० मत्स्ये | ५।३।१७॥ |
| सर्वात्० श्च | ५।१।१११॥ |
| सस्मे ह्य० च | ४।४।४०॥ |
| सस्नि० नेमि | ५।२।३९॥ |
| सहरा० धेः | ५।१।१६७॥ |
| साति० ति· | ५।३।९४॥ |
| साधौ | ५।१।१५५॥ |
| साहिसा० त् | ५।१।५९॥ |
| सुगद्रु० रे | ५।१।१३२॥ |
| सुगू० त्ये | ५।२।२६॥ |
| सुयजो० प् | ५।१।१७२॥ |
| सुरा० पिबः | ५।१।७५॥ |
| सूत्राद्धारणे | ५।१।९३॥ |
| सूग्लहः० क्षे | ५।३।३१॥ |
| सृ० मरक्- | ५।२।७३॥ |
| सृ० वरप् | ५।२।७७॥ |
| सोमा० सुगः | ५।१।१६३॥ |
| स्तम्बात् घ्नश्च | ५।३।३९॥ |
| स्त्रियां क्तिः | ५।३।९१॥ |
| स्था० स्नुः | ५।२।३१॥ |
| स्थादिभ्य कः | ५।३।८२॥ |
| स्थापा० कः | ५।१।१४२॥ |
| स्थेश० वरः | ५।२।८१॥ |
| स्थो वा | ५।३।९६॥ |
| स्पृशो० कात् | ५।१।१४९॥ |
| स्मे च० ना | ५।२।१६॥ |
| स्मे पञ्चमी | ५।४।३१॥ |
| स्म्यज० रः | ५।२।७९॥ |
| स्वस्नेहा० षः | ५।४।६५॥ |
| स्वाङ्गत० श्च | ५।४।८६॥ |
| स्वाङ्गेना० ण | ५।४।७९॥ |
| स्वाद्वर्था० र्थात् | ५।४।५३॥ |
| स्वामि० र्थः | ५।१।३३॥ |
| हः व्रीह्योः | ५।१।६८॥ |
| हत्या० भावे | ५।१।३६॥ |
| हन० लात् | ५।४।६३॥ |
| हनो णिन् | ५।१।१६०॥ |
| हनो० देशे | ५।३।३४॥ |
| हनो वा० च | ५।३।४६॥ |
| हल० पुवः | ५।२।८९॥ |
| हशश्व० च | ५।२।१३॥ |
| हस्त० स्तेये | ५।३।७८॥ |
| हस्तार्था तः | ५।४।६६॥ |
| हस्ति० शक्तौ | ५।१।८६॥ |
| हिंसा० प्यात् | ५।४।७४॥ |
| ह्वगो० द्यमे | ५।१।९५॥ |
| हेतुतच्छी० त् | ५।१।१०३॥ |
| ह्वः समा० म्नोः | ५।३।४१॥ |


॥ इति पञ्चमाध्यायसूत्राणामकारादिकाऽनुक्रमणिका ॥

卐 卐 卐

## पञ्चमाध्याये- कृत्प्रत्ययानां वर्तमानादिविभक्तीनां च संक्षिप्ता विषयानुक्रमणिका-


| विषय- | सूत्राङ्क- |
|---|---|
| **प्रथमपादे-** | |
| कृत्संज्ञा, | १ |
| बहुलाधिकारः, | २ |
| कर्तरि कृत्, | ३ |
| कर्मकर्तरि- घुर- केलिम, कृष्टपच्यनिपातनं च, | ४ |
| संगतेकर्तरिअजर्यनिपातनम्, | ५ |
| कर्तरि रुच्यादिनिपातनम्, | ६ |
| कर्तरि वा भव्यादिनिपातनम्, | ७ |
| कर्तरि वा प्रवचनीयादिनिपातनम्, | ८ |
| कर्तरि वा क्त, | ९ |
| कर्तरि वा क्त आरम्भे, | १० |
| कर्तरि वा क्त, | ११ |
| आधारे वा क्त, | १२ |
| भावे क्त्वा- तुम्- अम्, | १३ |
| अपादाने भीमादिनिपातनम्, | १४ |
| सम्प्रदानादपादानाच्चान्यत्र उणादिप्रत्ययाः, | १५ |
| असरूपोत्सर्गोऽपवादे वा, | १६ |

| विषय- | सूत्राङ्क- |
|---|---|
| ध्यण्, | १७-२६ |
| तव्य- अनीय, | २७ |
| य, | २८-३१ |
| वर्यादियान्तनिपातनम्, | ३२-३४ |
| क्यप्- य, | ३५ |
| क्यबन्तनिपातनम्, | ३६-३९ |
| क्यप्, | ४०-४६ |
| कृत्यसंज्ञा | ४७ |
| णक्- तृच्, | ४८ |
| अच्, | ४९ |
| लिहादेरच्, | ५० |
| अजन्तनिपातनम्, | ५१ |
| अन, | ५२ |
| णिन्, | ५३ |
| क, | ५४-५५ |
| ड, | ५६ |
| डान्तनिपातनम्, | ५७ |
| श, | ५८-६१ |
| ण, | ६२-६४ |

| विषय- | सूत्राङ्क- |
|---|---|
| अकट्, | ६५ |
| थक्, | ६६ |
| टनण्, | ६७-६८ |
| अक, | ६९ |
| अकन्, | ७० |
| तिक्- सर्वकृत् नाम्नि, | ७१ |
| अण्, | ७२ |
| ण, | ७३ |
| टक्, | ७४-७५ |
| ड, | ७६-८१ |
| णिन्, | ८२ |
| टक्, | ८३-८७ |
| टगन्तनिपातनम्, | ८८-८९ |
| खि, | ९० |
| अच्, | ९१-९६ |
| इ, | ९७-१०० |
| अ, | १०१ |
| ट, | १०२-१०४ |
| ख- अण्, | १०५ |

| विषय– | सूत्राङ्क– |
| --- | --- |
| ख, | १०६–१०७ |
| खान्तनिपातनम्, | १०८ |
| ख, | १०९–११३ |
| खान्तनिपातनम्, | ११४–११५ |
| णिन्, | ११६ |
| खश्, | ११७–१२६ |
| खशान्तनिपातनम्, | १२७ |
| खिष्णु– खुकञ्, | १२८ |
| खनट्, | १२९ |
| ख, | १३० |
| खड्– ड– ख, | १३१ |
| डान्तनिपातनम्, | १३२–१३३ |
| अ, | १३४–१३७ |
| ट, | १३८–१४१ |
| क, | १४२ |
| कान्तनिपातनम् | १४३–१४४ |
| डुघ, | १४५ |
| विण्, | १४६ |
| मन् वन् क्वनिप् विच्, | १४७ |
| क्विप्, | १४८–१५० |
| क्विबन्ताणन्तनिपातनम्, | १५१ |
| टक्– सक्– क्विप्, | १५२ |
| णिन्, | १५३–१५८ |
| इन्, | १५९ |
| णिन्, | १६० |
| क्विप्, | १६१–१६५ |
| क्वनिप्, | १६६–१६७ |
| ड, | १६८–१७१ |
| ङ्वनिप् | १७२ |
| अतृ, | १७३ |
| क्त–क्तवतु, | १७४ |

॥ इति प्रथमपादः ॥

## अथ द्वितीयपादे–

| | | |
| --- | --- | --- |
| भूते | परोक्षा–वि० | १ |
| ,, | क्वसु कान | २–३ |
| ,, | अद्यतनी–वि० | ४–६ |
| भूतेऽनद्यते | ह्यस्तनी–वि० | ७–८ |
| ,, | भविष्यन्ती–वि० | ९–१० |
| ,, | परोक्षा–वि० | ११–१२ |
| ,, | ह्यस्तनी परोक्षा–वि० | १३ |
| ,, | ह्यस्तनी–वि० | १४ |
| ,, | अद्यतनी–वि० | १५ |
| ,, | वर्तमाना–वि० | १६ |
| भूते वर्तमानावत् | | १७ |
| भूते वर्तमाना | | १८ |
| वर्तमाने वर्तमाना | | १९ |
| वर्तमाने शतृ आनश्<br>भविष्यति स्यसहित आनश् | | २० |
| शतृ–आनश् | | २१ |
| वर्तमाने क्वसु | | २२ |
| ,, | शानि | २३–२४ |
| ,, | अतृश् | २५–२६ |
| वर्तमाने–शील-धर्म-साधौ तृन् | | २७ |
| ,, | इष्णु | २८–२९ |
| ,, | ष्णुक् | ३० |
| ,, | स्नु | ३१ |
| ,, | क्नु | ३२ |
| ,, | उ | ३३–३४ |
| ,, | आरु | ३५ |
| ,, | रु | ३६ |
| ,, | डि | ३८–३९ |
| ,, | उकण् | ४०–४१ |
| ,, | अन | ४२–४४ |
| ,, | निषेधः | ४५ |
| ,, | अन | ४६ |
| ,, | ऊक | ४७–४८ |
| ,, | घिनण् | ४९–६६ |
| ,, | णक | ६७–६९ |
| ,, | टाक | ७० |
| ,, | इन् | ७१–७२ |
| ,, | मरक् | ७३ |
| ,, | घुर | ७४ |
| ,, | ,, कित् | ७५ |
| ,, | रु-रुक-लुक | ७६ |
| ,, | ट्वरप् | ७७-७८ |
| ,, | र | ७९ |
| ,, | नजिङ् | ८० |
| ,, | वर | ८१-८२ |
| ,, | क्विप् | ८३ |
| वर्तमाने– | डु | ८४ |
| ,, | इत्र | ८५–८७ |
| ,, | त्रट् | ८८–८९ |
| ,, | त्र | ९० |
| ,, | त्रट् | ९१ |
| ,, | क्त | ९२ |
| ,, | उणादि | ९३ |

॥ इति द्वितीयपादः ॥

## अथ तृतीयपादे–

[ भविष्यदर्थे सू० १–१५. ]

| | | |
| --- | --- | --- |
| भविष्यति– | इन् निपातनम् | १ |
| ,, | क्त | २–३ |

[ त्यादिविभक्ति सू० ४–१३. ]

| | | |
| --- | --- | --- |
| भविष्यति– | भविष्यन्ती | ४ |
| ,, | श्वस्तनी | ५–६ |
| ,, | वर्तमाना | ७–११ |
| ,, | वर्तमाना पञ्चमी च | १२ |
| ,, | भविष्यन्ती तुम् णकच् च | १३ |
| ,, | कर्मपूर्वकाद् अण् | १४ |
| ,, | भाववचना घञादयः | १५ |
| कर्तरि– | घञ् | १६–१७ |
| भावाकर्त्रोः– | घञ् | १८–२२ |
| ,, | अल् | २३–३७ |
| करणे– | ,, | ३८–४० |
| भावाकर्त्रोः– | ,, | ४१–५३ |
| ,, | घञ् | ५४–८१ |
| ,, | क | ८२ |
| ,, | अथु | ८३ |
| ,, | त्रिमक् | ८४ |
| ,, | न | ८५ |
| ,, | नङ् | ८६ |

| विषय– | सूत्राङ्क– |
|---|---|
| ,, कि | ८७–८९ |
| भावे न ञिन् | ९० |
| [ स्त्रियां सू० ९१–१२२. ] | |
| भावाकर्त्रोः स्त्रियां– क्ति | ९१–९४ |
| भावे– ,, – ,, | ९५–९६ |
| ,, ,, – क्यप् | ९७–९८ |
| भावाकर्त्रोः ,, – ,, | ९९ |
| ,, ,, – क्यप् श | १०० |
| ,, ,, – निपातनम् | १०१ |
| ,, ,, वा–य | १०२–१०३ |
| ,, ,, – अ य | १०४ |
| ,, ,, – अ | १०५–१०६ |
| ,, ,, – अङ् | १०७–११० |
| ,, ,, – अन | १११–११३ |
| भावकर्त्रोः स्त्रियां– क्विप् | ११४–११५ |
| भावे ,, – अ | ११६ |
| भावाकर्त्रोः ,, – अनि | ११७–११८ |
| ,, ,, – वा इञ् | ११९ |
| ,, ,, – णक | १२०–१२२ |
| भावे क्लीबे – क्त | १२३ |
| ,, ,, – अनट् | १२४–१२५ |
| कर्तरि– अनट् | १२६–१२७ |
| कर्मापादाने– ,, | १२८ |
| करणाधारे– ,, | १२९ |
| ,, – घ | १३०–१३१ |
| ,, – घञ् | १३२–१३६ |
| ,, – घञ् ड डर इकवक घ | १३७ |

| विषय– | सूत्राङ्क– |
|---|---|
| धातोः स्वरूपेऽर्थे च– इ कि श्तिव् | १३८ |
| कृच्छ्राकृच्छ्रात् दुःस्वीषतः पराद् धातोः } खल् | १३९ |
| ,, पराद् भू–कृगः– अन | १४० |
| ,, ,, अव्यर्थे शास्वादे ,, | १४१ |
| ।। इति तृतीयपादः ।। | |
| **अथ चतुर्थपादे–** | |
| वर्तमानसामीप्ये वर्तमानावद् वा प्रत्ययाः, | १ |
| आशंस्ये भूतवद् वर्तमानावच्च प्रत्ययाः, | २ |
| ,, क्षिप्रार्थे उपपदे-भविष्यन्ती, आशंसार्थे उपपदे च– सप्तमी } | ३ |
| सम्भावने सिद्धवत् प्रत्ययाः, | ४ |
| अनद्यतनविहितप्रत्ययाभावः, | ५–८ |
| भविष्यति–क्रियातिपत्तिः, | ९ |
| भूते ,, | १०–११ |
| वर्तमाना, | १२ |
| वर्तमाना सप्तमी च, | १३ |
| सप्तमी भविष्यन्ती च, | १४–१५ |
| भविष्यन्ती, | १६ |
| सप्तमी, | १७–१९ |
| भविष्यन्ती, | २० |
| सप्तमी, | २१–२६ |
| सप्तमी पञ्चमी च, | २७–२८ |
| पञ्चमी कृत्याश्च, | २९ |
| सप्तमी पञ्चमी कृत्याश्च, | ३० |

| विषय– | सूत्राङ्क– |
|---|---|
| पञ्चमी, | ३१–३२ |
| तुम्, | ३३ |
| सप्तमी, | ३४ |
| सप्तमी कृत्याश्च, | ३५ |
| णिन् कृत्याश्च, | ३६ |
| तृच्, | ३७ |
| आशीः पञ्चमी च, | ३८ |
| अद्यतनी, | ३९ |
| अद्यतनी ह्यस्तनी च, | ४० |
| धातुसम्बन्धे अयथाकालमपि प्रत्ययाः } | ४१ |
| आभीक्ष्ण्ये सर्वविभक्तिवचने हिस्वौ, तद्युष्मदि च त-ध्वमौ यथाविधि } | ४२ |
| सामान्यार्थधातुसम्बन्धे समुच्चये तु वा } | ४३ |
| क्त्वा | ४४–४७ |
| ख्णम् क्त्वा च | ४८ |
| ख्णम् वा | ४९–५३ |
| णम् वा | ५४–८३ |
| क्त्वा णम् च | ८४–८८ |
| सप्तमी | ८९ |
| तुम् | ९० |
| ।। इति चतुर्थपादः ।। | |
| ।। समाप्तः पञ्चमोऽध्यायः ।। | |


**।। इति पञ्चमाध्यायविषयानुक्रमणिका समाप्ता ।।**

卐 卐 卐

। अर्हँ ।

**आशैशवशीलशालिने श्रीनेमीश्वराय नमो नमः ।**

कलिकालसर्वज्ञ-श्रीहेमचन्द्रसूरिभगवत्प्रणीतं-

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।

**स्वोपज्ञतत्त्वप्रकाशिकाभिधबृहद्वृत्ति-स्वोपज्ञतत्त्वप्रकाशिका-प्रकाश--शब्दमहार्णवन्यासाभिधबृहन्न्यासंवलितम् ।**

## अथ पञ्चमोऽध्यायः

**तत्र**

### ॥ प्रथमपादः ॥

**आ तुमोऽत्यादिः कृत् । ५. १. १. ॥**

**त० प्र०—धातोर्विधीयमानस्त्यादिवर्जितो वक्ष्यमाणः प्रत्ययस्तुममभिव्याप्य कृत्संज्ञो भवति । धनघात्यः, उदकेविशीर्णम्, गोदायो व्रजति । अत्यादिरिति किम् ? प्रणिस्ते । कृत्प्रदेशाः—"तिक्-कृतौ नाम्नि" [ ५.१.७१. ] इत्येवमादयः ॥ १ ॥**

। अर्हम् ।

### पञ्चमाध्यायप्रथमपादे-

**श० म० न्यासानुसन्धानम्-**

**आ तुमो०** । त्यादिभिन्नस्य प्रत्ययस्य कृत्संज्ञाकरणात् कृतां तिवादिज्ञानाधीनज्ञानकत्वात् पूर्वाध्याये तिवादयो निरूपिताः, भेदो ह्यन्योऽन्याभावः, अभावज्ञाने च प्रतियोगिज्ञानस्य कारणत्वमिति यन्निरूपितो भेदो वाच्यस्तन्निरूपणमादावुचितमेव, अतश्च त्यादीन् निरूप्य कृतां निरूपयितुमुपक्रमत आचार्य इति साधीयसी प्रकरणसङ्गतिः । तदाह- **आ तुमोऽत्यादिः कृदिति** । सूत्रे प्रकृतेरनिर्दिष्टतया प्रत्ययस्य नियमतः प्रकृतिसापेक्षत्वात् कृतां प्रकृतिं निर्दिशति—**धातोरिति**, एवं चैषां धातोरेव विधीयमानत्वमभिमतमित्येतदपि सूचितं भवति ।

तथा च पाणिनीये "धातोः" [ ३. १. ९१. ] इत्यधिकृत्यैव कृतः प्रत्यया उक्ताः । तत्रेत्थमाशङ्कितं भाष्ये—"कानि पुनरस्य योगस्य प्रयोजनानि ? प्रयोजनं प्रातिपदिकप्रतिषेधः, प्रातिपदिकप्रतिषेधः प्रयोजनम् । धातोस्तव्यदादयो यथा स्युः प्रातिपदिकान्मा भूवन्निति । नैतदस्ति प्रयोजनम्, साधनेन तव्यदादयो विधीयन्ते, साधनं च क्रियायाः, क्रियाऽभावात् साधनाभावः । साधनाभावादसत्यपि धात्वधिकारे प्रातिपदिकात् तव्यदादयो न भविष्यन्ति । स्वपादिषु तर्हि, स्वपादिषु तर्हि प्रयोजनम् । स्वपति सुपतीति मा भूत्" इति ।

अयमाशयः--यद्यपि धात्वधिकाराभावेऽपि कारकविशेषापेक्षास्तव्यदादयः प्रत्ययाः प्रकृतिवाच्यान्तरङ्गक्रियासाधनसम्भवे शब्दान्तरवाच्यबहिरङ्गक्रियासाधने प्रातिपदिकेभ्यो न भविष्यन्तीति विनापि तदधिकारं धातुभ्य एव भविष्यन्तीति धात्वधिकारो नावश्यकः, तथापि स्वपितीत्यर्थे प्रयुज्यमानाः सुपतीत्यादयोऽपभ्रंशरूपाः, तेषु विद्यमाना अपभ्रंशा एव धातवः, तेषां क्रियावाचकत्वमस्तीति साधनापेक्षत्वेन तेभ्यः कृतः प्रत्यया मा भूवन्निति धात्वधिकार आवश्यकः । यद्यपि "क्रियार्थो धातुः" [ ३. ३. ३. ] इति सूत्रेण क्रियावाचिनामपभ्रंशानामपि धातुत्वमायाति, तथापि तत्र व्याकरणान्तरसंवादेन गणपठितत्वस्यापि धातुसंज्ञाप्रयोजकत्वस्यावश्यं

संग्राह्यतया तेषां क्रियावाचकत्वेऽपि भ्वादिगणपठितत्वाभावेन न धातुत्वमिति न तेभ्यः कृतामुत्पत्तिः । स्वमते च साधूनामेवान्वाख्येयत्वेनासाधुशब्दमूलभूता अपभ्रंशाः प्रकृतित्वबहिर्भूता एवेति मत्वा धातोरित्यधिकारो न कृतः, शिष्याणां स्पष्टप्रतिपत्तये वृत्तौ तदन्तर्भावः कृत इत्यवधेयम् ।

**त्यादिवर्जित** इति—तुमो विधानस्य मध्ये एव त्यादयोऽपि विहिताः पूर्वं च, तत्र धातोर्विधीयमानस्य प्रत्ययस्य कृत्संज्ञाविधाने तेषामपि धातोरेव विहितत्वेन कृत्संज्ञा प्राप्ता 'अत्यादिः' इति पदेन पर्युदस्यते, एवं च ते उद्देश्यकोटितो बहिर्भूता इति न विधेयकृत्संज्ञान्वयिनो भवन्ति, **'वक्ष्यमाणः'** इत्युक्त्या च पूर्वोक्तानां त्यादिवर्जितानामपि ण्यादीनां कृत्संज्ञा परिहृता भवति, तेऽपि हि धातोर्विधीयन्ते त्यादिभिन्नाश्चोद्देश्यकोटिगता एव, वक्ष्यमाणत्वोक्त्या च न तेषामुद्देश्यत्वमिति भावः । **तुममभिव्याप्ये**ति—तदवधिकत्वात् कृत्प्रत्ययानाम्, यद्यपि तदग्रे विहितानां प्रत्ययानां धातोर्विहितत्वाभावेनैव कृत्संज्ञोद्देश्यबहिर्भूतत्वं, तथापि वस्तुगतिमनुरुध्येदं स्वरूपमात्रपरिचायकं न तु व्यावर्तकमिति हृदयम्, इतोऽग्रे वक्ष्यमाणानामेव धातुभ्यो विहितानां प्रत्ययानां [त्यादिवर्जितानां] संज्ञोद्देश्यत्वेन ततोऽग्रे स्वतोऽप्राप्तेः ।

"हनंक् हिंसा-गत्योः" धनेन हन्यत इति—**घनघात्यः** इति—"ऋवर्णव्यञ्जनाद् ध्यण्" [ ५. १. १७. ] इति ध्यण् "ञ्णिति घात्" [ ४. ३. १००. ] इति हनो घातादेशः, "कारकं कृता" [ ३. १. ६८. ] इति समासः । "शॄश् हिंसायाम्" उदके विशीर्यते स्मेति—**उदकेविशीर्णः** इति—अत्र "ऋवर्णा०" [४. ४. ५७.] इतीटो निषेधः "ऋल्वा०" [४. २. ६८.] इति क्तस्य नः "ऋतां०" [ ४. ४. ११६. ] इतीरादेशः "म्वादे०" [२. १. ६३.] इति दीर्घः "रष्ट०" [२. ३. ६३.] इति नस्य णः, "कृत् सगति०" [७. ४. ११७.] इति विपूर्वस्यापि क्तान्तत्वात् "क्तेन" [३. १. ९२.] इति समासः, "तत्पुरुषे कृति" [३. २. २०.] इति सप्तम्या अलुप् च । "डुदांग्क् दाने" गां ददातीति—**गोदायः** इति—अत्र "कर्मणोऽण्" [५. १. ७२.] इत्यण् प्रत्ययः, "आत ऐः कृञ्ञौ" [४. ३. ५३.] इत्यात ऐः, तस्यायादेशः "ङस्युक्तं कृता" [ ३. १. ४९. ] इति समासश्च । यद्वा गां दास्यतीति "कर्मणोऽण्" [ ५. ३. १४. ] इत्यणि—**गोदायो व्रजती**ति । **अत्यादिरिति किमि**ति—अस्तु नाम धातुविहितानां त्यादीनामपि कृत्संज्ञा, ततः को दोष इति प्रश्नः, उत्तरयति—**प्रणिंस्ते** इति—"णिसुकि चुम्बने" इति प्रपूर्वस्य 'निंस्' धातोस्तेप्रत्यये णोपदेशत्वात् "अदुरुपसर्ग०" [ २. ३. ७७. ] इति णत्वे-प्रणिंस्ते इति भवति, अत्र 'तेप्रत्ययस्य' कृत्संज्ञायां "निंस-निक्ष-निन्दः कृति वा" [ २. ३. ८४. ] इति विकल्पेन णत्वापत्तेरित्युत्तराशयः । संज्ञायाः फलं हि विधिसूत्रेषु तदुपयोग एवेति विधिप्रदेशमस्य निर्दिशति—**कृत्प्रदेशाः—"तिक्-कृतौ नाम्नि" इत्येवमादयः** इति—तथा च तेषु लघुनोपायेन व्यवहारार्थमेवेदं संज्ञाकरणमिति सूचितम् , लघ्वर्थं संज्ञाकरणमिति भाष्यकारः, लघुनोपायेन संज्ञिनां प्रतिपत्तिर्यथा स्यादित्यर्थं संज्ञाकरणमिति तदाशयः, नहि सम्भवोऽस्ति—कृत्संज्ञकानां प्रत्ययानामेकदा स्वरूपोच्चारणेन विधिप्रदेशेषु प्रत्यायनं कुर्यादिति तदर्थमिदं सूत्रमिति प्रयोजनमेतेन प्रदर्शितम्, "तिक्-कृतौ नाम्नि" [ ५. १. ७१. ] इति विधिस्थलमुदाहृत्य 'इत्येवमादयः' इत्यनेन "निंस-निक्ष-निन्दः कृति वा" इत्येवमादयोऽनुवादप्रदेशा अपि कृत्प्रदेशा एवेति सूचितम् ॥ ५. १. १. ॥

## बहुलम् । ५. १. २. ॥

**त० प्र०—अधिकारोऽयम् । कृत्प्रत्ययो यथा निर्दिष्टादर्थादन्यत्रापि बहुलं भवति । पादाभ्यां ह्रियते-पादहारकः, गले चोप्यत इति—गलेचोपकः, मुह्यत्यनेनाऽऽस्मेति—मोहनीयं कर्म, स्नाति तेनेति—स्नानीयं चूर्णम्, एवं-यानीयोऽश्वः । दीयते तस्मै इति—दानीयोऽतिथिः, संप्रदीयतेऽस्मा इति— संप्रदानम्, एवं-स्पृहणीया विभूतिः । समावर्तते तस्मादिति— समावर्तनीयो गुरुः, एवमुद्वेजनीयः खलः । तिष्ठन्त्यस्मिन्निति- स्थानीयं नगरम्, एवं—शयनीयः पल्यङ्कः ॥ २ ॥**

### श० म० न्यासानुसन्धानम्—

**बहु०** । अनेन कस्यचनार्थस्य सूचनाऽभावात् कथमस्य सूत्रत्वं, सूचनाद्धि सूत्रमुच्यतेऽत आह—**अधिकारोऽयमि**ति ।

"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥"

इति लक्षणलक्षितेषु प्रकारेष्वयमधिकारो नाम प्रकारः सूत्रस्येत्याशयः । अधि-आधिक्यस्य करणमधिकार इति तदर्थः । प्रकृते च स्वदेशे वाक्यार्थबोधाजनकत्वे सति उत्तरसूत्रैकवाक्यतया वाक्यार्थबोधजनकत्वमधिकारसूत्रत्वम् ।

अधिकारस्य च त्रिप्रकारत्वं "षष्ठी स्थानेयोगा ।" [१.१.४८.] इति सूत्रभाष्ये वर्णितम् , तथाहि—"अधिकारो नाम त्रिप्रकारः, कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति । अपरोऽधिकारो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण । अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते ।" इति । अत्र प्रथमलक्षणेन

"एकदेशस्थिता शास्त्रभवने याति दीपताम् ।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते ॥"

इति लक्षणलक्षितानां परिभाषासूत्राणामधिकारत्वमुक्तम् । तथाहि तत्र कैयटः—पारार्थ्यसाम्यात् परिभाषाऽप्यधिकारशब्देनोच्यते कश्चित्, परिभाषारूप इति भावः । एतल्लक्षणं च परिभाषाणां यथोद्देश-कार्यकालोभयपक्षसमर्थकतया नागेशेन वर्णितम् , तथाहि कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयतीति लक्षणभाष्यव्याख्यायाम् —"इदं च यथोद्देशपक्षे स्पष्टमेव । कार्यकालपक्षेऽपि स्वविषयसर्वशास्त्रैकवाक्यत्वादेवमुक्तिः पठितदेशस्थेनैव तत्र तत्र तद्बुद्धिजननात्, दीपो यथा प्रभाद्वारा सर्वगृहप्रकाशकः, एवमेतत् स्वबुद्धिजननद्वारा सर्वशास्त्रोपकारकम्, न तु तत्पक्षे [कार्यकालपक्षे]ऽप्यचेतनस्य शास्त्रस्य स्वदेशं विहाय तद्देशगमनं सम्भवतीति बोध्यम् । पठितदेशस्थत्वमेव सर्वथा बोधयितुमेकदेशस्थ इत्युक्तम् ।" इति । द्वितीयलक्षणं च 'यत्र स्वरितत्वप्रतिज्ञाहीनमपि पदं शास्त्रं वोत्तरत्र चकारेणानुकृष्यते तत् । तृतीयलक्षणाक्रान्तं च प्रकृतं सूत्रम्, तथाहि—सर्वेषामेव कृत्प्रत्ययानां बाहुलकेन विधानार्थं सर्वेषु सूत्रेषु बहुलमिति पठनीयं स्यात्, इति प्रतियोगं तस्य निर्देशो न कर्तव्यो भवेदित्येकत्रैव पठितस्य तस्य योगे योगे उपस्थितिः स्वीक्रियत इति । बाहुलकं च चतुर्विधत्वेनोक्तं प्राचीनैः—

"क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद् विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य
चतुर्विधं बाहुलकं वदन्ति ॥" इति ।

तत्र क्वचिदन्यदेवेति तृतीयबाहुलकाभिप्रायेण सूत्रमिदं व्याचष्टे—**कृत् प्रत्ययो यथानिर्दिष्टादर्थादेरन्यत्रापीति**, अर्थादेरित्यत्रादिपदमुपपद-प्रकृतिपरम् , इह चार्थस्य व्यभिचारो दर्शयिष्यते, उपपद-प्रकृतिव्यभिचारो यथाप्रयोगमूहनीयः ।

विगृह्योदाहरति—**पादाभ्यां ह्रियते-पादहारकः** इति—"हृंग् हरणे" पादाभ्यां ह्रियते इति "णक-तृचौ" [ ५. १. ४८. ] इति णके "कारकं कृता" [ ३. १. ६८. ] इति समासे—पादहारक इति, **गले चोप्यत इति-गलेचोपकः** इति—अत्रापि णकप्रत्ययः, मयूरव्यंसकादित्वात् तत्पुरुषः, "तत्पुरुषे कृति" [ ३. २. २०. ] इति सप्तम्या अलुप् च, "कर्तरि" [ ५. १. ३. ] इति कर्तरि विधीयमानोऽपि णको बाहुलकबलादुभयत्र कर्मणि भवतीति भावः । **मुह्यत्यनेनात्मेति-मोहनीयं कर्म,** "मुहौच् वैचित्ये" वैचित्यमविवेकः, मुह्यति सदसद्विवेकविकलो भवति आत्माऽनेनेति "तव्याऽनीयौ" [ ५. १. २७. ] इत्यनीयप्रत्यये मोहनीयमिति, "ते कृत्याः" [ ५. १. ४७. ] इति 'घ्यण्-तव्य-अनीय-य-क्यप्' इति पञ्च प्रत्ययाः कृत्यसंज्ञका भवन्ति, "तत् साप्यानाप्यात् कर्मभावे कृत्य-क्त-खलर्थाश्च" [ ३. ३. २१. ] इति कृत्यप्रत्ययः सकर्मकात् कर्मणि अकर्मकाच्च भावे भवति, सत्यप्येवं बाहुलकबलात् मोहनीयमित्यत्र करणेऽनीयप्रत्ययो भवति, एवमग्रेऽपि ज्ञेयमिति भावः । **स्नाति तेनेति-स्नानीयं चूर्णमिति**—स्नाति शुचिर्भवति अनेनेति करणेऽनीयप्रत्यये स्नानीयमिति । अतिदिशति—**एवं-यानीयोऽश्वः** इति—याति गच्छति अनेनेत्यनीये-यानीयः । सम्प्रदानेऽनीयमुदाहरति—**दीयते तस्मा इति-दानीयोऽतिथिः; सम्प्रदीयतेऽस्मा इति सम्प्रदानमिति**, अतिदिशति—**एवं-स्पृहणीया विभूतिरिति**—स्पृहयति अस्यै इति स्पृहणीया, "स्पृहेर्व्याप्यं वा" [ २. २. २६. ] इति कर्मणो वा सम्प्रदानत्वम् । अपादानेऽनी-

यमुदाहरति—**समावर्तते तस्मादिति–समावर्तनीयो गुरुः**, अतिदिशति–**एवम्–उद्वेजनीयः खलः** इति—उद्विजतेऽस्मादिति–उद्वेजनीयः । अधिकरणेऽनीयमुदाहरति—**तिष्ठन्त्यस्मिन्निति–स्थानीयं नगरमिति**, अतिदिशति—**एवं–शयनीयः पल्यङ्कः इति**–शेतेऽस्मिन्निति–शयनीयः ॥ ५. १. २. ॥

## **कर्तरि** । ५. १. ३. ॥

**त० प्र०—कृत्प्रत्ययोऽर्थविशेषनिर्देशमन्तरेण कर्तरि भवति । कारकः, कर्ता, पचः, नन्दनः ॥३॥**

**श० म० न्यासानुसन्धानम्–कर्तरि** । प्रायस्तत्र तत्रार्थनिर्देशस्य कृतत्वादस्य किं प्रयोजनमित्याशङ्कायामाह–**अर्थविशेषनिर्देशमन्तरेणेति**–यत्र प्रत्ययस्यार्थविशेषो न निर्दिष्टः स स्वार्थे मा भूत् 'अनिर्दिष्टार्थप्रत्ययस्य स्वार्थे विधानम्' इति सामान्यनियमादिति तेषामर्थनिर्देशार्थमिदं सूत्रमिति ।

अस्य सूत्रस्यावश्यकत्वमित्थयुक्तं भाष्ये "कर्तरि कृत्" [ ३. ४. ६७. ] इति सूत्रे–"किमर्थमिदमुच्यते" कर्तरि कृद्वचनमनादेशे स्वार्थविज्ञानात् । कर्तरि कृतो भवन्तीत्युच्यते । किं प्रयोजनम् ? अनादेशे स्वार्थविज्ञानात् । अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति । + + + । एवमिमे प्रत्ययाः स्वार्थे स्युः । स्वार्थे मा भूवन् कर्तरि यथा स्युरित्येवमर्थमिदमुच्यते । नैतदस्ति प्रयोजनं यमिच्छति स्वार्थे आह तं भावे घञ् भवतीति । कर्मणि तर्हि मा भूवन्निति । कर्मण्यपि यमिच्छति आह तं 'घः कर्मणि ष्ट्रन्निति । करणाधिकरणयोस्तर्हि मा भूवन्निति । करणाधिकरणयोरपि यमिच्छति तमाह ल्युट् करणाधिकरणयोर्भवतीति । सम्प्रदानापादानयोस्तर्हि मा भूवन्निति । सम्प्रदानापादानयोरपि यमिच्छत्याह तं 'दाशगोघ्नौ सम्प्रदाने' 'भीमादयोऽपादाने' इति । य इदानीमतोऽन्यः शेषः सोऽन्तरेण वचनं कर्तर्येव भविष्यति । तदेव तर्हि प्रयोजनं–स्वार्थे मा भूवन्निति । ननु चोक्तं यमिच्छति स्वार्थे आह तं भावे घञ् भवतीति । अन्यः स भावो बाह्यः प्रकृत्यर्थात् । अनेनेदानीमाभ्यन्तरे भावे स्युः । तत्र मा भूवन्निति कर्तृग्रहणम् ।" इति ।

अयमाशयः—यद्यपि कर्तरीत्यस्याभावे 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति स्वार्थे प्रत्ययाः प्राप्नुवन्ति, तथापि धातोः स्वार्थो हि भावः [ क्रिया ] धातोरर्थः क्रियेति प्रसिद्धेः, भावे च विशिष्य घञादयो विहिताः, यदि चार्थानिर्देशेन भाव एव स्युरलं तेषां 'भावे' इत्यधिकृत्य विधानेन, विधीयन्ते च, एवं च ये भाव इत्यधिकृत्य विधीयन्ते ते एव भावे स्युर्नान्ये, ततश्च कर्तारं विना धात्वर्थस्यानुपपद्यमानतया तस्य कर्तैवान्तरङ्ग इति अनिर्दिष्टार्थाः प्रत्ययाः कर्तर्येव भविष्यन्ति । न च कर्तारमिव कारकान्तराण्यपि क्रिययाऽपेक्ष्यन्त एवेति तेषु कृतः कुतो न भवन्तीति शङ्कनीयम्, तेषु तेषु कारकान्तरेषु विशिष्य तत्तत्सूत्रैः प्रत्ययानां विहितत्वेन न किमपि कारकमृते कर्तुरवशिष्यते, अतः परिशेषादनिर्दिष्टार्थाः कृतः कर्तर्येव भविष्यन्तीति प्राप्ते तस्य वैयर्थ्ये भाष्यकृता पुनः पूर्वोक्तमेव प्रयोजनं स्थापितं—स्वार्थे मा भूवन्निति । शिष्यश्च तदाशयमजानानः प्रत्याह—'भावे' इत्यधिकृत्य ये विधीयन्ते त एव भावे स्युरिति । भाष्यकृत् तं प्रबोधयन्नाह—घञादीनां वाच्यो भावः प्रकृत्यर्थाद् बहिर्भूतः, ये चानिर्दिष्टार्थाः प्रत्ययाः स्युस्ते आभ्यन्तरे भावे स्युरिति ।

पुनः शिष्य आह—"कः पुनरेतयोर्भावयोर्विशेषः" इति । भाष्यकृत् पूर्वोक्तं भावभेदं स्पष्टयति—"उक्तो भावभेदो भाष्ये" इति । "सार्वधातुके यक्" [ ३. १. ६७. ] इति सूत्रे भावभेदो विस्तरेण वर्णित इति भावः ।

तत्रत्यो ग्रन्थश्चेत्थम्—"इह पश्यामः—कर्मणि द्विवचनबहुवचनान्युदाह्रियन्ते–पच्येते ओदनौ, पच्यन्ते ओदना इति । भावे पुनरेकवचनमेव–आस्यते भवता, आस्यते भवद्भ्याम्, आस्यते भवद्भिरिति । केनैतदेवं भवति ।

अयमाशयः—क्रियाप्रधानमाख्यातमिति स्वमतम्, सा च क्रिया साध्यरूपत्वान्निवृत्तभेदा, असिद्धे हि वस्तुनि को भेदो ज्ञातुं शक्येत, तथापि तत्र यथा साधनभेदात् कर्तृकर्माभिधायिनि प्रत्यये सति तदनुरूपं द्विवचन-बहुवचने भवतस्तथा भावाभिधायिन्यपि लकारे ते प्रसजतः । अथ समानपदवाच्यसाधनसंख्यामाश्रित्य द्विवचन-बहुवचने

भवतः, कर्तृ-कर्मवाच्ये च साधनभूते कर्तृ-कर्मणी क्रियावाचकपदवाच्ये एव, भावप्रत्ययस्थले च न किमपि साधनं [ कारकं ] तत्पदवाच्यमिति न तत्संख्याश्रिते द्विवचनबहुवचने इति चेत् ? तर्हि पाकः पाकौ इत्यत्र ते न प्राप्नुतः ? तत्रापि कस्यचन साधनस्य घञाभिधानात्, इति न किमपि निमित्तं पश्यामो येन भावस्थले द्विवचनबहुवचने भवत इति ।

उत्तरमाह—कर्मानेकम्, तस्यानेकत्वाद् द्विवचनबहुवचनानि भवन्ति, भावः पुनरेक एव, कथं तर्हि द्विवचनबहुवचनानि भवन्ति, पाकौ पाका इति । आश्रयभेदात्, यदसौ द्रव्यं श्रितो भवति भावस्तस्य भेदाद् द्विवचन-बहुवचनानि भवन्ति ।

अयमर्थः- -कर्मशक्त्याधारो द्रव्यमनेकम्, शक्तिशक्तिमतोश्च शब्देन भेदो न प्रतिपादयितुं शक्य इति शक्त्यभिधायिनाऽऽख्यातेन शक्तिमद्द्रव्यवाचिन ओदनशब्दस्य सामानाधिकरण्यं भवति, तदनुकूलं चाख्यातेऽपि संख्याभेदः सिद्धः । भावः पुनरभिन्न इति भेदनिबन्धनत्वाद् द्वित्वादिसंख्या न भवति । घञन्तस्थले च भावस्य द्रव्याश्रिततयाश्रयभूतद्रव्यभेदनिबन्धने द्वित्वबहुवचने भवत इति पाका इत्यादिप्रयोगाणां नानुपपत्तिः । पाकस्याश्रया हि गुडतिलोदनादयो भिद्यन्तेऽतस्तन्निबन्धनैव पाकादिषु बहुवचनोपपत्तिरिति भावः ।

पुनः पूर्वपक्षी शङ्कते- -'इहापि तर्हि यावन्तस्ते तां क्रियां कुर्वन्ति सर्वे ते तस्या आश्रयभूता भवन्ति, तद्भेदाद् द्विवचनबहुवचनानि प्राप्नुवन्ति' इति । उत्तरयति एवं तर्हीदं तावत् संप्रष्टव्यः—किमभिसमीक्ष्यैतत् प्रयुज्यते पाकौ पाका इति । यदि तावत् पाकविशेषानभिसमीक्ष्य, यश्चौदनस्य पाको, यश्च गुडस्य, यश्च तिलानां, बहवस्ते शब्दाः सरूपाश्च, तत्र युक्तं बहुवचनमेकशेषश्च । तिङभिहिते चापि तदा भावे बहुवचनं श्रूयते । तद्यथा — उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्त इति ।

अथ कालविशेषानभिसमीक्ष्य, यश्चाद्यतनः पाको, यश्च ह्यस्तनो यश्च श्वस्तनस्तेऽपि बहवः शब्दाः सरूपाश्च, तत्र युक्तं बहुवचनमेकशेषश्च । तिङभिहिते चापि तदा भावेऽसारूप्यादेकशेषो न भवति—आसि, आस्यते, आसिष्यते इति ।

अत्र पूर्वपक्षिणोऽयमाशयः—यथा पाक इत्यादिघञन्तस्थले आश्रयभेदात् पाकस्य भेदमाश्रित्य द्विवचनादयः प्रयुज्यन्ते, तथा आख्यातवाच्यस्यापि भावस्याश्रयभेदाद् भेदोऽस्तु, ततश्च ततोऽपि वचनभेदप्रसङ्ग इति । समाधानभाष्यस्यायमाशयः—पाकस्याश्रया भिन्नप्रकारा ओदनगुडतिलादयस्तत्राश्रयगतप्रकारभेदानां पाकशब्दादवगतिमाश्रित्य तत्र द्विवचनाद्युत्पत्तिरुचिता, तिङन्तेषु यत्राश्रयकृतभेदावगतिरस्ति, यथा 'उष्ट्रासिकाः आस्यन्ते' इति, तत्राख्यातेऽपि भवति बहुवचनमिति । अत्राश्रयाणामुष्ट्राणां स्वरूपादिभिर्भेदादनेकप्रकारयुक्तान्यासनानि, तत्सामानाधिकरण्याच्चाख्यातवाच्यभावस्यापि भेदादास्यन्ते इति बहुवचनं युक्तम्, अत्रेवशब्दप्रयोगं विनाऽपि तदर्थावगतिर्भवति । तथा चोष्ट्रासिकाः आस्यन्ते इत्यत्र यादृशान्युष्ट्राणामनेकप्रकाराण्यासनानि तादृशानि देवदत्तादिभिः क्रियन्ते इति । भवद्भिरास्यते इत्यत्र चाश्रयभेदादाश्रितक्रियाभेदस्याप्रतीयमानत्वात् प्रयोजनाभावाद् भावार्थो भेदं नोपादत्ते इत्येकवचनमेव भवति, यथा—'ताम्रः पलाशेषु बभूव रागः' इत्यत्र पलाशरूपाश्रयानेकत्वेऽपि 'रागः' इत्यत्रैकवचनमेव भवति, रागस्यैकजातीयतया भेदानवगमात्, तथा भवद्भिरास्यते इत्यत्रापीति भावः । नहि सर्वत्राश्रयभेदादाश्रितस्य भेदप्रतिपत्तिनियमः, घटान् पचतीत्यादौ पाकाश्रयाणां घटानां भिन्नत्वेऽपि पाकस्यैकत्वप्रतीतेः स्पष्टत्वात् ।

केचित् तु 'उष्ट्रासिकाः आस्यन्ते' इत्यत्र कर्मणि लकारं व्याचख्युः, तत् तु भाष्याननुगुणं, भाव एव बहुवचनस्य प्रतिपाद्यत्वात् ।

अथ कालविशेषकृतः पाकभेदो घञन्तस्थले समाश्रीयते, तथाहि —कश्चनाद्यतनः पाकः, कश्चन ह्यस्तनः, कश्चन श्वस्तन इति तत्रापि बहवः पाकशब्दाः प्रयोक्तव्याः, तेषां च सरूपत्वादेकशेषेण बहुवचनाद्युत्पत्तिः समुचिता । तिङन्तस्थले च नह्येकं तिङन्तं भिन्नभिन्नकालभावप्रत्यायने समर्थमिति भिन्नकालासनक्रियाप्रत्यायनाय भिन्नकालानामेवाख्यातानां प्रयोग आवश्यकः, यथा —भूते 'आसि' इति प्रयुज्यते, वर्तमाने 'आस्यते' इति, भविष्यति च 'आसिष्यते' इति, तेषां च विरूपत्वान्न तत्रैकशेषादि भवितुं शक्नोतीति न बहुत्वमिति ।

एतावता ग्रन्थेन भावयोः स्वरूपतो भेदं प्रतिपाद्यास्य बीजं प्रतिपादयितुं वैषम्यं दर्शयितुमुपक्रमते भाष्यकृत्—"अस्ति खल्वपि विशेषः कृदभिहितस्य भावस्य तिङभिहितस्य च । कृदभिहितो भावो द्रव्यवद् भवति । किमिदं द्रव्यवदिति ? द्रव्यं क्रियया समवायं गच्छति । कं समवायं गच्छति ? द्रव्यं क्रियाभिनिर्वृत्तौ साधनत्वमुपैति तद्वच्चास्य भावस्य कृदभिहितस्य भवति पाको वर्तत इति । क्रियावन्न भवति । किमिदं क्रियावदिति ? क्रिया क्रियया समवायं न गच्छति—पचति पठतीति । तद्वच्चास्य कृदभिहितस्य न भवति पाको वर्तत इति । अस्ति खल्वपि विशेषः कृदभिहितस्य भावस्य तिङभिहितस्य च । तिङभिहितेन भावेन कालपुरुषोपग्रहा अभिव्यज्यन्ते । कृदभिहितेन पुनर्न व्यज्यन्ते । अस्ति खल्वपि विशेषः कृदभिहितस्य भावस्य तिङभिहितस्य च । तिङभिहितो भावः कर्त्रा सम्प्रयुज्यते कृदभिहितः पुनर्न सम्प्रयुज्यते । यावता किञ्चिच्च सामान्यं कश्चिच्च विशेषो, युक्तं यदयमपि विशेषः स्यात्—लिङ्गकृतः संख्याकृतश्चेति ।

अत्रत्यभाष्यसन्दर्भस्यायमाशयः—तिङभिहितकृदभिहितयोर्भावयोस्त्रिधा विशेषः, कृदभिहितो भावो द्रव्यवत् कारकत्वं प्रतिपद्यते क्रियान्तरे, आख्याताभिहितश्च नेत्येकः । कृदभिहितो भावः कालपुरुषादिभिः साक्षान्न युज्यते, आख्याताभिहितश्च युज्यते इति द्वितीयः, एवं कृदभिहितो भावो न नियमेन कर्तारमपेक्षते, आख्याताभिहितस्तु अपेक्षत इति तृतीयः । तत्रोपपत्तिः—यथा पाको भवतीत्युच्यते, तत्र घञर्थस्य भावस्य भूधात्वर्थक्रियां प्रति कर्तृत्वमस्ति, नहि तथा कश्चिद् गच्छति पचतीत्यादावेकस्य धात्वर्थरूपस्य भावस्य परां क्रियां प्रति कर्तृत्वमवगच्छति । ननु 'पचति भवति' 'पश्य मृगो धावति' इत्यादौ क्रिया क्रियान्तरं प्रति कर्तृकर्मभावमापद्यत एवेति कथमियमुक्तिः संगच्छत इति चेत् ? करणादिकारकपरत्वाद् भाष्यस्य, तथाहि—कृदभिहितो भावो यथा 'पाकेन वैरं कृतम्' इत्यादौ करणत्वादिनाप्यन्वेति न तथाऽऽख्याताभिहितो भाव इति । ननु साध्यस्वभावत्वात् क्रियायाः क्रियान्तरं प्रति कर्तृकर्मभावोऽनुचितः, साध्यं हि स्वयमसिद्धं, तादृशस्य साधकत्वरूपकर्तृत्वाद्यसम्भवात्, प्रसिद्धश्चायमाभाणकः स्वयमसिद्धः परान् कथं साधयतीति चेत् ? न—निरूप्यनिरूपकभेदात्, यन्निरूपितं यस्य सिद्धत्वं तं प्रति तस्य कर्तृत्वं कर्मत्वं वा । एवं चान्यनिरूपितसिद्धत्वेऽपि अन्यनिरूपितसाध्यत्वमविरुद्धम् । तदुक्तं भर्तृहरिणापि—

"तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया ।
सिद्धा तु यस्मिन् साध्यत्वं न तमेव पुनः प्रति ।।
मृगो धावति पश्येति साध्यसाधनरूपता ।
यथा विषयभेदेन सरणस्योपपद्यते ।।" इति ।

एवं च पचति भवतीत्यत्र भवतिक्रियापेक्षं पचतिक्रियायाः कर्तृत्वम्, सर्वो ह्यर्थः स्वरूपं धारयतीति तादृशेऽर्थे कर्तृत्वं नानुचितम्, एवं कर्मापि क्रियाफलत्वात् प्रधानमिति वा, क्रियान्तरं प्रति सिद्धत्वसम्भवाद् वाऽऽख्यातपदवाच्यस्य भावस्य कर्मत्वमपि सम्भवति, करणत्वादीनि तु न सम्भवन्त्येव सर्वथाऽप्राधान्यात् । अतश्च करणत्वोद्देश्यत्वावधित्वैरन्वयित्वेन कृदभिहितो भावो द्रव्यधर्मैव, तिङभिहितस्तु तद्विरुद्ध इति ।।१।। किञ्च तिङभिहितभावस्यासत्त्वभूतत्वेन तेन कालपुरुषादेरभिव्यक्तिर्भवति, कृदभिहितस्य तद्विरुद्धत्वेन कालपुरुषादिभिः साक्षात् सम्बन्धो न भवत्यपि तु क्रियाद्वारा ।।२।। तिङन्तवाच्यो भावो नियमेन कर्तृसाकाङ्क्षः कृदभिहितस्तु न नियमेन कर्तारमाकाङ्क्षते, नहि 'पाकः' 'रागः' इति वोक्ते कस्येति कर्त्राकाङ्क्षा नियमेन भवति ।।३।।

एवं चैतावता ग्रन्थेनैतदायातं यद् यद्यपि कृदन्ततिङन्तस्थले उभयत्र क्रियात्वं सामान्यं तथापि सिद्धत्वसाध्यत्वकृतो भेदस्तथा कृदर्थस्य भावस्य लिङ्गबाह्यसाधनकृतसंख्यादियोग्यता, तिङर्थस्य भावस्य तु न तद्योग्यतेत्यपि विशेष इति भावस्य द्वैविध्यम्, भावे विधीयमानाः कृतश्च प्रकृतिबहिर्भूतमेव भावमभिदधति । इदानीं "कर्तरि" इति सूत्रस्याभावे प्रकृत्यन्तर्भूतभावेऽर्थेऽनिर्दिष्टार्थाः प्रत्ययाः स्युस्तद्वारणार्थमिदं सूत्रमावश्यकमिति कृतमधिकेन प्रसङ्गागतप्रपञ्चेनेति शम् ।

अत्रत्यः प्रत्ययनियमः संज्ञानियम इति पक्षावपि भाष्ये समाशङ्क्य समाहितौ, तौ च संक्षेपत एवोपन्यस्येते दिग्बोधार्थम् । तथाहि तत्रत्यपक्षद्वयोपन्यासपरं भाष्यम्—किं पुनरयं प्रत्ययनियमो—"धातोः परोऽकारो

[ अण्प्रत्ययस्थः ]ऽकशब्दो वा [ पाचकादिप्रयोगस्थः ] नियोगतः कर्तारं ब्रुवन् कृत्संज्ञश्च भवति प्रत्ययसंज्ञकश्चेति । आहोस्वित् संज्ञानियमो—धातोः परोऽकारोऽकशब्दो वा स्वभावतः कर्तारं ब्रुवन् कृत्संज्ञश्च भवति प्रत्ययसंज्ञश्च" इति । अतः परमुभयोः पक्षयोर्दोषगुणावुक्तौ, तत्र 'धातोः परः कृत्प्रत्ययः कर्तरि वर्तताम्' इति सूत्रार्थे कर्तृरूपेऽर्थे कृत्प्रत्ययो नियम्यत इति प्रत्ययनियमः । यः स्वभावतः कर्तरि [ कर्मणि वा यथाविधानमन्यस्मिन्नप्यर्थे ] वर्तते स एव कृत्संज्ञ इति संज्ञानियमपक्षाभिप्रायः, तत्रोभयोः पक्षयोर्दोषदर्शनान्नाय नियमोऽपि तु स्वभावतस्तेषु तेष्वर्थेषु वर्तमानानां प्रत्ययसंज्ञाविधानद्वारेण साधुत्वमन्वाख्यायत इति सिद्धान्तितमिति । करोतीति "णक-तृचौ" [ ५.१.४८. ] इति णके वृद्धावारादेशे—**कारकः** इति, तृचि च गुणे—**कर्ता**, पचतीति "अच्" [ ५.१.४९. ] इत्यचि—**पचः**, नन्दयतीति "नन्द्यादिभ्योऽनः" [ ५.१.५२. ] इत्यने—**नन्दनः**, अत्र 'णक तृच् अच् अन' इति प्रत्ययानामर्थो न विधायके दर्शितो, नवाऽन्यत्रेत्यनेन ते कर्तरि भवन्ति ॥ ५.१.३. ॥

**व्याप्ये घुर-केलिम-कृष्टपच्यम् । ५. १. ४. ॥**

**त० प्र०—'घुर केलिम' इत्येतौ प्रत्ययौ कृष्टपच्यशब्दश्च व्याप्ये कर्तरि भवतीति वेदितव्यम् । घुरो वक्ष्यते । केलिमोऽत एव वचनात् ज्ञायते, कृष्टपच्ये यश्च । भज्यते स्वयमेव—भङ्गुरं काष्ठम्, एवं—भिदुरः कुशूलः, छिदुरा रज्जुः । भास-मिदि-विदां कर्तर्येव घुरः कर्मकर्तुरसंभवात्, भासते इत्येवंशीलो—भासुरः, एवं-मेदुरः, विदुरः, । केचिच्छिदि-भिदोरपि कर्तरि घुरमिच्छन्ति—"दोषान्धकारभिदुरो" "हृष्टारिवक्षश्छिदुरः" इति । पच्यन्ते स्वमेव—पचेलिमा माषाः, एवं—भिदेलिमास्तण्डुलाः । कृष्टे पच्यन्ते स्वयमेव—कृष्टपच्याः शालयः ।।४।।**

**श० म० न्यासानुसन्धानम्—व्याप्ये** । पूर्वसूत्रेणानिर्दिष्टार्थानां प्रत्ययानां कर्तरि विधानाद् घुरादीनामपि तथाभूतत्वात् कर्तरि विहितत्वप्रसङ्गमाशङ्कयानेन सूत्रेण तेषामर्थं निर्दिशति—**'घुर केलिम' इत्येताविं**त्यादिना । **व्याप्ये कर्तरीति**—व्याप्यं कर्मैव यत्र कर्ता तत्र, कर्मैव सौकर्यादिना यत्र कर्तृत्वेन विवक्ष्यते तत्रेति भावः । **घुरो वक्ष्यते** इति—"भञ्जि-भासि-मिदो घुरः" [ ५. २. ७४. ] "वेत्ति-च्छिद-भिदः कित्" [ ५. २. ७५. ] इति सूत्राभ्यामित्यर्थः । केलिमस्य सूत्रान्तरेण विधानाभावादाह—**केलिमोऽत एव वचनात् ज्ञायते** इति, "विहाविशापचिभिद्यादेः केलिमः" [उणा० ३५४] इत्यौणादिको नियतधातुविषयः, अयं तु सर्वविषयार्थः एवं—**कृष्टपच्ये यश्चे**ति—कृष्टपच्यशब्दे पच्धातोः केनापि सूत्रेण न यविधानमिति प्रकृतवचनात् सोऽपि भवतीति ज्ञायत इत्यर्थः । तथा चास्याविहितविधायकत्वमपीति भावः । घुरे घकार इत्, केलिमे ककार इत् । "भञ्जोंप् आमर्दने" भज्यते स्वयमेव काष्ठमिति कर्मणः कर्तृत्वविवक्षायामनेन घुरे घित्वाच्च "क्तेऽनिटश्च-जोः क-गौ घिति" [ ४. १. १११. ] इति जस्य गत्वे नकारस्य अकारस्थानापन्नस्य "म्नां०" [ १. ३. ३९. ] इति ङत्वे च—**भङ्गुरं काष्ठमि**ति । अतिदिशति—**एवमिति**, भिद्यते स्वयमेवेति घुरे किति—**भिदुरः कुशूलः** इति—अत्र कित्वाद् गुणाभावः । एवं छिद्यते स्वयमेवेति किति घुरे—**छिदुरा रज्जुः** । सामान्यतस्तेभ्यस्तेभ्यो धातुभ्यो विहितस्य घुरस्य कर्मकर्तरि विधानस्यानेनाप्राप्तस्यापवादस्थलमाह—**भास-मिदि-विदां कर्तर्येव घुरः** इति, कुत इत्याह—**कर्मकर्तुरसम्भवादि**ति—भास्धातोरसम्भवोऽकर्मकत्वात्, यस्य कर्मैव नास्ति तस्मात् कर्मकर्तरि प्रयोगासम्भवः सुतरामेव । मिदेः स्नेहनार्थस्य, स्नेहनस्य प्रयोजकव्यापारनैयत्यात् तत्र स्वतः कर्मभूतस्य कर्तृत्वायोगात्, विदेर्ज्ञानार्थस्य कर्मणि क्रियाकृतस्य विशेषस्यादर्शनात् कर्मस्थक्रियात्वाभावेन न कर्मणः कर्तृत्वोपचार इति युक्तोऽसम्भवस्तेषु । भासते इत्येवंशील इति कर्तरि घुरे—**भासुरः** इति । अतिदिशति—**एवमिति**, मेदते मेद्यतीत्येवंशील इति कर्तरि घुरे उपान्त्यगुणे—**मेदुरः**, वेत्तीत्येवंशील इति कर्तरि किति घुरे कित्वादुपान्त्यगुणाभावे—**विदुरः** । मतान्तरमाह—**केचिच्छिदि-भिदोरपि कर्तरि घुरमिच्छन्तीति**, पाणिनीयमते च घुरः केवलं कर्तर्येव विधीयते, न तु कर्मकर्तरि, भङ्गुर इत्यादावभिधानस्वाभाव्यात् कर्मकर्तुः प्रतीतिः, छिदेः कर्मकर्तरि घुरो व्याख्यातो वृत्तिकारैः, परं भाष्ये न दृश्यते, प्रयुज्यते च माषादिकवि-

भिरपि मुख्ये कर्तर्येव, तथाहि षष्ठसर्गे वसन्तवर्णनप्रस्तावे तेनोक्तम्—

"प्रियसखीसदृशं प्रतिबोधिता, किमपि काम्यगिरा परपुष्टया ।
प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयाऽदुरयाचितमङ्गनाः ॥८॥" इति,

गुरुमत्सरच्छिदुरया काम्यकिरा परपुष्टया, प्रियसखीसदृशं किमपि प्रतिबोधिताः अङ्गनाः, प्रियतमाय वपुः, अयाचितं यथा स्यात् तथा अदुरित्यन्वयः । अत्र गुरुमत्सरस्य छिदुरया 'छेत्र्या' इत्येवार्थः समीचीनो व्याख्यातश्च मल्लिनाथादिना, तथा च कर्तरि विधानं स्पष्टमेवास्वयमपि कविप्रयोगमुदाहरति—**दोषान्धकारभिदुरः'** इति **'हृद्यारिवक्षश्छिदुरः'** इति च, उभयत्र मुख्ये कर्तर्येव प्रत्ययसङ्गतिरिति भावः । पच्यन्ते स्वयमेवेति कर्मकर्तरि केलिमे—**पचेलिमा माषाः** इति, अतिदिशति—**एवमिति**, भिद्यन्ते स्वयमेवेति कर्मकर्तरि केलिमे कित्त्वाद् गुणाभावे—**भिदेलिमास्तण्डुलाः** इति, अत्र च भाष्यकृतां केलिमस्य कर्मण्येवविधानं सम्मतम्, तथा च "तव्यत्तव्यानीयरः" [ ३.१.९६. ] इति सूत्रे तैरुक्तम् —"केलिमर उपसंख्यानं कर्तव्यम् —पचेलिमा माषा पक्तव्याः, भिदेलिमाः सरलाः, भेत्तव्याः" इति । वृत्तिकारैश्च कर्मकर्तरि प्रयुक्तः, भाष्ये च पक्तव्या भेत्तव्या इति तदर्थप्रदर्शनेन कर्मणि विधानस्य स्पष्टप्रतीतेः, नहि तव्यादयः कर्मकर्तरि भवन्ति । एवं च सति कर्मकर्तुः प्रतीतौ प्रयोगोपाधिराश्रयणीयो बाहुलकं वा शरणम् । कृष्टपच्यशब्दं व्याचष्टे—**कृष्टे पच्यन्ते स्वयमेव-कृष्टपच्याः शालयः** इति—कृष्टे कृष्टप्रदेशे ये स्वयं पच्यन्ते फलन्ति ते कृष्टपच्या इत्यर्थः, अत्र कर्मकर्तरि निपातनात् यप्रत्ययः ॥ ५. १. ४. ॥

## संगतेऽजर्यम् । ५. १. ५. ॥

**त० प्र०—संगमनं संगतम्, तस्मिन् कर्तर्यभिधेये नञ्पूर्वाज्जीर्यतेर्यप्रत्ययो निपात्यते । न जीर्यतीति—अजर्यमार्यसंगतम्, "मृगैरजर्यं जरसोपदिष्टम्" [ रघु०स०१८, श्लो०—७ ] । सामान्यविशेषभावेन चोभयोरपि प्रयोगो भवति—"तेन संगतमार्येण रामाजर्यं कुरु द्रुतम्" "अजर्यं संगतं नोऽस्तु" । संगत इति किम् ? अजरः पटः, अजरिता कम्बलः । कर्तरीत्येव—अजार्यं संगतेन ॥५॥**

**श० म० न्यासानुसन्धानम्—संग० ।** गत्यर्थाद् धातोः कर्तरि कर्मणि च विधीयमानतया तादृशक्तप्रत्ययान्तस्य संगतशब्दस्य ग्रहणं मा भूदित्येतदर्थं क्तप्रत्ययस्य भावार्थत्वं स्फोरयति—**सगमनं संगतमिति**—भावे क्लीबे क्तः संगम इत्यर्थः । **तस्मिन् कर्तर्यभिधेये** इति —तत् यत्र कर्तृत्वेन विवक्ष्यते तत्रेति भावः । "जृष्च वयोहानौ "इति जृधातुः, न जीर्यतीति निपातनादनेन ये गुणे च—**अजर्यमार्यसंगतमिति**—अविनश्वर आर्यसंगम इत्यर्थः । तृजादीनामयमपवादः । क्रैयादिकस्य जृणो निपातनं न इष्टमित्युक्तं जीर्यतीति । अजर्यशब्दस्य संगतार्थे निपातनाद् यत्र न संगतशब्दप्रयोगस्तत्रापि तदध्यारेण केवलमजर्यशब्दस्यापि प्रयोगो भवति, तादृशमुदाहरणमाह—**"मृगैरजर्यं जरसापेदिष्टम्"**—इति, सम्पूर्णश्लोकश्चेत्थम् —

"तस्मै विसृज्योत्तरकोशलानां, धर्मोत्तरस्तत् प्रभवे प्रभुत्वम् ।
मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध ॥" [ रघु० १८–७ ] इति ।

धर्मोत्तरः—धर्मप्रधानः [ स नलो नाम राजा ] उत्तरकोशलानां-देशविशेषाणाम्, तत्–[ स्वाधीनं ] प्रभुत्वं, तस्मै–स्वसुताय नभसे, विसृज्य, पुनरदेहबन्धाय–विदेहकैवल्याय, मृगैः सह, अजर्यं–दृढं संगमं, बबन्ध–मोक्षार्थं तपस्तप्तुं वनं जगामेत्यभिप्रायः । अजर्यम्—अविनश्वरमिति सामान्यम्, संगतं संगम इति विशेषः, सामान्यविशेषभावेनोभयोरपि प्रयोगः साधुरित्याह—**सामान्यविशेषभावेन चोभयोरपि प्रयोगो भवतीति**, एतत्समर्थकं प्रयोगमाह—**"तेन संगतमार्येण रामाजर्यं कुरु द्रुतम्"** इति, अयं भट्टिप्रयोगः, इदं वचनं हनुमता कथितम्, अस्याभिप्रायः—हे राम ! आर्येण समविगम्येन तेन सुग्रीवेण सह अजर्यं स्थायि संगतं द्रुतं कुरु, तेन तव तस्य चार्थः सेत्स्यतीति । दार्ढ्याय प्रयोगान्तरमाह—**"अजर्यं संगतं नोऽस्तु"** इति । पृच्छति—**संगत इति किमिति**, उत्तरयति—**अजरः पटः, अजरिता कम्बलः**

इति—न जीर्यतीति वाक्ये पूर्वत्र अच् , परत्र च तृच् । कर्तरीत्यनुवृत्तेर्व्यावर्त्यं दर्शयति—**कर्तरीत्येव-अजार्यं संगतेनेति**—न जीर्यते इति भावे ध्यणि-अजार्यमिति, भावस्य संगतकर्तृत्वेऽपि संगतस्य प्रत्ययवाच्यत्वाभावान्न यः, किन्तु घ्यणेव ॥ ४. १. ५. ॥

## रुच्या-ऽव्यथ्य-वास्तव्यम् । ५. १. ६. ॥

**त० प्र०—एते कर्तरि निपात्यन्ते । रोचतेर्नञ्पूर्वात् व्यथतेश्च क्यप् प्रत्ययो, वसतेस्तु तव्यण् निपात्यते । रोचते इति-रुच्यो मोदको मैत्राय । न व्यथते इत्यव्यथ्यो मुनिः । वसतीति-वास्तव्यः ॥६॥**

**श० म० न्यासानुसन्धानम्**—रुच्या० । अर्थमाश्रित्य निपातनमाह—**एते कर्तरि निपात्यन्ते** इति, प्रकृतिप्रत्ययमाश्रित्य निपातनमाह—**रोचतेरिति**—"रुचि अभिप्रीत्यां च" चकाराद् दीप्तौ, अभिप्रीतिरभिलाषः, इति 'रुच्' धातोः, **नञ्पूर्वात् व्यथतेश्चेति**—नञ्पूर्वकात् "व्यथिष् भयचलनयोः" दुःखेऽपि केचित्, इति 'व्यथ्' धातोश्च क्यप् प्रत्ययो भवतीत्यर्थः, **वसतेस्तु तव्यण्** इति—"वसं निवासे" इति 'वस्' धातोस्तु तव्यण् प्रत्ययो भवतीत्यर्थः । रोचते रुचिविषयो भवतीति क्यपि कित्वाद् गुणाभावे—**रुच्यो मोदको मैत्रायेति**—"रुचि०" [ २. २. ५५. ] इति चतुर्थी । न व्यथते-पीडां भयं वा नोत्पादयतीति क्यपि-**अव्यथ्यो मुनिः** । वसतीति तव्यणि णित्वादुपान्त्यवृद्धौ—**वास्तव्यः** । वास्तुनि भव इति तद्धितये वास्तव्य इति भवितुमर्हति तथाप्यर्थभेदार्थमिह निपातनम् ॥५.१.६.॥

## भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा । ५. १. ७. ॥

**त० प्र०—एते कर्तरि वा निपात्यन्ते । भावकर्मणोः प्राप्तयोः पक्षे कर्तरि विधानार्थमिदम् । भू-गायति-रमयतिभ्यो यो यः प्रत्ययो यश्च जनेराङ्पूर्वाभ्यां च पति-प्लुभ्यां घ्यण् स कर्तरि वा निपात्यते । भवत्यसाविति-भव्यः, पक्षे-भव्यमनेन । गायतीति-गेयो माणवकः साम्नाम् , गेयानि माणवकेन सामानि । जायतेऽसाविति-जन्यः , जन्यमनेन । रमयत्यसौ-रम्यः , रम्यते-रम्यः । आपतत्यसौ-आपात्यः, आपात्यमनेन । आप्लवतेऽसौ-आप्लाव्यः , आप्लाव्यमनेन ॥७॥**

**श० म० न्यासानुसन्धानम्—भव्य०** । अर्थमाश्रित्य निपातनमाह—**एते कर्तरि वा निपात्यन्ते** इति । एतेषां शब्दानां प्रकृतसूत्रमन्तरेणापि सिद्धेरस्य सूत्रस्य वैयर्थ्यमाशङ्क्याह—**भाव-कर्मणोः प्राप्तयोः पक्षे कर्तरि विधानार्थमिदमिति**—"तत् साप्यानाप्यात्०" [ ३. ३. २१. ] इति कृत्यप्रत्ययानां भावकर्मणोर्विधानादित्यर्थः । तथा चार्थान्तरे प्राप्तस्यार्थान्तरेऽसाधुत्वं मा प्रसाङ्क्षीदिति तद्वारणाय सूत्रमिदमिति भावः । एवं च यथाप्राप्तानामेव प्रत्ययानामर्थमात्रविधानं निपातनेनेत्याह—**भू-गायतीत्यादि**, अयं च विधिरेव न तु नियमः, तेन कर्तर्यपि भवन्ति पक्षे यथास्वं भावकर्मणोरिति, विकल्प्य विधानं तु * बाधकान्येव निपातनानि * इति परिभाषया निर्दिष्टाः प्रयोगा एव कर्त्रर्थे भ्वादीनां धातूनां भवन्तीति मा भूदित्येतदर्थम् । **भू-गायति-रमयतिभ्यो यो यः प्रत्ययः** इति-"भू सत्तायाम्" इति 'भू' धातोः, "गैं शब्दे" इति गैधातोः "रमिं क्रीडायाम्" इति ण्यन्ताद् 'रमि' धातोश्च "य एच्चातः" [ ५.१.२८. ] इति यो यप्रत्ययो विधीयते स कर्तरि वा भवतीत्यर्थः । **जनेराङ्पूर्वाभ्यां च पति-प्लुभ्यां घ्यण्** इति-"जनैचि प्रादुर्भावे" इति 'जन्' धातोः, आङ्पूर्वकात् "पत्लृ गतौ" इति 'पत्' धातोश्च "ऋवर्णव्यञ्जनाद् घ्यण्" [ ५.१.१७. ] इति यो घ्यण् विधीयते स कर्तरि वा भवति, एवं "प्लुङ् गतौ" इति आङ्पूर्वकात् 'प्लु' धातोः "उवर्णादावश्यके" [५.१.१९.] इति यो घ्यण् विधीयते स कर्तरि वा भवतीर्थः । भवतीति कर्तरि वाऽनेन ये "य्यक्ये" [ १.२.२५. ] इत्यवादेशे—**भव्यः**, पक्षे भावे ये—**भव्यमनेन** । गायतीति कर्तरि ये आकारस्य एकारे—**गेयो माणवकः साम्नाम्**, पक्षे गीयन्त इति कर्मणि ये—**गेयानि माणवकेन सामानि** । जायते इति कर्तरि घ्यणि "न जन०" [ ४.३.५४. ] इति वृद्धिनिषेधे—**जन्यः**, पक्षे भावे—**जन्यमनेन** । रमयतीति कर्तरि घ्यणि णिलोपे—**रम्यः**, पक्षे कर्मणि—**रम्यः** । आपततीति कर्तरि घ्यणि उपान्त्यवृद्धौ—**आपात्यः**, पक्षे भावे—**आपात्यमनेन** । आप्लवते इति

कर्तरि ध्यणि—**आप्लाव्यः**, पक्षे भावे आवश्यकेऽर्थे—**आप्लाव्यमनेने**ति ॥ ५. १. ७. ॥

## प्रवचनीयादयः । ५. १. ८. ॥

त० प्र०—**प्रवचनीयादयः कर्तर्यनीयप्रत्ययान्ता वा निपात्यन्ते । प्रवक्ति प्रब्रूते वा—प्रवचनीयो गुरुः शासनस्य, प्रवचनीयं गुरुणा शासनम् । उपतिष्ठत इति—उपस्थानीयः शिष्यो गुरोः, उपस्थानीयः शिष्येण गुरुः । एवं—रमयतीति—रमणीयो देशः । मदयतीति—मदनीया योषित् । दीपयतीति—दीपनीयं चूर्णम् । मोहयतीति—मोहनीयं कर्म । ज्ञानमावृणोतीति—ज्ञानावरणीयम् । एवं—दर्शनावरणीयम् ॥८॥**

**श० म० न्यासानुसन्धानम्—प्रव०** । सर्वधातुभ्योऽयमनीयप्रत्ययो विहित एव ततो निपातनं किंप्रयोजनमित्याशङ्कायामाह—**कर्तर्यनीयप्रत्ययान्ता** इति—एषां कर्तरि प्रयोगदर्शनात् तदर्थे चानीयस्याविहितत्वात् तत्र निपातनमावश्यकमिति भावः । 'वचंक् भाषणे' इति 'वच्' धातोः प्रवक्तीति "ब्रूगक् व्यक्तायां वाचि" इति 'ब्रू'धातोः प्रब्रूते इत्यशित्प्रत्ययविषये वचादेशेऽनेन निपातनाद् वा कर्तर्यनीयप्रत्यये—**प्रवचनीयो गुरुः शासनस्ये**ति, पक्षे कर्मण्यनीये—**प्रवचनीयं गुरुणा शासनमि**ति । उपतिष्ठते इति कर्तरि—**उपस्थानीयः शिष्यो गुरोरि**ति, पक्षे कर्मणि—**उपस्थानीयः शिष्येण गुरुरि**ति—अकर्मकस्यापि स्थाधातोरुपसर्गवशात् सकर्मकत्वमवसेयम् । अतिदिशति—**एवमि**ति । "रमिं क्रीडायाम्" इति 'रम्' धातोर्ण्यन्तस्य रमयतीति कर्तरि—**रमणीयो देशः** इति । "मदैच् हर्षे" इति 'मद्' धातोर्ण्यन्तस्य घटादित्वाद् ह्रस्वे मदयतीति कर्तरि—**मदनीया योषित्** । "दीपैचि दीप्तौ" इति 'दीप्' धातोर्ण्यन्तस्य दीपयतीति कर्तरि—**दीपनीयं चूर्णमि**ति । "मुहौच् वैचित्ये" इति 'मुह्' धातोर्ण्यन्तस्य मोहयतीति कर्तरि—**मोहनीयं कर्म** । "वृगट् वरणे" ज्ञानमावृणोतीति कर्तरि—**ज्ञानावरणीयं** कर्म । अतिदिशति—**एवमि**ति, दर्शनमावृणोतीति कर्तरि—**दर्शनावरणीयं** कर्म ॥ ५. १. ८. ॥

## श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जृ-भजेः क्तः । ५. १. ९. ॥

त० प्र०—**एभ्यः क्तप्रत्ययो यो विहितः स कर्तरि वा भवति । श्लिष्टः, आश्लिष्टः कान्तां कामुकः, आश्लिष्टा कान्ता कामुकेन, आश्लिष्टं कामुकेन । शीङ्—अतिशयितो गुरुं शिष्यः, अतिशयितो गुरुः शिष्येण, अतिशयितं शिष्येण । स्था—उपस्थितो गुरुं शिष्यः, उपस्थितो गुरुः शिष्येण, उपस्थितं शिष्येण । आस्—उपासितो गुरुं शिष्यः, उपासितो गुरुः शिष्येण, उपासितं शिष्येण । वस्—अनूषितो गुरुं भवान्, अनूषितो गुरुर्भवता, अनूषितं भवता । जन्—अनुजातो माणवको माणविकाम्, अनुजाता माणविका माणवकेन, अनुजातं माणवकेन; विजाता वत्सं गौः, विजातो वत्सो गवा, विजातं गवा । रुह्—आरूढो वृक्षं भवान्, आरूढो वृक्षो भवता, आरूढं भवता । जृ—अनुजीर्णो वृषलीं चैत्रः, अनुप्राप्य जीर्ण इत्यर्थः, अनुजीर्णा वृषली चैत्रेण, अनुजीर्णं चैत्रेण । भज्—विभक्ता भ्रातरो रिक्थम्, विभक्तं भ्रातृभी रिक्थम्, विभक्तं भ्रातृभिः । अकर्मका अपि हि धातव उपसर्गसम्बन्धात् सकर्मका भवन्तीति शीङादिग्रहणम्, अन्यथाऽकर्मकत्वादुत्तरेणैव सिद्धम् । श्लिष-भजौ केवलावपि सकर्मकौ ॥९॥**

**श० म० न्यासानुसन्धानम्—श्लिष०** । क्तप्रत्ययस्य भावकर्मणोरेव विधानादेभ्यः कर्तरीष्टस्य तस्याप्राप्तेः कर्तरि विधानार्थमिदमित्याह—**यो विहितः स कर्तरि वे**ति । पक्षे च भावकर्मणोरपि भविष्यत्येवेति तदनुसारमुदाहरणानि । "श्लिषंच् आलिङ्गने" श्लिष्यति स्मेति कर्तरि क्ते—**श्लिष्टः**, एवम्—आश्लिष्यति स्मेति कर्तरि क्ते—**आश्लिष्टः कान्तां कामुकः**, पक्षे कर्मणि—**आश्लिष्टा कान्ता कामुकेन**, भावे तु—**आश्लिष्टं कामुकेन** । "शीङ्क् स्वप्ने" अतिशेते स्मेति कर्तरि—**अतिशयितो गुरुं शिष्यः**, कर्मणि—**अतिशयितो गुरुः शिष्येण**, भावे तु—**अतिशयितं शिष्येण** "न डीङ्-शीङ०" [ ४. ३. २७. ] इति कित्वप्रतिषेधाद् गुणः । उपतिष्ठते स्मेति कर्तरि—**उपस्थितो गुरुं शिष्यः**, कर्मणि—**उपस्थितो गुरुः शिष्येण**, भावे

तु—**उपस्थितं शिष्येण** । अत्र "दोसोमास्थ०" [ ४. ४. ११. ] इत्याकारस्येकारः । "आसिक् उपवेशने" इति 'आस्' धातोरुपास्ते स्मेति कर्तरि—**उपासितो गुरुं शिष्यः**, कर्मणि—**उपासितो गुरुः शिष्येण**, भावे तु—**उपासितं शिष्येण** । "वसं निवासे" अनुवसति स्मेति कर्तरि—**अनूषितो गुरुं भवान्**, कर्मणि—**अनूषितो गुरुर्भवता**, भावे तु—**अनूषितं भवता**, अत्र "यज्ञादिव०" [ ४. १. ७९. ] इति य्वृत्—उकारः, "क्षुधवसस्तेषाम्" [ ४. ४. ४३. ] इतीट्, "घस्वसः" [ २. ३. ३६. ] इति सस्य षत्वं चावसेयम् । "जनैचि प्रादुर्भावे" अनुजायते स्मेति कर्तरि क्ते "आः खनि-सनि-जनः" [ ४. २. ६०. ] इत्यात्वे—**अनुजातो माणवको माणविकाम्** इति—ऐदित्त्वान्नेट् । कर्मणि—**अनुजाता माणविका माणवकेन**, भावे तु—**अनुजातं माणवकेन** । एवं विजायते स्मेति कर्तरि—**विजाता वत्सं गौः**, कर्मणि—**विजातो वत्सो गवा**, भावे तु—**विजातं गवा** । "रुहं जन्मनि" आरोहति स्मेति कर्तरि क्ते—**आरूढो वृक्षं भवान्**, कर्मणि—**आरूढो वृक्षो भवता**, भावे तु—**आरूढं भवता**, अत्र हस्य ढः, तस्य धः, धस्य ढः, पूर्वढलोपो दीर्घश्च । "जृष् जरसि" अनुजीर्यति स्मेति कर्तरि क्ते "ऋवर्णश्रि०" [४. ४. ५७.] इतीट्प्रतिषेधे, "ॠल्वादे०" [ ४. २. ६८. ] इति क्तस्य ने इरादेशे दीर्घे—**अनुजीर्णो वृषलीं चैत्रः**, एतदर्थमाह—**अनुप्राप्य जीर्ण इत्यर्थः** इति, कर्मणि—**अनुजीर्णा वृषली चैत्रेण**, भावे तु—**अनुजीर्णं चैत्रेण** अनुपूर्वको जॄ प्राप्त्युपसर्जने जरणे वर्तते, जनिस्तु जननोपसर्जनायां प्राप्ताविति भेदः । "भजीं सेवायाम्" विभजन्ति स्मेति कर्तरि—**विभक्ता भ्रातरो रिक्थमिति**—रिक्थं धनम्, कर्मणि—**विभक्तं भ्रातृभी रिक्थम्**, भावे तु—**विभक्तं भ्रातृभिः** । केषाञ्चिदकर्मकाणामिह ग्रहणं कृतं तद् समर्थयति—**अकर्मका अपि हि धातव उपसर्गसम्बन्धात् सकर्मका भवन्तीति शीङादिग्रहणमिति**, फलसमानाधिकरणव्यापारवाचकत्वं ह्यकर्मकत्वम्, फलव्यधिकरणव्यापारवाचकत्वं हि सकर्मकत्वमिति ह्यकर्मकत्वसकर्मकत्वयोर्लक्षणम् । यत्र धात्वर्थभूतं फलं तदर्थभूतो व्यापारश्च [ वैयाकरणमते धातोः फलव्यापारोभयवाचकत्वात् ] एकत्र तिष्ठतः [ तदाश्रयत्वेन एकः कर्तैव तिष्ठति ] स धातुरकर्मकः । यत्र च फलव्यापारौ पृथक् पृथक् तिष्ठतः स धातुः सकर्मकः । यथा भूधातोः फलमात्मधारणं, व्यापारश्च तदनुकूलो यत्नः, एकत्रैव कर्तरि तिष्ठतः—देवदत्तो भवतीति । पच्धातोः फलं विक्लृत्तिः, व्यापारश्च तदनुकूलो यत्नः, पृथक् तिष्ठतः, फलमोदने, व्यापारः कर्तरि देवदत्ते, ओदनं पचति देवदत्त इति प्रयोगादिति क्रमेण भू-पच्धातू अकर्मकसकर्मकौ । तथा चास्यां व्यवस्थायां धात्वर्थ एव नियामक इत्यायातम् । स च धात्वर्थ उपसर्गवशाद् भिद्यते, तदुक्तमभियुक्तैः—

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारप्रतिहारवत् ॥१॥" इति ।

एवं चोपसर्गवशाद् धात्वर्थे भिन्ने पूर्वमकर्मकस्यापि सकर्मकत्वं दृश्यते, यथा—'अनुभूयते आनन्दश्चैत्रेण' इत्यत्राकर्मकस्यापि भवतेरुपसर्गवशात् सकर्मकत्वम् । तथा चात्र सूत्रे केषाञ्चिदकर्मकाणां ग्रहणं सति तेषामुपसर्गवशात् सकर्मकत्वे विधानार्थमिति भावः । अकर्मकत्वे चान्यथासिद्धिमाह—**अन्यथाऽकर्मकत्वादुत्तरेणेति** । नात्र सर्वे अकर्मका एवेत्याह—**श्लिष-भजी केवलावपीति** ॥ ५. १. ९. ॥

## आरम्भे । ५. १. १०. ॥

**त० प्र०—आरम्भे—आदिकर्मणि भूतादित्वेन विवक्षिते वर्तमानाद् धातोर्यः क्तो विहितः स कर्तरि वा स्यात् । प्रकृतः कटं भवान्, प्रकृतः कटो भवता, प्रकृतं भवता । प्रभुक्त ओदनं चैत्रः, प्रभुक्त ओदनश्चैत्रेण, प्रभुक्तं चैत्रेण ॥ १० ॥**

**श० म० न्यासानुसन्धानम्—आरम्भे । 'आरम्भे'** इत्यस्य व्याख्यानमाह—**आदिकर्मणीति**—कर्मपदमत्र क्रियापरम्, क्रियाया आदित्वविवक्षायामित्यर्थः । तथा च कीदृश्याः क्रियाया आदित्वविवक्षाऽभिमतेत्याकाङ्क्षायामाह—**भूतादित्वेन विवक्षिते** इति—वर्तमानकालिकाया अपि क्रियाया भूतादित्वेन विवक्षायां भूतत्वोपचारात् तत्र क्तो भवतीति भावः । भूते हि क्तो

भवति, भवन्त्यां च क्रियायां भूतस्य प्रयोगः कर्तुमशक्य इति भूतादित्वेन विवक्षायां यथाकथञ्चिद् भूतकालसम्बन्धाद् भवतीति भावः।

केचित् तु भूतादित्वेनेत्यत्रादिपदेन वर्तमानत्वभविष्यत्वयोरपि परिग्रह इत्याहुस्तदनुकूलमुदाजह्रुश्च, परं तु नैतद् ग्रन्थकर्तुर्हृदयं न चान्यैरनुमतम्, उदाहरणस्य च भूतादित्वेन विवक्षयापि सुसमाधेयत्वात्, या च वर्तमानापि क्रिया कञ्चन भूतमंशमादाय भूतादित्वेन विवक्ष्यते तत्रैवास्य प्रयोगाद् भविष्यन्त्यां च प्रयोगस्यादृष्टत्वाद् दृष्टत्वे च तत्रापि तथा विवक्षैव युक्ता। भाष्याशयेनाप्येतदेवायाति, तच्च भाष्यादिग्रन्थेन स्फुटीभविष्यति। तथाहि "निष्ठा" [ ३. २. १०२. ] इति सूत्रे—

"आदिकर्मणि निष्ठा"। आदिकर्मणि निष्ठा वक्तव्या, प्रकृतः कटं देवदत्त इति। किं पुनः कारणं न सिध्यति?। यद्वा भवन्त्यर्थे। यद्वा भवन्त्या अर्थे भाष्यते, प्रकृतः कटं देवदत्तः, प्रकरोति कटं देवदत्त इति। न्याय्या त्वाद्यपवर्गात्। न्याय्या त्वेषा भूतकालता। कुतः? आद्यपवर्गात्। आदिरत्रापवृक्तः। एष च नाम न्याय्यो भूतकालो यत्र किञ्चिदपवृक्तं दृश्यते। वा चाद्यतन्याम्। वा चाद्यतन्यां भाष्यते, प्रकृतः कटं देवदत्तः, प्राकार्षीत् कटं देवदत्त इति। किं शक्यं त एते शब्दाः प्रयोक्तुमित्यतो न्याय्यैषा भूतकालता? नावश्यं प्रयोगादेव। क्रिया नामेयमत्यन्तापरदृष्टाऽनुमानगम्याऽशक्या पिण्डीभूता निदर्शयितुम्, यथा गर्भो निर्लुठित इति। सा चासौ येन येन शब्देनाभिसम्बध्यते तावति तावति परिसमाप्यते। तद्यथा कश्चित् पाटलिपुत्रं जिगमिषुरेकमहर्गत्वाऽऽह––इदमद्य गतमिति। न च तावताऽस्य व्रजिक्रिया परिसमाप्ता भवति। यत् तु गतं तदभिसमीक्ष्यैतत् प्रयुज्यते–––इदमद्य गतमिति। एवमिहापि यत् कृतं तदभिसमीक्ष्यैतत् प्रयुज्यते––प्रकृतः कटं देवदत्त इति। यदा हि वैणिकान्तः कटोऽभिसमीक्षितो भवति प्रकरोति कटमित्येव तदा भवति" इति।

अयमाशयः—आद्येषु क्रियाक्षणेषु भूतेषु सर्वस्याः क्रियाया विद्यमानध्वंसप्रतियोगित्वरूपभूतत्वाभावः। कर्मशब्दः क्रियापरः, क्रियायाः क्रिया हि एकफलोद्देशप्रवृत्तसमूहरूपा, तथा चोक्तं हरिणा—

"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥" इति।

गुणभूतैरवयवैः प्रधानक्रियानिर्वर्तकतया तदवयवानां गुणभूतत्वमिति तैः, क्रमजन्मनां क्रमश उत्पद्यमानानामवान्तरकर्मणां, समूहः [वस्तुतः पृथक्त्वेन स्थितोऽपि] बुद्ध्या प्रकल्पिताभेदः सन् 'क्रिया' इति व्यपदेशं लभत इति तदर्थः। सम्पूर्णावयवायाः क्रियायाः सम्पन्नत्वे एव भूतव्यवहारो युक्तः, तथा चादिक्षणे भूतत्वव्यवहाराभावाद् भूते विधीयमानः क्तो न स्यादिति विधानमावश्यकमिति। किञ्च धात्वर्थस्य वर्तमानत्वे एव लोके प्रकृतः कट इति न प्राप्तोऽतो विधातव्य इति। स च किं वर्तमानतावाचकोऽथवा भूततावाचक इत्याशङ्कायामाह––न्याय्या त्वाद्यपवर्गादिति। आदिभूत एकावयवे समूहरूपायास्तस्याः कस्यचिदंशस्य समाप्तत्वाद् भूतकालता न्याय्यैवेति। तदुक्तं हरिणा–––

"समूहः स तथाभूतः प्रतिभेदं समूहिषु।
समाप्यते ततोऽभेदे कालभेदस्य संभवः॥" इति।

तथाभूतः––बुद्ध्या प्रकल्पिताभेदः स समूहः क्रियारूपः, समूहिषु–––अवयवेषु, प्रतिभेदं प्रत्यवयवं, समाप्यते–––समाप्तेरारोपः क्रियते, ततोऽवयवे समूहाभेदे सति कालभेदस्य वर्तमानत्वेऽपि भूतादित्वव्यवहारस्य सम्भव इति। किञ्च वर्तमानत्वविवक्षायामेव नायं प्रयोगः क्रियतेऽपि तु भूतत्वविवक्षायामपि, तथा च 'प्रकृतः कटं सः' 'प्राकार्षीत् कटं सः' इति प्रयोगौ पर्यायेण प्रयुज्येते। न केवलमीदृशप्रयोगादेव भूतकालताया न्याय्यत्वमपि तु वस्तुगतिरप्येवम्, महत्यां क्रियायां योंऽशो यथादृष्टस्तदर्थं तथाशब्दः प्रयोक्तव्य एव, नहि कदाचित् कापि पूर्णा क्रिया क्वचित् सहोपलभ्यते तस्याः समूहशो दृष्ट्ययोग्यत्वात्, गतानामवयवानामेकत्र पिण्डीभूततया संस्थानासम्भवात्, अवयवसमूहस्य युगपदनुत्पादादुत्पन्नस्यानवस्थानात्। तदुक्तं हरिणा––

"क्रमात् सदसतां तेषामात्मानो न समूहिनाम्।
सद्वस्तुविषयैर्यान्ति सम्बन्धं चक्षुरादिभिः॥" इति।

अयमर्थः–भूयोऽवयवसन्निकर्षः समूहप्रत्यक्षे कारणम्, क्रमात् सदसतां कस्यचित् सत्त्वेन कस्यचिच्च भूतभावितयाऽसत्त्वेन सदसद्रूपत्वं तेषामिति तादृशानां समूहिनाम-

वयवानामात्मानः स्वरूपाणि, सद्वस्तु विषयं गोचरो येषां तादृशैश्चक्षुरादिभिरिन्द्रियैः [ सह ] सम्बन्धं न यान्ति । एवं च शब्देन प्रत्याय्यमाना समूहरूपा क्रिया येन येनावयवेन सम्बध्यते तस्मिन्नेवावयवे परिसमाप्यते, यथा पाटलिपुत्रेऽप्राप्तेऽपि तदवयवमार्गे प्रयुज्यते—इदमद्य गतमिति, तत्रावयवे समाप्ते समूह एव समाप्यते समूहस्यावयवात् पार्थक्येनानुलम्भात् । तत्रावयवानां कालत्रययोगात् क्रियाया अपि कालत्रययोग इति योऽशो भूतस्तमादिमंशमादाय भूतत्वव्यवहारः सूपपाद इति । एतावता सन्दर्भेण भूतत्वविवक्षैवात्र ग्रन्थकृतां न वर्तमानत्वादिविवक्षेति सिद्धमित्यलमतिप्रसक्तेन ।

उदाहरति—**प्रकृतः कटं भवान्**िति–प्रशब्द आदि–कर्म द्योतयति, य एवार्थः प्रकरोति कटं देवदत्त इति स एवार्थः प्रकृतः कटं देवदत्त इति । पक्षे कर्मणि—**प्रकृतः कटो भवता**, भावे तु – **प्रकृतं भवता** । प्रभुङ्क्ते ओदनं चैत्र इति—**प्रभुक्त ओदनं चैत्रः**, कर्मणि—**प्रभुक्त ओदनश्चैत्रेण**, भावे तु—**प्रभुक्तं चैत्रेणे**ति ॥ ५. १. १०. ॥

## गत्यर्था-ऽकर्मक-पिब-भुजेः । ५. १. ११. ॥

त० प्र०—**भूतादौ यः क्तो विहितः स गत्यर्थेभ्योऽकर्मकेभ्यश्च धातुभ्यः पिब-भुजिभ्यां च कर्तरि वा भवति । गत्यर्थ–गतो मैत्रो ग्रामम्, गतो मैत्रेण ग्रामः, गतं मैत्रेण; यातास्ते ग्रामम् , यातस्तैर्ग्रामः , यातं तैः । अकर्मक–आसितो भवान् , शयितो भवान् , आसितं भवता, शयितं भवता । सकर्मका अप्यविवक्षितकर्माणोऽकर्मकाः, तेन पठितो भवान्, एवं–प्रख्यातः, विदितः । अविवक्षितकर्मभ्यो नेच्छन्त्येके, तन्मते-'कृतो देवदत्तः हृतो देवदत्तः' इत्यादि कर्तरि न भवति । काल-भावाऽध्वभिश्च कर्मभिः सकर्मका अप्यकर्मका उक्ताः, तेन त्रैरूप्यं भवति—सुप्तो भवान् मासम्, सुप्तो भवता मासः, सुप्तं भवता मासम् ; एवम्—'ओदनपाकं सुप्तो भवान्' इत्यादि । पिब–पयः पीता गावः, इदं गोभिः पीतम्, इह गोभिः पीतम् । भुजि–अन्नं भुक्तास्ते, इदं तैर्भुक्तम्, इह तैर्भुक्तम् ॥११॥**

श० म० न्यासानुसन्धानम्—गत्य० । **भूतादौ यः क्तो विहित** इति—भावकर्मणोरिति शेषः, भूतादिकाले भावकर्मणोरर्थयोर्वाच्ययोर्यो क्तो विहितः स एव कर्तरि विधीयत इत्यर्थः । पाणिनीये च पिबभुजोर्ग्रहणं न दृश्यते, तत्र कथं 'भुक्ता ब्राह्मणाः' 'पीता गावः' इत्याशङ्क्य 'भुक्तमस्त्येषाम्' पीतमस्त्येषाम् [ आसां वा ] इत्यर्थे मत्वर्थीयेनाचा समाहितम् । "गम्लृं गतौ" गच्छति स्मेति कर्तरि क्ते—**गतो मैत्रो ग्राम**मिति, पक्षे गम्यते स्मेति कर्मणि क्ते—**गतो मैत्रेण ग्रामः** इति, भावे तु—गमनं **गतं मैत्रेणे**ति । प्रथमे क्तेनोक्तत्वात् कर्तुस्ततः प्रथमा, कर्मणोऽनुक्तत्वाद् द्वितीया, द्वितीये कर्मण उक्तत्वात् ततः प्रथमा, कर्तुरनुक्तत्वात् ततस्तृतीया, तृतीयेऽपि च कर्तुरनुक्तत्वात् तृतीया । सर्वत्र क्ते परे 'यमि-रमि-नमि-गमि०" [ ४. २. ५५. ] इति मलोपः । "यांक् प्रापणे" प्रापणमिह गतिः, यान्ति स्मेति कर्तरि क्ते—**यातास्ते ग्रामम्**, पक्षे यायते स्मेति कर्मणि—**यातस्तैर्ग्रामः**, भावे तु यानं—**यातं तैः** । अकर्मकानुदाहर्तुमाह—**अकर्मके**ति । "आसिक् उपवेशने" आस्ते स्मेति कर्तरि क्ते इटि च—**आसितो भवान्**िति, एवं—"शीङ्क् स्वप्ने" शेते स्मेति कर्तरि—**शयितो भवान्**िति, भावे तु आसनम्—**आसितं भवता**, शयनं—**शयितं भवता । सकर्मका अप्यविवक्षितकर्माणोऽकर्मका** इति, तदुक्तम्—

"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥" इति ।

यथा—नदी वहतीति, भारं वहतीत्यादौ सकर्मकस्यापि वहेः स्यन्दनरूपेऽर्थान्तरे वृत्तेरकर्मकत्वं नदी स्यन्दते इत्यर्थात् । धात्वर्थेनोपसंग्रहादकर्मिका क्रिया, यथा—जीवति नृत्यतीत्यादयः, जीवतीत्यस्य प्राणान् धारयति, नृत्यतीत्यस्य गात्रविक्षेपविशेषं करोतीति चार्थात् धात्वर्थ एव प्राणगात्रविक्षेपरूपकर्मणोरुपसंग्रहादुभयोरकर्मकत्वम् । प्रसिद्धेरकर्मिका क्रिया, यथा—मेघो वर्षतीति, अत्र हि वर्षणकर्मभूतं तोयं प्रसिद्धमेवेति न प्रयुज्यतेऽतोऽकर्मकत्वं क्रियायाः । कर्मणोऽविवक्षातोऽकर्मिका क्रिया, "हितान्न यः संशृणुते स किंप्रभुः" इति भारविः, अत्र सकर्मकस्यापि श्रुधातोः कर्म हितमिति पदमविवक्षितमित्यकर्मकत्वात् "समो गमृच्छि०" [ ३. ३. ८४. ]

इत्यात्मनेपदं भवति, हितात् हितोपदेष्टुः सकाशाद् यः [ हितं ] न संशृणुते स कुत्सितः प्रभुरिति तदर्थः, एवं च कर्मणोऽविवक्षयाऽविवक्षितकर्मकत्वं प्रसिद्धमेवेति । तथा सति सर्वेषामकर्मकत्वं सम्भवतीति पठतेरप्यकर्मकत्वमुदाहरति—**पठितो भवान्**इति—पठति स्मेति कर्तरि क्तः, एवं-प्रख्याति स्मेति कर्तरि क्ते-**प्रख्यातः,** वेत्ति स्मेति कर्तरि क्ते—**विदितः** । मतान्तरमाह—**अविवक्षितकर्मभ्यो नेच्छन्त्येके** इति, पाणिनीयमतेऽपि चाविक्षितकर्मणामुदाहरणानि नोपन्यस्तानि, एतन्मते चानुपपत्तिमाह—**तन्मते 'कृतो देवदत्तः, हृतो देवदत्तः' इत्यादि कर्तरि न भवतीति** । **काल-भावा-ऽध्वभिश्च कर्मभिः सकर्मका अप्यकर्मका उक्ताः** इति—एतेषां कालादीनां धातुमात्रं प्रति कर्मत्वादकर्मककथैवोच्छिद्येतेति युक्तमेवैतेषु कर्मसु सत्स्वप्यकर्मकत्वमिति ।

तदुक्तं भाष्येऽकर्मकधातुप्रस्तावे [ १. ४. ५५. ]—"अकर्मकाणामित्युच्यते, न च केचित् कदाचित् कालभावाध्वभिरकर्मकाः । त एवं विज्ञास्यामः—क्वचिद् येऽकर्मका इति । अथवा येन कर्मणा सकर्मकाश्चाकर्मकाश्च भवन्ति, तेनाकर्मकाणाम् । न चैतेन कर्मणा कश्चिदप्यकर्मकः । अथवा यत् कर्म भवति, न च भवति, तेनाकर्मकाणाम् , न चैतत् कर्म क्वचिदपि न भवति ।" इति,

अयमाशयः—कालाध्वभावभिः सर्वेषां सकर्मकत्वेनाव्यवस्थोपनिपातेऽकर्मकलक्षणं त्रिधा ज्ञेयमिति । तत्र प्रथमं—क्वचिद् येऽकर्मका इति, अत्र क्वचिदित्यस्य कालादीनां कर्मत्वप्रयोजकव्याप्त्यादिरहिते स्थले इत्यर्थः, एवं च कालादीनां कर्मत्वप्रयोजकत्वस्याकर्मकत्वाव्याघातकत्वमुक्तम् । द्वितीयलक्षणस्यायमाशयः—'सम्भवव्यभिचाराभ्यां स्याद् विशेषणमर्थवत्' इति हि सिद्धान्तः, तथा च यादृशेन कर्मणा व्यभिचारः सम्भवति तेनैव कर्मणा रहिता अकर्मका भवितुमर्हन्ति, न च तथाभूताः कालादयः, एतेषामविवक्षितत्वेऽपि सर्वत्र वस्तुस्थित्या तेषां सत्त्वमेवेति व्यभिचाराभावान्न तेषां सकर्मकाकर्मकव्यवस्थोपयोगित्वमपि तु कर्मणि द्वितीयामात्रोपयोगित्वमिति । तृतीयलक्षणस्यायमाशयः—अकर्मकश्रुत्याऽन्तरङ्गं द्रव्यरूपं कर्म निषिध्यते, नहि बहिरङ्गं कालादि कर्म, तथाहि—पूर्वं क्रियाया द्रव्यकर्मणा सह सम्बन्धो भवति, पश्चात् कालादिभिः परिमाणनिर्धारणाय । पूर्वं हि द्रव्योद्देशेन क्रिया प्रवर्तते, पश्चात् कालादिभिः सा परिच्छिद्यते, एवं च द्रव्यादीनां पूर्वोपस्थित्याऽन्तरङ्गत्वं कालादीनां पश्चादुपस्थित्या बहिरङ्गत्वमिति । तदुक्तम्—

"शक्तिप्रमाणसंख्यादेर्द्रव्यधर्मात् प्रवर्तते ।
क्रियासु कालयोगोऽतः प्राग् योगो द्रव्यकर्मणा ॥"
इति,

अयमर्थः—द्रव्यधर्मात् शक्तिप्रमाणसंख्यादेः क्रियासु कालयोगः प्रवर्ततेऽतो द्रव्यकर्मणा धातोः प्राग् योग इति । शक्ति-प्रमाण-संख्यादयो द्रव्यधर्मास्तद्धेतुक एव क्रियासु कालेन सम्बन्धः । तत्र शक्तेः—पल्लवजननशक्तेः कारणाद् वसन्तादिकालेन पल्लवजन्मक्रियायाः सम्बन्धः । प्रमाणवशाद् यथा क्रोशादिदूरगमनस्य दण्डादिकालेन सह प्रमाणानुसारमेव सम्बन्धः । संख्यावशाद् यथा नानाद्रव्यकर्मकपाकस्य तदनुकूलकालेन योगः । एवं च द्रव्यधर्ममूलकत्वात् कालयोगस्य कालादेः कर्मणो बहिरङ्गत्वमिति तस्मिन् कर्मणि सत्यप्यकर्मकत्वमिति समुदायार्थः । वस्तुतस्तु एतेन भाष्येणाकर्मकव्यवस्थायामेव कालादिकर्मणां बाधकत्वाभावः प्रतिपाद्यते, सकर्मकत्वं तु धातूनां कालादिकर्मकृतं स्यादेव, अत्र च कालादेः कर्मसंज्ञाविधानमेव मानम्, अत एव 'आस्यते मासः' इति कर्मणि संगच्छते । कृतमधिकेन प्रसङ्गागतप्रपञ्चेन । "कालभावाध्वभिरित्युपलक्षणं देशस्य, तेन सुप्तो भवान् कुरूनित्यपि द्रष्टव्यमिति लघुन्यासकारः । **तेन त्रैरूप्यं भवतीति**—तेन—कालादिकर्मणा सकर्मकस्यापि अकर्मकत्वेन, सकर्मकत्वाकर्मकत्वोभयस्वीकारेणेति भावः, त्रैरूप्यं—कर्तरि कर्मणि भावे चेति रूपत्रयं भवतीत्यर्थः, तथाहि—स्वपिति स्मेति कर्तरि क्ते—**सुप्तो भवान् मासम्**इति—अत्राकर्मकत्वादनेन कर्तरि क्तः, तेन कर्तुरुक्तत्वात् ततः प्रथमा, सकर्मकत्वाच्च मासमिति द्वितीया, अत एवात्र "कालाध्वभावदेशं वाऽकर्म चाकर्मणाम्" [ २. २. २३. ] इति कालादेराधारस्य कर्मसंज्ञाऽकर्मसंज्ञा चेति संज्ञाद्वयं वा विधीयते । पक्षे सकर्मकत्वात् सुप्यते स्मेति कर्मणि क्ते—**सुप्तो भवता मासः** इति—अत्र कर्मण उक्तत्वात् ततः प्रथमा,

कर्तुरनुक्तत्वाच्च ततस्तृतीया, पक्षेऽकर्मकत्वाद् भावे क्ते स्वापः–**सुप्तं भवता मासमिति**–अत्रापि कर्तुरनुक्तत्वात् तृतीया कर्मणोऽनुक्तत्वाच्च द्वितीया। एवं कर्तरि-**ओदनपाकं सुप्तो भवान्**, कर्मणि—**ओदनपाकः सुप्तो भवता**, भावे तु—**ओदनपाकं सुप्तं भवतेति** च ज्ञेयम्। **पिबेति** निर्देशात् "पां पाने" इत्यस्यैव पाधातोर्ग्रहणम्, पिबन्ति स्मेति कर्तरि क्ते—**पयः पीता गावः**, पीयते स्मेति कर्मणि क्ते—**इदं गोभिः पीतम्**, पानं पीतमिति भावे—**इह गोभिः पीतमिति**। भुञ्जते स्मेति कर्तरि क्ते—**अन्नं भुक्तास्ते**, भुज्यते स्मेति कर्मणि—**इदं तैर्भुक्तम्**, भोजनं भुक्तमिति भावे—**इह तैर्भुक्तमिति** ॥ ५. १. ११. ॥

## अद्यर्थाच्चाधारे। ५. १. १२. ॥

**त० प्र०—अद्यर्थात्–आहारार्थात् धातोर्गत्यर्थाऽकर्मक-पिब-भुजेश्च यः क्तः स आधारे वा भवति। इदमेषां जग्धम्, इदं तैर्जग्धम्, इह तैर्जग्धम्। इदमेषामभ्यवहृतम्, इदं तेषामशितम्, इदं तैरशितम्। आरम्भे तु कर्तर्यपि भवति—इह ते अन्नं प्राशिताः, इह ते मधु प्रलीढाः। गत्यर्थादिभ्यः खल्वपि—इदं तेषां यातम्, इदमहेः सृप्तम्, इदमेषामासितम्, इदमेषां शयितम्; इदं गवां पीतम्; इदं तेषां भुक्तम्। पक्षे कर्तृ-कर्म-भावेषु पूर्वाण्येवोदाहरणानि ॥१२॥**

**श० म० न्यासानुसन्धानम्—अद्यर्था०**। अदेरर्थ इवार्थो यस्य सोऽद्यर्थस्तस्मात्, अद्यर्थात्, तदाह—**आहारार्थादिति**। चकारेण पूर्वोक्तानां संग्रहः, तदाह—**गत्यर्थाकर्मकपिबभुजेश्चेति**। "अदंक् भक्षणे" अद्यते स्मास्मिन्नित्याधारे क्ते—**इदमेषां जग्धमिति**—एषामिदं भोजनस्थलमित्यर्थः, पक्षे अद्यते स्मेति कर्मणि क्ते—**इदं तैर्जग्धमिति**, अदनं जग्धमिति भावे क्ते—**इह तैर्जग्धमिति**। "यपि चादो जग्ध्" [ ४. ४. १६. ] इति सर्वत्र जग्धादेशो बोध्यः। अभ्यवपूर्वको हृधातुराहारार्थकः, अभ्यवहरत्यस्मिन्निति आधारे क्ते—**इदमेषामभ्यवहृतम्**, पक्षेऽभ्यवह्रियते स्मेति कर्मणि—**इदं तैरभ्यवहृतम्**, अभ्यवहरणमभ्यवहृतमिति भावे—**इह तैरभ्यवहृतम्**। "अशश् भोजने" अश्नात्यस्मिन्निति आधारे—**इदं तेषामशितम्**, अश्यते स्मेति कर्मणि—**इदं तैरशितम्**, अशनमशितमिति भावे—**इह तैरशितम्**, प्राश्नन्ति स्मेत्यारम्भे कर्तरि क्ते—**इह ते अन्नं प्राशिताः**। प्रलिहन्ति स्मेति कर्तरि क्ते—**इह ते मधुप्रलीढाः**। यात्यस्मिन् इत्याधारे क्ते—**इदं तेषां यातम्**, सर्पत्यस्मिन् इति—**इदमहेः सृप्तम्**, आस्तेऽस्मिन्निति—**इदमेषामासितम्**। शेते अस्मिन्निति—**इदमेषां शयितम्**, पिबत्यस्मिन्निति—**इदं गवां पीतम्**, भुङ्क्तेऽस्मिन्निति—**इदमेषां भुक्तमिति**। अस्य पक्षे का व्यवस्थेत्याह—**पक्षे कर्तृकर्मभावेषु पूर्वाण्येवोदाहरणानीति**—पूर्वसूत्रोक्तानीत्यर्थः। अत्रेत्थं लघुन्यासे—"नन्विदं तैर्जग्धमित्यादौ आधाराभावात् कर्मणि स्वयमेव क्तो भविष्यति किं विकल्पेनेति, न—तक्रकौण्डिन्यन्यायेनाधार एव एभ्यः क्तः स्यात्, यथा "गत्यर्थात् कुटिले" इत्यत्र यङ्।" इति ॥ ५. १. १२. ॥

## क्त्वा-तुमम् भावे। ५. १. १३. ॥

**त० प्र०—वेति निवृत्तम्। 'क्त्वा तुम् अम्' इत्येते प्रत्यया भावे धात्वर्थमात्रे वेदितव्याः। कृत्वा व्रजति, कर्तुं व्रजति, कारं कारं व्रजति, चौरंकारमाक्रोशति, अतिथिवेदं भोजयति ॥१३॥**

**श० म० न्यासानुसन्धानम्—क्त्वा०**। एषां प्रत्ययानामर्थानिर्देशात् "कर्तरि०" [ ५. १. ३. ] इति सूत्रेण कर्तरि प्राप्तौ भावे विधायकमिदं सूत्रम्, एवं च कर्तुरनुक्तत्वे 'पक्त्वोदनो भुज्यते देवदत्तेन' इत्यादौ कर्तरि तृतीया विभक्तिरुत्पद्यते। नन्वेवं 'पक्त्वोदनं भुङ्क्ते देवदत्तः, पक्त्वोदनो भुज्यते देवदत्तेन' इति क्त्वाप्रत्ययेन कर्तृकर्मणोरनभिधानात् पाकापेक्षया तृतीयाद्वितीये कस्मान्न भवतः, देवदत्तो हि यथा भुजेः कर्ता तथा पचेरपि, ओदनं च यथा भुजेः कर्म तथा पचेरपीति पचिनिरूपितकर्तृत्वकर्मत्वशक्त्योरनभिधानात् पूर्ववाक्ये कर्तुस्तृतीया, परत्र च कर्मणो द्वितीया कुतो न भवतीति चेत्? अत्रोच्यते—आख्यातादिपदवाच्या क्रिया विशेष्यत्वात् प्रधानम्, विशेषणभूता च पचिक्रियाऽप्रधानम्, तत्क्रियासाधनभूतयोरपि कर्तृत्वकर्मत्वशक्त्योः स्वक्रियाद्वारक एव गुणप्रधानभावः, तत्र प्रधानशक्त्यभिधाने गुणक्रियाशक्तिरभिहितवत् प्रकाशते, गुणानां च प्रधाना-

नुरोधित्वेन तन्मुखप्रेक्षित्वात्, ततश्च पृथग्विरुद्धकार्यारम्भकत्वसामर्थ्याभावः ।

अयमाशयः—उपात्तकारकाणां प्रधानान्वये सम्भवति न गुणे शाब्दोऽन्वयः किन्त्वार्थः, अर्थत एव तदीयाकाङ्क्षाशान्तौ शाब्दान्वये मानाभावात्, विभक्त्यादि च शाब्दान्वयानुरोधिकार्यमित्यार्थान्वयानुरोधेन न भवति । नन्वार्थान्वयेऽपि तत्क्रियानिरूपिता शक्तिस्तत्रास्त्येव, अन्यथा 'अद्य ग्रामाय गन्तुमिच्छति' इत्यत्र तुमन्तक्रियानुरोधेन ग्रामतश्चतुर्थी विभक्तिर्न स्यादिति चेत्? न—वस्तुस्वभावमाहात्म्येन प्रधानाख्यातवाच्यक्रियानुरोधिन्याः शक्तेरेव स्वसमानाधिकरणेतरशक्त्यभिभावकत्वात् । अत्र हरदत्तादिमतं पृथगस्ति परन्त्विह नातीवोपयुक्तमिति नेहोपन्यस्यते । एषां प्रत्ययानां भाववाचकत्वं तु सर्वमतसिद्धमेव, केवलमभिधानानभिधानप्रयुक्तो विवादः. सोऽपि परिणामतो न बहुभिन्नः । विस्तरान्वेषिभिर्भाष्यादि विलोकनीयम् ।

पूर्वं करणमिति "प्राक्काले" [ ५. ४. ४७. ] इति क्त्वि—**कृत्वा व्रजति** । करणायेति "क्रियायां क्रियार्थायां तुम्०" [ ५. ३. १३. ] इति तुमि—**कर्तुं व्रजति** । आभीक्ष्ण्येन पूर्वं करणमिति "ख्णम् चाभीक्ष्ण्ये" [ ५. ४. ४८. ] इति ख्णमि [ अमि ] वृद्धावारादेशे "भृशा०" [ ७. ४. ७३. ] इति द्वित्वे च—**कारं कारं व्रजति** । चोरं कृत्वेति "शापे व्याप्यात्" [ ५. ४. ५२. ] इति ख्णमि ङस्युक्तसमासे "खित्यनव्यया०" [ ३. २. १११. ] इति मागमे तस्यानुस्वारे च—**चोरंकारमाक्रोशति** । कार्त्स्न्येनातिथि विदित्वेति "विद्-दृग्भ्यां कार्त्स्न्ये णम्" [५.४.५४.] इति णमि उपान्त्यगुणे ङस्युक्तसमासे च—**अतिथिवेदं भोजयती**ति ॥ ५. १. १३. ॥

## भीमादयोऽपादाने । ५. १. १४. ॥

**त० प्र०—भीमादयः शब्दा अपादाने साधवो भवन्ति । बिभ्यत्यस्मादिति—भीमः । एवं—भीष्मः, भयानकः, चरुः, समुद्रः, स्रुवः, स्रुक्, रक्षः, संकसुकः, खलतिः । उणादिप्रत्ययान्ता एते "संप्रदानाच्चान्यत्रोणादयः" [ ५. १. १५. ] इति निषेधेनाप्राप्ता निपात्यन्ते ॥१४॥**

**श० म० न्यासानुसन्धानम्—भीमा०** । "ञिभीक् भये" बिभ्यत्यस्मादिति "भियः षोऽन्तश्च वा" [ उणा० ३४४. ] इति किति मप्रत्यये वा षागमे च—**भीमः, भीष्मः**, "शी–भी०" [ उणा० ७१. ] इत्यानके गुणे च—**भयानकः** । "चर भक्षणे च" चकाराद् गतौ, चरत्यस्मादिति "मि–वहि०" [ उणा० ७१६. ] इत्युप्रत्यये—**चरुः** स्थाली । "उन्दैप् क्लेदने" समुन्दन्ति आर्द्रीभवन्ति वेलाकाले नद्योऽस्मादिति "ऋज्यजि०" [ उणा० ३८८. ] इति किति रे—**समुद्रः** । "स्रु गतौ" स्रवन्त्यस्मादिति "निवृषि०" [ उणा० ५११. ] इति किति वे—**स्रुवः** स्रुक्, स्रवत्यस्या हविरिति "स्रोश्चिक्" [ उणा० ८७१. ] इति चिकि—**स्रुक्** जुहुप्रभृति अग्निहोत्रभाण्डम् । प्रत्यये इकार उच्चारणार्थः, ककारः कित्कार्यार्थः । "रक्ष पालने" रक्षत्यस्मादिति "अस्" [उणा० ९५२.] इत्यसि—**रक्षः**, निशाचर इत्यर्थः । "कस गतौ" संकसत्यस्मादिति "संविभ्यां०" [ उणा० ५२. ] इति उके—**संकसुको**ऽस्थिरः । "खल संचये च" चकाराच्चलने, "खल्यमि०" [ उणा० ६५३. ] इत्यतौ—**खलतिः** खल्वाटः ।

ननु भीमादीनामुणादिप्रत्ययान्तत्वादुणादीनां च "उणादयः" [ ५. २. ९३. ] इति सूत्रेण बाहुल्येन विधानादसत्यपि निपातने यथाप्रयोगमपादानार्थे भविष्यन्त्येवेति व्यर्थमिदं निपातनमित्याशङ्कायामाह—**उणादिप्रत्ययान्ता एते "सम्प्रदानाच्चान्यत्रोणादयः" [ ५. १. १५. ] इति निषेधेनाप्राप्ता निपात्यन्ते** इति, अयमाशयः—सम्प्रदानापादानाभ्यामन्यत्रैवोणादीनामिष्टत्वेन तदर्थं प्रकृतसूत्राभावेऽपि तत्रैवापादानग्रहणस्यापि कर्तव्यत्वेन भीमादीनामपादानार्थे व्युत्पत्तिर्न स्यात्, कृते त्वस्मिन् एतत्सूत्रविषयपरिहारेणैवोत्तरसूत्रस्य प्रवृत्त्या भीमादिव्यतिरिक्तेष्वेव प्रयोगेषूत्तरसूत्रं व्यवस्थापकं भवति * पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते * इति न्यायात् । पूर्वपठितमपवादसूत्रं "भीमादयोऽपादाने" इति, तेनानन्तरो विधिः "सम्प्रदानाच्च" इति बाध्यत इति ॥ ५. १. १४. ॥

## संप्रदानाच्चान्यत्रोणादयः । ५. १. १५. ॥

**त० प्र०—संप्रदानादपादानाच्चान्यत्र कारके भावे चोणादयः प्रत्यया भवन्ति । कृत्त्वात् कर्तर्येव प्राप्ताः कर्मादिष्वपि कथ्यन्ते । करोतीति—कारुः, वातीति—वायुः, कषितोऽसाविति कर्मणि—कषिः, तन्यतेऽसाविति—तनुः, ऋचन्ति तयेति—ऋक्, वृत्तं तत्रेति—वर्त्म, चरितं तत्रेति—चर्म ॥ १५ ॥**

**श० म० न्यासानुसन्धानम्—सम्प्रदा०** । चकारेण पूर्वसूत्रोक्तमपादानं समुच्चीयते । यद्यपि कारकाभ्यामाभ्यां भिन्नोऽर्थः कारकरूप एव ग्रहीतुमुचितस्तथापि प्रत्ययविधाननिमित्तभूता एवार्था अन्यत्वेन गृहीता इति कृतां कारकेष्विव भावेऽपि विधानस्य दृष्टतया भावेऽप्युणादयो यथाप्रयोगं भवन्त्वित्यम्यनुजानाति—**भावे चेति** । सूत्रस्य प्रयोजनमाह—**कृत्त्वात् कर्तर्येव प्राप्ताः कर्मादिष्वपि कथ्यन्ते** इति—अनिर्दिष्टार्थानां हि कृतां "कर्तरि" [ ५. १. ३. ] इति सूत्रेण कर्त्रर्थे विधानादुणादीनामपि कृत्त्वेन तत्रैव विधानं स्यादिति तद्वारणायेदम् ।

"डुकृंग् करणे" करोतीति कर्तरि "कृ-वा०" [ उणा-१ ] इत्युणि वृद्धावारादेशे—**कारुः**—कारी नापितादिरिन्द्रश्च, एवं—"वांक् गति-गन्धनयोः" वातीति कर्तर्युणि "आत ऐः०" [ ४. ३. ५३. ] इत्याकारस्य ऐकारे आयादेशे च—**वायुः** । "कष हिंसायाम्" कषितोऽसाविति कर्मणि "कृ-शॄ०" [ उणा० ६१६. ] इति इप्रत्यये—**कषिः**—निकषोपलः । "ऋचत् स्तुतौ" अतः "क्रुत्सम्पदादिभ्यः०" [५.३.११४.] इति क्विपि—**ऋक्** "वृतूङ् वर्तने" वृत्तं तत्रेत्यधिकरणे "मन्" [ उणा० ९११. ] इति मनि उपान्त्यगुणे च—**वर्त्म** पन्थाः, एवं "चर भक्षणे च" चरितं तत्रेत्यधिकरणे मनि—**चर्म** अजिनम् ॥ ५. १. १५. ॥

## असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः

। ५. १. १६. ॥

**त० प्र०—इतः सूत्रादारभ्य "स्त्रियां क्तिः" [ ५. ३. ९१. ] इत्यतः प्राक् योऽपवादस्तद्विषयेऽपवादेनासमानरूप उत्सर्ग औत्सर्गिकः प्रत्ययो वा भवति । अवश्यंलाव्यम्, अवश्यलवितव्यम्, अवश्यलवनीयम् । ज्ञः, ज्ञाता, ज्ञायकः । नन्दनः, नन्दकः, नन्दयिता । असरूप इति किम्? ध्यणि यो न स्यात्—कार्यम्, डविषयेऽण न स्यात्—गोदः । 'अनुबन्धोऽप्रयोगी' इति साख्यमेव । प्राक् क्तेरिति किम्? कृतिः, चितिः, रक्षितम्, रक्षणम्, घञादिनं भवति; चिकीर्षा, जिहीर्षा, क्तिनं भवति; ईषत्पानः, सुपानः, दुष्पानः, खल् न भवति । अपवादस्यादिविषये तु असरूपोऽप्युत्सर्गस्त्यादिनं प्रवर्तते इति "श्रु-सद०" [ ५. २. १. ] इत्यादिसूत्रे वाग्रहणेन ज्ञापयिष्यते ॥ १६ ॥**

**श० म० न्यासानुसंधानम्—असरू०** । **प्राक् क्तेरित्यस्यार्थमाह—"स्त्रियां क्तिः" [ ५. ३. ९१. ] इत्यतः प्रागिति**, अनेनोत्तरावधिरुक्तोऽपि पूर्वावध्यनिर्देशे क्तेः पूर्वं सर्वत्रास्य शास्त्रस्य प्रवृत्तिः स्यादिति शङ्कावारणायाह—**इतः सूत्रादारभ्येति** । 'असमानरूप उत्सर्गो वा प्रवर्तते' इत्युक्तावपि 'अपवादविषये प्रवर्तते' इति लब्धे 'अपवादे' इत्युक्तिः स्पष्टार्था । 'समानता च द्वयोरेव भवति नैकत्र, सादृश्यस्य भेदमूलकत्वात्, तथा च तदभावोऽपीति केनासारूप्यमित्याकाङ्क्षायामाह—**अपवादेनासमानरूप** इति । अपवादेनौत्सर्गिकस्य प्रत्ययस्य नित्यं बाधे प्राप्ते पक्षे औत्सर्गिकस्यापि विधानमाह—**उत्सर्ग औत्सर्गिकः प्रत्ययो वा भवतीति** । यद्यपि वावचनमनर्थकमुत्सर्गस्यानेन विधानादपवादस्य विशेषविहितत्वादुभयोः प्रवृत्तिसिद्धेः, तथापि सर्वोऽप्युत्सर्गोऽपवादविषय एव प्रवर्तत इति विपरीतबोधापत्तावपवादरहितस्योत्सर्गस्य कुत्रचित् प्रवृत्तिरेव न स्यादिति तद्वारणाय वाग्रहणमावश्यकम् । वस्तुतस्तु सर्वत्र यथाकथंचिदुत्सर्गापवादभावस्य सुसंपादतया नायमर्थो वाग्रहणस्यापि तु उत्सर्गापवादयोर्नित्यं बाध्यबाधकभावे स्थितेऽपवादविषये उत्सर्गस्य सर्वथा निवृत्तिरेव प्राप्ता तत्र पाक्षिकी प्रवृत्तिरेतेन सूत्रेण साध्यते । इदं सूत्रं नोत्सर्गशास्त्रीयकार्यविधायकं तेषां तत्तत्सूत्रैरेव विहितत्वात्, अपि तु सारूप्याभाववतोऽपवादस्य पाक्षिकापवादकत्वनियामकम्, तथा च वाग्रहणाभावेऽस्य सूत्रस्यैवानर्थक्यं प्रसज्येतेति वाग्रहणमावश्यकम् । अपवादस्य पाक्षिकबाधकत्वविधानात् फलितोत्सर्गस्यापि प्रवृत्तिः सूत्रे 'वोत्सर्गः' [ प्रवर्तते ] इति पदेनोक्ता न तूत्सर्गशास्त्र-

प्रवृत्तिर्विधेया । अत एव च पाणिनीये "वाऽसरूपोऽस्त्रियाम्" [ ३. १. ९४. ] इत्येव सूत्रितम्, 'असरूपोऽपवाद उत्सर्गस्य बाधको वा' इत्येवार्थस्तत्र क्रियते ।

तथा च भाष्ये शङ्कितम्—"किमर्थं पुनरिदमुच्यते ?" इति, तत्र समाहितम्—"असरूपस्य वावचनमुत्सर्गस्य बाधकविषयेऽनिवृत्त्यर्थम् । असरूपस्य वावचनं क्रियते । किं प्रयोजनम् ? उत्सर्गस्य बाधकविषयेऽनिवृत्तिर्यथा स्यात् । तव्यत्तव्यानीयर उत्सर्गास्तेषामजन्तात् 'यत्' अपवादः । चेयम्, चेतव्यमित्यपि यथा स्यात् ।" इत्यादिनाऽपवादस्य विकल्पेन बाधकत्वमेव समर्थितम्, तेन चान्यथा सिद्धैवोत्सर्गप्रवृत्तिः फलतीति । एवं च सम्पूर्णसूत्रस्यैव वैयर्थ्यमाशङ्कितं न तु वाग्रहणस्य, तस्यैव सूत्रविधेयत्वेन तद्वैयर्थ्यशङ्कायाः सूत्रवैयर्थ्यरूपत्वात् ।

"लूञ्श् छेदने" अतोऽवश्यंभावे द्योत्ये भावे कर्मणि वा "उवर्णादावश्यके" [ ५. १. १९. ] इत्यपवादभूते ध्यणि वृद्धौ "य्यक्ये" [ १. २. २५. ] इत्यौत आवादेशे मयूरव्यंसकादित्वात् समासे "कृत्येऽवश्यमो लुक्" [ ३. २. १३८. ] इति मकारलोपे च—**अवश्यलाव्यमि**ति, पक्षे औत्सर्गिकौ "तव्या-ऽनीयौ" [ ५. १. २७. ] इति तव्योऽनीयश्च प्रत्ययौ भवतीति—**अवश्यलवितव्यम्, अवश्यलवनीयमि**ति—प्रथमे इट्, उभयत्र गुणे–ओकारे "ओदौतोऽवाव्" [ १. २. २४. ] इत्यवादेशः, प्राग्वत् समासमकारलोपौ च । "ज्ञांश् अवबोधने" जानातीति कर्तरि "नाम्युपान्त्य०" [ ५. १. ५४. ] इति अपवादभूते के "इडेत्पुसि०" [ ४. ३. ९४. ] इत्याकारलोपे—**ज्ञः**, पक्षे "णक-तृचौ [ ५. १. ४८. ] इति णक-तृचौ भवतः, तत्र तृचि—**ज्ञाता,** णके तु "आत ऐः०" [ ४. ३. ५३. ] इत्याकारस्य ऐकारे आयादेशे च—**ज्ञायकः** इति । "टुनदु समृद्धौ" अतो णौ नन्दयतीति "नन्द्यादिभ्योऽनः" [ ५. १. ५२. ] इत्यपवादभूतेऽने "णेरनिटि" [ ४. ३. ८३. ] इति णिलोपे—**नन्दनः**, पक्षे औत्सर्गिके णके—**नन्दकः**, तृचि च—**नन्दयिता,** अत्रेटि णेर्लोपाभावे गुणे चायादेशः ।

पदकृत्यं पृच्छति—**असरूप इति किमि**ति—सामान्यत एवोत्सर्गोऽपवादविषये प्रवर्ततां किं विकल्पेनेति प्रष्टुराशयः, तथा सति सरूपोऽप्यपवाद उत्सर्गस्य विषये स्यात्, अथवा सरूपस्याप्यपवादस्य विषये उत्सर्गः स्यादिति ध्यणोऽपि विषये "य एच्चातः" [ ५. १. २८. ] इति योऽपि स्यादिति कार्यमित्यस्य स्थाने कर्यमित्यपि स्यात्, तन्मा भूदेतदर्थमसरूपग्रहणमावश्यकमित्याह—**ध्यणि यो न स्यादि**ति, कृधातोः "ऋवर्णव्यञ्जनाद् ध्यण्" [ ५. १. १७. ] इति ध्यणि वृद्धावारादेशे—**कार्यमि**ति । एवं—"डुदांग्क् दाने" गां ददातीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणोऽपवादे "आतो डो०" [ ५. १. ७६. ] इति डेऽन्त्यस्वरादिलोपे ङस्युक्तमसासे—**गोद** इति भवति, असरूपग्रहणाभावेऽत्रापि दोषः स्यात् तद्वारणायावश्यकं तदित्याह—**डविषयेऽण् न स्यात्, गोदः** इति—न स्यादित्यनेनाप्रवृत्तिरेव फलतयोच्यते । न च कृतेऽप्यसरूपग्रहणे 'ध्यण्-ययोः' 'डाऽणोश्च' सारूप्याभावेन कुतोऽनयोः परस्परव्यावृत्तिरिति चेत् ? अत्राह—**'अनुबन्धोऽप्रयोगी' इति सारूप्यमेवे**ति, अयमाशयः—रूपं हि द्विविधमौपदेशिकं प्रायोगिकं च, शास्त्रेषूच्चार्यमाणं प्रथमम्, प्रयोगेषु श्रूयमाणं द्वितीयम्, तत्र प्रायोगिकासम्भव एवौपदेशिकं रूपमाश्रयणीयम् । सानुबन्धकेष्वपि सति सम्भवे प्रायोगिकमेव रूपमाश्रयणीयं, तदसम्भवे चौपदेशिकमिति । तथा च प्रायोगिकरूपाश्रयणेऽनुबन्धानामप्रयोगिकत्वेन तत्कृतमसारूप्यं न ग्राह्यमपि तु प्रयोगे श्रूयमाणरूपकृतं सारूप्यमेव ग्राह्यम्, अत एव 'ध्यण्–य' इत्येतयोः 'ड–अण्' इत्येतयोश्च प्रयोगे रूपे भेदाभावेन सारूप्यमेवेति । क्तिप्रत्ययात् प्रागेव, न तत्र तदुत्तरे वाऽसरूप उत्सर्गोऽपवादविषये प्रवर्तते इति यदुक्तं तत्फलं पृच्छति—**प्राक् क्तेरिति किमि**ति, उत्तरयति—**कृतिरि**ति—अत्र "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति भावाकर्त्रोः क्तिः, **चितिरि**ति—अत्रापि क्तिः, "रक्ष पालने" अतः "क्लीबे क्तः" [ ५. ३. १२३. ] इति भावे क्लीबे क्ते—**रक्षितमि**ति, "अनट्" [ ५. ३. १२४. ] इति भावे क्लीबेऽनटि—**रक्षणमि**ति, अत्र 'क्ति क्त अनट्' इत्येषां क्तेः प्राक्त्वाभावान्नास्य प्रवृत्तिः, तथा च किं फलमित्याह—**घञादिर्न भवतीति**—"भावाकर्त्रोः" [ ५. ३. १८. ] इत्यादिना

घञादिर्न भवतीत्यर्थः । एवं कर्तुमिच्छा—**चिकीर्षा,** हर्तुमिच्छाः—**जिहीर्षा,** अत्र "शंसि-प्रत्ययात्" [ ५. ३. १०५. ] इति भावाकर्त्रोः स्त्रियाम् 'अ'प्रत्ययो भवति, न तु "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिः । एवं—सुखेन पीयते इति "शासू-युधि०" [ ५. ३. १४१. ] इत्यने—**ईषत्पानः, सुपानः,** एवं दुःखेन पीयते इति—**दुष्पानः**, अत्र "दुःस्वीषतः०" [ ५. ३. १३९. ] इति खल् न भवति । इतोऽग्रे प्राक् क्तेस्त्याद-योऽपि विधीयन्ते, तेषु चापवादविषये नोत्सर्गस्य प्रवृत्ति-रिष्टा, सा च कथं स्यादित्याशङ्कायामाह—**अपवादत्या-दिविषये त्वसरूपोऽप्युत्सर्गस्त्यादिर्न प्रवर्तते** इति—असरूपोऽपीति कथनेन सरूपप्रवृत्त्यभावः स्वतो लब्ध एवेति प्रतिपादितमपि नावश्यकम्, सरूपान्तराभावात्, प्रायोगिकमेव रूपं ग्राह्यमिति तत्र तत्सरूपस्यान्यस्या-भावात् । न प्रवर्तते इत्यत्र साधकमाह—**"श्रु-सद०" [ ५. २. १. ] इत्यादिसूत्रे वाग्रहणेन ज्ञापयिष्यते** इति, यदि हि सूत्रमिदं तत्रापि प्रवर्तेत तदा स्वत एव पक्षे यथास्वमौत्सर्गिकाणां सिद्धेर्वाग्रहणस्य वैयर्थ्यं स्पष्टमेव । पाणिनीयेऽप्ययमर्थो ज्ञापकेनैव साधितः, भाष्ये च ज्ञापकं विनाप्यौपदेशिकरूपग्रहणेनोपदेशे च सर्वेषां त्यादीनां लरूपतयैवैतत्सूत्राप्रवृत्तेरिति ॥ ५. १. १६. ॥

---

## ऋवर्ण-व्यञ्जनाद् घ्यण् । ५. १. १७. ॥

**त० प्र० ऋवर्णान्ताद् व्यञ्जनान्ताच्च धातोर्घ्यण् प्रत्ययो भवति । कार्यम्, हार्यम्; पाक्यम्, वाक्यम् । णकारो वृद्ध्यर्थः । घकारः "क्तेऽनिटः०" [ ४. १. १११. ] इत्यत्र विशेषणार्थः ॥१७॥**

---

**श० म० न्यासानुसन्धानम्—ऋवर्ण०** । अत्र प्रकृतेः पूर्वमनिर्देशेऽपि धातोरिति विशेष्यं प्रकृतित्वेन प्रकल्पनीयम्, सूत्रे निर्दिष्टम् 'ऋवर्णव्यञ्जनात्' इति पदं च विशेषणम्, तथा च "विशेषणमन्तः" [ ७. ४. ११३. ] इति परिभाषासूत्रेण तदन्तविधौ योऽर्थः सम्पन्नस्तमाह—**ऋवर्णान्ताद् व्यञ्जनान्तादिति** । कृधातोर्हृधातोश्च भावकर्मणोरनेन घ्यणि "नामिनो०" [ ४. ३. ५१. ] इति वृद्धावारादेशे—**कार्यम्, हार्य-मिति** । एवं 'पच्' धातोः 'वच्' धातोश्चानेन घ्यणि "क्तेऽनिटश्चजोः कगौ घिति" [ ४. १. १११. ] इति चकारस्य ककारे "ञ्णिति" [ ४. ३. ५०. ] इत्यु-पान्त्यवृद्धौ—**पाक्यम्, वाक्यमिति** । प्रयोगेऽदृष्टस्यानु-बन्धस्य साफल्यमुपदिशति—**णकारो वृद्ध्यर्थः** इति—"ञ्णिति" "नामिनोऽकलिहलेः" इति सूत्राभ्यां यथास्वं विधीयमाना वृद्धिः प्रयोजनं णित्वस्येति भावः । नन्वस्तु वृद्ध्यर्थं णकारो, घकारस्तु व्यर्थ एवेति चेद् ? अत्राह—**"क्तेऽनिटः०" इत्यत्र विशेषणार्थः** इति—तेन घित्वप्रयुक्तं क-ग-विधानं तत्प्रयोजनमिति भावः, तत्र ग्रहणार्थं घित्वेन यथायं प्रत्ययो विशेष्येत तदर्थमिति विशेषणार्थमित्यस्यार्थः, इत्थमुभयोः सार्थक्यम् ॥ ५. १. १७. ॥

---

## पाणि-समवाभ्यां सृजः । ५. १. १८. ॥

**त० प्र०—पाणिपूर्वात् समवपूर्वाच्च सृजेर्घ्यण् प्रत्ययो भवति । ऋदुपान्त्यक्यपोऽपवादः । पाणिभ्यां सृज्यते—पाणिसर्ग्या रज्जुः, समवसृज्यते इति—समवसर्ग्यः । पाणि०-समवाभ्यामिति किम् ? सृज्यम्, संसृज्यम् । 'समव' इति समुदायपरिग्रहार्थं द्विवचनम् ॥१८॥**

---

**श० म० न्यासानुसन्धानम्—पाणि०** । सृजेर्व्यञ्ज-नान्तत्वेन पूर्वसूत्रेणैव घ्यणि सिद्धे इदं किमर्थमित्याशङ्का-यामाह—**ऋदुपान्त्यक्यपोऽपवादः** इति—"ऋदुपा-न्त्या०" [ ५. १. ४१. ] इति क्यप् विधीयते, स हि क्यप् परत्वाद् विशेषविहितत्वाच्च "ऋवर्णव्यञ्जनाद्०" [ ५. १. १७. ] इत्यस्यापवादः, सारूप्याच्च नोत्सर्गस्त-द्विषये प्रवर्तेतेति तद्बाधनाय सूत्रमिदमावश्यकम्, कृते चास्मिंस्ततोऽप्यस्य विशेषविहितत्वेन प्राबल्यम् । पाणि-भ्यां सृज्यत इति कर्मणि घ्यणि उपान्त्यगुणे जस्य गत्वे—**पाणिसर्ग्या रज्जुः** । एवं समवसृज्यते इति कर्मणि घ्यणि—**समवसर्ग्यः** । पृच्छति—**पाणि-समवाभ्यामिति किमिति**—"सृजः" इत्येतावदेव सूत्रमस्त्विति प्रष्टु-राशयः । एतत्पूर्वादेव सृजेर्घ्यण्, इतोऽन्यपूर्वात् केवलाच्च ऋदुपान्त्यलक्षणः क्यबेवेष्टः, स तथा सति न स्यादित्याह—**'सृज्यम्, संसृज्यम्'** इति प्रत्युदाहरणाभ्याम् । समाहा-रेण निर्देशस्य प्रायः सूत्रकारशैलीसिद्धत्वात् तत्परित्याग-

स्येह किं प्रयोजनमिति स्फोरयति—**'समव' इति समुदायपरिग्रहार्थं द्विवचनम्**इति, तथा चैकत्वे कृते कश्चित् 'पाणि-सम्-अव' इति त्रयाणां समाहारं ज्ञात्वा तथा प्रयुञ्जीत, तन्मा भूदित्येतदर्थं द्विवचनेन निर्देश इति 'समव' इति संघातपूर्वादेव भवतीति ॥ ५. १. १८. ॥

---

**उवर्णादावश्यके** । ५. १. १९. ॥

**त० प्र०—अवश्यस्य भावोऽवश्यं भाव इति वा अकञि—आवश्यकम्, तस्मिन् द्योत्ये उवर्णान्ताद् धातोर्घ्यण् भवति । लाव्यम्, पाव्यम्, यन्नियोगात् कर्तव्यमर्थप्रकरणादिना निश्चितं तत्रायं प्रत्ययः । लाव्यमवश्यम्, पाव्यमवश्यम्, अवश्यलाव्यम्, अवश्यपाव्यम्, अत्रावश्यंशब्देनापि अवश्यं भावो द्योत्यते, मयूरव्यंसकादित्वाच्च समासः । अवश्यस्तुत्य इति परत्वात् क्यप् । आवश्यक इति किम् ? लव्यम्, पव्यम् ॥१९॥**

---

**श० म० न्यासानुसन्धानम्—उवर्णा०** । आवश्यकशब्दं व्याख्याति—**अवश्यस्य भावोऽवश्यं भाव इति वाऽकञि—आवश्यकम्**इति, अयमाशयः—अवश्यशब्दाद् भावे "योपान्त्या०" [ ७. १. ७२. ] इत्यकञि—आवश्यकम्, यद्वा निश्चयार्थे 'अवश्यम्' इत्यव्ययं ततो भावे "चोरादेः" [ ७. १. ७३. ] इत्यकञि मलोपे—आवश्यकम्, ञित्वादुभयत्र वृद्धिः । आवश्यकवाचिनि उपपदे इत्यर्थे केवलात् धातोरिष्टस्यावश्यकार्थे प्रत्ययस्यानुपपत्तिरिति प्रत्ययार्थत्वमावश्यकस्य वर्णयति—**तस्मिन् द्योत्ये** इति । छेदनार्थस्य लूधातोः पवनार्थस्य च पूधातोः कर्मणि भावे वाऽऽवश्यकार्थे अनेन घ्यणि "नामिनो०" [ ४. ३. ५१. ] इति वृद्धौ "य्यक्ये" [ १. २. २५. ] इत्यावादेशे च—**लाव्यम्, पाव्यम्**इति । ननु लाव्यादिप्रयोगतः कथमावश्यकावगतिरिति चेत् ? अत्राह—**यन्नियोगात् कर्तव्यमर्थप्रकरणादिना निश्चितं तत्रायं प्रत्ययः** इति—अर्थेन प्रकरणेनान्येन च शब्दार्थनिर्णायकेन प्रमाणेन यत् नियोगतः कर्तव्यतया निर्धारितं तत्रायं प्रयोगः क्रियते, ज्ञायते च । शब्दार्थस्य सन्देहे सति निर्णायकानि प्रमाणानि पठितान्यभियुक्तैः—

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥" इति ।

एतदुदाहरणानि काव्यानुशासनाद्याकरग्रन्थेषु दर्शितानीति नेह प्रयत्यतेऽनावश्यकत्वात् । एष्वर्थप्रकरणयोरेव मुख्यतोऽर्थनिर्णायकत्वेन प्राधान्येन निर्देशः कृत आचार्येण । तथा चार्थानुसारं प्रकरणानुसारं च विनाऽप्यावश्यकशब्दप्रयोगमावश्यकार्थोऽत्र गम्यत इति प्रत्ययविधानस्य सार्थक्यमिति । अवश्यमा योगे उदाहरति—**अवश्यलाव्यम्, अवश्यपाव्यम्**इति—अत्र "कृत्येऽवश्यमो लुक्" [ ३. २. १३८. ] इति मलोपः । नन्विह प्रत्ययेनैवावश्यकार्थद्योतनसम्भवे उक्तार्थत्वादवश्यंशब्दस्य प्रयोगोऽनुचित इत्याशङ्कायामाह—**अत्रावश्यंशब्देनापि अवश्यं भावो द्योत्यते** इति, अयमाशयः—यथा 'द्वौ ब्राह्मणौ' इत्यादौ ब्राह्मणावित्यत्र विहितेन द्विवचनेनैव द्वित्वार्थस्योक्तत्वेऽपि 'द्वौ' इति प्रयुज्यते स्पष्टतया द्वित्वप्रतिपादनाय, तथाऽवश्यंशब्देनापि प्रयुक्तेनावश्यकार्थ एव द्योत्यते, यथा वा 'व्यतिलुनते' इत्यादौ आत्मनेपदेनापि क्रियाव्यतिहारे द्योतिते व्यतिशब्दप्रयोगः, तथाऽत्रापि घ्यणा अवश्यंभावेऽवश्यंशब्दप्रयोगः । द्योतकसमुच्चयस्येष्टत्वेन लाघवं प्रकरणादिति भावः । नन्ववश्यंशब्दस्योपपदत्वाभावेन कारकत्वाभावेन च कथमत्र समास इत्याशङ्कायामाह—**मयूरव्यंसकादित्वात् समासः** इति—मयूरव्यंसकादीनां चाकृतिगणत्वेन तत्र पाठस्यानुमातुं शक्यत्वात् । उवर्णान्तात् सर्वस्मादेवावश्यकार्थेऽनेन घ्यणा भाव्यमिति 'अवश्यस्तुत्यः' इत्यादावपि घ्यण् स्यान्न तु क्यबित्याशङ्कायामाह—**अवश्यस्तुत्य इति परत्वात् क्यप्** इति, इदं सूत्रं लाव्यमित्यादौ सावकाशम्, "दृ-वृग्-स्तु-जुषेति-शासः" [ ५. १. ४०. ] इति स्तुत्य इत्यत्र सावकाशम्, इति तुल्यबलयोरेतयोरेकत्रावकाशस्तु 'अवश्यस्तुत्यः' इत्यत्र प्राप्तेः स्पर्धस्य विद्यमानत्वेन परत्वात् स एव भवतीति भावः, परं तु तत्रावश्यकार्थप्रतीतयेऽवश्यंशब्द आवश्यकः, अन्यथा विशेषाभावादर्थे विशेषो न ज्ञायेत । आवश्यकादन्यत्र यथास्वं प्रत्ययः, तच्चासत्यावश्यकग्रहणे न स्यादिति बोधयितुं शङ्कते—**आवश्यक इति किम् ? लव्यम् पव्यम्**इति—अत्र छेदनस्य पवनस्य वा नावश्यकता विवक्षितेत्यस्याप्रवृत्त्या "य एचातः" [ ५. १. २८. ] इति यप्रत्ययः ॥ ५. १. १९. ॥

## आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्यानमः । ५. १. २० ॥

**त० प्र०—आङ्पूर्वाभ्यां सुनोति-नमिभ्यां यौत्यादिभ्यश्च धातुभ्यो घ्यण् भवति । यापवादः । आसाव्यम्, याव्यम्, वाप्यम्, राप्यम्, लाप्यम्, अभिलाप्यम्, अपत्राप्यम्, डेप्यम् । दभिः सौत्रो बन्धने वर्तते । दाभ्यम्, अवदाभ्यम्, आचाम्यम्, आनाम्यम्, नमिरन्तर्भूतण्यर्थः सकर्मकः, अकर्मका अपि हि धातवो ण्यर्थे वर्तमानाः सकर्मका भवन्ति, यथा-नेमिं नमन्ति । डिपेः कुटादित्वाद् घे गुणो न लभ्यत इति घ्यण् विधीयते । आनमेर्नेच्छन्त्येके ॥२०॥**

---

**श० म० न्यासानुसन्धानम्—आसु०** । अत्र बहूनां व्यञ्जनान्तत्वेन तन्निमित्तके घ्यणि सिद्धे किमर्थमिदमित्याशङ्कायामाह—**यापवादः** इति—आद्ययोः स्वरान्तलक्षणोऽन्येषां च पवर्गान्तलक्षणो यो घ्यणपवादः प्राप्त इति तद्बाधनायावश्यकमिदं सूत्रमिति भावः । अत्राभिषवार्थकस्य सुनोतेरेव ग्रहणं नान्यस्य बाहुलकादिति व्याख्यातारः, एवं मिश्रणार्थकस्य यौतेरेव ग्रहणं न तु बन्धनार्थस्य "युंग्श्" इत्यस्य *निरनुबन्धकग्रहणे न सानुबन्धकस्य* इति न्यायादित्यपि त एव । "सुं प्रसवैश्वर्ययोः" "षुंक् प्रसवैश्वर्ययोः" "षुंग्ट् अभिषवे" इति त्रिधा सुधातुस्तत्रान्तिमादाङ्पूर्वादनेन घ्यणि वृद्धावावादेशे च—**आसाव्यम्** । एवं "युक् मिश्रणे" इत्यस्य—**याव्यम्** । "टुवपीं बीजसन्ताने" अतो घ्यणि उपान्त्यवृद्धौ—**वाप्यम्** । एवं "रप लप व्यक्ते वचने" इत्येतयोः—**राप्यम्, लाप्यम्, अभिलाप्यम्** । "त्रपौषि लज्जायाम्" इति 'त्रप्'धातोरपपूर्वस्य—**अपत्राप्यम्** । "डिपत् क्षेपे" इत्यस्य—**डेप्यम्** । गणे पाठाभावात् दभिरिह सौत्रो ग्राह्य इत्याह—**दभिः सौत्रो बन्धने वर्तते** इति, तस्य—**दाभ्यम्, अवदाभ्यम्** । "दम्भूट् दम्भे" इत्यस्य तु—दम्भ्यमिति भवति । आङ्पूर्वस्य "चमू अदने" इत्यस्य—**आचाम्यम्** । यद्यपि नात्रोपसर्गपूर्वकस्यैव ग्रहणमपि तु सामान्यतः सोपसर्गस्यानुपसर्गस्य च तथापि अनुपसर्गस्य ये घ्यणि च न विशेषो वृद्धेः "मोऽकमि-यमि-रमि०" [४. ३. ५५. ] इति प्रतिषिध्यमानत्वात्, ततश्चाङ्पूर्वस्योदाहरणं दत्तम्, तस्य निषेधे पर्युदस्यमानत्वात् । आङ्पूर्वान्नमेः—**आनाम्यमिति**, अत्र कर्मणि प्रत्यय इति द्योतयितुमाह—**नमिरन्तर्भूतण्यर्थः सकर्मकः** इति, यो हि नमति स परमपि किञ्चिन्नमयत्येव तथास्वाभाव्यादिति विवक्षाभावेऽप्यस्यान्तर्भूतण्यर्थत्वमस्त्येव । कुतोऽकर्मकस्य सकर्मकत्वमिति द्रढयन्नाह—**अकर्मका अपि हि धातवो ण्यर्थे वर्तमानाः सकर्मका भवन्तीति**, अत्रोदाहरणमाह—**यथा-नेमिं नमन्तीति** । अण्यन्तावस्थाकर्तुः कर्मत्वस्योक्तत्वेन तेषां सकर्मकत्वं शास्त्रप्रतिपादितमेवेति भावः । डिपेर्ये घ्यणि वा गुणस्य सामान्यतः प्राप्त्या ये घ्यणि वा रूपे विशेषाभाव इति शङ्कायामाह—**डिपेः कुटादित्वाद् ये गुणो न लभ्यत इति घ्यण् विधीयते** इति—अस्य [ घ्यणः ] णित्त्वेन "कुटादेङिद्वदणित्" [ ४. ३. १७. ] इत्यत्र 'अणित्' इति ङित्त्वे पर्युदस्यमानत्वात्, यस्तु ङित् स्यादेवेति भावः । मतान्तरमाह—**आनमेर्नेच्छन्त्येके** इति ॥ ५. १. २०. ॥

---

## वाऽऽधारेऽमावस्या । ५. १. २१. ॥

**त० प्र०—अमापूर्वाद् वसतेराधारे घ्यण् प्रत्ययो धातोः पक्षे ह्रस्वश्च निपात्यते । अमाशब्दः सहार्थः, सह वसतोऽस्यां सूर्या-चन्द्रमसाविति-अमावस्या अमावास्या वा रूढ्या तिथिविशेषः । पक्षे यमकृत्वा ह्रस्वनिपातनम् "अश्वामावास्यायाः" [ ६. ३. १०३. ] इत्यत्रैकदेशविकृतस्यानन्यत्वादमावास्याशब्देन अमावस्याशब्दस्यापि ग्रहणार्थम् ॥२१॥**

---

**श० म० न्यासानुसन्धानम्—वाऽधा०** । निपातनसूत्रमिदं, तत्र किं निपात्यते इत्याह—**अमापूर्वादित्यादि** । व्युत्पादयितुं पूर्वममाशब्दार्थमाह—**अमाशब्दः सहार्थः** । व्युत्पत्तिमाह—**सह वसतोऽस्यां सूर्याचन्द्रमसाविति** । सूर्याचन्द्रमसावेकत्र कदापि न वर्तेते इति योगार्थासम्भवादाह—**रूढ्या तिथिविशेषः** इति—एवम्भूता कृष्णपक्षीया पञ्चदशी तिथिः । वाचस्पत्ये त्वेवमुक्तम्—'अधःप्रदेशवर्ती शीघ्रगामी चन्द्रः' ऊर्ध्वप्रदेशवर्ती मन्दगामी सूर्यः, तयोर्गतिविशेषाद् यस्मिन् काले चन्द्रमण्डलमन्यूनमनतिरिक्तं च सत् सूर्यमण्डलाधोभागे व्यवस्थितं भवति तदा सूर्यरश्मिभिः साकल्येनाभिभूतत्वाच्चन्द्रमण्डलमीषदपि

न दृश्यत इति कृष्णपक्षे पञ्चदशकलाकूटोपलक्षितः कालोऽमावास्येति निष्कर्षः।" इति, स्वमते तु नित्यराहुणा चन्द्रमण्डलमाश्रियते उपरिभागवर्ती चेति विशेषः। ननु घ्यणं कृत्वा पक्षे ह्रस्वनिपातनापेक्षया वरं विकल्पेन यविधानं, पक्षे च व्यञ्जनान्तलक्षणो घ्यणेव बाहुलकादाधारे भविष्यतीति पाक्षिकह्रस्वनिपातनमनुचितमित्याशङ्क्याह—**पक्षे यमकृत्वे**त्यादि, अमावास्याशब्दमुच्चार्याकारोऽकारश्च विधीयते, तत्र हि घ्यणन्तस्य निर्देश इति निर्विवादम्, यदि यो विधीयेत तर्हि यान्तस्य शब्दान्तरत्वेन घ्यणन्तस्य ग्रहणेन तस्य ग्रहणं न स्यात्, घ्यणन्तस्यैव पाक्षिकह्रस्वनिपातने च शब्दान्तरत्वाभावेन किञ्चिद् विकृत्वेऽपि *एकदेशविकृतमनन्यवत्* इति न्यायेनोभयोर्ग्रहणं सुसम्पादमिति भावः ॥ ५. १. २१. ॥

## संचाय्य-कुण्डपाय्य-राजसूयं क्रतौ । ५. १. २२. ॥

**त० प्र०—एते क्रतावभिधेये घ्यणन्ता निपात्यन्ते, आधारे कर्मणि वा, निपातनादेवायादेश-दीर्घत्वे अपि भवतः। संचीयते सोमोऽस्मिन् संचीयते वाऽसाविति—संचाय्यः क्रतुः, संचेयोऽन्यः। कुण्डैः पीयते सोमोऽस्मिन् कुण्डैः पीयते इति वा—कुण्डपाय्यः क्रतुः, ससोमको हि यागः क्रतुः, कुण्डपानोऽन्यः। राजा सूयतेऽस्मिन् राज्ञा वा सोतव्य इति—राजसूयः क्रतुः ॥२२॥**

**श० म० न्यासानुसन्धानम्—संचाय्य०**। निपातनेन ह्यलाक्षणिकं कार्यं लभ्यते, तत् किमित्याह—**आधारे कर्मणि वे**ति—नह्याधारे घ्यण् विहित इति तदपि [ आधारे विधानं ] निपातनलभ्यमेव। किञ्चापरमपि निपातनोद्देश्यमित्याह—**निपातनादेवायादेश-दीर्घत्वे** इति—आयादेशः संचाय्य-कुण्डपाय्ययोः, दीर्घत्वं च राजसूये। व्युत्पत्तिमाह—**संचीयते सोमोऽस्मिन्नि**ति—सोमो नाम लतात्मक ओषधिविशेषः, स एकत्रीक्रियते यत्रेत्यधिकरणे, अथवा संचीयतेऽसाविति कर्मणीति भावः, क्रतुविशेषस्य संज्ञेत्याह—**संचाय्यः क्रतु**रिति। **अन्यः** चयनार्हः पदार्थः, **संचेय इत्येव,** अत्र यप्रत्ययः। **कुण्डैः पीयते** इति—कुण्डाकारैश्चमसैः पीयते **सोमः**—सोमलतारसोऽत्रेत्यर्थः, कर्मण्यपि प्रत्यये क्रतुरेवोच्यते, क्रतोः सोमसाध्यतया सोमस्य पीयमानत्वेन क्रतोरपि पीयमानत्वोपचारात्। क्रतुशब्दार्थं परिचाययति—**ससोमको हि यागः क्रतु**रिति—यागो द्विधा—ससोमकोऽसोमकश्च, तत्र ससोमके यागे क्रतुशब्दस्य प्रयोगः साम्प्रदायिकः, तथा च वाचस्पत्येऽप्युक्तम्-यूपसहितः ससोमको यागः क्रतुरिति, अद्यत्वे च सामान्यतो यागमात्रे क्रतुशब्दः प्रयुज्यते, तन्मूलं चामरादिकोशानां तथाशक्तिग्राहकत्वमेव, तथाहि अमरः—"यज्ञोऽध्वरः सवो यागः, सप्ततन्तुर्मखः क्रतुः" इत्याह, तथा मेदिनीकोशेऽपि "क्रतुर्यज्ञे मुनौ पुंसि"। **राजा सूयतेऽस्मिन्नि**ति—राजा—लतात्मकः सोमः, सूयते—कण्ड्यतेऽस्मिन्निति अधिकरणे व्युत्पत्तिः। **राज्ञा वा सोतव्य** इति—राज्ञा सोतव्यः—अभिषवद्वारा निष्पादयितव्य इति कर्मणि, राज्ञ एव राजसूययज्ञेऽधिकारात् 'स्वाराज्यकामो राजा राजसूयेन यजेत' इति श्रुतेः, उभयथा क्रतुरेव वाच्यः ॥ ५. १. २२. ॥

## प्रणाय्यो निष्कामा-ऽसम्मते । ५. १. २३. ॥

**त० प्र०—प्रपूर्वान्नयतेर्घ्यण् आयादेशश्च निपात्यते, निष्कामेऽसंमते वाऽभिधेये। प्रणाय्योऽन्तेवासी, विषयेष्वनभिलाष इत्यर्थः, प्रणाय्यश्चौरः, सर्वलोकासम्मत इत्यर्थः, प्रणेयोऽन्यः ॥२३॥**

**श० म० न्यासानुसन्धानम्—प्रणा०**। निपातनस्वरूपमाह—**प्रपूर्वान्नयतेरि**त्यादि। प्रयोगोपाधिभूतमर्थमाह—**निष्कामेऽसम्मते वाऽभिधेये** इति—विषयाभिलाषो हि काम इत्युच्यते कमेरिच्छार्थत्वात्, स निर्गतो यस्मात्, तथोक्तम्—**प्रणाय्योऽन्तेवासी, विषयेष्वनभिलाष इत्यर्थं** इति, प्रणीयते इत्यर्थे कर्मण्येव प्रत्ययः। **सर्वलोकासम्मत** इति—सम्मतिर्हि प्रीतिविषयीभवनं कर्मव्यापार इत्यसम्मत इत्यस्य प्रीतिविषयानर्ह इत्यर्थः ॥ ५. १. २३. ॥

## धाय्या-पाय्य-सान्नाय्य-निकाय्यमृङ्-मान-हवि-र्निवासे । ५. १. २४. ॥

**त० प्र०—धाय्यादयः शब्दा ऋगादिष्वर्थेषु यथासंख्यं घ्यणन्ता निपात्यन्ते, निपातनादेव च सर्वत्रायादेशः।**

दधातेश्र्चि—धीयते समिदग्नावनयेति—धाय्या ऋक्, रूढिशब्दत्वात् काश्चिदेव ऋच उच्यन्ते, अन्यत्र धेया। मीयते येन तन्मानम्, तत्र माङ आदिपत्वं च, मीयते तेनेति—पाय्यं मानम्, मेयमन्यत्। संपूर्वान्नयतेर्हविषि समो दीर्घत्वं च, सान्नाय्यं हविः, अयमपि रूढिशब्दत्वाद्धविर्विशेषेऽवतिष्ठते, संनेयमन्यत्। निपूर्वाच्चिनोतेर्निवासे आदिकत्वं च। निकाय्यो निवासः, निचेयमन्यत् ॥२४॥

**श० म० न्यासानुसन्धानम्--धाय्या०।** निपातनस्वरूपोपाधी वृत्योक्ते, **धीयते समिदग्नावनयेति**, एवं चानया व्युत्पत्त्या याभिर्ऋग्भिरग्नौ समित् प्रक्षिप्यते ताः सर्वा अपि धाय्यापदेन व्यवहर्तव्यतया प्राप्नुवन्ति, न च तदिष्यते, तदाह—**रूढिशब्दत्वात् काश्चिदेवेति**, तदाह तत्त्वबोधिनीकृदपि—"अत्र सर्वा सामिधेनी न ग्राह्या, किन्तु समिध्यमानवतीं समिद्धवतीं चान्तरेण विकृतिषु [ प्रकृतियागवदाचरणीयेषु यागेषु ] प्रक्षिप्यमाणास्तास्ता ऋच एव, अयं च विशेषो निपातनस्य रूढ्यर्थत्वाल्लभ्यते" इति। **अन्यत्र धेयेति**—अत्र "य एचातः" [ ५. १. २८. ] इति यः, आकारस्य च एकारः। **मीयते तेनेति**, तथा चात्रापि करणे एव घ्यण्। सान्नाय्ये निपात्यमाह—**संपूर्वान्नयतेरि**त्यादि, सम्यङ् नीयते होमार्थमग्निं प्रति—सान्नाय्यं हविर्विशेषः, तथा च कर्मणि प्रत्ययः। सूत्रे हविरिति सामान्यतो निपातनोपाधित्वेन हविषः कथनेऽपि न सर्वस्मिन् हविष्ययं प्रयोगोऽपि तु हविर्विशेषे एव तच्छब्देन प्रसिद्धेः, एवं च विशेषग्रहणस्य कारणमाह—**अयमपि रूढिशब्दत्वाद् विशेषेऽवतिष्ठते** इति, रूढिश्च सर्वतो बलीयसी, तथा च रूढ्यर्थस्य विशिष्य संक्षेपेण प्रतिपादनमसम्भवीति सामान्येनैव सूत्रे हविरिति निर्दिष्टम्, विशेषार्थश्च प्रयोगबलादनुसन्धेय इति तात्पर्यम्। निकाय्ये किं निपात्यते तदाह—**निपूर्वाच्चिनोतेरि**त्यादि ॥ ५. १. २४. ॥

## परिचाय्योपचाय्या-ऽऽनाय्य-समूह्य-चित्यमग्नौ

॥ ५. १. २५. ॥

त० प्र०—एतेऽग्नौ निपात्यन्ते। पर्युपपूर्वाच्चिनोतेर्घ्यण् आयादेशश्च। परिचीयत इति—परिचाय्योऽग्निः, एवमुपचाय्यः, परिचेयः, उपचेयोऽन्यः। आङ्पूर्वान्नयतेर्घ्यण् आयादेशश्च। गार्हपत्यादानीयते इत्यानाय्यो दक्षिणाग्निः, स ह्याहवनीयेन सह एकयोनिरेवोच्यते, आनेयोऽन्यः। केचिदग्निविशेषादन्यत्राप्यनित्यविशेष इच्छन्ति—आनाय्यो गोधुक्, अनित्य इत्यर्थः। संपूर्वाद् वहेर्घ्यण् ऊत्वं च वशब्दस्य, समुह्यत इति—समूह्यः, अन्यः संवाह्यः। अन्ये तु संपूर्वाद्वहेरग्नावेवेति नियमार्थं घ्यणं निपातयन्ति, अग्नेरन्यत्र समूहितव्य इत्येव। वहेस्तु तन्मतेऽग्नावपि संवाह्य इति भवति। चिनोतेः क्यप्, चित्योऽग्निः, चेयोऽन्यः ॥२५॥

**श० म० न्यासानुसन्धानम्--परिचा०।** परिचाय्योपचाय्यशब्दयोर्निपात्यमाह—**पर्युपपूर्वाच्चिनोतेर्घ्यण् आयादेशश्चेति**। अत्र कर्मणि घ्यण् इति स्फोरयति—**परिचीयत इति—परिचाय्योऽग्निः**, अतिदिशति—**एवमुपचाय्यः** इति। अग्नेरन्यत्र व्यवस्थामाह—**परिचेयः, उपचेयोऽन्यः** इति—अत्र कर्मणि यः। आनाय्यशब्दे निपात्यमाह—**आङ्पूर्वान्नयतेर्घ्यण् आयादेशश्चेति**। अर्थविशेषं स्फोरयति—**गार्हपत्यादानीयत इत्यानाय्यो दक्षिणाग्निरिति**—अग्नयस्त्रयः श्रौतकर्मणि प्रसिद्धाः—गार्हपत्यो दक्षिणाग्निराहवनीयश्च, तत्र गार्हपत्याग्निर्नित्यः, स हि सर्वदा प्रज्वलितस्तिष्ठति, दक्षिणाग्निराहवनीयश्च यथोपयोगं गार्हपत्यादानीयते, वृत्ते कर्मणि निवृत्तिस्तस्येत्यनित्यौ तौ, तयोश्च गार्हपत्यप्रभवत्वमित्याह—**स हि आहवनीयेनैकयोनिरेवोच्यते** इति—आहवनीयोऽग्निर्दक्षिणाग्निश्च निर्वाणो गार्हपत्यादानीयेते, अतो द्वावप्येकयोनी, गार्हपत्याग्निस्त्वरणिनिर्मन्थनादेवोत्पाद्य इति न स आनाय्य इत्यर्थः, दक्षिणाग्निरपि यो गार्हपत्यादानीयते स एव आनाय्यः, नान्यः, दक्षिणाग्निविषये विकल्पः श्रूयते—वैश्यकुलाद् वित्तवतो भ्राष्ट्राद् वा गार्हपत्याद् वेति, एवं च वैश्यकुलादेरानीतो दक्षिणाग्निरपि नानाय्यः किन्तु आनेय एवेति 'गार्हपत्यात्' इत्युक्तम्। अत्रमतान्तरमाह—**केचिदग्निविशेषादन्यत्रापीति, अनित्य** इति—सामान्यतः पाणिनिसूत्रे दृष्ट्वा भवेत् तेषामियं धारणा परं नैतत् पाणिनिप्रक्रियासम्मतम्। समूह्यशब्दे निपात्यं दर्शयति—**सम्पूर्वाद् वहेर्घ्यण् ऊत्वं च वशब्दस्येति**—व्यञ्जनान्तलक्षणो घ्यण् तु सिद्ध एव, केवलं वस्य ऊत्वं निपात्यम्, कर्मणीह घ्यण् इति स्पष्टयति—**समुह्यत इति—समूह्यः** इति। **अन्यः संवाह्यः** इति—अत्रापि कर्मणि घ्यण् उपान्त्यवृद्धिश्च, अग्निभिन्नः संवहनयोग्य इति तदर्थः, अत्र निपातनकार्यं

न भवतीति भावः । मतान्तरमाह—'अन्ये तु सम्पूर्वाद्वहेरग्नावेवेति नियमार्थमित्यादि, भाष्यसम्मतमेतत् । तथाहि "अग्नौ परिचाय्य०" [ ३. १. १३१. ] इति पाणिनिसूत्रव्याख्यायाम्—"समूह्य इत्यनर्थकं वचनं सामान्यकृतत्वात् । समूह्य इत्यनर्थकं वचनम् । किं कारणम् ? सामान्यकृतत्वात् । सामान्येनैवात्र ण्यद् भविष्यति "ऋ-हलोर्ण्यत्" [ ३. १. १२४. ] इति । वह्यर्थं तर्हि निपातनं कर्तव्यम् । वहेर्ण्यत् यथा स्यात् । वह्यर्थं चेद्वहेस्तदर्थत्वात् सिद्धम् । वह्यर्थमिति चेद् वहेस्तदर्थत्वात् सिद्धम् । ऊहिरपि वह्यर्थे वर्तते । कथं पुनरन्यो नामान्यस्यार्थे वर्तते । बह्वर्था अपि धातवो भवन्ति । अस्ति पुनः क्वचिदन्यत्रापि ऊहिर्वह्यर्थे वर्तते । अस्तीत्याह, ऊहिविग्रहाच्च ब्राह्मणे सिद्धम् । ऊहिविग्रहाच्च ब्राह्मणे सिद्धमेतत् । समूह्यं चिन्वीत पशुकामः । पशवो वै पुरीषं पशूनेवास्मै तत् समूहति ।" इति प्रतिपादितम् ।

अस्यायमाशयः—वहिसमार्थेनोहिना ब्राह्मणग्रन्थे समूह्यशब्दस्य निर्वचनं कृतमिति तस्यैवेदं निपातनम् । वहतेस्तु ण्यति नाग्नौ प्रयोग इति । तथा चोहेरग्नावेव ध्यण्, अन्यत्र प्रत्ययान्तरमेवेत्याह—**अग्नेरन्यत्र समूहितव्य इत्येवेति** । तत्त्वबोधिनीकारस्तु सम्पूर्वकवहेः सम्प्रसारण-दीर्घत्वयोर्निपातनात् समूह्यशब्दं व्युत्पादयामास, तत् तु भाष्यकैयटादिविरुद्धमेव । **वहेस्तु तन्मतेऽग्नावपि संवाह्य इति भवतीति**—एतच्च पाणिनीयप्रक्रियानुसारि, उक्तभाष्यव्याख्यायां नागेशेन संवाह्यमित्यग्नौ तु न अनभिधानादित्युक्तम् । दीक्षितरीत्या च वहेरेवेदं निपातनमित्यायाति, तेन हि प्रत्युदाहरणे संवाह्यमित्युक्तम्, उदाहरणप्रत्युदाहरणयोः समानप्रकृतिविषयकत्वौचित्यात् । न चैवं भाष्यविरोधः, भाष्यस्योहेरपि वहिसमानार्थकत्वदर्शनेन तस्मादपि सिद्धिप्रतिपादनपरत्वात्, न च वहेर्निपातनाभावे तात्पर्यमिति विभावनीयम् । चित्यशब्दे निपात्यमाह—**चिनोतेः क्यप्** इति । इह कर्मणि क्यपि तागमे—**चित्योऽग्निः**, अन्यत्र स्वरान्तलक्षणे ये उपान्त्यगुण इत्याह—**चेयोऽन्यः** इति ।

स्वमते एते पञ्चापि शब्दा अग्नौ निपातिताः, पाणिनीये तु "अग्नौ परिचाय्योपचाय्यसमूह्याः" [ ३. १. १३१. ] इति सूत्रव्याख्यायां दीक्षितेनेत्थमुक्तम्—"अग्निधारणार्थे स्थलविशेषे एते साधवः" इति, बालमनोरमाकारेण चेदं समर्थितमित्थम्—"अग्नौ गम्ये परिचाय्य उपचाय्य समूह्य एते निपात्यन्ते । अग्निशब्द इष्टकारचितस्थण्डिलविशेषे वर्तते "इष्टकाभिरग्निं चिनोति" इति श्रुतेः, इष्टकाकृतचयनेन अग्न्याख्यं स्थण्डिलं निष्पादयेदित्यर्थः" इति । अमरकोशे तु—"समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः" इत्युक्तम्, तथा च तेषामग्निनामत्वमुक्तम्, परमेते वैदिके कर्मणि प्रयुक्ताः शब्दा वैदिकपाणिनीयव्याकरणसम्प्रदायानुसारमेव तत्र प्रयोक्तव्याः, अन्यत्र तु यथायोगमिति व्यवस्थोन्नेया । ५. १. २५. ॥

## याज्या दानर्चि । ५. १. २६. ॥

**त० प्र०—यजेः करणे ध्यण् निपात्यते, दानर्च्यभिधेयायाम् । इज्यतेऽनयेति—याज्या, "त्यज्-यज्-प्रवचः" [ ४. ४. ११८. ] इति गत्वाभावः ॥२६॥**

**श० म० न्यासानुसन्धानम्—याज्या० । यजेः करणे घ्यणिति**—ध्यणः प्राप्तत्वेऽपि करणेऽर्थे निपातनमिति भावः । **दानर्च्यभिधेयायामिति**—दानमत्राग्नौ प्रक्षेपः, याज्या नाम ऋचो वाक्यसमुदायरूपास्ताभिहूयते, तदुक्तं ब्राह्मणग्रन्थे—पुरोऽनुवाक्यामनूच्य याज्यया जुहोतीति । करणार्थप्रदर्शनपूर्वकमुदाहरति—**इज्यतेऽनयेति-याज्या** । ननु घ्यणो घित्वात् "क्तेऽनिटश्चजोः क-गौ घिति" [ ४. १. १११. ] इति जस्य गत्वेन भाव्यमिति चेत् ? अत्राह—**"त्यज-यज-प्रवचः" [ ४. ४. ११८. ] इति गत्वाभावः** इति । ननु व्यञ्जनान्तलक्षणस्य ध्यणो यथायोगमुचितेष्वर्थेषु बाहुलकात् प्रयोगो भविष्यतीति विफलोऽयं योग इति चेत् ? न—बाहुलकस्यागतिकगतिरूपतया तदाश्रयणस्य यथासम्भवं वर्जनीयताया बोधनार्थत्वादिति ॥ ५. १. २६. ॥

## तव्या-ऽनीयौ । ५. १. २७. ॥

**त० प्र०—धातोः परौ 'तव्य अनीय' इत्येतौ प्रत्ययौ भवतः । शयितव्यम्, शयनीयम्; वस्तव्यम्, वसनीयम्; कर्तव्यम्, करणीयं भवता, कर्तव्यः करणीयः कटः ॥२७॥**

**श० म० न्यासानुसन्धानम्—तव्या०** । शयनार्थात् शीधातोस्तव्येऽनुस्वारेत्त्वाभावादिटि गुणेऽयादेशे च भावे—**शयितव्यम्**, एवम्—अनीये गुणेऽयादेशे च—**शयनीयम्**, अत्र यविषयेऽपि वोत्सर्गप्रवृत्तिः । निवासार्थस्य 'वस्'धातोरनुस्वारेत्त्वादिडभावे—**वस्तव्यम्, वसनीयम्**िति । कृधातोरनुस्वारेत्त्वादिडभावे गुणे च—**कर्तव्यम्, करणीयं भवता** इति—भवतेति भावे प्रयोगदर्शनार्थं, परत्रापि योज्यम् । कृधातोः सकर्मकत्वात् कर्मणि प्रयोगमाह—**कर्तव्यः करणीयः कटः**, अत्र घ्यण्विषये वोत्सर्गप्रवृत्तिः । कृत्यप्रत्ययाः सकर्मकात् कर्मणि, अकर्मकादविवक्षितकर्मकाच्च भावे भवन्तीति प्रागुक्तमेव ॥ ५. १२७. ॥

## य एच्चाऽऽतः । ५. १. २८. ॥

**त० प्र०—ऋवर्ण-व्यञ्जनान्तात् घ्यणो** विहितत्वात् **परिशिष्टात् स्वरान्ताद् धातोर्यः प्रत्ययो भवति, अन्त्याऽऽकारस्य चैकारो भवति । दित्स्यम्, धित्स्यम्, चेयम्, जेयम्, नेयम्, शेयम्, नव्यम्, लव्यम्, भव्यम् । एच्चातः—देयम्, धेयम् ॥२८॥**

**श० म० न्यासानुसन्धानम्**—**य०** । अत्र प्रकृतेरनिर्देशात् कस्माद् योऽयं विधीयत इत्यस्य संदिग्धतया प्रकृतेः पारिशेष्याल्लभ्यत्वमाह—**ऋवर्ण-व्यञ्जनादिति** । **परिशिष्टात् स्वरादिति**—ऋवर्णव्यतिरिक्तस्वरान्तादिति भावः, ऋवर्णस्य च तत्र सूत्रे एव समाविष्टत्वात् । दातुं धातुं वा इच्छेति सनि अनुस्वारेत्त्वादिडभावे "मि-मी-मा-दामित् स्वरस्य" [ ४. १. २०. ] इति स्वरस्य 'इत्' इत्यादेशे द्वित्वाभावे च 'दित्स, धित्स' इति धातू, ततः स्वरान्तत्वादनेन ये "अतः" [ ४. ३. ८२. ] इत्यकारलोपे—**दित्स्यम्, धित्स्यमिति** । 'चि'धातोरनेन ये गुणे च—**चेयम्**, जिधातोः—**जेयम्**, नीधातोः—**नेयम्**, शीधातोः—**शेयम्** । नुधातोः, लूधातोः, भूधातोश्च—ये गुणे "य्यक्ये" [ १. २. २५. ] इत्यवादेशे च—**नव्यम्, लव्यम्, भव्यमिति** । यत्र आकारस्य एकारो भवति तदुदाहर्तुमवतारयति—**एच्चातः** इति । दाधातोः, धाधातोश्चानेन ये आत एकारे च—**देयम्, धेयमिति** ॥ ५. १. २८. ॥

## शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात् । ५. १. २९. ॥

**त० प्र०—शक्यादिभ्यः पवर्गान्तेभ्यश्च धातुभ्यो यः प्रत्ययो भवति । घ्यणोऽपवादः । शक्यम्, तक्यम्, चत्यम्, यत्यम्, शस्यम्, सह्यम्, यज्यम्, भज्यम् । पवर्ग—तप्यम्, लभ्यम्, गम्यम् । यजेः "त्यज-यज-प्रवचः" [ ४. १. ११८. ] इति प्रतिषेधात् भजेश्च बाहुलकाद् घ्यणपि—याज्यम्, भाग्यम् । यजि-भजिभ्यां नेच्छन्त्येके । कथमसिना वध्योऽसिवध्यः, मुशलवध्यः ? "न जनवधः" [ ४. ३. ५४. ] इति वृद्धिप्रतिषेधे घ्यणा भविष्यति** ॥२९॥

**श० म० न्यासानुसन्धानम्—शकि० । घ्यणोऽपवादः** इति—इहोपात्तानां सर्वेषां व्यञ्जनान्तत्वाद् "ऋवर्ण-व्यञ्जनाद् घ्यण्" [ ५. १. १७. ] इति व्यञ्जनान्तलक्षणो घ्यण् प्राप्तः सोऽनेनापोद्यते इत्यर्थः । सारूप्याच्च नोत्सर्गो घ्यण् प्रवर्तते । "शकींच् मर्षणे" मर्षणं क्षमा, "शक्लृंट् शक्तौ" इति च 'शक्'धातोरनेन ये—**शक्य**मिति । एवं "तके हसने" इति 'तक्' धातोः—**तक्य**मिति । "चतेग् याचने" इति 'चत्' धातोः—**चत्य**मिति । "यतैङ् प्रयत्ने" इति 'यत्' धातोः—**यत्यम्** । "शसू हिंसायाम्" इति 'शस्' धातोः—**शस्य**मिति । "षहि मर्षणे" "षहच् शक्तौ" इति च 'सह्' धातोः—**सह्य**मिति । "यजीं देवपूजासंगतिकरणदानेषु" इति 'यज्' धातोः—**यज्य**मिति । "भजीं सेवायाम्" इति 'भज्' धातोः—**भज्य**मिति । पवर्गान्तमुदाहर्तुमवतारयति—**पवर्ग**ेति । "तपं संतापे" इति 'तप्' धातोः—**तप्य**मिति । "डुलभिष् प्राप्तौ" इति 'लभ्' धातोः—**लभ्य**मिति । "गम्लृं गतौ" इति 'गम्' धातोः—**गम्य**मिति । यजेर्घ्यणि "त्यज-यज-प्रवचः" [ ४. १. ११८. ] इति गत्वप्रतिषेधात् ततो घ्यण आवश्यकत्वेन, भजेश्च 'भाग्यम्' इति प्रयोगस्य बाहुल्येन दृष्टतया ताभ्यां विहितस्य यस्य घ्यणा सारूप्येण नित्यापवादतया घ्यणो दुर्लभत्वमित्याशङ्कायामाह—**"त्यज-यज०"** [ ४. १. ११८. ] **इति प्रतिषेधात् भजेश्च बाहुलकात् घ्यणपी**ति । तथा च **याज्यम्, भाग्य**मित्यपि भवति ।

मतान्तरमाह—**यजि-भजिभ्यां नेच्छन्त्येके** इति—पाणिनीयतन्त्रेऽपि एताभ्यां न यो विधीयते । "बधि बन्धने" इति 'बध्' धातोर्यस्याविधानात् 'बध्य'शब्दाप्रसिद्धया 'असिवध्य' इत्यादिप्रयोगाणामनुत्पत्तिमाशङ्कते—**कथमसिवध्यः, मुशलवध्यः** इति । उत्तरयति—"**न जन-बधः**" [ ४. ३. ५४. ] **इति वृद्धिप्रतिषेधे घ्यणा भविष्यती**ति, एवं च ततो घ्यणि येषा विशेषाभावेन न यविधानस्यावश्यकतेत्याशयः । ब-वयोः क्वचिदैक्यम् । यद्यपि वधमर्हतीति तद्धितेन यप्रत्ययेनापि वध्य इत्यस्य सिद्धिः, तथापि 'असिवध्यः, मुशलवध्यः' इत्यादौ तद्धितेन सह समासो दुर्लभः, कृदन्तेन सह तु "कारकं कृता" [ ३. १. ६८. ] इति समासः सिद्धो भवति । न च पूर्वमसिवधशब्दं समासेन निष्पाद्य ततोऽर्हत्यर्थे तद्धितो यो भविष्यतीति वाच्यम्, वधशब्दस्यैव दण्डादिगणे पाठात् प्रत्ययविधौ तदन्तविधेः प्रतिषिध्यमानतयाऽसिवधादिशब्देभ्यो यस्य दुर्लभत्वात् ॥ ५. १. २९. ॥

## यम-मद-गदोऽनुपसर्गात् । ५. १. ३० ॥

**त० प्र०—उपसर्गरहितेभ्य एभ्यो यः प्रत्ययो भवति । यम्यम्, मद्यम्, गद्यम् । अनुपसर्गादिति किम्? आयाम्यम्, प्रमाद्यम्, निगाद्यम् । पवर्गान्तत्वात् सिद्धे यमो नियमार्थं वचनम्—अनुपसर्गादेव यथा स्यात् । बहुलवचनान्माद्यत्यनेनेति—मद्यं करणेऽपि, नियम्यमिति च सोपसर्गादिति ॥३०॥**

**श० म० न्यासानुसन्धानम्—यम०** । "यमूं उपरमे" उपरमो निवृत्तिः, इति 'यम्' धातोरनेन ये—**यम्यम्** । "मदैच् हर्षग्लपनयोः" इति 'मद्' धातोः—**मद्यम्** । "गद व्यक्तायां वाचि" इति 'गद्' धातोः—**गद्य**मिति । पदकृत्यं पृच्छति—**अनुपसर्गादिति किमि**ति, सोपसर्गस्य मा भूदित्याशयेनोत्तरयति—**आयाम्यम्, प्रमाद्यम्, निगाद्य**मिति—अत्रास्याप्रवृत्त्या व्यञ्जनान्तलक्षणो घ्यण् उपान्त्यवृद्धिश्च । मद्-गद्धातुभ्यां व्यञ्जनान्तलक्षणस्य घ्यणो बाधनार्थत्वमिव यमो न तदर्थत्वं विधानस्य, अपि तु पवर्गान्तत्वेन पूर्वसूत्रेण प्राप्तस्य यस्य नियमार्थत्वमित्याह—**पवर्गान्तत्वात् सिद्धे** इति । नियमाकारमाह—**अनुपसर्गादेव स्या**दिति—पूर्वसूत्रस्य साधारण्येन सोपसर्गादनुपसर्गाच्च प्रत्ययविधायकत्वेनानुपसर्गाद् यथा भवति तथा सोपसर्गादपि स्यादेवेति तन्निवृत्तिः फलमत्र यमो ग्रहणस्येति भावः । अत्र च सूत्रे प्रत्ययार्थो विशिष्य नोक्तः, तथा च सामान्यतः कर्मणि भावे वा कृत्यप्रत्ययानां विधानात् 'मद्य'शब्दस्य करणे प्रयोगानुपपत्तिम्, यमेश्चानुपसर्गादेवेति नियमेन 'नियम्यः' इति प्रयोगानुपपत्तिं च मनसि समाशङ्क्य तद्वारणायाह—**बहुलवचना**दिति । एतेन—

"त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा ।
स चेत् स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ॥

इति रघुवंशतृतीयसर्गस्थकालिदासपद्ये 'नियम्याः' इति प्रयोगः संगच्छते । अत्र कैश्चित्—अनुपसर्गाच्चेद् यस्तर्हि यम एवेति विपरीतनियममाशङ्क्य पूर्वसूत्रस्थपवर्गग्रहणेन तद्वारणं कृतम्, तत् तु नोचितम्, यदि हि प्रकृतसूत्रे यमेरेव प्रत्ययविधिः श्रुतः स्यात् तदैवं नियम आशङ्क्येत, न चैतदस्ति गदमदोरपि तत्र ग्रहणात् । किञ्च नैतावता नियमेन तत्रत्यपवर्गग्रहणस्य वैयर्थ्यं सोपसर्गेभ्यः प्रत्ययविधानेन चारितार्थ्यादिति । एवं नियमे सति चानुपसर्गात् कस्मादपि यो न स्यात्, न तु केवलं पवर्गादेव । यदि च पवर्गान्तादनुपसर्गाच्चेत् यमेरेवेति नियम आशङ्क्येत तदा केवलं पवर्गान्तविषयः स्यादपि, तदपि नाशङ्कनीयम्, शास्त्रे निर्दिष्टरूपद्वारैव नियमस्य कर्तुं शक्यत्वात्, न चेह पवर्गान्तं पदं निर्दिष्टमिति न तादृशनियमसम्भावनेति यत्किञ्चिदेतत्, तस्मात् पूर्वं वृत्त्युक्त एव नियमाकारः साधुः ॥ ५. १. ३०. ॥

## चरेराङस्त्वगुरौ । ५. १. ३१. ॥

**त० प्र०—अनुपसर्गाच्चरेराङ्पूर्वात् त्वगुरावर्थे यो भवति । चर्यं भवता, चर्यो देशः, आचर्यं भवता, आचर्यो देशः । आङस्त्विति किम्? अभिचार्यं ३ । अगुराविति किम्? आचार्यो गुरुः ॥३१॥**

**श० म० न्यासानुसन्धानम्—चरे०** । पूर्वसूत्रात् 'अनुपसर्गात्' इत्यपि सम्बध्यते तुग्रहणात्, तुग्रहणेन हि

'आङः' इत्यस्यैवागुरुविषयत्वमुच्यते, तथा च चरेरिति भिन्नमेव वाक्यमिति तस्य पूर्वसूत्रसम्बद्धत्वमावश्यकमित्याह—**अनुपसर्गाच्चरेति**। "चर भक्षणे च" चकाराद् गतौ, अतोऽनेन ये—**चर्यो देशः, आचर्यं भवता, आचर्यो देशः** इति। **आङस्त्वति किमिति**, 'आङस्तु' इति पदेनैव पूर्वसूत्रस्थमनुपसर्गादिति पदमपि सम्बध्यते, तदभावे चास्य पूर्वसूत्रासम्बद्धत्वमेव विज्ञायेत, ततश्चोपसर्गपूर्वादनुपसर्गाच्च सर्वस्मादेव चरेः प्रत्ययः स्यादिति अभिपूर्वादपि स्यादेवेति 'अभिचार्यम्' इत्यस्य स्थाने 'अभिचर्यम्' इति स्यात्, कृते तु 'आङस्तु' इति पदे सोपसर्गाच्चेदाङ्पूर्वादेवेति प्रतीतेरभिपूर्वादुपसर्गान्तरपूर्वाद् वा न भवति। **अगुराविति किमिति**, तेन पदेन आङ्पूर्वाच्चेदगुरावेवेति नियम्यते, तदभावे च गुरावपि य एव स्यान्न तु घ्यण् इति प्रत्युदाहरणेनाह—**आचार्यो गुरुरिति**—आचारेषु साधुः—आचार्यः, आचर्यते आगमार्थाकाङ्क्षिभिः शिष्यैः विनयादिमर्यादया सेव्यते इति—आचार्यः,

धर्मज्ञो धर्मकर्ता च सदा धर्मपरायणः।
सत्त्वेभ्यो धर्मशास्त्रार्थदेशको गुरुरुच्यते॥
पञ्चमहाव्रतधरा धीरा भैक्ष्यमात्रोपजीविनः।
सामायिकस्था धर्मोपदेशका गुरवो मताः॥

इत्यादिरीत्या विविधानि लक्षणानि, गुरुशब्दो व्यापकः, आचार्यशब्दो व्याप्यः, भवति च व्याप्यव्यापकयोः सामानाधिकरण्येन प्रयोगः, यथा शिंशपा वृक्ष इति, एवमाचार्यो गुरुरिति प्रयोगोऽप्युचित एव। तथा चागुराविदत्यस्याभावे आचर्य इति गुरावपि स्यान्न त्वाचार्य इति ॥ ५. १. ३१. ॥

## वर्योपसर्या-ऽवद्य-पण्यमुपेयर्तुमती-गर्ह्य-विक्रेये ॥ ५. १. ३२. ॥

**त० प्र०—वर्यादयः शब्दा उपेयादिष्वर्थेषु यथासंख्यं यान्ता निपात्यन्ते। वृणातेर्ये—वर्या, उपेया चेद् भवति। शतेन वर्या, सहस्रेण वर्या कन्या, संभक्तव्या मैत्रीमापादनीयेति यावत्; वृत्याऽन्या, वृणोतेः क्यप्, स्त्रीलिङ्गनिर्देशादिह न भवति—वार्या ऋत्विजः। अन्यस्तु—"सुग्रीवो नाम वर्योऽसौ भवता चारुविक्रमः" [ भट्टिप्रयोगः ] इति प्रयोगदर्शनात् पुंलिङ्गेऽपीच्छति, सामान्यनिर्देशात् तदपि संगृहीतम्, शतेन वर्यः, सहस्रेण वर्यः। उपपूर्वात् सर्तेर्ये—उपसर्या, ऋतुमती चेत्। उपसर्या गौः, गर्भग्रहणे प्राप्तकालेत्यर्थः, अन्यत्र उपसार्या शरदि मथुरा। नञ्पूर्वाद् वदेर्ये—अवद्यं, गर्ह्यं चेत्। अवद्यं पापम्, अवद्या हिंसा, गर्ह्येत्यर्थः, अनुद्यमन्यत्। कथमवाद्या? वदेरनुपपदात् घ्यण्, पश्चान्नञ्समासः। पणेर्ये—पण्यं, विक्रेयं चेत्। पण्यः कम्बलः, पण्या गौः, विक्रेयेत्यर्थः, अन्यत्र पाण्यः साधुः ॥३२॥**

**श० म० न्यासानुसन्धानम्—वर्यो०।** अत्र द्वयोर्ऋवर्णान्तत्वेन पणेश्च व्यञ्जनान्तत्वेन घ्यणि प्राप्ते, वदश्च "नाम्नो वदः क्यप् च" [ ५. १. ३५. ] इति वा क्यपि प्राप्तेऽर्थविशेषेषु यप्रत्ययस्य विधानार्थं निपातनमिदम्। उक्तं च हरिणा—

"धातु-साधन-कालानां प्राप्त्यर्थं नियमस्य च।
अनुबन्धविकाराणां रूढ्यर्थं च निपातनम्॥" इति।

धातुसाधनकालानां, नियमस्य अनुबन्ध-विकाराणां च प्राप्त्यर्थं रूढ्यर्थं च निपातनमित्यन्वयः। यो धातुर्यत्रार्थे न दृष्टस्तत्र तस्य प्रयोगार्थं, यस्मिन् साधने—कारके यः प्रत्ययो न दृष्टस्तस्य विधानार्थं, यस्मिन् काले च यः प्रत्ययो न दृष्टस्तस्यापि प्राप्त्यर्थं, यस्मिन् प्रत्यये योऽनुबन्धो न दृष्टस्तन्निमित्तककार्यप्राप्त्यर्थम्, अर्थविशेषे रूढ्यर्थं च निपातनमिति। एतदुदाहरणानि यथाशास्त्रमुन्नेयानि, एवं च वदेर्यस्य पाक्षिकप्राप्तिसत्त्वेऽप्यर्थविशेषे तस्य नियमनार्थं निपातनमिति। "वृङ्श् संभक्तौ" संभक्तिः संसेवा, इति वृधातोरनेन ये गुणे च—**वर्या, उपेया चेद् भवतीति**—प्राप्तुं योग्येत्यर्थः। **शतेन वर्या सहस्रेण वर्या कन्येति**, वर्याशब्दार्थमाह—**सम्भक्तव्येति**, संभक्तिर्हि मनोऽनुकूलतापरीक्षणं ग्रहाद्यनुकूलतापरीक्षणं वा, तदाह—**मैत्रीमापादनीयेति यावदिति**—यावच्छब्दः पर्यायस्य पर्यायकथने, मैत्री हि प्रकृतितो जन्मनक्षत्रादितश्च विचार्यते, तस्य च नास्ति नियमः कियद्भिः सह मैत्रीविचारः कार्य इति, तथा च पुरुषाणां शतेन सहस्रेण वाऽस्तु। पाणिनीये तु—अनिरोधार्थे निपातनमुक्तम्, कन्याया वरणे वरयितॄणां निरोधः प्रतिबन्धो नास्तीत्यर्थस्तस्य दीक्षितादिभिर्वर्णितः, शतशब्दश्चानियतसंख्यापरः, कन्याया वरणे वरयितॄणां संख्याऽनियततेति तदाशयः।

उपेयार्थाभावे तु—**वृत्याऽन्या, वृणोतेः क्यप्** इति—"वृगट् वरणे" इत्यतः "इ–वृग्०" [ ५. १. ४०. ] इति क्यपि तागमे—वृत्या, अनुरूपेण वरणीयेत्यर्थ इति बालमनोरमाकारः, 'निरोधनीया' इत्यर्थ इति काशिकाविवरणपञ्जिकाकारः। सूत्रे 'वर्योपसर्या' इति सन्धौ 'वर्या' इति च्छेदमङ्गीकृत्याह—**स्त्रीलिङ्गनिर्देशादिह न भवति—वार्या ऋत्विजः** इति, तथा च स्त्रियामेव वाच्यायां प्रत्ययो न पुंसीति वरणीयेषु ऋत्विक्षु न भवति, किन्तु तत्र घ्यणेव भवति, अत्र वृङो घ्यण्, वृगस्तु क्यप् विधास्यते। पुंस्यपि प्रयोगदर्शनात् क्लीबत्वविवक्षाया अनैयत्यं मतान्तरेणाह–**अन्यस्त्विति**, "**सुग्रीवो नाम वर्योऽसौ भवता चारुविक्रमः**" इति—अयं च भट्टिकाव्यस्थः प्रयोगः। तस्य संग्रहोपायमाह—**सामान्यनिर्देशात् तदपि संगृहीतमिति**—'वर्योपसर्या' इति मिलितपदे 'वर्य' इति सामान्येन निर्देशाद् यथाप्रयोगं लिङ्गान्तरेऽपि प्रयोगः संग्राह्य इति भावः। तथा च 'भवता वर्यः' इतिवत् प्रयोगान्तरमपि दर्शयति—**शतेन वर्यः, सहस्रेण वर्यः** इति—अत्रापि मैत्रीसम्पादनं स्वीकारयोग्यता वा उपेयार्थतया प्रतीयते। उपसर्याशब्दं व्याख्याति—**उपपूर्वात् सरतेर्ये—उपसर्या,** उपपूर्वात् सृधातोरनेन यप्रत्यये गुणे च—उपसर्या निपात्यते, कदा? **ऋतुमती चेदिति**। उदाहरति—**उपसर्या गौरिति**, एतदर्थमाह—**गर्भग्रहणे प्राप्तकालेत्यर्थः,** गर्भाधानार्थं वृषभेणोपगन्तुं योग्येति भावः, गर्भग्रहण इत्यत्र वैषयिकाधिकरणे सप्तमी, गर्भग्रहणशब्दस्य प्राप्तकालेति समुदायेनैव सम्बन्धोऽन्यथाऽसामर्थ्यात् समासो न स्यात्। **अन्यत्र उपसार्या शरदि मथुरेति**—अत्र घ्यणेवेति भावः, उपसार्या प्राप्तव्या। अवद्यशब्दं व्याचष्टे—**नञ्पूर्वाद् वदेर्ये–अवद्यमिति**, कदा? **गर्ह्ये चेदिति**। उदाहरति–**अवद्यं पापमिति**–गर्हितत्वादवाच्यमित्यर्थः, **अवद्या हिंसा**, एतदर्थमाह–**गर्ह्येत्यर्थः**। **अनुद्यमन्यदिति**—"नाम्नो वदः क्यप् च" [ ५. १. ३५. ] इति क्यबेव भवति, अत्र क्यपि परे "यजादिवचेः किति" [ ४. १. ७९. ] इति यवृत्, "अन् स्वरे" [ ३. २. १२९. ] इति नञोऽनादेशः, वचनानर्हमिति तदर्थः, अत्र गर्ह्याया अप्रतीतेर्य एवेति न नियम इति भावः। यद्धि न निन्दनीयमथापि वचनानर्हं यथा—अनुद्यं गुरुनाम,

"आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥" इति।

'अनूद्यम्' इति तु प्रयोगान्तरमेव तस्य नानेन सम्बन्धः। वदः क्यपो यस्य च विधानात् ततो घ्यणो दौर्लभ्यमास्थाय शङ्कते—**कथमवाद्या?** इति। उत्तरयति—**निरुपपदादिति**—नाम्नः परादेव क्यप्-ययोर्विधानाद् निरुपपदाद् घ्यण् सुलभ इति भावः। "पणि व्यवहारस्तुत्योः" तत्र व्यवहारार्थेऽनेन यो निपात्यते, **पण्यः कम्बलः** इति–विक्रेय इत्यर्थः। **पण्या गौः**, विक्रेयेत्यर्थः, अन्यत्र **पाण्यः साधुः** इति—स्तोतव्य इत्यर्थः, अत्र घ्यण् उपान्त्यवृद्धिश्च॥ ५. १. ३२.॥

## स्वामि-वैश्येऽर्यः। ५. १. ३३.॥

**त० प्र०—अर्यः स्वामिनि वैश्ये चाभिधेये यो निपात्यते। अर्यः स्वामी, अर्यो वैश्यः। स्वामि-वैश्य इति किम्? आर्यः॥ ३३॥**

**श० म० न्यासानुसन्धानम्—स्वामि०**। "ऋं प्रापणे च" चकाराद् गतौ, अत ऋवर्णान्तलक्षणो घ्यण् प्राप्तस्तदपवादाय, अर्थविशेषयोश्च तन्नियन्त्रणाय निपातनमिदम्। ऋधातोरनेन ये गुणे च—**अर्यः स्वामी, अर्यो वैश्यः**। स्वामिवैश्यावुभावपि प्राप्तव्यौ भवत एवेति योगरूढिरियं तयोः, निपातनसामर्थ्याच्च केवलं योगार्थप्रतिपादनाय यस्य प्रवृत्तिर्न भवति, तदाह—**स्वामि-वैश्य इति किमिति, आर्य** इति—अयं च शब्दो यथेच्छं श्रेष्ठे जनेऽभिगन्तव्यरूपं यौगिकार्थमादाय प्रयुज्यते। यद्यपि—

कर्तव्यमाचरन् काममकर्तव्यमनाचरन्।
तिष्ठति प्रकृताचारे स तु आर्य इति स्मृतः॥"

इति वशिष्ठस्मृत्या परिभाषित आर्यशब्दः, किञ्च "आर्यौ सज्जनसौविदौ" इति कोशेनार्थविशेषे पर्यवस्यापितः, अमरेणापि "महाकुलकुलीनार्यसभ्यसज्जनसाधवः" इति कुलीनेऽर्थे ग्राहितशक्तिश्चार्यशब्दो योगरूढतां न व्यभिचरति, तथापि तत्र तत्र योगार्थमादायैव प्रवृत्तिरित्यसत्यामपि रूढौ त एवार्था वाच्याः स्युर्ये कोशादिभिर्नियन्त्रिता इति यौगिकत्वमेवास्य॥ ५. १. ३३.॥

## वह्यं करणे । ५. १. ३४. ॥

**त० प्र०—वहेः करणे यो निपात्यते । वहन्ति तेनेति—वह्यं शकटम्, वाह्यमन्यत् ॥३४॥**

**श० म० न्यासानुसन्धानम्—वह्यं०** । वहेर्व्यञ्जनान्तलक्षणो घ्यण् कर्मणि प्राप्तस्तद्बाधनायार्थविशेषेऽस्य नियन्त्रणाय चेदमपि निपातनम् । तथा चान्यत्र कर्मणि वाह्यमित्येव भवति ॥ ५. १. ३४. ॥

## नाम्नो वदः क्यप् च । ५. १. ३५. ॥

**त० प्र०—अनुपसर्गादिति वर्तते, अनुपसर्गान्नाम्नः परात् वदः क्यप् यश्च प्रत्ययौ भवतः । ब्रह्मोद्यम्, ब्रह्मवद्यम्; सत्यवद्यम्, सत्योद्यम् । नाम्न इति किम् ? वाद्यम् । अनुपसर्गादित्येव–प्रवाद्यम्, अनुवाद्यम् । ककारः कित्कार्यार्थः, पकार उत्तरत्र तागमार्थः ॥३५॥**

**श० म० न्यासानुसन्धानम्—नाम्नो०** । **अनुपसर्गादिति वर्तते** इति—मध्ये निपातनैर्विच्छिन्नतया 'अनुपसर्गात्' इति वर्तते नवेति सन्दिग्धमासीत्, तेषु हि ते ते शब्दा निपातिता इति तत्रानुपसर्गादित्यस्यावश्यकता नासीत्, अग्रे च तदावश्यकतेति तदनुवृत्तिरनुज्ञायते ।

भाष्येऽपि "वदः सुपि क्यप् च" [ ३. १. १०६. ] इति पाणिनिसूत्रव्याख्यायाम्–"वदः सुप्यनुपसर्गग्रहणम् । वदः सुप्यनुपसर्गग्रहणं कर्तव्यम् । इह मा भूत्–प्रवाद्यम्, अपवाद्यमिति । तत् तर्हि कर्तव्यम् । न कर्तव्यम् । अनुपसर्गे इति वर्तते । एवं तर्ह्यन्वाचष्टे—अनुपसर्गे इति वर्तत इति । नैतदन्वाख्येयम्, अधिकारा अनुवर्तन्त इति । एष एव च न्यायो यदुताधिकारा अनुवर्तेरन्निति" इति ।

अयमाशयः—अत्र सूत्रेऽनुपसर्ग इत्यस्यावश्यकत्वम्, तद् वक्तव्यं नवेति विचारणायाम्—अधिकारादेव तदनुवृत्तिसिद्धौ न तदावश्यकमिति सिद्धान्तः । तत्र हि कथनस्यावश्यकता भवति यत्र मण्डूकप्लुत्याऽधिकारोऽपेक्ष्यते, यत्र वाऽधिकारावधेरपरिज्ञानं भवति, यत्राग्रिमं पदं सिंहावलोकितन्यायेनाकृष्यते, तत्र विशेषस्य—सम्बन्धासम्बन्धस्यावश्यवक्तव्यत्वम् । इह च धाराप्रवाहेनैवानुपसर्गादित्यनुवर्तत इति प्रयोजनाभावान्नान्वाख्येयमिति । न च मध्येऽनुपसर्गादित्यस्य विच्छिन्नतया मण्डूकप्लुतिरेवात्रापि स्वीकार्येति कथं न वक्तव्यमिति वाच्यम्, मध्यस्थेषु सूत्रेष्वनुवर्तमानमपि विशेषानाधायकतया न विवृतमित्येतावता तद्विच्छेदस्य वक्तुमशक्यत्वात् । एवं चेहाप्यनुपसर्गादिति वर्तत इति कथनं न तदनुवृत्त्यन्वाख्यानमपि तु मध्यस्थसूत्रेषु तस्याविवृततया तद्विस्मृतत्वशङ्कया तत्स्मारणमेवेति न कश्चन विशेषः । अत्रोत्तरसूत्राद् 'भावे' इत्याकृष्य भावे एव प्रत्ययो विधीयते । कैश्चिच्चात्र भावस्यानुक्त्या कर्मण्येवैतौ प्रत्ययौ, क्लीबत्वं च समान्येन निर्देशकृतमित्युक्तम् । ब्रह्मणो वदनमित्यनेन क्यपि वृति—**ब्रह्मोद्यम्**, ये तु—**ब्रह्मवद्यमि**ति, एवं सत्यस्य वदनमिति—**सत्योद्यम्, सत्यवद्यमि**ति । व्यावर्त्यं दर्शयति—**अनुपसर्गादित्येव–प्रवाद्यम्, अनुवाद्यमि**ति—अत्रास्याप्रवृत्त्या व्यञ्जनान्तलक्षणो घ्यण् उपान्त्यवृद्धिश्च । अनुबन्धयोः सार्थक्यं प्रदर्शयति—**ककारः कित्कार्यार्थः** इति—कित्कार्यं च गुणाभावो वृत्त्वं च, तदर्थ इति भावः । **पकार उत्तरत्र तागमार्थः** इति—उत्तरसूत्रेषु क्यपोऽनुवृत्त्या तत्र यत्र तागमस्य प्रसक्तिस्तत्र पित्त्वनिमित्तकस्य तस्य विधानं पकारकरणस्य फलमिति, इह फलाभावेऽप्यग्रे तस्य फलसत्त्वेन, तत्र पुनरुच्चारणे गौरवाल्लाघवानुरोधेनेहैवोभयानुबन्धसहितं उच्चारित इति ॥ ५. १. ३५. ॥

## हत्याभूयं भावे । ५. १. ३६. ॥

**त० प्र०—अनुपसर्गान्नाम्नः परौ 'हत्या भूय' इत्येतौ भावे क्यबन्तौ निपात्येते । हन्तेः स्त्रीभावे क्यप् तकारश्चान्तादेशः । ब्रह्मणो वधः–ब्रह्महत्या, भ्रूणहत्या, दरिद्रहत्या, श्वहत्या । भवतेर्नपुंसके भावे क्यप् । ब्रह्मभूयं गतः, देवभूयं गतः, ब्रह्मत्वं देवत्वं गत इत्यर्थः । भाव इति किम् ? श्वघात्या वृषली । नाम्न इत्येव—हतिः, घातः, भव्यम् । हन्तेर्भावे घ्यण् न भवत्यनभिधानात्, तथा च बहुलाधिकारः । अनुपसर्गादित्येव–उपहतिः, प्रभव्यम् ॥ ३६ ॥**

**श० म० न्यासानुसन्धानम्—हत्या०** । प्रातिस्विकरूपेण निपात्यमर्थं ग्राहयति–**हन्तेः स्त्रीभावे इति**–स्त्रीत्वविशिष्टे भावे इत्यर्थः, भावप्रत्ययान्तस्य स्त्रीत्वमपि निपात्यत इति तदाशयः । शब्दशक्तिस्वाभाव्यादेतद्विहि-

तत्यबन्तस्य स्त्रीत्वमिति न तत्र निपातनव्यापार इति नागेशः । सवाक्यमुदाहरति—**ब्रह्मणो वधः–ब्रह्महत्या,** एवं–भ्रूणस्य वधः–**भ्रूणहत्या**, दरिद्रस्य वधः–**दरिद्रहत्या,** शुनो वधः—**श्वहत्या** । भूयशब्दविषये आह—**भवतेर्नपुंसके** इति—अत्रापि नपुंसकत्वं न निपात्यम्, भावे नपुंसकत्वस्यैकत्वस्य चौत्सर्गिकत्वात्, लिङ्गान्तरविधाने हि यत्नोऽपेक्ष्यते । ब्रह्मणो भावः—ब्रह्मभूयम्, तत्प्रयोगमाह—**ब्रह्मभूयं गतः** इति—कित्त्वान्न गुणः, एवं देवस्य भाव गत इति—**देवभूयं गतः** । अनयोरर्थमाह—**ब्रह्मत्वं देवत्वं गत इत्यर्थः** इति । पृच्छति—**भाव इति किमि**ति—निपातनसामर्थ्यादेव भावे एव भविष्यतीति प्रश्नाशयः । निपातनं हि घ्यणो बाधनार्थं तकारादेशविधानार्थं चावश्यकमिति न तत्सामर्थ्येन भावार्थो वक्तुं शक्य इति भाव इत्यस्यावश्यकत्वमिति प्रत्युदाहरणेनाह—**श्वघात्या वृषली**ति–शुना हन्यत इति "ऋवर्णव्यञ्जनाद् घ्यण्" [ ५. १. १७. ] इति कर्मणि घ्यणि "ञ्णिति घात्" [ ४. ३. १००. ] इति घातादेशे "कारकं कृता" [ ३. १. ६८. ] इति समासे श्वघात्या । अत्र हन्तेरेव प्रत्युदाहरणमुक्तं न तु भवतेः, तस्याकर्मकतया ततो भावे एव प्रत्ययः स्यात्, असत्यपि 'भावे' इत्यस्य ग्रहण इति तदाशयः, न च "भूण् अवकल्कने" इति चौरादिको भवति सकर्मक इति ततः कर्मणि स्यादिति वाच्यम्, [धातुपाठे] प्रथमोपस्थितत्वेन प्रसिद्धत्वेन च सत्तार्थकस्यैव भवतेरिह ग्रहणात् । 'नाम्नः' इत्यनुवृत्तेर्व्यावर्त्यं दर्शयितुमाह—**नाम्न इत्येवे**ति, "साति-हेति०" [५. ३. ९४.] इति निपातनबाधनार्थं "श्वादिभ्यः" [ ५. ३. ९३. ] इति क्तौ—**हतिः** । "भावाकर्त्रोः" [ ५. ३. १८. ] इति घञि घातादेशे—**घातः** । स्वरान्तलक्षणे ये—**भव्यमि**ति—अत्र गुणे सति "य्यक्ये" [ १. २. २५. ] इत्यवादेशो विज्ञेयः । ननु हन्तेर्यथा कर्मणि घ्यण् उक्तस्तथा भावेऽपि स्यादिति चेत् ? अत्राह–**भावे घ्यण् न भवती**ति, तत्रैव युक्तिमाह—**अनभिधानादि**ति—अभिधानलक्षणा हि कृत्-तद्धित-समासा भवन्ति, न च हन्तेर्विहितेन घ्यणा भावः शक्यतेऽभिधातुम्, तथाहि—घात्य इत्युक्ते कर्मैव प्रतीयते, न भावः । तत्र शास्त्रानुमतिमाह—**तथा च बहुलाधिकारः** इति—बहुलाधिकारेण क्वचिदप्रवृत्तेरपि लाभात् हन्तेर्भावे घ्यण् न भवतीति भावः । वस्तुतस्तु "तत् साप्याऽनाप्यात् कर्म-भावे कृत्य-क्त-खलर्थाश्च" [ ३. ३. २१. ] इति सूत्रेण सकर्मकाद् धातोः कृत्यप्रत्यस्य कर्मणि, अकर्मकाच्च तस्य भावे विधीयमानतया साधारणतो घ्यणो हन्तेः प्राप्तिरेव न सकर्मकत्वात् । अविवक्षितकर्मत्वविवक्षयाऽकर्मकत्वमाश्रित्यापि मा भूदित्येतदर्थमेव बाहुलकाश्रयणम् । अथवा "हत्या भूयं भावे" इत्यनेन घ्यणपवाद भूतेन भावे हन्तेः क्यपो विधानात् * उत्सर्गसमानदेशा अपवादाः * इति न्यायेन घ्यणोऽपि भावे प्राप्तिरनुमीयते, तद्वारणाय बाहुलकाश्रयणम्, यः प्रत्ययो भाव एवार्थे विहितः स तु सकर्मकाकर्मकेभ्यः सर्वेभ्यः एव भाव एव स्यात्, इदं च सूत्रं भाव एव प्रवर्तते, इति सकर्मकादपि भाव एव विधास्यतीति, एतदनुरोधेन सकर्मकादपि हन्तेर्घ्यणो भावे प्राप्तिकथनं नानुचितम् । एवं च प्रत्युदाहरणे घ्यणो विधानं स्यादिति स न विहितोऽपि तु घञ् [ घातः ] इति प्रत्युदाहृतमिति तदौचित्यप्रदर्शनायैवैते शङ्कासमाधी इति हृदयम् । 'तदौचित्यप्रदर्शनाय' इत्यस्यायमर्थः—तस्य–घञन्तस्य, घात इति प्रत्युदाहरणस्य, घ्यणन्तप्रत्युदाहरणं विहाय दत्तस्य, औचित्यं प्रदर्शयितुमिति । व्यावर्त्यं दर्शयति–अनुपसर्गादित्येव–उपहृतिः, प्रभव्यमिति ॥ ५.१.३६ ॥

## अग्निचित्या । ५. १. ३७. ॥

**त० प्र०—अग्नेः पराच्चिनोतेः स्त्रीभावे क्यप् निपात्यते । अग्नेश्चयनमग्निचित्या ॥ ३७ ॥**

**श० म० न्यासानुसन्धानम्—अग्नि०** । चिधातोर्भावे क्यपि निपातनात् **अग्नेश्चयनमिति–अग्निचित्या,** अत्र कित्त्वाद् गुणाभावः पित्त्वाच्चतागमः ॥ ५. १. ३७. ॥

## खेय–मृषोद्ये । ५. १. ३८. ॥

**त० प्र०—अनुपसर्गादिति नाम्न इति च निवृत्तम् । खेय मृषोद्य' इत्येतौ क्यबन्तौ निपात्येते । खनेर्घ्यणोऽपवादः क्यप्, अन्त्यस्वरादेरेकारश्च । खन्यत इति-**

**खेयम्, निखेयम्, उत्खेयम् । मृषापूर्वाद् वदतेः पक्षे ये प्राप्ते नित्यं क्यप् । मृषोद्यते—मृषोद्यम् । नात्र भाव एवेति योगविभागः ॥ ३८ ॥**

**श० म०—न्यासानुसन्धानम्—खेय० । अनुपसर्गादिति नाम्न इति च निवृत्तमिति**—निपातानां नियतविषयकत्वेन तत्रातिप्रसङ्गाऽव्याप्तिशङ्काऽसम्भवादग्रे तदनावश्यकत्वात् तन्निवृत्तिरिति भावः । तत्र प्रातिस्विकरूपेण निपातनीयमाह—**खनेर्घ्यणोऽपवादः क्यप्** इति—व्यञ्जनान्तलक्षणो घ्यण् ततः प्राप्तस्तदपवाद इति भावः । उदाहरति—**खन्यत इति—खेयमिति** । अनुपसर्गादित्यस्य निवृत्तेः प्रयोजनमाह—**निखेयम्, उत्खेयमिति**—अत्र निपातनस्य न खेयमात्रप्रयोजनमपि तु खनेर्घ्यणो बाधोऽन्त्यस्वरादेरेत्वविधानं च, तेनोपसर्गपूर्वादपि भविष्यत्येवेत्याशयः । मृषोद्यस्य "नाम्नो वदः क्यप् च" [ ५. १. ३५. ] इत्यनेन सिद्धावपि निपातनस्य प्रयोजनमाह—**पक्षे ये प्राप्ते नित्यं क्यप्** इति, तथा च मृषापूर्वाद् वदतेः क्यपो बाधनाय निपातनमिति भावः । उदाहरति—**मृषोद्यते—मृषोद्यमिति** । निपातनार्थकत्वेनास्य सूत्रस्य पूर्वेण सहैव पाठो युक्त इति योगविभागस्य वैयर्थ्यमाशङ्क्याह—**नात्र भाव एवेति**—खेयस्यापि कर्मणि प्रवृत्तिः सकर्मकत्वात्, तथा मृषोद्यस्यापि कर्मणि प्रवृत्तिः, अतश्च विशेष्यनिघ्नत्वमेतयोः शब्दयोः, भावे च सति क्लीबत्वमेव स्यात् । तथा च माघकविना पुंस्त्वमुक्तम्—

"मुदे मुरारेरमरैः सुमेरो—
रानीय यस्योपचितस्य शृङ्गैः ।
भवन्ति नोद्दामगिरां कवीना-
मुच्छ्रायसौन्दर्यगुणा मृषोद्याः ॥"

इति चतुर्थसर्गदशमपद्ये । श्रीकृष्णयात्राप्रसङ्गे मार्गागतस्य रैवतकगिरेर्वर्णनमिदम् । मुरारेः श्रीकृष्णस्य, मुदे सन्तोषाय, अमरैर्देवैः, सुमेरोः शृङ्गैरानीय उपचितस्य वर्धितस्य, आनीतैः शृङ्गैर्वर्धितस्येति भावः, यस्य शैलस्य, उच्छ्राय औन्नत्यं सौन्दर्यं च, तयोर्गुणा उत्कर्षाः, उद्दामगिरां प्रगल्भवाचां कवीनां, मृषोद्या मिथ्यावाच्या न भवन्ति । मेरुशृङ्गेषु सर्वगुणसम्पत्तेः सम्भवात् तैरेव रचितस्यास्य सर्वगुणसम्पत्तिर्नासम्भविनीति कवेराशयः । मेरुशृङ्गासम्बन्धेऽपि तत्सम्बन्धवर्णनादतिशयोक्तिरलंकारः । अयं च पुंलिङ्गप्रयोगः कर्मण्येव घटते इति न भावसम्बन्धोऽत्र ॥ ५. १. ३८. ॥

## कुप्य-भिद्योद्ध्य-सिध्य-तिष्य-पुष्य-युग्याऽऽज्य-सूर्य नाम्नि । ५.१.३९. ॥

त० प्र०—**एते क्यबन्ताः संज्ञायां निपात्यन्ते । गुपेः क्यप् आदिकत्वं च धनेऽर्थे । गोपाय्यते तदिति—कुप्यं धनम्, गोपाय्यमन्यत् । भिदेरुज्झेश्च नदेऽभिधेये क्यप् उज्झेर्धत्वं च । भिन्दन्ति कूलानि इति—भिद्यः, उज्झत्युदकम्—उद्ध्यः, अन्यत्र—भेत्ता, उज्झिता । सिधि-तिषि-पुषिभ्यो नक्षत्रेऽभिधेये क्यप् त्विषेर्वलोपश्च । सिध्यन्ति त्वेषन्ति पुष्यन्ति अस्मिन् कार्याणीति सिध्यः, तिष्यः, पुष्यः, अन्यत्र—सेधनः, त्वेषणः, पोषणः । युजेः क्यप् गत्वं च वाहनेऽभिधेये । युञ्जन्ति तदिति—युग्यं वाहनं गजाश्वादि, योग्यमन्यत् । आङ्पूर्वादञ्जेर्घृतेऽर्थे क्यप् । आञ्जन्त्यनेनेति—आज्यं घृतम्, आञ्जनमन्यत् । सर्तेः क्यप् ऋकारस्योर्, सुवतेर्वा क्यप् रान्तश्च देवतायाम् । सरति सुवति वा कर्मसु लोकानिति—सूर्यो देवता । बहुलाधिकारान्निपातनसामर्थ्याद् वाऽनुक्तोऽपि निपातनेषु कारकविशेषो गम्यते ॥ ३९ ॥**

**श० म० न्यासानुसन्धानम्—कुप्य० । एते क्यबन्ता निपात्यन्त** इत्युक्त्या क्यब्मात्रस्य निपात्यत्वमुक्तम् । तत्र यत्र प्रयोगे यद् विशिष्य निपातनीयं तद् विवेचयति—**गुपेः क्यप् आदिकत्वं चेति** । "गुपौ रक्षणे" **गोपाय्यते तदिति—कुप्यम्**, अत्र कर्मणि क्यप्, तदर्थमाह—**धनमिति**—अत्र सामान्येनोक्तावपि स्वर्णरजताभ्यामन्यद् धनं विज्ञेयं स्वोपज्ञधातुपारायणे तथाभिधानात्, "गुपच् व्याकुलत्वे" इत्यस्यापि तत्र कुप्यमिति साधितम् । प्रयुक्तं च भारविणा—

"विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुना हरन्
करोति मन्युं न कथं धनञ्जयः ॥" इति,

'वासवोपमो य उत्तरान् कुरून् विजित्य प्राज्यम् अकुप्यं वसु अयच्छत् [ तुभ्यमिति शेषः ] स धनञ्जयः, अधुना [ वनवाससमये ] वल्कवासांसि हरन् तव मन्युं कथं न करोति' इत्यन्वयः । द्रौपदीवाक्यमेतत् । अत्राकुप्यपदं सुवर्णरजतरूपधनार्थे प्रयुक्तम् । **गोपाय्यमन्यदिति**—अत्र स्वरान्तलक्षणो यः पूर्वाकारस्य लोपश्च । आयप्रत्ययस्य वैकल्पिकत्वेन "शकि-तकि०" [ ५. १. २९. ] इति पवर्गान्तलक्षणे ये—गोप्यमित्यपि भवति, दैवादिकस्यापि गोप्यमिति भवति । "भिदृंपी विदारणे" **भिनत्ति कूलानीति—भिद्यः,** अत्र कर्तरि क्यप् कित्त्वाच्च गुणाभावः, भिद्यो नदः, "उद्झत् उत्सर्गे" **उज्झत्युदकम्—उद्ध्यः** इति—अत्र कर्तरि क्यप्, उद्ध्यो नदः, नदार्थे प्रयुक्तं कालिदासेन रघुवंशे—"तोयदागम इवोद्ध्यभिद्ययोर्नामधेयसदृशं विचेष्टितम्" इति । नदार्थादन्यत्र तृच् भवतीत्याह—**अन्यत्र भेत्ता, उज्झिता ।** "षिधूंच् संराद्धौ" "त्विषीं दीप्तौ" पुषंच् पुष्टौ", **सिध्यन्ति त्वेषन्ति पुष्यन्ति अस्मिन् कार्याणीति—सिध्यः, तिष्यः, पुष्यः,** इति—अत्राधिकरणे क्यप्, इमे नक्षत्रविशेषवाचकाः, नक्षत्रार्थादन्यत्राधिकरणेऽनट् भवतीत्याह—**अन्यत्र सेधनः, त्वेषणः, पोषणः** इति । "युजूंपी योगे" **युञ्जन्ति तदिति—युग्यं वाहनं गजाश्वादीति**—अत्र कर्मणि क्यप्, **योग्यमन्यदिति**—वाहनार्थादन्यत्रास्याप्रवृत्त्या व्यञ्जनान्तलक्षणे घ्यणि "क्तेऽनिटश्चजो०" [ ४. १. १११. ] इति जस्य गत्वे उपान्त्यगुणे च योग्यमिति, सामान्यतो योजनयोग्यमित्यर्थः । 'युज्यतेऽनेनेति युग्यं वाहनम्' इति पारायणे करणेऽपि क्यपि साधितम् । "अञ्जौप् व्यक्ति-म्रक्षण-गतिषु" **आञ्जन्त्यनेनेति—आज्यं घृतमिति**—अत्र करणे क्यप् । संज्ञाया अन्यत्रानट् भवतीत्याह—**आञ्जनमन्यदिति** । "सृं गतौ" "षूत् प्रेरणे" **सरति सुवति वा कर्मसु लोकानिति—सूर्यो देवता,** अत्र कर्तरि क्विप् । उक्तेषु निपातनेषु क्वचित् कर्मणि क्वचित् कर्तरि क्वचिदधिकरणे क्वचिच्च करणे विधानस्य दर्शनादस्यानियतकारकादेः कथं सिद्धिरित्याशङ्कायामाह—**बहुलाधिकारादिति,** तथा च बाहुलकस्य विविधकार्यकरत्वम्, तस्यागतिकगतित्वाशङ्कयाऽऽह—**निपातनसामर्थ्याद् वेति**—निपातनस्य तदेव प्रयोजनं यदलाक्षणिकमपि कार्यं लभ्येतेति । निपातनेन किं किं लभ्यमिति "वर्योपसर्या०" [ ५. १. ३२. ] इति सूत्रव्याख्यायां हरिकारिकयोक्तम्, तथा च कारकविशेषलाभो नासम्भवीति । एतच्च पूर्वं वक्तव्यमपि प्रकरणशेषे कथितं सर्वत्रोह्यमिति ॥ ५. १. ३९. ॥

## इ-वृग्-स्तु-जुषेति-शासः । ५. १. ४०. ॥

**त० प्र०—**एभ्यः क्यप् भवति । इ—आदृत्यः । वृग्—प्रावृत्यः । वृङस्तु—वार्या—ऋत्विजः । स्तु—स्तुत्यः, अवश्यस्तुत्यः । जुष्—जुष्यः । एतीति इणिकोर्ग्रहणम् । इत्यः, अधीत्यः । अयतेरिङश्च न भवति—उपेयम्, अध्येयम् । इकोऽप्यध्येयमित्येके । ईयतेरप्युपेयमिति भवति । शास्—शिष्यः, आशासेस्तु "आशास्यमन्यत् पुनरुक्तभूतम्" [ रघुवंशे ] इति । कथम् "अनिवार्यो गजैरन्यैः स्वभाव इव देहिनाम् ।" इति, संभक्तेरन्यत्रापि वृङ् ॥ ४० ॥

**श० म० न्यासानुसन्धानम्—इ-वृग्०** । अनुपसर्गादित्यस्य निवृत्तेरुक्तत्वात् तत्फलबोधनरूपेण सोपसर्गमुदाहरति—**इ—आदृत्यः** इति—"दृङत् आदरे" इति दृधातोराङ्पूर्वादनेन क्यपि तागमे च—आदृत्यः । एवं प्रपूर्वात् "वृग्ट् वरणे" इति वृधातोः क्यपि—**प्रावृत्यः** । वृगिति सानुबन्धग्रहणस्य फलमाह—**वृङस्तु वार्या ऋत्विजः** इति—*तदनुबन्धग्रहणे नातदनुबन्धकस्य ग्रहणम्* इति न्यायेन ङकारानुबन्धकस्य "वृङ्श् संभक्तौ" इति वृधातोर्न ग्रहणमिति तत्र ऋवर्णान्तलक्षणो घ्यणेव भवतीति भावः । **स्तु—स्तुत्यः** इति—"ष्टुंग्क् स्तुतौ" इति स्तुधातोः स्तुत्यः । **अवश्यस्तुत्यः** इति—अत्रावश्यमो मकारस्य "कृत्येऽवश्यमो लुक्" [ ३. २. १३८. ] इति लुग् भवति । आवश्यकेऽर्थे द्योत्ये "उवर्णादावश्यके" [ ५. १. १९. ] इति घ्यण् प्राप्तस्तथापि परत्वादयमेव प्रवर्तत इति तत्सूत्रव्याख्यायामेवोक्तत्वाद् घ्यण् न । यद्यप्ययं सर्वत्रार्थे प्रवर्तते स चावश्यकमात्रे, इति तस्य विशेषविहितत्वेन बलवत्त्वमिति प्रतिभाति, तथापि स सर्वेभ्य उवर्णान्तेभ्यो विधीयतेऽयं च स्तुधातुं विशिष्यादत्ते इत्यस्यापि विशेषविहितत्वं सममेवेति परत्वेनैव व्यवस्था समुचितेति । "इं गतौ" अयति "इंण्क् गतौ" एति, "इंक् स्मरणे" अध्येति, "इंङ्क् अध्ययने" अधीते,

प्रकृतसूत्रे च एतीति निर्देशेन यस्य यस्य तादृशं रूपं तस्य तस्य ग्रहणमित्याह—**एतीति इणिकोर्ग्रहणमिति**, तथा चेह "इंण्क् गतौ" "इंक् स्मरणे" इत्येतयोर्ग्रहणमित्यर्थः । अनेन क्यपि तागमे चाद्यस्य—**इत्यः**, द्वितीयस्य नित्यमधिना योगात्—**अधीत्यः । अयतेरिङश्च न भवतीति**—"इंगतौ" "इङ्क् अध्ययने" इत्येतयोरिह ग्रहणं न भवति 'एति' इति स्वरूपाभावात्, ततश्च "य एचातः" [ ५. १. २८. ] इति ये गुणे "उपसर्गस्या०" [ १. २. १९. ] इत्युपसर्गाकारलोपे प्रथमस्य—**उपेयमिति**, द्वितीयस्य नित्यमधिना योगात् इकारस्य "इवर्णादे०" [ १. २. २१. ] इति यत्वे—**अध्येयमिति** । अत्र मतान्तरमाह—**इकोऽप्यध्येयमित्येके** इति—स्वमते तु अधीत्यमिति स्यात् । एतीति स्वरूपाभावात् "ईङ्च् गतौ" यस्य ईयते इति रूपं भवति तस्यापि नेह ग्रहणमिति स्वरान्तलक्षणो यो भवतीत्याह - **ईयतेरपि 'उपेयम्' इति भवतीति** । **शास्—शिष्यः** इति—"शासूक् अनुशिष्टौ" अनुशिष्टिर्नियोगः, इति 'शास्' धातोः क्यपि "इसासः शासोऽङ्व्यञ्जने" [ ४. ४. ११८. ] इत्यास इसादेशे सस्य षत्वे च भवति—शिष्यः । "आङः शासूकि इच्छायाम्" इति आङ्पूर्वकस्य शास्धातोऽस्तु कृतेऽपि क्यपि न आस इसादेशः, तथाहि—"क्वौ" [ ४. ४. ११९.] इत्यनेनैव सिद्धे "आङः" [४. ४. १२०. ] इति वचनं क्वावेवाङ्पूर्वस्य शास आस इसिति नियमार्थं, तेन किति क्यपि परेऽपि आस इसादेशो न भवति तत आशास्यमित्येव रूपं स्यात्, घ्यण्यपि तथैवेति विशेषाभावान्न विशेषसूत्रप्रवृत्तिः, भवतु वा प्रवृत्तिस्तथापि रूपे न विशेषः, प्राच्यप्रयोगपूर्वमेतदाह—**आशासेस्तु—"आशास्यमन्यत् पुनरुक्तभूतम्"** इति—अयं श्लोकः पूर्ण ईदृशः—

"आशास्यमन्यत् पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥"

इति कालिदासीये रघुवंशे पञ्चमसर्गे कौत्सऋषेरुक्तिः । चतुर्दशकोटिसुवर्णमुद्रालाभसंतुष्टेन तेन राज्ञे रघवे शुभाशीरेषा प्रयुक्ता, श्लोकः स्पष्ट इति न व्याख्यामपेक्षते । "वृङ्श् संभक्तौ" इति वृधातोः संभक्तिमात्रार्थकत्वेन, वृगः क्यपो विधानेन कविप्रयोगे घ्यणन्तस्य निवारणार्थं कथं प्रयोग इत्याशङ्कते—**कथं "अनिवार्यो गजैरन्यैः स्वभाव इव देहिनाम्"** इति, उत्तरयति—**सम्भक्तेरन्यत्रापि वृङ्** इति, तथा च वृङ एवायं प्रयोग इति न घ्यणोऽनुपपत्तिरिति भावः । ण्यन्तस्य वृग एव वाऽयं स्वरान्तलक्षणे ये कृते प्रयोग इत्यपि वक्तुं शक्यते ॥ ५. १. ४०. ॥

## ऋदुपान्त्यादकृपि-चृदृचः । ५. १. ४१. ॥

**त० प्र०—ऋकारोपान्त्याद् धातोः कृपि-चृति-ऋचिवर्जिताद् क्यप् भवति । वृत्यम्, वृध्यम्, गृध्यम्, शृध्यम् । अकृपि-चृदृच इति किम्? कल्प्यम्, चर्त्यम्, अर्च्यम् ॥४१॥**

**श० म० न्यासानुसन्धानम्—ऋदु०** । "वृतूङ् वर्तने" "वृधूङ् वृद्धौ" "गृधूच् अभिकाङ्क्षायाम्" "शृधूङ् शब्दकुत्सायाम्" एभ्योऽनेन क्यपि कित्त्वादुपान्त्यगुणाभावे—**वृत्यम्, वृध्यम्, गृध्यम्, शृध्यमिति**, व्यञ्जनान्तलक्षणघ्यणोऽपवादः । पदकृत्यं पृच्छति—**अकृपि-चृदृच इति किमिति** उत्तरयति—**कल्प्यम्, चर्त्यम्, अर्च्यमिति**—"कृपौङ् सामर्थ्ये" अतः पवर्गान्तत्वात् "शकि-तकि०" [ ५. १. २९. ] इति ये गुणे "ऋर०" [ २. ३. ९९ ] इति लत्वे—कल्प्यम्, "चृतैत् हिंसाग्रन्थयोः" "ऋचत् स्तुतौ" आभ्यां व्यञ्जनान्तलक्षणे घ्यणि उपान्त्यगुणे च–चर्त्यम्, अर्च्यमिति ॥ ५. १. ४१. ॥

## कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा
## । ५. १. ४२. ॥

**त० प्र०**—एभ्यः **क्यप् वा भवति । कृत्यम्, कार्यम्, वृष्यम्, वर्ष्यम्, मृज्यम्, मार्ग्यम्, शस्यम्, शंस्यम्, गुह्यम्, गोह्यम्, दुह्यम्, दोह्यम् । जप्यम्, जपेरपि क्यबभावपक्षे घ्यण् विकल्पसामर्थ्यात् ॥४१॥**

**श० म० न्यासानुसन्धानत्—कृ०** । कृधातोरनेन वा क्यपि तागमे—**कृत्यम्**, पक्षे ऋवर्णान्तलक्षणे घ्यणि वृद्धावारादेशे—**कार्यमिति** । "वृषू हिंसायां संघाते च" "वृषू सेचने च" अतः क्यपि—**वृष्यम्**, पक्षे व्यञ्जनान्तलक्षणे घ्यणि उपान्त्यगुणे च—**वर्ष्यम्** । "मृजौक्

शुद्धौ" अतः क्यपि–**मृज्यम्**, पक्षे घ्यणि उपान्त्यगुणे "मृजोऽस्य वृद्धिः" [ ४. ३. ४२. ] इत्यत आकारे "क्तेऽनिटः०" [ ४. १. १११. ] इति जस्य गत्वे–**मार्ग्यमि**ति, "शंसू स्तुतौ च" चकाराद् हिंसायाम्, अतः क्यपि "नो व्यञ्जनस्या०" [ ४. २. ४५. ] इति नलोपे–**शस्यम्**, पक्षे घ्यणि–**शंस्यम्** । "गुहौक् संवरणे" अतः क्यपि–**गुह्यम्**, पक्षे घ्यणि–**गोह्यमिति** । "दुहींक् क्षरणे" अतः क्यपि–**दुह्यम्**, पक्षे घ्यणि–**दोह्यम्** । "जप मानसे च" मनोनिर्वर्त्ये वचने, चकाराद् व्यक्ते वचने, अतः क्यपि–**जप्यम्**, पक्षे व्यवस्थामाह–**जपेरपि क्यबभावपक्षे घ्यण् विकल्पसामर्थ्यादि**ति–यद्यपि जपेः पवर्गान्तत्वेन क्यबभावपक्षे पवर्गान्तलक्षणो यः प्राप्तस्तथापि क्यपि ये वा रूपे विशेषाभावात् क्यपो विकल्पविधानप्रयोजनस्य रूपे विशेषस्य सिद्धिर्न स्यादिति विशेषविहितमपि यं बाधित्वा घ्यणेव भवतीति भावः ॥ ५. १. ४२. ॥

## जि-विपू-न्यो हलि-मुञ्ज-कल्के । ५. १. ४३. ॥

**त० प्र०—जयतेर्विपूर्वाभ्यां च पू-नीभ्यां यथासंख्यं हलि–मुञ्ज–कल्केषु कर्मसु वाच्येषु क्यप् प्रत्ययो भवति । महद्धलं हलिः । मुञ्जस्तृणविशेषः । कल्कस्त्रिफलादीनाम् । जीयते निपुणेनेति–जित्या जित्यो वा हलिः । पूङ् पूग् वा–विपवितव्यो विपूयो मुञ्जः । पूगो नेच्छन्त्येके । विनेतव्यस्तैलादिना मध्ये इति–विनीयः कल्कः । हलि–मुञ्ज–कल्क इति किम् ? जेयम्, विपव्यम्, विनेयम् ॥ ४३ ॥**

**श० म० न्यासानुसन्धानम्**—जिवि० । **कर्मसु वाच्येषु** इति–तथा च कर्मणि प्रत्यय इति भावः । वाच्यार्थं परिचाययति–**महद्धलं हलिरिति**, कृष्टसमीकरणार्थं काष्ठमपि हलिरिति दीक्षितः । **मुञ्जस्तृणविशेष** इति–रज्ज्वादिसम्पादनकार्ये विनियोज्यो मध्ये इषीकया युक्तस्तृणविशेषः । **कल्कस्त्रिफलादीनामिति** तैलेन घृतेन वा त्रिफलादिद्रव्यसमवेतेन साध्यः कश्चिदौषधविशेषः कल्क इति काशिकाविवरणपञ्जिकाकारः, कल्कः शोधकद्रव्यमिति बालमनोरमाकारः, पिष्ट औषधिविशेषः कल्कः पापं वेति च दीक्षितः । "कल्कोऽस्त्री घृततैलादिशेषे, दम्भे, विभीतके । विट्–किट्टयोश्च पापे च त्रिषु पापाशये पुनः ॥" इति मेदिनी । "जि जये" **विजीयते निपुणेन** इति वाक्येऽनेन क्यपि तागमे च–**जित्या जित्यो वा हलिरि**ति–हलिशब्दस्योभयलिङ्गत्वात् तद्विशेषणस्य जित्यशब्दस्याप्युभयलिङ्गता, कृष्टसमीकरणार्थं स्थूलकाष्ठं हलिरिति हलिशब्दार्थमभिप्रेत्य दीक्षित आह–बलेन कृष्टव्य इत्यर्थ इति । "पूङ् पवने" "पूगृश् पवने" **विपवितव्य** इति वाक्येऽनेन क्यपि–**विपूयो मुञ्जः** इति—रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः । अत्र मतान्तरमाह–**पूगो नेच्छन्त्येके** इति । **विनेतव्यस्तैलादिना मध्ये** इति वाक्येऽनेन क्यपि–**विनीयः कल्कः** इति–विनीयते सिद्धत्वं प्राप्यत इति विनीयः, एवंविधः कल्कः, 'विनेतव्यस्तैलादिना मध्ये' इत्यस्य 'आत्ममध्ये संस्थाप्यः प्रापयितव्यो वा आत्मसंस्काराय आत्मन्युत्कर्षाधानाय वा' इत्यर्थ इति केचित् । पदकृत्यं पृच्छति–**हलि-मुञ्ज-कल्क इति किमिति**, उत्तरयति–**जेयम्, विपव्यम्, विनेयमि**ति–अत्र स्वरान्तलक्षणो यः प्रत्ययः, तस्मिन् परे सर्वत्र गुणे द्वितीये "य्यक्ये" [ १. २. २५. ] इत्योकारस्यावादेशः, जेतुं विपवितुं विनेतुं योग्यं किमपि वस्तु इति तदर्थः ॥ ५. १. ४३. ॥

## पदा–ऽस्वैरि–बाह्या–पक्ष्ये ग्रहः । ५. १. ४४. ॥

**त० प्र०—विभक्त्यन्तं पदम् । अस्वैरी परतन्त्रः । बाह्या बहिर्भवा । पक्ष्यो वर्ग्यः । एष्वर्थेषु ग्रहः क्यप् भवति । घ्यणोऽपवादः । प्रगृह्यते–विशेषेण ज्ञायते प्रगृह्यं पदम्, यत् स्वरेण न संधीयते–अग्नी इति । अवगृह्यते–नानावयवसात् क्रियते—अवगृह्यं पदम् । अस्वैरिणि–गृह्याः कामिनः, रागादिपरतन्त्रा इत्यर्थः । बाह्यायां–ग्रामगृह्या श्रेणिः, नगरगृह्या सेना, बाह्येत्यर्थः, स्त्रीलिङ्गनिर्देशो लिङ्गान्तरेऽनभिधानख्यापनार्थः । पक्ष्ये–त्वद्गृह्याः, मद्गृह्याः, "गुणगृह्या वचने विपश्चितः" [ किराते ], तत्पक्षाश्रिता इत्यर्थः । एष्विति किम् ? ग्राह्यं वचः ॥ ४४ ॥**

**श० म० न्यासानुसन्धानम्**—पदा० । वाच्य-

पदार्थान् परिचाययति—**विभक्त्यन्तं पदमिति**—"तदन्तं पदम्" [ १. १. २०. ] इति स्वशास्त्रानुसारं विभक्त्यन्तस्यैव पदसंज्ञाविधानात् । "शक्तं पदम्" इति नैयायिकपरिभाषितम्, "वर्णाः पदं प्रयोगार्हानन्वितैकार्थवाचकाः" इत्यालङ्कारिकपरिभाषितं च पदम् । तत्र नैयायिकमतीयपदं तु न स्वमतम्, आलङ्कारिकमतीयपदस्य वस्तुतः स्वपरिभाषितपदानतिरिक्तत्वमेव, 'प्रयोगार्ह' इति विशेषणं वर्णेषु श्रूयमाणं विभक्त्यन्तत्वमेवगमयति, "अपदं न प्रयुञ्जीत" इत्यस्यापि तत्रैव तात्पर्यात् । तथा च स्वीयशास्त्रे स्वपरिभाषितं पदमेव ग्राह्यम् । **अस्वैरी परतन्त्रः** इति—स्वेन स्वयमीरितुं गन्तुं शीलमस्येति ताच्छीलिके णिनि "स्वैरस्वैर्य०" [ १. २. १५. [ इत्यैकारे स्वैरी स्वतन्त्रः, तद्भिन्नोऽस्वैरीति परतन्त्र एव । **बाह्या बहिर्भवेति**—भवार्थे यञ्, अन्त्यस्वरादिलोपे बाह्या, बहिर्भूतेत्यर्थः । **पक्ष्यो वर्ग्यः** इति—पक्षशब्दो वर्गमाचष्टे, पक्षे भव इति दिगादित्वाद् ये—पक्ष्यः, पक्षे भव इत्यर्थे स्वपक्षे भवत्वेन स्ववार्य एवोच्यते रूढ्या, तथाहि—

"पक्षो मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः ।
केशादेः परतो वृन्दे बले सखिसहाययोः ॥"

इति पक्षशब्दस्य वृन्दार्थकत्वं मेदिनीकोशेन दर्शितम्, वृन्दविशेषश्च वर्गः, तथा चामरकोशे—वृन्दभेदाः 'समैर्वर्गः' इत्युक्तम् । तथा च समैरेकजातीयैरुपलक्षितो वर्ग इति तादृशे वर्गे स्थित एवात्र पक्ष्यपदेनोच्यते इति । सूत्रार्थमाह—**एष्वर्थे ष्विति**—वाच्येष्वित्यर्थः । **घ्यणोऽपवादः** इति—"ऋवर्णव्यञ्जनाद् घ्यण्" [५. १. १७.] इति प्राप्तस्य व्यञ्जनान्तलक्षणघ्यणोऽपवाद इत्यर्थः । **प्रगृह्यते** इति **प्रगृह्यं पदमिति**—असन्निकर्षोऽत्र गृह्णातेरर्थः, स्वरा हि तत्र न सन्निकृष्यन्ते सन्निधीयन्त इत्यसन्निकर्षः, स्वयं हि प्रगृह्यते इत्यस्यार्थमाह—**विशेषेण ज्ञायते** इति, तमेव विशेषं कथयति—**यत् स्वरेण न संधीयते** इति । प्रगृह्यसंज्ञया हि पदद्वयस्थितयोः स्वरयोः परस्परं सन्निकर्षः [ सन्धिः ] न भवति, तत्र च पूर्वं पदं प्रगृह्यं कथ्यते, यथा—**अग्नी इतीति**—अत्र हि ईदूदेद् द्विवचनम्" [ १. २. ३४. ] इत्यनेनासन्धिर्विधीयते । पाणिनीये चैतेन सूत्रेण प्रगृह्यसंज्ञा विधीयते । यद्यपि पदावयवस्य द्विवचनादेः प्रगृह्यसंज्ञा विधीयते, न तु पदस्य सा संज्ञा विधीयते, तथाप्यवयवधर्मस्य समुदाये उपचारेण पदेऽपि प्रगृह्यत्वव्यवहारः । अवगृह्यते इति—**अवगृह्यं पदम्**, यस्यावग्रहः क्रियते, तत्र समुदायेऽवयवपदानि विविधानि अवगृह्य विच्छिद्याख्यायन्ते, तेनावयवानामवगृह्यत्वादवगृह्यमित्युच्यते, स्वयं हि अवगृह्यते इत्यस्यार्थमाह—**अवगृह्यते—नानावयवसात् क्रियते** इति—यथा पचतीत्यत्र 'पच् शव् तिव्' इत्यवयवाः । अयमाशयः – यस्य पदस्यावग्रहः क्रियते तत् पदमवगृह्यमुच्यते, अवग्रहश्च सन्धीयमानयोः पदयोः परस्परं विच्छेदनामको वैदिकसम्प्रदायसिद्धः पाठविशेषः, स चावान्तरपदसंज्ञां सूचयितुं पाठकाले किञ्चित् कालमवसानरूपः । केचित् तु प्रत्येकपदस्यापि प्रकृतिप्रत्ययादीनां विच्छिद्योच्चारणमवग्रह इति कथयन्ति । **गृह्याः कामिनः** इति—'इदमद्य मया प्राप्तमिदं प्राप्स्ये मनोरथम्' इत्यादिमनोरश्मिभिर्बद्धा इत्यस्वतन्त्रा एव, तदाह—**रागादिपरतन्त्राः** इति । कौमुद्यां तु 'गृह्यकाः शुकाः' इत्युदाहरणं दत्तम्, ते हि पञ्जरादिबन्धनेन परतन्त्रीकृता अत एवास्वतन्त्रा भवन्ति । **ग्रामगृह्या श्रेणिरिति**—ग्रामबहिर्भूतः सजातीयशिल्पिसंघ इत्यर्थः, यदुक्तं मेदिन्यां—"श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समानशिल्पिसंहतौ" इति, तथा च केचन स्वतन्त्राः शिल्पिनो ग्रामाद् बहिर्भूय तिष्ठन्ति । एवं—**नगरगृह्या सेनेति**, गृह्याशब्दार्थमाह—**बाह्येत्यर्थः** इति । 'बाह्य' इति सामान्यतो निर्देशेनैव सर्वलिङ्गेषु प्रयोगसम्भवे स्त्रीलिङ्गनिर्देशः सूत्रे किमर्थं इत्याशङ्कायामाह—**स्त्रीलिङ्गनिर्देशो लिङ्गान्तरेऽनभिधानख्यापनार्थः** इति—तथाहि—स्त्रियामेवास्य प्रयोगो भवति न पुंल्लिङ्गादाविति । **त्वद्गृह्यः, मद्गृह्यः** इति—त्वया गृह्यते मया गृह्यते इति विग्रहः, तव मम च पक्षमाश्रित इत्यर्थः । कृत्यस्य कर्तरि वा षष्ठीविधानात् तृतीयासमासः षष्ठीसमासो वा । पक्ष्यार्थं कविप्रयोगेण परिचाययति—**"गुणगृह्या वचने विपश्चितः"** इति—अयं च भारवेः श्लोकांशः, पूर्णश्लोकश्चेत्थम्—

"इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥"
इति ।

किरातार्जुनीये द्वितीयसर्गे भीमसेनयुधिष्ठिरसंवादे इदं पद्यमागतम् । भीमसेनः कथयति—रुचिरार्था इयं [द्रौपदी-

प्रतिपादिता ] भारती, इष्टगुणाय भवतेऽपि रोचतां, गुणगृह्या विपश्चितो वक्तृविशेषनिःस्पृहा ननु, दुर्योधनोत्कर्षं श्रुत्वा दुःखितया द्रौपद्या राजा युधिष्ठिरो मृदुभिर्नीतिवचनैर्युद्धाय प्रोत्साहितः, तद्वचःसमर्थनाय स्वमतप्रकाशनाय च प्रारभमाणो भीमसेन इदमुवाच । अत्र गुणगृह्या इति पदं गुणपक्षपातिवाचकमित्याह—**तत्पक्षाश्रित इत्यर्थः** इति । पदकृत्यं पृच्छति—**एध्विति किमिति**, उत्तरयति—**ग्राह्यं वचः** इति— अत्रास्याप्रवृत्त्या व्यञ्जनान्तलक्षणे घ्यणि उपान्त्यवृद्धिः ।। ५. १. ४४. ।।

## भृगोऽसंज्ञायाम् । ५. १. ४५. ।।

**त० प्र० भृगो धातोरसंज्ञायां क्यप् भवति । भ्रियते-भृत्यः, पोष्य इत्यर्थः । असंज्ञायामिति किम् ? भार्यो नाम क्षत्रियः, भार्या पत्नी । ननु च संज्ञायामपि स्त्रियां "भृगो नाम्नि" [ ५. ३. ९८, ] इति क्यबस्ति, यथा-कुमारभृत्या, न-तस्य भाव एव विधानात् ।।४५।।**

**श० म० न्यासानुसन्धानम्—भृगो०** 'भृंग् भरणे" इति भृधातोः, यद्वा" डुडुभृंग्क् पोषणे च" चकाराद् धारणे, इति भृधातोः, अनेन कर्मणि क्यपि तागमे भृत्य इति भवति, तदाह—**भ्रियते-भृत्यः** इति, एतदर्थमाह—**पोष्य इत्यर्थः** इति—एतेन क्रियाशब्दत्वं भृत्यशब्दस्य दर्शयन् संज्ञाशब्दत्वमपाकरोति । पदकृत्यं पृच्छति—**असंज्ञायामिति किमिति**, उत्तरयति—**भार्यो नाम क्षत्रियः** इति - अत्र 'भार्य' इति क्षत्रियविशेषस्य संज्ञा, तत्रास्याप्रवृत्त्या "ऋवर्ण-व्यञ्जनाद् घ्यण्" [५. १. १७. ] इति घ्यण् भवति, **भार्या पत्नी**ति—"वधूभार्या" इत्यादिकोशात् भार्याशब्दस्य संज्ञात्वं सिद्धमिति नानेन क्यप् किन्तु घ्यणेव । ननु असंज्ञायामिति पर्युदासस्य पुंसि 'भार्यो नाम क्षत्रियः' इत्यादौ चरितार्थ्येन स्त्रियां परत्वात् "भृगो नाम्नि" [५. ३. ९८.] इति क्यपैव भाव्यमिति भार्या स्त्रीत्यत्र कथं घ्यणिति शङ्कते -**ननु च संज्ञायामपि "भृगो नाम्नि" इति क्यबस्ती**ति, उदाहरति—**यथा—कुमारभृत्ये**ति—कुमारस्य भरणं कुमारभृत्या, "कुमारभृत्या गर्भिण्याः परिचर्याऽभिधीयते" इति हारावलीकोशेन गर्भिणीपरिचर्यायाः संज्ञेयम् । तथा च गर्भिण्या गर्भस्य रक्षा कुमाररक्षैवेति मत्वा तत्रायं शब्दः प्रवृत्तः, तदनुसारं कालिदासेन प्रयुक्तमपि—

"कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि ।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव

इति रघुवंशे तृतीयसर्गे सुदक्षिणाया गर्भावस्थावर्णने पद्यम् । स्पष्टम् । वाचस्पत्ये तु—कुमाररक्षणोपायभूते सुश्रुतोक्ते कौमारभृत्याख्ये कौमारतन्त्रे कुमारभृत्याशब्दस्य प्रयोग इत्युक्तम्, तथाहि सुश्रुते—"कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यसमुत्थानां व्याधीनां चोपशमनार्थम् । तदित्थं विवृतं च—

"नवग्रहकृतिज्ञानं स्कन्दस्य च निषेधनम् ।
अपस्मारशकुन्योश्च रेवत्याश्च पृथक् पृथक् ।।

पूतनायास्तथान्धाया भण्डिका शीतपूतना ।
नैगमेयचिकित्सा च ग्रहोत्पत्तिः सयोनिजा ।।

कौमारतन्त्रमित्येतच्छारीरेषु प्रकीर्तितम् ।" इति ।

तथा च गर्भिण्याः परिचर्यातोऽन्यत्रापि तत्प्रयोग इत्यायाति । अयं चार्थो योगलभ्यः, पूर्वोक्ता गर्भिणीपरिचर्या च योगरूढिः । एवं च भार्याया अपि नामत्वेन क्यपा भाव्यमिति शङ्का । उत्तरयति—**तस्य भाव एव विधानादि**ति, यद्यपि तत्प्रकरणे भावाकर्त्रोरिति प्रत्ययार्थो निर्दिष्टः, तथा च कर्मण्यपि क्यप् प्राप्यत एव तथापि "गा-पा-पचो भावे" [ ५. ३. ९५. ] इत्यत्र पुनर्भावग्रहणेन "भृगो नाम्नि" [ ५. ३. ९८. ] इति योगविभागेन च तस्य केवलं भावे विधानस्वीकारात्, अन्यथा "समजनिपत०" [ ५. ३. ९९. ] इति सूत्रे भृगोऽपि पाठः कृतः स्यात् ।। ५. १. ४५. ।।

## समो वा । ५. १. ४६. ।।

**त० प्र०—संपूर्वाद् भृगः क्यप् वा भवति । संभृत्यः, संभार्यः ।।४६।।**

**श० म० न्यासानुसन्धानम्—समो०** पूर्वेण सोपसर्गादपि नित्यमेव क्यपि प्राप्ते तस्य पाक्षिकत्वार्थमिदं

सूत्रम् । तथा चानेन क्यपि—**संभृत्यः**, पक्षे घ्यणि—**संभार्यः** । इदमप्यसंज्ञायामेव प्रवर्तते *उत्सर्गसमानदेशा अपवादाः* इति न्यायात्, तथा च संज्ञायां संभार्य इत्येव भवति ॥ ५. १. ४६. ॥

## ते कृत्याः । ५. १. ४७. ॥

**त० प्र०—ते-'घ्यण् तव्य अनीय य क्यप्' इत्येते प्रत्ययाः कृत्यसंज्ञा भवन्ति । कृत्यप्रदेशाः—"तत् साप्याऽनाप्यात् कर्म-भावे कृत्य-क्त-खलर्थाश्च" [ ३. ३. २१. ] इत्यादयः ॥४७॥**

**श० म० न्यासानुसन्धानम्—ते०** । 'ते'शब्देन कस्य परामर्श इत्याकाङ्क्षायामाह—**ते-'घ्यण् तव्य अनीय य क्यप्' इत्येते प्रत्ययाः** इति—तच्छब्दस्य हि प्रसिद्धप्रक्रान्तवाचिनः प्रक्रान्तेषु घ्यणादिषु प्रयोगः । ये चापि तच्छब्दस्य बुद्धिस्थपरामर्शकत्वं मन्यन्ते तेषामपि मते एतदुचितमेव, सम्भवत्येवैतेषां कृत्यसंज्ञा कार्येति बुद्धौ संस्थाप्य ते कृत्या इत्यस्य प्रयोगः । संज्ञाविधानं हि लाघवेन विधिसूत्रप्रवृत्त्यर्थम्, तथा च कृत्यसंज्ञाविधानस्य कथं विध्युपयोगित्वमिति जिज्ञासायामाह—**कृत्यप्रदेशाः—"तत् साप्यानाप्यादिति**—एतेन सूत्रेण कृत्यशब्देन लघुना घ्यणादीनां यथोचितं सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यो भावे च विधानार्थमियं संज्ञेति भावः । **इत्यादयः** इति—आदिपदेन "शक्तार्हे कृत्याश्च" [ ५. ४. ३५. ] "णिन् चावश्यकाधमर्ण्ये" [ ५. ४. ३६. ] इत्येवमादयः संग्राह्याः । इति कृत्यप्रत्ययविचारः ॥ ५. १. ४७. ॥

## णक-तृचौ । ५. १. ४८. ॥

**त० प्र०—धातोः परौ णक-तृचौ प्रत्ययौ भवतः, कृत्वात् कर्तरि । पाचकः, पक्ता; पाठकः, पठिता । णकारो वृद्ध्यर्थः, चकारः "त्र्यन्त्यस्वरादेः" [ ७. ४. ४३. ] इत्यत्र सामान्यग्रहणाविघातार्थः ॥४८॥**

**श० म० न्यासानुसन्धानम्—णक०** । पञ्चम्यर्थाद् विहिततयाऽनयोः प्रत्ययत्वमित्याह-**प्रत्ययाविति** । अर्थविशेषोक्तेरदर्शनादेतयोः "कर्तरि" [ ५. १. ३. ] इति सूचितं सामान्यतः कर्तृवाचकत्वं स्मारयति—**कृत्वात् कर्तरीति**—"आ तुमोऽत्यादिः कृत्" [ ५. १. १. ] इत्यनेन लब्धकृत्संज्ञत्वात्, "कर्तरि" इति कर्तरि णक-तृचौ भवत इत्यर्थः । पचतीति णके उपान्त्यवृद्धौ—**पाचकः**, तृचि तु अनुस्वारेत्वादिडभावे "चजः कगम्" [ २. १. ८६. ] इति चस्य कत्वे 'पक्' इति, ततः सौ—**पक्ता** । णके णकारोऽनुबन्धः, तृचि चकारोऽनुबन्धः, क्रमेण तयोः सार्थक्यं दर्शयति—**णकारो वृद्ध्यर्थः** इति—"ञ्णिति" [ ४. ३. ५०. ] "नामिनोऽकलिहलेः" [ ४. ३ ५१. ] इत्यादौ णकस्य णित्त्वेन ग्रहणे सति वृद्धिविधानार्थ इत्यर्थः । **चकारः "त्र्यन्त्यस्वरादेः" [ ७. ४. ४३. ] इति सामान्यग्रहणाविघातार्थः** इति—"त्र्यन्त्यस्वरादेः" इत्यत्र सामान्येन तृच-तृनोर्ग्रहणमिष्टं तस्य विघातो मा भूदित्येतदर्थश्चकार इत्यर्थः, अस्य निरनुबन्धकत्वे सामान्यतस्तृग्रहणेऽस्यैव ग्रहणं स्यात् *निरनुबन्धग्रहणे न सानुबन्धकस्य* इति परिभाषया, न तु तृनः सानुबन्धकत्वात्, उभयोः सानुबन्धकत्वे च तस्याः परिभाषाया अप्रवृत्तिरित्युभयोः सामान्येन ग्रहणं सिद्धं भवति । न चोभयोर्निरनुबन्धकत्वमेवास्त्विति वाच्यम्, उभयोर्भेदस्यापि शास्त्रप्रक्रियोपयोगितया पृथगनुबन्धकरणस्यावश्यकत्वात् । एवं च "तृन्नुदन्ताव्यय०" [ २. २. ९०. ] इत्यत्र तृन एव ग्रहणं, न तृचः । तृन् प्रत्ययश्च "तृन् शील-धर्म-साधुषु" [ ५. २. २७. ] इत्यनेन शीलादिषु सदर्थाद् धातोर्भवति, यथा—कर्ता कटम्, वधूमूढां मुण्डयितारः श्राविष्ठायनाः, गन्ता खेल इति ॥ ५. १. ४८. ॥

## अच् । ५. १. ४९. ॥

**त० प्र०—धातोरच् प्रत्ययो भवति, कृत्वात् कर्तरि । करः, हरः, पचः, पठः, उद्वहः । चकारः "अचि" [ ३. ४. १५. ] इत्यत्र विशेषणार्थः ॥ ४९ ॥**

**श० म० न्यासानुसन्धानम्—अच्** । अचोऽप्यर्थविशेषेऽविहितत्वात् कृत्वाच्च कर्तरि विधानमित्याह—**कृत्वात् कर्तरीति**, एवं च सर्वधातुभ्यः कर्तर्यच् प्रत्ययोऽपि भविष्यतीति पूर्वोक्ताभ्यां णक-तृज्भ्यां सहाऽयं समाविशत्येव, न तु बाध्यबाधकभावं प्राप्नोतीति

भावः । अनेनाचि गुणे च करोतीति—**करः**, एवं हरतीति—**हरः**, । एवमचि पचतीति—**पचः**, पठतीति—**पठः**, उद्वहतीति—**उद्वहः** । चकारस्य स्वमते फलान्तरादर्शनादनुबन्धस्य व्यर्थत्वमाशङ्क्याह—**चकारः "अचि" [ ३. ४. १५. ] इत्यत्र विशेषणार्थः** इति—"अचि" इत्यस्यार्थः—चकारानुबन्धकेऽकारे परे यङो लुबिति, एवं च चकारः प्रत्ययं विशेषयति, तेन च "शंसि-प्रत्ययात्" [ ५. १. ११५. ] इत्यादिना विहिते अकाररूपे प्रत्यये न प्रवर्तते, अतश्च तद्व्यावृत्तये चकारानुबन्धकरणमावश्यकमिति ॥ ५. १. ४९. ॥

## लिहादिभ्यः । ५. १. ५० ॥

**त० प्र०—लिहादिभ्यो, धातुभ्योऽच् भवति । पृथग्योगो बाधकबाधनार्थः । लेहः, शेषः, सेवः, देवः, मेथः, मेषः, मेघः, देहः, प्ररोहः, न्यग्रोधः, कोपः, गोपः, सर्पः, नर्तः, दर्शः, एषु नाम्युपान्त्यलक्षणं कं दृशेस्तु वा शं बाधते । 'अनिमिष' इति बहुलाधिकारात् कोऽपि भवति । श्वपचः, पारापतः, कद्वदः, यद्वदः, अरीन् व्रणयतीत्यरिव्रणा शक्तिः, जारभरा, कन्यावरः, रघूद्वहः, रसावहः, एष्वणं बाधते । बहुवचनमाकृतिगणार्थम् । 'नदी, भषी, प्लवी, गरी, चरी, तरी, दरी, स्तरी, सूदी, देवी, सेवी, चोरी, गाही' एतेऽजन्ता गौरादौ द्रष्टव्याः ॥ ५० ॥**

**श० म० न्यासानुसन्धानम्—लिहा०** । पूर्वसूत्रेण धातुमात्रादच् प्रत्ययो विहित एवेति लिहादिभ्योऽपि भविष्यत्येवेति तेभ्यो विशेषविधानस्य वैयर्थ्यमाशङ्क्याह—**पृथग्योगो बाधकबाधनार्थः** इति-बाधकानां कादीनामग्रे विहितानां बाधनार्थस्तद्विषयेऽपि क्वचित् प्रवृत्त्यर्थं इति यावत् । "लिहींक् आस्वादने" लेढीत्यनेनाचि गुणे च—**लेहः** । एवं—"शिषण् असर्वोपयोगे" शेषयतीति—**शेषः** । "षिवूच् उतौ" सीव्यतीति—**सेवः** । "दिवूच् क्रीडादौ" दीव्यतीति **देवः** । "मिथृग् मेधाहिंसयोः" मेथतीति—**मेथः** । मेद इति पाठे तु "ञिमिदाङ् स्नेहने" मेदते इति—**मेदो म्लेच्छः** । "मिषू सेचने" मेषतीति—**मेषः** । "मिहं सेचने" मेहतीति—**मेघः** । "न्यङ्क्वमेघादयः" [ ४. १. ११२. ] इति हस्य घकारः । "दिहींक् लेपे" देग्धीति—**देहः** । "रुहं जन्मनि" प्ररोहतीति—**प्ररोहः** । न्यग् रोहतीति—**न्यग्रोधः**, "वीरुन्न्यग्रोधौ" [ ४. १. १२१. ] इति हस्य धत्वे साधुः [ न्यक् तिर्यक् मार्गं मूलैः रुणद्धि वा—न्यग्रोधः ] । "कुपच् कोपे" कुप्यतीति—**कोपः** । "गुपौ रक्षणे" गोपायतीति—**गोपः** । "सृप्लृं गतौ" सर्पतीति—**सर्पः** । "नृतैच् नर्तने" नृत्यतीति—**नर्तः** । "दृशृं प्रेक्षणे" पश्यतीति—**दर्शः** । एषु कं बाधते इत्याह—**एषु नाम्युपान्त्यलक्षणं कमि**ति—लिहादयो हि नाम्युपान्त्याः, तेभ्यो "नाम्युपान्त्य-प्री-कृ-ज्ञः कः" [ ५. १. ५४. ] इति कप्रत्ययः प्राप्नोति, स चास्योत्सर्गभूतस्यापवाद इति विना यत्नं न निवारयितुं शक्यतेऽतोऽयं योगविभागरूपो यत्नः कृत इति भावः । नन्वेवं दृशेः "घ्राध्मा०" [ ५. १. ५८. ] इति विहितः शो व्यर्थः, अनेन बाधितत्वादन्यत्राप्रवृत्तेरित्याशङ्कायामाह—**दृशेस्तु वा शं बाधते** इति—लिहादिषु पाठसामर्थ्यादच्, विशिष्य विधानसामर्थ्याच्च शोऽपि भवतीति भावः । नन्वेवं सामान्यविहितस्य नाम्युपान्त्यलक्षणकस्य सर्वथा [ लिहादिभ्यः ] बाध एव स्यादिति 'अनिमिष' इति प्रयोगः कथं संगच्छेतेति चेत् ? अत्राह—**'अनिमिष' इति बहुलाधिकारात् कोऽपि भवती**ति—न निमिषति लोचने इति नाम्युपान्त्यलक्षणे के—अनिमिषः, योगविभागस्येष्टसिद्ध्यर्थत्वेनेष्टस्य प्रयोगस्य यथा कथञ्चित् साधनमेव वरमित्याशयः । न केवलमयं कप्रत्ययमेव बाधते किन्तु अणमपीत्याह—**श्वपच** इत्यादिना । श्वानं पचतीति—**श्वपचः** । पारमापततीति—**पारापतः** । कुत्सितं वदतीति "रथ-वदे" [ ३. २, १३१. ] इति कोः कदादेशे—**कद्वदः** । यं वदतीति—**यद्वदः** । "व्रणण् गात्रविचूर्णने" **अरीन् व्रणयतीति—अरिव्रणा शक्तिः** । जारं बिभर्तीति—**जारभरा** । कन्यां वृणोतीति—**कन्यावरः** । रघुमुद्वहतीति—**रघूद्वहः** । रसमावहतीति—**रसावहः** । **एषु अणं बाधते** इति—श्वपचादिषु "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणं बाधत इत्यर्थः । ननु 'लिहादेः' इत्येकवचनेनैव निर्देशः कुतो न कृत इत्याशङ्कायामाह—**बहुवचनमाकृतिग्रहणार्थमिति**—आकृत्या गण्यते लिहादिपठितत्वेन संख्यायत इति—आकृतिगणस्तदर्थमिति भावः, एवं च ये गणेऽपठिता अपि

धातवस्तेभ्योऽपि भवतीति भावः । तेन 'वशा, अमर, क्षम, रण, श्लेष, अजगर' इत्यादयोऽदर्शिता अपि ज्ञेया इति लघुन्यासकारः । "णद अव्यक्तायां वाचि" अतोऽचि–नद, "भष भर्त्सने" भर्त्सनं कुत्सितशब्दकरणम्, अतोऽचि—भष, "प्लुंङ् गतौ" अतोऽचि—प्लव, "गृत् निगरणे" निगरणं भोजनम्, अतः कापवादेऽनेनाचि—गर, "चर भक्षणे च" चाद् गतौ, अतोऽचि—चर, "तृ प्लवन-तरणयोः" अतोऽचि—तर, 'दृश् विदारणे' अतोऽचि– दर, "स्तृग्श् आच्छादने" अतोऽचि—स्तर, "षूदि क्षरणे" अतोऽचि—सूद, "दिवूच् क्रीडादौ" अतो नाम्युपान्त्यलक्षणकापवादेऽनेनाचि–देव, एवं "षिवूच् उतौ" अतो नाम्युपान्त्यलक्षणकापवादेऽनेनाचि शेव, "चुरण् स्तेये" अतोऽचि—चोर, "गुहौग् संवरणे" अतोऽपि कापवादेऽचि–गोह, अत्र "गोहः स्वरे" [ ४. २. ४२. ] इत्यूकारेण भाव्यम्, किञ्च स्वोपज्ञपारायणे—"नाम्युपान्त्य०" [ ५. १. ५४. ] इति के—गुह" इत्युक्तम्, तथा चात्र पाठान्तरेण भवितव्यमिति प्रतिभाति, एवं च "गाहौङ् विलोडने" गाहते इति अचि–गाह इति पाठः पारायणसम्मतो विज्ञेयः । एभ्योऽच्प्रत्ययान्तेभ्यः स्त्रियां ङीप्रत्यये—**नदी, भषी, प्लवी, गरी, चरी, तरी, दरी, स्तरी, सूदी, देवी, सेवी, चोरी, गाही**ति । ननु नदादिशब्दानामच्प्रत्ययान्तत्वेन तत आप् समुचितः, कथं ङीरित्याशङ्कायामाह—**एतेऽजन्ता गौरादौ द्रष्टव्याः** इति तथा च गौरादिगणे पाठादेव ङीरिति भावः । अत्रेत्थं लघुन्यासे—**"गौरादौ द्रष्टव्या** इति, अन्यैर्नदी इत्यादीनां ङ्यर्थं टित्त्वं कृतं तत् स्वमते कथमित्याह, नदीत्यादीनां सामान्योऽनेन वाऽच् भवतु. भरतस्तु गौरादौ" ।

पाणिनीये तु न पृथगच् प्रत्ययो विहितोऽपि तु गणनिर्देशपूर्वकमेव । तथा च सूत्रम् "नन्दि-ग्रहि-पचादिभ्यो ल्युणिन्यचः" [ ३. १. १३४. ] इति, अत्र पचादिगणपठितेभ्योऽच् विधीयते, स च पचादिराकृतिगणत्वेन स्वीक्रियते, अत्र च भाष्ये इत्थमुक्तम्—"अजपि सर्वधातुभ्यो वक्तव्यः । इहापि यथा स्यात्—भवः, सव इति । न तर्हीदं पचाद्यनुक्रमणं कर्तव्यम् । कर्तव्यं च । किं प्रयोजनम् ? पचादिप्रयोजनमनुबन्धासञ्जनार्थमपवादबाधनार्थं च । अनुबन्धासञ्जनार्थं तावत् नदट्—नदी, चोरट्—चोरी । अपवादबाधनार्थम्—जारभरा, श्वपचेति । एवं च वार्तिककृतोऽभिमतं सर्वधातुभ्यो विधानमाकृतिगणत्वेन संगृहीतम् । आकृतिगणत्वादेव च सिद्धे गणे केषाञ्चिद् विशिष्य पाठेन चानुबन्धासञ्जनं बाधकबाधनं च लब्धमिति सर्वेष्टसंग्रहः । अनुबन्धासञ्जनस्य च टित्त्वात् "टिड्ढाणञ्" [४.१.१५.] इति पाणिनीयसूत्रविहितङीप्सिद्धिः फलम् । यद्यपि नदीत्यादि रूपं गौरादिपाठादपि सेत्स्यतीत्यनुबन्धासञ्जनस्य तदर्थं नावश्यकतेति प्रतीयते तथापि गौरादिपाठात् "षिद्गौरादिभ्यः" [४.१.४१.] इति पाणिनीयसूत्रेण ङीष् स्यादितीष्टस्यान्तानुदात्तत्वस्य सिद्धयेऽनुबन्धासञ्जनमाश्रितम् । स्वमते च स्वरकृतविशेषस्यानाश्रयणादनुबन्धासञ्जनं विहाय गणे पाठ एव स्वीकृतः । तथा चोभयोः फलैक्यमिति तत्त्वम् ॥ ५. १. ५०. ॥

---

ब्रुवः । ५. १. ५१. ॥

**त० प्र०—ब्रुवो धातोरचि ब्रुव इति निपात्यते । ब्राह्मणमात्मानं ब्रूते–ब्राह्मणब्रुवः । अण्-वचादेश–गुणबाधनार्थं निपातनम् ॥ ५१ ॥**

---

**श० म० न्यासानुसन्धानम्—ब्रुवः ।** निपातनसूत्रमिदमित्याह—**ब्रुवो धातोरचि ब्रुव इति निपात्यते** इति । "ब्रूंगक् व्यक्तायां वाचि" **ब्राह्मणमात्मानं ब्रूते** इति वाक्यम्, **ब्राह्मणब्रुव** इति समासः । यः केवलमात्मानं ब्राह्मणं कथयति, न तु तत् कर्म करोति यद् ब्राह्मणेन कर्तव्यं स ब्राह्मणब्रुवः, यदुक्तं शब्दकल्पद्रुमे—

"विप्रः संस्कारयुक्तो न नित्यं सन्ध्यादि कर्म यः ।
नैमित्तिकं च नो कुर्यात् ब्राह्मणब्रुव उच्यते ॥"
युक्तः स्यात् सर्वसंस्कारैर्द्विजस्तु नियमव्रतैः ।
कर्म किञ्चिन्न कुरुते स ज्ञेयो ब्राह्मणब्रुवः ॥
गर्भाधानादिभिर्युक्तस्तथोपनयनेन च ।
न कर्मकृन्न चाधीते स ज्ञेयो ब्राह्मणब्रुवः ॥
अध्यापयति नो शिष्यान् नाधीते वेदमुत्तमम् ।
गर्भाधानादिसंस्कारैर्युक्तः स्याद् ब्राह्मणब्रुवः ॥

इति पद्मोत्तरखण्डे ।

सामान्यसूत्रेणाच्प्रत्ययमात्रविधाने नाभिमतरूपसिद्धिरिति निपातनमाश्रितम्, तत्र निपातनेन किं लभ्यमित्याह—**अण्-वचादेश-गुणबाधनार्थं निपातनमिति**—ब्राह्मणमात्मानं ब्रूत इत्यर्थविवक्षायां "कर्मणोऽण्" [५. १. ७२.] इति सूत्रेणाण् प्राप्तः सोऽनेन बाध्यत इति भावः । न केवलमणेव बाध्यतेऽपि तु अचि कृते "अस्ति-ब्रुवोर्भू-वचावशिति" [४. ४. १.] इति वचादेशोऽपि प्राप्तः सोऽपि बाध्यः, न च तद्बाधनमात्रेण निर्वाहः, "नामिनो गुणो०" [४. ३. १.] इति गुणे सत्यवादेशे ब्रव इति रूपापत्तेः, अतो गुणोऽपि बाध्यत इति भावः ॥ ५. १. ५१. ॥

---

## नन्द्यादिभ्योऽनः । ५. १. ५२. ॥

**त० प्र०—नन्द्यादिभ्यो धातुभ्यो नामगणे दृष्टेभ्योऽनः प्रत्ययो भवति । नन्द्यादयो नन्दन-रमणेत्यादिनामगणशब्देभ्योऽपोद्धृत्य वेदितव्याः । स च सप्रत्ययपाठो विशिष्टविषयार्थो रूपनिग्रहार्थश्च । नन्दि–वाशि–मदि–दूषि–साधि–वर्धि–शोभि–रोचिभ्यो ण्यन्तेभ्यः संज्ञायाम्–नन्दनः, वाशनः, मदनः, दूषणः, साधनः, वर्धनः, शोभनः, रोचनः । सहि–रमि–दमि–रुचि–कृति–तपि–तृदि–दहि–यु–पू–लूभ्यः संज्ञायामेवाण्यन्तेभ्यः–सहते–सहनः, एवं–रमणः, दमनः, विरोचनः, विकर्तनः, तपनः, प्रतर्दनः, दहनः, यवनः, पवनः, लवणः, निपातनाण्णत्वम् । समः क्रन्दि-कृषि-हृषिभ्यः संज्ञायामेव–संक्रन्दनः, संकर्षणः संहर्षणः । कर्मणो दमि-अर्दि-नाशि-सूदिभ्यः–सर्वदमनः, जनार्दनः, वित्तविनाशनः, मधुसूदनः, । असंज्ञायामपि–रिपुदमनः, कुलदमनः, परार्दनः, रोगनाशनः, अरिसूदनः । नर्दि-भीषि-भूषि-दृपि-जल्पिभ्यः–नर्दयति–नर्दनः, विभीषयते–विभीषणः । भूषयति–भूषणः, दृप्यति–दर्पणः, जल्पति–जल्पनः । बहुवचनमाकृतिगणार्थम् ॥ ५२ ॥**

---

**श० म० न्यासानुसन्धानम्—नन्द्या० । नामगणे दृष्टेभ्यः** इति—नामत्वेन गणे निर्दिष्टेभ्यः इत्यर्थः । तदेवाह—**नन्द्यादयो 'नन्दन रमण' इत्यादीति** । **गणशब्देभ्योऽपोद्धृत्येति**—नन्दनादयो हि प्रत्ययान्तरूपाणि, तेषु प्रत्ययांशस्य त्यागेन धातवोऽपोद्धृता वेदितव्या इत्यर्थः । न च धातुगणे धातव एव पठनीयाः किमिति प्रत्ययान्तानि रूपाणि नामत्वेन पठितानीति चेत् ? अत्राह—**स च सप्रत्ययपाठो विशिष्टविषयार्थो रूपनिग्रहार्थश्चेति**—सप्रत्ययपाठेन येषां धातूनां रूपाणि यदुपसर्गयदुपपदपूर्वाणि निरुपसर्गाणि वा पठितानि तेभ्यस्तदुपसर्गादिसहितेभ्य एव प्रत्ययो न तूपसर्गान्तरोपपदान्तरादिपूर्वेभ्य इति विशिष्टविषयताया रूपविशेषनिग्रहस्य च लाभ इति भावः । विशिष्टविषयतामर्थविशेषे रूपनिग्रहं च विशिष्य प्रदर्शयति—**नन्दि-वाशि-मदी**त्यादिना, "टुनदु समृद्धौ" नन्दयतीति—**नन्दनः**, "वशक् कान्तौ" कान्तिरिच्छा, "वाशिच् शब्दे" वाशयतीति—**वाशनः**, "मदै हर्ष-ग्लपनयोः" मदयतीति—**मदनः**, घटादित्वाद् ह्रस्वः । "दुषंच् वैकृत्ये" वैकृत्यं रूपभङ्गः, दूषयतीति—**दूषणः**, "ऊद् दुषो णौ" [ ४-२. ४०. ] इति ऊत्, "साधंट् संसिद्धौ" साधयतीति—**साधनः**, "वृधूङ् वृद्धौ" वर्धयतीति—**वर्धनः**, "शुभि-दीप्तौ" शोभयतीति—**शोभनः**, "रुचि अभिप्रीत्यां च" चाद् दीप्तौ, रोचयतीति—**रोचनः** इति । नन्दनः पुत्रो रामो नन्दनं नाम वनम्, एवं नन्दनादयः संज्ञाशब्दाः, तथा चात्रार्थविशेषः प्रकृतिविशेषश्च नियन्त्रितो वेदितव्यः ।

ण्यन्तेभ्यः संज्ञायामन उदाहृतः, अथाण्यन्तेभ्यः संज्ञायामेवानमुदाहर्तुमाह—**सहि-रमि-दमी**त्यादि, "षहिं मर्षणे" सहते इति—**सहनः**, अतिदिशति—**एवमिति**, "रमि क्रीडायाम्" रमते इति—**रमणः**, "दमूच् उपशमे" दाम्यतीति—**दमनः**, विरोचते इति—**विरोचनः**, "कृतैत् छेदने" विकृन्ततीति—**विकर्तनः**, "तपं संतापे" तपतीति—**तपनः**, "ऊतृदृपी हिंसानादरयोः" प्रतृणत्तीति—**प्रतर्दनः**, "दहं भस्मीकरणे" दहतीति—**दहनः**, "युक् मिश्रणे" यौतीति—**यवनः**, "पूङ् पवने" "पूग्श् पवने" पवते पुनाति वेति—**पवनः**, "लूग्श् छेदने" लुनातीति—**लवणः**, कथमत्र णत्वमित्यत आह—**निपातनाण्णत्वमिति**—कृतणत्वस्य गणे पाठो निपातनम् ।

**समः क्रन्दि-कृषि-हृषिभ्यः संज्ञायामेवेति**—एतेन सम्पूर्वकस्य क्रन्दादित्रयस्य संज्ञैवापेक्षिता, न तु ण्यन्तत्वमण्यन्तत्वं वा नियतमिति भावः । "क्रदु रोदनाह्वानयोः"

"क्रदुङ् वैक्लव्ये" संक्रन्दयतीति—**संक्रन्दन** इन्द्रः; "कृष विलेखने" विलेखनं हलोत्कर्षणम्, संकर्षति यमुनामिति—**संकर्षणो** बलभद्रः; "हृषू अलीके" "हृषच् तुष्टौ" संहर्षति संहृष्यति वेति—**संहर्षणः** । कर्मोपपदात् ण्यन्तात् दमादिचतुष्टयात् संज्ञायामनो भवतीत्याह—**कर्मण** इत्यादि, सर्वं दमयतीति—**सर्वदमनः**, "अर्द गति-याचनयोः" "अर्दिण् हिंसायाम्" जनमर्दयतीति—**जनार्दनः**, वित्तं विनाशयतीति—**वित्तविनाशनः**, मधुं सूदयतीति—**मधुसूदनः** । न केवलं संज्ञायामेव किन्त्वसंज्ञायामपि भवतीत्याह—**असंज्ञायामपीति** । रिपुं दमयतीति—**रिपुदमनः**, कुलं दमयतीति—**कुलदमनः**, परमर्दयतीति—**परार्दनः**, रोगं नाशयतीति—**रोगनाशनः**, अरिं सूदयतीति—**अरिसूदनः** । कर्मण्यणि प्राप्तेऽनः ।

ण्यन्ताण्यन्तसाधारण्येन संज्ञायामाह—**नर्दि-भीषि-भूषि-दृपि-जल्पिभ्यः** इति—"नर्द शब्दे" नर्दयतीति—**नर्दनः**, "ञिभीक् भये" हेतुकर्तृतो भये वर्तमानस्यास्य णौ "बिभेतेर्भीष् च" [ ३. ३. ९२. ] इत्यात्वे भीषादेशे आत्मनेपदे च विभीषयते इति—**विभीषणः**, "भूष अलङ्कारे" भूषयतीति—**भूषणः**, "दृपौच् हर्षमोहनयोः" दृप्यतीति—**दर्पणः**, "जल्प व्यक्ते वचने" जल्पतीति—**जल्पनः** । न केवलमेत एव धातवो नन्द्यादयोऽपि त्वन्येऽपीत्याह—**बहुवचनमाकृतिगणार्थमिति**—अन्यथा 'नन्द्यादेः' इत्येव ब्रूयादिति भावः ॥ ५. १. ५२. ॥

## ग्रहादिभ्यो णिन् ॥५. १. ५३. ॥

**त० प्र०—ग्रहादिभ्यो नामगणदृष्टेभ्यो णिन् प्रत्ययो भवति । ग्राही, स्थायी, उपस्थायी, मन्त्री, संमर्दी । उपा-ऽवाभ्यां रुधः—उपरोधी, अवरोधी । अपाद् राधः—अपराधी । उदः सहि-दसि-भासिभ्यः—उत्साही, उद्दासी, उद्भासी । नेः श्रु-शो-विश-वस-वप-रक्षिभ्यः—निशृणोति—निश्रावी, निशायी, निवेशी, निवासी, निवापी, निरक्षी । नञो व्याहृ-संव्याहृ-संव्यवहृ-याचि-व्रज-वद-वासिभ्यः—न व्याहरति—अव्याहारी, असंव्यवहारी, अयाची, अव्राजी, अवादी, अवासी । नञ्पूर्वात् स्वरान्तादचित्तवत्कर्तृकात् अकारी घर्मस्य बालातपः, अहारी शीतस्य शिशिरः, चित्तवत्कर्तृकाच्च भवति—अकर्ता कटस्य चैत्रः । केचिदनञ्पूर्वादिच्छन्ति—कारी, हारी । व्यभिभ्यां भुवोऽतीते—विभवति स्म—विभावी, अभिभावी । वि-परिभ्यां भुवो ह्रस्वश्च वा-विभवति—विभावी, विभवी; परिभावी, परिभवी । वेः शीङ्-षिगोर्देशे ह्रस्वश्च—गुणश्चित्ते विशेते विसिनोति वा—विशयी विषयी च प्रदेशः, निपातनात् षत्वम् । ग्रहादिराकृतिगणः ॥५३॥**

**श० म० न्यासानुसन्धानम्—ग्रहा०** । अत्रापि गणे नामान्येव पठितानि, तस्यापि पूर्वोक्तमेव विशिष्टविषयार्थत्वं रूपनिग्रहार्थत्वं च प्रयोजनम्, तच्च तत्र तत्र गणे एव निर्दिष्टम्, अत्र च काश्चित् प्रकृतय एवोपसर्गविशेषसहिता अर्थविशेषनियन्त्रिता वा पठिताः । "ग्रहीश् उपादाने" गृह्णातीति णिनि उपान्त्यवृद्धौ—**ग्राही** । "ष्ठां गतिनिवृत्तौ" तिष्ठतीति णिनि "आत ऐः०" [ ४. ३. ५३. ] इत्याकारस्य ऐकारे आयादेशे च—**स्थायी**, उपतिष्ठते [ उपतिष्ठति वा ] इति—**उपस्थायी** । "मन्त्रिण् गुप्तभाषणे" मन्त्रयते इति—**मन्त्री** । "मृदश् क्षोदे" संमृद्नातीति सम्पूर्वादिव णिनि—**सम्मर्दी** । "रुधृंपी आवरणे" उपरुणद्धि अवरुणद्धीति—**उपरोधी, अवरोधी** । "राधंट् संसिद्धौ" अपराध्नोतीति—**अपराधी** । "षहिच् मर्षणे" उत्सहते इति—**उत्साही** । "दासृग् दाने" उद्दासतीति—**उद्दासी** । "भासि दीप्तौ" उद्भासते इति—**उद्भासी** । "श्रुंट् श्रवणे" निशृणोतीति णिनि वृद्धावावादेशे—**निश्रावी** । "शोंच् तक्षणे" निश्यतीति णिनि ओकारस्य "आत् सन्ध्यक्षरस्य" [ ४. २. १. ] इत्याकारे तस्य "आत ऐः कृञ्ञौ" [ ४. ३. ५३. ] इत्यैकारे तस्यायादेशे च—**निशायी**, "विशंत् प्रवेशने" निविशतीति—**निवेशी** । "वसं निवासे" निवसतीति—**निवासी**, "डुवपीं बीजसंताने" निवपतीति—**निवापी**, "रक्ष पालने" निरक्षतीति—**निरक्षी** । "हृंग् हरणे" न व्याहरतीति णिनि वृद्धावारादेशे—**अव्याहारी**, न संव्याहरतीति—**असंव्याहारी**, न संव्यवहरतीति—**असंव्यवहारी** "डुयाचृग् याचने" न याचते इति—**अयाची**, "व्रज गतौ" न व्रजतीति—**अव्राजी**, "वद व्यक्तायां वाचि" न वदतीति—**अवादी**, "वसं निवासे" न वसतीति—**अवासी**, अव्याहारिप्रभृतीनां निषिद्धार्थता भवति, कथं पुनः प्रतिषिद्धानां प्रयोगः ?

उपचारसत्तायामप्रतिषेधाददोषः । नहि मुख्यैव पदार्थानां सत्ता, किन्तूपचरितापि, यथोक्तमर्थद्वारेण पदार्थानामन्या सत्तौपचारिकीति, तत्र मुख्या या सत्ता तस्या एव प्रतिषेधो न तु बुद्धिस्थाया औपचारिक्या इति तन्निबन्धनप्रयोगो न विरुध्यते । **नञ्पूर्वात् स्वरान्तादचित्तवत्कर्तृका**दिति—चित्तमस्यास्तीति चित्तवान्, न चित्तवान्—अचित्तवान्, स कर्ता यस्य तस्मात्, अर्थद्वारकं चेदं विशेषणम्, अर्थस्य ह्यचित्तवत्कर्तृत्वात् तदभिधायी धातुरुपचारेण तथोच्यते । न करोतीति—**अकारी घर्मस्य बालातपः** । न हरतीति—**अहारी शीतस्य शिशिरः** । व्यावर्त्यं दर्शयितुमाह—**चित्तवत्कर्तृकान्न भवतीति**, न करोतीति—**अकर्ता कटस्य चैत्रः** इति । मतान्तरमाह—**केचिदनञ्पूर्वादिच्छन्तीति**, तन्मते करोतीति—**कारी**, हरतीति—**हारी** । **व्यभिभ्यां भुवोऽतीते** इति—विपूर्वादभिपूर्वाच्च भूधातोर्भूतकाले णिन् साधुरित्यर्थः । विभवति स्मेति—**विभावी**, अभिभवति स्मेति—**अभिभावी** । **विपरिभ्यां भुवो ह्रस्वश्च वे**ति—विपूर्वात् परिपूर्वाच्च भूधातोर्णिन् साधुः, ह्रस्वश्च वा भवतीत्यर्थः । विभवतीति—**विभावी, विभवी**, परिभवतीति—**परिभावी, परिभवी । वेः शीङ्-षिञोर्देशे** इति—देशेऽभिधेये विपूर्वात् "शीङ्क् स्वप्ने" इति शीधातोः, "षिञ्ट् बन्धने" इति सिधातोश्च णिन् ह्रस्वश्च साधुरित्यर्थः । गुणैश्चित्ते विशेते विसिनोतीति—**विशयी, विषयी च प्रदेशः**, द्वितीये षत्वं कथमित्याह—**निपातनात् षत्वमिति**—गणपाठे विषयीति कृतषत्वस्य निर्देशात् सस्य षत्वमिति भावः । **ग्रहादिराकृतिगणः** इति—बहुवचनमाकृतिगणार्थमित्यर्थः, अन्यथा ग्रहादेरित्येकवचनेन निर्देशः कृतः स्यात् ॥ ५. १. ५३. ॥

## नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः । ५. १ ५४. ॥

**त० प्र०**—नाम्युपान्तेभ्यो धातुभ्यः 'प्री कृ गृ ज्ञा' इत्येतेभ्यश्च कः प्रत्ययो भवति । ककारः कित्कार्यार्थः । विक्षिपः, विलिखः, बुधः, युधः कृशः, वितृदः । प्रीणातीति—प्रियः, किरतीति—किरः, उत्किरः, गिलतीति—गिलः, निगिलः, जानातीति—ज्ञः । काष्ठभेद इति परत्वादण् ॥५४॥

**श० म० न्यासानुसन्धानम्**—नाम्यु० । ककारस्य प्रयोगेऽश्रवणादानर्थक्यमाशङ्क्याह—**ककारः कित्कार्यार्थः** इति—कित्कार्यं च गुणाभाव इरादेश आकारलोपो वृद्ध । "क्षिपंच् प्रेरणे" "क्षिपींत् प्रेरणे" विक्षिप्यति विक्षिपतीति वाऽनेन के कित्वात् "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इत्युपान्त्यगुणाभावे—**विक्षिपः** । एवं—"बुधृग् बोधने" "बुध अवगमने" "बुधिंच् ज्ञाने" बोध–बुध्यते वेति-**बुधः** । "लिखत् अक्षरविन्यासे" विलिखतीति-**विलिखः** । "युधिंच् सम्प्रहारे" युध्यते इति—**युधः** । "कृशच् तनुत्वे" कृश्यतीति—**कृशः** । "ऊतृदृपी हिंसानादरयोः" वितृणत्तीति—**वितृदः** । "प्रीङ्च् प्रीतौ" "प्रीग्श् तृप्ति-कान्त्योः" प्रीयते प्रीणातीति वा के कित्त्वाद् "नामिनो गुणो०" [ ४. ३. १. ] इति गुणाभावे "संयोगात्" [२. १. ५२.] इतीयादेशे—**प्रियः** । "कृत् विक्षेपे" किरति उत्किरतीति के "ऋतां क्ङितीर्" [ ४. ४. ११६. ] इतीरादेशे—**किरः, उत्किरः** । "गृत् निगरणे" निगरणं भोजनम्, गिलतीति के इरादेशे "नवा स्वरे" [ २. ३. १०२. ] इति वा लत्वे—**गिलः**, निगिलतीति—**निगिलः** । "ज्ञांश् अवबोधने" जानातीति के "इडेत्पुसि चातो लुक्" [ ४. ३. ९४. ] इत्याकारलोपे—**ज्ञः** । नानुबन्धकृतमसारूप्यमित्युक्ततया काऽणोः सरूपत्वेन विकल्पेनापवादत्वाप्राप्तेः काष्ठानि भिनत्तीति विग्रहेऽपि केनैव भाव्यमिति काष्ठभिद इत्येव स्यात्, न तु काष्ठभेद इत्याशङ्कायामाह—**काष्ठभेद इति परत्वा**दिति, तथा च स्पर्धे परस्यैव विधिरिति सामान्यनियमेनैव निर्वाह इति भावः ।

पाणिनीये च "कर्मण्यण्" [ ३. २. १. ] इति सूत्रे भाष्ये तु विप्रतिषेधमुक्त्वा तस्य चायुक्तत्वमपि प्रतिपाद्य मध्येऽपवादन्यायेन निर्वाह उक्तः । तथाहि—"अनुपपदात् कर्मोपपदो भवति विप्रतिषेधेन' इति वार्तिकव्याख्यायाम् + + + अनुपपदस्यावकाशः—विक्षिपः, विलिखः । कर्मोपपदस्य कुम्भकार इति । काष्ठभेद इत्यत्रोभयं प्राप्नोति । कर्मोपपदो भवति विप्रतिषेधेन ॥" इत्युक्त्वा सिद्धान्त्येकदेश्याह—नैव युक्तो विप्रतिषेधः, अनुपपदस्तृतीयः । ण्वुल्तृजचः । तेषां कः । कस्य शः । स यथैव शः कं बाधते, एवं कर्मोपपदमपि बाधते । का तर्हि गतिः ?" इति प्रश्ने सिद्धान्त्याह—'मध्येऽपवादाः

पूर्वान् विधीन् बाधन्ते नोत्तरान्' इत्येवं शः कं बाधिष्यते, कर्मोपपदं न बाधिष्यते" इति ।

अयमाशयः—ण्वुल्[णक]तृचौ 'अच्' च सार्वधातुकाः सर्वेभ्यो धातुभ्यो विहितत्वात्, असरूपतया च तेषु बाध्यबाधकभावो वैकल्पिकः, अयं च कस्तृतीयकक्ष्यायां प्राप्तो विशेषविहितत्वादपवादः, कर्मोपपदोऽपि सार्वधातुकतया सर्वधातुभ्यो विहिततयोत्सर्ग एव । एवं चोत्सर्गापवादयोर्विप्रतिषेधस्यायुक्तत्वम्, समबलयोर्हि विप्रतिषेधः [ स्पर्धः ] भवति, ततश्च काष्ठभिद इत्येव भविष्यति, न तु काष्ठभेद इति । एवं च का गतिरत्रेति चिन्तायां मध्येऽपवादन्यायेन समाधानं कार्यम् । तथाहि—एतत्सूत्रविहितः कः ण्वुल्तृजचाम् अणश्च मध्ये पठितः, स पूर्वान् ण्वुल्तृजचो बाधिष्यते कर्मोपपदमणं न बाधिष्यत इति स एव भविष्यतीति काष्ठभेद इत्येव रूपमुचितमिति भाष्यसिद्धान्तः । एवं च 'काष्ठभेद इति परत्वादण्' इति ग्रन्थः सामान्यतया 'स्पर्धे' 'मध्येऽपवाद' इत्युभयशास्त्रपरतया योजनीयः, मध्येऽपवादन्यायेनाप्यणः प्रवृत्तौ परत्वस्यैव मूलत्वादिति ध्येयम् ॥ ५. १. ५४. ॥

## गेहे ग्रहः । ५. १. ५५. ॥

**त० प्र०—गेहेऽभिधेये ग्रहेः को भवति । गृहम्, गृहाणि; गृहाः, पुंसि बहुवचनान्त एव । उपचाराद् दारा गृहाः ॥५५॥**

**श० म० न्यासानुसन्धानम्—गेहे०** । गेहशब्दस्योपपदत्वशङ्कामपाकर्तुमाह—**गेहेऽभिधेये** इति—कर्तरि विहितोऽयं प्रत्ययः कर्तृत्वेन गेहे वाच्य एव भवति न त्वन्यस्मिन् वाच्य इत्यर्थः । "ग्रहीश् उपादाने" गृह्णाति पुरुषोपार्जितं द्रव्यमित्यनेन के कित्त्वाच्च य्वृति—**गृहम्**, पुंक्लीबलिङ्गोऽयम्, बहुवचने **गृहाणि** । पुंस्त्वे तु बहुवचनान्त एव गेहवाचीत्याह—**गृहाः, पुंसि बहुवचनान्त एवेति**, तथा चाहामरः—"गृहाः पुंसि भूम्न्येव" इति । अयं च गृहशब्दस्य वाच्योऽर्थः, लक्ष्यार्थोऽपि तस्य निरूढ इत्याह—**उपचाराद दारा गृहा** इति—उपचारो लक्षणा, तन्मूलानि चालङ्कारिकैरित्थमुक्तानि—

"तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च ।
तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः ॥" इति ।

तत्र दारेषु गृहशब्दस्य तात्स्थ्यात् प्रयोगः, तिष्ठन्ति हि गृहेषु ताः, यथा 'मञ्चाः क्रोशन्ति' इत्यादौ मञ्चशब्दस्य मञ्चस्थेषु बालकेषु प्रयोगः, परं तु मञ्चशब्दस्य बालकेषु तत्स्थेष्वन्येषु च प्रयोगः स्वारसिकः, गृहशब्दस्य च दारेषु निरूढः प्रयोगः, स च निरूढलक्षणामूलकः । लक्षणा हि प्रथमतो द्विविधा—प्रयोजनवती निरूढा च, प्रयोजनेन यत्र लक्षणाऽऽश्रीयते सा प्रयोजनवती, यथा—गङ्गायां घोष इति, अत्र गङ्गातीरे घोष इति कथनेन येषां शैत्यपावनत्वादीनामतिशयो न प्रतीयते तेषामतिशयस्य प्रतिपादनाय लक्षणाऽऽश्रीयत इति प्रयोजनवती सा । अनादितात्पर्यवती निरूढा लक्षणा, यथा कुशलशब्दस्य कुशग्राहिरूपार्थे व्युत्पन्नस्य चतुरे प्रयोगः । एवं च दारेष्वपि गृहशब्दस्य निरूढ एव प्रयोगः । अत एवामरकोशेऽपि नानार्थवर्गे "दारेष्वपि गृहाः" इत्युक्तम् । स्मृत्यादौ च नपुंसकलिङ्गोऽपि गृहशब्दः प्रयुक्तः कलत्रे इति शब्दकल्पद्रुमः, तथाहि स्मृतिः—

"न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
तया सहितः सर्वान् पुरुषार्थान् समश्नुते ॥" इति ।

परं त्विदं स्त्रिया गृहप्रधानाङ्गत्वबोधकं वचनं न तु तस्य क्लीबस्य कलत्रे प्रयोगनियामकम् ।

अत्र केचित् "ग्लहीङ् ग्रहणे" इत्यस्य स्थाने "गृहीङ् ग्रहणे" इति पठित्वा नाम्युपान्त्यलक्षणकप्रत्ययेन गृहशब्दं व्युत्पाद्य, तथा "गृहणि ग्रहणे" इति अदन्तात् चुरादेर्णिचि अचि च गृहशब्दं व्युत्पाद्य च सूत्रमिदं त्यक्तुं शक्यमित्याहुः, तच्च नागेशेन शब्देन्दुशेखरे खण्डितम्, तथाहि—यद् तु "गृह ग्रहणे" इति चुरादेरदन्तात् णिचि पचाद्यचि भ्वादेर्वा गृहधातोरिगुपधलक्षणे [ नाम्युपान्त्यलक्षणे ] के गृहं सिद्धं, रूढिस्वीकाराच्च नातिप्रसङ्गस्तत्स्थेषु दारेष्विवेतीदं सूत्रं शक्यमकर्तुमिति तन्न—तौ धातू छान्दसाविति सूत्राशयात्, धातुश्च पाठार्थादावागमभ्रंशस्य क्षीरस्वामिनोक्तत्वेन, सूत्रपाठे च तद्भ्रंशाभावेनैवमेवौचित्यात् । उच्छृङ्खलास्तु तयोर्धात्वोरप्रामाणिकः पाठः । वेदे तत्साध्यप्रयोगो यदि भवेत् स वर्णव्यत्ययादिना ग्रहेरेव साध्य इत्याहुः ।

अत एव भाष्यवार्तिककाराभ्यां नेदं प्रत्याख्यातम्" इति ।

अयमाशयः—यद्यपि धात्वन्तरेभ्योऽपि गृहशब्दस्य निष्पत्तिः सम्भवति, तथापि तस्यार्थविशेषनैयत्याय सूत्रमावश्यकम् । यदि च यथा गृहशब्दस्य पुंलिङ्गस्य लक्षणया दारार्थे निरूढिस्तथैव गेहेऽपि रूढिस्वीकारान्नान्यत्र प्रयोग इत्युच्यते, तदा चुरादेर्म्वादिर्वोक्तस्य धातोश्छान्दसत्वस्याभिमतत्वेन न तयोर्लोके प्रयोग इति ग्रहधातोर्गृहशब्दस्य साधनाय सूत्रमावश्यकम् । यदि च तयोश्छान्दसत्वं न सर्वाभिमतमित्युच्यते तदा क्षीरस्वाम्युक्तदिशा धात्वर्थपाठस्यापभ्रष्टत्वेनार्थविशेषे प्रयोगनैयत्याय सूत्रस्यावश्यकत्वमिति मन्तव्यम् । किञ्च लक्षणैकचक्षुष्काणां लक्षणानुसरणमेवोचितमिति नात्र सूत्रवैयर्थ्यशङ्का कार्या । अत एव भाष्येऽप्युक्तम्—"नासूया तत्र कर्तव्या यत्रानुगमः क्रियते" इति । यस्मिन् विषये किञ्चिदनुगमकं शास्त्रं क्रियते तत्र कथञ्चिदन्यथासिद्धिं कृत्वा असूया न कर्तव्या, योगपरिपूतया दशा शास्त्राणां रचनेन तत्र वैयर्थ्यस्यास्माभिश्चर्मचक्षुष्कैराशङ्कितुमनौचित्यात् । अत एव भाष्यवार्तिककाराभ्यां नेदं सूत्रं प्रत्याख्यातमिति ध्येयम् ॥ ५. १. ५५. ॥

---

## उपसर्गादातो डोऽश्यः । ५. १. ५६. ॥

**त० प्र०—उपसर्गात् परात् श्यैङ्वर्जितादाकारन्तात् धातोर्डः प्रत्ययो भवति । आह्वयतीति-आह्वः, प्रह्वः, संव्यः, परिव्यः, प्रज्यः, अनुज्यः, प्रस्थः, सुग्लः, सुम्लः, सुत्रः, व्यालः, सुरः । केनैव सिद्धे डविधानं य्वृन्निषेधार्थम् । उपसर्गादिति किम् ? णे—दायः, धायः । आत इति किम् ? आहर्ता । अश्य इति किम् ? णे-अवश्यायः, प्रतिश्यायः । *पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्* इति णो बाध्यते नाण् , तेन 'गोसंदाय वडवासंदाय' इत्यणेव ॥५६॥**

---

**श० म० न्यासानुसन्धानम्—उप० ।** "ह्वेंग् स्पर्धा-शब्दयोः" आह्वयतीति डे "डित्यन्त्यस्वरादेः" [ २. १. ११४. ] इत्याकारलोपे—**आह्वः**, प्रह्वयतीति—**प्रह्वः** । "व्येंग् संवरणे" संव्ययतीति—**संव्यः**, परिव्ययतीति—**परिव्यः** । "ज्यांश् हानौ" प्रजिनातीति—**प्रज्यः**, अनुजिनातीति—**अनुज्यः** । "ष्ठां गतिनिवृत्तौ" प्रतिष्ठत इति—**प्रस्थः** । "ग्लैं हर्षक्षये" सुग्लायतीति—**सुग्लः** । "म्लैं गात्रविनामे" सुम्लायतीति—**सुम्लः** । "त्रैंङ् पालने" सुत्रायते इति—**सुत्रः** । "लांक् आदाने" व्यालातीति—**व्यालः** । "रैं शब्दे" "रांक् दाने" सुरायति सुरातीति वा—**सुरः** । ननु पूर्वतोऽनुसृतः कः प्रत्यय एव विधीयतां सत्याकारलोपे रूपसिद्धेरित्याशङ्कायामाह—**केनैव सिद्धे डविधानं य्वृन्निषेधार्थम्**इति, यद्यपि डे न केनापि य्वृत् निषिध्यतेऽपि तु तत्र य्वृतः प्राप्तिरेव नेति निषेधार्थमित्युक्तिः सन्दिग्धेति प्रतिभाति प्राप्तिपूर्वकत्वान्निषेधस्य, तथापि के सति प्राप्नुवतो य्वृतो डस्य विधानेन निवृत्तिः क्रियत इति फलतो य्वृतो निषेध एवेति वृत्त्याशयः । पदकृत्यं पृच्छति—**उपसर्गादिति किम्**इति, उत्तरयति—णे—**दायः, धायः** इति—ददाति दधातीति "तन्-व्यधीण्-श्वसातः" [ ५. १. ६४.] इति णे "आत ऐः०" [४. ३. ५३.] इत्याकारस्य ऐकारे आयादेशे च—दायः, धायः । पृच्छति—**आत इति किम्**इति, उत्तरयति—**आहर्ता**, आहरतीति "णक-तृचौ" [५. १ ४८.] इति तृच् । "श्यैंङ् गतौ" इति धातोः सन्ध्यक्षरस्यात्त्वेनादन्तत्वेऽपि "तन्-व्यधीण्-श्वसातः" इति विधीयमानो णः परत्वात् स्यादेवेति 'अश्यः' इति पर्युदासो नावश्यक इत्याशङ्कते—**अश्य इति किम्**इति, प्रत्युदाहरणदानेनोत्तरयति—**णे—अवश्यायः, प्रतिश्यायः** इति, अयमाशयः—णस्य परत्वेऽपि सामान्यत आदन्तेभ्यो विहितत्वेन, अस्य च विशेषत उपसर्गपूर्वकेभ्य आदन्तेभ्यो विहितत्वेन "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्" इति न्यायादस्य बलवत्त्वमिति णं बाधित्वाऽयमेव [ड एव] स्यादिति तद्वारणाय 'अश्यः' इति पर्युदास आवश्यक इति । एवं चास्य विशेषशास्त्रत्वेनाल्पविषयकतयाऽपवादशास्त्रत्वापत्त्याऽग्रे विधीयमानात् "कर्मणोऽण्" [ ५. १. ७२. ] इति शास्त्रादपि बलवत्त्वमायाति, ततश्च गां संयच्छतीति गोसंदाय इत्यादिप्रयोगाणामसिद्धिरित्याशङ्कायामाह—*** पूर्वेऽपवादा अनन्तरान् विधीन्** इत्यादि, तथा चायं पूर्वोऽपवादः, स चानन्तरं विधिं "तन्-व्यधीण्-श्वसातः" इति णं बाधिष्यते, न तु ततः परं "कर्मणोऽण्" इति विधिम्, अनन्तरविधिबाधेनैव निरवकाशत्वरूपस्यापवाद-

त्वबीजस्य क्षीणतयोत्तरविधिबाधसामर्थ्याभावात् ॥ ५. १. ५६. ॥

## व्याघ्रा-ऽऽघ्रे प्राणि-नसोः । ५. १. ५७. ॥

**त० प्र०—'व्याघ्र आघ्रा' इत्येतौ शब्दौ जिघ्रतेर्यथासंख्यं प्राणिनि नासिकायां चार्थे डप्रत्ययान्तौ निपात्येते । विविधमाजिघ्रति-व्याघ्रः प्राणी, आजिघ्रति-आघ्रा नासिका । शस्यापवादः ॥५७॥**

**श० म० न्यासानुसन्धानम्—व्या० । डप्रत्ययान्तौ निपात्येते** इति—यद्यपि डप्रत्ययविधानेनैव विशिष्य विधानसामर्थ्यात् शस्य बाधो भविष्यत्येव तथापि तत्तदुपसर्गविशिष्टाजिघ्रतेस्तत्तदर्थविशेषे प्रयोगनियमार्थं निपातनमाश्रितम् । "घ्रां गन्धोपादाने" विविधमाजिघ्रतीति—**व्याघ्रः प्राणी**, आजिघ्रतीति—**आघ्रा नासिका**, घ्राधातोर्गन्धोपादान एव प्रयोगात् व्याघ्रशब्दार्थस्य जीवस्य न केवलं गन्धग्राहकत्वमपि तु हिंसकत्वमपीति तादृशार्थलाभाया घ्राणे वैविध्यं प्रवृत्तिनिमित्तत्वेनाश्रितम्, सा च विधा विशिष्टः शिङ्घनप्रकारः प्राणवियोगानुकूल एवेति भावः । नासिकायास्तु घ्राणकर्तृत्वं मुख्यमेव । **शस्यापवादः** इति—"घ्रा-ध्मा-पा-ट्धे-दृशः शः" इत्युत्तरसूत्रेणेत्यर्थः, अयमाशयः—"उपसर्गादातो डोऽश्वः" इति विहितेन डप्रत्ययेनैव व्याघ्राघ्रासिद्धौ पुनर्निपातनसामर्थ्यात् परमपि शप्रत्ययमयं बाधते ॥ ५. १. ५७. ॥

## घ्रा-ध्मा-पा-ट्धे-दृशः शः । ५. १. ५८. ॥

**त० प्र०—एभ्यः शः प्रत्ययो भवति । घ्रा—जिघ्रतीति—जिघ्रः, विजिघ्रः, उज्जिघ्रः । ध्मा—धमः, विधमः, उद्धमः । घ्रादिसाहचर्यात् 'पा' इति पिबतेर्ग्रहणं न पातेः—पिबः, निपिबः, उत्पिबः, पायतेस्तु लाक्षणिकत्वान्न भवति । ट्धे—धयः विधयः, उद्धयः । दृश्—पश्यः, विपश्यः, उत्पश्यः । ट्धेष्टकारो ङ्यर्थः—उद्धयी, विधयी । उपसर्गादेवेच्छन्त्यन्ये । शकारः शित्कार्यार्थः ॥ ५८ ॥**

**श० म० न्यासानुसन्धानम्—घ्रा०** । "घ्रां गन्धोपादाने" जिघ्रतीत्यनेन शे "श्रौति०" [ ४. २. १०८. ] इति जिघ्रादेशे—**जिघ्रः**, एवं विजिघ्रतीति—**विजिघ्रः**, उज्जिघ्रतीति—**उज्जिघ्रः** । "ध्मां शब्दाऽग्निसंयोगयोः" धमतीत्यनेन शे "श्रौति०" इति धमादेशे—**धमः**, एवं विधमतीति—**विधमः**, उद्धमतीति—**उद्धमः** । "पां पाने" "पैं शोषणे" "पांक् रक्षणे" इति त्रयाणां पाधातूनामुपलम्भात् कस्येह ग्रहणमिति निर्णेतुमाह—**घ्रादिसाहचर्यात् 'पा' इति पिबतेर्ग्रहणं न पातेरिति**—प्रकृतसूत्रे सर्वे भ्वादय एव गृहीता इति तत्साहचर्यात् भ्वादेरेव पानार्थस्य ग्रहणं *सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्* इति न्यायात्, "पां पाने" पिबतीति शे "श्रौति०" इति पिबादेशे—**पिबः**, एवं निपिबतीति—**निपिबः**, उत्पिबतीति—**उत्पिबः** । ननु भ्वादेः पाधातोर्यदि ग्रहणं तदा "पैं शोषणे" इति पायतेः सन्ध्यक्षरान्तलक्षणे आत्वे कृते लब्धपास्वरूपस्यापि ग्रहणमापद्येत तस्यापि भ्वादित्वादित्याशङ्कायामाह—**पायतेस्तु लाक्षणिकत्वान्न भवतीति**—पैधातोः पारूपत्वं लक्षणसहकारेण लभ्यमिति लाक्षणिकपारूपवतस्तस्य न ग्रहणं भवति, *लाक्षणिकप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्* इति न्यायादित्यर्थः । "ट्धें पाने" धयतीति—**धयः**, एवं विधयतीति—**विधयः**, उद्धयतीति—**उद्धयः** । "दृशृं प्रेक्षणे" पश्यतीति शे "श्रौति०" इति पश्यादेशे—**पश्यः**, एवं विपश्यतीति—**विपश्यः**, उत्पश्यतीति—**उत्पश्यः । ट्धेष्टकारो ङ्यर्थः** इति—टित्त्वफलस्य धातुरूपेऽलाभात् नामरूपत्वे एव तस्य फलमिति स्त्रियाम् "अणञेयेकण्-नञ्-स्नञ्-टिताम्" [ २. ४. २०. ] इति ङीप्रत्यये उद्धयी स्त्रीति भवति, टित्त्वाभावे तु आबेव स्यात् । मतान्तरमाह—**उपसर्गादेवेच्छन्त्यन्ये** इति—ते हि प्रकृतसूत्रे 'उपसर्गात्' इत्यनुवर्तयन्ति, एतच्च बहूनामसम्मतम्, विनाप्युपसर्गं शप्रत्ययान्तानां बहूनामुपलम्भात्, तथा च श्रीहर्षः—"फलानि धूमस्य धयानधोमुखान्" इति नैषधे—१, ८२ । शकारस्य प्रयोगेऽश्रवणात् तस्यानर्थक्यमाशङ्क्याह—**शकारः शित्कार्यार्थः** इति—"श्रौति०" इत्यादिना जिघ्राद्यादेशः शिति प्रत्यये परे भवतीति शित्कार्यं शित्त्वनिमित्तको जिघ्राद्यादेशोऽर्थः प्रयोजनं यस्येति तथाभूत इत्याशय इति ॥ ५. १. ५८. ॥

## साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात् । ५. १. ५६. ॥

**त० प्र०**—एतेभ्य उपसर्गरहितेभ्यो ण्यन्तेभ्यः शः प्रत्ययो भवति । साहि—साहयतीति—साहयः । सातिः सौत्रो धातुः—सातयः । वेदि—वेदयः । उदेजि—उदेजयः । धारि—धारयः । पारि—पारयः । चेति—चेतयः । अनुपसर्गादिति किम् ? प्रसाहयिता । छत्रधार इति परत्वादणेव ॥५६॥

---

**श० म० न्यासानुसन्धानम्**—साहि० । **साहि-साति-वेद्युदेजि-धारि-पारि-चेतेरि**ति समाहारं कृत्वा निर्देशः, नागमस्तु सत्यपि नपुंसकत्वे न कृतः, अनित्यत्वादागमशासनस्य । लाघवाय समाहारनिर्देशेऽपि प्रत्येकं प्रत्ययविधानायेतरेतरयोगेनार्थमाह—**एतेभ्य उपसर्गरहितेभ्य** इति । 'साहि' इत्यादिण्यन्तनिर्देश इत्याह—**ण्यन्तेभ्यः** इति । श इत्यनुवर्तत इत्याह— **शः प्रत्ययो भवती**ति । "षहण् मर्षणे" इति चुरादेः स्वार्थे णिचि "षहि मर्षणे" इति भ्वादेर्वा हेतुमण्णिगन्तात् वा प्रत्यय इत्याह—**साहि-साहयतीति-साहयः** इति—अत्रानेन शे "कर्तर्यनद्भ्यः शव्" [ ३. ४. ७१. ] इति शवि गुणेऽयादेशे "लुगस्या०" [ २. १. ११३. ] इति पूर्वाऽकारलोपे च साहयः, सोढा साहयिता वार्थः । **सातिः सौत्रो धातुरि**ति—सूत्रे एव पठितो न धातुपाठे इत्यर्थः, तस्य च सुखमर्थः, हेतुमण्णिप्रत्ययान्तस्य सूत्रे निर्देशः, सातयतीति—**सातयः**, सुखयितेत्यर्थः । वाऽसरूपन्यायेन शप्रत्ययाभावे क्विपि 'सात्' इति रूपं परमात्मनि प्रयुज्यत इति सिद्धान्तकौमुदीकृत्, यद्यपि क्विप् सामान्यतया धातुमात्राद् विहितः, शस्तु विशिष्य सातेः, तथा च "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्" इति न्यायेन शप्रत्ययेनैव भाव्यमिति 'सात्' इति रूपं दुर्लभम्, तथापि वाऽसरूपविधिर्भवतीति क्विबपि भवति, अत एव सात्वन्तो भक्ता उच्यन्ते, सात् परमात्मा भजनीय एषामित्यर्थात् । "विदिण् चेतनाख्याननिवासेषु" इति चौरादिकात् स्वार्थे णिचि, "विदक् ज्ञाने" "विदिच् सत्तायाम्" "विद्लृंती लाभे" "विदंपी विचारणे" एषामन्यतमात् हेतुमण्णिगि च—'वेदि', वेदयतीति—**वेदयः** । उत्पूर्वात् "एजृ कम्पने" इत्यतः, "एजृङ् दीप्तौ" इत्यतो वा णिगि—उत्-एजि, उदेजयतीति—**उदेजयः** । "धृङ् अविध्वंसने" "धृंग् धारणे" "धृंङ्त् स्थाने" एषामन्यतमात् णिगि 'धारि', चुरादेराकृतिगणात् "धृण्" इत्यतो णिचि वा 'धारि', धारयतीति—**धारयः** । "पारण् कर्मसमाप्तौ" अतो णिचि पारयतीति—**पारयः** । "चितैं संज्ञाने" अतो णिगि—'चेति', "चितिण् संवेदने" अतश्चौरादिके णिचि 'चेति', चेतयते इति—**चेतयः** । पदकृत्यं पृच्छति—**अनुपसर्गादिति किमिति**, उत्तरयति—**प्रसाहयिता** इति—अत्रानुपसर्गत्वाभावान्नास्य प्रवृत्तिः, किन्तु तृच् । **छत्रधार इति परत्वादणेवे**ति—छत्ररूपे कर्मण्युपपदे "कर्मणोऽण्" [५. १. ७२.] इत्यस्यैव परत्वात् प्राप्तिरिति तत्र न श इति भावः । नन्वेवं नैषेधीयकाव्ये—

" मयाऽङ्ग पृष्टः कुलनामनी भवा—
नमू विमुच्यैव किमन्यदुक्तवान् ।
न मह्यमत्रोत्तरधारयस्य किं
ह्रियेऽपि सेयं भवतोऽधमर्णता ॥ ८, ३॥"

इति पद्ये 'उत्तरधारय' इति प्रयोगः कथं संगच्छते परत्वादणैव भाव्यमिति चेत् ? कर्मणोऽविवक्षायामणोऽप्राप्त्या शे कृते उत्तरस्य धारय इति शेषषष्ठ्या समासेन सूपपादत्वात् । श्लोकार्थस्तु—मया-दमयन्त्या, कुलनामनी पृष्टो भवान् अमू विमुच्यैव अन्यद् दिगीशसन्देशादि अप्रस्तुतमेव किमुक्तवान्, अयुक्तमेतद् अपृष्टप्रतिवचनमिति भावः । किञ्चात्र कुलनामविषये प्रश्ने उत्तरधारयस्य भवतोऽधमर्णतेयं किं ह्रियं न जनयति, अवश्यमधमर्णतया ह्रीणेन भवता भाव्यमिति । दमयन्तीप्रेमपवित्रतापरीक्षणार्थमुद्युक्तैरिन्द्रादिदेवैर्दूतत्वेन नियुक्तो नलस्तस्याः समीपं गतः, तया व्यवहारानुसारं परिचयाय कुलनामनी पृष्टः स्वपरिचयवारणाय तदुत्तरमदत्वा देवानां सन्देशमेवोक्तवान्, ततस्तत्रानास्थां प्रकटयन्ती, तदीयपरिचयमेव जिज्ञासमाना सा तं प्रत्युवाचेदमिति सम्बन्धः कथायाः । भूधरादयस्तु "आयुधादिभ्यो धृगोऽदण्डादेः" [५. १. ९४] इत्यत्रादिपदेनाचि सिद्धा वेदितव्याः ॥ ५. १. ५६. ॥

### लिम्प-विन्दः । ५. १. ६०. ॥

**त० प्र०**—**अनुपसर्गाभ्यां लिम्प-विन्दिभ्यां शो भवति । लिम्पतीति—लिम्पः, विन्दतीति—विन्दः । अनुपसर्गादित्येव—प्रलिपः** ॥६०॥

**श० म० न्यासानुसन्धानम्**—**लिम्प०** । "लिपींत् उपदेहे" लिम्पतीति शे मुचादित्वान्ने "म्नां०" [ १. ३. ३९. ] इति नस्य मे—**लिम्पः**, "विद्लृंती लाभे" विन्दतीति शे नागमे च—**विन्दः** । व्यावर्त्यं दर्शयति—**अनुपसर्गादित्येव—प्रलिपः** इति—प्रलिम्पतीति नाम्युपान्त्यलक्षणे के कित्त्वात् उपान्त्यगुणाभावे—प्रलिपः ॥ ५. १. ६०. ॥

### नि-गवादेर्नाम्नि । ५. १. ६१. ॥

**त० प्र०**—**यथासंख्यं निपूर्वात् लिम्पेर्गवादिपूर्वाच्च विन्देर्नाम्नि-संज्ञायां शो भवति । निलिम्पन्तीति—निलिम्पा नाम देवाः । गां विन्दतीति—गोविन्दः, कुविन्दः, अरविन्दः, कुरुविन्दः, उरविन्दः । नाम्नीति किम् ? निलिपः** ॥ ६१ ॥

**श० म० न्यासानुसन्धानम्**—**निगवा०** । द्वन्द्वनिर्दिष्टयोर्धात्वोर्द्वन्द्वनिर्दिष्टे उपपदे प्रत्येकं न सम्बध्येतामित्याशङ्कावारणायाह—**यथासंख्यमि**ति, तदेव स्पष्टयति—**निपूर्वात् लिम्पेरि**त्यादिना । निलिम्पन्तीति शे मुचादित्वान्नागमे नस्य मत्वे—**निलिम्पा नाम देवाः** । गोपत्वात् गां विन्दतीति—**गोविन्दः**, यद्वा वराहरूपेणोद्धारात् गां भुवं विन्दतीति—**गोविन्दः** । कुं विन्दतीति—कुविन्दः । चक्रस्य नाभि-नेम्योरन्तराले स्थितानि काष्ठानि अराः, तत्सादृश्यात् पद्मदलान्यपि अराः, तान् विन्दतीति—**अरविन्दः** कमलम्, अस्य पुंस्त्वमपि पुंस्त्वनिर्देशसामर्थ्यादेव अरविन्दस्य चक्रावयवार्थकत्वम्, राजार्थकत्वं च केचनाहुः । शब्दकल्पद्रुमे तु सारसपक्षिणोऽपि नाम 'अरविन्द' इत्युक्तम् । कुरून् विन्दतीति - **कुरुविन्दः** । उरशब्द उरस्शब्दसमानार्थकः सम्भाव्यते, उरस्शब्दः श्रेष्ठार्थेऽपि, उरं विन्दतीति—**उरविन्दः** । अनुपसर्गादित्यस्यानुवृत्तेर्निपूर्वादप्राप्त एव शः, गवादिपूर्वात् तु "कर्मणोऽण्" [ ५. १. ७२. ] इत्यण् प्राप्तस्तस्य बाधनार्थश्च पृथग् विधिरिति तत्त्वम् । संज्ञायामेवेति नियमार्थकत्वमस्य कैश्चिदुक्तं तन्न युक्तम्, प्राप्ते सत्यारभ्यमाणस्यैव विधेर्नियमार्थकत्वात् । पृच्छति—**नाम्नीति किमि**ति, उत्तरयति—**निलिपः** इति—निलिम्पतीति नाम्युपान्त्यलक्षणे के निलिप इति यौगिकोऽयं शब्दो न संज्ञा ॥५. १. ६१.॥

### वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः । ५.१.६२. ॥

**त० प्र०**—**ज्वलादेर्गणात् दु-नी-भू-ग्रहिभ्य आङ्पूर्वाच्च स्रवतेरनुपसर्गाण्णो वा भवति । वहिपर्यन्ता ज्वलादयो वृत्करणात् । ज्वलः, ज्वालः । चलः, चालः । 'निपातः, उत्क्रोशः' इति बहुलाधिकारात् । दवः, दावः । नयः, नायः । दुनीभ्यां नित्यमेवेत्येके । भव, भावः । व्यवस्थितविभाषेयम्, तेन-ग्राहो मकरादिः, ग्रहः सूर्यादिः । आस्रवः, आस्रावः । अनुपसर्गादित्येव—प्रज्वलः, प्रदवः, प्रणयः, प्रभवः, प्रग्रहः, प्रस्रवः । १ ज्वल, २ कुच, ३ पत्लृ, ४ पथे, ५ क्वथे, ६ मथे, ७ षद्लृं, ८ शद्लृं, ९ बुध, १० टुवमू, ११ भ्रमू, १२ क्षर, १३ चल, १४ जल, १५ टल, १६ ट्वल, १७ ष्ठल, १८ हल, १९ णल, २० बल, २१ पुल, २२ कुल, २३ पल, २४ फल, २५ शल, २६ हुल, २७ कुशं, २८ कस, २९ रुहं, ३० रमि, ३१ षहि वृत् इति ज्वलादिः** ॥ ६२ ॥

**श० म० न्यासानुसन्धानम्**—**वा ज्वलादि०** । 'ज्वलादि' इत्येतावता पूर्वावधिपरिज्ञानेऽपि परावधेरज्ञानात् कियत्पर्यन्तं धातवो ज्वलादिपदेन ग्राह्या इत्यनिश्चयप्राप्तावाह—**वहिपर्यन्ता ज्वलादयः** इति, एतदवधिग्रहणे विनिगमकाभावशङ्कायामाह—**वृत्करणादि**ति—'वृत्'शब्दः समाप्तिसूचक इति वृत्करणेन सोऽवधिर्ज्वलादीनां ज्ञायत इति भावः । "ज्वल दीप्तौ" ज्वलतीति अनेन वा णे पक्षेऽचि च रूपद्वयं भवति, तत्राचि—**ज्वलः**, णे तूपान्त्यवृद्धौ—**ज्वालः** । एवं "चल कम्पने" इत्यस्य—**चलः, चालः** । "पत्लृ गतौ" "क्रुशं रोदनाह्वानयोः" अनयोः 'निपातः, उत्क्रोशः' इति इति न भवितुमर्हति 'अनुपसर्गात्' इत्यनुवृत्तेः सोपसर्गादप्राप्तेरिति चेत् ? **'निपातः, उत्क्रोशः' इति बहुलाधिकारादि**ति, तथा च बाहुलकेनात्र सोपसर्गादपि भवतीति भावः ।

उपसर्गाभावे तु णे **पातो** राहुः, पक्षेऽचि **पतः** पक्षी। णे **क्रोशः**, पक्षे नाम्युपान्त्यलक्षणे के—**क्रुशः**। उत्क्रोशः कुररः। "द्रुं गतौ" "टुदुंट् उपतापे" दवति दुनोति वेति अचि—**दवः**, णे—**दावः**। "णींग् प्रापणे" नयतीति—**नयः नायः**। अत्र मतान्तरमाह—**दु-नीभ्यां नित्यमेवेत्येके**। "भू सत्तायाम्" भवतीति—**भवः, भावः**। ग्रहधातोर्णस्य विकल्पेन विधानात् 'ग्राह-ग्रह-शब्दयोरेकार्थत्वमेव युक्तम्, एवं च कस्मिंश्चिदर्थे ग्राहस्यैव प्रयोगः कुत्रचिच्च ग्रहस्येवेति व्यवस्था कथमुपपद्यत इत्याह—**व्यवस्थितविभाषेयमिति**—विविधा प्रयोगानुसारिणी अवस्था संजाता यस्यास्तादृशी विभाषेत्यर्थः, तेन जलचरे मकरादौ नित्यं णः, सूर्यादिज्योतिषि चाच् प्रत्यय एवेति व्यवस्था ज्ञातव्येति भावः। "स्रुं गतौ" आस्रवतीति—**आस्रवः, आस्रावः**। व्यावर्त्यं दर्शयति—**अनुपसर्गादित्येव—प्रज्वलः** इत्यादि–एषु णो न भवति, किन्तु अजेव। ज्वलादिगणं पठति—**ज्वल, कुच,** इत्यादि। अथ ज्वलादयो यजादेः प्राक् षद्लृं-शद्लृं-कुशं-रुहं-रमिवर्जाः सेटश्च वर्णक्रमेण निर्दिश्यन्ते, तत्रापि पूर्वाचार्यानुरोधेन पूर्वं "ज्वल दीप्तौ" णे ज्वालः, पक्षेऽचि ज्वलः। "कुच संपर्चन-कौटिल्य-प्रतिष्टम्भ-विलेखनेषु" संपर्चनं मिश्रणता, प्रतिष्टम्भो रोधनम्, विलेखनं कर्षणम्, णे—कोचः, पक्षे के—कुचः। "पत्लृ पथे गतौ" पतः, पातः, पाथः, पथः। "क्वथे निष्पाके" क्वाथः, क्वथः। "मथे विलोडने" माथः, मथः। "षद्लृं विशरण-गत्यवसादनेषु" विशरणं शटनम्, अवसादोऽनुत्साहः. सादः, सदः, बाहुलकात् सोपसर्गादपि—विषादः, निषादः। "शद्लृं शातने" शातनं तनूकरणम्, णे—शादस्तृणपङ्क्तौ, अचि—शदः शटितः, क्षत्रियापशदः, विशदः। "बुध अवगमने" अवगमनं ज्ञापनम्, बोधः, बुधः। "टुवमू उद्गिरणे" उद्गिरणं भुक्तस्योर्ध्वगतिः, णे "मोऽकमि०" इत्यत्र वमेर्वर्जनाद् वृद्धिप्रतिषेधाभावे—वामः, पक्षेऽचि—वमः। एवं "भ्रमू चलने" भ्रामः, भ्रमः। "क्षर संचलने" सकर्मकश्चायमकर्मकश्च, क्षारः, क्षरः। "चल कम्पने" चालः, चलः। "जल घात्ये" घात्यं जडत्वमतैक्ष्ण्यम्, जालं, जलम्। डलयोरैक्यमिति जडः। व्यवस्थितविभाषात्वाद् भिन्नेऽर्थे प्रत्ययौ। "टल ट्वल वैक्लव्ये" विक्लव एव वैक्लव्यम्, टालः, टलः, ट्वालः, ट्वलः। "ष्ठल स्थाने" स्थालम्, स्थलम्। "हल विलेखने" विलेखनं कर्षणम्, णे—हालः, हाला सुरा, अचि—हलं हलाहलम्। "णल गन्धे" गन्धोऽर्दनम्, नालं नलम्। "बल प्राणन-धान्यावरोधयोः" प्राणनं जीवनम्, धान्यमवरुध्यते यत्रेति धान्यावरोधः कुसूलः, बालः, बलः। "पुल महत्त्वे" णे—पोलः, के—पुलः। "कुल बन्धुसंस्त्यानयोः" संस्त्यानं संघातः, णे-कोलः, के—कुलम्। "पल फल शल गतौ" णे—पालः, अचि—पलं मांसम्; णे—फालः, अचि—फलम्; णे—शालः, अचि—शलं श्वाविद्रोम। "हुल हिंसासंवरणयोश्च" चकाराद् गतौ, णे—होलः, के—हुलः। "क्रुशं आह्वान-रोदनयोः" णे—क्रोशः, बाहुलकात् सोपसर्गादपि णे—उत्क्रोशः कुररः, के—क्रुशः। "कस गतौ" कासः, कसः। "रुहं जन्मनि" णे—रोहः, के—रुहो मृगः। "रमिं क्रीडायाम्" रामः, रमः। "षहि मर्षणे" साहः, सहः। वृत् ज्वलादिः। ज्वलादयो वृत्ताः समाप्ता इत्यर्थः॥ ५. १. ६२.॥

## अवहृ-सा-संस्रोः ।५. १. ६३.॥

**त० प्र०—अवपूर्वाभ्यां हृ-साभ्यां संपूर्वाच्च स्रवतेर्णः प्रत्ययो भवति। अवहारः, अवसायः, संस्रावः। संस्रव इत्यपि कश्चित्॥६३॥**

**श० म० न्यासानुसन्धानम्—अव०**। अवहरतीति णे वृद्धावारादेशे—**अवहारो** ग्राहः। "षोंच् अन्तकर्मणि" अन्तकर्म विनाशः, अवस्यतीति णे "आत ऐः कृञ्णौ" [ ४. ३. ५३. ] इत्याकारस्य ऐकारे आयादेशे च—**अवसायः**। "स्रुं गतौ" संस्रवतीति णे वृद्धावावादेशे च—**संस्रावः**। मतान्तरमाह—**संस्रव इत्यपि कश्चि**दिति॥ ५. १. ६३.॥

## तन्-व्यधीण्-श्वसातः। ५. १. ६४.॥

**त० प्र०—'तन् व्यधि इण् श्वस्' इत्येतेभ्य आदन्तेभ्यश्च धातुभ्यो णः प्रत्ययो भवति। तानः, उत्तानः, अवतानः। व्याधः, प्रत्यायः, अत्यायः, अन्तरायः। अतिपूर्वादिवेण इत्येके। श्वासः, आश्वासः। आदन्त—अवश्यायः, प्रतिश्यायः; ग्लायः, म्लायः। कथं ददः, धः? ददि-दध्योरचा सिद्धम्॥६४॥**

**शं० म० न्यासानुसन्धानम्—तन्०** । "तनूयी विस्तारे" तनोतीति णे उपान्त्यवृद्धौ—**तानः**, एवम्—उत्तनोतीति—**उत्तानः**, अवतनोतीति—**अवतानः** । "व्यधंच् ताडने" विध्यतीति—**व्याधः** । "इंण्क् गतौ" प्रत्येतीति णे वृद्धावायादेशे च—**प्रत्यायः**, एवम्—अत्येतीति—**अत्यायः**, अन्तरा एतीति—**अन्तरायः** । मतान्तरमाह—**अतिपूर्वादिणेव इत्येके** इति—एतच्च पाणिनीयमतम् । "श्वसक् प्राणने" श्वसितीति—**श्वासः**, एवम्—आश्वसितीति—**आश्वासः** । आकारान्तमुदाहर्तुमवतारयति—**आदन्तेति** । "श्यैंङ् गतौ" सन्ध्यक्षरान्तलक्षणे आकारे आकारान्तत्वम्, अवश्यायते इति णे आकारस्य ऐकारे आयादेशे च—**अवश्यायः**, एवं—प्रतिश्यायते इति—**प्रतिश्यायः** पीनसः । "ग्लैं हर्षक्षये" इह हर्षक्षयो धात्वपचयः, ग्लायतीति—**ग्लायः** । "म्लैं गात्रविनामे" विनामः कान्तिक्षयः, म्लायतीति—**म्लायः** । आदन्तेभ्यो णस्य विधानेन ददातेर्दधातेश्च 'दायः, धायः' इत्येव प्रयोगो न्याय्यो न तु 'ददः, दधः' इत्याशङ्कते—**कथं ददः, दधः,** ? इति, समाधत्ते—**ददि-दध्योरचा सिद्धमिति**—"ददि दाने" इत्यस्य ददते इत्यचि—ददः, "दधि धारणे" इत्यस्य दधते इत्यचि—दध इति च सिध्यति, नायं प्रयोगो ददातेर्दधातेश्चेति भावः ॥ ५, १. ६४. ॥

## नृत्-खन्-रञ्जः शिल्पिन्यकट् । ५. १. ६५. ॥

**त० प्र०—नृति-खनि-रञ्जिभ्यः शिल्पिनि कर्तर्यकट् प्रत्ययो भवति । शिल्पं कर्मकौशलम्, तद्वान् शिल्पी । नर्तकः, नर्तकी; खनकः, खनकी; रजकः, रजकी । शिल्पिनीति किम् ? नर्तिका, खानकः रञ्जकः । टकारो ङ्यर्थः ॥६५॥**

**शं० म० न्यासानुसन्धानम्—नृत्०** । शिल्पिनि कर्तरीत्यनेनोपाधित्वं दर्शयन् उपपदत्वमपाकरोति । शिल्पिनीति पदेनोक्तं विषयं स्पष्टयति—**शिल्पं कर्मकौशलमिति**—प्रायः प्रयत्ने कृते सति नर्तनादिकं सर्वो जनः करोत्येव, किन्तु य एव तत्कर्मकौशलेन साधारणजनापेक्षया नैपुण्येन विदधाति स एव नर्तक इत्युच्यते, स्पष्टं च तत्र प्रतीयते तस्य कौशलम्, तादृशकौशलवानेव शिल्पीत्याह—**तद्वान् शिल्पीति** । "नृतैच् नर्तने" नृत्यतीति अकटि उपान्त्यगुणे—**नर्तकः** । यद्यपि सामान्यतः कर्तरि विहितेन णकप्रत्ययेनापि नर्तक इति रूपं सेत्स्यत्येव, परंतु स्त्रियां विशेषो भवतीति प्रतिपादयितुं स्त्रीलिङ्गे रूपमाह—**नर्तकीति**—अत्राकटि कृते टित्वात् ङीर्भवति, णके कृते तु ङीर्न स्यादिति 'नर्तिका' इत्येव स्यादिति भावः । "खनूग् अवदारणे" खनतीति पुमान्—**खनकः**, स्त्री—**खनकी** । "रञ्जीं रागे" रजतीति पुमान्—**रजकः**, स्त्री—**रजकी**, "अकट्-घिनोश्च रञ्जेः" [ ४. २. ५०. ] इति अकारस्थानिनो नस्य लोपः । पदकृत्यं पृच्छति—**शिल्पिनीति किमिति**, उत्तरयति—**नर्तिकेति**—अशिल्पिनि पुंसि णकेऽपि रूपसाम्यमिति स्त्रियां प्रत्युदाहृतम्, यथाकथञ्चित् नृत्यतीति णके उपान्त्यगुणे "अस्यायत्तत्०" [ २. ४. १११. ] इत्याकारस्य इकारे—नर्तिका, अत्रावेव भवति न तु ङीः । खनतीति णके उपान्त्यगुणे—**खानकः**, रजतीति णके नलोपाभावे—**रञ्जकः** । टकारस्य प्रयोगेऽश्रवणात् तद्वैयर्थ्यमाशङ्क्याह—**टकारो ङ्यर्थः** इति—टित्त्वे सति स्त्रियाम् "अणजे०" [ २. ४. २०. ] इति ङीर्भवतीति तदर्थं टकारः ॥ ५. १. ६५. ॥

## गस्थकः । ५. १. ६६. ॥

**त० प्र०—गायतेः शिल्पिनि कर्तरि थकः प्रत्ययो भवति । गाथकः । गाङः प्रत्यये शिल्पी न गम्यत इति गायतेर्ग्रहणम् ॥६६॥**

**शं० म० न्यासानुसन्धानम्—गस्थकः** । "गैं शब्दे" इति शब्दार्थस्य **'गै'** इत्यस्य कृतात्वस्य "गांङ् गतौ" इति गत्यर्थस्य गाङश्च 'गः' इति निर्देशः सम्भवतीत्युभयोरिह ग्रहणप्राप्तावाह—**गायतेरिति** । गायति गानशिल्पी भवतीति—**गाथकः** । ननु *गा-मा-दाग्रहणेष्वविशेषः* इति न्यायेन "गैं शब्दे" "गांङ् गतौ" इत्युभयोरपि ग्रहणमुचितमिति चेत् ? अत्राह—**गाङः प्रत्यये शिल्पी न गम्यत इति गायतेर्ग्रहणमिति**—शिल्पिन्यर्थेऽस्य विधानात् गत्यर्थात् परस्य थकस्य शिल्पिनमभिधातुमसमर्थतया लक्ष्यानुरोधादिह शब्दार्थकस्य गायतेरेव ग्रहणमिति भावः ॥ ५. १. ६६. ॥

## टनण् । ५. १. ६७. ॥

**त० प्र०—गायतेः शिल्पिनि कर्तरि टनण् प्रत्ययो भवति । गायनः, गायनी । टकारो ङ्यर्थः । णकार ऐकारार्थः । योगविभाग उत्तरार्थः । एतौ प्रत्ययावशिल्पिन्यपीत्येके ॥६७॥**

**श० म० न्यासानुसन्धानम्—टनण्** । अत्रापि पूर्ववत् शब्दार्थकस्यैव ग्रहणमित्याह—**गायतेरिति** । गायति गानशिल्पो भवतीति टनणि "आतः ऐ:०" [ ४. ३. ५३. ] इति सन्ध्यक्षरस्य कृताकारस्य ऐकारे आयादेशे च पुंसि—**गायनः**, स्त्रियां तु टित्वात् अणञे०" [ २. ४. २०. ] इति ङ्यां—**गायनी** । अनुबन्धप्रयोजनमाह—**टकारो ङ्यर्थः** इति—"अणञे०" इत्यनेन ङीप्रत्ययविधानार्थः, टित्त्वाभावे तु आबेव स्यादित्यर्थः । तथा च पुंसि प्रयोजनाभावेऽपि स्त्रियां तस्य प्रयोजनमिति भावः । **णकार ऐकारार्थः** इति—"आत ऐ:०" इत्यनेन आकारस्य ऐविधानार्थः, णित्त्वाभावे तु ऐर्न स्यादित्यर्थः । 'थक-टनण्'प्रत्यययोर्गायतेरेव विधानादेकत्रैव पाठो युक्त इत्याशङ्कायामाह—**योगविभाग उत्तरार्थं** इति—उत्तरसूत्रे टनण एवानुवृत्तिरभीष्टा, सा यथा स्यादित्यर्थ इति भावः, सह निर्देशे हि उभयोः प्रत्यययोः सहैव प्रवृत्ति-निवृत्ती स्यातामित्यभिप्रायः । मतान्तरमाह—**एतौ प्रत्ययावशिल्पिन्यपीत्येके** इति—एतच्च पाणिनीये न दृश्यते, युक्तं चैतत्, शिल्पिविषयत्वादेव गायतेरिह ग्रहणमित्युक्तम्, अन्यथोभयोर्ग्रहणस्य *गा-मा-दाग्रहणेष्वविशेषः* इति न्यायेन दुर्वारत्वापत्तेः । न चेष्टापत्तिः कर्तुं शक्या, गच्छन्नपि गाथकः कथ्येत, न चैतद् दृश्यते, न च प्रयोगस्वभावविरुद्धमर्थं शास्त्रमभिधास्यति । न चास्तु गायतेरेव ग्रहणं शिल्पिनीति माऽस्तु, प्रयोगस्वभावाच्च गानकर्तैवोच्येतेति वाच्यम्, विनिगमके स्थिते तमपहाय प्रयोगस्वाभाव्यादिक्लिष्टकल्पनाश्रयणस्यानौचित्यात् । तथा च शिल्पिनीत्यस्यानुवृत्तिरुचितैवेति न्याय्यमिति ॥ ५. १. ६७. ॥

## हः काल-व्रीह्योः । ५. १. ६८. ॥

**त० प्र०—जहातेर्जिहीतेर्वा कालव्रीह्योः कर्त्रोष्टनण् प्रत्ययो भवति । जहाति जिहीते वा भावान्—हायनः संवत्सरः, जहत्युदकं दूरोत्थानात् जिहते वा द्रुतं—हायना नाम व्रीहयः । काल-व्रीह्योरिति किम् ? हाता ॥६८॥**

**श० म० न्यासानुसन्धानम्—हः०** । "ओहांक् त्यागे" "ओहाङ्क् गतौ" इत्युभयोः 'हः' इति निर्देशः सम्भवतीत्युभयोरिह ग्रहणमित्याह—**जहातेर्जिहीतेर्वेति** । **काल-व्रीह्योः कर्त्रोरिति**—एतेन व्रीहिकालयोः प्रत्ययार्थविशेषणत्वं दर्शयति, उपपदत्वं तु निरस्यति । **जहाति जिहीते वा भावानिति**—भावाः पदार्थाः, तान् त्यजति प्राप्नोति वा, संवत्सरे हि केचन पदार्था नश्यन्ति, तान् स त्यजतीव, केचनोत्पद्यन्ते, तान् प्राप्नोतीवेति सार्थकत्वं तस्य । व्रीह्यर्थे व्युत्पादयति—**जहत्युदकमिति**, व्रीहीणामचेतनत्वादुदकहानाप्रसङ्गादाह—**दूरोत्थानादिति**—सद्य एव जलादूर्ध्वमुत्तिष्ठन्तीति जलत्याग इव क्रियते तैः, गत्यर्थकस्य व्युत्पत्तिमाह—**जिहिते वा द्रुतमिति**—शीघ्रवृद्धिरेव तेषां द्रुतगतिरिति भवत्यर्थसंगतिरिति । पदप्रयोजनं पृच्छति—**काल-व्रीह्योरिति किमिति**, उत्तरयति—**हातेति**, अत्र तृच्प्रत्ययः ॥ ५. १. ६८. ॥

## प्रु-सृ-ल्वोऽकः साधौ । ५. १. ६९. ॥

**त० प्र०—'प्रु सृ लू' इत्येतेभ्यो धातुभ्यः साधुत्वविशिष्टेऽर्थे वर्तमानेभ्योऽकः प्रत्ययो भवति । साधु प्रवते इति—प्रवकः, एवं—सरकः, लवकः । साधाविति किम् ? प्रावकः, सारकः, लावकः ॥ ६९ ॥**

**श० म० न्यासानुसन्धानम्—प्रु०** । **'साधौ'** इत्यस्य प्रकृत्यर्थविशेषणत्वमित्याह—**धातुभ्यः—साधुत्वविशिष्टेऽर्थे वर्तमानेभ्यः** इति—साधुत्वं क्रियाविशेषणमिह, न तु प्रत्ययार्थत्वं तस्येत्यर्थः । "प्रुङ् गतौ" साधु प्रवते इत्यनेनाके गुणेऽवादेशे च—**प्रवकः**, **'साधु'** इत्यस्य क्रियाविशेषणत्वात् क्लीबत्वं द्वितीया च । अतिदिशति—**एवमिति**, "सृ गतौ" साधु सरतीति—**सरकः** । "लूञ् छेदने" साधु लुनातीति—**लवकः** । पदकृत्यं पृच्छति—**साधाविति किमिति**, उत्तरयति—

**प्रावकः** इति—यथाकथञ्चित् प्रवते इति णके वृद्धावावादेशे च—प्रावकः, साधुत्वाभावान्नात्राकप्रत्ययः, एवं—यथाकथञ्चित् सरति लुनातीति णके—**सारकः**, **लावकः** इति ॥ ५. १. ६९. ॥

## आशिष्यकन् । ५. १. ७०. ॥

**त० प्र०—इष्टस्य प्रार्थनमाशीः, तस्यां गम्यमानायां धातोरकन् प्रत्ययो भवति । जीवतादित्याशास्यमानो जीवकः, एवं-नन्दकः, भवकः । आशिषीति किम्? जीविका, नन्दिका । भाविका । नकार "इच्चापुंसोऽनित्क्याप्परे" [ २. ४. १०७. ] इत्यत्र व्युदासार्थः, तेन-जीवका, नन्दका, भवका ॥७०॥**

**श० म० न्यासानुसन्धानम्—आशि०** । आशीरर्थं ग्राहयति—**इष्टस्य प्रार्थनमाशीरिति** अप्राप्तस्याभिलषितस्य प्रार्थनमित्यर्थः । सा चेयमाशीः प्रयोक्तृधर्मः, नासौ प्रत्ययार्थो भवितुमर्हतीत्याशयेनाह—**तस्यां गम्यमानायामिति**—न तु वाच्यायां "कर्तरि" [ ५. १. ३. ] इति कर्तुरेव प्रत्ययान्तवाच्यत्वात् । तथा च धातोरेव तत्र वृत्तिरित्यर्थः, कर्ता च तस्या विषयतया प्रतीयते । **धातोरिति**—धातुसामान्यविवक्षितत्वात् प्रसूत्वां च निवर्तितत्वात्, अन्यस्य चेह धातुविशेषस्यानाश्रयणाच्च धातुमात्रादित्यर्थः । "जीव प्राणधारणे" जीवतादित्याशास्यमानो—**जीवकः** इति—आशास्यमानजीवनक्रियाकर्तेत्यर्थः । अतिदिशति—**एवमिति**, "टुनदु समृद्धौ" नन्दतादित्याशास्यमानः—**नन्दकः** इति—आशास्यमाननन्दनक्रियाकर्तेत्यर्थः । "भू सत्तायाम्" भवतादित्याशास्यमानः—**भवकः** इति—आशास्यमानभवनक्रियाकर्तेत्यर्थः । जीवनक्रियाया नन्दनक्रियाया भवनक्रियायाश्च कर्ता भवेदित्येवमाशास्यते, जीवनं नन्दनं भवनं च ते भूयादिति निर्गलितार्थः । पदकृत्यं पृच्छति—**आशिषीति किमिति**, अकनि णके वा पुंसि रूपसाम्यात् स्त्रियां प्रत्युदाहरति—**जीविकेति**—या जीवति सा जीविका, अत्र णके अपि "अस्यायत्०" [ २. ४. १११. ] इत्यस्य इकारो विज्ञेयः, अकनो नित्त्वात् तस्मिन् कृते तु इत्वं न भवति, एवं या नन्दति सा—**नन्दिका** । या भवति सा—**भाविका**, अत्र णके वृद्धावावादेशे अपि चेकारे भाविका, अत्र पुंस्यपि विशेषो भवति, तथाहि—पुंसि अकनि—भवक इति, णके तु भावक इति रूपभेदात् । पूर्वसूत्राद् 'अक' इत्यस्यानुवृत्त्यैव सिद्धेऽत्र सूत्रे प्रत्ययोच्चारणमनुबन्ध'न'कारासञ्ज्ञनार्थम्, तस्य प्रयोगेऽश्रूयमाणत्वाद् वैयर्थ्यमाशङ्क्याह—**नकार "इच्चापुंसोऽनित्क्याप्परे" इत्यत्र व्युदासार्थः** इति—उक्त सूत्रे 'अनित्क्याप्परे' इति निर्दिष्टम्, तदनुवृत्तिः "अस्यायत्०" [ २. ४. १११. ] इति सूत्रे आयाति, तदर्थश्च—आबेव परो यस्मात् तादृशे, अनितः प्रत्ययस्यावयवे के परे यदादिवर्जितस्यात इर्भवतीति, अथ प्रकृतसूत्रे प्रत्ययस्य नित्करणेन तस्य तत्राग्रहाद् भवति व्युदासः । तत्फलमाह—**तेनेति**, जीवतात् नन्दतात् भवतादित्याशास्यमाना—**जीवका, नन्दका, भवकेति**—तथा च पुंसि विशेषाभावेऽपि स्त्रियां विशेषस्य सत्त्वेन नकारस्यावश्यकत्वमिति भावः ॥ ५. १. ७०. ॥

## तिक् कृतौ नाम्नि । ५. १. ७१. ॥

**त० प्र०—आशिषि विषये संज्ञायां गम्यमानायां धातोस्तिक् कृतश्च सर्वे प्रत्यया भवन्ति । शम्यात्—शान्तिः, तन्यात्-तन्तिः, सन्यात्-सन्तिः, रमतामित्येवमाशंसितः-रन्तिः । कृत्-वीरो भूयादिति—वीरभूः, मित्रभूः, क्विप् । अग्निरस्य भूयात्-अग्निभूतिः, देवभूतिः, अश्वभूतिः, सोमभूतिः । कुमारोऽस्य दुरितानि नयतामित्याशंसितः—कुमारनीतिः, मित्रमेनं वर्द्धिषीष्ट—मित्रवृद्धिः, क्तिः । देवा एनं देयासुर्देवदत्तः, यज्ञदत्तः, विष्णुरेनं श्रूयादिति—विष्णुश्रुतः, क्तः । शर्व एनं वृषीष्ट—शर्ववर्मा, मन् । गङ्गा एनं मिद्यात्—गङ्गामित्रः, त्रक् । वर्धिषीष्ट—वर्धमानः ॥७१॥**

**श० म० न्यासानुसन्धानम्—तिक०** । "शमूच् उपशमे" शम्यादित्याशास्यमान इति—**शान्तिः**, अत्र तिकि "तेर्ग्रहादिभ्यः" [ ४. ४. ३२. ] इति नियमादिडभावे "अहन्पञ्चमस्य०" [ ४. १. १०७. ] इति दीर्घे "म्नां०" इति मस्य नकारे च—शान्तिः, "तनूयी विस्तारे" तन्यादित्याशास्यमान इति तिकि "न तिकि दीर्घश्च" [ ४. २. ५९. ] इति दीर्घ-नलुकोरभावे—

**तन्तिस्**तन्त्रीः। एवं—"णशूयी दाने" सन्यादित्याशास्यमानः—**सन्तिः**। "रमिं क्रीडायाम्" रमतामित्येवमाशंसित इति तिकि—**रन्तिः**। विहितेषु कृत्प्रत्ययेषु तिकोऽभावात् पृथगुपादनम्, अन्यथा कृतैव तद्ग्रहणं स्यादिति तदुपादानमनर्थकं स्यात्। तिकमुदाहृत्य कृतमुदाहर्तुमवतारयति—**कृत्** इति। "भू सत्तायाम्" वीरो भूयादित्याशास्यमानः—**वीरभूरिति** मित्रं भूयादित्याशास्यमानः—**मित्रभूरिति**, उभयत्र कः प्रत्यय इति जिज्ञासायामाह—**क्विप्** इति। अग्निरस्य भूयादित्याशास्यमानः—**अग्निभूतिः**, एवं—देवोऽश्वः सोमो वाऽस्य भूयादित्याशास्यमान इति—**देवभूतिः, अश्वभूतिः, सोमभूतिरिति**। "णींग् प्रापणे" कुमारोऽस्य दुरितानि नयतामित्याशंसित इति—**कुमारनीतिः**, "वृधूङ् वृद्धौ" मित्रमेनं वर्धिषीष्टेति—**मित्रवृद्धिः**। एषु कः प्रत्यय इत्याकाङ्क्षायामाह—**क्तिरिति**। "दांम् दाने" देवा एनं देयासुरिति—**देवदत्तः**, यज्ञ एनं देयादिति—**यज्ञदत्तः**, "श्रुंट् श्रवणे" विष्णुरेनं श्रूयादिति—**विष्णुश्रुतः**, एषु विहितं प्रत्ययमाह—**क्तः**, इति। "वृगट् वरणे" शर्व एनं वृषीष्टेति—**शर्ववर्मा**, कः प्रयय इत्याह—**मन्** इति। "ञिमिदाच् स्नेहने" गङ्गा एनं मिद्यादिति—**गङ्गामित्रः**, विहितं प्रत्ययमाह—**त्रक्** इति। वर्धिषीष्टेति - **वर्धमानः**, अत्रानशि शवि मागमः। अत्रेत्थं लघुन्यासे - "**वीरभूरिति**—**वीरादेः** शब्दात् भवत्यादेर्धातोः प्रत्ययविधिः तनो यद्यपि साक्षाद् ङस्युक्तता नास्ति तथापि संज्ञायां प्रत्ययविधानात् सूचितेति "ङस्युक्तं०" [ ३. १. ४९. ] इति सः, "नाम नाम्ना०" [ ३. १. १८. ] इति वा" ॥५. १. ७१.॥

## कर्मणोऽण् । ५. १. ७२. ॥

**त० प्र—निर्वर्त्य-विकार्य-प्राप्यरूपात् कर्मणः परस्माद्धातोरण् प्रत्ययो भवति। अजाद्यपवादः। निर्वर्त्यात्—कुम्भकारः, नगरकारः। विकार्यात्—काण्डलावः शरलावः। प्राप्यात्—वेदाध्यायः, चर्चापारः, भारहारः, सूत्रधारः, भारवाहः, द्वारपालः, उष्ट्रप्रणायः, कमण्डलुग्राहः। 'आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छति' इत्यादौ प्राप्यात् कर्मणोऽनभिधानान्न भवति, महान्तं घटं करोतीति सापेक्षत्वात्, अनभिधानाच्च। तथा च बहुलाधिकारः। निर्वर्त्य-विकार्याभ्यामपि क्वचिन्न भवति—संयोगं जनयति, स्रजं विरचयति, वृक्षं छिनत्ति, कन्थां मण्डयति। णकारो वृद्ध्यर्थः ॥७२॥**

**श० म० न्यासानुसन्धानम्—कर्म०। कर्मण** इति न स्वरूपग्रहणं * स्वं रूपं शब्दस्याशब्दसंज्ञा * इत्यत्र 'अशब्दसंज्ञा' इति प्रतिषेधात्। यदि च कर्मप्रदेशेषु स्वरूपमेव गृह्यते तदा संज्ञाविधानमनर्थकं स्यात्। नापि क्रियाग्रहणम्, तस्य हि ग्रहणे 'कर्त्रभिप्रायः' इति निर्देशो नोपपद्यते, क्रियाकर्मणो हि क्रियावाचिन्युपपदे प्रत्ययेन भवितव्यम्, न चेह क्रियावाच्युपपदमस्ति, तस्माद् "कर्तुर्व्याप्यं कर्म" इति कर्म गृह्यते। कर्मणस्त्रिविधत्वेन बहुवचननिर्देश उचितः, तथा सति च संज्ञिपरत्वमपि संभाव्येत। एकवचननिर्देशे च त्रिविधस्यापि कर्मणो जातिविवक्षया परिग्रह इत्याशयवानाह—**निर्वर्त्य-विकार्य-प्राप्यरूपात् कर्मणः** इति। निर्वर्त्यकर्मणश्च लक्षणमित्थमुक्तं भर्तृहरिणा—

"सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते॥" इति।

अस्यान्वयः—यस्य सती परिणामिनी प्रकृतिर्नाश्रीयते, यस्य चाविद्यमाना प्रकृतिर्नाश्रीयते तस्य [ कर्मणः ] निर्वर्त्यत्वं प्रचक्षत इति। अयमाशयः—यस्योपादानकारणं नास्ति, यस्य वा सदप्युपादानकारणं न विवक्ष्यते तदुभयं निर्वर्त्यं कर्मेति। आद्ये यथा संयोगं करोतीति, द्रव्यरूपकार्ये एवोपादान[ समवायि ]कारणनैयत्यादिह कर्मणि संयोगे तदभावस्य स्वाभाविकत्वम्। द्वितीये यथा घटं करोतीति, अत्र कार्यस्य घटस्य द्रव्यरूपतयोपादानकारणमवश्यमेव मन्तव्यम्, तच्च न विवक्ष्यते, विवक्षायां हि तत् कार्यसामानाधिकरण्येन प्रतीयते, यथा मृदं घटं करोतीति। प्रकृते च तस्याविवक्षायां घटं करोतीत्यस्य निर्वर्त्यकर्मत्वमेव। यदा तूपादानकारणमेव परिणामित्वेन कार्यसामानाधिकरण्येन विवक्ष्यते तदा तत् विकार्यं कर्म, यथा पूर्वोक्तं मृदं घटं करोतीति। अत्रावस्थाद्वयानुगमेन पूर्वाकारपरित्यागेनाकारान्तरप्राप्त्यवगमः। यदि च कार्येण सह कारणस्य वैयधिकरण्यं विवक्ष्यते तदा चोपादानकारणविवक्षायामपि निर्वर्त्यत्वमेवेति मृदा घटं करोतीति प्रयोगः, एतच्च करणत्वविवक्षायां बोध्यम्।

सम्बन्धसामान्यविवक्षायां मृदो घटं करोतीत्यपि प्रयोगः। एतच्च [ विकार्यं ] कर्म द्विविधम्, तदुक्तम्—

"प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् ।
किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥"

इति ।

अयमाशयः—यत्र कारणगतरूपस्य सर्वात्मना परित्यागस्तदेकम्, यत्र कारणगतरूपेण सह गुणान्तरोत्पत्तिर्विवक्ष्यते तद् द्वितीयम् । आद्यस्य काष्ठं भस्म करोतीत्युदाहरणम्, द्वितीयस्य सुवर्णं कुण्डलं करोतीति, आद्ये समवायिकारणस्य सर्वथोच्छेद एव प्रतीयते, अन्त्ये च न तथेति भेदः स्पष्टः । प्राप्यस्य कर्मणो लक्षणमित्थमुक्तं तेनैव—

"क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद् वा तत् प्राप्यमिति कथ्यते ॥" इति ।

यत्र दर्शनात् [ प्रत्यक्षात् ] अनुमानाद् वा क्रियाकृतविशेषाणां सिद्धिर्न गम्यते तत् प्राप्यं कर्मेति सम्बन्धः। यथा घटं करोतीति निर्वर्त्ये कर्मणि स्वरूपलाभ एव क्रियाकृतविशेषो दर्शनादवगम्यते, पुत्रः सुखं करोतीत्यादौ सुखलाभरूप एव क्रियाकृतविशेषोऽनुमानात् [ मुखप्रसादलिङ्गसहकारेण ] प्रतीयते । घटं पश्यतीत्यादौ क्रियाकृतः विशेषः कश्चिन्न दृश्यते नवाऽनुमीयते, अतश्चेदशं कर्म प्राप्यम् । यद्यपि अस्तिक्रियया प्राप्यमाणत्वात् सर्वस्य कर्मणः प्राप्यत्वं सम्भवति तथाप्यवान्तरभेदविवक्षयेदं त्रैविध्यं प्रपञ्चितमिति । **अजाद्यपवादः** इति—अजादिप्रत्ययानां यद्यप्यसारूप्यमिति विकल्पेन बाध्यबाधकभावो युक्तस्तथापि नानुबन्धकृतमसारूप्यमित्युक्ततया सरूपत्वमेवेति नित्यमेव बाध्यबाधकभाव इति भावः। क्रमशस्त्रिविधस्य कर्मण उदाहरणमाह—**निर्वर्त्यात्–कुम्भकारः** इति—कुम्भं करोतीत्यनेनापि वृद्धावारादेशे "ऐकार्थ्ये" [ ३. २. ८. ] इति स्यादेर्लोपे "ङस्युक्तं कृता" [ ३. १. ४९. ] इति समासे सविभक्तौ—कुम्भकार इति, एवं नगरं करोतीति—**नगरकारः**, कुम्भादिकं ह्यविद्यमानमेवोत्पद्यते, उपादानकारणस्य चाविवक्षेति निर्वर्त्यं कर्म । **विकार्यात्–काण्डलावः** इति—काण्डं लुनातीति काण्डलावः, शरं लुनातीति—**शरलावः**, अत्र काण्डादेर्लवनेन द्विधाभवनरूपं गुणान्तरं विकार उत्पद्यत इति विकार्यं कर्म । **प्राप्यात्–वेदाध्यायः** इति—वेदमधीते इति वाक्यम्, चर्चां पारयतीति—**चर्चापारः**, भारं हरतीति—**भारहारः**, सूत्रं धारयतीति—**सूत्रधारः**, भारं वहतीति—**भारवाहः**, द्वारं पालयतीति—**द्वारपालः**, उष्ट्रं प्रणयत इति—**उष्ट्रप्रणायः**, कमण्डलुं गृह्णातीति—**कमण्डलुग्राहः**, एषु ह्यध्ययनादिना वेदादेः सम्बन्धमात्रं प्रतीयते, नत्वसत एवोत्पादनम्, नापि सत एवान्यथालक्षणो विकार इति प्राप्यमेतत् कर्म । अनिष्टस्थलेऽणः प्रसक्तिं वारयति—**आदित्यं पश्यति० इत्यादाविति** । अस्य च पदविधित्वमिति सामर्थ्यस्यावश्यकत्वमित्याशयेनाह—**महान्तं घटं करोतीति सापेक्षत्वादिति**—सापेक्षमसमर्थवद् भवतीति भावः । उपायान्तरमाह—**अनभिधानाच्चेति**, केचित् तु सापेक्षेभ्योऽपि सति गमके प्रत्ययोत्पत्तिरिति मन्यन्ते, तन्मतेन समाधानान्तरमिदम्, अयमाशयः—सिद्धानां शब्दानामिदमन्वाख्यानं शास्त्रकृता क्रियते, न चादित्यं पश्यति महान्तं घटं करोतीत्याद्यर्थप्रतिपादनायादित्यदर्शमहाघटकारादयः प्रयोगाः प्रामाणिकैः प्रयुक्ता इति तेषामिह साधनमनुचितमिति । किञ्च बाहुलकमप्यनभिहितप्रयोगानुकूलमेवेत्याह—**तथा च बहुलाधिकारः** इति—तत्साधकस्तदनुकूलो वा बहुलाधिकारोऽपीत्यर्थः । न केवलमेत एव बाहुलकेन साध्याः किन्तु प्रयोजनान्तरमपि तस्येत्याह **निर्वर्त्य-विकार्याभ्यामपि क्वचिन्न भवतीति**—प्राप्यकर्मविषये तु पूर्वमुक्तमेवेति तस्येह न गणनम् । **संयोगं जनयति, स्रजं विरचयतीति** निर्वर्त्यस्य, **वृक्षं छिनत्ति, कन्यां मुण्डयतीति** च विकार्यस्योदाहरणम् । णकारस्यानुबन्धस्य प्रयोजनं प्रसिद्धमपि शिष्यसुबोधनाय कथयति—**णकारो वृद्ध्यर्थः** इति ॥ ५. १. ७२. ॥

## शीलि-कामि-भक्ष्या-ऽऽचरीक्षि-क्षमोः णः

॥ ५. १. ७३. ॥

**त० प्र०—कर्मणः परेभ्यः 'शीलि कामि भक्षि आचरि ईक्षि क्षम्' इत्येतेभ्यो धातुभ्यो णः प्रत्ययो भवति । धर्मं शीलयति-धर्मशीलः, धर्मशीला, धर्मकामः, धर्मकामा, वायुभक्षः, वायुभक्षा, आङ्पूर्वश्चरिः—कल्या-**

**णाचारः, कल्याणाचारा; सुखप्रतीक्षः, सुखप्रतीक्षा, बहुक्षमः, बहुक्षमा । अल्-घञन्तैः शीलादिभिर्बहुव्रीहौ सति धर्मशीलादयः सिध्यन्ति, अण्बाधनार्थं तु वचनम्, अणि हि स्त्रियां ङीः स्यात्, तथा च धर्मशीलीत्याद्यनिष्टं रूपं स्यात् । एवंप्रायेषु च बहुव्रीह्याश्रयणे अम्भोऽतिगमेति स्यात्, अम्भोतिगामी चेष्यते । कामीति ण्यन्तस्योपादानादण्यन्तादणेव—पयस्कामीति, ण्यन्तस्य तु णे सति—पयःकामेति भवति । अत एव च ण्यन्तनिर्देशादण्यन्तनिर्देशे "अतः कृ-कमि-कंस० [ २. ३. ५. ] इत्यादौ केवलस्यैव कमेर्ग्रहणम्, तेन—णे सति सकारादेशो न भवति ॥७३॥**

---

श० म० न्यासानुसन्धानम्—शीलि० "शीलण् उपधारणे" उपधारणमभ्यासः परिचयो वा, धर्मं शीलयतीति णे ङस्युक्तसमासे **धर्मशीलः** इति पुंसि, स्त्रियां तु आपि **धर्मशीला** । "कमूङ् कान्तौ" कान्तिरभिलाषः, "कमेर्णिङ्" [ ३. ४. २. ] इति णिङि धर्मं कामयते इति णे—**धर्मकामः** पुमान्, **धर्मकामा** स्त्री । "भक्षण् अदने" वायुं भक्षयतीति णे—**वायुभक्षः** पुमान्, **वायुभक्षा** स्त्री । **आङश्चरिरिति**—आङ्पूर्वकः "चर भक्षणे च" चकाराद् गतौ, इति 'चर्' धातुः, इकारो धातुस्वरूपनिर्देशार्थः, कल्याणमाचरतीति णे उपान्त्यवृद्धौ—पुंसि **कल्याणाचारः**, स्त्रियां **कल्याणाचारा** । "ईक्षि दर्शने" सुखं प्रतीक्षते इति णे—पुंसि **सुखप्रतीक्षः**, स्त्रियां **सुखप्रतीक्षा** । क्षमौषि सहने" "क्षमौच् सहने" बहु क्षमते क्षाम्यतीति वा णे "मोऽकम्यमि०" [ ४. ३. ६५. ] इति वृद्ध्यभावे—पुंसि **बहुक्षमः**, स्त्रियां **बहुक्षमा** । "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणैव सिद्धे णविधानं स्त्रियां ङीवारणार्थम्. तेन च धर्मशीलेति स्त्रियामाकारान्तमेव रूपम्, तस्य चान्यथैव सिद्धिरिति सूत्रवैयर्थ्यमाशङ्कते—**अल्-घञन्तैः शीलादिभिर्बहुव्रीहौ सति धर्मशीलादयः सिध्यन्तीति**—ण्यन्तेभ्योऽलि अन्येभ्यो घञि च शीलादीनां सिद्धौ धर्मः शीलो यस्या इति विग्रहे 'धर्मशीला' इत्यादिपदानां सिद्धिरिति प्रश्नाशयः । उत्तरयति—**अण्बाधनार्थं वचनमिति**, मास्तु बाधोऽण इति चेत् ? अत्राह—**अणि हि स्त्रियां ङीः स्यादिति**, एतदेव विशदयति—**तथा च धर्मशीली इत्याद्यनिष्टं रूपं स्यादिति**, अयमाशयः—अस्तु बहुव्रीहिणा 'धर्मशीला' इत्यादीनां सिद्धिः, किन्तु धर्मं शीलयतीत्यर्थे 'धर्मशीली' इति मा भूदित्येतदर्थं सूत्रमिदमावश्यकमेवेति । किञ्च कर्मोपपदेनैवंविधाः प्रयोगाः साधनीया न तु बहुव्रीहिणेत्यपि ज्ञापयतीदं सूत्रम्, तदाह—**एवंप्रायेषु बहुव्रीह्याश्रयणे** इति—अम्भोऽतिगमोऽस्या इति विग्रहमाश्रित्याम्भोऽतिगमेति नेष्यतेऽपि तु अम्भोऽतिगच्छतीत्यर्थे 'अम्भोऽतिगामी' इत्येवेत्याशयः । कमधातोर्णिङ् स्वार्थे भवति, तथा च * प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तस्यापि ग्रहणम् * इति न्यायात् केवलस्य कमउपादानेऽपि ण्यन्तस्य तस्य ग्रहणं भविष्यतीति ण्यन्तोपादानं व्यर्थमित्याशङ्क्याह—**कामीति ण्यन्तोपादानादण्यन्तादणेवेति**, अयं भावः—केवलस्य कमो ग्रहणेन ण्यन्तग्रहणे सिद्धेऽपि यद् ण्यन्तग्रहणं कृतं तद् व्यर्थं सत् ज्ञापयति—केवलस्य कमो ग्रहणे ण्यन्तस्य ग्रहणं नेति, तथा च ण्यन्तग्रहणं स्वांशे चरितार्थम्, तेन ण्यन्तात् णो भवति, ण्यन्तोपादानाच्चाण्यन्तान्न भवति णः, किन्तु "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणेव भवति, अणि सति चोपान्त्यवृद्धौ—**पयस्कामी**ति भवति, **ण्यन्तस्य तु णे सति—पयःकामे**ति, अयमाशयः—"अशवि ते वा" [ ३. ४. ४. ] इत्यशविषये णिङ् [णिः] वा भवति, तत्र यदा णिङ् भवति तदाऽनेन णे स्त्रियामपि 'पयःकामा' इति भवति, यदा णिङ् न भवति तदा नानेन णोऽपि तु अणेव भवति, अणि च "अणजे०" [ २. ४. २०. ] इति स्त्रियां ङीप्रत्यये—'पयस्कामी' इति भवति, पुंसि विशेषाभावात् स्त्रियामुदाहृतम् । फलमन्यत्र दर्शनीयमित्याह—**अत एव च ण्यन्तनिर्देशात्**—प्रकृतसूत्रे ण्यन्तनिर्देशेन ज्ञापनादित्यर्थः, **अण्यन्तनिर्देशे**—केवलस्यैव कमो ग्रहणस्थले, "अतः कृ-कमि-कंस०" इत्यादिसूत्रे, **केवलस्यैव कमेर्ग्रहणं**—णिरहितस्यैव कमो ग्रहणं भवति, न तु 'प्रकृति ग्रहणे स्वार्थिकप्रत्ययान्तस्यापि ग्रहणम्' इति न्यायेन ण्यन्तस्यापीत्यर्थः, **तेन** केवलग्रहणस्थले ण्यन्तस्याग्रहणेन, **णे सति**—णिनाऽविनाभावित्वात् णौ णे च सति, **सकारादेशो न भवतीति**—"अतः कृ-कमि०" [ २. ३. ५. ] इत्यनेन सकारो न भवतीत्यर्थः, अयमाशयः—पयः कामयते इत्यर्थे णौ णे सति सकाराभावो ङ्यभावश्चेति—पयः-

कामा स्त्रीत्येव भवति, ण्यभावे तु अणि सति सकारो ङीश्च भवतीति पयस्कामी स्त्रीत्येव भवतीति ॥ ५. १. ७३. ॥

## गायोऽनुपसर्गाट्टक् । ५. १. ७४. ॥

**त० प्र०—कर्मणः परादनुपसर्गाद् गायतेष्टक् प्रत्ययो भवति । वक्रं गायति–वक्रगः, वक्रगी; सामगः, सामगी । अनुपसर्गादिति किम् ? वक्रसंगायः, खरुसंगायः । वक्रादयो गीतविशेषाः । गायतिनिर्देशो गाङ् निवृत्त्यर्थः ॥७४॥**

**श० म० न्यासानुसन्धानम्—गायो०** । टकः ककारः "इडेत्पुसि चातो लुक्" [ ४. ३. ९४. ] इत्याकारलोपार्थः, टकारः "अणजे०" [ २. ४. २०. ] इति ङ्यर्थः । "गैं शब्दे" वक्रं गायतीति टकि "आत् सन्ध्यक्षरस्य" इत्यात्वे आकारलोपे ङस्युक्तसमासे पुंसि—**वक्रगः,** स्त्रियां तु ङ्यां—**वक्रगी,** एवं साम गायतीति—**सामगः, सामगी** । पदकृत्यं पृच्छति—**अनुपसर्गादिति किमिति,** प्रत्युदाहरणमुखेनोत्तरयति–**वक्रसंगायः** इति–वक्रं संगायतीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि "आत ऐ०" [४. ३. ५३.] इत्याकारस्य ऐकारे आयादेशे च वक्रसंगायः, एवं खरु संगायतीति—**खरुसंगायः** । वक्रादेरर्थं ग्राहयति—**वक्रादयो गीतविशेषाः** इति । **गायतिनिर्देशो गाङ्निवृत्त्यर्थः** इति—"गोऽनुपसर्गाट्टक्" इति न्यासे हि * गा-मा-दा-ग्रहणेष्वविशेषः * इति न्यायेनगायतेरपि ग्रहणं यद्यपि प्राप्तमेव तथापि "गांङ् गतौ" इति गाङोऽपि ग्रहणं स्यादेव, न च तस्मात् टक्प्रत्ययोऽभिमत इति तद्व्यावृत्त्यर्थं यत्न आवश्यक इति 'गाय' इति निर्देशेन गायतिरेव गृहीतो न तु गाङिति भावः ॥ ५. १. ७४. ॥

## सुरा-शीधोः पिबः । ५. १. ७५. ॥

**त० प्र०—सुरा-शीधुभ्यां कर्मभ्यां परादनुपसर्गात् पिबतेष्टक् भवति । सुरां पिबति—सुरापः, सुरापी; शीधुपः शीधुपी । सुराशीधोरिति किम् ? क्षीरपा बाला । पिब इति किम् ? सुरां पाति–सुरापा । कथं संज्ञायां सुरापा सुरापीति ? पाति-पिबत्योर्भविष्यति । न च धात्वर्थभेदः, संज्ञासु धात्वर्थस्य व्युत्पत्तिमात्रार्थत्वात् ॥७५॥**

**श० म० न्यासानुसन्धानम्—सुरा०** । "पां पाने" सुरां पिबतीति टकि आकारलोपे—**सुरापः** पुमान्, स्त्रियां तु टित्त्वात् ङ्यां—**सुरापी** । एवं शीधुं पिबतीति—**शीधुपः, शीधुपी** । पदकृत्यं पृच्छति—**सुराशीधोरिति किमिति**—समाहारेण निर्देशे क्लीबत्वेपि नागमो न विहित आगमशासनस्यानित्यत्वात्, उत्तरयति—**क्षीरपा बाला,** क्षीरं पिबतीति "आतो डो०" [ ५. १. ७६. ] इति डेऽन्त्यस्वरादिलोपे स्त्रियामापि—क्षीरपा, स्त्रीत्वज्ञापनाय बालेति, पुंसि विशेषाभावात् स्त्रियां प्रत्युदाहृतम् । "पां पाने" इत्यस्य 'पिब' इत्यादेशरूपेण निर्देशस्य फलं स्फोरयति—**पिब इति किमिति,** उत्तरयति–**सुरां पाति—सुरापे**ति—"पांक् रक्षणे" सुरां पातीति "आतो डो०" इति डेऽन्त्यस्वरादिलोपे स्त्रियामापि—सुरापा, टकि डे वा पुंसि न विशेष इति स्त्रियां प्रत्युदाहृतम् । तथा चात्र सूत्रे रक्षार्थकस्य पाधातोर्ग्रहणं न भवति, तेनात्र ड एव भवति न तु टक् इति स्त्रियां न ङीरिति तदर्थं पिब इति निर्देश आवश्यक इति भावः । संज्ञायां ङीप्रत्ययान्तस्याबन्तस्य च प्रयोगमुपलभ्य शङ्कते—**कथं संज्ञायां सुरापा सुरापीति ?,** धातुभेदेन समाधत्ते—**पाति-पिबत्योर्भविष्यती**ति—"पांक् रक्षणे" इत्यस्य डे—सुरापा, "पां पाने" इत्यस्य टकि सुरापीति भावः । न च धातुभेदेन प्रयोगार्थभेदोऽपि स्यादेव, स च नेष्ट इति चेत् ? अत्राह—**न च धात्वर्थभेदः** इति, कुत इत्याह—**संज्ञासु धात्वर्थस्य व्युत्पत्तिमात्रार्थत्वादि**ति—संज्ञाशब्दानां व्युत्पत्तिनिमित्तस्यार्थस्य न प्रवृत्तिनिमित्तार्थविघातकत्वमिति व्युत्पत्तिसमये रक्षणार्थकस्यापि प्रवृत्ति[प्रयोग]समये पानार्थकत्वं सुलभमिति ॥ ५. १. ७५. ॥

## आतो डोऽह्वा-वा-मः । ५. १. ७६. ॥

**त० प्र०—कर्मणः परादनुपसर्गात् ह्वा-वा-मावर्जितादाकारान्ताद् धातोर्डः प्रत्ययो भवति । गां ददाति–गोदः, कम्बलदः, पार्ष्णित्रम्, अङ्गुलित्रम्, ब्रह्मज्यः, वपु-**

र्वीतवान्—वपुर्व्यः । अह्वा-वा-म इति किम् ? स्वर्गह्वायः, तन्तुवायः, धान्यमायः, अणेव । कथं मित्रह्वः ? "क्वचित्" [ ५. १. १७१. ] इत्यनेन डः । अनुपसर्गादित्येव—गोसंदायः, वडवासंदायः । उपसर्गैरव्यवधानं तैवेत्यण् ॥७६॥

श० म० न्यासानुसन्धानम्—आतो० । आत इत्यस्य विशेषणत्वाद् विशेषणे च तदन्तविज्ञानादाह—**आकारान्ताद् धातोरि**ति । "डुदांग्क् दाने" गां ददातीति डेऽन्त्यस्वरादिलोपे ङस्युक्तसमासे च—**गोदः**, एवं कम्बलं ददातीति—**कम्बलदः**, "त्रैङ् पालने" पार्ष्णिं त्रायते इति—**पार्ष्णित्रम्**, अङ्गुलिं त्रायते इति—**अङ्गुलित्रम्** । "ज्यांश् हानौ" ब्रह्म जिनातीति—**ब्रह्मज्यः** । "व्येंग् संवरणे" **वपुर्वीतवान्–वपुर्व्यः** इति—कालविशेषानुक्तेः कालत्रये प्रत्ययोऽयमिति भूतेऽपि भवतीति तत्त्वम् । पदकृत्यं पृच्छति—**अह्वा-वा-म इति किमि**ति, उत्तरयति—**स्वर्गह्वायः** इति—"ह्वेंग् स्पर्धाशब्दयोः" स्वर्गं ह्वयतीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि सन्ध्यक्षरान्तलक्षणस्य कृतस्याकारस्य ऐकारे आयादेशे च—स्वर्गह्वायः, एवं—"वेंग् तन्तुसन्ताने" तन्तून् वयतीति—**तन्तुवायः**, "मांङ्क् मानशब्दयोः" धान्यं मिमीते इति—**धान्यमायः**, एषु कः प्रत्यय इत्याह—**अणेवे**ति—एवकारेण डव्यवच्छेदः । अह्वावाम इत्युक्तेर्ह्वयतेर्डो दुर्लभ इत्याशङ्कते—**कथं मित्रह्वः** ? इति, उत्तरयति—**"क्वचित्" [ ५. १. १७१. ] इति डः** इति—"क्वचित्" इति सूत्रस्य 'उक्तादन्यत्रापि क्वचिल्लक्ष्यानुसारेण डो भवति' इति व्याख्यानात् नाम-धातु-कालान्यत्वेऽपि भवति, यथा—मित्रं ह्वयतीति डे—मित्रह्वः, अणोऽपवादो डः । व्यावर्त्यं दर्शयितुमाह—**अनुपसर्गादित्येवे**ति, गां वडवां च संददातीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि "आत ऐः०" [ ४. ३. ५३. ] इत्याकारस्य ऐकारे आयादेशे च—**गोसंदायः, वडवासंदायः** इति—अत्रानुपसर्गत्वाभावान्नानेन डः किन्त्वणेव । नन्विह कर्मण उपसर्गेण व्यवधानात् कथं कर्मणः परत्वमिति चेत् ? अत्राह—**उपसर्गैरव्यवधानं तैवेत्यणि**ति—उपसर्गविशिष्टधात्वर्थं प्रत्येव तस्य कर्मत्वमित्युपसर्गव्यवधानस्यावर्जनीयत्वमेवेति *येन नाव्यवधानं तेन व्यवहितेऽपि भवति* इति न्यायादिति भावः ॥ ५. १. ७६. ॥

समः ख्यः । ५. १. ७७. ॥

त० प्र०—कर्मणः परात् संपूर्वात् 'ख्या' इत्येतस्मात् डो भवति । गां संख्याति संचष्टे वा—गोसंख्यः, पशुसंख्यः । उपसर्गार्थं वचनम् ॥७७॥

श० म० न्यासानुसन्धानम्—सम० । '**ख्य**' इति ख्याशब्दस्य पञ्चम्यां रूपम्, ख्यास्वरूपं च "ख्यांक् प्रकथने" इति ख्याधातोः, "चक्षिक् व्यक्तायां वाचि" इति 'चक्ष्' धातोरशिति प्रत्यये विषये "चक्षो वाचि०" [ ४. ४. ४. ] इति ख्यादेशस्य च, अत्र चोभयोरपि संग्रह इत्याह—**गां संख्याति संचष्टे वे**ति—पाणिनीये गां संचष्टे इत्येव विग्रहः, अन्यमते च संख्यातीत्युभयोरपि संग्रहः । **गोसंख्यः** इति—डे प्राग्वत् अन्त्यस्वरलोपादिः । एवं—पशुं संख्याति संचष्टे वा—**पशुसंख्यः** । ननु "आतो डो०" [ ५. १. ७६. ] इत्यनेनैव सिद्धे किमर्थमिदं सूत्रमिति चेत् ? अत्राह—**उपसर्गार्थं वचनमि**ति—तत्र सूत्रेऽनुपसर्गादित्यनुवृत्तेरुक्ततयाऽत्र चोपसर्गपूर्वकादेव विधानेन तेनात्रासिद्धिरित्यावश्यकमिदं सूत्रमिति ॥ ५. १. ७७. ॥

दश्चाङः । ५. १. ७८. ॥

त० प्र०—कर्मणः परादाङ्पूर्वाद् ददातेः 'ख्या' इत्येतस्माच्च डो भवति । दायमादत्ते—दायादः, स्त्रियमाचष्टे—स्त्र्याख्यः, प्रियाख्यः । इदमुत्तरं चोपसर्गार्थं वचनम् ॥७८॥

श० म० न्यासानुसन्धानम्—दश्चाङः । '**दः**' इति दाशब्दस्य पञ्चम्यां रूपम्, दाशब्देन च किं ग्राह्यमित्याह—**ददातेरि**ति—"डुदांग्क् दाने" इति दाधातोरित्यर्थः, चकारेण ख्याधातोरनुकर्ष इत्याह—**'ख्या' इत्येतस्माच्चे**ति । भावाकर्त्रोर्घञि—दायः, दायमादत्ते इति डे प्राग्वत् अन्त्यस्वरलोपादौ कृते—**दायादः**, एवं—स्त्रियमाचष्टे इति—**स्त्र्याख्यः**, प्रियमाचष्टे इति—**प्रियाख्यः** । आदन्तत्वनिमित्तकेन डेनैव सिद्धेरस्य सूत्रस्य वैयर्थ्यमाशङ्क्याह—**इदमुत्तरं चोपसर्गार्थं वचन**-

मिति—आदन्तत्वनिमित्तकस्य डस्योपसर्गात् परत्वे दौर्लभ्यमिति भावः, तत्रानुपसर्गादित्यनुवृत्तेः, अस्योत्तरसूत्रस्योपसर्गपूर्वकादेव विधायकत्वमिति नैतत्साध्यप्रयोगाणां तेन सूत्रेण सिद्धिरित्यावश्यके इमे सूत्रे इति ॥ ५. १. ७८. ॥

## प्राज्ज्ञश्च । ५. १. ७९. ॥

**त० प्र०—कर्मणः परात् प्रपूर्वाज्जानातेर्दारूपाच्च डो भवति । पथिप्रज्ञः, प्रपाप्रदः । इह पूर्वसूत्रे च दारूपं गृह्यते, न संज्ञा ज्ञा-ख्यासाहचर्यात् । पूर्वसूत्रे तु दाग एव ग्रहणं तस्यैवाङा योगात्, तेन स्तनौ प्रधयति—स्तनप्रधायः ॥७९॥**

**श० म० न्यासानुसन्धानम्—प्रा०** । **द** इत्यस्य चकारेणानुकर्षः, ख्य इति तु नानुवर्तते पूर्वसूत्रे चानुकृष्टत्वात् । **ज्ञ** इत्यनेन "ज्ञांश् अवबोधने" इत्यस्य ग्रहणम्, तदाह—**जानातेर्दारूपाच्चेति** । पन्थानं प्रजानातीति डे—**पथिप्रज्ञः** । प्रपां प्रददाति—**प्रपाप्रदः** । *कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः* इति न्यायेन कृत्रिमस्यैव "अवौ दा-धौ दा" [ ३. ३. ५. ] इति विहितदासंज्ञकस्य ग्रहणं स्यात्, तथा च धयतेरपि प्रपूर्वादयं प्रत्ययः स्यात्, न च तदिष्टमिति तद्वारणायाह—**इह पूर्वसूत्रे च दारूपं गृह्यते, न संज्ञे**ति, कृत्रिमन्यायबाधे बीजमाह—**ज्ञा-ख्यासाहचर्यादि**ति—ज्ञा-ख्याधातू हि रूपपरावेव न संज्ञापराविति तत्सहचरितो दाधातुरपि रूपपर एव न संज्ञापर इति ज्ञायते, तथा चात्र न तन्न्यायप्रवृत्त्यवसरः, उभयोर्ग्रहणे प्राप्ते निर्णयायैव तस्य प्रसरात्, अत्र च साहचर्यन्यायेनैव निर्णीतत्वादिति भावः । एवं च दारूपस्यैव ग्रहणमिति स्थिते "दांम् दाने" "दांवक् लवने" "दैव् शोधने" "देङ् पालने" "डुदांग्क् दाने" इति सर्वेषां ग्रहणमिह पूर्वसूत्रे च भवतीत्यायातम्, पूर्वसूत्रे च वृत्तौ ददातेरित्युक्तम्, तथा च तत्र दाग एव ग्रहणमिति लभ्यते, तत्र कथमिति शङ्कायां स्पष्टयति—**पूर्वसूत्रे तु दाग एव ग्रहणमिति**—सर्वेषां दारूपत्वाविशेषे 'गा-मा-दाग्रहणेष्वविशेषः' इति न्यायसिद्धेऽपि प्रयोगस्वाभाव्यादिह दाग एव दारूपस्य ग्रहणमिति भावः । प्रयोगस्वभावमेवाह—**तस्यैवाङा योगा**विति—आङ्पूर्वकस्य ददातेरेव प्रयोगबाहुल्यादिति भावः । संज्ञापरिहारेण दारूपस्यैव ग्रहणे फलमाह—**तेन स्तनौ प्रधयतीति**—धयतेरग्रहणात् डो न किन्त्वणेवेति स्तनप्रधाय इत्येवेति तत्त्वम् ॥ ५. १. ७९. ॥

## आशिषि हनः । ५. १. ८०. ॥

**त० प्र०—आशिषि गम्यमानायां कर्मणः पराद्धन्तेर्डो भवति । शत्रुं वध्यात्—शत्रुहः, पापहः, दुःखहः । गतावपीति कश्चित्, क्रोशं हन्ति—क्रोशहः ॥८०॥**

**श० म० न्यासानुसन्धानम्—आशि०** । "हनंक् हिंसा-गत्योः" शत्रुं वध्यादित्याशास्यमान इति डेऽन्त्यस्वरादिलोपे—**शत्रुहः**, एवं—पापं वध्यादिति—**पापहः**, दुःखं वध्यादिति—**दुःखहः** । हिंसार्थस्यैव हन आशिषि प्रयोगे सूत्रमिदं प्रवर्तत इति सम्प्रदायः । मतान्तरमाह—**गतावपीति कश्चिदि**ति, तन्मतेनोदाहरति—क्रोशं हन्ति—**क्रोशहः** । 'क्रोशं हन्ति' इत्याशीरहितविग्रहप्रदर्शनं चिन्त्यम्, गतावपीति मतेऽपि श्रुतस्याशीरर्थस्य विवक्षाया अवर्जनीयत्वात्, गतिर्हि धात्वर्थः, आशीः प्रत्ययार्थः प्रत्ययोपाधिर्वा, तत्र धात्वर्थभेदस्य प्रामाणिकत्वेन स्वेच्छाग्राह्यत्वेऽपि प्रत्ययार्थस्य मानं विना त्यक्तुमशक्यत्वाच्च, तथा च क्रोशं हन्तीति विग्रहप्रदर्शनस्याशयो विचारणीयः सुधीभिः । गतौ हन्तेः प्रयोगोऽपि न प्रसिद्धः, उक्तं चैतत् साहित्यदर्पणकृता—धात्वर्थनिर्देशस्तु सति प्रामाणिकप्रयोगे तत्समर्थनायैवेति शास्त्रकृत्समयः ॥ ५. १. ८०. ॥

## क्लेशादिभ्योऽपात् । ५. १. ८१. ॥

**त० प्र०—क्लेशादिभ्यः कर्मभ्यः परादपपूर्वाद्धन्तेर्डो भवति । अनाशीरर्थ आरम्भः । क्लेशमपहन्ति—क्लेशापहः, तमोपहः, दुःखापहः, ज्वरापहः, दर्पापह, दोषापहः, रोगापहः, वातपित्तकफापहः, विषाग्निदर्पापहः । बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवति । कथं 'दार्वाघाटः, चार्वाघाटः ? घटतेरणि संज्ञायां भविष्यति । चारु आहन्तीति—चार्वाघातो हन्तेरेव । दार्वाघातोऽपि तर्हि स्यात्, असंज्ञायामिष्यत एव । एवमसंज्ञायां संपूर्वाभ्यां घटि-हनिभ्यां—'वर्णसंघाटः, वर्णसंघातः, पदसंघाटः,**

**पवसंघातः' इत्यादि सिद्धम्, हन्तेरेव वा पृषोदरादित्वाद् वर्णविकारः ॥८१॥**

---

**श० म० न्यासानुसन्धानम्—क्लेशा०।** "आशिषि-हनः" इति पूर्वसूत्रेणैवाप्पूर्वात् क्लेशादिकर्मणः परात् हन्तेरपि डः प्रत्ययः स्यादेवेति सूत्रमिदं व्यर्थमित्याशङ्कां निराकरोति—**अनाशीरर्थ आरम्भ** इति—यत्र नाशीर्गम्यमानाऽपि तु वस्तुस्थितिकथनमेव तत्रापि प्रत्ययः स्यादित्येतदर्थमिदं सूत्रमिति भावः। क्लेशमपहन्तीति डेऽन्त्यस्वरादिलोपे ङस्युक्तसमासे—**क्लेशापहः**। एवं—तमोऽपहन्तीति—**तमोऽपहः**, दुःखमपहन्तीति—**दुःखापहः**, ज्वरमपहन्तीति—**ज्वरापहः**, दर्पमपहन्तीति—**दर्पापहः**, दोषं दोषा [ रात्रिं ] वाऽपहन्तीति—**दोषापहः**, रोगमपहन्तीति—**रोगापहः**, वात-पित्त-कफानपहन्तीति—**वातपित्तकफापहः**, विषाग्निदर्पमपहन्तीति—**विषाग्निदर्पापहः**। गणनिर्देशे 'क्लेशादेः' इत्येकवचनेनैव सिद्धे बहुवचननिर्देशस्य फलमाह—**बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवतीति**—न केवलं गणनिर्दिष्टेभ्य एव परत्वे प्रत्ययोऽपि त्वन्येभ्योऽपि सत्यभिधाने प्रत्ययो भवत्येवेत्याशयः। व्याकरणान्तरसिद्धमर्थमत्र साधयितुमाशङ्कते—**कथं 'दार्वाघाटः, चार्वाघाटः'** इति, "आशिषि हनः" [ ३. २. ४९. ] इति पाणिनीयसूत्रे भाष्ये—"दार्वाघाटः, चार्वाघाटः, चार्वाघातः, वर्णसंघाटः, वर्णसंघातः' इति प्रयोगाणां साधनाय वार्तिकत्रयमारभ्यते, 'दारावाहनोऽणन्तस्य च टः संज्ञायाम् ?' 'चारौ वा २' 'कर्मणि समि च ३' इति। स्वमते च तादृशानुशासनाभावान्न्यूनतेति शङ्का। उत्तरयति—**घटतेरणि संज्ञायां भविष्यतीति**—"घटिष् चेष्टायाम्" दारुं चारुं वा आघटते इति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि सिद्धमित्यर्थः। न च दारुमाहन्तीति पराभिमतप्रसिद्धार्थस्य घटतेरणा कथं प्रतीतिरिति वाच्यम्, संज्ञात्वेन रूढ्या यौगिकार्थानपेक्षणात् तदर्थप्रतीतेः सम्भवात्। एतेन 'दार्वाघाटः, चार्वाघाटः' इत्येतयोः सिद्धावपि पक्षे चार्वाघात इति न सिध्येदित्याशङ्कायामाह—**चारु आहन्तीति-चार्वाघातो हन्तेरेवेति**—चारोः परादाङ्पूर्वाद् हन्तेरणि "ञ्णिति घात्" [ ४. ३. ५० ] इति घातादेशे चार्वाघातस्य सिद्धिः। नन्वेवमतिप्रसङ्ग इति शङ्कते—**दार्वाघातोऽपि तर्हि स्यादिति**, इष्टापत्त्या परिहरति—**असंज्ञायामिष्यत एवेति**। वर्णसंघाटादीन् व्युत्पादयति—**एवमसंज्ञायामिति**। संज्ञायां रूपनैयत्येऽप्यसंज्ञायां नियमाभावात् प्रयोगसिद्धेर्धातुद्वयेन सौलभ्यमिति भावः। सर्वत्र प्रयोगेषु हन्त्यर्थानुगमात् तस्य [ तदर्थानुगमस्य ] रूढिबललभ्यत्वप्रतिपादनस्यागतिकगतित्वमिति हन्तेरेव तत्सिद्ध्युपायमाह—**हन्तेरेव वा पृषोदरादित्वाद् वर्णविकारः** इति—अण् तु "कर्मणोऽण्" [ ५. १. ७२. ] इत्यनेनैव सिद्धः, टकार एव दुर्लभः, तदर्थं वचनारम्भापेक्षया पृषोदरादित्वकल्पनमेव वरमिति भावः, एवं च हन्त्यर्थानुगतिरपि सिद्धा। यद्यपि "पृषोदरादयः" [ ३. २. ११५. ] इत्यनेन नित्यमेव टकारो भविष्यतीति 'चार्वाघाटः, चार्वाघातः' इति रूपद्वयं तेन दुःसाध्यमेव, तथापि रूपद्वयस्यापि पृषोदरादित्वं कल्पनीयमिति ॥ ५. १. ८१. ॥

---

## कुमार-शीर्षाण्णिन् । ५. १. ८२. ॥

**त० प्र०—कुमार-शीर्षाभ्यां कर्मभ्यां पराद्धन्तेर्णिन् प्रत्ययो भवति। कुमारं हन्ति—कुमारघाती, शीर्षघाती। अत एव निपातनाच्छिरसः [ शीर्षभावः ], शीर्षशब्दोऽकारान्तः प्रकृत्यन्तरं वा। तथा च "शीर्षे स्थितं पृष्ठतः" इति ॥८२॥**

---

**श० म० न्यासानुसन्धानम्—कुमार०।** कुमारं हन्तीति णिनि "ञ्णिति घात्" [ ४. ३. ५०. ] इति घातादेशे ङस्युक्तसमासे—**कुमारघाती**, एवं—शिरः [ शीर्षं वा ] हन्तीति—**शीर्षघाती। अत एव निपातनात् शिरसः शीर्षभावः** इति—सूत्रे कुमारशीर्षादिति निर्देशेन शिरसः शीर्षभावो निपातित इति लभ्यत इति भावः। शिरःशब्दपर्यायः शीर्षशब्दोऽप्यस्ति, तस्मादेव परत्वे प्रत्ययविधानमिदमिति मतान्तरमाह—**शीर्षशब्दोऽकारान्तः प्रकृत्यन्तरं** वेति, तथा च शीर्षशब्दात् परत्वे एवायं प्रत्ययः। शिरःशब्दात् परत्वे तु भूतातिरिक्ते काले शिरोहन्ता शिरोघातो वेत्यादि भविष्यति, तस्यानिष्टत्वेन च शिरःशब्दस्य शीर्षभावोऽपि बोध्यः। शीर्षशब्दसद्भावे प्रमाणतया कविप्रयोगमाह—**"शीर्षे स्थितं पृष्ठतः"** इति। "उत्तमाङ्गं शिरः शीर्षं

मूर्धा ना मस्तकोऽस्त्रियाम्" इत्यमरप्रयोगोऽपि तस्य शिरःपर्यायत्वे प्रमाणम्, स्वयमाचार्येणापि शीर्षशब्दो व्युत्पादितः, तथाहि—"शीर्यते नश्यति जरसा शीर्षं" "ऋजि-रिषि०" [ उणा० ५६७. ] इति किद् सः" इति। इदं च सूत्रं कालसामान्ये विहितमपि भूतानिरिक्त एव काले प्रवर्तते, भूते च "हनो णिन्" [ ५. १. १६०. ] इति सिद्ध एव ॥ ५. १. ८२. ॥

## अचित्ते टक् । ५. १. ८३. ॥

**त० प्र०—कर्मणः पराद्धन्तेरचित्तवति कर्तरि टक् प्रत्ययो भवति । वातं हन्ति—वातघ्नं तैलम्, पित्तघ्नं घृतम्, श्लेष्मघ्नं मधु, रोगघ्नमौषधम्, जायाघ्नाः तिलकालकाः, पतिघ्नी पाणिरेखा, सर्वकर्मघ्नी शैलेशी, स्रुघ्नो नगरम्, शतघ्नी आयुधविशेषः, हस्तघ्नो ज्याघातत्रो वर्ध्रपट्टः । बहुलाधिकारात् स्रुघ्नादयः संज्ञायाम् । अचित्त इति किम् ? पापघातो यतिः, चौरघातो राजा, आखुघातो बिडालः, मत्स्यघातो बकः, सस्यघातो वृषभः ॥८३॥**

**श० म० न्यासानुसन्धानम्—अचि० । अचित्ते** इति—न विद्यते चित्तं यस्य तस्मिन्—अचित्ते, चित्तवद्भिन्ने इत्यर्थः, तदाह—**अचित्तवतीति**, केचित् तु चित्तस्याभावोऽचित्तं तदस्यास्तीति "अभ्रादिभ्यः" [ ७. २. ४६. ] इति मत्वर्थीयेऽचि - अचित्ते इति, तदाह — **अचित्तवतीति**—चित्ताभाववतीत्यर्थः । वातं हन्तीति टकि कित्त्वात् "गम-हन०" [ ४. २. ४४. ] इत्युपान्त्यस्य लोपे "हनो ह्नो घ्नः" [ २. १. ११२. ] इति घ्नादेशे च—**वातघ्नं तैलमिति**—तैलमिति विशेष्यमचित्तकर्तृत्वज्ञापनार्थम् । एवं पित्तं हन्तीति—**पित्तघ्नं घृतम्**, श्लेष्माणं हन्तीति—**श्लेष्मघ्नं मधु** । रोगं हन्तीति—**रोगघ्नमौषधम्**, जायां घ्नन्तीति—**जायाघ्नाः—तिलकालकाः** इति—तिल इव कालकास्तिलकालकाः, देहे कृष्णानि चिह्नानीत्यर्थः । पतिं हन्तीति—**पतिघ्नी पाणिरेखा**, हस्तगतापरेखाविशेष इत्यर्थः, टित्त्वात् "अणजे०" [ २. ४. २०. ] इति स्त्रियां ङीः, सर्वकर्माणि हन्तीति—**सर्वकर्मघ्नी शैलेशीति**—शिलानामीशः शिलेशो मेरुः, निष्कम्पत्वात् तस्येयमिति शैलेशी, केवलिनो निष्कम्पावस्थाविशेषः । स्रुचो हन्तीति—**स्रुघ्नो नगरम्** । शतं हन्तीति—**शतघ्नी आयुधविशेषः** । हस्तं हन्तीति—**हस्तघ्नो ज्याघातत्रो वर्ध्रपट्टः** इति—ज्या धनूरज्जुः, तया य आघातस्ततस्त्रायते इति ज्याघातत्रः, वर्ध्रनिर्मितो रक्षणपट्टो वर्ध्रपट्टः । अतिप्रसङ्गं वारयति—**बहुलाधिकारात् स्रुघ्नादयः संज्ञायामिति** । पदकृत्यं पृच्छति—**अचित्त इति किमिति**, उत्तरयति—**पापघातो यतिरिति**—पापं हन्तीति वाक्यम्, एवं चौरं हन्तीति—**चौरघातो राजा**, आखुं हन्तीति—**आखुघातो बिडालः**, मत्स्यं हन्तीति—**मत्स्यघातो बकः**, सस्यं हन्तीति—**सस्यघातो वृषभः**, एषु चित्तवतः कर्तृत्वान्नास्य प्रवृत्तिरिति "कर्मणोऽण्" इत्यणेव, तस्मिन् परे च घातादेशः ॥ ५. १. ८३. ॥

## जाया-पतेश्चिह्नवति । ५. १. ८४. ॥

**त० प्र०—जाया-पतिभ्यां कर्मभ्यां पराद्धन्तेश्चिह्नवति कर्तरि टक् भवति । चिह्नं शरीरस्थं शुभाशुभसूचकं तिलकालकादि । जायाघ्नो ब्राह्मणः, पतिघ्नी कन्या, अपलक्षणयुगित्यर्थः । चित्तवदर्थ आरम्भः ॥८४॥**

**श० म० न्यासानुसन्धानम्—जाया० ।** चिह्नशब्दस्य कृत्रिमाकृत्रिमसाधारणे लक्ष्मणि प्रसिद्धत्वेनात्र किं ग्राह्यमित्याशङ्कायामाह—**चिह्नं शरीरस्थमिति**, तथा चाकृत्रिमं स्वाभाविकं जन्मत एव लब्धं यत् तदिह गृह्यत इत्यर्थः, तच्च चिह्नं द्विविधं—किञ्चिच्छुभसूचकं किञ्चिच्चाशुभसूचकमित्याह—**शुभाशुभसूचकमिति**, नामग्राहं तदाह—**तिलकालकादीति**—तिलकालकचिह्नं प्राग् व्याख्यातं, तेनाशुभेन जायाघ्नो भवति, आदिशब्देन पाणिगतापरेखादि, तेनाशुभचिह्नेन पतिघ्नी कन्या भवतीति सामुद्रिकशास्त्रविदः । शुभाशुभादिफलं यद्यपि स्वकृतैरेव शुभाशुभैः कर्मभिः प्राप्यते, तथापि चिह्नानि शरीरिणः पूर्वजन्मकृतशुभाशुभसूचकानि, तैश्च दृष्टैर्लक्षणज्ञा निर्णयन्ति भावीनि शुभाशुभानि, उपदिशन्ति चाशुभपरिहारोपायान् । जायां हन्तीति—**जायाघ्नो ब्राह्मणः**, पतिं हन्तीति—**पतिघ्नी कन्या** । यद्यपि जायाघ्नशब्देन सामान्यतो जायाहननकर्तैव लभ्यतेऽर्थः, न च तावता जायाहननसूचकचिह्नवत्त्वं गम्यते, तथापि

अप्राप्तायां जायायां, प्राप्तायामपि स्वस्तिमत्यां स्थितायां कृतस्य जायाघ्न इति प्रयोगस्य सामान्यतो जायाहननकर्तृत्वमर्थो न मन्तुं शक्यतेऽसम्भवात् , शिष्टवाक्यत्वेन च तस्य निरर्थकत्वमपार्थकत्वं वा न युक्तम्. तस्मात् जायाहननसूचकापलक्षणवानयमिति तदर्थो निश्चेयः, तदाह—**अपलक्षणयुगित्यर्थः** इति । वस्तुतस्तु तादृशलक्षणवत्त्वमात्रेण न तद्धननकर्तृत्वं सम्भवति, तादृशलक्षणेन ह्यस्य जाया नङ्क्ष्यतीत्येव ज्ञायते न तु स्वयमेव तां हनिष्यतीति, तथापि तादृशलक्षणवत्त्वे स तद्धन्तैवेति गौणो व्यवहारः । चिह्नवत्यर्थे प्रत्ययस्य पूर्वसूत्रेणैव सिद्धिमाशङ्क्याह—**चित्तवदर्थ आरम्भः** इति—तादृशचिह्नवत्त्वं चित्तवत्येव सम्भवति, तत्र च पूर्वसूत्रस्याप्राप्तिरिति तदर्थमिदं सूत्रमित्याशयः ॥ ५. १. ८४. ॥

## ब्रह्मादिभ्यः । ५ १. ८५. ।

**त० प्र०—ब्रह्मादिभ्यः कर्मभ्यः पराद्धन्तेष्टक् प्रत्ययो भवति । ब्रह्म हन्ति–ब्रह्मघ्नः, कृतघ्नः, शत्रुघ्नः, वृत्रघ्नः, भ्रूणघ्नः, बालघ्नः, शशघ्नी पक्षिजातिः, गां हन्ति–गोघ्नः पातकी । बहुलाधिकारात् संप्रदानेऽपि—गां हन्ति यस्मै आगताय दातुं स–गोघ्नोऽतिथिः । बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवति । चित्तवदर्थ आरम्भः ॥८५॥**

**श० म० न्यासानुसन्धानम्—ब्रह्मा०** । ब्रह्म हन्तीति टकि कित्वात् "यम-हन०" [ ४. २. ४४. ] इत्युपान्त्यलोपे "हनो ह्नो घ्नः" [ २. १ ११२. ] इति घ्नादेशे च—**ब्रह्मघ्नः**, एवं—कृतं हन्तीति—**कृतघ्नः**, शत्रुं हन्तीति—**शत्रुघ्नः**, वृत्रं हन्तीति—**वृत्रघ्नः**, भ्रूणं हन्तीति—**भ्रूणघ्नः**, बालं हन्तीति—**बालघ्नः**, शशं हन्तीति—**शशघ्नी पक्षिजातिः**, टित्वात् स्त्रियां ङीः । गां हन्तीति —**गोघ्नः पातकी** । "कर्तरि" [ ५. १. ३. ] इत्यनेनानुक्तविशेषस्य कृत्प्रत्ययस्य कर्तरि विधानादन्यस्मिन् कारकेऽसिद्धिमाशङ्क्याह—**बहुलाधिकारात् सम्प्रदानेऽपी**ति, सम्प्रदाने प्रयोगमाह—**गां हन्ति यस्मै आगताय दातुं स–गोघ्नोऽतिथिः** । "ब्रह्मादेः" इत्येव वक्तव्ये बहुवचनेन निर्देशो व्यर्थं इत्याशङ्कायामाह—**बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवति,** तेन 'बलभद्रः प्रलम्बघ्नः' इत्यादयः प्रयोगाः सिद्धाः । "अचित्ते टक्" [ ५. १. ८३. ] इत्यनेन सिद्धिमाशङ्क्याह—**चित्तवदर्थं आरम्भः** इति–चित्तवान् कर्ता अर्थः प्रयोजनं यस्य तादृश इत्यर्थः ॥ ५. १, ८५. ॥

## हस्ति-बाहु-कपाटाच्छक्तौ । ५. १. ८६. ॥

**त० प्र०—एभ्यः कर्मभ्यः पराद्धन्तेः शक्तौ गम्यमानायां टक् भवति । चित्तवदर्थ आरम्भः । हस्तिनं हन्तुं शक्तः–हस्तिघ्नो मनुष्यः, बाहुघ्नो मल्लः, कपाटघ्नश्चौरः । शक्ताविति किम् ? हस्तिनं हन्ति विषेण—हस्तिघातो रसदः ॥८६॥**

**श० म० न्यासानुसन्धानम्—हस्ति०** । पूर्वेण सिद्धिं परिहरति—**चित्तवदर्थं आरम्भः** इति । हस्तिनं हन्तुं शक्त इति टकि प्राग्वदुपान्त्यलोपे घ्नादेशे च—**हस्तिघ्नो मनुष्यः** इति, एवं बाहुं हन्तुं शक्त इति—**बाहुघ्नो मल्लः**, कपाटं हन्तुं शक्त इति—**कपाटघ्नश्चौरः** । बाहुघ्न इत्यत्र हन्धातुर्न प्राणवियोगानुकूले व्यापारे प्रयुक्तोऽपि तु आघातमात्रे बाहोरप्राणित्वात् मल्लः स्वशक्तिप्रदर्शनाय बाहुमाहत्य तादृशं शब्दं जनयति येन प्रतिद्वन्द्वी त्रस्तः स्यात् । कपाटघ्नश्चौर इत्यत्र न केवलं चौरस्य शारीरिकी शक्तिर्गम्याऽपि तु बुद्धेरपि तादृशी शक्तिर्यया विनैव प्रकाशं [ लोकेषु प्राकट्यं ] कपाटं हन्तीति । पृच्छति—**शक्ताविति किमि**ति—विनापि तद्ग्रहणं प्रयोगेण शक्तिर्गम्यत एवेति प्रश्नाशयः । न केवलं शक्त्यैव हस्ती मारयितुं शक्यतेऽपि तु शक्तिविकलेनापि विषादिना हननस्य साध्यत्वात् तत्र हस्तिघ्न इति प्रयोगस्य वारणाय शक्तावित्यावश्यकमित्याह—**हस्तिनं हन्ति विषेणे**ति, तथा च तत्राणेवेत्याह—**हस्तिघातो रसदः** इति । अत्रोक्तं तत्त्वबोधिन्याम्—"यद्यपि शक्तिरस्ति, अशक्तस्य कर्तृत्वानुपपत्तेः, तथापि शक्तिग्रहणसामर्थ्यात् प्रकर्षो गम्यते, तेन स्वबलेनैव [ शरीरजेन बुद्धिजेन वा ] हन्तुं या शक्तिः सा गृह्यते" इति । तथा च विषेण गजहनने न कर्तुः स्वकीया शक्तिः प्रतीयतेऽपि तु विषस्यैवेति ॥ ५. १. ८६. ॥

### नगरादगजे । ५. १. ८७. ॥

**त० प्र०—नगरात् कर्मणः पराद्धन्तेर्गजवर्जिते कर्तरि टक् भवति । चित्तवदर्थ आरम्भः । नगरघ्नो व्याघ्रः । अगज इति किम् ? नगरघातो हस्ती ॥८७॥**

**श० म० न्यासानुसन्धानम्—नग०** । "अचित्ते टक्" [ ५. १. ८३. ] इति पूर्वसूत्रेण सिद्धिं वारयति—**चित्तवदर्थ आरम्भः** इति । यद्यपीदं सूत्रं विहाय पूर्वसूत्र एव नगरशब्दोऽपि पठ्यते तदापि नगरघ्न इति स्यादेव, शक्तेरत्रापि ज्ञायमानत्वात्, तथापि गजेऽपि प्रत्ययः स्यादेवेति तन्निवृत्तये योगविभाग आवश्यकः । नगरं हन्तीति—**नगरघ्नो व्याघ्रः** । पृच्छति—**अगज इति किमिति**—पूर्वत्रैव नगरशब्दः पठ्यतामिति प्रश्नाशयः । उत्तरयति —**नगरघातो हस्तीति**— अणो हि टका सरूपत्वेन नित्यबाधादण् न स्यादिति नगरघ्न इत्येव स्यादिति भावः ॥ ५. १. ८७. ॥

### राजघः । ५. १. ८८. ॥

**त० प्र०—राज्ञः कर्मणः पराद्धन्तेष्टक् प्रत्ययो घादेशश्च निपात्यते । राजानं हन्ति–राजघः ॥८८॥**

**श० म० न्यासानुसन्धानम्—राजघः । निपात्यते** इति—अलाक्षणिकं कार्यं विना निपातनमलभ्यमिति निपातनमाश्रितम्, तत्र वृत्तौ हन्तेरिति तन्त्रेण पञ्चम्यन्तषष्ठ्यन्तयोर्निर्देशः, तेन हन्तेः टक् प्रत्ययो भवति, हन्तेर्घादेशो भवतीत्यर्थो लभ्यते ॥ ५. १. ८८. ॥

### पाणिघ-ताडघौ शिल्पिनि । ५. १. ८९. ॥

**त० प्र०—पाणि-ताडाभ्यां कर्मभ्यां पराद्धन्तेः शिल्पिनि कर्तरि टक् घादेशश्च निपात्यते । पाणिं हन्ति–पाणिघः, ताडघः शिल्पी । पाणिना ताडेन च हन्तीति करणादपि केचित् । शिल्पिनीति किम् ? पाणिघातः, ताडघातः ॥८९॥**

**श० म० न्यासानुसन्धानम्—पाणि०** । पाणिं हन्तीति—**पाणिघः शिल्पी**, ताडं हन्तीति—**ताडघः शिल्पी** । मतान्तरमाह—**पाणिना ताडेन च हन्तीति करणादपि केचिदिति** । पृच्छति—**शिल्पिनीति किमिति**, उत्तरयति—**पाणिघातः, ताडघातः** इति—यथाकथञ्चित् हन्तीत्यणि घातादेशे च—पाणिघातः, ताडघात इति । ५. १. ८९. ॥

### कुक्ष्यात्मोदरात् भृगः खिः । ५. १. ९०. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् भृगो धातोः खिः प्रत्ययो भवति । कुक्षिमेव बिभर्ति–कुक्षिंभरिः, आत्मंभरिः, उदरंभरिः । उदरात् केचिदेवेच्छन्ति । खकारो मागमार्थः ॥९०॥**

**श० म० न्यासानुसन्धानम्—कुक्ष्या०** । "डुडुभृंग्क् पोषणे" कुक्षिमेव स्वीयमुदरमेव न परं, बिभर्ति पुष्णातीति खौ गुणे "खित्यनव्यया०" [ ३. २. १११. ] इति पूर्वस्य मेऽन्तागमे ङस्युक्तसमासे—**कुक्षिंभरिः**, एवम्—आत्मानमेव बिभर्तीति—**आत्मंभरिः**, उदरमेव बिभर्तीति—**उदरंभरिः** । "तौ मुमो०" [ १. ३. १४. ] इति मस्यानुस्वारानुनासिकौ भवत इति कुक्षिम्भरिः, आत्मम्भरिः, उदरम्भरिरित्यपि भवति । उदरशब्दे विशेषमाह—**उदरात् केचिदेवेच्छन्तीति**—"आत्मोदरकुक्षिषु" इति चन्द्रः, "ज्योत्स्नाकरम्भमुदरंभरयश्चकोराः" इति मुरारिः । पाणिनीयादिषु तु नोदरशब्दः पठ्यते । खकारस्य प्रयोगेऽश्रवणात् वैयर्थ्यमाशङ्क्याह—**खकारो मागमार्थः** इति—तथा च खित्त्वात् सर्वत्र मागमः ॥ ५. १. ९०. ॥

### अर्होऽच् । ५. १. ९१. ॥

**त० प्र०—कर्मणः परादर्हतेरच् प्रत्ययो भवति । अणोऽपवादः । पूजामर्हति–पूजार्हः साधुः, पूजार्हा प्रतिमा ॥९१॥**

**श० म० न्यासानुसन्धानम्—अर्होऽच् । अणोऽपवादः** इति—"कर्मणोऽण्" [ ५. १. ७२. ] इत्यणोऽपवादः, अचाऽणः सरूपत्वेन नित्यापवादत्वमित्यर्थः । "अर्हं पूजायाम्" पूजामर्हतीत्यचि ङस्युक्तसमासे—**पूजार्हः साधुः** इति–विशिष्टवाचकपदानां सति विशेषणवाचकपदसमभिव्याहारे विशेष्यमात्रपरत्वम्' इति 'अर्हति' इत्यस्य योग्यो भवति [ पूजाया ] इत्यर्थः ।

अर्हतेरणि सत्यपि पुंसि प्रयोगे विशेषाभावेन स्त्रियां विशेषमाह—**पूजार्हा प्रतिमे**ति—पूजामर्हतीति पूजार्हा पूजनयोग्येत्यर्थः, अत्राणि सति हि "अणञे०" [ २. ४. २०. ] इति ङीः स्यात्, अचि तु आबेव भवति । 'प्रतिमा' इत्यनेन देवप्रतिमा पूजार्हजनप्रतिमा वा ग्राह्या सर्वस्याः प्रतिमायाः पूजार्हत्वायोगात् ॥ ५. १. ६१. ॥

## धनु–र्दण्ड–त्सरु–लाङ्गला–ङ्कुशर्ष्टि–यष्टि–शक्ति–तोमर–घटाद् ग्रहः । ५. १. ६२. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् ग्रहेरच् प्रत्ययो भवति । धनुर्गृह्णाति–धनुर्ग्रहः, दण्डग्रहः, त्सरुग्रहः, लाङ्गलग्रहः, अङ्कुशग्रहः, ऋष्टिग्रहः, यष्टिग्रहः, शक्तिग्रहः, तोमरग्रहः, घटग्रहः, *नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्* इति–घटीग्रहः । अणपीत्येके–'धनुर्ग्राहः, दण्डग्राहः' इत्यादि चोदाहरन्ति ॥६२॥**

**श० म० न्यासानुसन्धानम्—धनु०** । "ग्रहीश् उपादाने" धनुर्गृह्णातीत्यचि ङस्युक्तसमासे–**धनुर्ग्रहः** इति, एवं—दण्डं गृह्णातीति—**दण्डग्रहः**, त्सरुं कृपाणमुष्टिं गृह्णातीति—**त्सरुग्रहः**, लाङ्गलं हलं गृह्णातीति—**लाङ्गलग्रहः**, अङ्कुशं गृह्णातीति—**अङ्कुशग्रहः**, ऋष्टिं खड्गं गृह्णातीति—ऋष्टिग्रहः, यष्टिं गृह्णातीति—**यष्टिग्रहः**, शक्तिं शस्त्रविशेषं गृह्णातीति—**शक्तिग्रहः**, तोमरं गृह्णातीति—**तोमरग्रहः**, घटं गृह्णातीति—**घटग्रहः** । घटीं गृह्णातीति—**घटीग्रहः**, अस्य साधनीयत्वेन तदुपायमाह—***नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्*** इति—तथा च घटेति नामग्रहणे लिङ्गबोधकप्रत्ययविशिष्टस्य घटीशब्दस्यापि ग्रहणेन घटीग्रह इत्यस्यापि सिद्धिरित्यर्थः । मतान्तरमाह—**अणपीत्येके** इति, ते हि—**'धनुर्ग्राहः, दण्डग्राहः' इत्यादि चोदाहरन्ती**ति ॥ ५. १. ६२. ॥

## सूत्राद्धारणे । ५. १. ६३. ॥

**त० प्र०—सूत्रं कार्पासादिमयं लक्षणसूत्रं वाऽविशेषेण गृह्यते । सूत्रात् कर्मणः परात् ग्रहेर्ग्रहणपूर्वके धारणेऽर्थे वर्तमानादच् प्रत्ययो भवति । सूत्रं गृह्णाति–सूत्रग्रहः प्राज्ञः सूत्रधारो वा, सूत्रमुपादाय धारयतीत्यर्थः । अन्ये त्ववधारणे एवेच्छन्ति, तन्मते–सूत्रग्रहः प्राज्ञ एवोच्यते । धारण इति किम् ? सूत्रग्राहः, यो हि सूत्रं गृह्णाति न तु धारयति स एवमुच्यते ॥६३॥**

**श० म० न्यासानुसन्धानम्—सूत्रा०** । सूत्रशब्दस्य

"अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

इति परिभाषिते वाग्विशेषे, तन्तुसामान्ये च प्रयुक्तत्वेनात्र कस्य ग्रहणमित्याह—**सूत्रं कार्पासादिमयं लक्षणसूत्रं वाऽविशेषेण गृह्यते** इति—विशेषग्रहणे मानाभावादिति भावः । ग्रहधातोर्ग्रहणार्थकत्वेनैव सूत्रग्रहणकर्तरि प्रयोगस्य निर्बाधत्वेन 'धारणे' इति यदुक्तं तस्य फलमाह—**ग्रहणपूर्वके धारणेऽर्थे वर्तमाना**दिति । सूत्रं गृह्णातीत्यचि ङस्युक्तसमासे—**सूत्रग्रहः प्राज्ञः सूत्रधारो वे**ति, प्रयोगार्थमाह—**सूत्रमुपादाय धारयतीत्यर्थः** इति—प्राज्ञो गुरोः सकाशात् लक्षणसूत्रं प्राप्य धारयति, अन्यश्च कार्पासादिमयं कुतश्चनोपादाय धारयति । मतान्तरमाह—**अन्ये त्ववधारणे एवेच्छन्ती**ति—अवधारणं नियमः, तथा च नियमेन धारणे एव सूत्रग्रह इति प्रयोगः, न तु कदाचिदुपादाय किञ्चित् कालं धारयन् पश्चात् त्यजन् सूत्रग्रहो भवितुमर्हति तादृशश्च लक्षणसूत्रधारक एवेति, तदाह—**प्राज्ञ एवोच्यते** इति, पाणिनीयमते तु कार्पासादिनिर्मितं सूत्रमपि यज्ञोपवीतादिसंज्ञकं ब्राह्मण्यादिलक्षणं सूत्रमेवेति तद्धारको ब्राह्मणादिरपि सूत्रग्रह एव । पृच्छति—**धारण इति किमि**ति—लोके ग्रहणधारणयोः पर्यायप्रायत्वेन धारण इत्यस्य वैयर्थ्यमिति प्रश्नाशयः । ग्रहधातोरुपादानमात्रमर्थो न तु धारणमपि, तथा च यः केवलं गृह्णात्येव तत्र नायं प्रयोग इत्याह—**यो हि सूत्रं गृह्णाति न तु धारयति स** इति, **एवमुच्यते**—सूत्रग्राह इति कथ्यते, तत्राणेव भवतीति भावः ॥ ५. १. ६३. ॥

## आयुधादिभ्यो धृगोऽदण्डादेः । ५. १. ६४. ॥

**त० प्र०—दण्डादीन् वर्जयित्वा आयुधादिभ्यः कर्मभ्यः परात् धृगो धातोरच् भवति । धनुर्धरति–धनुर्धरः, शक्तिधरः, चक्रधरः, वज्रधरः, शूलधरः, हलधरः । आदिग्रहणाद् भूधरः, जलधरः, विषधरः, शशधरः, विद्या-**

**धरः, श्रीधरः, जटाधरः, पयोधरः । बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवति । अदण्डादेरिति किम् ? दण्डधारः, कुण्डधारः, काण्डधारः, कर्णधारः, सूत्रधारः, छत्रधारः ॥९४॥**

**श० म० न्यासानुसन्धानम्—आयु०** । अत्रादिशब्दः प्रकारवाचको न तु प्रभृत्यर्थकः, तथा चायुधवाचकप्रकाराः—आयुधवाचकसदृशाः शब्दा आयुधादित्वेन गृह्यन्ते, न तु आयुध-शस्त्रप्रभृतयः शब्दा गृह्यन्ते, केवलमायुधवाचकस्यैव ग्रहणेऽभिमते तु "आयुधेभ्यः" इत्येव ब्रूयात् । "धृंग् धारणे" धनुर्धरतीत्यचि गुणे ङस्युक्तसमासे च—**धनुर्धरः** । एवं—शक्तिं धरति—**शक्तिधरः**, चक्रं धरति—**चक्रधरः**, वज्रं धरति—**वज्रधरः**, शूलं धरति—**शूलधरः**, हलं धरति—**हलधरः** । आदिशब्दग्रहणस्य प्रयोजनमाह—**आदिग्रहणात् भूधरः** इत्यादि, आदिशब्दस्य प्रकारवाचकत्वमित्युक्तम्, यथा धनुरादयो धार्यन्ते तथा भू-जलादयोऽपीत्यायुधसादृश्यं तेषाम् । भुवं जलं विषं शशं विद्यां श्रियं जटां पयश्च धरतीति—**भूधरः, जलधरः, विषधरः, शशधरः, विद्याधरः, श्रीधरः, जटाधरः, पयोधरः** इति । यदि सादृश्यग्रहणार्थमादिशब्दस्य प्रयोगस्तर्हि भवतु नाम, किन्त्वेकवचनेनैव निर्देश उचितो बहुवचनग्रहणस्य वैयर्थ्यमिति चेत् ? अत्राह—**बहुवचनाद् यथादर्शनमन्येभ्योऽपीति**—उक्तादन्येभ्योऽपीति भावः । दण्डादिवर्जनप्रयोजनं पृच्छति—**अदण्डादेरिति किमिति**, उत्तरयति—**दण्डधारः** इति—दण्डं धरतीति—"कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि वृद्धौ ङस्युक्तसमासे—दण्डधारः एवं—कुण्डं काण्डं कर्णं सूत्रं छत्रं च धरतीति—**कुण्डधारः, काण्डधारः, कर्णधारः, सूत्रधारः, छत्रधारः** इति—वर्जनाभावेऽत्राप्यच् प्रवर्तेत, स च नेष्यत इति भावः ॥ ५. १. ९४. ॥

## हृगो वयो-ऽनुद्यमे । ५. १. ९५. ॥

**त०प्र०—कर्मणः परात् हरतेर्वयसि अनुद्यमे च गम्यमाने अच् भवति । प्राणिनां कालकृतावस्था वयः । उद्यम उत्क्षेपणम्, आकाशस्थस्य वा धारणम्, तदभावोऽनुद्यमः । अस्थिहरः श्वशिशुः, कवचहरः क्षत्रियकुमारः । अनुद्यमे—अंशहरो दायादः, मनोहरः प्रासादः, मनोहरा माला । संज्ञायां टोऽपीति कश्चित्—मनोहरी विषहरी मणिः । वयो-ऽनुद्यम इति किम् ? भारहारः । वयसि क्रियमाणः संभाव्यमानो वोद्यम उच्यमानो वयो गमयतीति उद्यमार्थं वयोग्रहणम् ॥९५॥**

**श० म० न्यासानुसन्धानम्—हृगो०** । '**वयोऽनुद्यमे**' इत्यत्र समाहारद्वन्द्व एवेति स्पष्टयति—**वयसि अनुद्यमे च गम्यमाने** इति । वयस्शब्दस्यार्थान्तरेऽ-[पक्षिण्य]पि प्रयोगदर्शनादिह ग्राह्यमर्थं व्याचष्टे—**प्राणिनां कालकृताऽवस्था वयः** इति—कालकृतावस्थाभेदो यद्यपि स्थावराणामपि भवत्येव, किन्तु न तत्र वयसः प्रयोग इति सूचनाय प्राणिनामित्युक्तम्, यथा प्राणिषु कालकृतो विशेषः परिलक्ष्यते न तथाऽप्राणिष्विति प्रसिद्धिमनुरुध्येदम् । उद्यमशब्दस्याप्युद्योगे व्यापारसाधारणे वा प्रवृत्तिरिति तदर्थस्य ग्रहणाभावायाह—**उद्यम उत्क्षेपणमिति** । उत्क्षेपणार्थस्य धात्वर्थाननुगुणत्वेन, तत्रोद्यमशब्दप्रयोगस्याप्राचुर्येण चार्थान्तरमाह—**आकाशस्थस्य वा धारणमिति** । "हृंग् हरणे" अस्थि हरतीति अचि गुणे ङस्युक्तसमासे—**अस्थिहरः श्वशिशुरिति**—अस्थ्युत्क्षेपणसमर्थे वयसि वर्तत इत्येके, अपरे तु—अस्थिहरणेन हि तस्य तादृशावस्था गम्यते यत्र तस्य दन्ता अस्थिचर्वणयोग्या न भवन्ति । कवचं हरतीति—**कवचहरः क्षत्रियकुमारः** इति—कवचहरणयोग्यतया क्षत्रियस्य कश्चनावस्थाविशेषो गम्यत इति वयोऽर्थः स्पष्टः । अनुद्यमे उदाहर्तुमवतारयति—**अनुद्यमे**—इति । अंशं हरतीति—**अंशहरो दायादः,** मनो हरतीति—**मनोहरः प्रासादः,** मनो हरति या सा—**मनोहरा माला,** नं चांशादिहरणमुद्यम एवेति वाच्यम्, पूर्वं व्याख्यातस्योत्क्षेपणस्योपरि धारणस्य वा तत्राभावात् । मतान्तरमाह—**संज्ञायां टोऽपीति कश्चिदिति**, तन्मतेनोदाहरति—**मनोहरी विषहरी मणिरिति**—टित्त्वात् स्त्रियां ङीः, मणिशब्दः स्त्रीलिङ्गेऽपि वर्तते । पृच्छति **वयोऽनुद्यम इति किमिति**, उत्तरयति—**भारहारः** इति—नात्र वयोविवक्षा, नवा उद्यमाभाव इत्यस्याप्रवृत्त्या "कर्मणोऽण्" इत्यणेव भवति । नन्वनुद्यम इत्युक्त्यैव उद्यमभिन्ने सर्वत्र प्रत्ययविधानाद् वयस्यपि भविष्यत्येवेति वयोग्रह-

गस्य वैयर्थ्यमाशङ्कयाह— **वयसि क्रिप्रमाणः सम्भाव्यमानो वोद्यम उच्यमानो वयो गमयतीति**— नहि श्वशिशुः सर्वदाऽस्थि हरति, नवा क्षत्रियकुमारः सर्वदा कवचं हरति, असति अस्थिहरणे कवचहरणे वा सोऽस्थिहरशब्देन कवचहरशब्देन वा कथयितुं शक्यतेऽतः सम्भाव्यमानो वेत्युक्तम् । असत्यपि कवचहरणे तत्र कवचहरणसम्भावनासत्त्वेन तादृशप्रयोगस्यौचित्यात् । एवं च कवचहरणे उद्यमार्थसत्त्वेन 'अनुद्यमने' इत्युक्त्या तत्र प्रत्ययाप्रसक्तेर्वयोग्रहणं सार्थकमिति, तदाह—**उद्यमार्थं वयोग्रहणमिति**—अनुद्यमन इति पर्युदासप्रवृत्तिवारणायेति पर्यवसितमिति ॥ ५. १. ९५. ॥

## आङः शीले । ५. १. ९६. ॥

**त० प्र०—कर्मणः परादाङ्पूर्वाद्धरतेः शीले गम्यमानेऽच् प्रत्ययो भवति । शीलं स्वाभाविकी प्रवृत्तिः । पुष्पाण्याहरतीत्येवंशीलः—पुष्पाहरः, फलाहरः, सुखाहरः, पुष्पाद्याहरणे स्वाभाविकी फलनिरपेक्षा वृत्तिरस्येत्यर्थः । आङ इति किम् ? पुष्पाणि हर्ता, तृन् । शील इति किम् ? पुष्पाहारः । 'सुखाहरः' इत्यशीलेऽनुद्यमेऽर्थे पूर्वेणाच् । लिहादिप्रपञ्चः प्रकरणमिदम् ॥९६॥**

**श० म० न्यासानुसन्धानम्—आङः०** शीलशब्दस्याभ्यासप्रवृत्तावपि प्रयोगेणेह तदर्थग्रहणवारणाय शीलशब्दार्थं ग्राहयति—**शीलं स्वाभाविकी प्रवृत्तिरिति**, स्वाभाविकीं प्रवृत्तिं स्वयमेव व्याख्यास्यति । पुष्पाणि फलानि सुखं वा आहरतीत्येवंशीलः—**पुष्पाहरः, फलाहारः, सुखाहरः** इति, एतदर्थमाह—**पुष्पाद्याहरणे स्वाभाविकी—फलनिरपेक्षा वृत्तिरस्येत्यर्थः** इति—स्वभावत एव पुष्पादि आहरति, पुष्पेषु प्राकृतिकं प्रेमैव तदाहरणे कारणं न तु देवपूजादिकं तस्य प्रयोजनमिति भावः । पदप्रयोजनं पृच्छति—**आङ इति किमिति**, उत्तरयति—**पुष्पाणि हर्तेति**, "तृन् शीलधर्मसाधुषु" [ ५. २. २७. ] इति शीलादिसदर्थे तृन् प्रत्ययः, तदाह—**तृन्** इति—तृन्नुदन्ता०" [ २. २. ९०. ] इति षष्ठीनिषेधाद् द्वितीया ज्ञेया । **पृच्छति—शील इति किमिति**, उत्तरयति—**पुष्पाहारः** इति—देवपूजाद्यर्थं पुष्पाणि आहरतीत्यर्थः, अत्र शीलार्थाभावादस्याप्रवृत्त्याऽणेव भवतीत्यर्थः । शीलादन्यत्रापि सुखाहर इति प्रयोगस्य दृष्टतया तदुपपत्तिमाह—**अशीलेऽनुद्यमेऽर्थे पूर्वेणाच्** इति—यद्यप्येतत्सूत्राभावे शीलेऽशीले च तेन प्रत्ययसिद्धौ सूत्रमिदं नियमार्थं भविष्यतीति आङः परात् हृगः शील एवाच् इति, तथापि प्रामाणिकप्रयोगानुरोधेन स्थितस्य गतिश्चिन्तनीयेति कृत्वेदमिति प्रतिभाति । लिहादेराकृतिगणत्वादेव पूजार्हादीनां सिद्धौ "अर्होऽच्" इत्यारभ्य प्रवृत्तस्याच्प्रकरणस्य वैयर्थ्यमाशङ्कयाह—**लिहादिप्रपञ्चः प्रकरणमिदमिति**, यद्यपि लिहादित्वादच् सिद्धस्तथापि कस्मात् धातोः कस्मिन्नर्थे किमुपसर्गपूर्वादच् प्रत्यय इष्ट इति विशेषेण प्रपञ्चयितुमिदं प्रकरणमारब्धमिति नास्य वैयर्थ्यमिति हृदयम् ॥ ५. १. ९६. ॥

## दृति नाथात् पशाविः । ५. १. ९७. ॥

**त० प्र०—आभ्यां कर्मभ्यां पराद्धरतेः पशौ कर्तरि 'इः' प्रत्ययो भवति । दृतिं हरति—दृतिहरिः श्वा, नाथहरिः सिंहः । पशाविति किम् ? दृतिहारो व्याधः, नाथहारी गन्त्री ॥९७॥**

**श० म० न्यासानुसन्धानम्—दृति०** । दृतिः—चर्मखल्लः, चर्मभस्त्रा च, चर्म इत्यपि केचित्, नाथो नासारज्जुः । दृतिं हरतीति इप्रत्यये गुणे ङस्युक्तसमासे च—**दृतिहरिः श्वा**, नाथं हरतीति—**नाथहरिः सिंहः** । दृति-नाथहरणं पशुषु रूढं, तत्रैवायं प्रत्ययः, अन्यत्र तु तद्धरणं प्रयोजनकृतमिति न तत्र प्रत्यय इष्यते । एतदेव प्रश्नोत्तरद्वाराह—**पशाविति किमिति, दृतिहारो व्याधः** इति—अत्र पशुत्वाभावादत्रास्याप्रवृत्त्याऽणेव, एवं **नाथहारी गन्त्री**त्यत्रापि ज्ञेयम् ॥ ५. १. ९७. ॥

## रजः-फले-मलाद् ग्रहः । ५. १. ९८. ॥

**त० प्र०—एभ्यः कर्मभ्यः पराद् ग्रहेरिर्भवति । रजोग्रहिः कञ्चुकः, फलेग्रहिर्वृक्षः, सूत्रनिर्देशादेत्वम्; मलग्रहिः कम्बलः । रजो-मलाभ्यां केचिदेवेच्छन्ति ॥९८॥**

**श० म० न्यासानुसन्धानम्—रजः०** । "ग्रहीश् उपादाने" रजो गृह्णातीति—**रजोग्रहिः कञ्चुकः** । फलानि गृह्णातीति—**फलेग्रहिर्वृक्षः** इति—यद्यपि वृक्षः

फलानि धारयति न तु गृह्णाति, ग्रहणं हि प्रायोऽन्यत्र स्थितस्य वस्तुन उपादानं कथ्यते, तथापि ग्रहणोपादानसाधारण्येन लोके व्यवहारादिहापि तदनुरोधेनैवोदाहरणम्, फलावन्ध्यो वृक्षः फलेग्रहिः, कविप्रयोगस्तूपादानार्थमादायापि प्रवृत्तः, तथाहि भट्टिः—

"आत्मंभरिस्त्वं पिशितैर्नराणां,
फलेग्रहीन् हंसि वनस्पतीनाम् ।
शौवस्तिकत्वं विभवा न येषां,
व्रजन्ति तेषां दयसे नकस्मात् ॥" इति,

मारीचनामानं राक्षसं प्रति यज्ञरक्षकस्य श्रीमतो रामचन्द्रस्येयमुक्तिः, 'नराणां पिशितैः, आत्मंभरिः [ स्वोदरपूरकः ] त्वम्, वनस्पतीनां फलेग्रहीन् [ वनस्पतिफलमात्रमुपादाय तदाहारेण जीवतः ] हंसि, [ किञ्च ] येषां विभवाः शौवस्तिकत्वं न व्रजन्ति, तेषां कथं न दयसे' इत्यन्वयः । एते मुनयः परधनविमुखाः, स्वतोऽपि धनसंग्रहहीनाः, अतः सर्वेषां दयापात्रमिति त्वयाऽपि दयनीयमित्यभिप्रायः । एवं चात्रोपादानार्थे प्रयोग इति स्पष्टम् । अमरकोशेऽपि "स्यादवन्ध्यः फलेग्रहिः" इति वृक्षप्रकारेऽभिहितः । 'फले' इत्येकारान्तस्य नामत्वमप्रसिद्धमिति कथमेकारान्तत्वमित्याह—**सूत्रे निर्देशादेत्वमिति**—सूत्रे 'फले' इत्येकारान्तनिर्देशादेवैत्वमिति भावः । मलं गृह्णातीति—**मलेग्रहिः** कम्बलः । पाणिनीयादौ "फलेग्रहिरात्मंभरिश्च" [ ३. २. २६. ] इति सूत्रे फलेग्रहिरेव निपात्यते, रजोग्रहि-मलग्रही न व्युत्पाद्येते, तदभिप्रायेणाह **रजोमलाभ्यां केचिदेवेच्छन्तीति**, तथा च सति प्रामाणिके प्रयोगे तैरुपायान्तरमाश्रयणीयं व्याकरणान्तरशरणं वा प्रतिपत्तव्यमित्यभिप्रायः ॥ ५. १. ९८. ॥

## देव-वातादापः । ५. १. ९९. ॥

**त० प्र०—देव-वाताभ्यां कर्मभ्यां परादापेर्धातोरिः प्रत्ययो भवति । देवानाप्नोति–देवापिः, वातापिः ॥९९॥**

**श० म० न्यासानुसन्धानम्—देव०** । "आप्लृंट् व्याप्तौ" देवानाप्नोतीति—**देवापिः** । वातमाप्नोतीति—**वातापिः** ॥ ५. १. ९९. ॥

## शकृत्-स्तम्बाद् वत्स-व्रीहौ कृगः । ५. १. १००. ॥

**त० प्र०—शकृत्-स्तम्बाभ्यां कर्मभ्यां परात् कृगो यथासंख्यं वत्से व्रीहौ च कर्तरि 'इः' प्रत्ययो भवति । शकृत्करिर्वत्सः, स्तम्बकरिर्व्रीहिः । वत्स-व्रीहाविति किम् ? शकृत्कारः, स्तम्बकारः ॥१००॥**

**श० म० न्यासानुसन्धानम्—शकृत्० । वत्से व्रीहौ च कर्तरीति**—एतेन व्रीहिवत्सग्रहणं प्रत्ययार्थस्य कर्तुर्विशेषणमिति दर्शयति, प्रत्ययार्थत्वं तु "कर्तरि" [ ५. १. ३. ] कृदिति वचनात् । कुतः पुनरेतदवसितं प्रत्ययार्थस्य विशेषणमेवेति, न पुनर्बाधकमेवेति, तदुच्यते—धातोः प्रत्ययस्य विधानात् तदर्थस्य येन सम्बन्धस्तत्र वाच्ये प्रत्ययेन भवितव्यम्, धात्वर्थः क्रिया, तस्याश्च साधनेन सम्बन्धो न वस्तुस्वरूपेण, साधनं च शक्तिः, न वस्तुस्वरूपम्, व्रीहिशब्दो वत्सशब्दश्च वस्तुस्वरूपेण स्वार्थमाचष्टे न शक्तिस्वरूपेणेति, तेनाशक्तिस्वरूपेण प्रतीयमानो व्रीहिर्वत्सश्च नार्हति प्रत्ययार्थो भवितुम्, सोऽप्रत्ययार्थः सन्नशक्तित्वात् कथमिमं प्रत्ययार्थं बाधेत, तस्मात् प्रत्ययार्थस्तेन कर्तरि विशिष्यते इति युक्तमुक्तं वत्से व्रीहौ च कर्तरीति । एष न्यायोऽन्यत्रापि प्रत्ययार्थविशेषणे द्रष्टव्यः ।

शकृत् करोतीति—**शकृत्करिर्वत्सः**, शकृच्छब्दः पुरीषवचनोऽपि वत्सकृतशुष्कप्रायपुरीषपरः, स्तम्बं करोतीति—**स्तम्बकरिर्व्रीहिः**, स्तम्बशब्दस्तृणनिचयपरः, यद्यपि योगार्थोऽन्यत्रापि पशौ धान्ये वा सम्भवति, तथापि रूढिर्वत्सव्रीह्योरेव । "वत्सः शकृत्करिस्तर्णः" इति "व्रीहिः स्तम्बकरिश्च तत्" इति चाभिधानचिन्तामणिः । पदकृत्यं पृच्छति—**वत्सव्रीहाविति किमिति**, उत्तरयति—**शकृत्कारः, स्तम्बकारः** इति—नात्र वत्सो व्रीहिर्वा विवक्षित इति नास्य प्रवृत्तिरित्यणेव भवतीत्यर्थः ॥ ५. १. १००. ॥

## किं-यत्-तद्-बहोरः । ५. १. १०१. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् करोतेरः प्रत्ययो भवति । किं करोति—किंकरः, किंकरा; यत्करः, यत्करा; तत्करः, तत्करा, चौर्ये—तस्करः । बहुकरः, बहुकरा;**

**बहुकरीति संख्यावचनादुत्तरेण टः । जातिरिदानीं किंकरीति हेत्वादौ टः ॥१०१॥**

**श० म० न्यासानुसन्धानम्—किं०** । किं करोमीत्याज्ञां प्रतीक्षते इति—**किङ्करः** इति—कुरु इति विनियुक्तः किमिति पृच्छति तदुत्तरं यथादिष्टं करोतीति भावः । किङ्करशब्दो दासपर्यायः, दासस्यानुकूलत्वेनानुकूलेऽर्थे "हेतु-तच्छील०" [ ५. १. १०३. ] इति परसूत्रेण टप्रत्यये विहितेऽपि किङ्करशब्दस्य सिद्ध्या 'अ'-प्रत्ययविधानस्य फलं स्त्रियामिति द्योतयितुं स्त्रियामुदाहरति—**किङ्करा** इति—टप्रत्यये सति टित्वात् ङीः स्यात्, अप्रत्यये कृते तु आप् भवतीति भावः । एवं यत् करोतीति पुंसि—**यत्करः**, स्त्रियां—**यत्करा**, तत् करोतीति पुंसि—**तत्करः**, स्त्रियां—**तत्करा । चौर्ये तस्करः** इति—चौर्ये प्रवृत्तिनिमित्ते इति भावः, नहि तस्करस्य चौर्यमर्थोऽपि तु चोरः, तत्रार्थे तत्कर इत्यस्यैव वर्चस्कादित्वात् तस्कर इति रूपं प्रतिपाद्यम् । बहु करोतीति—**बहुकरः** इति—"खलपूः स्यात् बहुकरः" इत्यभिधानचिन्तामणिः, बहुधान्यार्जक इत्यन्ये, स्त्रियां—**बहुकरा** । स्त्रियां 'बहुकरी' इति रूपस्यापि प्रयुक्ततया तत्सिद्ध्युपायमाह—**बहुकरीति संख्यावचनादुत्तरेण टः** इति—बहुशब्दः संख्यावाची वैपुल्यवाची च, तत्र वैपुल्यभिन्नार्थकस्यैव संख्यासंज्ञेति "बहुगणं भेदे" [ १. १. ४०. ] इति सूत्रे स्पष्टम्, ततश्च वैपुल्यवाचिन एवेह ग्रहणम्, संख्यावाचिनस्तु "संख्या०" इत्युत्तरेण टो भवत्येव, तथा च टित्वात् स्त्रियां ङीप्रत्यये बहुकरीति "संमार्जनी बहुकरी" इति । किङ्करीशब्दस्यापि प्रयोगेषु दृष्टतयाऽऽह—**जातिरिदानीं किङ्करीति हेत्वादौ टः** इति—किङ्करणशीला किंकरी, न किञ्चित् करोति निष्प्रयोजनेति यावत्, अत्र "हेतुतच्छीलानुकूले०" [ ५. १. १०३. ] इति टे टित्वाच्च स्त्रियां ङीप्रत्यये किङ्करीशब्दसिद्धिरिति भावः । शूद्रत्वादेरिवानेकव्यक्तिवृत्तित्वेन जातित्वमिति तदाश्रयणेन वृत्तिग्रन्थ उपपन्नः, तथा च वृषलीति यथा भवति तथैव किङ्करीत्यत्रापि ङीर्भवतीति तस्य सिद्ध्युपायभेद उक्तः—हेत्वादौ टः, यद्यपि हेत्वादिषु टविधाने जातित्वाभावेऽपि ङीर्भविष्यत्येवेति जातित्वस्वीकारो नावश्यकः, तथापि हेत्वाद्यभावेऽपि जातित्वमावश्यकमेवेति हेतुसत्त्वेऽपि तत्स्वीकारे दोषाभाव इति भावः । "जातिरिदानीं किङ्करीति तु "हेतुतच्छील०" इति टे रूपम्, यथा विद्या यशस्करी" इति हेमधातुपारायणे । पाणिनीये तु निर्गलितोऽयमंशः—किङ्करीति प्रयोगो वार्तिककृतो मते—कियत्तद्बहुषु अहेत्वादौ अचो विधानेन, हेत्वादिविवक्षायां टेन, तदविवक्षायां पुंयोगविवक्षया च साधनीयः । सूत्रमते चाहेत्वादावपि टस्य विधानेन सर्वथोपपन्न एव प्रयोग इति तन्मते किंकरेत्येवानुपपन्नमिति । उभयविधप्रयोगदर्शनेन मतद्वयमप्यादरणीयमिति प्रक्रियाग्रन्थोक्तविकल्पः फलित इति ॥ ५. १. १०१. ॥

## संख्याऽहर्दिवा-विभा-निशा-प्रभा-भाश्चित्र-कर्त्राद्यन्ता-ऽनन्त-कार-बाह्वरुर्धनुर्नान्दी-लिपि-लिबि-बलि-भक्ति-क्षेत्र-जङ्घा-क्षपा-क्षणदा-रजनि-दोषा-दिन-दिवसाट्टः

। ५. १. १०२. ॥

**त० प्र०—संख्येत्यर्थप्रधानमपि, तेनैकादिपरिग्रहः । एभ्यः कर्मभ्यः परात् करोतेष्टः प्रत्ययो भवति । अहेत्वाद्यर्थ आरम्भः । संख्यां करोति—संख्याकरः, एककरः, द्विकरः, त्रिकरः । अहस्करः, दिवाकरः, विभाकरः, निशाकरः, प्रभाकरः, भास्करः, चित्रकरः, कर्तृकरः, आदिकरः, अन्तकरः, अनन्तकरः कारकरः, बाहुकरः, अरुष्करः, धनुष्करः, नान्दीकरः, लिपिकरः, लिबिकरः, बलिकरः, भक्तिकरः, क्षेत्रकरः, जङ्घाकरः, क्षपाकरः, क्षणदाकरः, रजनिकरः, रजनीकरः, दोषाकरः, दिनकरः, दिवसकरः । टकारो ङ्यर्थः—संख्याकरी ॥१०२॥**

**श० म० न्यासानुसन्धानम्—संख्या०** । व्याकरणे शब्दस्य स्वरूपमात्रवाचकत्वस्य सिद्धान्तितत्वेन संख्येति शब्दस्यापि स्वरूपमात्रपरत्वं स्यादित्याशङ्कायामाह—**संख्येत्यर्थप्रधानमपीति**—अपिना स्वरूपपरमपीति भावः । **तेनैकादिपरिग्रहः** इति—तेन—अर्थप्राधान्यविवक्षणेन संख्यार्थका एकादयः शब्दा गृह्यन्त इति भावः । अयमाशयः—संख्याशब्दो व्याकरणशास्त्रसंकेतितोऽपीति

व्याकरणशास्त्रसंकेतितशब्दस्य स्वबोध्यपरत्वमपीत्यपि शास्त्रकृत्सम्मतमेवेति स्वरूपस्य स्वबोध्यार्थस्य चोभयस्य परिग्रह इति भावः । पाणिनीये तु संख्याशब्दस्यात्र स्वबोध्यार्थवाचकपरत्वमेवेति—एकादिशब्देभ्यः परत्वे एव प्रत्ययो भवति, न तु संख्याशब्दात् परत्वे, संख्याकर इत्यादिप्रयोगस्य प्रामाणिकत्वे च हेत्वादिविवक्षया निर्वाहः कार्यः । उत्तरसूत्रेणैव शब्दादिवर्जितात् कर्मणः परत्वे टो भविष्यत्येवेत्यस्य सूत्रस्य वैयर्थ्यमाशङ्क्याह—**अहेत्वाद्यर्थं आरम्भः** इति, तथा चैभ्यः परत्वे हेत्वादिसत्त्वेऽसत्त्वे चोभयथा टो भवतीति भावः, हेत्वादिसत्त्वे परेणासत्त्वे चानेनेति विवेकः । संख्यां करोतीति—**संख्याकरः**, एवम्—एकं द्वौ त्रीन् करोतीति—**एककरः, द्विकरः, त्रिकरः** । अहः करोतीति—**अहस्करः** इति—'अहन्' इत्यस्य "रो लुप्यरि" [ २. १. ७५. ] इति नकारस्य रेफः, तस्य "अतः कृ०" [ २. ३. ५. ] इति सत्वमत्र विज्ञेयम् । दिवा दिवसं करोतीति—**दिवाकरः** इति—'दिवा' इत्याकारान्तमव्ययमह्नीत्यर्थे तस्याधिकरणशक्तिप्रधानस्यापि वृत्तिविषये कर्मत्वं [ शक्तिमत्परत्वं ] बोध्यम्, यथा दिवाभूता रात्रिरित्यादौ दिवाशब्दस्य शक्तिमत्परत्वम् । दिवा अहनि अर्थात् प्राणिनश्चेष्टायुक्तान् करोतीति वा विग्रहः कर्मत्वाभावेऽप्युपादानसामर्थ्यात् भवति प्रत्ययः । विभां निशां प्रभां करोतीति—**विभाकरः, निशाकरः, प्रभाकरः** । भासः करोतीति—**भास्करः**, कस्कादित्वात् रेफस्य सकारः । चित्रं करोतीति—**चित्रकरः**, कर्तारं करोतीति—**कर्तृकरः** । आदिमन्तमनन्तं च करोतीति—**आदिकरः, अन्तकरः, अनन्तकरः** । अथानन्तग्रहणं किमर्थम् ? अन्तग्रहणादेवानन्तशब्देऽपि तदन्तविधिना भविष्यति, नैतदस्ति—सर्वस्मिन्नुपपदविधौ नहि तदन्तविधिरिष्यते । कर एव कारः प्रज्ञादित्वादण्, कारं बाहुं च करोतीति—**कारकरः, बाहुकरः** । अरुः क्षतम्, अरुः करोति, धनुः करोतीति च—**अरुष्करः, धनुष्करः** इति—"समासेऽसमस्तस्य" [ २. ३. १३. ] इति षत्वम् । नान्दीं—देवादिस्तुतिं करोतीति—**नान्दीकरः** "अक्षरन्यासे लिपिर्लिविः" इत्यभिधानचिन्तामणिः, क्षपा क्षणदा दोषा—रात्रिः, लिपिं लिविं बलिं भक्तिं क्षेत्रं जङ्घां क्षपां क्षणदां रजनिं रजनीं दोषा [ रात्रिं ] दिनं दिवसं च करोतीति—**लिपिकरः, लिविकरः, बलिकरः, भक्तिकरः, क्षेत्रकरः, जङ्घाकरः, क्षपाकरः, क्षणदाकरः, रजनिकरः, रजनीकरः, दोषाकरः, दिनकरः, दिवसकरः** । रजनिशब्दात् "इतोऽक्त्यर्थात्" [ २. ४. ३२. ] इति वा ङीप्रत्यये—रजनी, उभावपि स्त्रीलिङ्गाविति *एकदेशविकृतमनन्यवत्* इति रजनिग्रहणेन रजनीशब्दस्यापि ग्रहणमिति तत्राप्युदाहृतम् । टकारस्येत्संज्ञकत्वेनाकारमात्रस्यैव प्रयोगे श्रवणाट्टकारस्य वैयर्थ्यमित्याशङ्क्याह—**टकारो ङ्यर्थः** इति, तथा च पुंसि विशेषाभावेऽपि स्त्रियां विशेषो भवति, तदाह—**संख्याकरीति**—अत्र प्रत्ययस्य टित्त्वात् स्त्रियां ङीर्भवति, अन्यथा आबेव स्यादिति भावः ॥ ५. १. १०२. ॥

## हेतु-तच्छीला-ऽनुकूले-ऽशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात्

। ५. १. १०३. ॥

**त० प्र०—हेतुः प्रतीतशक्तिकं कारणम्, तच्छीलं तत्स्वभावः, अनुकूल आराध्यचित्तानुवर्ती । एषु कर्तृषु शब्दादिवर्जितात् कर्मणः परात् करोतेष्टः प्रत्ययो भवति । हेतौ—यशः करोति—यशस्करी विद्या, शोककरी कन्या, कुलकरं धनम् । तच्छीले—क्रीडाकरः, श्राद्धकरः । अनुकूले—प्रेषणाकरः, वचनकरः । हेत्वादिष्विति किम् ? कुम्भकारः । शब्दादिनिषेधः किम् ? शब्दकारः, श्लोककारः, कलहकारः, गाथाकारः, वैरकारः, चाटुकारः, सूत्रकारः, मन्त्रकारः, पदकारः तच्छीले ताच्छीलिकश्च प्रत्यय उदाहार्यः ॥१०३॥**

**श० म० न्यासानुसन्धानम्—हेतु०** । हेत्वादिशब्दार्थान् विवृणोति—**हेतुः प्रतीतशक्तिकं कारणमिति**—प्रतीता कार्यं प्रति प्रसिद्धा शक्तिर्यस्य तादृशकारणमात्रं हेतुरिति भावः, तथा च 'हेतुर्ना कारणं बीजम्" इति कोषानुसारं कारणमात्रमेव हेतुशब्दवाच्यं, न तु करणादिव्यावृत्तमिति तात्पर्यम् । **तच्छीलं तत्स्वभावः** इति—तत्पदेन प्रयोगार्थो गृह्यते, तादृशकार्यकरणस्य तद्व्यक्तिसम्बन्धिस्वभावत्वेऽप्ययं प्रत्यय इति । **अनुकूल आराध्यचित्तानुवर्तीति**—आराध्यस्य चित्तमनुवर्तते—तदनुकूलं चेष्टते यः स तथा । यशः करोतीति टे गुणे ङ्स्युक्त-

समासे टित्वात् स्त्रियां ङीप्रत्यये—**यशस्करी विद्येति**—विद्याया यशोहेतुत्वमिह गम्यते, "अतः कृ-कमि०" [ २. ३. ५. ] इति रस्य सत्वम् । एवं—शोकं करोतीति—**शोककरी कन्येति**—कन्यायाः शोकहेतुत्वमिह गम्यते । क्रीडां करोतीत्येवंशीलः—**क्रीडाकरः** । श्राद्धं करोतीत्येवंशीलः—**श्राद्धकरः** ।–प्रेषणां करोतीति—**प्रेषणाकरः**, अत्रानुकूल्यं गम्यते । वचनं करोतीति—**वचनकरः**, अत्र शिष्यादेरानुकूल्यं गम्यते । पदकृत्यं पृच्छति—**शब्दाविनिषेधः किमिति**, उत्तरयति—**शब्दकार** इत्यादिना । शब्दं श्लोकं कलहं गाथां वैरं चाटु सूत्रं मन्त्रं पदं च करोतीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि–**शब्दकारः, श्लोककारः, कलहकारः, गाथाकारः, वैरकारः, चाटुकारः, सूत्रकारः, मन्त्रकारः, पदकारः** इति, एषु यथासम्भवं हेत्वाद्यर्थो विज्ञेयोऽन्यथा तु द्व्यङ्गविकलता स्यात् । **तच्छीले ताच्छीलिकश्च प्रत्यय उदाहार्यः** इति - ताच्छीलिकः प्रत्ययः "अजातेः शीले" [ ५. १. १५४. ] इति विहितो **णिन्**, तथा च शब्दकारीत्यादय उदाहार्याः, शब्दादिप्रतिषेधाभावे विशेषविहितत्वात् तत्राप्ययमेव स्यादिति भावः ॥ ५. १. १०३. ॥

## भृतौ कर्मणः । ५. १. १०४. ॥

**त० प्र०—कर्मन्शब्दात् कर्मणः परात् करोतेर्भृतौ गम्यमानायां टो भवति । भृतिर्वेतनं कर्ममूल्यमिति यावत् । कर्मकरो भृतकः, कर्मकरी दासी । भृताविति किम् ? कर्मकारः । पुनः कर्मग्रहणं शब्दरूपकर्मप्रतिपत्त्यर्थम् ॥१०४॥**

**श० म० न्यासानुसन्धानम्—भृतौ०** । 'कर्मणः' इति पूर्वसूत्रानुवृत्तमस्य [ कर्मण इति पदस्य ] विशेषणमिति तदनुसारमेवार्थमाह—**कर्मन्शब्दात् कर्मणः परादिति** । भृतिशब्दस्य भावपरत्वे 'भरणेऽर्थे' इत्यर्थः स्यादितीह तस्य करणपरत्वमित्याह—**भृतिर्वेतनमिति**—भ्रियतेऽनयेति तस्य व्युत्पत्तिरित्याशयः । वेतनं परिचाययति—**कर्ममूल्यमिति यावदिति**—कृतस्य कर्मणो मूल्यं निष्क्रय इत्यर्थः, कर्मणि कृते तस्मै यत् पारिश्रमिकरूपेण दीयते तदित्याशयः । कर्म करोतीति—**कर्मकरो भृतकः** इति—वेतनं गृहीत्वा यः परार्थं कर्म करोति स भृतक इत्युच्यते । एवं स्त्रियां टित्वात् ङीप्रत्यये—**कर्मकरी दासी** । पदकृत्यं पृच्छति—**भृताविति किमिति**, उत्तरयति—**कर्मकारः**, इति—नात्र वेतनेन कर्मकरणमित्यस्याप्रवृत्त्या "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणेव भवति । कर्मन्शब्दस्य स्वशास्त्रपरिभाषितत्वेन तदर्थबोधकत्वमेव युक्तं, न तु शब्दस्वरूपपरत्वमिति शब्दस्वरूपपरतया व्याख्यानस्यायुक्तत्वमित्याशङ्कायामाह—**पुनः कर्मग्रहणं शब्दरूपकर्मप्रतिपत्त्यर्थमिति**—"कर्मणोऽण्" [ ५. १. ७२. ] इति सूत्रात् 'कर्मणः' इति पदं धाराप्रवाहन्यायेनानुवर्तत एव, तच्च पारिभाषितकर्मार्थपरमिति पुनः क्रियमाणं 'कर्मणः' इति पदं स्वरूपपर्यवसायीति भावः, परिभाषितार्थबोधकत्वे तस्य वैयर्थ्यमेव स्यादिति हृदयम् । तथा च कर्मन्शब्दादेव कर्मणः परत्वे भवति, नान्यस्मात् कर्मणः परत्वे इति ॥ ५. १. १०४. ॥

## क्षेम-प्रिय-मद्र-भद्रात् खाण् । ५. १. १०५. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् करोतेः 'ख अण्' इत्येतौ प्रत्ययौ भवतः । क्षेमं करोति—क्षेमंकरः, क्षेमकारः । प्रियंकरः, प्रियकारः । मद्रंकरः, मद्रकारः । भद्रंकरः, भद्रकारः । मद्रात् केचिदेवेच्छन्ति । एभ्य इति किम् ? तीर्थकरः, हेत्वादिषु टः । 'तीर्थंकरः, तीर्थंकारः' इत्यपि कश्चित् । खो वेति सिद्धे अण्ग्रहणं हेत्वादिषु टबाधनार्थम् । कथं योग-क्षेमकरी लोकस्येति ? उपपदविधिषु तदन्तविधेरनाश्रयणात्, अत एव 'संख्या" [ ५. १. १०२. ] विसूत्रेऽन्तग्रहणे सत्यप्यनन्तग्रहणम्, उत्तरत्र च भयग्रहणेऽप्यभयग्रहणम् ॥१०५॥**

**श० म० न्यासानुसन्धानम्—क्षेम०** । क्षेमं करोतीति खे गुणे ङस्युक्तसमासे "खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च" [ ३. २. १११. ] इति मागमे "तौ मुमो०" [ १. ३. १४. ] इति मस्यानुस्वारे—**क्षेमंकरः**, अनुनासिके तु क्षेमङ्करः । अणि तु वृद्धौ—**क्षेमकारः** । एवं—प्रियं करोतीति—**प्रियंकरः, प्रियकारः**; मद्रं करोतीति—**मद्रंकरः, मद्रकार**; भद्रं करोतीति—**भद्रंकरः, भद्रकारः** । **भद्रात् केचिदेवेच्छन्तीति**, पाणि-

नीयेऽपि एतद्विषयके "क्षेमप्रियमद्रेऽण् च" [ ३. २. ४४. ] इति सूत्रे भद्रशब्दो न पठ्यते इति तन्मतेऽपि भद्रशब्दपूर्वात् प्रत्ययो नेष्ट इति सिद्धम्। पदकृत्यं पृच्छति- **एभ्य इति किमिति**, उत्तरयति—**तीर्थंकरः** इति, कस्मिन्नर्थे कोऽत्र प्रत्यय इत्याकाङ्क्षायामाह—**हेत्वादिषु टः** इति—"हेतुतच्छीलानुकूले०" [ ५. १. १०३. ] इत्यनेन टप्रत्यय इत्यर्थः। **'तीर्थंकरः, तीर्थकारः' इत्यपि कश्चिदिति**—अस्मिन् मते तीर्थशब्दोऽप्यत्र पठनीय इति भावः। अत्र विशेषमाह—**'खो वा' इति सिद्धेऽणग्रहणं हेत्वादिषु टबाधनार्थमिति**, विकल्पेन खविधाने खाभावपक्षे "कर्मणोऽण्" [ ५. १. ७२. ] इत्यण् स्यादेवेत्यण्ग्रहणं व्यर्थं सत् हेत्वादिविवक्षायामप्येतावेव प्रत्ययौ स्यातां, न तु ट इति बोधनार्थमिति, तेन हेत्वादिविवक्षायामपि क्षेमंकर इत्येव भविष्यति। इत्थं निर्णीते योगक्षेमकरीति प्राचीनप्रयोगस्योपपत्तिमाह—**उपपदविधिषु तदन्तविधेरनाश्रयणादिति**—क्षेमशब्दमात्रे उपपदे सति भवत्ययं प्रत्ययो न तु क्षेमान्ते योगक्षेमशब्दे उपपदे इति तत्र हेत्वादिविवक्षया टप्रत्यये योगक्षेमकरीति सिद्धमिति भावः। पाणिनीये तु "कथम्? "अल्पारम्भाः क्षेमकराः' इत्याशङ्क्य, कर्मणः शेषत्वविवक्षया पचाद्यच्' इति समाहितम्। तस्यायमर्थः—कर्मत्वेन कर्मणि क्षेमशब्दे उपपदे एवानेन खाणौ भविष्यतः, कर्म च यदा शेषत्वेन विवक्षितं तदा कर्मत्वेन रूपेण तस्योपस्थितत्वाभावान्नेमौ प्रत्ययावपि तु करोतीत्यर्थे कृञः [कृगः] पचादित्वात् [ लिहादित्वात् ] अचि 'करः' इति व्युत्पाद्य पश्चात् क्षेमस्य कर इति शेषषष्ठ्यन्तेन समासे क्षेमकर इति भवतीति। परन्तु एवंरीत्या क्षेमकर इत्यस्य सिद्धावपि स्त्रियां योगक्षेमकरीति प्रयोगो न स्यादिति तदर्थमुक्तोपायाश्रयणमन्तरा नान्यः पन्था इति। उपपदविधिषु तदन्तविधेरनाश्रयणे मानमाह—**अत एव "संख्या०" [ ५. १. १०२. ] दिसूत्रेऽन्तग्रहणे सत्यप्यनन्तग्रहणमिति**—उपपदविधिषु च तदन्तविधिसत्त्वे चान्तग्रहणेनैवानन्तशब्दस्यापि ग्रहणे सिद्धे 'अनन्त' शब्दग्रहणं व्यर्थमेवेति कृतं तत् 'अत्र प्रकरणे तदन्तविधिर्न' इति सूचयतीति भावः। **उत्तरत्र भयग्रहणेऽप्यभयग्रहणमिति**—अत एव "मेघर्तिभयाभयात् खः" [ ५. १. १०६. ] इत्यत्र भयाभयोभयग्रहणं सार्थकमिति भावः। उपपदविधावपि तदन्तग्रहणं पाणिनीये स्वीक्रियते। तदुक्तं—"येन विधिस्तदन्तस्य" [ १. १. ७१. ] इति सूत्रे भाष्ये सूत्रप्रयोजनावसरे—"उपपदविधौ भयाढ्यादिग्रहणम्। उपपदविधौ भयाढ्यादिग्रहणं [ तदन्तविधेः ] प्रयोजनम्। भयंकरः, अभयंकरः, आढ्यंकरणम्, स्वाढ्यंकरणम्, इति। एवं च "मेघर्तिभयेषु कृञः" [ ३. २. ४३. ] इति सूत्रेऽभयग्रहणाभावेऽपि 'अभयंकर' इति सिध्यति। "आढ्यसुभगस्थूल०" [ ३. २. ५६. ] इति सूत्रे तदन्तग्रहणाभावेऽपि स्वाढ्यंकरणमित्यादयः प्रयोगाः सिध्यन्ति। एवं सति योगक्षेमकरीत्यादिष्वपि खाणोः प्रसक्त्या दोषमाशङ्क्य कैयटेनोक्तम्—भयाढ्यादिभिः कर्म विशेष्यते, "क्षेमप्रियमद्रेऽण् च" इत्यत्र तु कर्मणा क्षेमादयो विशेष्यन्ते इति तदन्तविध्यभाव इति। अयमाशयः—विशेषणेन हि तदन्तविधिर्भवति, विशेष्यविशेषणभावश्च प्रयोक्तुरधीन इति यत्र लक्ष्यानुरोधेन तदन्तविधिरिष्टस्तत्र गृह्यमाणे विशेषणत्वविवक्षा, यत्र च नेष्टस्तत्र गृह्यमाणस्य विशेष्यत्वं कर्मणश्च विशेषणत्वमिति भयाढ्यादयः कर्मणो विशेषणानीति भयाढ्यान्तादीनां ग्रहणं भवति, क्षेमादयश्च विशेष्यानीति न तदन्ता गृह्यन्ते इति। स्वमते चोत्तरत्राभयग्रहणं "नग्नपलित०" [ ५. १. १२८. ] इति सूत्रे च तदन्तग्रहणं क्रियत एवेत्युपपदविधिषु तदन्तविधेर्नावश्यकतेति तदभावो ज्ञापित इति सूपपन्नमिति ॥ ५. १. १०५. ॥

## मेघर्ति-भया-ऽभयात् खः । ५. १. १०६. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् करोतेः खप्रत्ययो भवति। मेघान् करोति—मेघंकरः। ऋतिर्गतिः सत्यता वा, ऋतिंकरः, भयंकरः, अभयंकरः। हेत्वादिविवक्षायां टमपि बाधते परत्वात्—भयंकरं श्मशानम् ॥१०६॥**

**श० म० न्यासानुसन्धानम्—मेघ०। मेघान् करोतीति** वाक्यम्, यद्यपि वृत्तौ तदन्तर्गतानां पदार्थानां यथासम्भवमेकत्वमेव प्रतिभाति, बहुत्वभानं प्रयत्नादिना लभ्यम्, तथापि मेघेषु बहुत्वस्य दृष्टतया तदनुरोधेन बहुत्वस्य निर्देशः। अनेन खप्रत्यये खित्त्वान् मागमेऽनु-

स्वारे च—**मेघंकरः**। ऋतिशब्दार्थं व्याचष्टे—**ऋतिर्गतिः सत्यता वेति**—ऋधातोर्गमनार्थत्वं प्रसिद्धम्, सत्यतेति ऋतशब्दानुरोधेन ऋतिशब्दस्य सत्यतार्थत्वं प्रतिपादितम्, इयर्ति गच्छति जनः प्रत्ययमत्रेति ऋतमिति व्युत्पत्त्या ऋतशब्दस्य सत्यार्थत्वं कोशेषु प्रसिद्धम्, ऋतिशब्दस्य भावार्थप्रत्ययान्तत्वेन सत्यतार्थत्वमुक्तम्, कोशेषु न श्रूयते। ऋतिं करोतीति खे—**ऋतिंकरः**। एवं भयमभयं च करोतीति—**भयङ्करः, अभयंकरः**। हेत्वादिविवक्षायामप्ययमेव प्रत्यय इत्याह—**हेत्वादिविवक्षायां टमपि बाधते** इति, तत्र हेतुमाह—**परत्वादिति**—विशेषविहितत्वाच्चेत्यपि ज्ञेयम्। तत्रोदाहरति—**भयंकरं श्मशानमिति**—श्मशानस्य भयजनकत्वमिति हेतुत्वं स्पष्टमिहेत्यर्थः ॥ ५. १. १०६. ॥

## प्रिय-वशाद् वदः । ५. १. १०७. ॥

**त० प्र०—आभ्यां कर्मभ्यां पराद् वदेः खो भवति। प्रियं वदति—प्रियंवदः, वशंवदः ॥१०७॥**

**श० म० न्यासानुसन्धानम्—प्रिय०**। "वद व्यक्तायां वाचि" प्रियं वदतीति खे ङस्युक्तसमासे मागमेऽनुस्वारे च—**प्रियंवदः**। एवं वशं वदतीति—**वशंवदः** ॥ ५. १. १०७. ॥

## द्विषन्तप-परन्तपौ । ५. १. १०८. ॥

**त० प्र०—द्विषत्-परशब्दाभ्यां कर्मभ्यां परात् ण्यन्तात् तपेः खः प्रत्ययो ह्रस्वत्वं द्विषत्तकारस्य मकारश्च निपात्यन्ते। द्विषतस्तापयति—द्विषन्तपः**, परंतपः। **निपातनस्येष्टविषयत्वात् स्त्रियामनभिधानम्—द्विषतीतापः। अण्यन्तस्य च तपेर्न भवति—द्विषतः परांश्च तपति—द्विषत्तापः**, परतापः ॥१०८॥

**श० म० न्यासानुसन्धानम्—द्विष०**। इदं निपातनसूत्रम्, अलाक्षणिककार्यलाभार्थमेव हि निपातनमारभ्यते, तत्र यद्यपि प्रयोगस्यावयवशो व्युत्पादनं नावश्यकं तथापि प्रयोगार्थज्ञानाय प्रक्रियाज्ञानमावश्यकमिति निपातनलभ्यप्रक्रियामाह—**द्विषत्-पराभ्यां कर्मभ्यामिति**। द्विषतस्तापयतीति खे तकारस्य मे आकारस्य ह्रस्वे—**द्विषंतपः**, परान् तापयतीति—**परंतपः**। 'द्विषत्' शब्दे उपपदे एवैतन्निपातनं न तु स्त्रीलिङ्गे द्विषतीशब्दे उपपदे इति शास्त्रहृदयं, तस्य सिद्ध्युपायमाह—**निपातनस्येष्टविषयत्वात् स्त्रियामनभिधानमिति**—इष्टप्रयोगस्य लक्ष्यानुसारमसिद्धिमालोच्य तदर्थमेव निपातनमाश्रीयते, एवं च स्त्रियां—स्त्रीलिङ्गे द्विषतीशब्दे उपपदे द्विषंतपशब्दस्य [ अनिष्टत्वात् ] अनभिधानमिति तात्पर्यम्। तदेव प्रत्युदाहरति—**द्विषतीतापः** इति—द्विषतीं तापयतीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि द्विषतीतापः। अनभिधानमनिष्टविषयत्वं वा समवलम्ब्यान्यदपि साधयति—**अण्यन्तस्य च तपेर्न भवतीति**, तदेव प्रत्युदाहरति—**द्विषतः परांश्च तपतीति—द्विषत्तापः, परतापः** इति—अत्रास्याप्रवृत्त्याऽणेव भवति, अत एव वृत्तौ ण्यन्तात् तपेरिति प्रतिपादितम्, निपातिते च प्रयोगे यद्यपि न ण्यन्तत्वं प्रतिभाति तथापि वृत्तिकारस्यापि लक्ष्यचक्षुष्कत्वेनेष्टप्रयोगानुसारिण्येव वृत्तिरुद्भाविततेति ॥ ५. १. १०८. ॥

## परिमाणार्थ-मित-नखात् पचः । ५. १. १०९. ॥

**त० प्र०—सर्वतो मानं परिमाणम्, तदर्थाः प्रस्थादयः शब्दाः, एभ्यो मित-नखाभ्यां च कर्मभ्यां परात् पचेः खः प्रत्ययो भवति। प्रस्थंपचा स्थाली, द्रोणंपचा दासी, अल्पंपचा मुनयः, "पान्तावल्पंपचान् मुनीन्", मितंपचा ब्राह्मणी, नखंपचा यवागूः ॥१०९॥**

**श० म० न्यासानुसन्धानम्—परिमा०**। लोके परिमाणशब्दस्य मानसाधारण्येन प्रयोगेऽपि शास्त्रे तस्य व्यवस्थिततया परिभाषितत्वेनातिप्रसङ्गवारणाय परिमाणपरिभाषामाह—**सर्वतो मानं परिमाणमिति**—परितः सर्वतो मानमिति परिमाणपदविग्रहः, उक्तं चाभियुक्तैः—

"ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः॥"

इति।

इयत्तापरिच्छेदकं वस्तु मानमिति कथ्यते, ऊर्ध्वाधोऽवस्थितेरियत्तापरिच्छेदकमुन्मानमिति, सर्वतोभावेनेय-

त्तापरिच्छेदकं परिमाणमिति, तिर्यगवस्थितस्य वस्तुनो दैर्ध्येयत्तापरिच्छेदकं प्रमाण[निमान] मिति, स्वरूपतोऽसम्बद्धां बाह्येयत्तां यत् परिच्छिनत्ति तन्मानं संख्येत्युच्यत इत्यन्वयः । सर्वतः परिच्छेदकं मानं स्वरूपतः परिचाययति—**तदर्थाः प्रस्थादयः शब्दाः** इति—स परिणामरूपोऽर्थो येषां ते इति भावः । प्रस्थं प्रस्थपरिमितं धान्यं पचतीति खे मागमे तस्यानुस्वारे **प्रस्थंपचा स्थाली,** द्रोणं पचतीति—**द्रोणंपचा दासी,** प्रस्थद्रोणपरिमिते व्रीह्यादौ प्रस्थद्रोणशब्दावुपचारेण वर्तेते, न प्रस्थादावेव परिमाणविशेषे काष्ठादिमये, क्लेदवाची ह्यत्र पचिः, न च मुख्यस्य प्रस्थादेर्विक्लेदः सम्भवति, अतो न तस्य संबन्ध उपपद्यते । स्वरूपग्रहणमप्यत एव न भवति, नहि स्वरूपप्रधानेन परिमाणेन विक्लेदवचनस्य पचेः सम्बन्धः सम्भवति । यद्यपि हि प्रस्थादिशब्दः परिमेये वर्तते तथापि परिमाणव्यपदेशो न तस्य विरुध्यते प्रथमं परिमाणवृत्तित्वादिति भावः । अल्पं पचन्तीति—**अल्पंपचा मुनयः** इति—यद्यप्यल्पशब्दो न परिमाणवाची, नहि काचित् परिभाषाऽल्पस्य, अल्पत्वं हि सापेक्षं वस्तु, यदेव कस्यचिदपेक्षयाल्पं तदेवान्यस्यापेक्षया बहु भवति, एवं चाल्पशब्दो न कामपीयत्तां परिच्छिन्नत्तीति न तस्य मानत्वं, परिमाणत्वं तु दूरापेतम्, तथापि लोके कियत् जलमिति मानविषयके प्रश्ने कृते 'अल्पं जलम्' इति प्रतिवचोदर्शनात् तस्य परिमाणवाचित्वमवसेयम् । स्वोदाहरणे कविप्रयोगं प्रमाणयति—**"पान्तावल्पंपचान् मुनीन्"** इति—यावती मात्रा भोजनायाभ्यर्हिता ततोऽपि न्यूनमेव ये पचन्ति पाकेन सम्पादयन्ति तादृशान् मुनीन् पान्तौ रक्षन्ताविति तदर्थः । मितं परिमितं पचतीति—**मितंपचा ब्राह्मणी ।** नखानि पचतीति—**नखंपचा यवागूरिति**—'पच्' धातोः साधारणतया विक्लृत्तिरर्थः, न च नखानि विक्लृत्तिविषयाणि भवितुमर्हन्ति, ततश्चात्र प्रयोगे कथं धात्वर्थसंगतिरिति चेत् ? अत्रोच्यते—विक्लृत्त्यर्थस्यापि पचेरत्र तापमात्रार्थत्वं लक्ष्यानुरोधात् धातूनामनेकार्थत्वाच्च, यवागूर्यस्यामवस्थायां स्पृष्टा नखानि तापयति सा अवस्था नखंपचेति शब्देन व्यवह्रियते, तदवस्थापन्नैव सा प्रशस्येति तस्यामपि स एव शब्दः प्रयुज्यते इति ॥ ५. १. १०६. ॥

## कूला-ऽभ्र-करीषात् कषः । ५. १. ११०. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् कषेः खः प्रत्ययो भवति । कूलंकषा नदी, अभ्रंकषो गिरिः, करीषंकषा वात्या ॥११०॥**

**श० म० न्यासानुसन्धानम्—कूला०** । "कष हिंसायाम्" कूलं तटं कषति भिनत्तीति खे इत्युक्तसमासे मागमेऽनुस्वारे च—**कूलंकषा नदी**ति—वर्षासु जलवृद्धया तटोल्लङ्घनाय प्रवृत्ता सा [ नदी [ क्रमशस्तटद्वयं भिनत्तीति दृश्यते इति तामवस्थामाश्रित्य कूलंकषाशब्देनोच्यते । उक्तं च—

"नद्यश्च नार्यश्च सदृक्स्वभावा-
स्तुल्यानि कूलानि कुलानि तासाम् ।
ताः कुप्रवृत्ताश्च विनाशयन्ति,
नद्यो हि कूलानिकुलानि नार्यः ॥" इति ।

अभ्रं कषतीति—**अभ्रंकषो गिरिरि**ति—अत्युन्नतत्वात् कषतीवेत्युत्प्रेक्षा । करीषं शुष्कं गोमयं कषति उद्धूलयतीति—**करीषंकषा वात्ये**ति—वात्या तथावेगेन प्रवृत्ता यथा न केवलं पांशुमेवावकिरति किन्तु शुष्कं गोमयादिकमपि समुत्पाट्यावकिरतीति भावः ॥ ५. १. ११०. ॥

## सर्वात् सहश्च । ५. १. १११. ॥

**त० प्र०—सर्वशब्दात् कर्मणः परात् सहेः कषेश्च खः प्रत्ययो भवति । सर्वं सहते—सर्वंसहो मुनिः, सर्वंकषः खलः ॥ १११ ॥**

**श० म० न्यासानुसन्धानम्—सर्वात्०** । "षहि मर्षणे" सर्वं सहते इति—**सर्वंसहो मुनिरिति**—सर्वं सुखं दुःखं वा शीतं वोष्णं वा यः सहतेऽनुभूय मर्षयते स तथा, नहि सुखेन पुलकितो भवति, नवा दुःखेन व्यथितो भवतीति भावः । सर्वं कषतीति—**सर्वंकषः खलः** इति—कृतमकृतं वा, साधुमसाधुं वा, उपकारिणमनुपकारिणं वा सर्वमेव खलः कषति नाशयतीति भावः । नैतानि संज्ञावाचकानि नामानि किन्तु विशेषणतया प्रयोज्यानीति विज्ञेयम्, यतश्चाग्रिमसूत्रे नाम्नीति ग्रहणं क्रियतेऽतः पूर्वत्र तदसम्बन्धः स्पष्टः ॥ ५. १. १११. ॥

## भृ-वृ-जि-तृ-तप-दमेश्च नाम्नि । ५. १. ११२. ॥

**त० प्र०—कर्मणः** परेभ्य एभ्यः सहश्च खो भवति, नाम्नि-संज्ञायाम् । विश्वं बिभर्ति—विश्वंभरा वसुधा । वृ पतिंवरा कन्या । जि—शत्रुंजयः पर्वतः, धनंजयः पार्थः । तृ—रथंतरं साम । तप—शत्रुंतपो राजा । दमिरन्तर्भूतण्यर्थो ण्यन्तश्च गृह्यते, बलिं दाम्यति दमयति वा—बलिंदमः कृष्णः, अरिंदमः । सह—शत्रुंसहः, एतौ राजानौ । नाम्नीति किम् ? कुटुम्बं बिभर्ति—कुटुम्बभारः । केचित् तु—रथेन तरति—रथंतरं सामेत्यकर्मणोऽपीच्छन्ति ॥११२॥

**श० म० न्यासानुसन्धानम्—भृ** । "भृग् भरणे" "डुडुभृंग्क् पोषणे च' चकाराद् धारणे, विश्वं भरति बिभर्ति वेति—**विश्वम्भरा वसुधेति**—सा हि स्वोत्थानौषध्यादिना सर्वान् पुष्णाति धारयति च, "विश्वम्भरा धरा०" इत्यभिधानचिन्तामणौ पृथ्वीनामसु विश्वम्भराशब्दः पठ्यते । भवभूतिरपि—

"विश्वम्भरा भगवती भवतीमसूत,
राजा प्रजापतिसमो जनकः पिता ते ।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां,
येषां कुलेषु सविता च गुरुर्वयं च ॥"

इत्युत्तररामचरिते सीतां प्रति वाल्मीकीमुनिवाक्यत्वेनाह । "वृग्ट् वरणे" "वृङ्श् संभक्तौ" संभक्तिः संसेवा, पतिं वृणोति वृणीते वेति—**पतिंवरा कन्येति**—अजातविवाहसंस्कारा कन्या, सा हि पतिं वृणोति वृणीते वेति सार्थकं नाम तस्याः । शत्रून् जयतीति—**शत्रुंजयः पर्वतः** इति—"शत्रुञ्जयो विमलाद्रिः" इत्यभिधानचिन्तामणिः, विमलगिरिप्रभावतः शुकनृपस्य विना संग्रामं शत्रूणां जयो जातस्तेन विमलगिरेः शत्रुञ्जयेति नाम ख्यातिमगमत् । धनं गोधनं विराटनगरे कौरवेभ्यो जयतीति—**धनंजयः पार्थः** इति, "अर्जुनः फाल्गुनः पार्थः सव्यसाची धनञ्जयः" इत्यभिधानचिन्तामणिः । "तॄ प्लवन-तरणयोः" रथं तरतीति—**रथन्तरं सामेति**—रथन्तरमिति सामवेदशाखाया नाम । शत्रुं तपतीति—शत्रुंतपो राजा । "दमूच् उपशमे" अस्याकर्मकत्वेन कर्मणः परत्वमसम्भवीति तदुपपत्तये आह—**दमिरन्तर्भूतण्यर्थो ण्यन्तश्चेति**—उभयथापि सकर्मकत्वं युज्यत एवेति हृदयम्, अत उभयथा विग्रहमाह—**बलिं दाम्यति दमयति वा—बलिंदमः कृष्णः** इति—"नारायणे तीर्थपादः पुण्यश्लोको बलिन्दमः" इत्यभिधानचिन्तामणिवृत्तिशेषे । अरिं दाम्यति दमयतीति वा—**अरिंदमः**, शत्रुं सहते इति—**शत्रुंसहः**, अरिंदम-शत्रुंसहशब्दौ राजविशेषवाचकत्वेन पुराणादिषु प्रसिद्धावित्याह—**एतौ राजानाविति** । पदकृत्यं पृच्छति—**नाम्नीति किमिति**, उत्तरयति—**कुटुम्बं बिभर्तीति—कुटुम्बभारः** इति—नेयं कस्यापि संज्ञेत्यस्याप्रवृत्त्याऽणेव भवतीति भावः । मतान्तरमाह—**केचित् तु—रथेन तरतीत्यादि**—एतच्च पाणिनीयव्याकरणेऽप्युक्तम्, अत्र सूत्रे यद्यपि कर्मणीत्यनुवृत्तमिति प्रकरणाज्ज्ञायते, तथापि रथस्य तरणकर्मताया अदृष्टत्वेन तरणसाधनतयैवान्वयो युक्त इति रथेन तरतीति विग्रहवाक्यमूह्यते । यद्यप्यत्रार्थे [ साम्नि ] नावयवार्थानुगम इति कर्मत्वेन करणत्वेन वा विग्रहकरणे न कोऽपि भेदस्तथापि धातुकारकयोर्येन रूपेणान्वयः समुचितस्तथैव विग्रहः प्रदर्शनीय इति रथेन तरतीति विग्रहवाक्यमुपदर्शितम् । उक्तं च कौमुदीकृता—इह रथेन तरतीति व्युत्पत्तिमात्रं न त्ववयवार्थानुगम इति । व्युत्पादनफलं च स्वरादौ विशेष इति तत्त्वबोधिन्यादावुक्तम् । हेमपारायणे चेत्थम्—"भृ-वृ-जि०" इति खे—रथात् रथैर्वा तरति—रथंतरो राजा, रथंतरं सामेति ॥ ५. १. ११२. ॥

## धारेर्धर् च । ५. १. ११३ ॥

**त० प्र० कर्मणः** परात् धारयतेः संज्ञायां खः प्रत्ययो भवति, 'धर्' इत्ययमादेशश्च । वसु धारयति-वसुंधरा पृथ्वी । युगंधरः, सीमंधरः, तीर्थंकरावेतौ । संज्ञायामित्येव—छत्रधारः ॥११३॥

**श० म० न्यासानुसन्धानम्—धारे०** । चुरादेराकृतिगणत्वात् 'धृण् धारणे' इति धातुः । आदेशस्य स्पष्टतया प्रतिपत्तये रेफस्य स्थाने सूत्रे विसर्गादिर्न कृतः । **वसु धारयतीति—वसुंधरा पृथ्वीति**, वसु धारयति—स्वात्मनि अवस्थापयतीति, तत्तदृष्टवते जनायोत्तमर्णरूपिणेऽधमर्णरूपिणी सती धारयति दातुमिति वाऽर्थः । युगं धारयतीति—**युगंधरः**, सीमानं धारयतीति—

**सीमंधरः**, युगन्धर-सीमन्धरशब्दयोर्जैनागमप्रसिद्धत्वादाह—**तीर्थंकरावेताविति**। व्यावर्त्यं दर्शयति—**संज्ञायामित्येव—छत्रधारः** इति—अत्र संज्ञाविरहादस्याप्रवृत्त्याऽणेव भवति, आदेशस्यापि प्रत्ययसन्नियोगशिष्टतया संज्ञाविरहेऽप्रवृत्तिरेवेति छत्रधार इत्यादौ न प्रवृत्तिः। यद्यपि सत्यप्यादेशे उपान्त्यवृद्ध्या न रूपे विशेषस्तथापि न्यायानुसरणमेव वरमिति ॥५.१.११३.॥

## पुरंदर-भगंदरौ । ५. १. ११४. ॥

**त० प्र०—एतौ संज्ञायां खप्रत्ययान्तौ निपात्येते। पुरो दारयति—पुरंदरः शक्रः, भगं दारयति—भगंदरो व्याधिः। दारयतेर्ह्रस्वः पुरोऽमन्तता च निपात्यते। पुरशब्दपूर्वस्य तु पुरदार इति भवति ॥११४॥**

**श० म० न्यासानुसन्धानम्—पुरं०**। "दृश् विदारणे" अतो ण्यन्तात्, पुरो रिपूणां नगराणि, पुरं त्रिपुरं वा दारयतीति खे—**पुरंदरः शक्रः**, एवं भगं दारयतीति—**भगंदरो व्याधिरिति**। "धारेर्धंर्च" इतिवत् दारेर्दंर्च" इत्येव वक्तव्ये निपातनाश्रयणं व्यर्थमित्यारेकामपाकर्तुमाह—**दारयतेर्ह्रस्वः पुरोऽमन्तता च निपात्यते** इति—रेफान्तस्य पुर् शब्दस्यामन्तताऽप्राप्तेति निपातनमावश्यकमिति भावः। किञ्च "दारेर्दंर्च" इति करणेऽन्यत्रापि स्यात्, इष्यते तु निर्दिष्टशब्दद्वय एवेत्यपि निपातनफलमिति भावः। निपातनफलस्यान्यत्र निवृत्तिरूपस्य संज्ञायामेव प्रवृत्त्या सिद्धेऽपि 'पुर' इत्यकारान्तशब्दस्योपपदत्वे मा भूदनिष्टत्वादित्यपि निपातनफलमित्याशयेनाह—**पुरशब्दपूर्वस्य तु पुरदार इति भवती**ति, अयमाशयः—निपातनस्येष्टविषयकत्वेनाकारान्तपुरशब्दपूर्वस्य पुरंदर इति रूपस्यानिष्टतया न तत्रामन्तता नवा तत्रायं प्रत्ययोऽपि त्वणेवेति भावः ॥ ५. १. ११४. ॥

## वाचंयमो व्रते । ५. १. ११५. ॥

**त० प्र०—व्रतं शास्त्रितो नियमः। तस्मिन् गम्यमाने वाचः कर्मणः परात् यमेर्धातोः खो वाचश्चामन्तता निपात्यते। वाचं यच्छति नियमयति वा—वाचंयमो व्रती। व्रत इति किम्? वाग्यामोऽन्यः ॥११५॥**

**श० म० न्यासानुसन्धानम्—वाचं**। प्रकृतोपयोगिनं व्रतशब्दार्थं ग्राहयति—**व्रतं शास्त्रितो नियमः** इति—शास्त्रित इत्यस्य शास्त्रबोधित इत्यर्थः, एतेन स्वेच्छया परिगृहीतः कश्चन नियमो नात्र व्रतशब्देन गृह्यत इति भावः। शास्त्रितशब्दोऽनेकधा व्युत्पाद्यते, तथाहि—"शास्त्रं सजातमस्योपदेशकतया, शास्तुः सकाशात् इतः प्राप्तो वा, यद्वा शास्तारं कर्मतापन्नमितः प्राप्तः" इति लघुन्यासकारः। पञ्जिकाकारस्त्वेवमाह—"शास्त्रे कृत इति विगृह्य शास्त्रशब्दात् प्रातिपदिकात् [ नाम्नः ] धात्वर्थे णिच्, तदन्तात् क्ते विहिते शास्त्रित इति, शास्त्रविहित इत्यर्थः। अथवा शास्त्रेण इत इति शास्त्रितः, शास्त्रविद इतो जातः प्रवृत्तः। अथवा शास्त्रशब्दस्तारकादिषु द्रष्टव्य', शास्त्रमस्य संजातमिति शास्त्रितः।" इति। तथा च शास्त्रबोधितसंकल्पविशेष एवात्र व्रतशब्देन ग्राह्यः। "यमूं उपरमे" अस्यान्तर्भावितण्यर्थत्व एव सकर्मकत्वमित्याशयेनाह—**वाचं यच्छति नियमयति वा—वाचंयमो व्रती**ति—वाच उपरमणं हि तस्या नियमनमेव, सावद्यं न वदिष्यामि, निरवद्यमपि हितं मितं प्रियं च वदिष्यामि, तत्राप्येतावन्तं कालं न वदिष्यामीत्यादि संकल्परूपमिति भावः। पृच्छति—**व्रत इति किमिति**, उत्तरयति—**वाग्यामोऽन्यः** इति—यो न व्रततया वाचं नियमयति किन्त्वशक्त्यादिना कारणान्तरेण तत्रास्याप्रवृत्त्याऽणेव भवतीति भावः ॥ ५. १. ११५. ॥

## मन्याण्णिन् । ५. १. ११६. ॥

**त० प्र०—कर्मणः परान्मन्यतेर्णिन् प्रत्ययो भवति। पण्डितं मन्यते बन्धुं—पडितमानी बन्धोः। दर्शनीयां मन्यते भार्यां—दर्शनीयमानी भार्यायाः। श्यनिर्देश उत्तरार्थः ॥११६॥**

**श० म० न्यासानुसन्धानम् मन्या०**। सूत्रे 'मन्यात् णिन्' इति विश्लेषः, 'मन्यात्' इति च मन्यशब्दस्य पञ्चम्येकवचने रूपम्, 'मन्य' इति च श्यविकरणसहितो निर्देशः, तेन श्यविकरणार्हस्य "मनिच् ज्ञाने" इत्यस्य ग्रहणम्, न तु तदनर्हस्य "मनूयि बोधने" इति तानादिकस्य, तदाह—**परान्मन्यतेरि**ति। यद्यपि धातुनिर्देशे "इ कि श्तिव्०" [ ५. ३. १३८. ] इति विकरणप्रयोजकः श्तिव् भवतीति "मन्यतेर्णिन्" इत्येव सूत्र-

**मुचितम्**, तथापि लाघवानुरोधेन सौत्रत्वात् श्यितवो लुकं कृत्वा 'मन्य, इति निर्देशः कृतः, यद्वा सौत्रत्वात् श्यितवं विनापि सविकरणो निर्देशः। **पण्डितं मन्यते बन्धुमिति** विग्रहवाक्यम्, त्याद्यन्तकर्मत्वात् बन्धुमिति द्वितीया, अनेन णिनि उपान्त्यवृद्धौ ङस्युक्तसमासे—**पण्डितमानी बन्धोरिति**—कृदन्तकर्मत्वात् बन्धोरिति षष्ठी। एव—दर्शनीयां मन्यते भार्यामिति—**दर्शनीयमानी भार्यायाः** इति—"क्यङ्मानि०" [ ३. २. ५०. ] इति पुंवद्भावः। णिनि सति गणपाठकृतस्य कस्यचन विकरणादेः प्राप्त्यभावात् यदेव मन्यतेर्णिन्प्रत्यये कृते पण्डितमानीति रूपं तदेव मनुतेरपीति गणविशेषपठितधातुपरिग्राहक श्य'-रूपविशिष्टस्य निर्देशो नावश्यक इति लाघवाय "मनो णिन्" इत्येव सूत्र्यतामित्याशङ्कावारणायाह—**श्यनिर्देश उत्तरार्थः** इति—उत्तरत्र दैवादिकस्य मन्यतेरेव ग्रहणं स्यात्, न तु तानादिकस्य मनुतेरित्येतदर्थं श्यनिर्देश इति भावः, अयमाशयः—यद्यपीह विशेषो नास्त्युत्तरसूत्रे तु विकरणकृतो विशेषोऽस्ति, तत्र हि मन्यतेः खशि कृते दिवादित्वात् श्यो भवति, मनुतेस्तु तनादित्वादुप्रत्यय इति ॥ ५. १. ११६. ॥

## कर्तुः खश् । ५. १. ११७. ॥

**त० प्र०—प्रत्ययार्थात् कर्तुः कर्मणः परान्मन्यतेः खश् प्रत्ययो भवति। यदा प्रत्ययार्थः कर्ता आत्मानमेव दर्शनीयत्वादिना धर्मेण विशिष्टं मन्यते तदाऽयं कर्म, तत्रायं विधिः। पण्डितमात्मानं मन्यते—पण्डितंमन्यः, पट्वीमात्मानं मन्यते पट्विमन्या; विद्वन्मन्यः, विदुषिमन्या। असरूपत्वाण्णिन्नपि—पण्डितमात्मानं मन्यते—पण्डितमानी. पटुमानिनी; विद्वन्मानी, विद्वन्मानिनी। कर्तुरिति किम् ? दर्शनीयमानी चैत्रस्य, पूर्वेणात्र णिन्नेव। शकारः शित्कार्यार्थः ॥११७॥**

**श० म० न्यासानुसन्धानम्—कर्तुः०। प्रत्ययार्थात् कर्तुः कर्मणः परादिति**—पूर्वतोऽनुवृत्तस्य कर्मण इति पदस्य विशेष्यत्वं कर्तुश्च विशेषणत्वमित्ययमर्थः सम्पन्नः। कृत्प्रत्ययस्यार्थविशेषविधिं विना "कर्तरि" [ ५. १. ३. ] इति सूत्रेण कर्तरि विधानात् प्रत्ययस्य कर्त्रर्थकत्वम्, एवं च प्रत्ययार्थभूतः कर्तैव यत्र कर्मतया विवक्षितस्तत्रापि ततः परान्मन्यतेर्णिन् प्रत्ययः प्राप्तः, तद्विषयेऽनेन खश् विधीयते, तदाह—**यदा प्रत्ययार्थः कर्ता आत्मानमेव दर्शनीयत्वादिना धर्मेण विशिष्टं मन्यते तदाऽयं कर्म, तत्रायं विधिरि**ति न चैकस्यैव जनस्यैकदैव कथं कर्तृत्वं कर्मत्वं च युज्यत इति शङ्कनीयम्, केवलविशिष्टभेदेन शब्दभेदेन वा तथासम्भवात्। अयमाशयः—एकस्याप्यात्मनः स्वरूपेण कर्तृत्वं, पण्डितत्वादिविशेषरूपेण कर्मत्वं चेति न विरोधः। किञ्च, एकस्यापि पदार्थस्य स्याद्वादाश्रयणेन भवति नानाकारकसन्निपातः, यथा-पीयमानं मधु मदयतीत्यत्रैकस्यैव मधुनो हि पानक्रियानिरूपितकर्मत्वं, मदनक्रियानिरूपितकर्तृत्वं चेति। पण्डितमात्मानं मन्यत इति खशि श्यविकरणे ङस्युक्तसमासे "खित्यनव्ययारुषो मोन्तो ह्रस्वश्च" [ ३. २. १११. ] इति मागमे तस्यानुस्वारे च—**पण्डितंमन्यः** इति। पट्वीमात्मानं मन्यत इति—"परतः स्त्री पुंवत्०" [ ३. २. ४९. ] इति पुंस्त्वापवादे "खित्यनव्यया०" इति ह्रस्वे—**पट्विमन्या,** शेषं प्राग्वत्। एवं—आत्मानं विद्वांसं मन्यत इति—**विद्वन्मन्यः** इति—अत्र "स्रंस-ध्वंस" [ २. १. ६८. ] क्वसोः सकारस्य दः, "तृतीयस्य पञ्चमे" [ १. ३. १. ] इति दस्य च नकारो विज्ञेयः, विदुषीमात्मानं मन्यत इति—**विदुषिमन्या**। *णिनो विषयेऽस्य विधानात् विशेषविहिततया यद्यप्ययमेव* प्रत्यय उचितस्तथाप्येतत्प्रकरणेऽसरूपप्रत्ययस्य विकल्पेन बाधकताया सिद्धान्तित्वेन णिन्नपि पक्षे भवत्येवेत्याह—**असरूपत्वाण्णिन्नपी**ति, तथा चोदाहरति—**पण्डितमात्मानं मन्यते—पण्डितमानी,** पट्वीमात्मानं मन्यत इति—**पटुमानिनी,** भवतीह पुंवद्भावः। विद्वांसमात्मानं मन्यत इति—**विद्वन्मानी,** विदुषीमात्मानं मन्यत इति—**विद्वन्मानिनीति**। पदकृत्यं पृच्छति—**कर्तुरिति किमिति**—पूर्वसूत्रेणैव णिन्-खशौ प्रत्ययौ विधेयौ सूत्रमिदं व्यर्थमिति प्रश्नाशयः, उत्तरयति—**दर्शनीयमानी चैत्रस्येति**—दर्शनीयं मन्यते चैत्रमिति वाक्यं तस्य, अत्र च प्रत्ययार्थातिरिक्तमेव कर्म, न तु प्रत्ययार्थः कर्ता कर्मेति तत्र दर्शनीयंमन्यश्चैत्रस्येति न भवति, अपि तु दर्शनीयमानी चैत्रस्येत्येकमेव, एकसूत्रत्वे कर्तुरित्यस्याभावे चात्रापि खश् स्यादेवेति भावः।

शकारस्य प्रयोगेऽश्रवणात् तस्य वैयर्थ्यमाशङ्क्याह— **शकारः शित्कार्यार्थः** इति–शितः प्रत्ययस्य सार्वधातुकत्वेन तत्र गणपाठानुकूलं श्यादयो विकरणप्रत्यया भवन्ति, तदर्थं इति भावः ॥ ५. १. ११७. ॥

**एजेः** । ५. १. ११८. ॥

**त० प्र०—कर्मणः परादेजयतेः खश् भवति । अङ्गान्येजयति—अङ्गमेजयः, जनमेजयः, अरिमेजयः ॥११८॥**

**श० म० न्यासानुसन्धानम्—एजेः । कर्मणः परादेजयतेरि**ति—"एजृङ् कम्पने" इति 'एज्' धातुः कम्पनार्थक आत्मनेपदी, तत्र ण्यन्तस्यायं निर्देशोऽथवा शुद्धस्यैव धातुनिर्देशे विहितेन किप्रत्ययेन इप्रत्ययेन वा निर्देश इति सन्दिग्धम्, तत्र निर्णयार्थमुक्तम्—**एजयते**रिति, एवं च ण्यन्तादित्यर्थोऽभिमतः । न च ण्यन्तपरिग्रहे मानाभाव इति वाच्यम्, खशः शित्वस्य [ शित्कार्यार्थस्य ] सार्थक्यानुरोधेन तथा स्वीकारस्यावश्यकत्वात् । शित्वं सार्वधातुकत्वनिमित्तकः शव् यथा स्यादित्येवमर्थम्, शुद्धस्य 'एज्' धातोः शवि सति असति वा रूपे विशेषाभावेन, ण्यन्ते च विशेषस्य स्पष्टतया तस्यैव ग्रहणमिति स्वीकर्तव्यत्वाच्च । न च शित्वमुत्तरत्र चरितार्थमिति तत्सामर्थ्यादिहोक्तार्थासिद्धिरिति वाच्यम्, इहार्थवत्त्वे सम्भवति केवलमुत्तरार्थत्वस्यान्याय्यत्वात् । स्पष्टं चेदं तत्त्वबोधिन्यादौ । बालमनोरमाकृता च ण्यन्तस्य परिग्रहे व्याख्यानमेव शरणीकृतम्, अयं तदाशयः—माऽस्तु केवले धातौ शित्वस्य सार्थक्यम्, किन्तु न शित्वं केवलमेतदर्थमेव कृतं येन ण्यन्तपरिग्रहसाधकं स्यात्, तस्य पूर्वत्रोत्तरत्र च सार्थक्यात् । तथा चात्र ण्यन्तस्य परिग्रहे शिष्टकृतलक्ष्यानुसारि व्याख्यानमेव शरणमिति स्वीकर्तव्यमिति । विगृह्योदाहरति— **अङ्गानि एजयति—अङ्गमेजयः** । एवं—जनमरिं च एजयतीति—**जनमेजयः, अरिमेजयः** ॥५. १. ११८.॥

## शुनी-स्तन-मुञ्ज-कूला-ऽऽस्य-पुष्पात् ट्धेः

। ५. १. ११९. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् ट्धेः खश् भवति । शुनीं धयति–शुनिधयः, स्तनंधयः, मुञ्जंधयः, कूलंधयः, आस्यंधयः, पुष्पंधयः । मुञ्जादिभ्यः केचिदेवेच्छन्ति । ट्धेष्टकारो ङ्यर्थः—शुनिधयी स्तनंधयी सर्पजातिः ॥११९॥**

**श० म० न्यासानुसन्धानम्—शुनी० ।** "ट्धें पाने" इति टकारानुबन्धस्यानुकृतस्य 'धे' धातोः पञ्चम्येकवचने—**ट्धेरि**ति । शुनीं धयतीति खशि अयादेशे ङस्युक्तसमासे "खित्यनव्या०" [ ३. २. १११. ] इति ह्रस्वे मागमे तस्यानुस्वारे च—**शुनिंधयः**, पक्षेऽनुनासिके शुनिन्धय इत्यपि । एवं स्तनं धयतीति—**स्तनंधयः**, मुञ्जं धयतीति—**मुञ्जंधयः**, कूलमास्यं पुष्पं च धयतीति – **कूलंधयः, आस्यंधयः, पुष्पंधयः** । मतान्तरमाह—**मुञ्जादिभ्यः केचिदेवेच्छन्ती**ति—पाणिनीये व्याकरणे मुञ्जादिभ्यः परत्वेऽयं प्रत्ययो न विहितः, अयं तदाशयः—शुनी-स्तनयोः परम्परया साक्षाच्च ट्धेधातोः पानार्थस्य कर्मत्वसम्भावनायामपि मुञ्जादीनां तस्य कर्मत्वासम्भवेन ततो विधानस्यानन्वितत्वप्रतिभासनात् तेषां न ग्रहणमिति, सति च प्रामाणिके प्रयोगे तूपचरितं पानकर्मत्वं बोध्यम् । धातौ टित्वफलस्यादृष्टतया ट्धेधातौ टित्वकरणमनर्थकमित्याशङ्कापनोदायाह—**ट्धेष्टकारो ङ्यर्थः** इति, अयमाशयः—अस्तु नाम धातौ तन्निमित्तके कार्ये वा टित्वस्यानावश्यकत्वं, किन्तु * अवयवेऽचरितार्था अनुबन्धाः समुदायस्योपकारका भवन्ति * इति न्यायाद् धातावचरितार्थोऽपि टकारोऽत्र धातुप्रत्ययनिष्पन्नसमुदाये स्त्रियां ङीप्रत्ययं निष्पाद्य चरितार्थ इति न वैयर्थ्यम् । ङ्यन्तप्रयोगमाह – **शुनिंधयी**ति—शुनीं या धयति सा शुनिंधयीति, अत्र टित्वात् "अणञे०" [ २. ४. २०. ] इति ङीप्रत्ययः । एवं या स्तनं धयति सा **स्तनंधयी सर्पजातिरि**ति — सर्पेषु एका जातिरेव स्तनंधयी भवति, यज्जातीयाः सर्पा दुग्धदातृपशुस्त्रियो मानुषीर्वा पादौ बध्वा निपात्य स्तनं पिबन्ति, तत्र तेष्वयं शब्दः स्तनपानक्रियानिमित्तत्वेन प्रवृत्त इति जातिप्रवृत्तिनिमित्तत्वाभावात् स्त्रियां ङीर्न प्राप्त इति धातोष्टित्वेन स साधनीयः । अयमाशयः—चतुष्टयी शब्दानां प्रवृत्तिः—जातिनिमित्तिका, गुणनिमित्तिका, व्यक्तिनिमित्तिका, क्रियानिमित्तिका च । जातिप्रवृत्तिनिमित्तकाः शब्दा गवादयः, एते हि गोत्वादिजातिं निमित्तीकृत्य प्रवर्तन्ते । गुणप्रवृत्तिनिमित्तकाः शुक्लादयः

शब्दाः शुक्लादिगुणं निमित्तीकृत्य प्रवर्तमानाः । व्यक्तिप्रवृत्तिनिमित्तका डित्थादयः शब्दा एकव्यक्तिविषयतया प्रवृत्ताः । क्रियाप्रवृत्तिनिमित्तकाः पाचकादिशब्दाः पचनादिक्रियामाश्रित्य प्रयुज्यमानाः । तत्र जातिप्रवृत्तिनिमित्तकेष्वेव जातिनिमित्तको ङीर्भवति, यथा वृषलीत्यादौ, क्रियाप्रवृत्तिनिमित्तकेषु च न भवति, यथा पाचिकेत्यादौ, एवं स्तनंधयीत्यत्रापि न स्यात् क्रियाप्रवृत्तिनिमित्तकत्वादिति तदर्थं ट्धेष्टकारः कर्तव्य एवेति ॥ ५. १. ११९. ॥

## नाडी-घटी-खरी-मुष्टि-नासिका-वाताद् ध्मश्च ॥ ५. १. १२०. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् ध्मतेर्ट्धेश्च खश् भवति । नाडीं धमति धयति वा—नाडिंधमः, नाडिंधयः । घटिंधमः, घटिंधयः । खरिंधमः, खरिंधयः । मुष्टिंधमः, मुष्टिंधयः । नासिकंधमः, नासिकंधयः, वातंधमः, वातंधयः । ङ्यन्तनिर्देशस्तदभावे खश्प्रत्ययनिवृत्त्यर्थः—नाडिं धमति धयति वा—नाडिध्मः, नाडिधः, घटध्मः, घटधः, खरध्मः खरधः ॥१२०॥**

**श० म० न्यासानुसन्धानम्—नाडी० ।** "ध्मां शब्दाग्निसंयोगयोः" शब्दे मुखादिना चाग्निसंयोगे । नाडीं धमतीति खशि "श्रौति०" [ ४. २. १०८. ] इति धमादेशे शवि पूर्वाकारलोपे ङस्युक्तसमासे मागमे तस्यानुस्वारे ह्रस्वे च—**नाडिंधमः**, एवं नाडीं धयतीति खशि शवि अयादेशेऽकारलोपे मागमे ह्रस्वे च—**नाडिंधयः** । एवं—घटीं खरीं मुष्टिं नासिकां वातं वा धमति धयति वा—**घटिंधमः, घटिंधयः; खरिंधमः, खरिंधयः; मुष्टिंधमः, मुष्टिंधयः; नासिकंधमः, नासिकंधयः; वातंधमः, वातंधयः** इति । नाडीशब्दो ह्रस्वान्तोऽप्यस्ति, घटशब्दः पुंसि अकारान्तोऽप्यस्ति, एवं खरशब्दोऽपि पुंसि वर्तते, इति त एव सूत्रे पठनीयाः, * नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् * इति न्यायेन तत्तच्छब्दस्य ग्रहणं स्यादेवेत्याशङ्कावारणायाह—**ङ्यन्तनिर्देशस्तदभावे खश्प्रत्ययनिवृत्त्यर्थः** इति, अयमाशयः—यदि ङीरहितानामपि ग्रहणमिहेष्टं स्यात् तर्हि तेषामेव पाठः कृतः स्यात्, उक्तन्यायेन ङ्यन्तानामपि ग्रहणं स्यादेव, न च तथा पाठः कृतः, अतो ज्ञायते एतद् यदीदृशगौरवेण शास्त्रकृतो ङीरहितानामेषामिह ग्रहणं नेष्टमिति तादृशेष्वेतेषूपपदेषु खश् न भवति, किन्तु "आतो डो०" [ ५. १. ७६. ] इति ड एव सामान्यविहित इति तथैवोदाजहार—**नाडिध्म** इत्यादि ॥ ५. १. १२०. ॥

## पाणि-करात् ॥ ५. १. १२१. ॥

**त० प्र०—आभ्यां कर्मभ्यां परात् ध्मतेः खश् प्रत्ययो भवति । पाणिं धमति—पाणिंधमः, करंधमः । पाणि-करात् ट्धेरपीति कश्चित्—पाणिंधयः, करंधयः । पाणिंधमाः, करंधमाः, नाडिंधमाः पन्थान इति तद्योगाद्, यथा—मञ्चाः क्रोशन्तीति ॥१२१॥**

**श० म० न्यासानुसन्धानम्—पाणि० ।** पाणिं धमतीति खशि शवि धमादेशे ङस्युक्तसमासे मागमे तस्यानुस्वारे—**पाणिंधमः** इति, पक्षे मस्यानुनासिके च—पाणिन्धमः । एवं करं धमन्तीति—**करंधमाः** । मतान्तरमाह—**पाणिकरात् ट्धेरपीति कश्चिदिति**, पूर्वसूत्रे ध्माधातोरेव पाठेन, ट्धेश्च चकारानुकृष्टत्वेन * चाकृष्टं नोत्तरत्र * इति न्यायेन तस्येहसूत्रे नानुवृत्तिरिति स्वमतेन ध्माधातोरेव प्रयोगो दर्शितः । किञ्चात्रापि धातुद्वयसम्बन्धेऽभिमते सति योग विभाग एव व्यर्थः स्यात्, पूर्वसूत्र एवेमावपि शब्दौ पठितौ स्याताम्, न च तथा कृतमिति पूर्वसूत्राद् विशेषो वक्तव्य एव, स चायमेव यद् ट्धेरनुवृत्तिर्नेति । तथापि क्वचित् पूर्वपठितैः सहैव तयोः पाठस्य सत्त्वेन धातुद्वयादपि प्रत्ययो विहित इति तदुपन्यासः प्रासङ्गिक एव । अस्त्वेतत्—कर्तरि प्रत्ययोऽयं विहित इति, अधिकरणे पाणिन्धमादीनां प्रयोगः कथं समर्थनीय इति चेत् ? अत्राह—**पाणिंधमाः, करंधमा, नाडिंधमाः पन्थान इति तद्योगादिति**—मार्गेषु सर्पादिहिंसकजीवनिराकरणाय जनः पाणिं धमति, एवं च पाणिन्धमजन्तुसम्बन्धात् पन्था अपि पाणिंधमादिशब्दैरुपचरितः, तथा च कर्तरि यौगिकोऽयं शब्दोऽधिकरणे लाक्षणिक इति भावः । ननु च नवीनोऽयं लक्षणामार्ग इति चेत् ? अत्राह—**यथा—मञ्चाः क्रोशन्तीति**, अयमाशयः—उच्चैराक्रन्दरूपक्रोशनस्याचेतनेषु मञ्चेषु

बाधितत्वात् वक्तृतात्पर्यानुपपत्त्या मञ्चपदस्य मञ्चस्थपुरुषे लक्षणा भवति तात्स्थ्यात् । यदुक्तमभियुक्तैः—

"तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च ।
तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः ॥" इति ।

तात्स्थ्यादित्यस्य मञ्चाः क्रोशन्तीत्युदाहरणमुक्तमेव । ताद्धर्म्यादित्यस्य कुन्ताः प्रविशन्तीति, कुन्तनामकशस्त्रधारिपुरुषेषु प्रविशत्सु कुन्तगततीक्ष्णताप्रतीतये ताद्धर्म्यं तेष्वारोप्यायं प्रयोगः क्रियते । तत्सामीप्यादित्यस्य गङ्गायां घोष इति, अत्र गङ्गातीरे गङ्गापदस्य लक्षणाऽऽश्रीयते, प्रवाहरूपगङ्गापदार्थस्य घोषाधिकरणतानुपपत्त्या वक्तृतात्पर्यानुरोधेन गङ्गापदस्य स्वसमीपे तीरे लक्षणा, गङ्गातीरे घोष इत्युक्त्याऽप्रतीयमानस्य शैत्यपावनत्वातिशयस्य प्रतिपत्तिर्हि लक्षणाश्रयणे बीजम् । तत्साहचर्यादित्यस्य छत्रिणो यान्तीति, छत्रिषु अच्छत्रिषु च सह गच्छत्सु अच्छत्रिष्वपि छत्रिसाहचर्याच्छत्रित्वव्यवहारो लक्षणैव । तादर्थ्यादित्यस्य इन्द्रार्थायां स्थूणायामिन्द्रोऽयमिति प्रयोग उदाहरणम् । पाणयो ध्मायन्तेऽस्मिन्निति पाणिन्धमोऽध्वा, अन्धकाराद्यावृत इत्यर्थः, तत्र हि सर्पाद्यपनोदाय पाणयः शब्द्यन्ते । इत्येवमधिकरणार्थेऽपीच्छन्ति केचित् । स्वोपज्ञपारायणे चाचार्येणाभिनन्दितम्, तथाहि—"पाणिकरात्" इति खशि—पाणिधमाः पन्थानः, पाणिधमपुरुषयोगात् पथां ताच्छब्द्यम्, अधिकरणे वा "बहुलम्" [ ५. १. २. ] इति खश्" इति ॥ ५. १. १२१. ॥

## कूलादुद्रुजोद्वहः । ५. १. १२२. ॥

**त० प्र०—कूलात् कर्मणः पराभ्याम् 'उद्रुज् उद्वह्' इत्येताभ्यां परः खश् भवति । कूलमुद्रुजो गजः, कूलमुद्वहा नदी ॥१२२॥**

**श० म० न्यासानुसन्धानम्—कूला०** । "रुजोंत् भङ्गे" कूलं तटमुद्रुजतीति खशि तुदादित्वात् शविकरणे ङित्त्वाद् गुणाभावे पूर्वाकारलोपे ङस्युक्तसमासे—**कूलमुद्रुजो गजः** । "वहीं प्रापणे" कूलमुद्वहतीति खशि शवि मागमे च—**कूलमुद्वहा नदी** ॥५. १. १२२. ॥

## वहा-ऽभ्राल्लिहः । ५. १. १२३. ॥

**त० प्र०—वहा-ऽभ्राभ्यां कर्मभ्यां पराल्लिहेः खश् भवति । वहं लेढि—वहंलिहो गौः । अभ्रंलिहः प्रासादः ॥१२३॥**

**श० म० न्यासानुसन्धानम्—वहा०** । वहं लेढीति—**वहंलिहो गौरिति**—वहतीति वहः स्कन्धः, तं लेढि जिह्वया परिमार्ष्टीत्यर्थः, एष हि बलीवर्दानां जातिगतः स्वभावो यत् ते परस्परं स्कन्धं लिहन्ति, प्रायो वहनजन्यश्रमापनोदाय तेषामियं स्वाभाविकी प्रवृत्तिरिति प्रतिभाति । "लिहींक् आस्वादने" अतः खशि अदादित्वात् विकरणाभावे खशो ङित्त्वात् गुणाभावे मागमे तस्यानुस्वारे च—वहंलिहः । अभ्रं लेढीति—**अभ्रंलिहः प्रासादः** इति—यद्यपि प्रासादस्य जडतया लेहनकर्तृत्वमसम्भवि तथापि तस्यात्युच्चतयाऽभ्रस्पर्शनोत्प्रेक्षा मार्गे, तत्कर्तृकमभ्रलेहनमुपचर्यते कविप्रयोगेषु, कविभिर्हि प्रासादस्य गिरिशिखरादेश्च विशेषणतया प्रयुज्यतेऽयं शब्दः ॥ ५. १. १२३. ॥

## बहु-विध्वरुस्-तिलात् तुदः । ५. १. १२४. ॥

**त० प्र०—एभ्यः कर्मभ्यः परात् तुदेः खश् भवति । बहुं तुदति—बहुंतुदं युगम्, विधुंतुदो राहुः, अरुंतुदः पीडाकरः, तिलंतुदः काकः । बहोः केचिदेवेच्छन्ति ॥१२४॥**

**श० म० न्यासानुसन्धानम्—बहु०** । "तुदींत् व्यथने" बहुं तुदतीति खशि तुदादित्वात् शविकरणे पूर्वाकारलोपे ङित्त्वात् गुणाभावे ङस्युक्तसमासे मागमे तस्यानुस्वारे—**बहुंतुदं युगम्**, पक्षे मस्यानुनासिके—बहुन्तुदः, एवं विधुं चन्द्रं तुदतीति—**विधुंतुदो राहुः**, व्रणार्थकोऽरुस्शब्दः, अरुस्तुदतीति खशि उकारात् परो मागमः, संयोगान्तलक्षणे सकारलोपे च—**अरुंतुदः पीडाकरः**, तिलं तुदतीति—**तिलंतुदः काकः** । मतविशेषमाह—**बहोः केचिदेवेच्छन्तीति**—न सर्वे इति भावः । पाणिनीयेऽपि बहोः परात् तुदोऽयं प्रत्ययो न विधीयते ॥ ५. १. १२४. ॥

## ललाट-वात-शर्धात् तपा-ऽज-हाकः । ५. १. १२५. ॥

**त० प्र०—ललाटादिभ्यः कर्मभ्यः परेभ्यो यथा-**

**संख्यं 'तप् अज् हाक्', इत्येतेभ्यः खश् भवति । ललाटं तपति—ललाटंतपः सूर्यः, वातमजन्ति–वातमजा मृगाः, शर्धंजहा माषाः । खशः शित्वादजेर्वी आदेशो न भवति । हाकः ककारो हाङो निवृत्यर्थः ॥१२५॥**

**श० म० न्यासानुसन्धानम्—ललाट०** । "तपं संतापे" ललाटं तपतीति खशि शवि पूर्वाकारलोपे मागमे तस्य वानुस्वारे—**ललाटंतपः सूर्य** इति—नेदं सूर्यस्य यौगिकं नाम, अपि तु विशेषणतया प्रायः प्रयुज्यते मध्याह्नस्थिते सूर्ये, तस्य हि आकाशमध्यस्थितत्वात् प्रखरतरत्वाच्च तत्कार्यकारित्वमिति केचन । "अज क्षेपणे च" चकाराद् गतौ, वातमजन्तीति— **वातमजा मृगाः** इति—न सर्वे मृगा वातमजाः किन्तु कस्तूरीयुक्ता एव, ते हि स्वनाभिस्थितकस्तूरीगन्धं वायुना नीयमानमाघ्रायान्यत एवायं वायुनाऽऽनीयते इति भ्रमात् वातसंमुखं धावन्तीति स्वभावः । "ओहांक् त्यागे" शर्धोऽपानशब्दः, तं जहतीति खशि ह्वादित्वात् द्वित्वे पूर्वहस्य जत्वे ह्रस्वे आकरस्य "इडेत्०" [ ४. ३. ९४. ] इति लुकि ङस्युक्तसमासे पूर्वपदस्य मागमे तस्यानुस्वारे च—**शर्धंजहा माषाः** इति, हाकोऽन्तर्भावितण्यर्थत्वमत्र, नहि माषाणां जडानां शर्धहानकर्तृत्वं सम्भवति, किन्तु वातवर्धकतया शर्धहानप्रयोजकत्वमेव तेषामिति धातोरन्तर्भावितण्यर्थताऽऽवश्यकी । सिंहावलोकनन्यायेन वातमजा इत्यत्राजेर्वीभावाभावं समर्थयति—**खशः शित्वादिति**—अशिति प्रत्यये एव वीभावो भवति, अत्र तु शित् प्रत्यय इति न वीभाव इत्यर्थः । जहातेरनुबन्धसहितनिर्देशे प्रयोजनं दर्शयति—**हाकः ककारो हाङो निवृत्त्यर्थः** इति—एकानुबन्धग्रहणे न द्व्यनुबन्धकस्येति "ओहांङ्क् गतौ" इत्यस्य ग्रहणाभावार्थ इत्यर्थः, एवं च तस्मादयं न भवतीति भावः ॥ ५. १. १२५. ॥

## असूर्योग्राद्दृशः । ५. १. १२६. ॥

**त० प्र०—असूर्योग्राभ्यां कर्मभ्यां परात् दृशेः खश् भवति । सूर्यमपि न पश्यन्ति–असूर्यंपश्या राजदाराः, दृशिना संबद्धस्य नञः सूर्येण सहासामर्थ्येऽपि गमकत्वात् समासः । उग्रं पश्यति–उग्रंपश्यः ॥१२६॥**

**श० म० न्यासानुसन्धानम्—असू०** । "दृशृं प्रेक्षणे" **सूर्यमपि न पश्यन्ती**ति—किमुतान्यमिति शेषः, अस्यायमाशयः—एवं नाम राजदारा गुप्ता यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्ति, किं पुनः परपुरुषमिति । तथा च सूर्यमपि न पश्यन्तीत्यर्थे खशि शवि "श्रौति०" [ ४. २. १०८. ] इति दृशः पश्यादेशे मागमे तस्यानुस्वारे च—**असूर्यंपश्या राजदाराः** इति । अत्र हि दर्शनं प्रतिषिध्यते न तु सूर्य एव, तस्माद् दृशिनैव तत्रः सम्बन्धः, न सूर्येणत्यसामर्थ्यम्, यदा सूर्यः प्रतिषिध्यते तदा न भवितव्यं प्रत्ययेनानभिधानादित्याशङ्कां समाधत्ते—**दृशिना सम्बद्धस्य नञः सूर्येण सहासामर्थ्येऽपि गमकत्वात् समास** इति—असामर्थ्यं हि विवक्षितार्थप्रतिपादनासहत्वम्, तच्चात्र न, विवक्षितार्थस्य प्रतिपत्तिसत्त्वादिति भावः । यद्वा सूत्रे 'असूर्यं' इति निपातनमेव समासविधाने गमकं प्रमाणभूतमिति भावः । अत्र च यद्यपि असूर्यशब्दस्यानर्थकत्वमिति तस्य नामत्वाभावेन विभक्तेरभावात् पदत्वं दुर्लभम्, तथापि कर्मत्वाभिव्यञ्जनार्थं विभक्तेरावश्यकत्वेन गमकत्वादेव विभक्तेरप्युत्पत्तिर्ज्ञेया । ननु च यथा राजदाराः सूर्यं न पश्यन्तीति तथाऽन्यदपि परपुरुषादिकम्, तत्रायुक्तं सूर्येणैकेन विशेषणेनेति चेत् ? उच्यते—गुप्तिपरं चैतदिति, यदेतदसूर्यंपश्या राजदारा इति वचनमेतद् गुप्तिप्रधानं गुप्तिप्रतिपादनाय प्रयुक्तत्वात्, गुप्तिपरत्वमस्य—एवं नाम राजदारा इत्यादिना दर्शितमेव, तथा च सत्यपि सूर्यदर्शने प्रयोगो भवति । यदा तु सूर्यदर्शनाभावमात्रं विवक्षितं तदाऽनभिधानात् खश् एव न भवतीत्युक्तमेव । उग्रं पश्यतीति—**उग्रंपश्यः** इति, पश्यादेशादिकं प्राग्वत् ॥ ५. १. २६. ॥

## इरंमदः । ५. १. १२७. ॥

**त० प्र०—कर्मण इति निवृत्तम् । इरापूर्वान्माद्यतेः खश् श्याभावश्च निपात्यते । इरा–सुरा, तया माद्यतीति-इरंमदः ॥१२७॥**

**श० म० न्यासानुसन्धानम्—इरंमदः** । प्रयोगार्थमनुसृत्य प्रकरणभेदमाह—**कर्मण इति निवृत्तमिति,**

तथा चात्र प्रयोगानुसारमेव व्युत्पत्तिस्तदनुसारिण्येव च विभक्तिरिति फलितम् । "मदैच् हर्षे" तृजादिषु प्राप्तेषु खश् निपात्यते, तत्र दिवादित्वात् श्ये प्राप्ते तदभावश्च निपात्यते, तदाह—**खश् श्याभावश्च निपात्यते** इति । प्रयोगार्थं दर्शयितुं सविग्रहमुदाहरति—**इरा सुरा, तया माद्यतीति—इरंमदः** इति—मागम ह्रस्वादिकं प्राग्वदवसेयम् ॥ ५. १. १२७. ॥

## नग्न-पलित-प्रिया-न्ध-स्थूल-सुभगा-ऽऽढ्य-तदन्ताच्च्व्यर्थेऽच्वेर्भुवः खिष्णु खुकञ् ॥ ५. १. १२८. ॥

**त० प्र०—नग्नादिभ्यः केवलेभ्यस्तदन्तेभ्यश्चाच्व्यन्तेभ्यश्च्व्यर्थे वर्तमानेभ्यः पराद् भवतेः खिष्णु-खुकञौ प्रत्ययौ भवतः । अनग्नो नग्नो भवति—नग्नंभविष्णुः, नग्नंभावुकः; पालितंभविष्णुः, पालितंभावुकः; प्रियंभविष्णुः, प्रियंभावुकः; स्थूलंभविष्णुः, स्थूलंभावुकः; सुभगंभविष्णुः, सुभगंभावुकः; आढ्यंभविष्णुः, आढ्यंभावुकः । तदन्तेभ्यः—अननग्नोऽनग्नो भवति—अनग्नंभविष्णुः, अनग्नंभावुकः, असुनग्नः सुनग्नो भवति—सुनग्नंभविष्णुः, सुनग्नंभावुकः; इत्यादि । च्व्यर्थ इति किम् ? नग्नो भविता । अच्वेरिति किम् ? आढ्यीभविता, तृच् । उपपदविधिषु तदन्तविधिरनाश्रित इति तदन्तग्रहणम् ॥१२८॥**

**श० म० न्यासानुसन्धानम्—नग्न० । खिष्णु-खुकञौ प्रत्ययाविति**—खकारः खित्कार्यमकारार्थः, ञकारो ञित्कार्यवृद्ध्यर्थः । अनग्नो नग्नो भवतीति खिष्णौ "नामिनो गुणो०" [ ४. ३. १. ] इति गुणेऽवादेशे ङस्युक्तसमासे "खित्यनव्यया०" [ ३. २. १११. ] इति मागमे तस्य "तौ मुमो०" [ १. ३. १४. ] इति सूत्रेणानुस्वारे—**नग्नंभविष्णुरिति**, पक्षे मस्यानुनासिके—नग्नम्भविष्णुः, खुकञि तु "नामिनोऽकलि०" [ ४. ३. ५१. ] इति वृद्धावावादेशे च—**नग्नंभावुकः**, नग्नम्भावुकः । एवम्—अपलितः पलितो भवतीति—**पलितंभविष्णुः, पलितंभावुकः**, मागमस्य पक्षेऽनुस्वारो मः सर्वत्र विज्ञेयः । अप्रियः प्रियो भवतीति—**प्रियंभविष्णुः, प्रियंभावुकः**, अस्थूलः स्थूलो भवतीति—**स्थूलंभविष्णुः, स्थूलंभावुकः**, असुभगः सुभगो भवतीति—**सुभगंभविष्णुः, सुभगंभावुकः**, अनाढ्य आढ्यो भवतीति—**आढ्यंभविष्णुः, आढ्यंभावुकः** । तदन्तमुदाहर्तुमाह—**अननग्नोऽनग्नो भवतीति—अनग्नंभविष्णुः, अनग्नंभावुकः**, एवम्—असुनग्नः सुनग्नो भवतीति—**सुनग्नंभविष्णुः, सुनग्नंभावुकः** । अत्र न नग्नोऽनग्नः, सुष्ठु नग्नः सुनग्न इति नग्नान्तता । पदकृत्यं पृच्छति—**च्व्यर्थ इति किमिति**, च्व्यर्थाभावे मा भूदित्याशयेनोत्तरयति—**नग्नो भविता**, नात्रानग्नस्य नग्नभावो विवक्षितः, किन्तु नग्नभवनमात्रं विवक्षितमित्यस्याप्रवृत्त्या तृच् भवति । पुनः पृच्छति—**अच्वेरिति किमिति**, उत्तरयति—**आढ्यीभवितेति**—पूर्वमनाढ्य आढ्यो भवतीति "कृभ्वस्तिभ्यां कर्तृकर्मभ्यां प्रागतत्तत्त्वे च्विः" [ ७. २. १२८. ] इति च्वौ "ईश्च्वाववर्णस्यानव्ययस्य" [ ४. ३. १११. ] इत्यवर्णस्य ईकारे—आढ्यीभविता, क्विप्वत् च्वेः सर्वापहारः [ सर्वेषामित्त्वाल्लोपः ], अत्र च्व्यन्तत्वादस्याप्रवृत्त्या तृच् प्रत्ययो भवति, तदाह—**तृच्** इति । शब्दस्वरूपं विशेष्यमादाय तदन्तविध्याश्रयणेनैव सिद्धे तदन्तग्रहणस्य वैयर्थ्यमाशङ्क्याह—**उपपदविधिषु तदन्तविधिरनाश्रित** इति—एतच्च "क्षेमप्रियमद्रभद्रात् खाण्" [ ५. १. १०५. ] इति सूत्रे प्रागेवोपपादितम्, एवं च तदन्तग्रहणं विना तदन्तेभ्य एतेभ्यः कर्मभ्यः परत्वे प्रत्ययो न स्यादिति तदन्तग्रहणमावश्यकमिति भावः ॥ ५. १, १२८. ॥

## कृगः खनट् करणे । ५. १. १२९. ॥

**त० प्र०—नग्नादिभ्योऽच्व्यन्तेभ्यश्च्व्यर्थवृत्तिभ्यः परात् करोतेः करणे खनट् प्रत्ययो भवति । करण इति "कर्तरि" [५. १ ३.] इत्यस्यापवादः । अनग्नो नग्नः क्रियतेऽनेन—नग्नंकरणं द्यूतम् । एवं—पलितंकरणं तैलम्, प्रियंकरणं शीलम्, अन्धंकरणः शोकः, स्थूलंकरणं दधि सुभगंकरणं रूपम्, आढ्यंकरणं वित्तम् । तदन्तेभ्योऽपि—अननग्नोऽनग्नः क्रियतेऽनेन—अनग्नंकरणः पटः, सुनग्नंकरणः, अपलितंकरणो रस इत्यादि । च्व्यर्थ इत्येव—नग्नं करोति द्यूतेन, नात्र प्रकृतिविकारभावो विवक्ष्यते । अच्वेरित्येव—नग्नीकुर्वन्त्यनेन । अत्र खनट्-**

**प्रतिषेधसामर्थ्यादनडपि न भवति, नहि नाग्नीकरण मित्यत्रानट्-खनटो रूपे समासे स्त्रियां वा विशेषोऽस्ति। केचित् तु च्व्यन्तपूर्वादपि खनटमिच्छन्ति–नग्नीकरणं द्यूतम् ॥१२९॥**

---

**श० म० न्यासानुसन्धानम्—कृगः०। 'करणे' इति "कर्तरि" [ ५. १. ३. ] इत्यस्यापवादः** इति, यद्यपि बाध्यबाधकभावः प्रधानयोरेव विधेययोर्भवति, विधेयविशेषणभूतयोर्द्वयोः पदार्थयोर्बाध्यबाधकभावोऽनुचितस्तथापि परम्परयाऽर्थस्यापि विधेयत्वादर्थयोरपि तक्रकौण्डिन्यायेन बाध्यबाधकभावः समुचित एव। यथा सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्युक्ते ब्राह्मणान्तःपातिकौण्डिन्यायापि दधिदानं प्राप्तमपि विशेषविहितेन तक्रदानेन बाध्यते, तथा सामान्यतः कृत्त्वेन कर्तरि प्राप्तोऽपि खनट् 'करणे' इत्यनेन बाध्यते इति। खनटि खकारः खित्कार्यमकारार्थः, टकारष्टित्कार्यङ्यर्थः। अनग्नो नग्नः क्रियतेऽनेनेति करणार्थेऽनेन खनटि गुणे ङस्युक्तसमासे पूर्वपदस्य मागमे तस्यानुस्वारे—**नग्नंकरणं द्यूतम्**मिति, पक्षे मस्यानुस्वारे—नग्नङ्करणमित्यपि भवति। एवम्—अपलितः पलितः क्रियतेऽनेनेति—**पलितंकरणं तैलम्**, अप्रियः प्रियः क्रियतेऽनेनेति–**प्रियंकरणं शीलम्**, अनन्धोऽन्धः क्रियतेऽनेनेति—**अन्धंकरणः शोकः**। अस्थूलः स्थूलः क्रियतेऽनेनेति–**स्थूलंकरणं दधि**, असुभगः सुभगः क्रियतेऽनेनेति–**सुभगंकरणं रूपम्**, अनाढ्य आढ्यः क्रियतेऽनेनेति—**आढ्यंकरणं वित्तमिति**। तदन्तेभ्यः परत्वे उदाहर्तुमवतारयति—**तदन्तेभ्योऽपीति**। अननग्नोऽनग्नः क्रियतेऽनेनेति—**अनग्नंकरणः** पट इति, असुनग्नः सुनग्नः क्रियतेऽनेनेति—**सुनग्नंकरणः**। अनपलित पलितः क्रियतेऽनेनेति—**अपलितंकरणोर सः** इत्यादि। व्यावर्त्यं दर्शयति—**च्व्यर्थ इत्येव—नग्नं करोति द्यूतेनेति**—नात्र च्व्यर्थ इति नास्य प्रवृत्तिरित्यर्थः। नन्वत्रापि पूर्वमनग्नस्यैव नग्नतासम्पत्तिर्गम्यत इति च्व्यर्थस्य विद्यमानत्वमेवेत्याशङ्क्याह—**नात्र प्रकृतिविकारभावो विवक्ष्यते** इति—च्व्यर्थस्य विद्यमानत्वेऽपि नेह तस्य विवक्षा, कुतः? प्रकृतिविकारभावस्याविवक्षणात्, च्विप्रत्ययो हि पूर्वं तद्रूपेणासतस्तद्रूपताप्रतिपत्तौ विवक्षितायामेव विधीयतेऽतः सोऽपि न भवति।

शिष्यबुद्धिवैशद्याय काशिकाविवरणपञ्जिकाकारविचारोऽत्र दर्श्यते—"ननु च नेमे च्व्यर्थाः, ते नियोगत एव च्व्यन्ताः, इह त्वच्व्यन्ता आढ्यादयो न सम्भवन्त्येव, तत् किं पर्युदस्यन्त इत्याह—च्वेर्विकल्पेन विधानादित्यादि, विकल्पेन विधानं तु "समर्थानां प्रथमाद् वा" [ ४. १. ८२. ] इत्यतो वाग्रहणानुवृत्तेः। आढ्यं तैलेन कुर्वन्तीत्यादि, नह्यसौ प्रागनाढ्यस्तैलेनाढ्यः क्रियते, किं तर्हि? आढ्यस्तैलेनाभ्यज्यते, अनेकार्थत्वाद् धातूनां करोतिरत्राभ्यञ्जने वर्तते, तेनाभूतप्रादुर्भावो नास्तीति भवति प्रत्युदाहरणम्। अथवा भवतु नामाभूतप्रादुर्भावः, नह्यभूतप्रादुर्भाव इत्येवं सर्वोऽभूतप्रादुर्भावश्च्व्यर्थो भवति, किन्तु विशिष्ट एव, यस्मात् तत्र प्रकृतिग्रहणं दर्शयिष्यते, प्रकृतिः कार्यस्य पूर्वावस्था, तेन यत्राश्रितं कार्यं पूर्वारम्भश्च कार्यस्य भाव्यमानतया विवक्ष्यते तत्र सोऽभूतप्रादुर्भावः, स एव च्व्यर्थः। एतदुक्तं भवति—यदा कार्यस्य पूर्वावस्था विवक्ष्यते तदा च्व्यर्थो भवति, नाभूतप्रादुर्भावविवक्षायामिति। इह तु पूर्वावस्थामपरामृश्यानाश्रितपूर्वारम्भे कार्येऽभूततद्भावमात्रं विवक्षितम्, तेन सत्यप्यभूततद्भावे च्व्यर्थो न भवति, अतो भवत्येतत् प्रत्युदाहरणम्" इति। स्वमते च "कृभ्वस्तिभ्यां कर्तृकर्मभ्यां प्रागतत्तत्त्वे च्विः" [ ७. २. १२८. ] इति सूत्रे प्रागिति पदमप्येतदर्थं पुष्णाति। अच्वेरित्यस्यानुवृत्तेर्व्यावर्त्यं दर्शयितुमाह—**अच्वेरित्येव–नग्नीकुर्वन्त्यनेनेति**—अनग्नं नग्नं कुर्वन्त्यनेनेति वाक्यम्, अत्र प्रकृतिविकारभावविवक्षणाद् भवति च्विरिति नास्य प्रवृत्तिः, च्वौ परेऽवर्णस्येकारः, च्वेश्च सर्ववर्णानामित्त्वाल्लोपः। नन्विह खनट् माऽस्तु, किन्तु "करणाधारे" [ ५. ३. १२९. ] इत्यनट् कुतो न स्यादित्याशङ्कायामाह—**अत्र खनट्प्रतिषेधसामर्थ्यादनडपि न भवतीति**—यदीह खनटि प्रतिषिद्धेऽप्यनट् स्यादेव तर्हि खनट्प्रतिषेध एव निष्फल इति तत्साफल्यायानडपि नेह भवतीति भावः। खनट्प्रतिषेधस्य वैफल्यमेव दर्शयति—**नहि नग्नीकरणमित्यत्र अनट्–खनटो रूपे समासे स्त्रियां वा विशेषोऽस्तीति**, अयमाशयः—अनट्-खनटोरनुबन्धलोपे पुंसि रूपे विशेषाभावः स्पष्ट

एव, स्त्रियामपि टित्वनिबन्धनो ङीरुभयत्र समान एव, खित्वनिबन्धनो मोऽन्तविधिरपि नेह च्व्यन्तस्य "ऊर्याद्यनुकरणच्विडाश्च गतिः" [ ३. १. २. ] इत्यनेन गतिसंज्ञकत्वात्, गतिसंज्ञकस्य च "गतिः" [ १. १. ३६. ] इत्यनेनाव्ययसंज्ञकत्वात्, मान्तविधौ हि "खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च" [ ३. २. १११. ] इति सूत्रेऽव्ययस्य पर्युदासात् । न च समासेऽपि विशेषः, यथोपपदसमासो "ङस्युक्तं कृता" [ ५. १. ७२. ] इति नित्यं समासः, तथा "गतिक्वन्यस्तत्पुरुषः" [ ३. १. ४२. ] इति गतिसमासोऽपि नित्यः । एवं च सर्वथा विशेषाभावेन खनट्प्रतिषेधोऽनटि विहिते व्यर्थ एव स्यादिति तत्सामर्थ्यादनडपि नेति युक्तमेव । कौमुद्यां तु दीक्षितेनेत्थमुक्तम्—इह प्रतिषेधसामर्थ्याल्लयुडपि [ अनडपि ] नेति काशिका । भाष्यमते तु ल्युट् स्यादेव" इति । तथा च भाष्ये "आढ्यसुभग०" [ ५. २. ५६. ] इति सूत्रे—"ख्युनि च्विप्रतिषेधानर्थक्यं ल्युट्-ख्युनोरविशेषात् ख्युनि च्विप्रतिषेधोऽनर्थकः । किं कारणं ? ल्युट्-ख्युनोरविशेषात् । ख्युना मुक्ते ल्युटा भवितव्यम् । न चैवास्ति विशेषश्च्व्यन्त उपपदे वा, ख्युनो ल्युटो वा तदेव रूपं स एव च स्वरः" इति । अग्रे च सर्वथा रूपे विशेषाभावं प्रतिपाद्य 'अच्वौ' इत्युत्तरार्थमित्युपसंहृतम् । एवं च भाष्यमते खनटि प्रतिषिद्धेऽपि अनट् स्यादेव, तथा च रूपे विशेषाभावेन खनट्प्रतिषेधोऽनर्थक एव । तदेवाह—**केचित् तु च्व्यन्तपूर्वादपि खनटमिच्छन्तीति**, अयमाशयः—'अच्वौ' इत्यस्योत्तरार्थत्वमिति भाष्यमतेऽत्र प्रतिषेधाभावात् खनट् स्यादेवेति । नन्वत्र पूर्वत्र च च्व्यर्थे वर्तमानत्वमच्व्यन्तां चाश्रित्य प्रवृत्तिर्दर्शिता, तत्र यदि च्व्यर्थस्तदा च्विना भवितव्यमित्यच्व्यन्तता नास्तीति प्रवृत्तिरनुपपन्ना, यदि च नास्ति च्विस्तदा च्व्यर्थाभावात् प्रवृत्तिरनुपपन्नेति प्राप्त उभयतः पाशा रज्जुरिति न्याय इति चेत् ? अत्रेदं प्रतिभाति—अभूततद्भावश्च्व्यर्थः, तत्रापि प्रकृतिविकारभावविवक्षायामेव च्विरिति, तथा चाभूततद्भावमात्रविवक्षया च्व्यर्थत्वं प्रकृतिविकारभावस्याविवक्षया चाच्व्यन्तत्वमिति सूपपन्नमुभयमपि । अथवा पञ्जिकाकाराभिप्रायेण च्वेर्विकल्पेन विधानात् पक्षे च्व्यर्थत्वेऽपि न च्विरिति द्वयमप्युपपन्नमिति ॥ ५. १. १२९. ॥

## भावे चाशिताद् भुवः खः । ५. १. १३०. ॥

त० प्र०—आशितशब्दात् पराद् भवतेर्भावे करणे चाभिधेये खः प्रत्ययो भवति । आशितेन तृप्तेन भूयते भवता—आशितंभवो वर्तते भवतः; आशितो भवत्यनेन—आशितंभव ओदनः, आशितो भवत्यनया—आशितंभवा पञ्चपूली । असरूपत्वादनडपि—आशितस्य भवनम्, न घञ् सरूपत्वात् । आशित इति निर्देशादश्नातेः कर्तरि क्तो दीर्घत्वं च । आङ्पूर्वाद् वा अविवक्षितकर्मकात् कर्तरि क्तः ॥१३०॥

श० म० न्यासानुसन्धानम्—**भावे०** । **भावे चे**ति चकारेण करणरूपार्थः समुच्चीयते, तदाह—**करणे चाभिधेये** इति । पूर्वं भावे उदाहरणीयमिति तद्वाक्यमाह—**आशितेन तृप्तेन भूयते भवते**ति—स्वाद्यन्तकर्तृत्वात् 'भवता' इत्यत्र कर्तरि तृतीया, **आशितंभवो वर्तते भवतः** इत्युदाहरणम्, भवत इत्यत्र कृदन्तकर्तृत्वात् षष्ठी । करणे सवाक्यमुदाहरणमाह—**आशितो भवत्यनेने**ति वाक्यम्, 'अनेन' इत्यत्र करणे तृतीया, **आशितंभव ओदनः** इति चोदाहरणम्, खेन करणस्योक्तत्वात् प्रथमा, एवम्—**आशितो भवत्यनया** इति वाक्यम्, **आशितंभवा पञ्चपूली**त्युदाहरणम् । अत्र "करणाधारे" [ ५. ३. १२९. ] इत्यनेनानडपि भवत्येवेत्याह—**असरूपत्वादनडपी**ति, **आशितस्य भवनमि**ति विग्रहप्रदर्शनम्, प्रयोगस्तु भावे—आशितभवनमिति, करणे च—आशितभवन इत्यादि यथा विशेष्यम् । भावे करणे च यद्यपि घञपि भवति, परं त्विह स न भवतीत्याह—**न च घञ् सरूपत्वा**दिति, तथा च सरूपत्वेन नित्यमेव बाध्यबाधकभाव इति घञ् बाध्यत एवेति । यद्यपि *क्तानट्तुम्खलर्थेषु वाऽसरूपविधिर्न* इति न्यायेनानडपि न स्यादिति पूर्वोक्तमसरूपत्वादनडपीति न युक्तम्, तथापि यत्र घञादेर्बाधकत्वेन क्तानडादयः प्रसक्तास्तत्र नित्यं बाधो न तु विकल्पेनेति तन्न्यायस्यार्थ इति स्वीकारेणात्रानटोऽपवादः ख इति तन्न्यायस्याप्रसक्तेर्वासरूपविधिरप्रतिहतैवेति—अनडपि भवत्येव । एतच्च काशिकायामपि 'आशितभवनम्' इत्युदाहरणेन स्वीकृतमेव । "अशश् भोजने" इत्यश्नातेः सकर्मकत्वेन कर्तरि क्तप्रत्ययस्य, धातोरादेर्दीर्घत्वस्य चालाक्षणिकत्वेन तत्सि-

द्वयुपायमाह—**आशित इति निर्देशादश्नातेः कर्तरि क्तो दीर्घत्वं चेति**—सूत्रे 'आशितात्' इति निर्देशेन सकर्मकादपि कर्तरि क्तप्रत्ययो दीर्घत्वं च निपात्यत इति भावः । शीलादित्वात् वर्तमानकालत्वे चाश्नातीति—आशितः, उपायान्तरमप्याह—**आङ्पूर्वाद् वाऽविवक्षितकर्मकात् कर्तरि क्त** इति—आ समन्तात् अश्नाति स्मेति कर्मणोऽविवक्षितत्वेनाकर्मत्वात् "गत्यर्थाकर्मक०" [ ५. १. ११. ] इति कर्तरि क्ते—आशित इति, "तृप्ते त्वाघ्रातसुहिताऽऽशिता" इत्यभिधानचिन्तामणिवचनात् आशितः–तृप्त इत्यर्थः ॥ ५. १. १३०. ॥

## नाम्नो गमः खड्-डौ च विहायसस्तु विहः ॥ ५. १. १३१. ॥

**त० प्र०—नाम्नः परात् गमेः "खड् ड" इत्येतौ खश्च प्रत्यया भवन्ति, विहायस्शब्दस्य च विहादेशो भवति । खड्**– तुरो गच्छति–तुरंगः, भुजेन भुज इव वा गच्छति-भुजंगः, प्रवेण प्लवेन गच्छति—प्रवङ्गः, प्लवङ्गः, पतो गच्छति—पतंगः, विहायसा गच्छति—विहंगः । **ड**—तुरगः, भुजगः, प्लवगः, विहगः, अत्यन्तगः, सर्वगः, सर्वत्रगः, अनन्तगः, परदारगः, ग्रामगः, गुरुतल्पगः, प्रतीपगः पुरोगः, पीठगः, तीरगः । अग्रादिभ्यस्तदन्तेभ्योऽपि—अग्रगः, सेनाग्रगः, आदिगः, पङ्क्त्यादिगः, मध्यगः गृहमध्यगः, अन्तगः, शाखान्तगः, अध्वगः, नगराध्वगः, दूरगः, अदूरगः, पारगः, वेदपारगः, अगारगः, स्त्र्यगारगः, इत्यादि । अथ संज्ञायाम् खे गच्छति–खगः पक्षी, न गच्छति–अगो वृक्षः पर्वतश्च, एवं–नगः, उरसा गच्छति–उरगः, पृषोदरादित्वात् सलोपः । पतो गच्छति—पतगः पक्षी । पद्भ्यां न गच्छति—पन्नं गच्छति वा—पन्नगः सर्पः । आपमर्थं गच्छत्यापगा नदी । आशु गच्छति—आशुगः शरः । निम्नगा, समुद्रगा, सततगा, इत्यादि । अगो वृषलः शीतेनेत्यसंज्ञायामपि । अथ खः–सुतं सुतेन वा गच्छति—सुतंगमो नाम हस्ती यस्य सौतंगमिः पुत्रः । मितं गच्छति—मितंगमोऽश्वः । अमितंगमा हस्तिनी । जनंगमश्चण्डालः । पूर्वंगमाः पन्थानः । हृदयंगमा वाचः । तुरंगमोऽश्वः । भुजंगमः सर्पः । प्रवंगमः कपिः । प्लवंगमो भेकः । विहंगमो नभसंगमश्च पक्षी, नभसशब्दोऽकारान्तोऽप्यस्ति । उरंगम इत्यपि कश्चित् । बहुलाधिकाराद् यथाप्रयोगदर्शनं व्यवस्था । डकारोऽन्त्यस्वरादिलोपार्थः ॥१३१॥

**श० स० न्यासानुसन्धानम्—नाम्नो० । गमेरिति**—"गम्लृ गतौ" इति 'गम्'धातोरित्यर्थः । अत्र चकारेण पूर्वोक्तः खः समुच्चीयते इति प्रत्ययत्रयस्य विधानम् । खकारः "खित्यनव्यया०" [ ३. १. १११. ] इति मागमार्थः, डकारो "डित्यन्त्यस्वरादेः" [ २. १. ११४. ] इत्यन्त्यस्वरादिलोपार्थः । यत्र विहायो नाम तत्र कार्यान्तरमाह—**'विहायस्'शब्दस्य च विहादेशो भवतीति** । खड्प्रत्यये उदाहर्तुमाह—**खड् इति** । तुरः–त्वरमाणो गच्छतीति खडि अन्त्यस्वरादिलोपे पूर्वस्य मागमे तस्यानुस्वारे—**तुरंगः**, पक्षे मस्यानुनासिके–तुरङ्गः । एवं—भुजेन—कौटिल्येन, भुज इव—बाहुरिव वा गच्छतीति खडि—**भुजंगः** सर्पः, भुजाभ्यां नृत्यद्भ्यामिव गच्छतीति वा—**भुजंगो** वेश्यापतिः । "प्रुंङ् प्लुंङ् गतौ" आभ्यां भावाकर्त्रोरलि—प्रवः, प्लवः, प्रवेण प्लवेन—प्लुतिगमनेन गच्छतीति—**प्रवंगः, प्लवंगः** । पततीत्यचि पतः, पतो गच्छतीति—**पतंगः** शलभः, पतः सन् गच्छतीति—**पतंगः** सूर्यः । विहायसा—आकाशेन गच्छतीति खडि विहादेशे च—**विहंगः** । डप्रत्यये उदाहर्तुमाह—**डेति**, तुरः—त्वरमाणो गच्छतीति डेऽन्त्यस्वरादिलोपे च–**तुरगः**, अश्व इत्यर्थः । भुजेन कौटिल्येन भुज इव बाहुरिव वा गच्छतीति–**भुजगः** सर्पः । प्राग्वत् व्युत्पत्त्या—**प्लवगः, विहगः** । एवम्—अत्यन्तं गच्छतीति—**अत्यन्तगः** । सर्वं गच्छतीति—**सर्वगः** । सर्वत्र गच्छतीति—**सर्वत्रगः** । अनन्तं गच्छतीति–**अनन्तगः** । परदारान् गच्छतीति—**परदारगः** । ग्रामं गच्छतीति—**ग्रामगः** । गुरुतल्पं गच्छतीति—**गुरुतल्पगः** । प्रतीपं प्रतिकूलं गच्छतीति—**प्रतीपगः** । पुरो गच्छतीति—**पुरोगः** । पीठमासनं गच्छतीति—**पीठगः** । तीरं गच्छतीति—**तीरगः** । वक्ष्यमाणेभ्योऽग्रादिभ्यः केवलेभ्यस्तदन्तेभ्यश्च परत्वेऽप्यस्य प्रवृत्तिरित्याह—**अग्रादिभ्यस्तदन्तेभ्योऽपि**, अग्रं सेनाग्रं च गच्छतीति—**अग्रगः, सेनाग्रगः** । मध्यं गृहमध्यं च गच्छतीति—**मध्यगः, गृहमध्यगः** । अन्तं शाखान्तं च गच्छतीति—**अन्तगः, शाखान्तगः** । अध्वानं नगराध्वानं च गच्छतीति—**अध्वगः, नगराध्वगः** । दूरमदूरं च गच्छतीति—

**दूरगः, अदूरगः** । पारं वेदपारं च गच्छतीति—**पारगः, वेदपारगः** । अगारं स्त्र्यगारं च गच्छतीति—**अगारगः, स्त्र्यगारगः** । अथ डप्रत्ययः कुत्रचित् संज्ञायां भवति, कुत्रचिच्चासंज्ञायाम्, तत्र संज्ञायामुदाहर्तुमाह—**अथ संज्ञायामि**ति, खे- आकाशे गच्छतीति डे-**खगः पक्षी,** एवं—न गच्छतीति—**अगो वृक्षः पर्वतश्चे**ति । अतिदिशति—**एवमि**ति, न गच्छतीति—**नगः,** "नगोऽप्राणिनि वा" [ ३. २. १२७. ] इति नञो वाऽकारादेशाभावः । उरसा—वक्षसा गच्छतीति—**उरगः,** सकारः क गत इत्याह—**पृषोदरादित्वात् सलोपः** इति । पततीति पतः, पतो गच्छतीति—**पतगः पक्षी** । पद्भ्यां न गच्छतीति—**पन्नगः** सर्पः, "नखादयः" [ ३. २. १२८. ] इति निपातनात् नञोऽकाराभावः पादस्य पदादेशश्च, "तृतीयस्य पञ्चमे" [ १. ३. १. ] इति दस्य नकारः, यद्वा पद्यते स्मेति पन्नम्, पन्नं-पतितं गच्छतीति **पन्नगः सर्पः** । आपम्—अब्धिं गच्छतीति—**आपगा नदी** । आशु शीघ्रं गच्छतीति—**आशुगः शरः** । निम्नं—भुवो विवरं गच्छतीति—**निम्नगा** नदी, समुद्रं गच्छतीति—**समुद्रगा** नदी, सततं गच्छतीति—**सततगा** नदी । असंज्ञायामपि भवतीत्याह—**अगो वृषलः शीतेनेत्यसंज्ञायामपी**ति—शीतेन—तुषारेण, वृषलः—शूद्रः, न गच्छतीति—अगः । अथ खप्रत्ययोदाहरणावसर इत्याह—**अथ खः** इति । सुतं सुतेन वा गच्छतीति खे मागमे च—**सुतंगमो हस्ती,** कोऽयमित्याह—**यस्य सौतङ्गमिः पुत्रः** इति—पुत्रस्य सौतङ्गमित्वव्यपदेशेन पितुः सुतङ्गमसंज्ञाऽनुमीयते, सत्यां हि पितुः सुतङ्गमसंज्ञायां तत्पुत्रस्य सौतङ्गमिशब्देनाभिधानं भवति, नासत्याम् । मितं गच्छतीति—**मितंगमोऽश्वः** । अमितं गच्छतीति—**अमितंगमा हस्तिनी** । जनं गच्छतीति—**जनंगमश्चण्डालः** । पूर्वं गच्छन्तीति—**पूर्वंगमाः पन्थानः** । हृदयं गच्छन्तीति—**हृदयंगमा वाचः** । तुरो गच्छतीति—**तुरंगमोऽश्वः** । भुजेन भुज इव वा गच्छतीति—**भुजंगमः सर्पः** । प्रवेण गच्छतीति—**प्रवंगमः कपिः** । प्लवेन गच्छतीति—**प्लवंगमो भेकः** । विहायसा नभसा च गच्छतीति—**विहंगमः, नभसंगमश्च पक्षी,** 'नभस्' शब्दस्याकारान्तत्वं कथमित्याह—**नभसशब्दोऽकारान्तोऽप्यस्ती**ति । मतान्तरमाह—**उरंगम इत्यपि कश्चिदि**ति । कुत्रचित् प्रत्ययत्रयं कुत्रचित् प्रत्ययद्वयं क्वचिच्चैक एव प्रत्ययः, क्वचिच्च संज्ञायामेव, क्वचिदसंज्ञायामपीत्यादिव्यवस्था वृत्तौ दर्शिता, कथमियं व्यवस्थेत्याशङ्कायामाह—**बहुलाधिकाराद् यथाप्रयोगदर्शनं व्यवस्थे**ति—बहुलाधिकारस्याभिमतसाधकतयैव कृतत्वेन यत्र यथा प्रयोगो दृश्यते तत्र तथैव शास्त्रस्य कल्पनमिति पूर्वोक्तसर्वाभिमतप्रयोगसिद्धिरिति । उभयत्र कृतस्य डित्त्वस्य फलमाह—**डकारोऽन्त्यस्वरादिलोपार्थः** इति ॥ ५. १. १३१. ॥

## सुग-दुर्गमाधारे । ५. १. १३२. ॥

**त० प्र०—सु-दुर्भ्यां परात् गमेराधारे डः प्रत्ययो निपात्यते । सुखेन दुःखेन च गम्यतेऽस्मिन्निति—सुगः, दुर्गः पन्थाः । आधार इति किम् ? सुगन्ता, दुर्गन्ता । असरूपत्वादनडपि भवति—सुगमनः, दुर्गमनः । सुगमो दुर्गम इति कर्मणि ॥१३२॥**

**श० म० न्यासानुसन्धानम्—सुग०** । निपातनसूत्रमिदमित्याह—**डः प्रत्ययो निपात्यते** इति । आधारार्थेऽनटो बाधनार्थमिदं सूत्रमिति "सुदुर्भ्यामाधारे" इत्येवमेव सूत्र्यतामलं निपातनेनेति चेत् ? न—सन्नियोगशिष्टतया खट्प्रत्ययोऽप्यनुवर्तेत, स च नेष्टः, निपातनस्येष्टविषयत्वात् ड एव निपातितः, तथा च निपातनमुखेन डप्रत्ययो विधीयत इति भावः । विगृह्योदाहरति—**सुखेन दुःखेन च गम्यतेऽस्मिन्निति—सुगः, दुर्गः पन्थाः** । पदकृत्यं पृच्छति—**आधार इति किमि**ति, आधारार्थाभावे मा भूदित्याशयेनोत्तरयति—**सुगन्ता, दुर्गन्ते**ति—सुखेन दुःखेन च गच्छतीति कर्तरि तृजित्यर्थः । अनेनानटोऽपवादो डो विधीयते, वाऽसरूपविधिना सोऽपि भवतीत्याह—**असरूपत्वादनडपि भवती**ति, सुखेन दुःखेन च यत्र गम्यते इति "करणाधारे" [ ५. ३. १२९. ] इत्यनटि—**सुगमनः, दुर्गमनः** इति । 'सुगः, दुर्गः' इत्येतयोः समानार्थतया 'सुगमः, दुर्गमः' इत्यपि लोके प्रयुज्यते, तच्च कथम् ? यतो डस्य "दुर्-स्वीषतः कृच्छ्राकृच्छ्रार्थात् खल्" [ ५. ३. १३९. ] इति विहितस्य खलश्चानुबन्धविनिर्मोके सरूपत्वेन नित्यमेव बाध्यबाधकभावस्यौचित्यमित्याशङ्कायामाह — **सुगमो**

**दुर्गम इति कर्मणी**ति—नात्राधारार्थे प्रत्यय इति न बाध्यबाधकभाव इति भावः। कर्मण्यपि प्रत्ययविधाने गतिकर्मण आधारतयाऽपि प्रतीतिर्युज्यत एवेति सुगदुर्गशब्दाभ्यां सुगमदुर्गमशब्दयोः पर्यायत्वेन प्रतीतिर्नानुचितेति तात्पर्यम्। प्रत्ययार्थस्य भेदाद् बाध्यबाधकभावाभावः, प्रयोगस्य तु शास्त्रानुसारं व्युत्पत्तिभेदेऽपि लौकिकी समाना प्रवृत्तिरिति बोध्यम् ॥ ५. १. १३२. ॥

## निर्गो देशे । ५. १. १३३. ॥

**त० प्र०—निस्पूर्वाद् गमेराधारे देशे डो निपात्यते। निर्गम्यतेऽस्मिन् देशे इति–निर्गो देशः। देश इति किम्? निर्गमनः ॥१३३॥**

**श० म० न्यासानुसन्धानम्—निर्गो०**। 'आधारे' इति पूर्वत्र निपातनार्थसम्बद्धमिहाप्यनुवर्तते। यद्यपि देश इति कथनेनैवाधारार्थस्य प्रतीतिर्भवति तथापि कर्मण्यपि प्रत्ययविधाने देशस्य वाच्यता सम्भवतीति तन्निराकरणायाधारपदानुवृत्तिमाश्रित्याह—**आधारे देशे डो निपात्यते** इति। पाणिनीये व्याकरणे "अन्तात्यन्त०" [ ३. २. ४८. ] इति सूत्रे भाष्ये—निसो देशे डो वक्तव्य इति वार्तिकं दृश्यते बहुषु पुस्तकेषु। परं तु नवीनैर्दीक्षितादिभिस्तन्न स्वग्रन्थे गृहीतमिति दृश्यते। भाष्येऽपि तद्वार्तिकस्याग्रे—"अपर आह—डप्रकरणेऽन्येष्वपि दृश्यते। डप्रकरणेऽन्येष्वपि [ उपपदेषु सत्सु ]-डो दृश्यत इति वक्तव्यम्। ततः स्त्र्यगारगोऽश्नुते यावत्। अन्नाय ग्रामगः। ध्वंसते गुरुतल्पगैः" इत्युक्तम्। तथा चानेनैव वार्तिकेन निर्ग इत्यादीनामपि सिद्धिरिति नवीनानां पन्थाः। पृच्छति—**देश इति किमि**ति, उत्तरयति—**निर्गमनः** इति—अत्राधारेऽनडेव भवति, न तु डः, देशग्रहणाभावेऽत्रापि स्यादित्यर्थः ॥ ५. १. ३३. ॥

## शमो नाम्न्यः । ५. १. १३४. ॥

**त० प्र०—शमो नाम्नः पराद् धातोर्नाम्नि-संज्ञायामः प्रत्ययो भवति। शमित्यव्ययं सुखे वर्तते, तत्र भवति—शंभवोऽर्हन्। शं करोति—शंकरः, शंगरः, शंवरः, शंवदः। स्वः पश्येत्यादिष्वव्ययानां कर्मत्वदर्शनाच्छमि कर्मणि हेत्वादिष्वपि परत्वात् कृगष्टो बाध्यते—शंकरा नाम परिव्राजिका, शंकरा नाम शकुनिका तच्छीला च। नाम्नीति किम्? शंकरी जिनदीक्षा ॥१३४॥**

**श० म० न्यासानुसन्धानम्—शमो०। 'नाम्नि'** इत्यस्यार्थमाह—**संज्ञायामि**ति। 'शम्'धातोः क्विप्प्रत्ययान्तस्य नाम्नो ग्रहणमन्यस्याव्युत्पन्नस्य वेत्याशङ्कायामाह—**शमित्यव्ययं सुखे वर्तते** इति, "शं सुखे" इति कोशः, तथा च तस्यैवेह ग्रहणमिति भावः। आधार इति वर्तते, तस्य च पूर्वत्र प्रत्ययार्थपरत्वेऽपीह शमित्यस्य विशेषणत्वं मत्वाऽऽह—**तत्र भवती**ति—सुख एव तिष्ठति न कदाचिद् दुःखे इति भावः। अनेनाप्रत्यये गुणेऽवादेशे च—**शंभवोऽर्हन्** इति। पूर्वतः कर्मण इत्यस्यानुवृत्तिदर्शनात् शमित्येतत्कर्मणः पराद् धातोरयं प्रत्यय इति मत्वाऽऽह—**शं करोतीति शंकरः** इति। "शॄश् शब्दे" शं गृणातीति—**शंगरः**। शं वृणोतीति—**शंवरः**—अल्पो हरिणः। शं वदतीति—**शंवदः**। नन्वव्ययस्य प्रायोऽधिकरणार्थप्रधानस्यैव दर्शनादिह कर्मत्वं कथमित्याशङ्कामपनुदन्नर्थान्तरमाह—**'स्वः पश्य' इत्यादिष्वव्ययानां कर्मत्वदर्शनात् शमि कर्मणि, हेत्वादिष्वपि परत्वात् कृगष्टो बाध्यते** इति—आदिशब्देन ताच्छील्यादिपरिग्रहः, तथा च शम्युपपदे हेत्वादिविवक्षायामपि "हेतुतच्छीलानुकूले०" [ ५. १. १०३. ] इति विधीयमानः करोतेर्टः स परत्वादनेन बाध्यते, यद्यपि 'ट'प्रत्ययस्य 'अ'प्रत्ययस्य च सरूपत्वेन, शमि उपपदे चास्य विशेषविहितत्वेनापवादत्वमेवेति परत्वाद् बाधकत्वकथनं नावश्यकं तथापि उपपदमूलकं विशेषविहितत्वमस्य, हेत्वाद्यर्थमूलकं विशेषविहितत्वं टप्रत्ययस्येति समानत्वेन नापवादत्वमिति परत्वमूलकमेव बाधकत्वमुचितमिति तदेवोक्तम्। टबाधं दर्शयति—**शंकरा नाम परिव्राजिका, शंकरा नाम शकुनिका, तच्छीला चे**ति—शं करोतीति टं बाधित्वाऽनेन 'अ' प्रत्यये—शंकरा, परिव्राजिकाया एतन्नामेत्याह—नाम परिव्राजिकेति, अत्र शंकरणेऽस्या हेतुत्वमिति टप्राप्तिः, एवं शकुनिकायाः 'शंकरा' इति नामेत्याह—शंकरा नाम शकुनिकेति, अत्र शंकरणशीलत्वमपीति टप्राप्तिरित्याह—तच्छीला चेति। शमि कर्मणि हेत्वादिविवक्षायां टं बाधित्वाऽस्य प्रवृत्तौ यद्यपि पुंसि रूपे विशेषाभावस्तथापि स्त्रियां विशेषोऽस्त्येवेत्याशयेन स्त्री-

लिङ्गमेव प्रयोगमुदाहृतवान्—शंकरा नाम परिव्राजिकेति, टप्रत्यये तु स्त्रियां शंकरीति स्यादिति भावः। पदकृत्यं पृच्छति—**नाम्नीति किमिति**, उत्तरयति—**शंकरी जिनदीक्षेति**, अयमाशयः—नाम्नीति नामपदेन यदर्थे यस्य रूढिः स एवार्थो गृह्यते, शंकरी जिनदीक्षेत्यत्र तु शंकरशब्दो विशेषणत्वेन प्रयुक्त इति नात्र नामत्वं तस्येति टे स्त्रियां ङीर्भवतीति, नामग्रहणाभावेऽत्राप्यप्रत्यये शंकरेति स्यादिति ॥ ५. १. १३४. ॥

## पार्श्वादिभ्यः शीङः । ५. १. १३५. ॥

**त० प्र०—पार्श्वादिभ्यो नामभ्यः परात् शीङः 'अः' प्रत्ययो भवति। पार्श्वाभ्यां शेते - पार्श्वशयः, एवं—पृष्ठशयः, उदरशयः। दिग्धेन सह शेते—दिग्धसहशयः, दिग्धसहात् तृतीयासमासात् शीङोऽकारः, पश्चादुपपदसमासः। बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवति। अनाधारार्थ आरम्भः ॥१३५॥**

**श० म० न्यासानुसन्धानम्—पार्श्वा०।** "शीङ्क् स्वप्ने" पार्श्वाभ्यां शेते इति प्रकृतसूत्रेणाऽप्रत्यये गुणेऽयादेशे ङस्युक्तसमासे—**पार्श्वशयः**। अतिदिशति—**एवमिति**, पृष्ठेन शेते इति—**पृष्ठशयः**, उदरेण शेते इति—**उदरशयः**। **दिग्धेन सह शेते** इति विग्रहः, **दिग्धसहशयः** इति समासः, तत्प्रक्रियामाह—**दिग्धसहात् तृतीयासमासात् शीङोऽकारः, पश्चादुपपदसमासः** इति—पूर्वं दिग्धेनेति तृतीयान्तस्य सहशब्देन सह "तृतीया तत्कृतैः" [ ३. १. ६५. ] इत्यत्र "तृतीया" इति योगविभागात् समासः, दिग्धसहशब्दस्यैव पार्श्वादिषु पठितत्वेन तत्साधनस्यावश्यकत्वात्, एवं दिग्धसहशब्दात् परत्वे शीङोऽकारः, पश्चात् ङस्युक्तसमासः। यदाह काशिकाविवरणपञ्जिकाकारः—'दिग्धेन सह शेत इति "तृतीया" [ २. १. ३०. ] इति योगविभागेन समासो दिग्धस्य सहेन प्राक् प्रत्ययोत्पत्तेः पश्चादुपपदसमासः" इति, भाष्ये च "दिग्धसहपूर्वाच्चेति वक्तव्यम्, दिग्धसहशयः" इत्युक्तम्। तत्रोक्तं कैयटेन—"दिग्धसहशब्दस्य समुदायस्य पूर्वत्वमाश्रीयते, न तु प्रत्येकम्। तत्र दिग्धेन सह शेते इत्यचि कृते मयूरव्यंसकादित्वात् समासः" इति। 'पार्श्वादेः' इत्येकवचनेनापि निर्वाहे बहुवचनस्य वैयर्थ्यमाशङ्क्याह—**बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवतीति**—पार्श्वादिराकृतिगणत्वाभिप्रायेण बहुवचनमिति भावः। **अनाधारार्थ आरम्भः** इति—आधारभिन्नार्थकात् परत्वे प्रत्ययविधानार्थ इति भावः, आधारार्थात् परत्वे च "आधारात्" [ ५. १. १३७. ] इति परसूत्रेण सिद्धिरिति भावः ॥ ५. १. १३५. ॥

## ऊर्ध्वादिभ्यः कर्तुः । ५. १. १३६. ॥

**त० प्र०—ऊर्ध्वादिभ्यो नामभ्यः कर्तृवाचिभ्यः परात् शीङः 'अः' प्रत्ययो भवति। ऊर्ध्वः शेते—ऊर्ध्वशयः, एवम्—उत्तानशयः, अवमूर्धशयः। बहुवचनं प्रयोगानुसरणार्थम् ॥१३६॥**

**श० म० न्यासानुसन्धानम्—ऊर्ध्वा०। ऊर्ध्वादिभ्यो नामभ्यः कर्तृवाचिभ्यः** इति, ननु सूत्रे कर्तुरित्येकवचननिर्देशोऽसङ्गतः 'असति विशेषानुशासने विशेष्यविशेषणवाचकपदयोः समानवचनकत्वम्' इति नियमस्य सर्वैरेवादृतत्वात्, अन्यथा घटा नील इत्यपि प्रयोगः स्यात्। 'शतं ब्राह्मणाः' इत्यादिप्रयोगदर्शनेन तत्रातिप्रसङ्गवारणाय नियमकुक्षौ 'असति विशेषानुशासने' इति प्रवेशितम्, तत्र हि "विंशत्याद्याः सदैकत्वे" इत्यनुशासनस्य सत्त्वेन विशेषणवाचकशतपदोत्तरमेकवचनभिन्नविभक्तेरप्राप्त्या तत्र विशेष्यविशेषणवाचकपदयोरसमानविभक्तिकत्वेऽपि क्षतिविरहात्। इह च कस्यचिद् विशेषानुशासनस्य विरहेण कथं विशेषणवाचककर्तृपदोत्तरं विशेष्यवाचकोर्ध्वादिपदोत्तरबहुवचनविरुद्धमेकवचनं प्रयुक्तमिति चेत्? अत्रोच्यते—यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया विशेषणवाचकपदोत्तरविभक्त्या अविवक्षितत्वं तत्रैव विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमस्यादरात्। अत्र च विशेष्यवाचकोर्ध्वादिपदोत्तरभ्यस्विभक्तितात्पर्यविषयबहुत्वसंख्याविरुद्धैकत्वसंख्याया विशेषणवाचककर्तृपदोत्तरविभक्त्या विवक्षितत्वेन समानवचनकत्वनियमस्याप्रसङ्गात्। यथा हि 'वेदाः प्रमाणम्' इत्यादौ विशेष्यवाचकवेदपदोत्तरजस्विभक्तितात्पर्यविषयबहुत्वसंख्याविरुद्धैकत्वसंख्यायाः प्रमाणपदोत्तरविभक्त्या विवक्षित-

त्वेन विरुद्धवचनकत्वं न दोषाय तथैवात्रापीत्याशयात् । अयमत्र निष्कर्षः—वेदाः प्रमाणमित्यत्र सकलवेदनिष्ठं प्रमितिकरणत्वमेकमित्यर्थविवक्षया विशेषणवाचकप्रमाणपदोत्तरमेकवचनं प्रयुज्यते, तथोर्ध्वादिनिष्ठं कर्तृत्वमेकमित्यर्थविवक्षयाऽत्रैकवचनं प्रयुक्तमिति । अत्र विशेषजिज्ञासुभिर्व्युत्पत्तिवादगूढार्थतत्त्वालोकादाववलोकनीयमिति विरमामः ।

ऊर्ध्वः—स्थितः शेते इति—**ऊर्ध्वंशयः,** निद्रापञ्चकमध्ये प्रचलाभिधनिद्रामनुभवन्, यदुक्तम्—"प्रचला स्थितोपस्थितस्य" इति । अतिदिशति—**एवमिति,** उत्तानः शेते इति—**उत्तानशयः,** यद्यपि गभीरविपर्यये सर्वथा प्रसृततया दृश्यमाने उत्तानशब्दः कोशादिषु पठ्यते, तथापि उत्तानशब्द ऊर्ध्वमुखं विधाय पृष्ठभरेण शयाने जने प्रयुज्यत इति 'उत्तानशये' स एवोत्तानशब्दो ग्राह्यः, उत्तानशयशब्दश्च बाले रूढः "स्यादुत्तानशयो डिम्भः" इति कोशः । अवनतो मूर्धा यस्य सोऽवमूर्धा, अवमूर्धा शेते इति—**अवमूर्धशयः**, अवमूर्धशब्द उत्तानशब्दविपरीतार्थक इति सोऽप्युदाहृत उभयथापि शयनस्य दृष्टत्वात् । "ऊर्ध्वादिः" इति वक्तव्ये बहुवचनं व्यर्थमित्याशङ्कायामाह—**बहुवचनं प्रयोगानुसरणार्थमिति**—गणे पठितेभ्योऽतिरिक्तादपि कर्तृवाचिनः परत्वे सति शिष्टप्रयोगे प्रत्ययो यथा स्यादित्येतदर्थं बहुवचनमित्याशयः ॥ ५. १. १३६. ॥

## आधारात् । ५. १. १३७. ॥

**त० प्र०—आधारवाचिनो नाम्नः परात् शीङः 'अ'प्रत्ययो भवति । खे शेते—खशयः, गर्तशयः, गुहाशयः, हृच्छयः, 'बिलेशयः, मनसिशयः, कुशेशयः' इति सप्तम्या अलुप् । गिरिश इति संज्ञायां लोमादित्वाच्छः, क्रियार्थत्वे तु गिरिशय इति भवितव्यम् ॥१३७॥**

**श० म० न्यासानुसन्धानम्—आधा० ।** खे [ अनावृतप्रदेशे ]. शेते इति—**खेशयः** । गर्ते शेते इति—**गर्तशयः** । गुहायां शेते इति—**गुहाशयः** । हृदि शेते इति—**हृच्छयः** कामः । बिले शेते इति—**बिलेशयः** सर्पः, मनसि शेते इति—**मनसिशयः** कामः, कुशे-जले शेते इति—**कुशेशयः** कश्चित् पुमान्, कमले तु नपुंसकत्वं स्यात् । एषु "शयवासि०" [ ३. २. २५. ] इति सप्तम्या अलुप्, तदाह—**सप्तम्या अलुप्** इति । गिरौ शेते इत्यर्थे 'अ'प्रत्यये गिरिशय इति भवितव्यम्, कथं तर्हि 'गिरिशमुपचचार प्रत्यहं, सा सुकेशी" इति कुमारसम्भवे कालिदासप्रयोगः सङ्गच्छते इत्याशङ्कायामाह—**गिरिश इति संज्ञायां लोमादित्वाच्छः** इति—गिरिरस्यास्तीति विग्रहः । किं तर्हि गिरौ शेते इत्यर्थेऽयं प्रत्ययो भवत्येव नेति चेत् ? अत्राह—**क्रियार्थे तु गिरिशय इति भवितव्यमिति**—क्रियार्थत्वं क्रियाप्रवृत्तिनिमित्तत्वम् । चतुर्धा हि शब्दानां प्रवृत्तिः—जातिमूलिका, गुणमूलिका, क्रियामूलिका, यदृच्छामूलिका चेति । जातिमूलिका गो' इत्यादिशब्दानां गोत्वादिजातिमूलिका, शौक्ल्यादिगुणमूलिका शुक्लादिशब्दानाम्, क्रियामूलिका च पाचकादिशब्दानाम्, यदृच्छामूलिका च डित्थादिशब्दानाम् । तथा च गिरिशब्दे उपपदे गिरौ शेते इत्यर्थे शयनक्रियामूलकत्वं गिरिशयशब्दस्येति भावः । वाक्यपदीये च—

"वैरवासिष्ठगिरिशास्तथैकागारिकादयः ।
कैश्चित् कथञ्चिद् व्याख्याता निमित्तावधिसङ्करैः ॥"

इत्युक्तं हरिणा, यथाकथञ्चिच्छब्दानां व्युत्पत्तिः कर्तव्या, अर्थस्तु लोकप्रसिद्ध एव भविष्यतीति भावः ॥ ५. १. ३७. ॥

## चरेष्टः । ५. १. १३८. ॥

**त० प्र०—आधारवाचिनो नाम्नः पराच्चरेष्टः प्रत्ययो भवति । कुरुषु चरति—कुरुचरः, मद्रचरः, वनेचरः, निशाचरः । टकारो ङ्यर्थः—कुरुचरी, मद्रचरी । आधारादित्येव—कुरूंश्चरति, पञ्चालांश्चरति ॥१३८॥**

**श० म० न्यासानुसन्धानम्—चरे० ।** "चर भक्षणे च" चकाराद् गतौ । कुरुषु—कुरुदेशे चरतीति—**कुरुचरः** । मद्रेषु—मद्रदेशे चरतीति—**मद्रचरः** । वने चरतीति—**वनेचरः**, "तत्पुरुषे कृति" [ ३. २. २०. ] इति सप्तम्या अलुप् । निशायां चरतीति—**निशाचरः** । अकारप्रत्ययस्यानुवृत्तिसत्त्वेन टप्रत्ययेऽपि अकारमात्रस्यावशेषात् टकारस्य वैयर्थ्यमाशङ्क्याह—**टकारो ङ्यर्थः** इति, तथा च पुंसि रूपे विशेषाभावेऽपि स्त्रियां

विशेषार्थं प्रत्ययान्तरपाठ इत्याशयः । अतः स्त्रियामुदाहरति—**कुरुचरी, मद्रचरी**ति - कुरुषु या चरति सा, मद्रेषु या चरति सेति वाक्यम्, अत्र प्रत्ययस्य टित्त्वात् "अणञे०" [ २. ४. २०. ] इति स्त्रियां ङीप्रत्ययः । आधारादित्यस्यानुवृत्तेर्व्यावर्त्यं दर्शयितुमाह—**आधारादित्येव—कुरूंश्चरति, पञ्चालांश्चरती**ति—इह कुरूणां पञ्चालानां च कर्मत्वं विवक्षितं नाधारत्वमिति नास्य प्रवृत्तिः । प्राप्यात् कर्मणः क्वचिद् अण् भवतीति यदि अण् आनीयते तदा समासोऽपि भवति, तथा च कुरुचारः पञ्चालचार इत्यपीति लघुन्यासकारः । ननु कुरुषु चरति कुरूंश्चरतीत्यनयोः कोऽर्थे विशेषो येनैकत्राधारत्वमपरत्र कर्मत्वमिति चेत् ? उच्यते—यः कुरुषु भ्रमति स कुरुषु चरतीत्युच्यते, यस्य च कुरव एव प्राप्याः स कुरूंश्चरतीत्युच्यते, अतोऽनयोः प्रयोगयोरर्थभेदः । पञ्चाला देशविशेषः, देशविशेषवाचित्वाच्च बहुत्वम् ॥ ५. १. १३८. ॥

## भिक्षा-सेना-ऽऽदायात् । ५. १. १३९. ॥

**त० प्र०—अनाधारार्थ आरम्भः । एभ्यः पराच्चरेष्टो भवति । भिक्षां चरति–भिक्षाचरः, भिक्षाचरी । सेनां चरति–परीक्षते–सेनाचरस्तापसव्यञ्जनः, सेनया वा चरति–सेनाचरः । आदाय–गृहीत्वा चरति–आदायचरः, आदानं कृत्वा चरतीत्यर्थः, किमादायेत्यविवक्षैव । एभ्य इति किम् ? कुरूंश्चरति ॥१३९॥**

श० म० न्यासानुसन्धानम्—भिक्षा० । पूर्वेणैव सिद्धेऽस्य सूत्रस्य वैयर्थ्यमाशङ्क्याह—**अनाधारार्थ आरम्भः** इति—पूर्वसूत्रस्याधारोपपदत्व एव प्रवृत्तिः, अस्य चाधारेऽनाधारे चोपपद इति तदर्थमिदं सूत्रमिति भावः । भिक्षां चरतीति–**भिक्षाचरः, भिक्षाचरी**ति—चरतिरिह चरणपूर्वके अर्जने वर्तते प्रसिद्धार्थस्य गमनस्य तत्रानन्वितत्वात्, तथा च भिक्षां चरतीत्यस्य चरणेन भिक्षामर्जयतीत्यर्थः । **सेनां चरति—परीक्षते** इति—**सेनाचरस्तापसव्यञ्जनः** इति—चरतिरिह परीक्षणे वर्तते । सेनां प्रविशतीति तत्त्वबोधिनीकारः, सेनां प्रापयतीति बालमनोरमाकारः, सेनां भ्रमतीति लघुशब्देन्दुशेखरे नागेशः । तापसव्यञ्जन इति कथनेन तस्य परीक्षकत्वं ध्वनितम्, परीक्षको हि केनापि व्याजेन प्रच्छन्नस्तत्र गच्छति । तापसव्यञ्जनशब्दो लघुन्यासकारेणेत्थं व्याख्यातः—"तपोऽस्यास्ति ज्योत्स्नादित्वादण् तापसः, तस्य व्यञ्जनं चिह्नं यस्य, यद्वा तपस इदं तापसं, तद् व्यञ्जनं यस्य, यद्वा तापस इति व्यज्यते प्रकटीक्रियते ज्ञायते तापसव्यञ्जनः, यद्वा तापसे व्यञ्जनं व्याजो यस्येति" । प्रकारान्तरेण व्युत्पत्तिमाह—**सेनया वा चरति—सेनाचरः** इति—साधारणत एव सेनाशब्दपाठेन यथाऽर्थस्य साधुता प्रतीयेत तथा व्युत्पादनीयमिति तृतीयान्तेनापि विग्रहो युज्यत एवेति भावः, तत्र च सहार्थे तृतीयेति बोध्यं सेनया सह चरतीत्यर्थसंगतेः । **आदाय—गृहीत्वा चरति—आदायचरः** इति, आङ्पूर्वस्य दाधातोः क्त्वि यबादेशे च 'आदाय' इति भवति, तदर्थं स्पष्टयति—**आदानं कृत्वेत्यर्थः** इति, आङ्पूर्वो दाधातुर्यद्यपि सकर्मकस्तथापि कर्मणोऽत्राविवक्षितत्वमित्याह—**किमादायेत्यविवक्षैवे**ति—यल्लब्धं तद् गृहीत्वा चरतीत्यर्थस्य तत्र गम्यमानत्वेन न विशेषतः कर्मापेक्षेति तत्त्वम् । अयमाशयः—आदाय चरतीति—आदायचरः, अत्रादातव्यकर्मणोऽविवक्षितत्वात् पूर्वकालमात्रे प्रत्ययः, आदानं कृत्वा चरतीति यावत्, तेन सापेक्षत्वादसामर्थ्ये सति प्रत्ययो न सिध्यतीत्येतदचोद्यम् । अथापि कर्मापेक्षत एवमपि न दोषः, वचनसामर्थ्यादसामर्थ्येऽपि प्रत्ययो भवतीति । स्वोपज्ञपारायणे तु प्रकारान्तरेणापि व्युत्पादितम् । तथाहि—"आदीयत इत्यादायो वागुरा तेन, आदाय वा चरति —आदायचरः" इति । पदकृत्यं पृच्छति—**एभ्य इति किमि**ति—अनेन प्रश्नेन सूत्रस्यैव वैयर्थ्यशङ्काप्रतीतिः पञ्चम्यन्तमात्रस्य सूत्रत्वात्, तथापि "अन्येभ्योऽपि" इत्येव लाघवात् सूत्रयितव्यं, न विशेषतस्तत्तच्छब्दपरिग्रहः कर्तव्य इति प्रश्नाशयः । सामान्यत एव सूत्रे कृते कुरूंश्चरतीत्यादावपि कर्मोपपदत्वे सति प्रत्ययः स्यादित्याशयेन समाधत्ते—**कुरूंश्चरती**ति—अत्रार्थेऽयं प्रत्ययो नेष्ट इति पूर्वसूत्रे प्रतिपादितमित्यनिष्टप्रसङ्ग इति भावः । सहचरीत्यादिप्रयोगस्तु लिहादिषु 'चरट्' इति निपातितेन साधनीयः ॥ ५. १. १३९. ॥

## पुरो-ऽग्रतो-ऽग्रे सर्तेः । ५. १. १४०. ॥

**त० प्र०—एभ्यो नामभ्यः परात् सर्तेष्टो भवति ।**

**पुरः सरति—पुरःसरः, पुरःसरी । अग्रतः सरति—अग्रतःसरः, आद्यादित्वात् तस् । अग्रे सरति—अग्रेसरः, सप्तम्यलुप्, एकारान्तमव्ययं वा; सूत्रनिपातनाद् वैकारः, तत्राग्रं सरति अग्रेण वा सरति-अग्रेसर इत्यपि भवति ॥१४०॥**

**श० म० न्यासानुसन्धानम्—पुरो०** । "सृं गतौ" पुरः सरतीति टे पुंसि—**पुरःसरः**, स्त्रियां टित्वात् ङीप्रत्यये—**पुरःसरी** । अग्रतः सरतीति—**अग्रतःसरः**, 'अग्रतस्' शब्दे "आद्यादिभ्यः" [ ७. २. ८४. ] इति तस् प्रत्ययः, तदाह—**आद्यादित्वात् तस्** इति । अग्रे सरतीति—**अग्रेसरः**, नन्विह "ऐकार्थ्ये" [ ३. २. ८. ] इति स्यादेर्लुपि 'अग्रसरः' इति भवितव्यम्, कथमग्रेसर इति शङ्कायामाह—**सप्तम्यलुबिति**—"तत्पुरुषे कृति" [ ३. ५. २०. ] इति सप्तम्या अलुब् भवतीत्यर्थः । समाधानान्तरमाह—**एकारान्तमव्ययं वेति**—"विभक्तिथमन्ततसाद्याभाः" [ १. १. ३३. ] इति सूत्रेण विभक्त्यन्तप्रतिरूपकस्याव्ययसंज्ञाविधानादव्ययेषु विभक्त्यन्तसदृश एकारान्तः स्वतन्त्रशब्दरूपोऽयमग्रेशब्दो यथा चिरायेति, अतः स्वत एव एकारान्तत्वं न तु विभक्तिकृतमिति भावः । विभक्त्यन्तरेण सहाप्यग्रे विग्रहस्य दर्शयिष्यमाणतया सप्तम्यलुपाऽव्ययत्वस्वीकारेण वा निर्वाहासम्भवेन नायं पक्षः साधीयानिति पक्षान्तरमप्याह—**सूत्रनिपातनाद् वैकारः** इति—सूत्रे एकारान्तस्य 'अग्रे'शब्दस्य कथनमेव निपातनमत एकारान्तत्वमिति भावः । तत्फलमाह—**तत्राग्रं सरति अग्रेण वा सरति—अग्रेसर इत्यपि भवतीति**, अत एवाग्रशब्दस्य सूत्रे न पूर्वनिपातः, अन्यथाऽग्रशब्दस्याल्पस्वरत्वेन तस्यैव पूर्वनिपात उचितः, एदन्तत्वनिपातनार्थमेव तस्य परतः प्रयोगः । नन्वेदन्तत्वनिपातने कृते "यूथं तदग्रसरगर्वितकृष्णसारम्" इति भारविकविप्रयोगः कथं संगच्छत इति चेत् ? अत्रोक्तं दीक्षितेन —"बाहुलकादिति हरदत्तः" इति । अत्र हरदत्त इति कथनेनारुचिर्ध्वनिता, तन्मूलं च नागेशेनोक्तम्—"अत्रारुचिरग्रेसर इत्यस्यालुका [ सप्तम्यलुपा ] साधनीयत्वेनैदन्तत्वनिपातने न मानम् । न च पूर्वनिपाताभाव एव तत्र मानमिति वाच्यम्, तस्य बहुशो व्यभिचारात्" इति । तथा चाग्रं सरतीत्यर्थे विभक्तिलोपेनाग्रसरशब्दस्य सिद्धिरिति । अग्रं सरतीत्यर्थे एतन्मतेनाग्रेसर इति प्रयोगो न भविष्यति, अत्र तृतीयान्तेनापि विग्रहः कृतः, एदन्तत्वनिपातनाभावे तत्राप्यग्रेसरशब्दस्यासिद्धिरेवेत्येदन्तत्वनिपातनमावश्यकमेवेति भारविप्रयोगे बाहुलकमेव शरणमिति ॥ ५. १. १४० ॥

## पूर्वात् कर्तुः । ५. १. १४१. ॥

**त० प्र०—पूर्वशब्दात् कर्तृवाचिनः परात् सरतेष्टो भवति । पूर्वः सरति—पूर्वसरः, पूर्वो भूत्वा सरतीत्यर्थः, कस्मात् पूर्व इति अविवक्षैव; पूर्वसरी । कर्तुरिति किम् ? पूर्वं देशं सरति—पूर्वसारः ॥१४१॥**

**श० म० न्यासानुसन्धानम्—पूर्वात्०** । कर्तृशब्दः कर्तृवाचिनि गौणतया प्रयुक्तः, तदाह—**कर्तृवाचिनः परादिति** । पूर्वः सरतीति—**पूर्वसरः**, एतदर्थमाह—**पूर्वो भूत्वा सरतीत्यर्थः** इति । पूर्वशब्दस्य दिग्वाचितया सावधित्वेनावधिनिर्देशं विना सापेक्षत्वेन सामर्थ्याभावात् प्रत्ययाभाव इत्याशङ्कायामाह—**कस्मात् पूर्व इत्यविवक्षैवेति**—पूर्वत्वेनैव पूर्वो गृह्यते न तु अस्मात् पूर्व इति सावधित्वेन, तत्रावधेरपेक्षायां स्वसहचारिण एव गृह्यन्ते कथनं विनाऽपि, किञ्च पूर्वशब्दः सम्बन्धी शब्दः, तस्य सापेक्षत्वेऽपि वृत्तिर्भवत्येव यथा देवदत्तस्य गुरुकुलमिति । अविवक्षितावधिः कर्तैव ग्रहीष्यत इति कर्तुर्ग्रहणं व्यर्थमित्याशङ्कते—**कर्तुरिति किमिति**, न केवलं चेतनः कर्तैव पूर्वोऽपि तु देशादिरपि, स च कर्मापि भवतीति तत्र मा भूदित्याशयेनोत्तरयति—**पूर्वं देशं सरति—पूर्वसारः** इति—अत्र कर्मणः परत्वादस्याप्रवृत्त्या "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणेव भवतीत्यर्थः ॥ ५. १. १४१. ॥

## स्था-पा-स्ना-त्रः कः । ५. १. १४२. ॥

**त० प्र०—नाम्नः परेभ्य एभ्यः कः प्रत्ययो भवति । समे तिष्ठति—समस्थः, विषमस्थः, कूटस्थः, कपित्थः, दधित्थः, महित्थः, अश्वत्थः, कुलत्थः । द्विपः, पादपः, कच्छपः, अनेकपः, कटाहपः । नदीष्णः । आतपत्रम्, घर्मत्रम् । परत्वादयं "शमो नाम्न्यः"** [ ५. १. १३४. ]

**इत्यप्रत्ययं बाधते–शंस्थो नाम कश्चित् । 'शंस्थाः' इत्यसरूपत्वात् क्विप् ॥१४२॥**

**श० म० न्यासानुसन्धानम्—स्था० ।** "ष्ठां गतिनिवृत्तौ" समे—अविषमे तिष्ठतीति के "इडेत्पुसि चातो लुक्" [ ४. ३. ९४. ] इत्याकारलोपे—**समस्थः** । विषमे तिष्ठतीति—**विषमस्थः** । कूटेन—अचलत्वेन तिष्ठतीति—**कूटस्थः** । कपयोऽस्मिन् तिष्ठन्ति, कपिप्रियत्वात् कपिरिव तिष्ठतीति—**कपित्थो** वृक्षविशेषः, पृषोदरादित्वात् सकारस्य तकारः । दध्नि तिष्ठतीति—**दधित्थः**, सस्य तः । इकारान्तो महिशब्दः, मह्यां तिष्ठतीति—**महित्थः**, सस्य तः । अश्वेषु तिष्ठति—**अश्वत्थो** वृक्षविशेषः, सस्य तः । कुले तिष्ठतीति—**कुलत्थः** कालवृन्तः, सस्य तः । "पां पाने" द्वाभ्यां पिबतीति—**द्विपो** गजः । पादैः—मूलैः पिबतीति—**पादपो** वृक्षः । कच्छः—अनूपप्रायः कूर्मपादो वा, "पांक् रक्षणे" कच्छं पातीति—**कच्छपः** कूर्मः, कच्छेन पिबति वा—**कच्छपः** कूर्मः । न एकेन पिबतीति—**अनेकपो** गजः । कटाहे पिबतीति—**कटाहपः** । "ष्णांक् शौचे" नद्यां स्नातीति—**नदीष्णः**—तरणे कौशलमत्र गम्यते, "नि-नद्याः स्नातेः कौशले" [ २. ३. २०. ] इति सस्य षः । "त्रैङ् पालने" आतपात् त्रायते रक्षतीति—**आतपत्रं** छत्रम् । धर्मान् त्रायते इति—**धर्मत्रम्** । शमः परान् स्थाधातोर्विशेषविहितत्वेन "शमो नाम्न्यः" [ ५. १. १३४. ] इत्ययमेव स्यान्नायमित्याशङ्कायामाह—**परत्वादयं "शमो नाम्न्यः" इत्यप्रत्ययं बाधते** इति, अयमाशयः—अत्रोभयोः प्रत्यययोरुत्सर्गापवादभावो नास्ति, अप्रत्ययो हि धातुमात्रात् शमः परत्वे विहितोऽपि नाम्न्येव [ संज्ञायामेव ] प्रवर्तते इत्यसावपि विशेषविहित एव, अयं च स्थाधातुमुच्चार्य विहितत्वात् प्रतिपदोक्ततया विशेषविहित एवेति सममेवोभयोः स्वस्वविषये प्रतिपदोक्तत्वमित्युत्सर्गापवादभावाभावेन परत्वेनैव बाध्यबाधकभावव्यवस्था समुचितेत्ययमेव परत्वात् शमः परात् स्थाधातोः प्रवर्तत एव । तदेवोदाहरति—**शंस्थो नाम कश्चिदिति**—शं सुखं तत्र तिष्ठतीति विग्रहः, कस्यचित् संज्ञेयम् । क्विप् च सर्वस्माद् धातोर्विधीयत इति तत्रोत्सर्गापवादभावस्य सत्त्वेनायं विशेषविहितत्वात् तस्यापवाद इति प्राप्नोति, तत्रासरूपोऽपवाद उत्सर्गं विकल्पेन बाधत इति नियमेनैव व्यवस्थेति सिद्धान्तमाह—**'शंस्थाः' इत्यसरूपत्वात् क्विबिति** ॥ ५. १. १४२. ॥

## शोकापनुद-तुन्दपरिमृज स्तम्बेरम कर्णेजपं प्रिया ऽलस हस्ति-सूचके । ५. १. १४३. ॥

**त० प्र०—शोकापनुदादयः शब्दा यथासंख्यं प्रियादिष्वर्थेषु कप्रत्ययान्ता निपात्यन्ते । शोकमपनुदति–शोकापनुदः प्रियः, पुत्रादिरानन्दकर एवमुच्यते । तुन्दं परिमार्ष्टि–तुन्दपरिमृजोऽलसः । स्तम्बे रमते–स्तम्बेरमो हस्ती । कर्णे जपति—कर्णेजपः सूचकः । एष्विति किम् ? शोकापनोदो धर्माचार्यः, तुन्दपरिमार्जः आतुरः, स्तम्बे रन्ता पक्षी, कर्णे जपिता मन्त्री ॥१४३॥**

**श० म० न्यासानुसन्धानम्—शोका० । निपात्यन्ते** इति—यद्यपि निपातनमलाक्षणिककार्यलाभार्थमेवाश्रीयते, अत्र च सर्वत्र न किञ्चिदलाक्षणिकं कार्यं प्रार्थनीयम्, तुन्दपरिमृजे वृद्ध्यभावोऽपि पक्षे सिद्ध एव, तथाप्यर्थविशेष एषां प्रयोगनियमार्थमेव निपातनमिति मन्तव्यम् । "णुदंत् प्रेरणे" **शोकमपनुदतीति–शोकापनुदः प्रियः,** सुखस्याहर्ता शोकस्यावकाशमेव न ददाति पुत्रादिप्रिय इति स शोकापनुदः कथ्यते, तदाह—**पुत्रादिरानन्दकर एवमुच्यते** इति । "मृजौक् शुद्धौ" तुन्दम्—उदरं परिमार्ष्टीति—**तुन्दपरिमृजोऽलसः** इति—यः किञ्चित् कार्यमकृत्वा सततमुदरभरणे दत्तचित्तस्तिष्ठति स एवमुच्यते, आलस्ययुक्त इत्यर्थः । "रमि क्रीडायाम्" स्तम्बे रमते इति—**स्तम्बेरमो हस्ती**ति—दर्भादितृणनिचयनिर्मितो हस्तिभक्ष्यः स्तम्बः, तत्र रमते—भक्षयन् आनन्दमनुभवति यः सः । "जप मानसे च" मनोनिर्वर्त्ये वचने, चकाराद् व्यक्ते वचने, कर्णे जपति सूचयतीति—**कर्णेजपः सूचक** इति—मा कश्चिदन्यः शृणोत्विति कर्णे सूचयति यः सः, "सूचण् पैशुन्ये" सूचयतीति सूचकः पिशुनः, उभयत्र "तत्पुरुषे कृति" [ ३. २. २०. ] इति सप्तम्या अलुप् । पदकृत्यं पृच्छति—**एष्विति किमिति,** उक्तादन्यस्मिन्नर्थे मा भूदित्याशयेनोत्तरयति—**शोकापनोदो धर्माचार्य** इति—यः संसार-सांसारिकभोगाद्य-

नित्यत्वादिकं सयुक्तिकमुपदिश्य शोकं नाशयति, न तु सुखमाहरति, स तु शोकापनोद एवेति तत्रायं मा भूदिति। **तुन्दपरिमार्ज आतुरः** इति—आतुरो हि उदरामयेन युक्तस्तदपनयनाय तुन्दं परिमार्ष्टि न त्वालस्येनेति भावः। उभयत्र "कर्मणोऽण्" [५. १. ७२.] इत्यण् प्रत्ययः। **स्तम्बे रन्ता पक्षी**ति—पक्ष्यपि स्तम्बे क्रीडति, **कर्णे जपिता मन्त्री**ति—सचिवोऽपि राज्ञः श्रेयसे कर्णे हितमुपदिशति, न तु परस्माद् भीत इति तत्र नायं प्रत्यय इति, उभयत्र तृच् प्रत्ययः। एवं चार्थविशेषनियमार्थमावश्यकमिति ॥ ५. १. १४३. ॥

## मूलविभुजादयः । ५. १. १४४. ॥

**त० प्र०—मूलविभुजादयः शब्दाः कप्रत्ययान्ता नियतार्थधातूपपदा यथाशिष्टप्रयोगं निपात्यन्ते । मूलानि विभुजति—मूलविभुजो रथः । उर्व्यां रोहति—उर्वीरुहो वृक्षः । कौ मोदते—कुमुदं कैरवम् । महीं धरति—महीध्रः शैलः । उषसि बुध्यते—उषर्बुधोऽग्निः । अपो बिभर्ति—अब्भ्रं मेघः । सरसि रोहति—सरसिरुहं पद्मम् । नखानि मुञ्चन्ति—नखमुचानि धनूंषि । काकेभ्यो गूहनीयाः—काकगुहास्तिलाः । धर्माय प्रददाति—धर्मप्रदः, एवं—कामप्रदः, शब्दप्रदः । शास्त्रेण प्रजानाति—शास्त्रप्रज्ञः, एवम्—आगमप्रज्ञः ॥१४४॥**

**श० म० न्यासानुसन्धानम्—मूल० । नियतार्थधातूपपदाः** इति—नियता अर्थधातूपपदा येषां ते तथा, यस्मिन्नर्थे, यस्माद् धातोः, यस्मिन्नुपपदे सति कप्रत्यय इष्ट इति तत्रैवार्थे प्रयोगार्थं निपातनमिति भावः। एषां निपातनमिति कथं ज्ञायत इत्याशङ्कायामाह—**यथाशिष्टप्रयोगमि**ति—शिष्टैर्हि तथाप्रयोगस्तेष्वर्थेष्वेव कृत इति तत्रैव निपातनं युक्तमिति भावः। व्याकरणस्य हि लक्ष्यानुसारित्वम्, लक्ष्याणि च शिष्टप्रयोगा एवेति तदनुरोध आवश्यक एवेति भावः। ते चार्थधातूपपदा उदाहरणेषु व्यक्तीभविष्यन्ति। "भुजोंत् कौटिल्ये" मूलानि विभुजतीति—**मूलविभुजो रथ** इति—धातोरुपसर्गबलान्मर्दने वृत्तिः, तथा च विभुजतीत्यस्य विमर्दयतीत्यर्थः। उर्वी पृथिवी, तत्र रोहतीति—**उर्वीरुहो वृक्षः,** अत्र "रुहं जन्मनि" इति 'रुह्' धातुः। "मुदि हर्षे" कुः पृथिवी, तत्र मोदते इति—**कुमुदं कैरवम्।** उषः प्रभातं, तत्र बुध्यते इति—**उषर्बुधोऽग्निः।** "डुभृंग्क् पोषणे च" चकाराद् धारणे, आपो जलानि, ता बिभर्तीति—**अब्भ्रं मेघः** इति—"घुटस्तृतीयः" [२. १. ७६.] इति पकारस्य बः, 'इवर्णादे०' [१. २. २१.] इति ऋकारस्य रः। सरः—तडागः, तत्र रोहतीति—**सरसिरुहं पद्ममि**ति—"तत्पुरुषे कृति" [३. २. २०.] इति सप्तम्या अलुप्। "मुच्लृंती मोक्षणे" नखानि मुञ्चन्तीति—**नखमुचानि धनूंषि।** "गुहौग् संवरणे" काकेभ्यो गूहनीया इति—**काकगुहास्तिलाः,** अत्र तव्याद्यपवादः कर्मणि कः। "डुदांग्क् दाने" धर्माय प्रददातीति—**धर्मप्रदः** इति, अत्र "इडेत्पुसि चातो लुक्" इत्याकारलोपः। अतिदिशति—**एवमि**ति, कामाय शब्दाय च प्र दातीति—**कामप्रदः, शब्दप्रदः।** "ज्ञांश् अवबोधने" शास्त्रेण प्रजानातीति—**शास्त्रप्रज्ञः,** अतिदिशति—**एवमि**ति, आगमेन प्रजानातीति—**आगमप्रज्ञः।** "मूलविभुजादिः" इत्येकवचनेनैव निर्देशे कर्तव्ये बहुवचनेन निर्देश आकृतिगणत्वप्रतिपत्त्यर्थः। अत्रेत्थं लघुन्यासे—"**उर्वीरुह** इति—"ङस्युक्तं०" इति समासार्थमत्र पाठः, अन्यथा "नाम्युपान्त्य०" इति सिध्यति, एवं **धर्मप्रद** इत्यत्रापि, अत्र हि "उपसर्गादातोडोऽश्यः" इति डे समासो न स्यात्" इति ॥ ५. १. ४४. ॥

## दुहेर्डुघः । ५. १. १४५. ॥

**त० प्र०—नाम्नः परात् दुहेर्डुघः प्रत्ययो भवति । कामान् दुग्धे—पूरयति—कामदुघा, धर्माय दुग्धे—धर्मदुघा । असरूपत्वात् क्विप्—कामधुक् । डकारोऽन्त्यस्वरादिलोपार्थः ॥ १४५ ॥**

**श० म० न्यासानुसन्धानम्—दुहे० ।** "दुहींक् क्षरणे" कामान्—अभिलाषान्, दुग्धे—पूरयतीति—**कामदुघा,** कामक्षरणमिह कामपूरणार्थे पर्यवसितमिति धातूनामनेकार्थत्वमिति वेति पूरयतीत्युक्तम्, डुघे डकारस्येत्वात् "डित्यन्त्यस्वरादेः" [२. १. ११४.] इत्यन्त्यस्वरादिलोपः। धर्माय दुग्धे इति—**धर्मदुघा।** अस्य विशेषविहितत्वेनापवादत्वमाशङ्क्याह — **असरूपत्वात्**

**क्विप्** इति—सरूपेष्वत्र प्रकरणे नित्यबाध्यबाधकभावः, असरूपे तु वैकल्पिक इति क्विप् स्यादेवेत्यर्थः, कामान् दोग्धीति क्विपि "भ्वादेर्दादिर्घः" [ २. १. ८३. ] इति हस्य घत्वे "गडदबादे०" [ २. १. ७७. ] इति दस्य धत्वे "धुटस्तृतीयः" [ २. १. ७६. ] इति घस्य गत्वे "विरामे वा" [ १. ३. ५१. ] इति गस्य वा कत्वे क्विपः सर्वापहारे च—**कामधुक्** इति । डित्वफलं स्वयमाह—**डकारोऽन्त्यस्वरादिलोपार्थः** इति—तथा-चोक्तरूपसिद्धिरिति ॥ ५. १. १४५. ॥

### भजो विण् । ५. १. १४६. ॥

**त० प्र०—नाम्नः पराद् भजेर्विण् प्रत्ययो भवति । अर्धं भजते—अर्धभाक्, पादभाक्, दूरभाक्, प्रभाक्, विभाक् । णकारो वृद्ध्यर्थः । इकार उच्चारणार्थः । वकारो विण्-क्विपोः सारूप्यार्थस्तेनात्र विषये क्विप् न भवति ॥१४६॥**

**श० म० न्यासानुसन्धानम्—भजो० ।** "भजी सेवायाम्" अर्धं भजते इति विणि तस्य सर्वापहारे—"अप्रयोगीत्" [ १. १. ३७. ] इति लोपे प्रत्ययलक्षणन्यायेनोपान्त्यवृद्धौ ङस्युक्तसमासे "चजः कगम्" [ २. १. ८६. ] इति जस्य गत्वे "विरामे वा" [ १. ३. ५१. ] इति वा कत्वे—**अर्धभाक्** । एवं—दूरं भजतीति—**दूरभाक्** । प्रकर्षेण भजतीति—**प्रभाक्** । विशेषेण भजतीति—**विभाक्** । विणि वर्णत्रयम्, तस्य प्रयोगेऽदृश्यमानतया "अप्रयोगीत्" [ १. ३. ३७. ] इति इत्संज्ञा लोपश्चेति विण्प्रत्ययस्यांशेनापि प्रयोगेऽदर्शनात् तस्य प्रत्ययत्वेन विधानमपार्थकमित्याशङ्कायामाह—**णकारो वृद्ध्यर्थः** इति—प्रकृते "ञ्णिति" [ ४. ३. ५०. ] इत्यनेन वृद्धिविधानार्थः । **इकार उच्चारणार्थः** इति—"नटभार्यावद् व्यञ्जनानि भवन्ति" इति न्यायेन, "निराश्रया न तिष्ठन्ति पण्डिता वनिता लताः" इत्युक्ततया च, "नाचं विना व्यञ्जनस्योच्चारणमपि भवति" इति भाष्योक्त्या च व्यञ्जनस्य स्वोच्चारणार्थं स्वरस्यावश्यकत्वादिति भावः । उभयोः सार्थकत्वेऽपि वकारस्य निरर्थकत्वमिति चेत् ? अत्राह-**वकारो विण्-क्विपोः सारूप्यार्थः** इति—अनुबन्धनिर्मुक्तो हि प्रत्ययो वकाररूपो विण्-क्विपोः समान एवेति सारूप्यमुभयोरस्त्येव, तत्फलमाह—**तेनात्र विषये क्विप् न भवती**ति—सरूपत्वेन बाध्यबाधकभावस्य नित्यत्वाद् विशेषविहितेन विणा क्विप् बाध्यत इति भावः ॥ ५. १. १४६. ॥

### मन् वन् क्वनिप् विच् क्वचित् । ५. १. १४७. ॥

**त० प्र०—नाम्नः पराद् धातोरेते प्रत्ययाः क्वचित्-लक्ष्यानुसारेण भवन्ति । मन्-इन्द्रं शृणाति-इन्द्रशर्मा, सुशर्मा, सुवर्मा, सुदामा, अश्वत्थामा । क्वचिद्ग्रहणात् केवलादपि—शर्म, वर्म, हेम, दामा, पामा । वन्-भूरिदावा, घृतपावा, अग्रेगावा, विजावा- "वन्याङ् पञ्चमस्य" [ ४. २. ६५. ] इत्यात्वम् । क्वनिप्-प्रातरित्वा, प्रातरित्वानौ; सुधीवा, सुपीवा । केवलादपि-कृत्वा, कृत्वानौ; धीवा, पीवा । विच्-कीलालपाः, शुभंयाः, पाप्मरेट् । केवलादपि-रेट्, रोट्, वेट्, जागः । ककार-पकारौ कित्-पित्कार्यार्थौ ॥१४७॥**

**श० म० न्यासानुसन्धानम्—मन्० । 'क्वचिद्'** इत्यस्यार्थमाह—**लक्ष्यानुसारेणे**ति—यथालक्ष्यं कस्माचिद् धातोः सर्वे प्रत्ययाः पर्यायेण भवन्ति, कस्माच्चिदेक एव द्वौ वा त्रयो वेत्यर्थः । "शृश् हिंसायाम्" देवं शृणातीति मनि गुणे ङस्युक्तसमासे—**देवशर्मा**, एवं—सुष्ठु शृणातीति—**सुशर्मा** "वृग्ट् वरणे" सुष्ठु वृणोतीति—**सुवर्मा** । "देंङ् पालने" सुष्ठु दयते रक्षतीति—**सुदामा** । अथवा "डुदांग्क् दाने" शोभनं ददातीति—**सुदामा** । "ष्ठां गतिनिवृत्तौ" अश्व इव तिष्ठतीति—**अश्वत्थामा**, पृषोदरादित्वात् सकारस्य तः । नन्वसरूपत्वेन लक्ष्यानुसारिणी व्यवस्था भविष्यत्येवेति क्वचिद्ग्रहणस्य वैयर्थ्यमिति चेत् ? अत्राह—**क्वचिद्ग्रहणात् केवलादपी**ति—नाम्नः परत्वाभावेऽपि लक्ष्यानुसारमेते प्रत्यया भविष्यन्तीति भावः । शृणोति दुःखमिति—**शर्म** सुखम् । अङ्गं वृणोतीति—**वर्म** कवचम् । "हिंट् गति-वृद्ध्योः" हिनोति स्वगुणैरुपादेयतां यातीति—**हेम** स्वर्णम् । दयत इति—**दाम** पशुरज्जुः । "पां पाने" पिबत्यङ्गमिति—**पामा** खसः । वन्युदाहर्तुमवतारयति—**वन्** इति । भूरि ददातीति—**भूरिदावा** । घृतं पिबतीति—**घृतपावा** । "गम्लृं गतौ" अग्रे गच्छतीति—**अग्रेगावा**, "जनैंचि प्रादुर्भावे" विजायते

इति—**विजावा,** उभयत्रान्तस्य केनात्वमित्याह—**"वन्याङ् पञ्चमस्य"** [ ४. २. ६६. ] इत्यात्वमिति । क्वनिप्युदाहर्तुमवतारयति—**क्वनिप्** इति । "इंणूक् गतौ" प्रातरेतीति क्वनिपि "ह्रस्वस्य तः पित्कृति" [ ४. ४. ११३. ] इति तागमे कित्वाच्च गुणाभावे-**प्रातरित्वा,** द्विवचने च—**प्रातरित्वानौ** । शोभनं दधातीति—**सुधीवा,** शोभनं पिबतीति—**सुपीवा,** उभयत्र "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इतीत्वं विज्ञेयम् । केवलादपि क्वनिप् भवतीत्याह—**केवलादपीति** । करोतीति क्वनिपि कित्वाद् गुणाभावे पित्वात् तागमे च—**कृत्वा,** द्विवचने च—**कृत्वानौ** । दधातीति—**धीवा,** पिबतीति—**पीवा** । विच्युदाहर्तुमाह—**विच्** इति । कीलालं जलं पिबतीति विचि तत्र सर्ववर्णानामित्त्वेन सर्वापहारे [ लोपे ] **कीलालपाः,** शुभमिति विभक्त्यन्तप्रतिरूपकमव्ययम्, "यांक् प्रापणे" शुभं यातीति—**शुभंयाः** । "रुष रिष हिंसायाम्" पाप्मानं रेषति रोषति वेति विचि षस्य डत्वे टत्वे च—**पाप्मरोट्, पाप्मरेट्** । केवलादपि विच भवतीत्याह—**केवलादपीति** । रेषतीति—**रेट्,** रोषतीति—**रोट्** । "विषू सेचने" वेषतीति—**वेट्** । "जागृक् निद्राक्षये" जागर्तीति—**जागः** । अनुबन्धयोः फलमाह—**ककार-पकारौ कित्-पित्कार्यार्थौ** इति—कित्कार्यं कृत्वेत्यादौ गुणाभावः, पित्कार्यं च तत्रैव तागमः । धीवा पीवेत्यादावीत्वमपि कित्कार्यमेव, तथा च सार्थकत्वं तयोः स्पष्टमिति भावः ॥ ५. १. १४७. ॥

क्विप् । ५. १. १४८. ॥

**त० प्र०—नाम्नः परात् धातोः क्विप् प्रत्ययो भवति क्वचित् । उखेन उखया वा स्रंसते–उखास्रत्, वहात् भ्रश्यति–वहाभ्रट्, "घञ्युपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति बहुलग्रहणादुख-वहयोर्दीर्घः । पर्णानि ध्वंसते–पर्णध्वत् । शकान्–ह्वयति–शकहूः । परिव्ययति–परिवीः । यवलूः, खलपूः, अक्षद्यूः, मित्रभूः, प्रतिसूः, कटचिकीः । केवलादपि–पाः, वाः, कीः, गीः ऊः, लूः, क्रुङ्, पक् । सदि-सू-द्विष-द्रुह-दुह-युज-विद-भिद-च्छिद-जि-नी-राजिभ्यश्च । दिवि सीदति–दिविषत्, सप्तम्या अलुप्, भीरुष्ठानादित्वात् षत्वं च । द्युसत्, अन्तरिक्षसत्, सभासत्, प्रसीदति–प्रसत्, उपसत् । अण्डं सूते–अण्डसूः, शतसूः, प्रसूः । मित्रं द्वेष्टि–मित्रद्विट्, 'प्रद्विट् द्विषो जेष्नोयिषीष्ट वः' । मित्राय द्रुह्यति–मित्रध्रुक्, प्रध्रुक् विध्रुक् । गां दोग्धि–गोधुक्, कामधुक् प्रधुक् । अश्वं युनक्ति युज्यते वा–अश्वयुक्, प्रयुक्; युङ्, युञ्जौ, युञ्जः । तत्त्ववित्, वेदवित्, प्रवित्, 'निर्विविदे विदां वरः', विदेरविशेषेण ग्रहणम्, लाभार्थस्येच्छन्त्येके । काष्ठं भिनत्ति–काष्ठभित्, बलभित्, गोत्रभित्, भित् । रज्जुं छिनत्ति–रज्जुच्छित्, तमश्छित्, भवच्छित्, प्रच्छित्, छित् । शत्रुं जयति–शत्रुजित्, प्रसेनजित्, कर्मजित्, प्रजित्, अभिजित् । सेनां नयति—सेनानीः, अग्रणीः, ग्रामणीः, प्रणीः; नीः, नियौ, नियः । विश्वस्मिन् राजते–विश्वाराट्, विश्वस्य "वसु-राटोः" [ ३. २. ८१. ] इति दीर्घः, राजराट्, सम्राट्, विराट्, राट् । अञ्चेः—दध्यञ्चति–दध्यङ्, देवमञ्चति—देवद्र्यङ्, विश्वद्र्यङ्, तिर्यङ्, सध्र्यङ्, सम्यङ्, प्राङ्, प्रत्यङ्; केवलान्न भवति । तथा ऋतौ ऋतुम् ऋतवे ऋतुप्रयोजनो वा यजते–ऋत्विग् याजकः, "ऋत्विज्०" [ २. १. ६९. ] इत्यादिसूत्रेण गत्वम् । धृष्णोति–दधृक् प्रगल्भः, दधृगि[ति] निर्देशात् द्वित्वम् । उत्स्निह्यति उष्णिह्यति वा–उष्णिक् छन्दः, उष्णिगि[हि]ति निर्देशात् दलोप-षत्वादि । कथं 'दिश्यते–दिक्, सृज्यते–स्रक्' ? कृत्संपदादित्वात् क्विप् । ककारः कित्कार्यार्थः । पकारः पित्कार्यार्थः । इकार उच्चारणार्थः ॥१४८॥**

**श० म० न्यासानुसन्धानम्—क्विप्** । पूते वर्तमान उखशब्दः पुंस्त्री, स्थाल्यां नित्यस्त्रीति वैयाकरणा मन्यन्ते, "स्रंसुङ् प्रमादे" प्रमादोऽवलेपः, "स्रंसूङ् अवस्रंसने" उखेन उखया वा स्रंसते इति क्विपि "नो व्यञ्जनस्यानुदितः" [ ४. २. ४५. ] इति नकारस्यानुस्वारस्थानिनो लोपे "स्रस्-ध्वंस्०" [ २. १. ६८. ] इत्यत्र साहचर्यानाश्रयणाद् द्युतादेस्तदन्यस्य च स्रस्धातोः सकारस्य दत्वे तत्वे—**उखास्रत्** । "भ्रंशूच् अधःपतने" वहतीति वहोऽश्वः, वहः स्कन्ध इति केचित्, वहाद् भ्रश्यतीति क्विपि नलोपे "यज-सृज०" [ २. १. ८७. ] इति शस्य षत्वे "धुटस्तृतीयः" [ २. १. ७६. ] इति षस्य डत्वे टत्वे च—**वहाभ्रट्** इति, उखस्य

पुंस्त्वेऽदन्तस्य वहस्य चोभयोरदन्तत्वे दीर्घः कथमित्याह—**"घञुपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति बहुलग्रहणाद् उक्थ-वहयोर्दीर्घः** इति । "ध्वंसूङ् गतौ च" चकारादवस्रंसने, पर्णानि ध्वंसते इति—**पर्णध्वत्** इति—प्राग्वन्नकारलोपदकारादि, अन्तर्भावितण्यर्थतया सकर्मकत्वमत्र । "ह्वेंग् स्पर्धा-शब्दयोः" शकान् ह्वयतीति क्विपि "यजादिवशवचेः किति" [ ४. १. ७९. ] इति य्वृति "दीर्घमवोऽन्त्यम्" [ ४. १. १०३. ] इति दीर्घे च—**शकहूः** । "व्येंग् संवरणे" परिव्ययतीति क्विपि य्वृति दीर्घे च—**परिवीः** । "लूग्श् छेदने" यवान् लुनातीति—**यवलूः** । "पूग्श् पवने" खलं पुनातीति—**खलपूः** । "दिवूच् क्रीडादौ" अक्षैर्दीव्यतीति क्विपि "अनुनासिके च०" [ ४. १. १०८. ] इति वस्योटि इकारस्य यत्वे च—**अक्षद्यूः** । "भू सत्तायाम्" मित्रं भवतीति—**मित्रभूः**, धनिकधारकयोरन्तरे प्रतिभवतीति—**प्रतिभूः**, "डुकृंग् करणे" कर्तुमिच्छति चिकीर्षति, कटं चिकीर्षतीति क्विपि "अतः" [ ४. ३. ८२. ] इति 'चिकीर्ष' इत्यस्याकारलोपे षस्यासत्त्वेन सत्वे तस्य रुत्वे विसर्गे च—**कटचिकीः**, द्विवचने तु—कटचिकीर्षौ । पूर्वं नाम्नोऽभावेऽपि भवतीत्याह—**केवलादपीति**—क्वचिदित्यस्य पूर्वसूत्रादनुवृत्तेरिदमपि सूत्रं केवलाद् धातोरपि प्रत्ययं विधत्त इत्यर्थः । पिबतीति—**पाः**, "ईर्व्यञ्जनेऽयपि" [ ४. ३. ९७. ] इत्यत्र साक्षाद् व्यञ्जनग्रहणात् क्विपो लोपे ईत्वं न भवति । "वांक् गतिगन्धनयोः" वातीति—**वाः** । "कृत् विक्षेपे" किरतीति—**कीः**, "गृत् निगरणे" निगरणं भोजनम्, गिरतीति—**गीः**, उभयत्र "ऋतां०" [ ४. ४. ११६. ] इति इरादेशः, सौ "पदान्ते" [ २. १. ६४. ] इति दीर्घः, द्विवचने तु—किरौ, गिरौ इति । "अव रक्षणादौ" अवतीति—**ऊः**, अत्र क्विपि "मव्यवि०" [ ४. १. १०९. ] इत्यूट् । लुनातीति—**लूः** । "क्रुञ्च गतौ कौटिल्याल्पीभावयोश्च" क्रुञ्चतीति—**क्रुङ्**, अत्र "युजञ्चक्रुञ्चो नो ङः" [ २. १. ७१. ] इति नस्य ङविधानान्नलोपाभावः । पचतीति—**पक्**, "चजः कगम्" [ २. १. ८६. ] इति चकारस्य ककारः । व्याकरणान्तरे क्विब्विधायकं पृथक् सूत्रमेतेनैव सूत्रेण संगृह्णन्नुतस्यान्तर्भावं सूचयति—**सदि-सू-द्विषेत्यादि**, अत्र पाणिनीयसूत्रमिदम्— " सत्-सू-द्विष्-द्रुह-दुह-युज-विद-भिद-च्छिद-जि-नी-राजामुपसर्गेऽपि क्विप्" [ ३. २. ६१. ] इति, एतच्च सूत्रं "क्विप् च" [ ३. २. ७६. ] इत्यस्यैव प्रपञ्च इति दीक्षितेनोक्तम् । "षद्लृं विशरण-गत्यवसादनेषु" विशरणं शटनम्, अवसादोऽनुत्साहः, दिवि सीदतीति—**दिविषत्**, कथमत्र सप्तमीश्रवणमित्याह—**सप्तम्या अलुप्** इति—"तत्पुरुषे कृति" [ ३. २. २०. ] इत्यनेनेति शेषः, एकपदत्वाभावात् कथमत्र षत्वमिति चेत् ? अत्राह —**भीरुष्ठानादित्वात् षत्वं चेति** । दिवि सीदतीति—**द्युसत्**, अत्र सप्तम्या लुप्, "उः पदान्तेऽनूत्" [ २. १. ११८. ] इति वस्योकार इकारस्य च यकारः, 'दिविषत्' इत्यत्र सप्तमीलुषभावः, सस्य च षत्वम्, 'द्युसत्' इत्यत्र तु न, तत्रायमाशयः—"तत्पुरुषे कृति" इत्यत्र बहुलाधिकारात् प्रकृते विकल्पेन सप्तमीलोपात् 'दिविषत्, द्युसत्' इति द्वयं भवति, उभयत्रापि "नाम्य०" [ २. ३. १५. ] इत्यनेन षत्वं न सस्य पदमध्यवर्तित्वाभावात्, आद्ये भीरुष्ठानादिगणयाठात् षत्वं भवति, द्वितीये तु पाठाभावान्न षत्वमिति । अन्तरिक्षे सीदतीति—**अन्तरिक्षसत्**, सभायां सीदतीति—**सभासत्**, उपसीदतीति—**उपसत्** । "षूङौक् प्राणिगर्भविमोचने" अण्डं सूते इति—**अण्डसूः**, शतं सूते इति—**शतसूः**, प्रसूते इति—**प्रसूः** । "द्विषींक् अप्रीतौ" मित्रं द्वेष्टीति—**मित्रद्विट्**, प्रकर्षेण द्वेष्टीति—**प्रद्विट्**, एतत् कविप्रयोगेण प्रमाणयति—**प्रद्विट् द्विषो जेष्मीयिषीष्ट वः'** इति । "द्रुहौच् जिघांसायाम्" मित्राय द्रुह्यतीति—**मित्रध्रुक्** इति—अत्र "भ्वादेर्दादेर्घः" [ २. १. ८३. ] इति हस्य घः, "गडदबादेः०" [ २. १. ७७. ] इति दस्य धः, "धुटस्तृतीयः" [ २. १. ७६. ] इति घस्य गः "विरामे वा" [ १. ३. ५१. ] इति गस्य कः, प्रद्रुह्यतीति—**प्रध्रुक्**, विद्रुह्यतीति—**विध्रुक्** । "दुहींक् क्षरणे" गां दोग्धीति—**गोधुक्**, कामान् दोग्धीति—**कामधुक्** । प्रकर्षेण दोग्धीति—**प्रधुक्** । "युजूंपी योगे" "युजिंच् समाधौ" अश्वेन युनक्ति युज्यते वेति—**अश्वयुक्**, प्रकर्षेण युनक्ति युज्यते वेति—**प्रयुक्**, युनक्तीति—**युङ्, युञ्जौ, युञ्जः** इति—"युजोऽसमासे" [ ४. १. ७१. ] इति नोऽन्तः, सौ तस्य पदान्ते "युजञ्चक्रुञ्चो नो ङः" [ २. १. ७१. ]

इति ङः, जस्य संयोगान्तलोपे—युङ् , औ–जशोः "म्नां०" [ १. ३. ३९. ] इति नस्य ञकारे—युञ्जौ, युञ्जः । "विदक् ज्ञाने" "विदिच् सत्तायाम्" "विद्लृंती लाभे" "विदिप् विचारणे" "विदिण् चेतनाख्याननिवासेषु" इति पञ्चधा विद्, तत्त्वं वेत्ति विन्ते वा—**तत्त्ववित्** । वेदं वेत्तीति—**वेदवित्**, प्रकर्षेण वेत्तीति—**प्रवित्** । इदं सूत्रं केवलाद् धातोरपि प्रत्ययं विधत्ते, तथा च वेत्तीति–विदिति प्रयोगोऽपि भवति, एतत्प्रयोगे कविसम्प्रदायं प्रमाणयति—**"निर्विविदे विदां वरः"** इति । 'विद्' धातुरनेकार्थोऽनेकगणपठितश्च, तत्र कस्येह ग्रहणमिति जिज्ञासायामाह—**विदेरविशेषेण ग्रहणमिति**—विशेषग्रहणे विनिगमकाभावात् सर्वेषां ग्रहणमिति भावः । मतान्तरमाह—**लाभार्थां नेच्छन्त्येके** इति । "भिदृंपी विदारणे" काष्ठं भिनत्तीति—**काष्ठभित्**, बलं भिनत्तीति—**बलभित्**, गोत्रं भिनत्तीति—**गोत्रभित्**, भिनत्तीति—**भित्** । "छिदृंपी द्वैधीकरणे" अद्वैधस्य पृथक्त्वे, रज्जुं छिनत्तीति—**रज्जुच्छित्**, तमश्छिनत्तीति–**तमश्छित्**, भवं छिनत्तीति—**भवच्छित्**, प्रकर्षेण च्छिनत्तीति—**प्रच्छित्**, छिनत्तीति—**छित्** । "जि जये" शत्रुं जयतीति—**शत्रुजित्**, "ह्रस्वस्य०" [ ४. ४. ११३. ] इति तागमः, प्रकृष्टा सेना यस्य स प्रसेनः, प्रसेनं जयतीति–**प्रसेनजित्**, कर्माणि जयतीति–**कर्मजित्**, प्रकर्षेण जयतीति–**प्रजित्**, अभिजयतीति–**अभिजित्** । "णींग् प्रापणे" सेनां नयतीति—**सेनानीः**, अग्रं नयतीति—**अग्रणीः**, ग्रामं नयति अधीष्टे इति—**ग्रामणीः** "ग्रामाग्रान्नियः" [ २. ३. ७१. ] इति नस्य णत्वम्, प्रणयतीति—**प्रणीः** "अदुरुपसर्गा०" [ २. ३. ७७. ] इति नस्य णः, नयतीति–**नीः**, "धातोरिवर्णो०" [ २. १. ५०. ] इतीयादेशे—**नियौ, नियः** । "राजृग् दीप्तौ" विश्वस्मिन् राजते इति—**विश्वाराट्**, कथमिह दीर्घत्वमित्याह–**"विश्वस्य वसुराटोः"** [३. २. ८१.] **इति दीर्घः**, "यज-सृज-मृज-राज०" [ २. १. ८७. ] इति जस्य षत्वे तस्य डत्वे टकारो ज्ञेयः, सम्यग् राजते इति—**सम्राट्**, "सम्राट्" [ १. ३. १६. ] इति निपातनात् मस्यानुस्वाराभावः, विराजते इति—**विराट्**, राजते इति—**राट्** । "अञ्चू गतौ च" चकारात् पूजायाम्, इत्यस्मादुदाहर्तुमवतारयति—**अञ्चेरिति**, दधि अञ्चतीति—**दध्यङ्** इति, देवमञ्चतीति—**देवद्र्यङ्**, विश्वक् अञ्चतीति—**विश्वद्र्यङ्** "सर्वादि-विश्वग्-देवाड्डद्रिः" [ ३. २. ११२. ] इति डद्रिरन्तागमः "डित्यन्त्यस्वरादेः" [ २. १. ११४. ] इत्यन्त्यस्वरादिलोपश्च, तिरोऽञ्चतीति "तिरसस्तिर्यति" [ ३. २. ११४. ] इति 'तिरि' इत्यादेशे—**तिर्यङ्**, सहाञ्चतीति—**सध्र्यङ्**, समञ्चतीति—**सम्यङ्**, "सह-समः सध्रि-समी" [ ३. २. १२३. ] इति सहस्य 'सध्रि' समश्च 'समि' इत्यादेशः, प्राञ्चतीति क्वावर्चायाम् "अञ्चोऽनर्चायाम्" [ ४. २. ४६. ] इति नलोपाभावे, अनर्चायां नलुक्यपि "अचः" [ १. ४. ६९. ] इति धुटि नागमे "युजञ्च०" [ २. १. ७१. ] इति सौ नस्य ङत्वे—**प्राङ्**, औ-जसोर्नस्य "म्नां०" [ १. ३. ३९. ] इति ञे—**प्राञ्चौ, प्राञ्चः**, शसादौ गत्यर्थे प्राचः, प्राचेत्यादि, पूजने तु नलोपाभावे "अच्च् प्राग्०" [ २. १. १०४. ] इति चाभावे प्राञ्चः, प्राञ्चेत्यादि । प्रत्यञ्चतीति—**प्रत्यङ्** । यथा पूर्वं केवलादपि प्रत्यय उदाहृतस्तथाऽत्र नेत्याह—**केवलान्न भवतीति** । "यजीं देवपूजादौ" ऋतौ ऋतुम् ऋतवे ऋतुप्रयोजनो वा यजतीति क्विपि य्वृति "ऋत्विज्-दिश्०" [ २. १. ६९. ] इति षापवादे गे तस्य वा के—**ऋत्विक् ऋत्विग्**. तदाह– **ऋत्विग् याजकः** । "ञिधृषाट् प्रागल्भ्ये" धृष्णोतीति—**दधृक्** इति —"ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः" [ २. १. ६९. ] इति षस्य गकारस्तस्य कश्च । ननु भवतु नामैवं कत्वमपि तु द्वित्वं कथमिति चेत् ? अत्राह—**दधृषिति निर्देशाद् द्वित्वमिति**—गविधायकसूत्रे 'दधृष्' इति कृतद्वित्वनिर्देशबलाद् द्वित्वमिति भावः । "ष्णिहौच् प्रीतौ" "णहींच् बन्धने" उत्स्निह्यति उन्नह्यति वेति—**उष्णिक्** इति—"ऋत्विज्०" [ २. १. ६९, ] इति हस्य गत्वे कत्वम्, नन्वत्र दलोपादि कथमिति चेत् ? अत्राह–**'उष्णिह्' इति निर्देशाद् दलोप-षत्वादीति** गविधायकसूत्रे 'उष्णिह्' इति निर्देशबलादेवोदो दलोपः सस्य षः प्रथमविग्रहे, द्वितीयविग्रहे तु दस्य षोऽकारस्य चेकारः, एतद् 'दलोपषत्वादि' इत्यादिपदेन ग्राह्यम् । **छन्दः** इति–सप्ताक्षरस्य च्छन्दविशेषस्योष्णिगिति नामेत्यर्थः । नन्वनेन कर्तरि क्विप् विधीयते, दृश्यते च कर्मण्यपि तत्

कथमिति शङ्कते—**कथं "दिश्यते–दिक्, सृज्यते–स्रक्** इति—"दिशींत् अतिसर्जने" अतिसर्जनं त्यागः, दिश्यते इति कर्मणि क्विपि शस्य "ऋत्विज्०" [ २. १. ६९. ] इति षापवादे गत्वे तस्य कत्वे–'दिक्' इति, "सृजिच् विसर्गे" "सृजंत् विसर्गे" सृज्यते इति कर्मणि क्विपि जस्य "यज-सृज०" [ २. १. ८७. ] इति षापवादे "ऋत्विज्०" [ २. १. ६९. ] इति गत्वे तस्य कत्वे, ऋकारस्य रविधायके 'स्रज्' इति निर्देशबलेन रकारे च—स्रक् इति, तथा चात्र कथं कर्मणि क्विविति शङ्काशयः, समाधत्ते—**क्रुत्सम्पदादित्वात् क्विप्** इति—नात्रानेन क्विप् किन्तु "क्रुत्सम्पदादिभ्यः" [ ५. ३. ११४. ] इति भावाकर्त्रोः क्विप्, तत्र कर्मणोऽप्यन्तर्भाव इति तेनैव कर्मणि क्विविति न काप्यनुपपत्तिरिति सामाधानाशयः । अनुबन्धानां सार्थक्यमुपपादयति—**ककारः कित्कार्यार्थः** इति—कित्कार्यं गुणाभावव्वृदादि, **पकारः पित्कार्यार्थः** इति–पित्कार्यं तागमः, इकारस्यानुबन्धत्वे फलाभावेऽप्युच्चारणमेव तस्य फलमित्याह–**इकार उच्चारणार्थः** इति—स्वरं विना व्यञ्जनसमुदायस्योच्चारयितुमशक्यत्वादिति भावः ॥ ५. १. १४८. ॥

## स्पृशोऽनुदकात् । ५. १. १४९ ॥

**त० प्र०**—उदकवर्जितान्नाम्नः परात् स्पृशेः क्विप् प्रत्ययो भवति । घृतं स्पृशति–घृतस्पृक् । एवं–मर्मस्पृक्, व्योमस्पृक् । मन्त्रेण स्पृशति–मन्त्रस्पृक् । कर्मोपपदादेवेच्छन्त्यन्ये । अनुदकादिति किम्? उदकस्पर्शः, उदकेन स्पर्ष्टा । अनुदक इति पर्युदासाश्रयणादुदकसदृशमनुपसर्गं नाम गृह्यते, तेनेह न भवति–उपस्पृशति ॥१४९॥

**श० म० न्यासानुसन्धानम्—स्पृशो०** । "स्पृशंत् स्पर्शे" घृतं स्पृशतीति क्विपि तस्य लोपे ङस्युक्तसमासे "यजसृज०" [ २. १. ८७. ] इति षत्वापवादे "ऋत्विज्० [ २. १. ६९. ] इति शस्य गत्वे तस्य "विरामे वा" [ १. ३. ५१. ] इति कत्वे–**घृतस्पृक्**, एवं–मर्म स्पृशतीति—**मर्मस्पृक्**, व्योम स्पृशतीति—**व्योमस्पृक्**, मन्त्रेण स्पृशतीति—**मन्त्रस्पृक्** । मतान्तरमाह—**कर्मोपपदादेवेच्छन्त्यन्ये** इति, एतच्च पाणिनीयव्याकरणे नवीनानां मतम् । तथाहि नागेशेनोक्तमुद्योतग्रन्थे—"[ ३. २. ५८. ] अत्र सूत्रे कर्मणीति सम्बध्यत एव, मन्त्रस्पृगित्यादि तु क्विपा सिद्धम्" इति । अयमाशयः—"स्पृशोऽनुदके क्विन्" [३. २. ५८.] इति सूत्रेण क्विन् विधीयते, तत्र नागेशमतेन 'कर्मणि' इत्यस्य सम्बन्धात् मन्त्रेण स्पृशतीत्यर्थे तस्याप्राप्तिरिति सामान्यतः "क्विप् च" [३. २. ७६.] इति सूत्रेणैव क्विबिति । प्राचीनैर्दीक्षितादिभिस्तु "स्पृशोऽनुदके क्विन्" [३.२. ५८. ] इति सूत्रवृत्तौ—अनुदके सुप्युपपदे स्पृशेः क्विन् स्यादित्येवोक्तमिति तन्मतेन कर्मणीत्यस्यासम्बन्ध एव तत्र । एतच्च तत्त्वबोधिनीकारेणापि—"अत्र सुपीत्यनुवर्तते कर्मणीति निवृत्तमित्याशयेनाह—अनुदके सुप्युपपदे इति । घृतस्पृगिति—घृतं घृतेन वा स्पृशतीति विग्रहः" इत्यवोचि । तन्मते मन्त्रस्पृगित्याद्यपि स्वरसत एवोपपद्यते । कृदन्तप्रकरणे चात्र सूत्रे कर्मणीति निवृत्तमिति दीक्षितेन स्पष्टमेवोक्तम्, तत्र तत्त्वबोधिन्यां च तदुपपत्तिः स्फुटमुपपादितेति ।

पदकृत्यं पृच्छति—**अनुदकादिति किमिति**, उत्तरयति—**उदकस्पर्शः** इति—उदकं स्पृशतीति "कर्मणोऽण्" [५. १. ७२. ] इत्यणि उपान्त्यगुणे ङस्युक्तसमासे—उदकस्पर्शः । **उदकेन स्पर्ष्टा** इति—स्पृशतीति "णक-तृचौ" [ ५. १. ४८. ] इति तृचि शस्य षे तद्योगे तस्य टे उपान्त्यगुणे च 'स्पर्ष्टृ' इति, तस्य सौ—स्पर्ष्टा । उपसर्गपूर्वकात् प्रत्ययस्यानिष्टत्वेन तदुपपत्तिं प्रकटयितुमाह—**अनुदक इति पर्युदासाश्रयणादुदकसदृशमनुपसर्गं नाम गृह्यते** इति—समस्तनञोऽन्वयो द्वेधा—प्रसज्यप्रतिषेधेन पर्युदासेन च, तत्र प्रसज्यप्रतिषेधे नञः क्रियायामन्वयः, तथा च नाम्नः परात् स्पृशेः क्विप् भवति, उदकशब्दात् परान्न भवतीति पृथक् वाक्यकल्पनं स्यात् । पर्युदासे तु—उदकभिन्नान्नाम्नः परादित्यर्थे लाघवं भवतीति पर्युदास एवाश्रयणीयः । पर्युदासस्थले च *नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः* इति न्यायः प्रसरति । तस्यायमर्थः—नञ्युक्तम् इवयुक्तं च पदमन्यस्मिन् सदृशे चाधिकरणे प्रवर्तते, कुतः? हि–यतः, तथैवार्थस्य गतिर्ज्ञानं भवतीति । एवं च 'उदकभिन्नात् उदकसदृशात्' इत्यर्थे सादृश्यं स्यन्तत्वादिना गृह्यत इत्युपसर्गपूर्वकान्न भवतीति, तदाह—

**तेनेह न भवति–उपस्पृशतीति**, तथा चोपस्पृशतीत्येव प्रयोगो न तत्र क्विबिति ॥ ५. १. १४९. ॥

## अदोऽनन्नात् । ५. १. १५०. ॥

**त० प्र०—अन्नवर्जितान्नाम्नः परादद्‌ेः क्विप् प्रत्ययो भवति । आममत्ति—आमात्, सस्यात् । अनन्नादिति किम् ? अन्नादः । बहुलाधिकारात्–कणादः, पिप्पलादः । क्विप् सिद्धोऽन्नप्रतिषेधार्थं वचनम् ॥१५०॥**

**श० म० न्यासानुसन्धानम्—अदो०** । "अदं भक्षणे" आममत्तीति—**आमात्**, सस्यमत्तीति—**सस्यात्** । सूत्रेऽन्नपदं स्वरूपपरं न तु तदर्थपरमिति 'सस्यात्' इत्यादीनां सिद्धिः । एवं च कणाद-पिप्पलाद-शब्दौ कथं साधु तत्रास्यैव प्रवृत्त्या 'कणात्, पिप्पलात्' इत्येव भवितव्यमित्याशङ्कायामाह—**बहुलाधिकारात् कणादः, पिप्पलादः** इति—बहुलाधिकारेण क्वचिदप्रवृत्त्या नायं क्विप् भवति, किन्तु कणं पिप्पलं चात्तीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणेव भवतीति भावः । सूत्रस्य सार्थक्यमुपपादयति—**क्विप् सिद्धोऽन्नप्रतिषेधार्थं वचनमिति**—"क्विप्" [ ५. १. १४८. ] इति साधारणसूत्रेण क्विप् सिद्ध एव, किन्तु तेन साधारण्येन नाम्नः परात् धातोः क्विबुक्त इति अन्नात् परत्वेऽपि स्यादेवेति तत्प्रतिषेधार्थमिदमावश्यकमिति भावः ॥ ५. १. १५०. ॥

## क्रव्यात्-क्रव्यादावाम-पक्वादौ । ५. १. १५१. ॥

**त० प्र०—'क्रव्यात् क्रव्याद्' इत्येतौ शब्दौ यथासंख्यं क्विबणन्तौ साधू भवतः, यद्यामात् पक्वाच्चाभिधेयौ भवतः । क्रव्यमत्ति—क्रव्यात्, आममांसभक्षः, क्रव्यादः पक्वमांसभक्षः । क्रव्याद इति नेच्छन्त्यन्ये । आममांसवाच्यपि क्रव्यशब्दः क्रव्याद इति निपातनसामर्थ्यात् वृत्तौ पक्वमांसे वर्तते । अथवा कृत-विकृत्तशब्दस्य पक्वमांसार्थस्य पृषोदरादित्वात् क्रव्यादेशः । सिद्धौ प्रत्ययौ विषयनियमार्थं वचनम् ॥१५१॥**

**श० म० न्यासानुसन्धानम्—क्रव्यात्० । यद्यामात् पक्वाच्चाभिधेयौ भवतः** इति—आममत्तीति-आमात्, पक्वमत्तीति—पक्वात्, तादृशावर्थौ चेदभिधेयाविति भावः । क्रव्यमत्तीति—**क्रव्यात्**, अत्र क्विप् अर्थमाह—**आममांसभक्षः** इति । क्रव्यमत्तीति—**क्रव्यादः**, अत्राण्, अर्थमाह—**पक्वमांसभक्षः** इति । मतान्तरमाह—**क्रव्याद इति नेच्छन्त्यन्ये** इति । ननु क्रव्यशब्दः साधारण्येन मांसवाच्येव, तथा चामे मांसे प्रयुज्यते, तथा च क्रव्यादशब्दे पक्वमांसवाचकत्वं तस्य कथमित्याशङ्कायामाह—**आममांसवाच्यपि क्रव्यशब्दः 'क्रव्याद' इति निपातनसामर्थ्याद् वृत्तौ पक्वमांसे वर्तते** इति-अलाक्षणिककार्यलाभार्थमेव निपातनमाश्रीयते, तेन निपातनबलेनैव वृत्तौ तस्य पक्वमांसवाचित्वमिति भावः । समाधानान्तरमाह—**अथवा कृत्तविकृत्तशब्दस्य पक्वमांसार्थस्य पृषोदरादित्वात् क्रव्यादेशः** इति—कृत्तविकृत्तमत्तीतीह विग्रहवाक्यम् । कृत्तविकृत्तस्य क्रव्यमिति नैरुक्ताः । बाहुलकेनोभयोः प्रत्यययोः सिद्धत्वात् सूत्रस्य वैयर्थ्यं निवारयति—**सिद्धौ प्रत्ययौ विषयनियमार्थं वचनमिति**—आमादर्थे 'क्रव्यात्' इति क्विबन्तस्य, पक्वादर्थे 'क्रव्याद' इत्यणन्तस्य प्रयोग इति विषयनियमार्थं निपातनसूत्रमिदमिति भावः ॥ ५. १. १५१. ॥

## त्यदाद्यन्यसमानादुपमानाद् व्याप्ये दृशष्टक्-सकौ च । ५. १. १५२. ॥

**त० प्र०—त्यदादेरन्यशब्दात् समानशब्दाच्चोपमानभूताद् व्याप्ये कर्मणि वर्तमानात् परात् दृशेर्व्याप्य एव टक्-सकौ क्विप् च प्रत्यया भवन्ति । त्यदादि–स्य इव दृश्यते–त्यादृशः, त्यादृशी, त्यादृक्षः, त्यादृक्षा, त्यादृक्, एवं–तादृशः, तादृशी, तादृक्षः, तादृक्षा, तादृक् । अन्य–अन्यादृशः, अन्यादृशी, अन्यादृक्षः, अन्यादृक्षा, अन्यादृक् । समान–सदृशः, सदृशी, सदृक्षः, सदृक्षाः, सदृक् । केचित् सकमपि टितं मन्यते, तन्मते–त्यादृक्षीत्याद्येव भवति । एभ्य इति किम् ? वृक्ष इव दृश्यते । उपमानादिति किम् ? स दृश्यते । व्याप्ये वर्तमानादिति किम् ? तेनेव दृश्यते, तस्मिन्निव दृश्यते, अस्मिन्निव दृश्यते । व्याप्य एवेति किम् ? तमिव पश्यन्तीत्यत्र कर्तरि न भवति । वचनभेदान्न यथासंख्यम् ॥ १५२ ॥**

**श० म० न्यासानुसन्धानम्—त्यदा० । व्याप्ये कर्मणि वर्तमानात् परात् दृशेर्व्याप्ये एवेति**–सूत्रस्य-

व्याप्यपदस्य देहलीदीपकन्यायेनोभयोर्विशेषणत्वमिति भावः, तथा चोपपदस्यापि कर्मणि वर्तमानत्वमपेक्षितं प्रत्ययार्थोऽपि कर्मैव, अन्यथा कृत्प्रत्ययत्वेन कर्तरि प्रसङ्गः स्यात्। "दृशं प्रेक्षणे" 'त्यत्' शब्दः सर्वादिः, स्य इव दृश्यते इति टकि—**त्यादृशः** इति—इवार्थ उपमानमुपपदार्थेऽन्तर्भूतमिति तत्र वर्तमानत्वं त्यदादेः, "अन्यत्यदादेराः" [ ३. २. १५२. ] इति सूत्रेण अन्यशब्दस्य त्यदादेश्च दृगादावुत्तरपदे आः स्यात्। टकि टकारः ककारश्चानुबन्धः, टकारः स्त्रियां ङीप्रत्ययार्थः, ककारो गुणाभावार्थः, गुणाभावस्तु दर्शित एव, ङीप्रत्ययार्थं स्त्रियामुदाहरति—**त्यादृशी**। स्य इव दृश्यते इति सकि पुंसि—**त्यादृक्षः**, स्त्रियां—**त्यादृक्षा**, अत्र धातुशकारस्य "यज-सृज०" [ २. १. ८७. ] इति षः, तस्य "ष-ढोः कः सि" [ २. १, ६२. ] इति ककारः, प्रत्ययसकारस्य "नाम्यन्तस्थाकवर्गात्०" [ २. ३. १५. ] इति षकारः, सकि ककारोऽनुबन्धो गुणाभावार्थः। स्य इव दृश्यते इति क्विपि पुंसि स्त्रियां च—**त्यादृक्** इति—अत्र शस्य "ऋत्विज्-दिश्-दृश्०" [ २. १. ६९. ] इति गः, तस्य "विरामे वा" [ १. ३. ५१. ] इति कः। अतिदिशति—**एवमिति**। स इव दृश्यते इति—**तादृशः, तादृशी, तादृक्षः, तादृक्षा; तादृक्**। अन्य इव दृश्यते इति—**अन्यादृशः, अन्यादृशी; अन्यादृक्षः, अन्यादृक्षा; अन्यादृक्**। समान इव दृश्यते इति—**सदृशः, सदृशी; सदृक्षः, सदृक्षा; सदृक्** इति—एषु "दृक्-दृश-दृक्षे" [ ३. २. ५१. ] इति समानशब्दस्य सादेशः। मतान्तरमाह—**केचित् सकमपि टितं मन्यन्ते** इति, तत्र विशेषमाह—**तन्मते त्यादृक्षीत्याद्येव भवतीति**—एवकारेण 'त्यादृक्षा' इत्यादेर्व्यवच्छेदः, टिति सकि नित्यं ङीविधानात्। पदकृत्यं पृच्छति-**एभ्य इति किमिति**, उत्तरयति-**वृक्ष इव दृश्यते** इति नात्रानेन कश्चिदपि प्रत्ययः। पृच्छति-**उपमानादिति किमिति**, उत्तरयति-**स दृश्यते** इति-अत्रोपमानाभावान्न प्रत्ययः। पृच्छति-**व्याप्ये वर्तमानादिति किमिति**, अयमाशयः-सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति सकृदुच्चरितस्य व्याप्यशब्दस्य सकृदेवार्थबोधकत्वमुचितमिति प्रधानप्रत्ययानुरोधेन तद्विशेषणत्वमेव तस्य युक्तमित्युपपदविशेषणत्वं तस्यानुचितमिति, व्यावर्त्यप्रदर्शनेनोत्तरयति-**तेनेव दृश्यते, तस्मिन्निव दृश्यते अस्मिन्निव दृश्यते** इति—अयमाशयः—यद्यपि सकृदुच्चरितस्य सकृदेवार्थबोधकत्वमुचितं तथापि लक्ष्यानुरोधेन व्याप्यशब्दस्यावृत्त्या तत्र तन्त्रं कल्पयित्वा वा तस्योभयोरपि विशेषणत्वमाश्रयणीयम्, अन्यथा कर्त्राद्यर्थे वर्तमानादप्युपपदात् पदत्वे प्रत्ययः स्यात्, स च नेष्यते। नन्वस्तूपपदविशेषणत्वमेव व्याप्यपदस्येति शङ्कते—**व्याप्य एवेति किमिति**, उत्तरयति—**तमिव पश्यन्तीत्यत्र कर्तरि न भवतीति**—अत्रोपपदस्य व्याप्ये वर्तमानत्वेऽपि प्रत्ययार्थस्य कर्तृत्वमिति तत्र न प्रत्ययो भवतीति तदर्थं प्रत्ययार्थविशेषणत्वमपि तस्यावश्यकमिति। उपपदभेदेन प्रत्ययस्यापि भेदः स्यादिति त्यदाद्युपपदात् टक्, अन्योपपदात् सक् समानोपपदाच्च क्विप् स्यादित्याशङ्कां वारयति—**वचनभेदान्न यथासंख्यमिति**—यदीह यथासंख्येनान्वय इष्टः स्यात् तर्हि यथोपपदबोधके पदे समाहारं कृत्वैकवचनं प्रयुक्तं तथा प्रत्ययांशेऽप्येकवचनमेव प्रयुक्तं स्यादिति, न च तथाकृतमिति यथासंख्यं न भवतीति सर्वस्मादुपपदात् परत्वे सर्वे प्रत्यया भवन्तीति भावः॥ ५. १. १५२.॥

## कर्तुर्णिन्। ५. १. १५३.॥

**त० प्र०—कर्तृवाचिन उपमानभूतान्नाम्नः परात् धातोर्णिन् प्रत्ययो भवति। कृत्वात् कर्तरि। उष्ट्र इव क्रोशति-उष्ट्रक्रोशी, ध्वाङ्क्षरावी, खरनादी, सिंहनर्दी। कर्तुरिति किम्? शालीनिव कोद्रवान् भुङ्क्ते, उष्ट्रमिवाश्वमारोहति। उपमानभूतादित्येव-उष्ट्रः क्रोशति। अशीलार्थो जात्यर्थश्चारम्भः॥ १५३॥**

**श० म० न्यासानुसन्धानम्**—कर्तु०। पूर्वसूत्रादुपमानादित्यनुवर्तते, तदाह—**कर्तृवाचिन उपमानादिति**। नन्वेवं 'व्याप्ये' इत्यस्याप्यनुवृत्तिः स्यादित्याशङ्कां वारयति—**कृत्वात् कर्तरीति**—लक्ष्यानुरोधेन व्याप्य इत्यस्य निवृत्त्या कृत्वादनुकार्थस्य कृतः कर्तरि विधाननियमात् कर्तर्येवायं प्रत्यय इति भावः "क्रुशं आह्वान-रोदनयोः" उष्ट्र इव क्रोशतीति—**उष्ट्रक्रोशी**। "रुक् शब्दे" ध्वाङ्क्ष इव रौतीति—**ध्वाङ्क्षरावी**। "णद अव्यक्ते शब्दे" खर इव नदतीति—**खरनादी**। "णर्द शब्दे" सिंह इव नर्दतीति—**सिंहनर्दी**। पदकृत्यं

पृच्छति—**कर्तुरिति किमिति**, उत्तरयति—**शालीनिव कोद्रवान् भुङ्क्ते** इति—सत्यप्युपमानत्वे कर्तृत्वाभावान्नायं प्रत्यय इत्यर्थः। एवम्—**उष्ट्रमिवारोहतीत्यत्रापि** ज्ञेयम्। 'उपमानाद्' इत्यस्यानुवृत्तेर्व्यावर्त्यं दर्शयति—**उपमानभूतादित्येव—उष्ट्रः क्रोशतीति**—अत्र सत्यपि कर्तृत्वे उपमानत्वाभावान्नायं प्रत्ययः। "अजातेः शीले" [ ५. १. १५४. ] इति सामान्यसूत्रेणैव णिन् विधेयः, तथा च कर्तृवाचिनोऽप्युपपदात् परत्वे स्यादेवेति सूत्रमिदं व्यर्थमित्याशङ्कां वारयति—**अशीलार्थो जात्यर्थश्चारम्भ** इति—तथा च न तत्र शीलाद्यर्थप्रतीतिरिति भावः ॥ ५. १. १५३. ॥

## अजातेः शीले । ५. १. १५४. ॥

**त० प्र०—अजातिवाचिनो नाम्नः पराद् धातोः शीलेऽर्थे वर्तमानात् णिन् प्रत्ययो भवति। उष्णं भुङ्क्ते इत्येवंशीलः—उष्णभोजी, शीतभोजी। अजातेरिति प्रसज्यप्रतिषेधादसत्त्ववाचिनोऽप्युपसर्गाद् भवति उदासरतीत्येवंशीलः—उदासारी, प्रत्यासारी, प्रस्थायी, प्रतिबोधी, प्रयायी, प्रतियायी। उदाङ्-प्रत्याङ्भ्यां परं सर्तिं वर्जयित्वाऽन्यस्माद् धातोरुपसर्गपूर्वान्नेच्छन्त्यन्ये। अजातेरिति किम्? ब्राह्मणानामन्त्रयिता, शालीन् भोक्ता। प्रभोक्ता, उपभोक्ता, संभोक्ता इति बहुलाधिकारान्न भवति। शील इति किम्? उष्णभोज आतुरः ॥१५४॥**

**श० म० न्यासानुसन्धानम्—अजातेः०।** उपमानादिति निवृत्तम्। "भुजंप् पालनाभ्यवहारयोः" उष्णं भुङ्क्ते इत्येवंशील इति—**उष्णभोजी**। शीतं भुङ्क्ते इत्येवंशील इति—**शीतभोजी। अजातेरिति प्रसज्यप्रतिषेधादसत्त्ववाचिनोऽप्युपसर्गाद् भवती**ति, अयमाशयः—अजातेरित्यस्य पर्युदासत्वाश्रयणे जातिभिन्नान्नाम्नः परादित्यर्थः स्यात्, पर्युदासे नञश्च *नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः* इति न्यायानुसारं सदृशग्राहकत्वमपि भवतीति जातिभिन्नजातिसदृशसत्त्वार्थवाचिन एव नाम्नः परत्वे स्यात्, तथा चोपसर्गपरान्न स्यात्, अतोऽत्र लक्ष्यानुरोधेन नञः प्रसज्यप्रतिषेधवाचकत्वमाश्रयणीयम्। एवं च नाम्नः पराद् धातोः शीले णिन् प्रत्ययो भवति, जातिवाचिनो नाम्नः परत्वे न भवतीत्यर्थः, उपसर्गस्य जातिवाचित्वं नेति तत्र भवत्येवेति। तदेवोदाहरति—**उदासरतीत्येवंशीलः—उदासारीति**—"सृं गतौ" "नामिनोऽक०" [ ४. ३. ५१. ] इति वृद्धिः। "ष्ठां गतिनिवृत्तौ" प्रतिष्ठते इत्येवंशील इति णिनि "आत ऐः०" [ ४. ३. ५३. ] इत्याकारस्य ऐकारे तस्य चायादेशे—**प्रस्थायी**। "बुधृग् बोधने" प्रतिबोधतीत्येवंशील इति णिनि "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इत्युपान्त्यगुणे—**प्रतिबोधी**। "यांक् प्रापणे" प्रयातीत्येवंशील इति णिनि आत ऐकारे आयादेशे च—**प्रयायी**, एवं—प्रतियातीत्येवंशील इति—**प्रतियायी**।

"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥" इति,
"व्रताय तेनानुचरेण धेनोर्न्य धि शेषोऽप्यनुयायिवर्गः"

इति च कालिदासप्रयोगे 'उपजीविन्' 'अनुयायिन्' इति शब्दौ प्रयुक्तौ।

"गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।
पतत्यधो धाम विसारि सर्वतः
किमेतदित्याकुलमीक्षितं जनैः॥"

इति माघोक्तौ च 'विसारिन्' शब्दः प्रयुक्तः।

"क्रियासु युक्तैर्नृप! चारचक्षुषो न
वञ्चनीयाः प्रभवोऽनुजीविभिः।"

इति भारविप्रयोगे 'अनुजीविन्' शब्दः प्रयुक्तः। वृत्तिकारादिमतमाह—**उदाङ्-प्रत्याङ्भ्यां परं सर्तिं वर्जयित्वे**त्यादि, तदुक्तं दीक्षितेन—इह वृत्तिकारेणोपसर्गभिन्न एव सुपि णिनिः" इति व्याख्याय "उत्प्रतिभ्यामाङि सर्तेरुपसंख्यानम्" इति पठितम्। हरदत्तमाधवादिभिश्च तदेवानुसृतम्। तच्च भाष्यविरोधादुपेक्ष्यम्" इति। वृत्तिकारादिभिरिह सूत्रे [ सुप्यजातौ णिनिस्ताच्छील्ये—पा० सू० ३. २. ७८. ] सुपीत्यस्योपसर्गभिन्नसुबन्तपरत्वमाश्रीयते, तन्न युक्तम्—पूर्वोदाहृतकविप्रयोगविरोधादिति भावः। पदकृत्यं पृच्छति—**अजातेरिति किमिति**, उत्तरयति—**ब्राह्मणान् आमन्त्रयिता, शालीन् भोक्ता,** अत्र ब्राह्मण-शाल्योर्जातित्वान्नानेन प्रत्ययः, किन्तु शीलार्थे "तृन् शीलधर्मसाधुषु" [ ५. २. २७. ] इति तृन् प्रत्ययः, अस्य कृत्त्वेऽपि न तत्कर्मणि षष्ठी "तृन्नुदन्ता०" [ २. २. ९०. ] इति निषेधात्, किन्तु "कर्मणि" [२. २. ४०.] इति द्वितीया। क्वचिदप्रवृत्तिमाह—**प्रभोक्ता, उपभोक्ता, संभोक्ते**ति—अत्र नानेन प्रत्ययः किन्तु शीलार्थे तृन् प्रत्ययः. कथमस्यात्राप्रवृत्तिस्तत्रोपायमाह—**बहुलाधिकारान्न भवती**ति—बाहुलकाश्रयणादन्या गति-

नैवेति तदाश्रयणं युक्तमेव । पदकृत्यं पृच्छति—**शीले इति किमिति**, उत्तरयति—**उष्णभोज आतुरः** इति–आतुरत्वात् पथ्यायोष्णं भुङ्क्ते, न तु तथास्वभाव इत्यस्याप्रवृत्त्या "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणेव भवतीति भावः ।। ५. १. १५४. ।।

## **साधौ** । ५. १. १५५. ।।

**त० प्र०—नाम्नः परात् साध्वर्थे वर्तमानात् धातोर्णिन् प्रत्ययो भवति । अशीलार्थ आरम्भः । साधु करोति–साधुकारी, साधुदायी, चारुनर्ती, सुष्ठुगामी । बहुलाधिकारात् 'साधु वादयति वादको वीणाम्, साधु गायति' इत्यादौ न भवति ।।१५५।।**

**श० म० न्यासानुसन्धानम्—साधौ । नाम्नः परात् साध्वर्थे वर्तमानाद् धातोरिति**—अत्र साध्वर्थ उपपदस्यैवेति तत्रार्थे वर्तमानत्वमनपेक्षितं धातोः, तथापि साधुत्वस्य धात्वर्थविशेषणत्वेन फलतो धातोरेव तत्रार्थे वर्तमानत्वमित्यभिप्रेत्येदमुक्तम् । पूर्वसूत्रेणास्य वैयर्थ्यमपाकरोति—**अशीलार्थ आरम्भः** इति—पूर्वसूत्रं शीलार्थे प्रवर्तते नाशीलार्थेऽतोऽशीलार्थे प्रवृत्त्यर्थमिदमावश्यकमिति भावः । "डुकृंग् करणे" साधु करोतीति णिनि वृद्धौ ङस्युक्तसमासे—**साधुकारी** । "डुदांग्क् दाने" साधु ददातीति णिनि "आत ऐः०" [ ४. ३. ५३. ] इत्यात ऐकारे आयादेशे च—**साधुदायी**, "नृतैच् नर्तने" चारु नृत्यतीति णिनि उपान्त्यगुणे—**चारुनर्ती** । "गम्लृं गतौ" सुष्ठु गच्छतीति णिनि उपान्त्यवृद्धौ—**सुष्ठुगामी** । क्वचिदप्रवृत्तिमाह—**बहुलाधिकारात् 'साधु वादयति वादको वीणाम्, साधु गायति' इत्यादौ न भवती**ति—प्रथमे वीणया सह सम्बन्धादसामर्थ्यशङ्कायामपि साधु गायतीत्यत्र गत्यन्तराभाव एव ।। ५. १. १५५. ।।

## **ब्रह्मणो वदः** । ५. १. १५६. ।।

**त० प्र०—ब्रह्मन्शब्दात् परात् वदेर्णिन् प्रत्ययो भवति । ब्रह्म ब्रह्माणं वा वदति—ब्रह्मवादी । अयमप्यशीलार्थ आरम्भः, जात्यर्थोऽसरूपविधिनिवृत्त्यर्थश्च ।।१५६।।**

**श० म० न्यासानुसन्धानम्—ब्रह्म०** । "वद व्यक्तायां वाचि" ब्रह्म-वेदं जगद्विवर्तकारणं वा ब्रह्माणं हिरण्यगर्भं वा वदतीति णिनि उपान्त्यवृद्धौ ङस्युक्तसमासे—**ब्रह्मवादी** । "अजातेः शीले" [ ५. १. १५४. ] इत्यनेनैव सिद्धेऽस्य वैयर्थ्यमित्याशङ्कायामाह—**अयमप्यशीलार्थ आरम्भः** इति–शीलार्थविवक्षाया अभावेऽपि प्रत्ययोत्पत्त्यर्थ इत्याशयः, अत्रापि शीलार्थस्य प्रतीतिरिति भट्टपादमतानुसारं पुनरपि वैयर्थ्यशङ्कायामाह–**जात्यर्थः** इति—ब्रह्मशब्दस्य वेदवाचकत्वेन वेदानां चानेकत्वेनानेकव्यक्तिवृत्तित्वाद् ब्रह्मशब्दस्य जातिवाचकत्वमिति पूर्वेणासिद्धिरिति तदर्थोऽयमारम्भ इति । पूर्वत्र शीलार्थसमभिव्याहारात् प्राणिजातिरेव गृह्यते, यथा हि शीलं प्राणिनामेव तथैव जातिरपि प्राणिसम्बन्धिन्येव ग्राह्येति यद्युच्येत तदाह–**असरूपविधिनिवृत्त्यर्थश्चे**ति–असरूपापवादस्य विकल्पेन प्रवृत्त्या "कर्मणोऽण्" [ ५. १. ७२. ] इत्यादेरपि पाक्षिकी प्रवृत्तिः स्यादिति तन्निवृत्त्यर्थ इति, पूर्वसूत्रस्य "अजातेः शीले" इत्यस्य न तावत् सामर्थ्यमिति भावः । अनेन चान्यथा वैयर्थ्यापत्त्या नित्यमेवाण् बाध्यत इति सारः ।। ५. १. १५६. ।।

## **व्रता-ऽऽभीक्ष्ण्ये** । ५. १. १५७. ।।

**त० प्र०—व्रतं शास्त्रितो नियमः, आभीक्ष्ण्यं पौनःपुन्यम्, तयोर्गम्यमानयोर्नाम्नः परात् धातोर्णिन् प्रत्ययो भवति । व्रते—अश्राद्धं भुङ्क्ते—अश्राद्धभोजी, अलवणभोजी, स्थण्डिलस्थायी, स्थण्डिलवर्ती, वृक्षमूलवासी, पार्श्वशायी, तदन्यवर्जनमिह व्रतं गम्यते । आभीक्ष्ण्ये—पुनः पुनः क्षीरं पिबन्ति—क्षीरपायिण उशीनराः, तक्रपायिणः सौराष्ट्राः, कषायपायिणो गान्धाराः, सौवीरपायिणो बाह्लीकाः । व्रता-ऽऽभीक्ष्ण्य इति किम् ? स्थण्डिले शेते —स्थण्डिलशयः । बहुलाधिकारादाभीक्ष्ण्येऽपीह न भवति—कुल्माषखादाश्चोलाः । अशीलार्थं जात्यर्थं च वचनम् ।।१५७।।**

**श० म० न्यासानुसन्धानम्-व्रता०** । व्रतशब्दार्थं ग्राहयति—**व्रतं शास्त्रितो नियमः** इति—शास्त्रं शासनं संजातमस्य तादृशो नियमः, तदुक्तफलाभिलाषिणाऽवश्यकर्तव्यो धर्म इत्यर्थः । "भुजंप् पालनाभ्यव-

हारयोः" न श्राद्धमश्राद्धं श्राद्धभिन्नं न तु श्राद्धमिति–अश्राद्धम्, अश्राद्धं भुङ्क्ते इति—**अश्राद्धभोजी**। अलवणं भुङ्क्ते इति—**अलवणभोजी**। "ष्ठां गतिनिवृत्तौ" स्थण्डिले चत्वरादौ तिष्ठतीति णिनि आत ऐकारे आयादेशे–**स्थण्डिलस्थायी**, यो व्रतात् स्थण्डिले तिष्ठतीत्यर्थः। "वृतूङ् वर्तने" स्थण्डिले वर्तत इति–**स्थण्डिलवर्ती**। "वसं निवासे" वृक्षमूले वसतीति–**वृक्षमूलवासी**। "शीङ्क् स्वप्ने" पार्श्वाभ्यां शेते इति–**पार्श्वशायी**। व्रतस्य स्वरूपमाह—**तदन्यवर्जनमिह व्रतं गम्यते** इति—तदन्यस्य–अश्राद्धादेरन्यस्य श्राद्धादेरित्यर्थः, वर्जनं वर्जनमात्रं नियमस्य विषयः, न तु तस्य श्राद्धभिन्नवस्तुन आसेवनम्, तेन कथञ्चित् तस्य श्राद्धभिन्नवस्तुन आसेवनाभावेऽपि न व्रत लोप इति भावः। आभीक्ष्ण्ये उदाहर्तुमवतारयति–**आभीक्ष्ण्ये** इति। "पां पाने" पुनः पुनः पिबन्तीति णिनि आत ऐकारे आयादेशे "देशे" [ २. ३. ७०. ] इति नस्य णत्वे—**क्षीरपायिण उशीनराः** इति, उशीनरा उशीनरनामकदेशवासिनो जनाः। पुनः पुनस्तक्रं पिबन्तीति–**तक्रपायिणः सौराष्ट्राः**, कषायं तुवररसयुक्तं पेयं पुनः पुनः पिबन्तीति—**कषायपायिणो गान्धाराः**, सौवीरं—काञ्जिकं पुनः पुनः पिबन्तीति—**सौवीरपायिणो बाह्लीकाः**। पदकृत्यं पृच्छति—**व्रता-ऽऽभीक्ष्ण्य इति किमिति**, उत्तरयति—**स्थण्डिले शेते–स्थण्डिलशयः** इति–नात्र व्रतं नवाऽऽभीक्ष्ण्यमिति नास्य प्रवृत्तिः, किन्तु "आधारात्" [ ५. १. ३७. ] इत्यप्रत्ययः। क्वचिदप्रवृत्तिमुपपादयति—**बहुलाधिकारादाभीक्ष्ण्येऽपीह न भवतीति**, "खादृ भक्षणे" कुल्माषान् पुनः पुनः खादन्तीति "कर्मणोऽण्" [ ५.१.७२. ] इत्यणि—**कुल्माषखादाश्चोलाः** इति। पूर्वसूत्रेणास्यागतार्थतामाह–**अशीलार्थं जात्यर्थं च वचनमिति**—भट्टपादादिरीत्याऽपि तत्र शीलार्थस्य प्रतीत्यभावात्, क्षीरादिपदानां जातिवाचकत्वस्वीकारात् प्राणिजातेरेव "अजातेः०" इत्यत्र ग्रहणमित्यत्र सर्वेषामाग्रहाभावादित्याशयः। तथा च सार्थकमिदं सूत्रमिति सारः॥ ५. १. १५७.॥

## करणाद्‌ यजो भूते । ५. १. १५८. ॥

**त० प्र०—करणवाचिनो नाम्नः पराद् भूतेऽर्थे वर्तमानाद् यजेर्णिन् प्रत्ययो भवति। अग्निष्टोमेनेष्टवान्—अग्निष्टोमयाजी, भवति हि सामान्यविशेषयोर्भेदविवक्षायां सामान्ययजौ विशेषयजिरग्निष्टोमः करणम्। भूत इति किम्? अग्निष्टोमेन यजते। करणादिति किम्? गुरूनिष्टवान्॥१५८॥**

**श० म० न्यासानुसन्धानम्—करणाद्०। भूतेऽर्थे वर्तमानाद् यजेरिति**—यस्य स्वसत्ताऽतीता तत् सर्वं भूतशब्देनोच्यत तत्र कस्य भूतताऽत्र भूतशब्देनोच्यत इति जिज्ञासायामुक्तं—भूतेऽर्थे वर्तमानादिति, तथा च धात्वर्थस्य भूतताऽपेक्षितेति भावः। भूतता नाम भूतकालवृत्तिता, तथा च काल एवात्र भूतशब्देनोच्यते, तस्यैव भूत-भविष्यद्-वर्तमानशब्दवाच्यत्वेन प्रसिद्धत्वात्। तत्र केचिन्नित्यं कालं पदार्थानां स्थित्युत्पत्त्योरनुज्ञया कारणत्वं, प्रतिबन्धेन च प्रलयहेतुत्वं मन्यन्ते, तत्र यद्यपि तस्य नित्यत्वेन तत्सत्ताया अतीतत्वाभावाद् भूतशब्दवाच्यत्वं नोपपद्यते, तथापि कालसंसर्गिसूर्यादिग्रहक्रियाभेदाश्रयो मासादिभेदव्यवहारो भूतादिव्यपदेशश्च युज्यते। तत्र शब्दस्य नित्यत्ववादे शब्दस्वरूपस्य 'यज्'धातोर्नित्यत्वेन तत्र भूतादिव्यवहारोऽनुपपन्न इति धात्वर्थे एव तद्व्यवहारः। ननु यदि भूतार्थे क्तविधानाद् भूतशब्दस्य भूतार्थवाचकता, तस्य भूतार्थवाचकत्वे च क्तप्रत्ययस्य भूतार्थे विधानमाश्रीयते तदाऽन्योन्याश्रयदोष इति चेत्? उच्यते-तया 'भूते'शब्दस्य विभक्तिप्रतिरूपकाव्ययपरत्वमाश्रीयते, तस्य च वर्तमानभविष्यद्भिन्नत्वमर्थ इति नान्योन्याश्रयता। अथ च क्तप्रत्ययान्तत्वमेव भूतशब्दस्याश्रयणीयमित्याग्रहश्चेत्? तदाऽपि भूतशब्दस्यात्र न भूतार्थवाचकत्वमपि तु नित्यार्थवाचकत्वम्, यः सदैकरूप एव तिष्ठेत्, न भविष्यत्तां वर्तमानतां वा व्रजेत् सोऽयं इह भूतशब्देनाभिधेय इति नान्योन्याश्रयत्वमित्याश्रयणीयमिति।

"यजी देवपूजासंगतिकरणदानेषु" अग्निष्टोमेनेष्टवानिति णिनि उपान्त्यवृद्धौ ङस्युक्तसमासे—**अग्निष्टोमयाजीति**— अग्निष्टोमस्तोत्रेण समाप्यमानो यो यागः स लक्षणयाऽग्निष्टोमस्तेनापूर्वं भावितवानित्यर्थः। यजेश्च यागकरणके व्यापारे शक्तिः, तत्र व्यापाररूपभावनायां भाव्याकाङ्क्षायां धात्वर्थयागस्य करणत्वेनोपस्थितेः,

[ तस्य स्वतः ] पुरुषार्थत्वाभावाच्च, साक्षात् सुखसाधनमपूर्वं भाव्यत्वेनान्वेति, यागस्य करणत्वं च भावनाभाव्यभावकत्वमेव, सर्वत्र करणानामीदृशमेव कारणत्वम् । संस्था[ स्तोत्रकर्तृसमिति ]वचनस्यापि ज्योतिष्टोमशब्दस्य यागसामानाधिकरण्यात् करणत्वम्, स्वर्गादिः कर्मत्वमपि भाव्यत्वरूपमेव न तु फलाश्रयत्वरूपम् । अयमत्र निष्कर्षः—भावना अर्थत्रयमपेक्षते—साध्यं साधनमिति कर्तव्यतां च । किं भावयेत्, केन भावयेत्, कथं भावयेदित्याकाङ्क्षारूपम् । एवं च यज्धात्वर्थभूता भावनाऽप्यर्थत्रयमपेक्षतैव, तत्र किं भावयेदित्याकाङ्क्षायां यद्यपि यागोऽपि भाव्यत्वेनोपस्थातुं शक्नोति, किन्तु तस्य करणत्वेनोपस्थितत्वात् क्षणविध्वंसित्वाच्च सुखरूपस्वर्गसाधनत्वानुपपत्तिः, कारणस्य हि कार्यनियतपूर्ववृत्तित्वोपगमात् । तथा च तावत्पर्यन्तं स्थायि किञ्चिदपूर्वाख्यं वस्तु कल्प्यते, तदेव च भावनाभाव्यत्वेनान्वेति । यागश्च [ अग्निष्टोमशब्दबोध्यः ] करणत्वेनान्वेतीत्यग्निष्टोमेन यागेनापूर्वं भावितवानित्यर्थः । तत्र च यज्धात्वर्थे यागे [ यागानुकूलभावनायां ] यागस्यैव करणत्वमयुक्तमित्याशङ्कायामाह—**भवति हि सामान्यविशेषयोर्भेदविवक्षायां सामान्ययजौ विशेषयजिरग्निष्टोमः करणमिति**—यज्धात्वर्थः सामान्ययागः, अग्निष्टोमशब्दार्थो विशेषयागः, एवं च सामान्ये विशेषस्य करणत्वं नानुचितमिति करणात् परत्वमक्षतमिति भावः । पदकृत्यं पृच्छति—**भूत इति किमिति,** उत्तरयति—**अग्निष्टोमेन यजते** इति—अत्र वर्तमानतेति नास्य प्रवृत्तिः । पुनः पृच्छति—**करणादिति किमिति,** उत्तरयति—**गुरून् इष्टवानिति**—अत्र न करणं किन्तु कर्मेति नास्य प्रवृत्तिः ॥ ५. १. १५८. ॥

## निन्द्ये व्याप्यादिन् विक्रियः ॥ ५. १. १५९. ॥

**त० प्र०—व्याप्यान्नाम्नः परात् विपूर्वात् क्रीणातेर्भूतेऽर्थे वर्तमानात् कुत्सिते कर्तरीन् प्रत्ययो भवति । सोमं विक्रीतवान्—सोमविक्रयी, घृतविक्रयी, तैलविक्रयी ब्राह्मणः । निन्द्य इति किम् ? धान्यविक्रायः, घृतविक्रायः, तैलविक्रायो वणिक् । व्याप्यादिति किम् ? ग्रामे विक्रीतवान् । भावेऽलन्तस्य मत्वर्थीयेनेना सिध्यति कुत्सायामण्बाधनार्थं वचनम् ॥१५९॥**

**श० म० न्यासानुसन्धानम्—निन्द्ये० । कुत्सिते कर्तरीति**—यत्कर्म क्रीणातिक्रियया सम्बध्यमानं कर्तुः कुत्सामावहति तत्रेत्यर्थः । "डुक्रींग्श् द्रव्यविनिमये" विनिमयः परिवर्तः, सोमं विक्रीतवानितीनि गुणेऽयादेशे ङस्युक्तसमासे—**सोमविक्रयी,** घृतं विक्रीतवानिति—**घृतविक्रयी,** तैलं विक्रीतवानिति—**तैलविक्रयी,** ईदृशः क इत्याह—**ब्राह्मणः** इति—सोम-घृतादयो ब्राह्मणेन विक्रीयमाणास्तस्य कुत्सामावहन्ति शास्त्रेण तद्विक्रयस्य निषिद्धत्वात्, निषिद्धाचरणस्य च कुत्साधायकत्वात् । तथा च ब्राह्मणस्यापद्धर्मप्रकरणे वैश्यवृत्त्याऽपि ब्राह्मणस्य जीवनमनुजानानो मनुस्तेनाविक्रेयवस्तूनि कथयन्नाह—

"अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्वशः ।
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥"

[ म० १०-८८ ] इत्याह,

अत्र न विक्रीणीतेति पूर्वेणान्वयः । किञ्च ब्राह्मणेन विक्रेयद्रव्यादन्येषां द्रव्याणां विक्रये स एव दोषमाह—

"इतरेषां तु पण्यानां विक्रयादिह कामतः ।
ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥" [ १०-९३. ] इति,

तथा च तस्य जातिहीनकरत्वात् तस्य कुत्सितत्वं स्पष्टमिति । पदकृत्यं पृच्छति—**निन्द्य इति किमिति,** उत्तरयति—**धान्यविक्रायः, घृतविक्रायः, तैलविक्रायो वणिक्** इति—वणिजो धान्यादिविक्रयस्य मन्वादिनाऽनुज्ञातत्वान्न कुत्सावहत्वमिति तत्र निन्द्यत्वाभावादस्याप्रवृत्त्या "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणेव भवतीति भावः । पुनः पृच्छति—**व्याप्यादिति किमिति,** उत्तरयति—**ग्रामे विक्रीतवानिति**—अत्र व्याप्याभावान्नास्य प्रवृत्तिः । सूत्रस्य वैयर्थ्यमाशङ्क्य समाधत्ते—**भावेऽलन्तस्य मत्वर्थीयेनेना सिध्यति कुत्सायामण्बाधनार्थं वचनमिति**—विक्रयणं विक्रयः, सोमस्य विक्रयः सोमविक्रयः सोऽस्यास्तीति विग्रहे सोमविक्रयीत्यादिशब्दानां सिद्धावपि तत्र कुत्सायाः प्रतितिर्न स्यात्, कथञ्चित् सत्यामपि तत्प्रतीतौ सोमं विक्रीणातीत्यर्थेऽणेव स्यादिति तद्बाधनार्थमिदं सूत्रमावश्यकम्, अन्यथा वाऽसरूपन्यायेन सत्यपि सूत्रे पक्षेऽण् स्यात्, सिद्धे सत्यारम्भसामर्थ्यात् तद्बाध इति भावः ॥ ५. १. १५९. ॥

## हनो णिन् । ५. १. १६०. ॥

**त० प्र०—व्याप्यान्नाम्नः पराद् भूतेऽर्थे वर्तमानात् हन्तेर्निन्द्ये कर्तरि णिन् प्रत्ययो भवति । पितृव्यं हतवान्-पितृव्यघाती, मातुलघाती । असरूपत्वादणपि–पितृव्यघातः, मातुलघातः । केचित् त्वसरूपविधिं नेच्छन्ति । निन्द्य इत्येव–शत्रुं हतवान्–शत्रुघातः, चौरघातः । व्याप्यादित्येव–दण्डेन हतवान् । घञन्तान्मत्वर्थीयेनेना सिद्धे भूतकुत्साभ्यामन्यत्र शत्रुघातीत्यादौ मत्वर्थीयनिवृत्त्यर्थं वचनम् । अन्यत्रापीच्छत्यन्यः । एवं पूर्वसूत्रेऽपि ॥ १६० ॥**

---

**श० म० न्यासानुसन्धानम्–हनो० ।** निन्द्ये व्याप्यादिति पदद्वयं पूर्वसूत्रादनुवर्तते इत्याह–**व्याप्यान्नाम्नः पराद् भूतेऽर्थे वर्तमानाद् हन्तेर्निन्द्ये कर्तरी**ति, अयमाशयः–प्रत्ययार्थोऽत्र कर्ता, तथा च तस्यैव प्राधान्येन निन्दाया अपि तत्रैवान्वयः । "कर्मणि हनः" [ ३. २. ८६. ] इति पाणिनीयसूत्रे यद्यपि निन्द्यग्रहणं न क्रियते नवा तत्रानुवृत्तिः पूर्वतः, तथापि प्रयोगस्वाभाव्यान्निन्दार्थस्तत्र स्वीक्रियत एव, अत एवोक्तं काशिकायाम्–कुत्सितग्रहणं कर्तव्यमिह मा भूत्--चौरं हतवानिति । यद्यपीदं भाष्यादिग्रन्थेषु नोपलभ्यते तथापि शब्दशक्तिस्वाभाव्यादिदं लभ्यत इत्याशयः काशिकाकारस्य, "हनक् हिंसागत्योः" पितृव्यं हतवानिति णिनि "ञ्णिति घात्" [ ४. ३. १०० ] इति हनो घातादेशे ङस्युक्तसमासे---**पितृव्यघाती,** एवं मातुलं हतवानिति—**मातुलघाती** । पक्षे "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणपि भवतीत्याह —**असरूपत्वात् अणपि भवति–पितृव्यघातः, मातुलाघतः** इति—यद्यप्यणा निन्दार्थो न लभ्यते तस्य तत्राविहितत्वात् तथापि * उत्सर्गसमानदेशा अपवादाः * इति न्यायेन ययोर्बाध्यबाधकभावस्तयोः समानार्थविहितत्वं लभ्यते इत्येतद्विहितणिनो विषये वाऽसरूपनियमेन प्रवर्तमानोऽणपि निन्दायां भविष्यतीति भावः । अत्र मतान्तरमाह—**केचित् त्वसरूपविधिं नेच्छन्ती**ति, तेषामयमाशयः—सामान्येन व्याप्योपपदाद् विधीयमानोऽण् उत्सर्गः, निन्द्येऽर्थे व्याप्योपपदाद् विधीयमानो णिन् अपवादः, तत्र यद्ययं णिन् सामान्यत एव विहितः स्यात् तदोभयोः समानार्थविहिततया बाध्यबाधकभावस्य युक्तत्वं स्यात्, विशेषार्थे विधानाच्च तदर्थस्याणा बोधयितुमशक्यत्वेन न युक्तोऽसरूपविधिरिति । 'निन्द्ये' इत्यस्यानुवृत्तेर्व्यावर्त्यं दर्शयति—**निन्द्य इत्येव–शत्रुं हतवान्–शत्रुघातः, चौरघातः** इति–शत्रोश्चौरस्य च हनने न निन्दाप्रसिद्धिर्लोकेऽतो निन्द्याभावादस्याप्रवृत्त्या "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणेव भवति । व्याप्यादित्यस्यानुवृत्तेर्व्यावर्त्यं दर्शयति–**व्याप्यादित्येव–दण्डेन हतवानि**ति–अत्र व्याप्याभावान्नास्य प्रवृत्तिर्नवाऽणः । सूत्रस्य सार्थक्यमुपपादयति—**घञन्तान्मत्वर्थीयेनेना सिद्धे भूतकुत्साभ्यामन्यत्र शत्रुघातीत्यादौ मत्वर्थीयनिवृत्त्यर्थं वचनमि**ति—हननं घातः, पितृव्यस्य घातः पितृव्यघातः, सोऽस्यास्तीत्यर्थे मत्वर्थीय इन् प्रत्ययः, तथा च पितृव्यघातीति रूपसिद्धिर्यद्यपि भवति तथापि तादृशप्रयोगस्य निन्दार्थमात्रे नियमार्थं सूत्रमिति भावः । एवं च निन्दार्थादन्यत्र तेनापि प्रकारेणेन्नन्तप्रयोगोऽनुचित इति सिध्यति । अत्र मतान्तरमाह—**अन्यत्रापीच्छत्यन्यः** इति—पाणिनीये कुत्सितग्रहणस्याकृतत्वेन तन्मते निन्दातोऽन्यत्रापि प्रत्ययोऽयमिष्ट इति तन्मतमिति भावः । **एवं पूर्वसूत्रेऽपी**ति—पूर्वसूत्रे कुत्सायामणन्तप्रयोगस्य बाधनार्थत्वं तस्योक्तमेव, किन्तु सिंहावलोकनन्यायेन तस्य मत्वर्थीयेन्नन्तप्रयोगबाधनार्थत्वमप्यनुक्तमपि तत्रावगन्तव्यमिति स्मारयतीति भावः ॥ ५. १. १६०. ॥

---

## ब्रह्म-भ्रूण-वृत्रात् क्विप् । ५. १. १६१.

**त० प्र०—ब्रह्मादिभ्यः कर्मभ्यः पराद् भूतेऽर्थे वर्तमानाद्धन्तेः क्विप् प्रत्ययो भवति । ब्रह्माणं हतवान्-ब्रह्महा, भ्रूणहा, वृत्रहा । "क्विप्" [ ५. १. १४८. ] इत्यनेनैव सिद्धे नियमार्थं वचनम्, चतुर्विधश्चात्र नियमः १–ब्रह्मादिभ्य एव हन्तेर्भूते क्विप् नान्यस्मात्–पुरुषं हतवान्–पुरुषघातः । 'मधुहा, अहिहा, गोत्रहा, हिमहा, तमोपहा, असुरहा, आखुहा' इत्यादिषु वर्तमानभविष्यतोः कालमात्रे वा "क्विप् । [ ६. १. १४८. ] इत्यनेनैव क्विप् । २–तथा ब्रह्मादिभ्यो हन्तेरेव भूते नान्यस्माद् धातोः क्विप्– ब्रह्माधीतवान्–ब्रह्माध्याय इत्यणेव न तु क्विप् । ब्रह्मविदादयस्तु भूताविवक्षायाम् । ३–तथा ब्रह्मादिभ्यो हन्तेर्भूते क्विबेव नान्यः**

**प्रत्ययः—ब्रह्माणं हतवान्-ब्रह्महा इति क्विबेव भवति नाण्-णिनौ । ब्रह्मघ्नादयस्तु कालसामान्येन 'ब्रह्मादिभ्यः'' [ ५. १. ८५. ] इति टक् प्रत्यये साधवः । कथं 'वृत्रस्य हन्तुः कुलिशम्' इति ? केवलादेव हन्तेस्तृच पश्चाद् वृत्रेण सम्बन्धः । * मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् * इति क्विपाऽणादिरेव बाध्यते न क्त-क्तवतू । ४—तथा ब्रह्मादिभ्यो हन्तेर्भूत एव काले क्विप् नान्यस्मिन्—ब्रह्माणं हन्ति हनिष्यति वा—ब्रह्मघात इत्यणेव । तदेतत् सर्वं बहुलाधिकाराल्लभ्यते ॥१६१॥**

---

**श० म० न्यासानुसन्धानम्—ब्रह्म०** । ब्रह्माणं हतवानिति क्विपि—**ब्रह्महा**, एवं भ्रूणं वृत्रं च हतवानिति—**भ्रूणहा, वृत्रहा** । सूत्रस्य वैयर्थ्यमाशङ्क्य समाधत्ते—**"क्विप्" [ ५.१.१४८. ] इत्यनेनैव सिद्धे नियमार्थं वचनमिति । चतुर्विधश्चात्र नियमः** इति, अयमाशयः—इह सूत्रे धातूपपदकालप्रत्ययाश्चत्वारोऽपि निर्दिष्टाः, तत्र किंविषयको नियम इति विशेषे विनिगमकाभावेन चतुष्टयविषयकत्वं नियमस्याश्रयणीयमिति भावः । प्रथमं नियमाकारं दर्शयति—**ब्रह्मादिभ्य एव हन्तेर्भूते क्विप् नान्यस्मादिति**—एवं च यत्रैवकारस्ततोऽन्यत्र नियम इति न्यायादत्र नियमे ब्रह्मादिष्वेवकारसम्बन्धात् हन्तेरुपपदान्तरसम्बन्धनिवृत्तिफलोऽयं नियम इति पुरुषादिषूपपदेषु नायं प्रत्ययः, तथा चाह—**पुरुषं हतवान्—पुरुषघातः** इति—अत्रास्याप्रवृत्त्या "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणेव भवतीत्यर्थः । मधुप्रमुखोपपदात् परत्वे 'मधुहा' इत्यादौ कथं क्विबित्याशङ्कायामाह—**वर्तमान-भविष्यतोरिति**—न तु भूते क्विप्, किन्तु वर्तमाने मधु हन्तीति, भविष्यति मधु हनिष्यतीति वा "क्विप्" [५.१.१४८.] इति सामान्यसूत्रेणैव क्विबित्यर्थः, **कालमात्रे वेति**-भूतादिविशेषाविवक्षायां कालमात्रसम्बन्धविवक्षायां वा सामान्यसूत्रेणैव क्विबित्यर्थः, तत्र कालविशेषानियमात् । द्वितीयं नियमाकारं दर्शयति—**ब्रह्मादिभ्यो हन्तेरेव भूते नान्यस्माद् धातोः क्विप्** इति—एवं च यत्रैवकारस्ततोऽन्यत्र नियम इति पूर्वोक्तन्यायेनोपपदस्य धात्वन्तरसम्बन्धो नियम्यत इति ब्रह्मादिषूपपदेषु धात्वन्तरान्नायं प्रत्यय इति । तदाह—**ब्रह्माधीतवानिति**-अत्र सत्यपि ब्रह्मणः परत्वेऽधिपूर्वात् "इङ्क् अध्ययने" इत्यस्मान्नायं प्रत्यय इति भावः । नन्वेवं तर्हि ब्रह्मविदादयः क्विबन्ताः प्रयोगाः कथं भविष्यन्तीति चेत् ? अत्राह—**ब्रह्मविदादयस्तु भूताविवक्षायामिति**, अयमाशयः—भूताधिकाराद् भूतार्थमात्र एवोपपदानां धात्वन्तरसम्बन्धनिवृत्तिर्भविष्यति, भूतार्थादन्यत्र तु धात्वन्तरादपि सामान्यसूत्रेण क्विप् भविष्यत्येवेति । तृतीयं नियमाकारमाह—**ब्रह्मादिभ्यो हन्तेर्भूते क्विबेव नान्यः प्रत्ययः** इति—तथा च भूतार्थस्य प्रत्ययान्तरसम्बन्धो निवर्त्यते पूर्वोक्तन्यायात्, तदाह—**ब्रह्माणं हतवान्—ब्रह्महा इति क्विबेव भवति, नाण्-णिनौ** इति—अत्र "कर्मणोऽण्" [ ५. १. ७२. ] इत्यण् "हनो णिन्" [ ५. १. १६०. ] इति णिन् च न भवत इत्यर्थः । नन्वेवं तर्हि ब्रह्मघ्न इति प्रयोगः कथमित्याह—**ब्रह्मघ्नादयस्तु कालसामान्येन "ब्रह्मादिभ्यः" [५. १. ८५. ] इति टक्प्रत्यये साधवः** इति—भूताद्यर्थाविवक्षायामिति भावः । धातुपपदकालप्रत्ययसम्बन्ध एवायं नियमो लगति, पार्थक्येन प्रयोगे तु नेति '**वृत्रस्य हन्तुः कुलिशम्**' इति केवलादेव तृजिति । किञ्च सोपपदप्रत्ययविषय एवायं नियमो नियमस्य सजातीयत्वनियमात्, तथा च क्त-क्तवत्वोर्भूत एव विधानेऽपि न तत्र नियमो लगति, अत एव ब्रह्म हतवानिति क्तवत्वन्तेन सह विग्रहः कृतः । क्तक्तवत्वोर्विषये नियमस्याप्रवृत्तेरुपायान्तरमप्याह—***मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्* इति क्विपाऽणादिरेव बाध्यते न क्तक्तवतू** इति—उत्सर्गसमूहमध्ये पठितोऽपवादोऽवश्यं स्वपरस्मिन् बाधनीये प्रथमोपस्थितत्वादनन्तरविधिबाधने निरवकाशत्वरूपप्रतिपदोक्तत्वस्यापगततया तदुत्तरविधिबाधे न समर्थ इति युक्तिमूलोऽयं न्यायः । चतुर्थं नियमाकारमाह—**ब्रह्मादिभ्यो हन्तेर्भूत एव काले क्विप्, नान्यस्मिन्** इति, एवं च पूर्वोक्तन्यायेनात्र क्विपः कालान्तरसम्बन्धो नियम्यते । तदाह—**ब्रह्माणं हन्ति हनिष्यति वा—ब्रह्मघात इत्यणेवेति** । ननु सूत्रे उपपदप्रत्यययोरेव श्रुतत्वेन ताभ्यामेव कालप्रकृत्योर्नियमो युक्तो न तु सर्वैः सर्वस्येति नियमस्य चतुर्विधत्वं कथमुक्तं किंमूलं चेति शङ्कायामाह—**तदेतत् सर्वं बहुलाधिकाराल्लभ्यते** इति, तथा च सर्वेषां धात्वादीनां नियामकत्वं बाहुलकमूलकमेवेति । पाणिनीये काशिकावृत्तिकृताऽपि चतुर्विध एव नियमो दर्शितः ॥ ५. १. १६१. ॥

## कृगः सुपुण्य-पाप-कर्म-मन्त्र-पदात्

। ५. १. १६२. ॥

**त० प्र०—सुशब्दात् पुण्यादिभ्यश्च कर्मभ्यः परात् करोतेर्भूतेऽर्थे वर्तमानात् क्विप् भवति । सुष्ठु कृतवान्-सुकृत्, पुण्यं कृतवान्-पुण्यकृत्, पापकृत्, कर्मकृत्, मन्त्रकृत्, पदकृत् । इदमपि नियमार्थं वचनम् । त्रिविधश्चात्र नियमः । १-एभ्यः कृग एव भूते क्विप् नान्यस्माद् धातोः-मन्त्रमधीतवान्-मन्त्राध्याय इत्यण्क्ता एव भवन्ति, न क्विप् । 'मन्त्रवित्, पापनुत्' इत्यादौ तु भूताविवक्षायां क्विप् । २-तथा एभ्यः कृगो भूत एव क्विप् । इह न भवति-कर्म करोति करिष्यति वा—कर्मकारः, मन्त्रकारः, पदकारः । ३-तथा एभ्यः परात् कृगो भूते क्विबेव नान्यः प्रत्ययः, तेन कर्म कृतवान्—कर्मकार इति न भवति । एभ्य एव भूते कृगः क्विबिति धातुनियमो नेष्यते, तेन 'शास्त्रकृत्, तीर्थकृत्, वृत्तिकृत्, सूत्रकृत्, भाष्यकृत्' इत्यादयः सिद्धाः ॥१६२॥**

---

**श० म० न्यासानुसन्धानम्—कृगः०** । व्याप्यादित्यनुवर्तमानमपि योग्यतया पुण्यादिभ्य एव सम्बध्यते, न तु सुशब्देनेत्याह—**सुशब्दात् पुण्यादिभ्यश्च कर्मभ्यः** इति । "डुकृंग् करणे" सुष्ठु कृतवानिति क्विपि तस्य लोपे प्रत्ययलक्षणन्यायेन "ह्रस्वस्य तः पित्कृति" [ ४. ४. ११३. ] इति तागमे च—**सुकृत्** इति—अत्र च ङस्युक्तसमासः । एवं पुण्यं कृतवानिति—**पुण्यकृत्,** पापं कर्म मन्त्रं पदं च कृतवानिति—**पापकृत्, कर्मकृत्, मन्त्रकृत्, पदकृत्** इति । सामान्यसूत्रेणैव क्विपि सिद्धेऽस्यापि सूत्रस्य वैयर्थ्यमाशङ्क्य समाधत्ते—**इदमपि नियमार्थं वचनमि**ति । किं पूर्वसूत्रवच्चतुर्विधस्य नियमस्यात्राप्याश्रयणमन्यथा वेत्याशङ्कायामाह—**त्रिविधश्चात्र नियमः** इति । तत्र प्रथममाह—**एभ्यः कृग एव भूते क्विप्, नान्यस्माद् धातोरि**ति—एवं चोपपदस्य धात्वन्तरसम्बन्धनिवृत्तिफलक उपपदनियमोऽयमिति, तेनैतेषूपपदेष्वन्यस्माद धातोर्भूते क्विप् न भवतीति, तदाह—**मन्त्रमधीतवान्-मन्त्राध्याय इत्यण्-क्ता एव भवन्ति, न क्विप्** इति—अण् च क्तौ [ क्त-क्तवतू ] चेति—अण्-क्ताः, मन्त्रमधीतवानित्यर्थे "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि—मन्त्राध्यायः, क्ते-मन्त्रमधीतः, अत्र "आरम्भे" [ ५. १. १०. ] इत्यारम्भे क्तः, "गत्यर्थाकर्मक०" [ ५. १. ११. ] इत्यस्य तु सकर्मकत्वादप्राप्तिः, क्तवतौ—मन्त्रमधीतवानिति, अत्र नियमबलात् क्विप् न भवतीत्यर्थः । नन्वेवं तर्हि 'मन्त्रवित्, पापनुत्' इत्यादौ कथं क्विबित्याशङ्कायामाह—**'मन्त्रवित्, पापनुत्' इत्यादौ तु भूताविवक्षायां क्विप्** इति—कालसम्बन्ध एव नियमेन कालान्तरे प्रत्ययप्रवृत्तौ बाधकाभाव इति तदाशयः । "विदक् ज्ञाने" मन्त्रं वेत्तीति—मन्त्रवित्, "णुदंत् प्रेरणे" पापं नुदतीति—पापनुत्, अत्र सामान्यसूत्रेण क्विबिति भावः । द्वितीयं नियममाह—**एभ्यः कृगो भूत एव क्विप्** इति, तथा च कालान्तरसम्बन्धनिवृत्तिफलकप्रत्ययनियमोऽयमिति भावः । तेनैतेषूपपदेष्वस्माद् धातोर्भूतार्थादन्यत्र क्विप् न भवतीत्याह—**कर्म करोति करिष्यति वा—कर्मकारः** इति— अत्रास्याप्रवृत्त्याऽण्, एवं—मन्त्रं पदं च करोति करिष्यति वा—**मन्त्रकारः, पदकारः** । तृतीयं नियमं दर्शयति—**एभ्यः परात् कृगो भूते क्विबेव, नान्यः प्रत्ययः** इति, तथा चोपपदधात्वोः प्रत्ययान्तरसम्बन्धनिवृत्तिफलकः कालनियमोऽयमिति, तेनैतेषूपपदेष्वस्माद् धातोर्भूते नान्यः प्रत्यय इति, तदाह— **तेन कर्म कृतवान्—कर्मकार इति न भवतीति** । धात्वादीनामुपपदान्तरसम्बन्धनिवृत्तिफलकधातुनियमस्य नाश्रयणीयतादर्शनपूर्वकं पूर्वोक्तनियमत्रयस्य त्रैविध्यं प्रमाणयति—**'एभ्य एव भूते क्विप्' इति धातुनियमो नेष्यते** इति—लक्ष्यानुसारित्वाच्छास्त्रस्य तादृशलक्ष्यस्यानिष्टत्वेन स नियमो नाश्रित इति भावः, तेनास्माद् धातोर्भूते उपपदान्तरसत्त्वेऽपि क्विप् भवति, तदाह—**तेन 'शास्त्रकृत्, तीर्थकृत्, वृत्तिकृत्, सूत्रकृत्, भाष्यकृत्' इत्यादयः सिद्धाः** इति—शास्त्रं तीर्थं वृत्तिं सूत्रं भाष्यं च कृतवानिति विग्रहः । न चैवं सूत्रे उपपदग्रहणं व्यर्थमिति वाच्यम्, तादृशप्रयोगबाहुल्यापेक्षया तदुपादानात् । त्रिविध एव नियम इति काशिकाकृदुक्तरीत्या दीक्षितादिभिरपि स्वीकृतम्, क्विबेव, कृग एव, भूत एवेति, तत्र नियमाकारः प्रदर्शितः, फलं चैवमेव प्रदर्शितमित्येतद्विषये सर्वं समानम् ॥ ५. १. १६२. ॥

## सोमात् सुगः । ५. १. १६३. ॥

**त० प्र०—कर्मणः परात् सुनोतेर्भूतेऽर्थे वर्तमानात् क्विप् भवति । सोमं सुतवान्–सोमसुत् । अयमपि नियमार्थो योगः । चतुर्विधश्चात्रापि नियमः । १–सोमादेवेति नियमात्–सुरां सुतवान्–सुरासाव इत्यण् । सुरासुदिति भूताविवक्षायाम् । २–सुग एवेति नियमात्–सोमं पीतवान्–सोमपा इति विच् । ३–भूत एवेति नियमात्–सोमं सुनोति सोष्यति वा–सोमसाव इत्यण् । ४–क्विबेवेति नियमात्–सोमं सुतवान् इत्यण् न भवति ॥१६३॥**

**श० म० न्यासानुसन्धानम्–सोमात्०** । "षुंगट् अभिषवे" अभिषवः क्लेदनं सन्धानाख्यं पीडनमन्थने वा सोमं सुतवानिति क्विपि तागमे च—**सोमसुत्** । पूर्ववदत्रापि सामान्यसूत्रेणैव प्रत्ययसिद्धावस्यापि नियमार्थत्वमेवेत्याह—**अयमपि नियमार्थो योगः** इति । तत्र नियमसंख्यामाह—**चतुर्विधोऽत्र नियमः** इति—नियमस्य विधाविशेषोपपादकं तथालक्ष्यदर्शनमेव । **सोमादेवेति नियमादिति**—सुनोतेः सोम एवोपपदे नियतत्वादुपपदान्तरे सति न भवतीति भावः, तदाह— **सुरां सुतवान्–सुरासाव इत्यण्** नियमस्य च कालसम्बन्धसहकृतत्वात् कालान्तरसम्बन्धे नियमो नैव प्रसरतीत्याह—**सुरासुदिति भूताविवक्षायामिति** । **सुग एवेति नियमादिति**—सुग एवेति नियमेन च सोमस्य सुग्धातावेव नियतत्वाद् धात्वन्तराच्च प्रत्यय इत्यर्थः, तदाह—**सोमं पीतवान्—सोमपा इति विच्** इति । **भूत एवेति नियमादिति**—भूत एवेति नियमेन भूतकाले क्विपो नियतत्वात् कालान्तरे न भवति, तदाह—**सोमं सुनोति सोष्यति वा—सोमसाव इत्यणेवेति** । **क्विबेवेति नियमादिति**—क्विबेवेति नियमेन भूतकालस्य क्विपि नियतत्वेनात्र काले प्रत्ययान्तरं न भवति तदाह—**सोमं सुतवान् इत्यण् न भवती**ति ॥ ५. १. १६३. ॥

## अग्नेश्चेः । ५. १. १६४. ॥

**त० प्र०—अग्नेः कर्मणः परात्चिनोतेर्भूतेऽर्थे वर्तमानात् क्विप् भवति । अग्निं चितवान्–अग्निचित् । अत्रापि चतुर्विधो नियमः । १–अग्नेरेवेति नियमात्–कुड्यं चितवान्–कुड्यचाय इत्यण् । २–चेरेवेति नियमात्–अग्निं कृतवान्–अग्निकारः । ३–भूत एवेति नियमात्–अग्निं चिनोति चेष्यति वा–अग्निचायः । ४–क्विबेवेति नियमात्–अग्निं चितवानित्यण् न भवति । ॥१६४॥**

**श० म० न्यासानुसन्धानम्—अग्ने०** । "चिग्ट् चयने" अग्निं चितवानिति क्विपि तागमे च—**अग्निचित्**, अस्यापि पूर्ववन्नियमार्थत्वं नियमस्य चतुर्विधत्वं च, तेन धातूपपदकालप्रत्ययानां परस्परनियतत्वेन नान्यस्माद् धातोर्नान्यस्मिन्नुपपदे नान्यस्मिन् काले नान्यः प्रत्ययश्च भवतीति पूर्ववत् सर्वं विज्ञेयम् । योगविभाग उत्तरत्र चिनोतेरेव सम्बन्धार्थः, अन्यथा एकयोग एवोपपदद्वययोरुपादानेऽपि यथासंख्येनैव सिद्धेर्योगविभागस्य वैयर्थ्यं स्यात् ॥ ५. १. १६४. ॥

## कर्मण्यग्न्यर्थे । ५. १. १६५. ॥

**त० प्र०—कर्मणः पराद् भूतेऽर्थे वर्तमानाच्चिनोतेः कर्मणि कारकेऽग्न्यर्थेऽभिधेये क्विप् भवति । श्येन इव चीयते स्म–श्येनचित्, एवं–कङ्कचित्, रथचक्रचित्, अग्न्यर्थं इष्टकचय उच्यते । बहुलाधिकाराद्रूढिविषय एवायं द्रष्टव्यः । केचित् तु संज्ञाशब्दत्वात् कालत्रयेऽप्ययं भवतीत्याहुः–श्येन इव चीयते चितश्चेष्यते वा–श्येनचित् ॥१६५॥**

**श० म० न्यासानुसन्धानम्–कर्म०** । **कर्मणि कारकेऽग्न्यर्थेऽभिधेये** इति—कर्मैवोपपदं तदेव च प्रत्ययार्थः, तच्च कर्माग्निनिमित्तकं चेद् भवेदिति समुदितोऽर्थः । श्येन इव चीयते स्मेति क्विपि तागमे ङस्युक्तसमासे च—**श्येनचित्**, श्येनाकारतया निर्मित इति भावः । अतिदिशति—**एवमिति**, कङ्क इव चीयते स्मेति—**कङ्कचित्**, रथचक्रमिव चीयते स्मेति—**रथचक्रचित्**, तत्तदाकारतया निर्मित इत्यर्थः । श्येनचिदादिशब्देन कोऽयमुच्यते इति चेत् ? अत्राह—**अग्न्यर्थं इष्टकचय उच्यते** इति—समुदायेनाहवनीयाग्निधारणार्थं इष्टकासमूहनिर्मितः स्थलविशेष इति भावः । संज्ञाधिकाराभावेऽपि संज्ञात्वमस्याह—**बहुलाधिकाराद् रूढिविषय एवायं द्रष्टव्यः** । भूताधिकारबाधनमिह

मतान्तरेण निर्दिशति— **केचित् तु संज्ञाशब्दत्वात् कालत्रयेऽप्ययं भवतीत्याहुरि**ति, अयमाशयः—संज्ञाशब्दस्य योगार्थनिरपेक्षत्वेन रूढ्यनुसारमेव प्रत्ययार्थकल्पनमुचितमिति, रूढिबोध्येऽर्थे च यदि न भूतार्थप्रतीतिरपि तु कालसामान्यप्रतीतिरेव तर्हि तत्रैव प्रत्ययस्य विधानमावश्यकम्, यदि च भूतातिरिक्तस्य वर्तमानादेरेव प्रतीतिस्तदा तत्रैवार्थेऽस्य प्रत्ययस्य विधानं द्रष्टव्यमिति भूताधिकारस्य नात्रावश्यकतेति भावः। यदि चोत्तरत्रानुवृत्तये तदधिकार आवश्यक इत्युच्यते तदाऽस्तु नाम तत्रैवायं प्रत्ययः, किन्तु प्रयोगस्वाभाव्यात् तदर्थप्रतीतिर्न भविष्यतीति कालत्रयेऽपि तत्प्रयोगो निर्बाध इति। तदेवाह—**श्येन इव चीयते चितश्चेष्यते वा-श्येनचिदि**ति ॥ ५. १. १६५. ॥

## दृशः क्वनिप् । ५. १. १६६. ॥

**त० प्र०—कर्मणः परात् दृशो भूतेऽर्थे वर्तमानात् क्वनिप् प्रत्ययो भवति । मेरुं दृष्टवान्—मेरुदृश्वा, विश्वदृश्वा, बहुदृश्वा, परलोकदृश्वा । सामान्यसूत्रेण क्वनिपि सिद्धे भूतकाले प्रत्ययान्तरबाधनार्थं वचनम् ॥१६६॥**

**श० म० न्यासानुसन्धानम्—दृश०** । "दृशं प्रेक्षणे" मेरुं दृष्टवानिति क्वनिपि कित्त्वाद् गुणाभावे—**मेरुदृश्वा**। एवं—विश्वं बहून् परलोकं च दृष्टवानिति—**विश्वदृश्वा, बहुदृश्वा, परलोकदृश्वा**। सूत्रवैयर्थ्यमाशङ्क्य समाधत्ते—**सामान्यसूत्रेण क्वनिपि सिद्धे भूतकाले प्रत्ययान्तरबाधनार्थं वचनमि**ति, अयमाशयः—"मन् वन् क्वनिप् विच् क्वचित्" [ ५. १. १४७, ] इति सामान्यसूत्रेण क्वनिपः सिद्धिरस्ति किन्तु क्वनिपा सह निर्दिष्टानां मनादीनामणश्च बाधनार्थं वचनम्, तथाहि—कर्मोपपदाद् दृशेर्भूतेऽर्थे यदि क्वनिप् विशिष्य न विहितः स्यात् तर्हि सामान्यसूत्रेण यथा क्वनिप् विधीयते तथा मनादयोऽपि विधीयेरन्नेव, एवं च तेऽपि स्युः। किञ्च-तेषां सामान्यतो विधानेन वाऽसरूपविधिबाधे सामर्थ्याभावेनासरूपा अणादयोऽपि पक्षे स्युरेवेति तद्बाधनार्थं किलास्य सूत्रस्यावश्यकत्वमिति भावः । तत्रायं विशेषः—सोपपदप्रत्ययस्यैवायं निवर्तको भवति नियमस्य सजातीयविषयकत्वात्, निरुपपदस्य तु निष्ठा [क्त-क्तवतु] प्रत्ययस्तु भविष्यत्येव, अत एव मेरुं दृष्टवानिति क्तवत्वन्तप्रयोगेण विग्रहप्रदर्शनम्। मध्येऽपवादन्यायेन वाऽयमर्थः साध्य इति ॥ ५. १. १६६. ॥

## सह-राजभ्यां कृग्-युधेः । ५. १. १६७. ॥

**त० प्र०—सहशब्दात् राजन्शब्दाच्च कर्मणः परात् करोतेर्युधेश्च वर्तमानात् क्वनिप् प्रत्ययो भवति। सह कृतवान्—सहकृत्वा, सहकृत्वानौ। सह युद्धवान्—सहयुध्वा, सहयुध्वानौ । राजानं कृतवान्—राजकृत्वा। राजानं योधितवान्—राजयुध्वा। युधिरन्तर्भूतण्यर्थः सकर्मकः । कर्मण इत्येव—राज्ञा युद्धवान् । प्रत्ययान्तरबाधनार्थोऽयमप्यारम्भः ॥१६७॥**

**श० म० न्यासानुसन्धानम्—सह०** । वचनभेदेन निर्देशादिह न यथासंख्यमित्याह—**सहशब्दात् राजन्शब्दाच्च कर्मणः परात् करोतेर्युधेश्चे**ति। क्वनिपि ककारः कित्कार्यगुणाभावार्थः, पकारः पित्कार्यतागमार्थः, इकार उच्चारणार्थः, 'वन्' इत्यवशिष्यते । "डुकृंग् करणे" "युधिंच् सम्प्रहारे" सह कृतवानिति क्वनिपि कित्त्वाद् गुणाभावे पित्त्वात् तागमे ङस्युक्तसमासे—**सहकृत्वा, सहकृत्वानौ** । सह युद्धवानिति—**सहयुध्वा, सहयुध्वानौ**। राजानं कृतवानिति—**राजकृत्वा** । राजानं योधितवानिति—**राजयुध्वा**। ननु युधेरकर्मकत्वेन तस्य कर्मणः परत्वमनुपपन्नमिति चेत्? अत्राह—**युधिरन्तर्भूतण्यर्थः सकर्मकः** इति। अयमाशयः—'सह' इत्यस्याव्ययत्वेन कर्मत्वमनुपपन्नमिति राजन्शब्देनैव सह कर्मण इत्यस्य सम्बन्धः, तत्र च राजानं योधितवानिति विग्रहप्रदर्शनम्, न प्रकृतेर्ण्यन्तत्वमूलकं, तस्य ण्यन्तत्वेऽत्र प्रकृतिग्रहणेन ग्रहणासम्भवात्, राजयुध्वेति तत्रेष्टस्य प्रयोगस्यासिद्ध्यापत्तेश्च, तथा च शुद्धादेव युधेः प्रत्ययः, तत्र ण्यर्थान्तर्भावस्य सत्त्वेन सकर्मकत्वस्य सूपपादत्वम्। कर्मणोऽनुवृत्तेर्व्यावर्त्यं दर्शयति—**कर्मण इत्येव—राज्ञा युद्धवानि**ति । क्वनिपोऽत्रापि सामान्यसूत्रेणैव सिद्धिमाशङ्क्याह—**प्रत्ययान्तरबाध-**

**नार्योऽयमारम्भः** इति—क्वनिपा सह पठितानां धाऽसरूपन्यायप्रापितानां च बाधनार्थमिदं सूत्रमिति भावः ॥ ५. १. १६७. ॥

## अनोर्जनेर्डः । ५. १. १६८. ॥

**त० प्र०—कर्मणः परादनुपूर्वाज्जनेर्भूतेऽर्थे वर्तमानाड्डः प्रत्यो भवति । पुमांसमनुजातः–पुमनुजः, स्त्र्यनुजः, आत्मानुजः । अनुपूर्वो जनिर्जननोपसर्जनायां प्राप्तौ वर्तमानः सकर्मकः ॥ १६८ ॥**

**श० म० न्यासानुसन्धानम्—अनो०** । "जनैचि प्रादुर्भावे" डप्रत्यये डकारोऽन्त्यस्वरादिलोपार्थः, अकारोऽवशिष्यते । पुमांसमनुजात इति डेऽन्त्यस्वरादिलोपे ङस्युक्तसमासे च—**पुमनुजः** इति—यस्याग्रजः पुमान् स एवमुच्यते, स्त्रियमनुजात इति—**स्त्र्यनुजः** इति—यस्याग्रजा स्त्री स एवमुच्यते । आत्मानमनुजात इति—**आत्मानुजः** इति—यः स्वयमेवाग्रजो न तु तस्मात् कश्चन पूर्वं जातः पुमान् स्त्री वा स एवमुच्यते । यद्यप्यात्मन एवात्मक्रियाकर्मत्वमनुपपन्नम्, नहि सुशिक्षितोऽपि नटबटुः स्वस्कन्धमधिरोढुमर्हति, तथाप्यग्रजाभाववत्त्वरूपार्थविवक्षयाऽऽत्मन एव काल्पनिकभेदमाश्रित्य तथा व्यवहार इति न कश्चन दोष इति विवेचनीयं सुधीभिः । ननु जनेरकर्मकत्वेन कथं पुंसः स्त्रिया आत्मनो वा कर्मत्वमित्याशङ्कायामाह—**अनुपूर्वो जनिर्जननोपसर्जनायां प्राप्तौ वर्तमानः सकर्मक** इति—जननं जन्धात्वर्थ उपसर्जनमङ्गभूतं यस्यां तादृश्यां प्राप्तावित्यर्थः, तेन पुमांसमनुरुध्य जननेन प्राप्तवानित्यर्थः पर्यवस्यति, तथा च धात्वर्थान्तर्हितायाः प्राप्तेः कर्मत्वं पुंस इति न काचिदनुपपत्तिरिति भावः, तादृशार्थत्वं च धातोरुपसर्गवशेन, तथा चोक्तमभियुक्तैः—

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारप्रतिहारवत्॥" इति ।

पाणिनीये च न प्राप्तिपर्यन्तं धात्वर्थानुधावनं किन्त्वनोरनुरोधने वृत्तिरित्यनुरोधनविशिष्टजननार्थत्वस्वीकारेण सकर्मकत्वं सुबोधमिति तत्त्वबोधिनीकृत् । वस्तुतस्तु—उपसर्गाणां द्योतकत्वेन धात्वर्थत्वमास्थेयम् ॥ ५. १. १६८. ॥

## सप्तम्याः । ५. १. १६९. ॥

**त० प्र०—सप्तम्यन्तान्नाम्नः परात् भूतेऽर्थे जनेर्डो भवति । उपसरे जातः–उपसरजः, मन्दुरायां मन्दुरे वा जातः–मन्दुरजः, अप्सु जातम्–अप्सुजम्, अब्जम् ॥ १६९ ॥**

**श० म० न्यासानुसन्धानम्—सप्त०**—अयोग्यतया कर्मण इति न सम्बध्यते, नहि सप्तम्यन्तस्य कर्मत्वं सम्भवति । पशूनां गर्भग्रहणकाल उपसरः, तत्र जात इति—**उपसरजः** । मन्दुरा—अश्वशाला, पुंस्त्रीलिङ्गः, तत्र जात इति—**मन्दुरजः** "ङ्यापो बहुलं नाम्नि" [ २. ४. ९९. ] इति ह्रस्वः । अप्सु जातमिति—**अप्सुजम्, अब्जम्** इति—"वर्षक्षर०" [ ३. २. २६. ] इति सप्तम्या वा अलुप् ॥ ५. १. १६९. ॥

## अजातेः पञ्चम्याः । ५. १. १७०. ॥

**त० प्र०—पञ्चम्यन्तादजातिवाचिनो नाम्नः परात् भूतेऽर्थे जनेर्डो भवति । बुद्धेर्जातो–बुद्धिजः संस्कारः, संस्कारजा स्मृतिः, संतोषजं सुखम्, कौशल्याया जातः–कौशल्याजः, संज्ञाशब्दोऽत्रोपपदम् । अजातेरिति किम् ? हस्तिनो जातः, अश्वाज्जातः ॥ १७० ॥**

**श० म० न्यासानुसन्धानम्—अजातेः** । बुद्धेर्जात इति—**बुद्धिजः संस्कारः** । संस्कारात् जाता इति—**संस्कारजा स्मृतिः** । संतोषात् जातमिति—**संतोषजं सुखम्** । कोशलस्यापात्यं स्त्रीति "दुनादि०" [ ६. १. ११८. ] इति ञ्ये—कौशल्या, कौशल्याया जात इति **कौशल्याजः**, ननु "गोत्रं च चरणैः सह" इति जातित्वात् कथमत्र ड इति चेत् ? अत्राह—**संज्ञाशब्दोऽत्रोपपदमिति**, कौशल्याशब्दस्य कोशालाभिधनृपगोत्रप्रवृत्तिनिमित्तत्वमाश्रित्यात्र जातिशब्दत्वमिति शङ्काशयः, कौशल्याशब्दस्य न जातिप्रवृत्तिनिमित्तत्वमपि तु तद्व्यक्तित्वरूपधर्ममाश्रित्य प्रवृत्तिरिति जातित्वाभावान्न तस्य पर्युदास इति समाधानाशयः । पदकृत्यं पृच्छति—**अजातेरिति किमिति**, उत्तरयति—**हस्तिनो जातः, अश्वाज्जातः** इति—हस्त्यादिशब्दानां तत्तज्जातिप्रवृत्ति-

निमित्तत्वमिति नात्र प्रत्ययोऽपि तु वाक्यमेव तिष्ठतीति भावः । हस्त्यादीनामाकृतिग्राह्यत्वेन "आकृतिग्रहणा जातिः" इति वचनाज्जातित्वमवसेयमिति ॥ ५. १. १७०. ॥

## **क्वचित्** । ५. १. १७१. ॥

**त० प्र०—उक्तादन्यत्रापि क्वचिल्लक्ष्यानुसारेण डो भवति । उक्तान्नाम्नोऽन्यतोऽपि–किं जातेन–किंजः, केन जातः–किंजोऽनिर्ज्ञातपितृकः, अलं जातेनालंजः, द्विर्जातो द्विजः, न जातोऽजः, अधिजातोऽधिजः, उपजः, परिजः, प्रजाताः–प्रजाः, अभिजः । अकर्मणोऽपि–अनुजः । जातेरपि–ब्राह्मणजः पशुवधः, क्षत्रियजं युद्धम् स्त्रीजमनृतम् । उक्ताद्धातोरन्यतोऽपि–ब्रह्मणि जीनवान्–ब्रह्मज्यः । उक्तान्नाम्नो धातोश्चान्यतोऽपि–वरमाहतवान्–वराहः । उक्तान्नाम्नो धातोः कारकाच्चान्यतोऽपि–परिखाता–परिखा, आखाता–आखा, उपखाता–उपखा । नाम-धातु-कालान्यत्वे–मित्रं ह्वयति–मित्रह्वः, अणोऽपवादो डः । धातु–कारकान्यत्वे–पटे हन्यते स्म–पटहः । धातुकालान्यत्वे–वार्चरति–वार्चो हंसः । नाम-कारकान्यत्वे–पुंसानुजातः–पुंसानुजः । नामाभावे उक्तधातु-कालान्यत्वे–अटति अतति वा–अः, कायति कामयते वा–कः, भातीति–भं नक्षत्रम् । नामाभावे उक्तधातु-काल-कारकान्यत्वे च–खन्यत इति–खम् ॥ १७१ ॥**

**श० म० न्यासानुसन्धानम्—क्वचित् । उक्तादन्यत्रापीति**—यान्युपपदानि यश्च धातुः पूर्वसूत्रेषु निर्दिष्टस्तेभ्योऽन्येष्वप्युपपदेषु सत्सु, अन्यस्मादपि धातोरयं प्रत्ययो भवतीत्यर्थः । उपपदव्यभिचारमाह—**उक्तान्नाम्नोऽन्यतोऽपीति** । किं जातेनेति डे–**किंजः** इति—अत्र किं प्रयोजनाभावार्थकः, तस्य जननं व्यर्थमित्यर्थः, न केवलमुपपदस्यैव व्यभिचारोऽपि तूपपदविभक्तेरपीति प्रथमान्तस्योपपदत्वं दर्शितम् । तृतीयान्तेन विगृह्योदाहरति–**केन जातः—किंजः**, तदर्थमाह—**अनिर्ज्ञातपितृकः** इति । अलं जातेनेति–**अलंजः** इति–तस्य जनिरेव मा भूदित्यर्थः । द्विर्जात इति—**द्विजः** इति—यद्यपि सकृदुत्पन्नस्य पुनरुत्पत्तिरयुक्ता, तथापि "दन्तविप्राण्डजा-द्विजाः" इति कोशस्वारस्येनैषां द्विजातित्वं स्वीक्रियते, दन्तास्तावद् बालावस्थायामुत्पद्य गलिताः पुनरुत्पद्यन्ते । विप्रोऽपि "मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धनम्" इति स्मृतेर्द्विजः । अण्डजाः पक्षिणोऽपि अण्डरूपेण मातुरुद्भूता अण्डोद्भेदात् पुनरुत्पद्यन्त इति तेषामपि द्विजत्वमिति । न जात इति—**अजः** । अधिजातः इति—**अधिजः** । उपजात इति—**उपजः** । परिजातः इति—**परिजः** । प्रजाता इति—**प्रजाः** । अभिजात इति—**अभिजः** । कर्मणो व्यभिचारमाह—**अकर्मणोऽपीति**, अनुजातः—**अनुजः** इति । अजातिव्यभिचारमाह—**जातेरपीति**, ब्राह्मणात् जात इति—**ब्राह्मणजः पशुवधः** । क्षत्रियात् जातं—**क्षत्रियजं युद्धम्** । स्त्रिया जातं—**स्त्रीजमनृतम्** । उपपदव्यभिचारं प्रपञ्च्य प्रकृतिव्यभिचारमाह—**उक्ताद् धातोरन्यतोऽपीति**, "ज्यांश् हानौ" वयोहानावित्येके, ब्रह्मणि जीनवानिति–**ब्रह्मज्यः** इति—अत्रोपपदस्य सत्त्वेऽपि धातोरन्यत्वमिति भावः । उपपद-धातूभयव्यभिचारमाह—**उक्तान्नाम्नो धातोश्चान्यतोऽपीति**, "हनंक् हिंसा-गत्योः" वरमाहतवानिति–**वराहः** । उपपद-धातु-कारकव्यभिचारमाह—**उक्तान्नाम्नो धातोः कारकाच्चान्यतोऽपीति**, "खनूग् अवदारणे" परिखाता—**परिखा**, आखाता—**आखा**, उपखाता—**उपखा** । उपपद-धातु-कालव्यभिचारमाह—**नाम-धातु-कालान्यत्वे** इति, "ह्वेंग् स्पर्धा-शब्दयोः" मित्रं ह्वयतीति— **मित्रह्वः, अणोऽपवादो डः** इति—"कर्मणोऽण्" [ ५. १. ७२. ] इत्यणोऽपवादभूतो डप्रत्ययोऽनेनात्र विधीयत इत्यर्थः । धातु-कारकव्यभिचारमाह—**धातु-कारकान्यत्वे** इति, पटे हन्यते स्मेति—**पटहः** । धातु-कालव्यभिचारमाह-**धातु-कालान्यत्वे** इति, वार् जलम्, "चर भक्षणे च" चकाराद् गतौ, वार्चरतीति -**वार्चो हंसः** इति—"वाऽह्-पत्यादयः" [ १. ३. ५८. ] इति निषेधात् "चटते सद्वितीये" [ १. ३. ७. ] इति रेफस्य शो न भवति । उपपद-कारकव्यभिचारमाह—**नामकारकान्यत्वे** इति पुंसाऽनुजात इति—**पुंसाऽनुजः** इति । धातु-कालव्यभिचारमाह—**उक्तधातु-कालान्यत्वे** इति, "अट गतौ" "अत सातत्यगमने" अटति अतति वा— **अः** । "कै शब्दे" "कमूङ् कान्तौ" कान्तिरिच्छा, कायति कामयते वा— **कः** । "भांक् दीप्तौ" भातीति- **भं**

**नक्षत्रम्** । धातु-काल-कारकव्यभिचारमाह—**उक्त-धातु-काल-कारकान्यत्वे चेति**, खन्यत इति-**खमिति**। एतच्च "अन्येष्वपि दृश्यते" [ ३. २. १०१. ] इति सूत्रे "अन्येभ्योऽपि दृश्यते इति वक्तव्यमिति वदता भाष्यकृताऽपि सूचितम्। व्याख्यातं च टीकाकारैः—इहापि-शब्दस्य सर्वोपाधिव्यभिचारार्थत्वमिति प्रकरणान्तरेऽपि गमादिभ्यो डविधानाय कृतं सामान्यवचनं नावश्यकमिति ॥ ५. १. १७१. ॥

## सु-यजो ङ्वनिप् । ५. १. १७२. ॥

**त० प्र०—सुनोतेर्यजतेश्च भूतार्थवृत्तेर्ङ्वनिप् भवति। सुतवान्–सुत्वा, सुत्वानौ, सुत्वानः। इष्टवान्–यज्वा, यज्वानौ, यज्वानः। क्वनिप्-वनूभ्यां सिद्धे भूते नियमार्थं वचनम्। मन्त्रादिसूत्रस्थक्वचिद्ग्रहणस्यैव प्रपञ्चः। ङकारो गुणनिषेधार्थः। पकारः पित्कार्यार्थः। इकार उच्चारणार्थः ॥ १७२ ॥**

**श० म० न्यासानुसन्धानम्—सु-य०** "षुंगट् अभिषवे" अभिषवः क्लेदनं सन्धानाख्यं मन्थनपीडने वा, "यजीं देवपूजासंगतिकरणदानेषु" ङ्वनिपि 'वन्' अवशिष्यते, शेषा अनुबन्धाः, तत्फलमग्रे वक्ष्यते। सुतवानिति ङ्वनिपि ङित्त्वाद् गुणाभावे पित्त्वात् तागमे 'सुत्वन्' शब्दः, तस्य प्रथमायां—**सुत्वा, सुत्वानौ, सुत्वानः** इति। एवम्—इष्टवानिति—**यज्वा, यज्वानौ, यज्वानः**। "मन् वन् क्वनिप् विच् क्वचित्" [ ५. १. १४७. ] इति सामान्यसूत्रविहिताभ्यां क्वनिप्-वनूभ्यां सिद्धिमाशङ्क्य सूत्रस्य नियमार्थत्वमाह—**क्वनिप्–वनूभ्यां सिद्धे भूते नियमार्थं वचनमिति**। वस्तुतस्तु क्वनिपि कृते यज्वेत्यादौ ग्वृत् स्यादिति तन्निवृत्त्यर्थं ङ्वनिप् कृतः, वना यज्वेत्यादेः सिद्धावपि क्वनिपो वारणार्थं भूते एवेति नियमार्थं चावश्यकमेवेदम्। ननु "मन् वन् क्वनिप् विच् क्वचित्" इति सूत्रस्थेन 'क्वचित्' इत्यनेनैव लक्ष्यानुसारिव्यवस्थोपपत्तौ पुनरपि सूत्रस्य वैयर्थ्यमेवेत्याशङ्क्य समाधत्ते—**मन्त्रादिसूत्रस्थक्वचिद्ग्रहणस्यैव प्रपञ्चः** इति। अनुबन्धानां सार्थक्यमुपपादयति—**ङकारो गुणनिषेधार्थः** इति—"नामिनो गुणोऽक्ङिति" [ ४. ३. १. ] इति सूत्रेणान्तस्य "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इति सूत्रेण चोपान्त्यस्य गुणनिषेधार्थ इत्यर्थः। **पकारः पित्कार्यार्थः** इति—"ह्रस्वस्य तः पित्कृति" [ ४. ४. ११३. ] इत्यनेन पित्कार्यतागमार्थ इत्यर्थः। **इकार उच्चारणार्थः** इति—स्वरं विना व्यञ्जनसमुदायस्योच्चारयितुमशक्यत्वादिति भावः ॥ ५. १. १७२. ]

## जृषोऽतृः । ५. १. १७३. ॥

**त० प्र०—जीर्यतेर्भूतार्थवृत्तेरतृप्रत्ययो भवति। जीर्यति स्म—जरन्, जरती। असरूपत्वात्—जीर्णः, जीर्णवान्। ऋकारो दीर्घत्वप्रतिषेधार्थः ॥ १७३ ॥**

**श० म० न्यासानुसन्धानम्—जॄ०**। "जॄषच् जरसि" अतृप्रत्यये ऋकारोऽनुबन्धः। जीर्यति स्मेति अतृप्रत्यये गुणे 'जरत्' इति, ततः सौ ऋदित्त्वात् "ऋदुदितः" [ १. ४. ७०. ] इति तकारात् प्राग् नागमे संयोगान्तलक्षणे तलोपे—**जरन्**, एवमृदित्त्वात् स्त्रियाम् "अधातूदृदितः" [ २.४.२. ] इति ङ्यां—**जरती**। **असरूपत्वात्—जीर्णः, जीर्णवानिति**—यद्यप्ययमेवापवादो विशेषविहितत्वात् तथाप्यसरूपत्वेन विकल्पेनापवादत्वं स्यादिति पक्षे क्त-क्तवतुप्रत्यययोः प्रवृत्तिर्निराबाधैव। जीर्यति स्मेत्यकर्मकत्वात् कर्तरि क्ते "ऋल्वा०" [ ४. २. ६८. ] इति तस्य नादेशे "ॠतां०" [ ४. ४. ११६. ] इति इरादेशे "भ्वादे०" [ २. १. ६३. ] इति दीर्घे "रषृवर्णात्०" [ २. ३. ६३. ] इति नस्य णत्वे—जीर्णः। एवं जीर्यति स्मेति क्तवतौ—जीर्णवानिति। ननु प्रत्यये उकार एवानुबध्यतां तावताऽपि 'जरन्, जरती' इत्यादि सेत्स्यतीति चेत्? अत्राह—**ऋकारो दीर्घत्वप्रतिषेधार्थः** इति, अयमाशयः—उकारानुबन्धे कृते "अभ्वादेरत्वसः सौ" [ १. ४. ९०. ] इति दीर्घः स्यात्, यथा भवतुशब्दस्य भवानिति, तद्वारणार्थमृकारोऽनुबध्यते, ऋकारानुबन्धे च दीर्घस्य प्राप्तिरेव नेति ॥ ५. १. १७३. ॥

## क्त-क्तवतू । ५. १. १७४. ॥

**त० प्र०—धातोर्भूतेऽर्थे वर्तमानात् क्त–क्तवतू प्रत्ययौ भवतः। क्रियते स्म—कृतः, करोति स्म—कृतवान्। प्रकृतः कटं देवदत्तः, अत्र समुदायस्याभूतत्वेऽपि कटैकदेशे कटत्वोपचारात् तस्य च निर्वृत्तत्वाद् भूत**

**एव धात्वर्थं इत्यादिकर्मण्यप्यनेनैव क्त-क्तवतू सिद्धौ ॥१७४॥**

**इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ पञ्चमस्याध्यायस्य प्रथमः पादः ॥१॥**

**अगणितपञ्चेषुबलः पुरुषोत्तमचित्तविस्मयं जनयन् ।**
**रामोल्लासनमूर्तिः श्रीकर्णः कर्ण इव जयति ॥१७॥**

**श० म० न्यासानुसन्धानम्—क्त०** । "डुकृंग् करणे" अनुस्वारेत्त्वादनिट्, क्रियते स्मेति क्ते—**कृतः**, "तत् साप्या-ऽनाप्यात् कर्म-भावे कृत्य-क्त-खलर्थाश्च" [ ३. ३. २१. ] इति कर्मणि क्तः । करोति स्मेति क्तवतौ—**कृतवान्**, "कर्तरि" [ ५. १. ३. ] इति कर्तरि क्तवतुः । कटं कर्तुमारब्धवान् देवदत्त इति—**प्रकृतः कटं देवदत्तः** इति—अत्र "आरम्भे" [ ५. १. १०. ] इति आरम्भार्थे भूते कर्तरि क्तः, कटमित्यत्र "क्तयोरसदाधारे" [ २. २. ९१. ] इति षष्ठीनिषेधात् "कर्मणि" [२. २. ४०.] इति द्वितीया । नन्वेवं क्रियाया अनिष्पन्नत्वाद् वर्तमानत्वेन कथं भूतार्थे क्तप्रत्यय इति चेत् ? अत्राह—**अत्र समुदायस्याभूतत्वेऽपि कटैकदेशे कटत्वोपचारात् तस्य च निर्वृत्तत्वाद् भूत एव धात्वर्थे इत्यादिकर्मण्यप्यनेनैव क्त-क्तवतू सिद्धाविति**, अयमाशयः—यथा पटैकदेशे दग्धेऽपि पटो दग्ध इति व्यवहारो भवति, यथा वा ग्रामैकदेशे गते ग्रामो गत इति व्यवहारो भवति, तथा कटैकदेशेऽपि कटत्वव्यवहारो न विरुद्ध इति कटकरणाद्यक्षणेऽपि कस्यचन कटावयवस्य सम्पन्नतया, तदनुगुणाया अनेकावयवपरम्परारूपायाः क्रियायाश्चावयवानां केषांचिदतीततया च तत्रभूतत्वव्यवहारो न विरुद्ध इति क्रियाद्यक्षणेऽपि वक्तव्येऽमू प्रत्ययावनेनैव भविष्यत इति न तदर्थं वचनान्तरकरणम् ।

'आदिकर्मणि निष्ठा वक्तव्या' इति "निष्ठा" [३. २. १०२. ] सूत्रस्थवार्तिकव्याख्यानावसरे भाष्यकृताऽयमर्थ आश्रितः । खण्डितं च वार्तिकम् । तथाहि—"आदिकर्मणि निष्ठा । आदिकर्मणि निष्ठा वक्तव्या । प्रकृतः कटं देवदत्त इति । किं पुनः कारणं न सिध्यति । यद्वा भवन्त्यर्थे । यद्वा भवन्त्या अर्थे भाष्यते । प्रकृतः कटं देवदत्तः । प्रकरोति कटं देवदत्त इति । न्याय्या त्वाद्यपवर्गात् । न्याय्या त्वेषा भूतकालता । कुतः । आद्यपवर्गात् । आदिरत्रापवृक्तः । एष च नाम न्याय्यो भूतकालो यत्र किञ्चिदपवृक्तं दृश्यते । वा चाद्यतन्याम् । वा चाद्यतन्यां भाष्यते । प्रकृतः कटं देवदत्तः । प्राकार्षीत् कटं देवदत्त इति । किं शक्यन्त एते शब्दाः प्रयोक्तुमित्यतो न्याय्या भूतकालता । नावश्यं प्रयोगादेव । क्रिया नामेयमत्यन्तापरदृष्टाऽनुमानगम्याऽशक्या पिण्डीभूता निदर्शयितुम् । यथा गर्भो निर्लुण्ठित इति । याऽसौ येन येन शब्देनाभिसम्बध्यते तावति तावति परिसमाप्यते । तद्यथा कश्चित् पाटलिपुत्रं जिगमिषुरेकमहर्गत्वाऽऽह—इदमद्य गतमिति । न च तावताऽस्य व्रजिक्रिया परिसमाप्ता भवति । यत् तु गतं तदभिसमीक्ष्यैतत् प्रयुज्यते—इदमद्य गतमिति । एवमिहापि यत् कृतं तदभिसमीक्ष्यैतत् प्रयुज्यते—प्रकृतः कटं देवदत्त इति । यदा हि वेणिकान्तः कटोऽभिसमीक्षितो भवति, प्रकरोति कटमित्येव तदा भवति" इति ।

अयमाशयः—प्रकृतः कटं देवदत्त इत्यादावाद्येषु क्षणेषु भूतेषु सर्वस्याः क्रियाया भूतत्वाभावान्निष्ठा [ क्त-क्तवतू ] न प्राप्नोति । एकफलोद्देश्यप्रवृत्तसमूहरूपा हि क्रिया, तत्र सम्पूर्णसमूहस्य व्यपवृक्तत्वे [अतीतत्वे] भूतत्वव्यवहारो युक्तः स्यात् । किञ्च प्रकृतः कटं देवदत्त इत्यर्थे पक्षे प्रकरोति कटं देवदत्त इत्यपि युज्यते । यथा च तत्र वर्तमानत्वं स्पष्टमिति भूतकालत्वाभावादवश्यं वार्तिकेन निष्ठा विधेयेति पूर्वपक्षे प्राप्ते समाधीयते—नावश्यं वर्तमानकाल एव प्रयोगो भवति, किन्तु प्रकरोति कटं देवदत्त इत्यस्यार्थे पक्षे प्राकार्षीत् कटं देवदत्त इत्यपि प्रयुज्यत एव । एवं च भूतकालत्वं तत्र मन्तव्यम् । तथा च कथं भूतकालत्वमित्याशङ्कायामुत्तरम्—क्रियाया आद्यावयवस्यातीतत्वेन भूतत्वोपचार इति । तथा चोक्तं हरिणा—

"समूहः स तथाभूतः प्रतिभेदं समूहिषु ।
समाप्यते ततोऽभेदे कालभेदस्य सम्भवः ॥" इति ।

पूर्वापरीभूतानामवयवानां स समूहः [ क्रियापदव्यपदेश्यः ] समूहिषु अवयवेषु, प्रतिभेदं प्रत्यवयवं समाप्यते, तत्रावयवस्य समूहाभेदाद् वर्तमानकालेऽपि भूतत्वरूपकालभेदस्य सम्भव इति तदर्थः । एकदा सर्वस्याः क्रियाया

आरम्भ-समाप्त्योर्लक्षयितुमशक्यत्वेन यावानवयवः परिसमाप्यते तदंशे भूतत्वोपचारः क्रियते, यावांश्चासमाप्तस्तत्र वर्तमानत्वव्यवहार इति । एवमिहापि यावान् कटः सम्पन्नस्तमभिसमीक्ष्य भूतत्वव्यवहारः, वेणिकान्तस्य कटस्य कटत्वेन विवक्षायां वर्तमानत्वव्यवहार इति पूर्वोक्तसर्वप्रयोगोपपत्तिरिति वार्तिकं विनाऽपि पाणिनीयसूत्रेणैवादिकर्मण्यपि क्त-क्तवतू स्यातामेवेति नावश्यकं वार्तिकम् । तत्रैतावान् विशेषः—यौ क्त-क्तवतू साधारणतो भूतेऽर्थे विहितौ तयोः क्तो भाव-कर्मणोर्विहितः, क्तवतुश्च कृत्त्वात् कर्तरि । आदिकर्मणि विहितश्च क्तः कर्तर्येव, तदर्थं च पाणिनीयेऽपि "आदिकर्मणि क्तः कर्तरि" [ ३. ४. ७१. ] इति सूत्रमारभ्यते । एतच्च स्वमतेऽपि समानमेवेति शम् ॥ ५. १. १७४. ॥

इति श्रीकलिकालसर्वज्ञ—**श्रीहेमचन्द्रसूरि**भगवद्विरचिते
स्वोपज्ञतत्त्वप्रकाशिकाप्रकाशे **शब्दमहार्णवन्यासे**
त्रुटितस्थले तपोगच्छाधिपति–सूरिसम्राट्—
**श्रीविजयनेमि**सूरीश्वरपट्टालङ्कार—कवि-
रत्न–शास्त्रविशारद–व्याकरणवाचस्प-
ति—**श्रीविजयलावण्यसूरि**निर्मि-
तानुसन्धानेन पूर्णतां नीते पञ्च-
माध्यायस्य प्रथमः पादः
समाप्तः ॥

**अनुसन्धायकस्य व्याख्या—**

**अगणितपञ्चेषुबलः** अगणितं तुच्छतयाऽवगणितम्, पञ्चेषोः—कामस्य, बलं येन तथाभूतः । **पुरुषोत्तमचित्तविस्मयं** पुरुषोत्तमानां—पुरुषश्रेष्ठानामपि, चित्तस्य विस्मयम्—आश्चर्यम्, **जनयन्** समुत्पादयन्, **रामोल्लासनमूर्तिः** रामाणां—स्त्रीणाम्, उल्लासनी—प्रहर्षणी, मूर्तिः स्वरूपं यस्य तादृशः । **श्रीकर्णः** कर्णनामको राजा, **कर्ण इव** राधासंवर्धितः कौन्तेय इव, **जयति** सर्वोत्कर्षेण वर्तते । कौन्तेयः कर्णोऽपि—**अगणितपञ्चेषुबलः** न गणितं पञ्चानां—पाण्डवानां युधिष्ठिरादीनाम्, इषुबलं—बाणसामर्थ्यं येन तथाभूतः, अथवा अगणितः पञ्चेषोः प्रद्युम्नस्य बलं येन तथाभूतः, किञ्च पुरुषोत्तमस्य—श्रीकृष्णस्य चित्तविस्मयं—स्वपराक्रमेण चेतस आश्चर्यं, **जनयन्** उत्पादयन्, **रामोल्लासनमूर्तिः** रामस्य—परशुरामस्य, उल्लासनी—संतोषिणी, मूर्तिर्यस्य तथाभूतः, एकदा ब्राह्मणवेषेण परशुरामात् शस्त्रविद्याशिक्षां गृह्णन् कर्णः स्वजङ्घाया उपरि कदाचित् शिर आधाय सुप्तं तं तोषयामासेति प्रसिद्धिः । तथा चोभयोः सादृश्यमित्युपमानोपमेयभावः स्पष्टः । एवं च श्लेषमूलक उपमालङ्कारः ॥१७॥

। अर्हम् ।

# अथ पञ्चमाध्याये द्वितीयपादः

**श्रु-सद-वस्भ्यः परोक्षा वा । ५. २. १. ॥**

**त० प्र०—भूत इति अनुवर्तते । शृणोत्यादिभ्यो धातुभ्यो भूतार्थवृत्तिभ्यः परोक्षा विभक्तिर्वा भवति । उपशुश्राव, उपससाद, अनूवास । वावचनात् यथास्वकालमद्यतनी ह्यस्तनी च—उपाश्रौषीद्, उपाशृणोद्; उपासदत्, उपासीदत्; अन्ववात्सीत्, अन्ववसत् । एवं—शुश्रुवे, अश्रावि, अश्रूयतेत्यादि । अन्ये तु श्रवादिभ्यो भूतमात्रे क्वसुमेवेच्छन्ति न परोक्षाम् । ह्यस्तनीमपीच्छत्यन्यः । बहुवचनं व्याप्त्यर्थम्, तेन भूतानद्यतनेऽपीयं ह्यस्तन्या न बाध्यते । असरूपत्वादेवाद्यतन्यादिसिद्धौ वावचनं विभक्तिष्वसरूपोत्सर्गविभक्तिसमावेशनिषेधार्थम् ॥१॥**

**श० म० न्यासानुसन्धानम्—श्रु० । भूतार्थवृत्तिभ्यः** इति—भूतार्थमात्रे परोक्षा भवति, तत्र न परोक्षत्वविवक्षाया आवश्यकतेति भावः । "श्रुट् श्रवणे" अस्य "क्रियार्थो धातुः" [ ३. ३. ३. ] इति धातुसंज्ञा, तिवादीनां "त्यादिर्विभक्तिः" [ १. १. १९. ] इति विभक्तिसंज्ञा, णवादीनां "परोक्षा णव् अतुस् उस्०" [ ३. ३. १२. ] इति च परोक्षासंज्ञा, णवि णकारो वृद्ध्यर्थः, वकारः "आतो णव औः" [ ४. २. १२०. ] इत्यत्र विशेषणार्थः, न च तत्रापि वकारमपहायैव निर्देशो विधेय इति वाच्यम्, एवं सति "णिद् वाऽन्त्यो णव्" [ ४. ३. ५८. ] इत्यत्रापि तथैव निर्देशेऽन्त्यस्य णस्य

[ णवः ] णित्त्वाभावपक्षे "इन्ध्यसंयोगात्०" [ ४. ३. २१. ] इति कित्त्वे सति गुणाभावे 'शुश्रुव' इति न सिध्येदिति । श्रुधातोः परोक्षाणवि "द्विर्धातुः परोक्षा-ङे०" [ ४. १. १. ] इति द्वित्वे सति 'श्रुश्रु' इति, ततो "व्यञ्जनस्यानादेर्लुक्" [ ४. १. ४४. ] इति पूर्वस्यानादिव्यञ्जनलोपे 'शुश्रु' इति, ततो "नामिनोऽकलि-हलेः" [ ४. ३. ५१. ] इति वृद्धौ 'शुश्रौ' इति, 'ओदौतोऽवाव्" [ १. २. २४. ] इत्यावादेशे उपेन योगे—**उपशुश्राव** । "षद्लृं विशरणगत्यवसादनेषु" विशरणं शटनम्, अवसादोऽनुत्साहः, अतो णवि द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे "ञ्णिति" [ ४. ३. ५०. ] इत्युपान्त्यवृद्धौ—**उपससाद** । "वसं निवासे" अतो णवि द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे सस्वरस्य वकारस्य च "यजादिवशवचः०" [ ४. १. ७२. ] इति य्वृति–उकारे उपान्त्यवृद्धौ अनुना योगे समानदीर्घे च—**अनूवास** । विकल्पविधानस्य फलमाह—**वावचनादिति, यथास्वकालमिति**—स्वकालमनतिक्रम्येति यथास्वकालम्, स्वस्य यः कालस्तदनुसारेणेत्यर्थः, अयमाशयः—अद्यतनभूतकाले "अद्यतनी" [ ५. २. ४. ] इत्यद्यतनी विभक्तिः, अनद्यतनभूतकाले च "अनद्यतने ह्यस्तनी" [ ५. २. ७. ] इति ह्यस्तनी विभक्तिश्च भवति । तदुदाहरणान्याह—**उपाश्रौषीदि**त्यादिना । श्रुधातोरद्यतन्या दिप्रत्यये "सिजद्यतन्याम्" [ ३. ४. ५३. ] इति सिचि "सः सिजस्तेर्दि-स्योः" [ ४. ३. ५. ] इति ईति "सिचि परस्मै०" [ ४. ३. ३५. ] इति वृद्धौ "अड् धातोरादिः०" [ ४. ४ २९. ] इत्यडागमे "नाम्यन्तस्था०" [ २. ३. १५. ] इति सस्य षत्वे—**उपाश्रौषीत्** । ह्यस्तन्या दिवि तु "श्रौति०" [ ४. २. १०८. ] इति 'शृ' इत्यादेशे "स्वादेः श्नुः" [ ३. ४. ७५. ] इति श्नुविकरणे "श्रू-श्नोः" [ २. १. ५३. ] इति गुणेऽडागमे च—**उपाशृणोत्** । 'सद्'धातोरद्यतनीदौ लृदित्त्वात् "लृदिद्-द्युतादि०" [ ३. ४. ६४. ] इत्यङि अडागमे च—**उपासदत्** । ह्यस्तन्या दिवि तु "श्रौति०" [ ४. २. १०८. ] इति सीदादेशे शवि अडागमे च—**उपासीदत्** । 'वस्'धातोरद्यतनीदौ सिचि "सस्तः सि" [ ४. ३. ९२. ] इति धातुसकारस्य तकारे "व्यञ्जनानामनिटि" [ ४. ३. ४५. ] इत्युपान्त्यवृद्धावडागमे च—**अन्ववात्सीत्** । ह्यस्तनीदिवि तु शवि अडागमे च—**अन्ववसदि**ति । भावकर्मणोस्तु "तत् साप्यानाप्यात् कर्म-भावे०" [ ३. ३. २१. ] इत्यात्मनेपदे परोक्षाया एप्रत्यये द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे "धातोरिवर्णोवर्णस्य०" [ २. १. ५०. ] इत्युवादेशे च—**शुश्रुवे** । अद्यतन्यां तप्रत्यये "भावकर्मणोः" [ ३. ४. ६८. ] इति ञिचि तलोपे वृद्धावडागमे च—**अश्रावि** । ह्यस्तन्यां तप्रत्यये "क्यः शिति" [३. ४. ७०.] इति क्ये "दीर्घश्च्वि" [४. ३. १०८.] इति दीर्घेऽडागमे च—**अश्रूयते**त्यादि । अत्र पाणिनीयमतमाह—**अन्ये तु श्रुवादिभ्यो भूतमात्रे क्वसुमेवेच्छन्ति न परोक्षामि**ति, अयमाशयः—पाणिनीये "भाषायां सद-वस-श्रुवः" [ ३. २. १०८. ] इति सूत्रेण विकल्पेन भूतसामान्ये लिट् [ परोक्षा ] विधीयते, तस्य च नित्यं क्वसुरादेशो विधीयते । तथा च भूतसामान्यार्थे क्वसुरेवेति फलितम्, न च तत्र सर्वथा परोक्षाया अभाव एव, पक्षे परोक्षात्वेन विवक्षायां तस्याः श्रवणस्य न्यायप्राप्तत्वात्, अग्रिमसूत्रेण हि क्वसुरेतत्सूत्रविहितपरोक्षाया एव स्थाने इति तेषां मतम् । पुनर्मतान्तरमाह—**ह्यस्तनीमपीच्छत्यन्यः** इति, अयमाशयः—भूतसामान्ये विहिता परोक्षा भूतसामान्यार्थकमेव प्रत्ययं स्वमतेऽद्यतनीं पाणिनीयमते लुङं बाधिष्यते, न त्वनद्यतनभूतार्थकां ह्यस्तनीमिति तस्या श्रवणं भविष्यत्येव । स्वमते परोक्षाया ह्यस्तन्या बाधाभावं साधयति—**बहुवचनं व्याप्त्यर्थमि**ति—अधिकविषयेऽपि प्राप्तिर्व्याप्तिः, स्वाभाविको यः स्वविषयस्तदतिरिक्तविषयेऽपि या प्राप्तिः सा व्याप्तिस्तदर्थमित्यर्थः, तदेव फलमुखेनाह—**तेन भूतानद्यतनेऽपीयं ह्यस्तन्या न बाध्यते** इति, अयमाशयः—सामान्यभूतकाले परोक्षाविधायकं सूत्रं सामान्यम्, अनद्यतनरूपविशेषेण भूतकाले ह्यस्तनीविधायकं सूत्रं विशेषः, "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्" इति ह्यस्तनीसूत्रस्य बलवत्त्वान्नित्यया ह्यस्तन्या परोक्षाया बाधः, तथा चानद्यतनभूतकालो यः परोक्षाया अविषयस्तत्रापि व्याप्तिबलेन वा परोक्षा भवतीत्यर्थः । नवीनदृष्ट्या तु व्याप्तिरिह भूतत्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमेव, तथा च भूतत्वसमानाधिकरणोऽर्थो ह्यस्तन्यर्थस्तत्र यदि परोक्षाया अत्यन्ताभावः स्यात्

तर्हि तत्प्रतियोगित्वमेव स्यादिति व्याप्तिर्न स्यादिति ताद्विषयेऽपि परोक्षेयं भविष्यत्येवेति । ननु *असरूप उत्सर्गोऽपवादे वा प्रवर्तते, प्राक् तेः* इति न्यायेनोत्सर्गभूताद्यतनी अपवादभूतपरोक्षाया विषये वा भविष्यति, एवम्-अपवादभूतह्यस्तन्या विषये उत्सर्गभूता परोक्षा वा भविष्यतीति वावचनफलमुक्तनियमेनैव सिद्धमिति वाचनं विफलमित्याशङ्क्य समाधत्ते-**असरूपत्वादेवाद्यतन्यादिसिद्धौ वावचनं विभक्तिष्वसरूपोत्सर्गविभक्तिसमावेशनिषेधार्थमिति**, तथा च विभक्तित्वेन ख्यातासु परोक्षादिषु परस्परं वैकल्पिकबाध्यबाधकभावाभावेन न परोक्षाविषयेऽन्यत्राद्यतनी तस्या वा विषयेऽन्येत्यादिव्यवस्था सिध्यति । तेन च "अयदि स्मृत्यर्थे भविष्यन्ती" [ ५. २. ९. ] इति भूतानद्यतने विधीयमानाया भविष्यन्त्या विषये ह्यस्तनी न भवतीति 'स्मरसि साधो ! स्वर्गे स्थास्यामः' इति भविष्यन्त्येव भवति, न तु ह्यस्तनीति ॥ ५. २. १. ॥

## तत्र क्वसु-कानौ तद्वत् । ५. २. २. ॥

**त० प्र०—तत्र-परोक्षामात्रविषये धातोः परौ क्वसु-कानौ प्रत्ययौ भवतः, तौ च परोक्षावद् व्यपदिश्येते । तत्र क्वसुः परस्मैपदत्वात् कर्तरि, कानस्त्वात्मनेपदत्वाद् भाव-कर्मणोरपि । शुश्रुवान्, उपशुश्रुवान्; सेदिवान्, उपसेदिवान्, प्रसेदिवान् आसेदिवान्, निषेदिवान्; ऊषिवान्, अनूषिवान्, अध्यूषिवान्; पेचिवान्, पाचयांचकृवान्, जग्मिवान्, पपिवान्, पेचानः, चक्राणः । परोक्षावद्भावात् द्विर्वचनादि । परोक्षावद्भावादेव कित्त्वे सिद्धे कित्करणं संयोगान्तधात्वर्थम्, तेनाजिवान्, बभज्वान्, सस्वजानः, एषु कित्त्वात् नलोपः । ऋदन्तानां गुणप्रतिषेधार्थं च-शिशीर्वान्, तितीर्वान्, पुपूर्वान्, कर्मणि-शशिराणः, ततिराणः, पपुराणः । भावे-शशिराणमित्यादि । बहुलाधिकारात् श्रु-सद-वसिभ्यः कानो न भवति । केचित् तु-"एभ्य एव क्वसुर्नान्येभ्यः, कानस्तु प्रत्यय एव नेष्यते" इत्याहुः । अपरे तु सर्वधातुभ्यः क्वसुमेवेच्छन्ति न कानम् । भूताधिकारेणैवोक्तपरोक्षाविषयत्वे लब्धे तत्र ग्रहणं परोक्षामात्रप्रतिपत्त्यर्थम्, तेन 'पेचिवान्' इत्यादि सिद्धम् ॥ २ ॥**

**श० म० न्यासानुसन्धानम्—तत्र०** । 'तत्र' इत्यस्यार्थमाह-**तत्र-परोक्षामात्रविषये** इति-परोक्षामात्रं परोक्षासामान्यम्, न केवलं पूर्वसूत्रविहिता परोक्षैवेति भावः, एतादृशार्थलाभस्य मूलमग्रे वक्ष्यति । **तत्र** क्वसु-कानयोर्मध्ये, **क्वसुः परस्मैपदत्वात्** इति-"नवाद्यानि शतृ-क्वसू च परस्मैपदम्" [ ३. ३. १९. ] इति क्वसोः परस्मैपदसंज्ञाविधानेन परस्मैपदत्वात्, **कर्तरीति**-परस्मैपदस्य भाव-कर्मणोर्विधानाभावेन कृत्वात् "कर्तरि" [ ५. १. ३. ] इत्यनेन कर्तरि भवतीति भावः ! क्वसौ ककारः कित्कार्यगुणाभावाद्यर्थः, उकारो नागमाद्यर्थः, 'वस्' इत्यवशिष्यते । **कानस्त्वात्मनेपदत्वाद् भाव-कर्मणोरपीति**-"पराणि काना-ऽऽनशौ चात्मनेपदम्" [ ३. ३. २०. ] इत्यनेन कानस्यात्मनेपदसंज्ञाविधानात् स "तत् साप्यानाप्यात् कर्म-भावे०" [ ३. ३. २१. ] इत्यनेन भाव-कर्मणोरपि भवतीत्यर्थः, अपिना कर्तरीत्यस्य संग्रहः, तथाहि—"इङितः कर्तरि" [ ३. ३. २२. ] इति सूत्रेण इदितो ङितश्च धातोः कर्तर्यात्मनेपदविधानात्, एवम्—"ईगितः" [ ३. ३. ९५. ] इति सूत्रेण ईदितो गितश्च धातोः फलवति कर्तर्यात्मनेपदविधानात् आत्मनेपदसंज्ञकोऽपि कानः कर्तरि भविष्यतीत्यर्थः । काने ककारः कित्कार्यार्थः, 'आन' इत्यवशिष्यते । "श्रुंट् श्रवणे" अतोऽनेन क्वसौ तस्य परोक्षावद्भावेन द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे 'शुश्रु-वस्' शब्दः, तस्य सौ—**शुश्रुवानिति**, उपपूर्वस्य तु—**उपशुश्रुवानिति** । "षद्लृं विशरणगत्यवसादनेषु" अतः क्वसौ "अनादेशादेरेकव्यञ्जनमध्येऽतः" [ ४. १. २४. ] इत्यत एकारे द्वित्वनिषेधे "घसेकस्वरातः क्वसोः" [ ४. ४. ८२. ] इतीटि 'सेदिवस्'शब्दस्य सौ—**सेदिवानिति**, एवम्—उपपूर्वस्य—**उपसेदिवान्**, प्रपूर्वस्य—**प्रसेदिवान्**, आङ्पूर्वस्य—**आसेदिवान्**, निपूर्वस्य तु—**निषेदिवानिति**—अत्र "सदोऽप्रतेः०" [ २. ३. ४४. ] इति सस्य षः । "वसं निवासे" अतः क्वसौ "यजादिवचेः किति" [ ४. १ ७२. [ इति य्वृति स्वरसहितवस्य उकारे द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे समानदीर्घे "घस्-वसः" [ २. ३. ३६. ] इति सस्य षे "घसेकस्वरात०" [ ४. ४. ८२. ] इतीटि 'ऊषिवस्' शब्दस्य सौ—**ऊषिवानिति**, अनुपूर्वस्य—

**अनूषिवान्,** अधिपूर्वस्य—**अध्यूषिवानि**ति। "डुपचींष् पाके" अतः क्वसौ अत एकारे द्वित्वाभावे इटि च—**पेचिवानि**ति। 'पच्' धातोर्णिगि 'पाचि' इति धातोः क्वसौ तस्य "धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम्" [ ३. ४. ४६. ] इति क्वसुरूपपरोक्षाया आमादेशे क्वसुरूपपरोक्षान्तकृप्रयोगे "आमन्ता०" [ ४. ३. ८५. ] इति णेरयादेशे च—**पाचयांचकृवानि**ति, कृधातोः क्वसौ चकृवानिति भवति। "गम्लृं गतौ" अतः क्वसौ द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे गस्य जे, "घसेकस्वरात०" [४. ४. ८२.] इति इटि "गमहन०" [ ४. २. ४४. ] इत्युपान्त्यस्यातो लुकि—**जग्मिवानि**ति। "पां पाने" "पांक् रक्षणे" अतः क्वसौ द्वित्वे पूर्वस्य ह्रस्वे "घसे०" [४. ४. ८२.] इतीटि "इडेत्०" [ ४. ३. ९४. ] इत्याकारलोपे च—**पपिवानि**ति। अथ कानमुदाहरति—**पेचानः** इति– 'पच्'धातोरीदित्वात् फलवति कर्तर्यात्मनेपदे काने तस्य परोक्षावद्भावादत एकारे द्वित्वाभावे च—**पेचानः**। एवं कृधातोर्गित्वात् फलवति कर्तर्यात्मनेपदे काने तस्य परोक्षावद्भावेन द्वित्वे पूर्वस्य ऋतोऽकारे, कस्य चकारे, अन्त्यस्य ऋतो रेफे नस्य णे च—**चक्राणः** इति। क्वसु-कानौ छन्दस्येवेति पाणिनीयाः, लोकेऽपि कवयो बाहुल्येन प्रयुञ्जते क्वसु-कानौ, यथा कालिदासः—

"तं तस्थिवांसं नगरोपकण्ठे,
तदागमारूढगुरुप्रहर्षः।
प्रत्युज्जगाम क्रथकैशिकेन्द्र-
श्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली॥"

[ रघुवंशे चतुर्थसर्गे ] इति प्राह, रघोः स्वयंवराय भोजनगरगमनप्रसङ्गे श्लोकोऽयम्। एवं स एव—

"आशास्यमन्यत् पुनरुक्तभूतं,
श्रेयांसि सर्वाण्यधिजग्मुषस्ते।
पुत्रं लभस्वात्मगुणानुरूपं,
भवन्तमीड्यं भवतः पितेव॥"

इति [ तस्मिन्नेव काव्ये तत्रैव सर्गे कौत्सऋषिमुखेन] प्राह। अनयोः 'तस्थिवांसम्' 'अधिजग्मुषः' इति रूपद्वयं क्वसुप्रत्ययान्तस्य, अत्र पाणिनीयाः 'छन्दोवत् कवयः कुर्वन्ति' इति स्वीकृत्य समादधते। परोक्षावद्भावविधानस्य प्रयोजनमाह—**परोक्षावद्भावाद् द्विर्वचनादीति**– दर्शितोदाहरणेषु दर्शितमेतदिति न पुनर्दर्श्यते। ननु क्वसु-कानयोः कित्त्वाकरणेऽपि तयोः परोक्षावद्भावेन "इन्ध्यसंयोगात् परोक्षा किद्वत्" [ ४. ३. २१. ] इति कित्त्वं भविष्यत्येवेति कित्त्वकरणमपार्थकमित्याशङ्क्य समाधत्ते—**परोक्षावद्भावादेव कित्त्वे सिद्धे कित्करणं संयोगान्तधात्वर्थमि**ति, अयमाशयः—"इन्ध्यसंयोगात्०"इति सूत्रमसंयोगान्तधातोरेव परस्याः परोक्षायाः कित्त्वं विधत्ते, न तु संयोगान्तधातोः परस्या अपीति संयोगान्तधातुतः परयोरनयोः कित्त्वकरणमावश्यकमिति। एतदेवोदाहरणद्वारा स्फोरयति–**तेन-आजिवानित्यादि,** "अञ्जौप् व्यक्ति-म्रक्षण-गतिषु" व्यक्तिः प्रकटता, म्रक्षणं घृतादिसेकः, तत्र केवलस्य म्रक्षण एव वृत्तिः, सोपसर्गविशेषस्य तु शेषयोरिति विवेकः। इति 'अञ्ज्' धातोः क्वसौ "नो व्यञ्जनस्या०" [ ४. २. ४५. ] इति नस्य [ञकारस्थानिनो नकारस्य] लोपे द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे "अस्यादेरा:" [ ४. १. ६८. ] इति अस्याकारे "घसेकस्वरात्०" इति इटि 'आजिवस्'शब्दस्य सौ—**आजिवानि**ति। "भञ्जोंप् आमर्दने" इति 'भञ्ज्'-धातोः—**बभञ्वानि**ति "ष्वञ्जिंत् सङ्गे" इति 'स्वञ्ज्'धातोरात्मनेपदित्वादात्मनेपदे काने—**सस्वजानः** इति। **एषु कित्त्वान्नलोपः** इति—क्वसुकानयोः कित्त्वे नैवोपान्त्यनलोपः, "इन्ध्यसंयोगात्०" इत्यनेन तु कित्त्वमेव न भवति संयोगान्तत्वादिति भावः। क्वसु-कानयोः कित्त्वकरणस्य न केवलं नलोप एव फलमपि तु फलान्तरमप्यस्तीत्याह—**ऋदन्तानां गुणप्रतिषेधार्थं चे**ति, अयमाशयः— किति परोक्षायां गुणविधानार्थं "स्कृच्छ्रतोऽकि परोक्षायाम्" [ ४. ३. ८. ] इति सूत्रं क्रियते, तत्र क्वसौ काने च परतो गुणवारणार्थमकीति निर्दिश्यते, अथानयोः कित्त्वाभावेऽसम्भवात् तत् त्याज्यं स्यात्, तथा च तयोः परतोऽपि गुणः प्रसज्येत तद्वारणायानयोः किच्त्वमावश्यकमिति, कृते चानयोः कित्त्वे 'अकि' इति दातव्यमेति गुणप्रतिषेधो भवत्येवेति भावः। ननु ऋदन्तानां क्वसौ काने च परतो यदि गुणो न भवति तर्हि किमन्यत् कार्यं भवतीति जिज्ञासामुपशमयति—**शिशीर्वानि**त्याद्युदाहरणेन, "शॄश् हिंसायाम्" इति शॄधातोः, "तॄ प्लवन-तरणयोः" इति तॄधातोश्च क्वसौ "ॠतां क्ङितीर्" [ ४. ४. ११६ ] इति इरादेशे द्वित्वे

पूर्वस्यानादिव्यञ्जनलोपे "स्वादेर्नामिनो०" [ २. १. ६३. ] इति दीर्घे च—**शिशीर्वान्, तितीर्वानि**ति। "पृश् पालनपूरणयोः" इति पृधातोः क्वसौ "ओष्ठ्यादुर्" [ ४. ४. ११७. ] इत्युरादेशे द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे, दीर्घे च—**पुपूर्वानि**ति। कर्मणि आत्मनेपदे काने—**शशिराणः, ततिराणः, पपुराणः** इति–अत्र "द्विर्धातुः परोक्षा-ङे प्राक् तु स्वरे स्वरविधेः" [ ४. १. १. ] इति सूत्रे "प्राक् तु स्वरे स्वरविधेः" इति भणनात् पूर्वमेव द्वित्वे पूर्वस्य ऋतो ह्रस्वेऽकारे च, परस्य ऋत इरादेश उरादेशश्च विज्ञेयः। एवं भावे आत्मनेपदे काने—**शशिराणमि**ति, अत्रायं विशेषः—कर्मणि विशेष्यानुसारिणी लिङ्गवचने, भावे तु नपुंसकमेकवचनं चैवेति। कानस्य धातुविशेषनियतत्वं लक्ष्यानुरोधेनेष्टमिति तत्साधनोपायमाह—**बहुलाधिकारात् श्रु-सद-वसिभ्यः कानो न भवती**ति–'क्वचिदप्रवृत्तिः' इति नात्र कान इत्यर्थः। मतान्तरमाह—**केचित् तु एभ्य एव क्वसुर्नान्येभ्यः, कानस्तु प्रत्यय एव नेष्यते इत्याहु**रिति, अयं तदाशयः—क्वसुविधायकसूत्रे पूर्वसूत्रविहिताया परोक्षाया एव ग्रहणं न परोक्षामात्रस्येति तत्स्थाने एव क्वसुरिति तदन्यधातुभ्यस्तस्य प्राप्तिरेव न, कानस्य लोके प्रयोगानुपलम्भात् स प्रत्ययो नैव तैर्विधीयत इति। क्वसुविधायकसूत्रे परोक्षामात्रग्रहणमिति वादिनां मतेनाह—**अपरे तु सर्वधातुभ्यः क्वसुमेवेच्छन्ति न कानमि**ति—कानस्य विधानाभावे तस्य छान्दसत्वमेव मूलमिति पूर्वमुक्तम्। स्वमते प्राकरणिकीं पूर्वसूत्रविहितां परोक्षां विहाय परोक्षामात्रग्रहणे मूलमाह—**भूताधिकारेणैवोक्तपरोक्षाविषयत्वे लब्धे तत्रग्रहणं परोक्षामात्रप्रतिपत्त्यर्थमि**ति—भूताधिकारेण सामान्यतः सर्वस्मिन् भूतार्थे विहिताया परोक्षाया एव ग्रहणमिति प्राप्ते परोक्षापरिग्राहकं तत्रेति पदं व्यर्थं सत् परोक्षामात्रविषयमेव, तथा चान्येभ्योऽपि धातुभ्यो येभ्य इयं परोक्षा न विहिता ततः क्वसुः सिध्यति, तदाह—**तेन पेचिवानित्यादि सिद्धमि**ति। अत्रेत्थं लघुन्यासे—"**परोक्षामात्रप्रतिपत्त्यर्थमि**ति—अन्यथा "श्रु-सद०" इति विहितपरोक्षाविषय एव स्यात्, तेभ्य एव भूतमात्रे विधानात्, न तु "परोक्षे" इति विहितपरोक्षाया विषये। **इत्यादि सिद्धमि**ति—भूताधिकारे हि अनुवर्तमानेऽपरोक्षे एवातीते स्यात्, परोक्षे तु परत्वात् परोक्षा स्यादित्युभयोरप्यर्थः संगृह्यते, तेन पपाचेति वक्तव्ये पेचिवानित्यादि सिद्धम्" इति ॥ ५. २. २. ॥

## वेयिवदनाश्वदनूचानम् । ५. २. ३. ॥

**त० प्र०—एते शब्दा भूतेऽर्थे क्वसु-कानान्ताः कर्तरि वा निपात्यन्ते। इणः क्वसुर्निपात्यते–ईयिवान्, समीयिवान्, उपेयिवान्। तथा नञ्पूर्वादश्नातेः क्वसुरिडभावश्च निपात्यते–अनाश्वान्। तथा वचेर्ब्रूगादेशाद् वाऽनुपूर्वात् कानो निपात्यते–अनूचानः। निपातनस्येष्टविषयत्वात् कर्तुरन्यत्र अनूक्तमित्याद्येव भवति। ब्रूग एवेच्छन्त्यन्ये। वावचनात् पक्षेऽद्यतन्यादयोऽपि–अगात्, उपागात्, उपैत्, उपेयाय; नाऽऽशीत्, नाऽऽश्नात्, नाऽऽश, अन्ववोचत् अन्वब्रवीत्, अन्ववक्, अनूवाच ॥ ३ ॥**

**श० म० न्यासानुसन्धानम्—वेयि०।** पूर्वसूत्रेण परोक्षामात्रविषये क्वसु-कानौ विहितौ, किञ्च धातुमात्रात् तौ द्वावपि विहितौ, इह च भूतमात्रे धातुविशेषात् क्वसुर्धातुविशेषाच्च कान इष्ट इति, किञ्चान्यदपि किञ्चिदलाक्षणिकं कार्यं वक्ष्यमाणरीत्या सम्पादनीयमिति निपातनमिदमारभ्यते। तत्र कस्मिन् प्रयोगे किं निपात्यत इत्याकाङ्क्षायामाह—**इणः क्वसुर्निपात्यते** इति—परोक्षामात्रविषये प्राप्तो भूतमात्रे निपात्यते, निपातनसामर्थ्याच्च क्वसुरेव भवति, न कानः। "इंणक् गतौ" इति 'इ'धातोः क्वसौ "घसेकस्वरा०" [ ४. ४. ८२. ] इतीटि द्वित्वे "योऽनेकस्वरस्य" [ २. १. ५६. ] इति यत्वापवादे "इणः" [ २. १. ५१. ] इतीयादेशे समानदीर्घे 'ईयिवस्'शब्दस्य सौ—**ईयिवानि**ति, सम्पूर्वस्य—**समीयिवान्,** उपपूर्वस्य—**उपेयिवानि**ति। इणो द्विर्वचने कृतेऽपि समानदीर्घत्वे सत्येकस्वरसद्भावेनेटः प्राप्तिसद्भावात् इट् नित्य एवेति पूर्वं भवति, कृताकृतप्रसङ्गित्वेन द्वित्वमपि नित्यमिति यदि विभाव्यते तदा इट् पर इति तयोः स्पर्धे परत्वात् पूर्वमिडेव। **तथा नञ्पूर्वादश्नातेः क्वसुरिडभावश्च निपात्यते** इति—द्वित्वे कृतेऽप्येकस्वरत्वात् "घसेकस्वरातः क्वसोः" [ ४. ४. ८२. ] इतीट् प्राप्तस्तदभावो निपातनादिति भावः, निपातनसामर्थ्याच्च क्वसुरेव भवति न कानः। "अशश्

भोजने" इति 'अश्'धातोः क्वसौ द्वित्वे पूर्वस्यानादिव्यञ्जनलोपेऽत आकारे समानदीर्घे ङस्युक्तसमासे नञोऽनादेशे 'अनाश्वस्'शब्दस्य सौ—**अनाश्वानिति**। **तथा वचेर्ब्रूगादेशाद् वाऽनुपूर्वात् कानो निपात्यते** इति—"वचंक् भाषणे" इति प्रतिपदोक्तात्, "ब्रूंगक् व्यक्तायां वाचि" इति ब्रूधातोः स्थाने "अस्ति-ब्रुवोर्भू-वचावशिति" [ ४. ४. १. ] इति यो वचादेशो विधीयते तस्मादनुपूर्वात् कानो निपात्यते, निपातनसामर्थ्याच्च क्वसुर्न भवतीत्यर्थः। अनुपूर्वात् वचेः काने सति "यजादिवचेः किति" [ ४. १. ७९ ] इति स्वरसहितवकारस्य य्वृति–उकारे ततो द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे समानदीर्घे च—**अनूचानः**। अपरमपि निपातनफलमाह- **निपातनस्येष्टविषयत्वात् कर्तुरन्यत्र 'अनूक्तम्' इत्याद्येव भवतीति**—कानस्यात्मनेपदत्वेन तस्य भावकर्मणोरपि प्राप्त्या कर्तृमात्रनियतत्वं निपातनेन लभ्यमिति भावकर्मणोरनूक्तमिति क्तान्तमेव रूपम्। मतान्तरमाह—**ब्रूग एवेच्छन्त्यन्ये** इति—ब्रूग एव कानस्तस्य च वचादेश इति तन्मतम्। निपातनस्य बाधकत्वेन तद्विषयेऽद्यतन्यादयो न भविष्यन्तीत्याशङ्कायामाह—**वावचनात् पक्षेऽद्यतन्यादयोऽपीति**—विकल्पविधानेन पक्षे निपातनस्य व्यापाराभावात् तत्र यथायथमद्यतन्यादयो निर्बाधा इति भावः। इणोऽद्यतन्याम् "इणिकोर्गाः" [ ४. ४. २३. ] इति गादेशे "पिबेति०" [ ४. ३. ६६. ] इति सिचो लोपेऽडागमे च—**अगात्**, उपपूर्वस्य च—**उपागात्**, ह्यस्तन्या दिवि "एत्यस्तेर्वृद्धिः" [ ४. ४. ३०. ] इति वृद्धौ—ऐत्, उपपूर्वस्य तु—**उपैत्**, परोक्षाणवि द्वित्वे "नामिनो०" [ ४. ३. ५१. ] इति वृद्धौ "पूर्वस्यास्वे०" [ ४. १. ३७. ] इति पूर्वस्य इयादेशे—**उपेयाय**। अश्नातेरद्यतन्यादौ सिचि तस्य इटि देरीति सिचो लुपि आद्यस्वरवृद्धौ समानदीर्घे च–आशीत्, नञा योगे च–**नाशीदिति** वाक्यम्। ह्यस्तनीदिवि श्नाविकरणे वृद्धौ नञा योगे च–**नाश्नादिति** वाक्यम्, परोक्षाणवि द्वित्वे पूर्वस्यानादिव्यञ्जनलोपेऽत आकारे—आश, नञा योगे च—**नाशेति** वाक्यम्। अनुपूर्वाद् वचेरद्यतन्या दौ "शास्त्यसूवक्तिख्यातेरङ्" [ ३. ४. ६० ] इत्यङि "श्वयत्यसूवच०" [ ४. ३. १०३ ] इत्यनेन धातोर्वोचादेशेऽडागमे च—**अन्ववोचत्**। ह्यस्तन्यां वचादेशाभावे ब्रूगः "भूतः परादिः" [ ४. ३. ६३. ] इतीति गुणेऽवादेशेऽडागमे च—**अन्वब्रवीत्**, प्रतिपदोक्तस्य वचेस्तु "व्यञ्जनाद् देः०" [ ४. ३. ७८. ] इति दिवो लोपेऽडागमे चस्य "चजः कगम्" [ २. १. ८६. ] इति कत्वे च—**अन्ववक्**, परोक्षाणवि तूभयोरपि द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे सस्वरस्य पूर्ववकारस्य य्वृति- उकारे उपान्त्यवृद्धौ च—**अनूवाचेति** ॥ ५. २. ३. ॥

## अद्यतनी । ५. २. ४. ॥

**त० प्र०—भूतेऽर्थे वर्तमानाद् धातोरद्यतनी विभक्तिर्भवति । अकार्षीत् अहार्षीत् ॥४॥**

**श० म० न्यासानुसन्धानम्—अद्यतनी । भूतेऽर्थे वर्तमानादिति**—भूतशब्देन भूतकालवृत्तिस्वरूपोऽर्थ उच्यते, तथा च भूतकालवृत्तावर्थे—स्वार्थे वर्तमानाद् धातोरिति, नहि धातुर्भूते वर्तते तस्य शब्दस्वरूपत्वेन सदा वर्तमानत्वात्, किन्तु तदर्थभूता क्रिया भूतकालविषयिणी वाच्येत्यादि प्रतिपादितं भूताधिकारसूत्रे । इयं चाद्यतनी ह्यस्तन्यादिभिः परत्वाद् बाध्यत इत्यद्यतनमात्रविषया विज्ञेया । "डुकृंग् करणे" "हृंग् हरणे" अतोऽद्यतनीदौ सिचि "सः सिजस्तेर्दिस्योः" [ ४. ३. ६५. ] इति देरीति "सिचि परस्मै०" [ ४. ३. ४४. ] इति वृद्धावडागमे सस्य षे च—**अकार्षीत्, अहार्षीदिति** ॥ ५. २. ४. ॥

## विशेषाविवक्षा-व्यामिश्रे । ५. २. ५. ॥

**त० प्र०—अनद्यतनादिविशेषस्याविवक्षायां व्यामिश्रणे च सति भूतेऽर्थे वर्तमानाद् धातोरद्यतनी विभक्तिर्भवति । अकार्षीत्, अहार्षीत्, अगमाम घोषान्, अपाम पयः, अजैषीत् गर्तो हूणान्, रामो वनमगमत् । सतोऽप्यत्र विशेषस्याविवक्षा, यथा–अनुदरा कन्या, अलोमिका एडकेति । व्यामिश्रे–अद्य ह्यो वाऽभुक्ष्महि । विशेषाविवक्षेति किम् ? अगच्छाम घोषान्, अपिबाम पयः, अजयद् गर्तो हूणान्, रामो वनं जगाम । ह्यस्तन्यादिविषयेऽप्यद्यतन्यर्थं वचनम् ॥५॥**

**श० म० न्यासानुसन्धानम्—विशेषा०।** अद्यतनेऽपि काले परोक्षत्वविवक्षायामद्यतनी नेष्टा, ह्यस्तनेऽपि काले ह्यस्तनत्वाविवक्षायां सेष्टेति पूर्वसूत्रेण तत्सिद्ध्यभावादिदं सूत्रमारब्धम्। तदाह—**अनद्यतनादिविशेषस्याविवक्षायामिति**, आदिपदेन परोक्षा ग्राह्या। उदाहरति—**अकार्षीत्, अहार्षीदिति**—साधितमेतत् पूर्वसूत्रे। "गम्लृं गतौ" अतोऽद्यतनीतृतीयत्रिकबहुवचने मप्रत्यये लृदित्त्वात् "लृदिद्०" [३. ४. ६४.] इत्यङि "मव्यस्याः" [४. २. ११३.] इत्यत आकारेऽडागमे च—**अगमाम घोषानिति**—अत्राद्य वा ततः पूर्वमेव वेति न विवक्ष्यते। एवं "पां पाने" अतो मे "पिबैति०" [४. ३. ६६.] इति सिचो लुकि अडागमे च—**अपाम पयः।** "जिं जये" अतोऽद्यतनीदौ सिचि देरीति वृद्धौ सस्य षत्वेऽडागमे च—**अजैषीत् गर्तो हूणानिति।** गमेरद्यतनीदावङि अडागमे च—**रामो वनमगमदिति।** ननु यत्र कालविशेषो न ज्ञातस्तत्र भवतु नाम तस्य तत्त्वेनाविवक्षा, अज्ञातस्य वक्तुमशक्यत्वात्, यत्र च निश्चितरूपेणैतज्ज्ञायते—अस्मिन् दिने मयैतत् कृतम्, युगान्तरे रामो वनं जगामेत्यादि तत्र कथं विवक्षाया अभावो युज्यते? इत्याशङ्कायामाह—**सतोऽप्यत्र विशेषस्याविवक्षेति**—वक्तुमिच्छा विवक्षा, तत्र सतोऽप्यर्थस्य कथनेऽकथने वा वक्ता स्वतन्त्र इति सम्भवति सतोऽप्यविवक्षेति। तदुदाहरणेन प्रमाणयति—**यथा—अनुदरा कन्येति**—नहि कश्चिन्मनुष्योऽन्यो वा देही उदरेण हीनो भवति, तत् कथमियं सर्वावयवैर्युक्ता भवेदुदरेण हीना, किन्तु तदल्पत्वव्यञ्जनाय तदभावो विवक्ष्यते, अतश्चात्र नञोऽल्पार्थत्वं पर्यवस्यति। उक्तं च नञर्थेष्वल्पार्थस्यापि तदर्थत्वम्—

"तत्सादृश्यमभावश्च तदल्पत्वं तदन्यता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥" इति।

न चैतेऽर्था नञो वाच्याः, अभाव एव स्वाभाविकस्तदर्थः, किन्तु प्रयोगेऽसावर्थोऽसम्भवन् यत्रार्थे परिणमति तेऽर्था इमे परिगणिता इति। एवम्—**अलोमिका एडकेति**—अत्र एडकाया लोमाभावत्वमसम्भवि ततोऽल्पलोमवत्त्वे पर्यवस्यति। एवमिहासतोऽपि कस्यचिदर्थस्य वक्त्रा वक्तुमिष्टस्य विवक्षा सम्भवति, यथा—'समुद्रः कुण्डिका, मुखं चन्द्रः' इति, नहि समुद्रः कुण्डिका भवितुमर्हति कुण्डिका वा 'समुद्रः, नवा मुखं चन्द्रो भवितुमर्हति चन्द्रो वा मुखमिति, किन्तु वक्तुरिच्छया तत्सदृशार्थे पर्यवस्यति। इह च भूतत्वं परोक्षाद्यतनीह्यस्तनीषु वर्तमानः साधारणो धर्मः, परोक्षत्वादिकं विशेषधर्मः, तत्र विशेषस्याविवक्षा सामान्यस्य च विवक्षेति सिध्यति तत्राद्यतनीति। व्यामिश्रे उदाहर्तुमवतारयति—**व्यामिश्रे** इति—व्यामिश्रत्वं चाद्यतन्या विषयेण सहानद्यतन्यादिविषयस्य सन्दिग्धरूपतया विवक्षितत्वम्, तत्रानद्यतननिमित्तां ह्यस्तनीं वारयितुमद्यतनी विधीयते। तदुदाहरणं प्रदर्शयते—**अद्य ह्यो वाऽभुक्ष्महीति**—"भुजंप् पालनाभ्यवहारयोः" अभ्यवहारो भोजनम्, तत्र पालने परस्मैपदम्, भोजनादौ तु "भुनजोऽत्राणे" [३. ३. ३७.] इत्यात्मनेपदेऽद्यतनीतृतीयत्रिकबहुवचने महिप्रत्यये सिचि अनुस्वारेत्त्वादिडभावे "सिजाशिषावात्मने" [४. ३. ३५.] इति सिचः कित्त्वाद् गुणाभावे "चजः कगम्" [२. १. ८६.] इति जस्य गत्वे "अघोषे प्रथमोऽशिटः" [१. ३. ५०.] इति गस्य कत्वे "नाम्यन्तस्थाकवर्गात्०" [२. ३. १५.] इति सस्य षत्वेऽडागमे च—**अभुक्ष्महि**, अत्र द्वयोर्निमित्तयोर्व्यामिश्रत्वेन न ह्यस्तनी किन्त्वद्यतन्येव। पदकृत्यं पृच्छति—**विशेषाविवक्षेति किमिति**, विशेषस्यानद्यतनादिकालस्य विवक्षायां तु यथास्वमेव विभक्तिः स्यादित्येतदर्थं तद्ग्रहणमित्याशयेन प्रत्युदाहरति—**अगच्छाम घोषान्, अपिबाम पयः, अजयद् गर्तो हूणानिति**—अत्रानद्यतनकालरूपविशेषस्य विवक्षया ह्यस्तनी, **रामो वनं जगामेति**—अत्र परोक्षत्वविवक्षया परोक्षा जाता। सूत्रप्रयोजनमाह—**ह्यस्तन्यादिविषयेऽप्यद्यतन्यर्थं वचनमिति** ॥ ५. २. ५. ॥

## रात्रौ वसोऽन्त्ययामास्वप्तर्यद्य। ५. २. ६. ॥

**त० प्र०—रात्रौ भूतेऽर्थे वर्तमानाद् वसतेर्धातोर्ह्यस्तन्यपवादोऽद्यतनी विभक्तिर्भवति, अन्त्ययामास्वप्तरि—स चेदर्थो यस्यां रात्रौ भूतस्तस्या एवान्त्ययामं व्याप्याऽस्वप्तरि कर्तरि वर्तते, अद्य—तेनैवान्त्ययामेनावच्छिन्नेऽद्यतने चेत् प्रयोगो भवति नाद्यतनान्तरे। न्याय्ये प्रत्युत्थाने प्रत्युत्थितं कश्चित् कंचिदाह—क्व भवानुषितः? स आह—**

**अमुत्रावात्समिति । रात्र्यन्त्ययामे तु मुहूर्तमपि स्वापे ह्यस्तन्येव—अमुत्रावसमिति ॥६॥**

---

**श० म० न्यासानुसन्धानम्—रात्रौ० । रात्रौ भूतेऽर्थे** इति—रात्रिगते भूतकालिकेऽभिधेये इति भावः । **ह्यस्तन्यपवादोऽद्यतनीति**—अतीताया रात्रेः पूर्वार्धस्य मतान्तरेण प्रहरत्रयस्य वाऽनद्यतनत्वेन तत्र ह्यस्तन्याः प्राप्तेरिति *येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति* इति न्यायेनास्य तदपवादत्वस्यौचित्यादिति भावः । **अन्त्ययामास्वप्तरीति** पदं व्याचष्टे—**स चेदर्थो यस्यां रात्राविति**—स रात्रिगतो भूतार्थः, रात्रेरन्त्ययामास्वप्तरीति-अन्त्ययामसम्बन्धिकालस्य कस्मिंश्चिदंशे चेत् स न सुप्तस्तादृशे कर्तरि, तादृशकर्त्राश्रितो वर्तत इति भावः । **'अद्य'** इत्यस्यार्थमाह - **तेनैवान्त्ययामेनावच्छिन्नेऽद्यतने** इति— यस्मिन्नन्त्ययामे तस्यास्वापोऽभिमतस्तेनैवान्त्ययामेन सोऽद्यतनश्चेत् अवच्छिन्नः—पृथक् कृतो भवति, **नाद्यतनान्तरे** इति—'अष्टभिर्हि यामैरद्यतनः कालोऽवच्छिद्यते, अतीताया रात्रेरन्त्ययामादारभ्यागामिन्या रात्रेस्त्रिभिराद्यैर्यामैः, तत्र सर्वे प्रहरास्तदवयवा अद्यतनस्यावच्छेदकत्वादद्यतना एवेति पूर्वोक्तान्त्ययामातिरिक्तोऽद्यतनः कालश्चेत् प्रयोगाधिकरणं न भवेदित्याशयः । प्रयोगमाह—**न्याय्ये प्रत्युत्थाने प्रत्युत्थितं कश्चित् कंचिदाहे**ति—न्याय्ये—धर्मशास्त्रादिभिरुक्ते, प्रत्युत्थाने—प्रत्युत्थानसमये, स च समयः "ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्" इत्यादिप्रकारैर्मन्वादिभिरुक्तो रात्रेश्चतुर्थ एव यामः, तस्मिन् काले, प्रत्युत्थितं—प्रबुद्धं प्रति कश्चिदाहेति सम्बन्धः । किमाहेत्याह **क्व भवान् उषितः?** इति, तथा चानेन सामान्यतो भूतार्थविषयः प्रयोगः कृत इति प्रश्नेऽनद्यतनत्वाविवक्षेति हृदयम्, तदनुसारमेवानद्यतनेऽपि विषयेऽद्यतनीं प्रयुञ्जानः प्रत्युत्तरयति—**अमुत्रावात्समिति** । अद्य यद्यप्यनद्यतनत्वं वासक्रियायां स्पष्टं तथापि विशेषविहितत्वादनद्यतननिमित्तां ह्यस्तनीं प्रबाध्याद्यतनी विधीयतेऽनेनेति भावः । "वसं निवासे" अतोऽद्यतनीतृतीयत्रिकैकवचनेऽमि सिचि "व्यञ्जनानामनिटि" [ ४. ३. ४५. ] इत्युपान्त्यवृद्धौ "सस्तः सि" [४. ३. ९२.] इति धातुसकारस्य तेऽडागमे च—**अवात्समिति** भवति । स चेदित्यादिना कृतस्य नियमस्य फलमाह—**रात्र्यन्त्ययामे तु मुहूर्तमपि स्वापे ह्यस्तन्येव–अमुत्रावसमिति**–तथा सत्यनद्यतननिमित्ता ह्यस्तन्येव परत्वादिति भावः ॥ ५. २. ६. ॥

---

## अनद्यतने ह्यस्तनी । ५. २. ७. ॥

**त० प्र०—आ न्याय्यादुत्थानादा न्याय्याच्च संवेशनादहरुभयतः सार्धरात्रं वा–अद्यतनः कालः, तस्मिन्नसति भूतेऽर्थे वर्तमानाद् धातोर्ह्यस्तनी विभक्तिर्भवति । अकरोत्, अहरत् । अनद्यतन इति किम्? अकार्षीत् ॥७॥**

---

**श० म० न्यासानुसन्धानम्—अनद्य०** । अनद्यतनशब्दस्याद्यतनभिन्नार्थकत्वादद्यतनशब्दार्थमाह — **आ न्याय्यादुत्थानादा न्याय्याच्च संवेशनादिति**—न्याय्य उत्थानसमयो रात्रेश्चतुर्थयाम उक्तः पूर्वसूत्रे मनुवाक्यनिदर्शनेन, तमारभ्य, यः प्रत्युत्थानसमयो रात्रेश्चतुर्थयामस्ततः पूर्वतनरात्रेः पूर्वं यामत्रयं तदभिव्याप्येत्यर्थः, एतदवच्छिन्नमहोऽद्यतन इत्येकं मतम् । मतान्तरेणाह—**उभयतः सार्धरात्रं वेति**—अतीतरात्रेरन्त्ययामद्वयं, वर्तमानदिनस्य यामचतुष्टयम्, आगामिन्या रात्रेर्यामद्वयमाद्यमद्यतन इति मतान्तरमिति भावः । **तस्मिन्नसति** अद्यतने काले, भूतेऽर्थे, यो भूतोऽर्थोऽद्यतने काले न स्यात् तत्रेत्यर्थः । एवं च 'अद्य ह्यो वाऽभुक्ष्महि' इति प्रयोगे न ह्यस्तन्याः प्राप्तिरिति तदर्थं व्यामिश्रेऽद्यतनीविधानं पूर्वसूत्रोक्तं नावश्यकमिति परास्तम्, तस्यार्थस्याद्यतन्यामपि सन्दिग्धत्वात् । **ह्यस्तनी विभक्तिरिति**—ह्यस्तनीति तस्या नाम, न तावता ह्यस्तनकालवृत्तावर्थे तस्या विधानमिति मन्तव्यम्, अद्यतनभिन्नार्थत्वात् तस्याः । उदाहरति—**अकरोदिति**—एककर्तृकाद्यतनभिन्नभूतार्थविषयक उत्पत्त्यनुकूलो व्यापार इति क्रमेणार्थः । "डुकृंग् करणे" अतो ह्यस्तन्या दिवि "कृग्-तनादेरुः" [ ३. ४. ८३. ] इत्युविकरणे धातोर्गुणे विकरणस्य "उ-श्नोः" [ ४. ३. २. ] इति गुणेऽडागमे च—**अकरोत्** । "हृंग् हरणे" अतो दिवि शवि गुणेऽडागमे च—**अहरत्** । पदकृत्यं पृच्छति-**अनद्यतन इति किमिति,** उत्तरयति—**अकार्षीदिति**—नात्रानद्यतनविवक्षेत्यस्याप्रवृत्त्या "अद्यतनी" [५. २. ४.] इत्यद्यतन्येव भवति ॥५. २. ७.॥

## ख्याते दृश्ये । ५. २. ८. ॥

**त० प्र०—ख्याते–लोकविज्ञाते, दृश्ये–प्रयोक्तु: शक्यदर्शने, भूतेऽनद्यतनेऽर्थे वर्तमानाद् धातोर्ह्यस्तनी विभक्तिर्भवति । परोक्षापवादः । अरुणत् सिद्धराजोऽवन्तीन्, अजयत् सिद्धः सौराष्ट्रान् । ख्यात इति किम् ? चकार कटं चैत्रः । दृश्य इति किम् ? जघान कंसं किल वासुदेवः । अनद्यतन इत्येव–उदगादद्यादित्यः ॥ ८ ॥**

**श० म० न्यासानुसन्धानम्–ख्याते०** । ख्यातशब्दं व्याचष्टे—**ख्याते–लोकविज्ञाते** इति–न केवलं प्रयोक्तुर्ज्ञानविषयेऽपि तु सकललोकप्रसिद्धे । दृश्यशब्दं व्याचष्टे—**दृश्ये–प्रयोक्तुः शक्यदर्शने** इति–सति प्रयत्ने प्रयोक्त्रा द्रष्टुं योग्ये विषये इत्यर्थः । यत्र प्रयोक्त्रा सोऽर्थो न दृष्टः किन्तु तत्सत्त्वकाले समीप एव तस्यार्थस्य वृत्ततया दर्शनयोग्यता तस्य भवति । अत्र यद्यपि प्रयोक्त्राऽदृष्टत्वेन परोक्षत्वमिति परोक्षायाः प्राप्तिस्तथापि लोकख्यातत्वेन प्रयोक्ता तस्यार्थस्य स्वप्रत्यक्षत्वमिव मन्यते इति तद् द्योतयितुं परोक्षापवादो ह्यस्तनी विधीयत इति भावः । तदाह—**परोक्षापवादः** इति । **अरुणत् सिद्धराजोऽवन्तीन्** इति—सिद्धराजचरितस्य प्रयोक्तृग्रन्थकृत्समये सकललोकविज्ञाततया भूतत्वेन तत्र सूत्रार्थघटनमिति भावः । "रुधृं पी आवरणे" अतो ह्यस्तन्या दिवि "रुधां स्वराच्छ्नो नलुक् च" [ ३. ४. ८२. ] इति स्वरात् परतः श्नविकरणे नस्य णेऽडागमे धस्य ते—**अरुणदिति । अजयत् सिद्धः सौराष्ट्रान्** इति—"जि जये" इत्यस्य ह्यस्तन्या दिवि—**अजयदिति** । पदकृत्यं पृच्छति—**ख्यात इति किमिति**, उत्तरयति–**चकार कटं चैत्रः** इति—कटादिकरणस्य साधारणकार्यतया कैश्चिदेव तत्समीपवर्तिभिर्दृष्टत्वेन ज्ञातत्वेन वा न सकललोकख्यातत्वं तस्येति भावः । पुनः पृच्छति—**दृश्य इति किमिति**, उत्तरयति—**जघान कंसं किल वासुदेवः** इति–वासुदेवकर्तृककंसहननस्य प्रयोक्तुर्दर्शनयोग्यत्वाभावः, तस्य तज्जन्मनो बहुकालपूर्ववृत्ततया द्रष्टुमशक्यत्वात् । यदि च तत्समानकालवृत्तिरेव जनो वाक्यं प्रयुङ्क्ते तदा 'कंसमहन् वासुदेवः' इति प्रयोग इष्टः स्यादिति भावः ।

परोक्षे लोकविज्ञाते प्रयोक्तुः शक्यदर्शने ।
ह्यस्तने ह्यस्तनी प्रोक्ता चैत्रो नृपमहन्निति ॥

"हनंक् हिंसा-गत्योः" इत्यस्य परोक्षायां **जघान**, ह्यस्तन्यामहन्निति । अनद्यतनानुवृत्तेर्व्यावृत्तिं दर्शयति–**उदगाद् अद्य आदित्यः** इति–अत्रानद्यतनत्वाभावः स्पष्ट एव ॥ ५. २. ८. ॥

## अयदि स्मृत्यर्थे भविष्यन्ती ।५. २. ९. ॥

**त० प्र०—स्मृत्यर्थे धातावुपपदे सति भूतानद्यतनेऽर्थे वर्तमानाद् धातोर्भविष्यन्ती विभक्तिर्भवति, अयदि–न चेद् यच्छब्दः प्रयुज्यते । अभिजानासि देवदत्त ! कश्मीरेषु वत्स्यामः, स्मरसि साधो ! स्वर्गे स्थास्यामः, एवं–बुध्यसे चेतयसे अध्येष्यवगच्छसि चैत्र ! कलिङ्गेषु गमिष्यामः । अयदीति किम् ? अभिजानासि मित्र ! यत् कलिङ्गेष्ववसाम ॥ ९ ॥**

**श० म० न्यासानुसन्धानम्–अयदि०** । 'भूते' 'अनद्यतने' इति पदद्वयं पूर्वतोऽनुवृत्तम्, 'स्मृत्यर्थे' इति पदं च तदर्थकधातुपरम्, स च धातुरिह सप्तम्यन्तेन निर्दिष्टत्वादुपपदं न तु प्रत्ययप्रकृतिः । तदाह–**स्मृत्यर्थे धातावुपपदे** इति । **अभिजानासि देवदत्त ! कश्मीरेषु वत्स्यामः** इति–अत्र 'पश्य मृगो धावति' इत्यादाविव वाक्यार्थस्यैव स्मरणकर्मत्वम्, तथा च काश्मीराधिकरणकास्मत्कर्तृकभूतानद्यतनकालिकस्थित्यनुकूलव्यापाररूपो वाक्यार्थः कर्म स्मरणस्य, तथा च काश्मीराधिकरणकास्मत्कर्तृकवर्तमानकालिकनिवासकर्मकसंबोध्यदेवदत्तसम्बन्धिस्मरणमिति सम्पूर्णवाक्यार्थः । 'वस्' धातोर्भविष्यन्तीतृतीयत्रिकबहुवचने स्यामसि प्रत्यये "सस्तः सि" [ ४. ३. ९२. ] इति धातुसकारस्य ते—**'वत्स्यामः'** इति । **स्मरसि साधो ! स्वर्गे स्थास्यामः** इति–इदं वाक्यं जातिस्मरणज्ञानिदृष्ट्या, नहि सर्वसाधारणेन जनेन पूर्वशरीरानुभूतं स्वर्गाधिकरणकं स्थानं स्मरणविषयीभवितुमर्हतीति वाक्यप्रयोगोऽनुचितः स्यादिति । अतिदिशति—**एवं बुध्यसे** इत्यादि । यद् हेत्वर्थवाक्योपन्यासयोः, पदकृत्यं पृच्छति—**अयदीति किमिति**, उत्तरयति—**अभिजानासि मित्र ! यत् कलिङ्गेष्ववसामेति**–अत्र यदः प्रयोगादस्याप्रवृत्त्या ह्यस्तनी भवति ।

अत्र व्याख्याकारैः क्रियाविशेषणरूपो वाक्यार्थार्थको 'यद्' शब्द एवोपपदत्वेन पर्युदस्यते, न तु यस्मादित्यर्थकः, तदर्थकयच्छब्दप्रयोगे च स्यादेव भविष्यन्तीत्युक्तम् । अत्र केचनैवमाहुः--तथा व्याख्यानं नावश्यकम्, तादृशयच्छब्दप्रयोगस्यैतादृशस्थलेऽसम्बद्धत्वात् । यच्च व्याख्यातम्—यस्माद्धेतोः कलिङ्गेषूषितवन्त इत्यर्थकत्वे भविष्यन्ती स्यादेवेति, तदपि प्रौढिवादमात्रम्, एतादृशस्थले तादृशयच्छब्दप्रयोगस्याप्राकरणिकत्वात् । स्मरणार्थकधातुर्हि भविष्यन्तीप्रकृतिभूतधातोरुपपदत्वेन निर्दिष्टः, उपपदं च प्रकृतिभूतधात्वर्थेनावश्यं सम्बद्धं वक्तव्यम्, यस्माद्धेतोः कलिङ्गेषूषितवन्त इत्यर्थकरणे हि तादृशस्य हेतोरेव स्मरणं प्रेरणाविषयः स्यात्, कलिङ्गवासप्रयोजकहेतोरेव पृच्छाविषयत्वात् । तस्मात् क्रियार्थानुवादक एव यच्छब्द इह प्रतिषेध्य इत्यर्थस्य वस्तुगत्यैव लाभो न तु तदर्थं व्याख्यानस्यावश्यकता, न चातिप्रसङ्गवारणं तत्फलमिति ध्येयम् ॥ ५. २. ९. ]

## वाऽऽकाङ्क्षायाम् । ५. २. १०. ॥

**त० प्र०—अयदीति नानुवर्तते । स्मृत्यर्थे धातावुपपदे सति यद्ययदि वा प्रयुज्यमाने प्रयोक्तुः क्रियान्तराकाङ्क्षायां सत्यां भूतानद्यतनेऽर्थे वर्तमानाद् धातोर्भविष्यन्ती वा भवति । स्मरसि मित्र ! कश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे पास्यामः पयांसि च, स्मरसि मित्र ! कश्मीरेष्ववसाम तत्रौदनमभुञ्ज्महि; स्मरसि मित्र ! यत् कश्मीरेषु वत्स्यामो यत् तत्रौदनम् भोक्ष्यामहे, स्मरसि मित्र यत् कश्मीरेष्ववसाम यत् तत्रौदनमभुञ्ज्महि । अत्र वासो लक्षणं भोजनं पानं च लक्ष्यमिति लक्ष्य-लक्षणयोः संम्बन्धे प्रयोक्तुराकाङ्क्षा भवति ॥१०॥**

**श० म० न्यासानुसन्धानम्**—वाऽऽका० । अस्य सूत्रस्य यच्छब्दयोगेऽपि प्रवृत्तेरिष्टत्वादाह—**अयदीति नानुवर्तते** इति–तत्र मूलान्वेषणे लक्ष्यानुरोधि व्याख्यानमेव शरणम् । **यदि अयदि वा प्रयुज्यमाने** इति–यदि प्रयुज्यमानेऽप्रयुज्यमाने वेत्यर्थः, न तु यदि यद्भिन्ने च प्रयुज्यमाने इति, तथा सति यद्भिन्नस्य कस्यचन प्रयोगस्यावश्यकत्वात् 'यद्ययदि च प्रयुज्यमाने' इति ग्रन्थस्य यद्यपि पर एवार्थः प्रतिभाति तथापि प्रयोगानुसारमेव ग्रन्थकृतामाशयो वर्णनीय इति पूर्वोक्तार्थः कृतः । यच्छब्दप्रयोगाभावे निदर्शनयुगलमाह—**स्मरसि मित्र ! कश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे पास्यामः पयांसि च** । भविष्यन्त्या अभावे ह्यस्तनीत्याह—**स्मरसि मित्र ! कश्मीरेष्ववसाम तत्रौदनमभुञ्ज्महीति** । अथ यच्छब्दयोगे निदर्शनद्वयमाह—**स्मरसि मित्र ! यत् कश्मीरेषु वत्स्यामो यत् तत्रौदनं भोक्ष्यामहे** । भविष्यन्त्या अभावे ह्यस्तनीत्याह **स्मरसि मित्र ! यत् कश्मीरेष्ववसाम यत् तत्रौदनमभुञ्ज्महीति** । प्रयोगे प्रयोक्तुराकाङ्क्षां निगमयति—**अत्र वासो लक्षणं भोजनं पानं च लक्ष्यमिति लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा भवतीति**–यत् परार्थमुपादीयते तत् लक्षणम्, यदर्थं च किञ्चिदुपादीयते तत् लक्ष्यमिति भोजनार्थं पानार्थं वासः समाश्रित इति वासस्य लक्षणत्वं स्पष्टम्, एवं भोजनार्थं पानार्थं च वास उपादीयत इति भोजनस्य पानस्य च लक्ष्यत्वमपि स्पष्टमेव, अथवा परिज्ञातं लक्षणम्, अपरिज्ञातं लक्ष्यम्, वासो लक्षणं तेन हि भोजनं पानं च लक्ष्यते, भोजनं पानं च लक्ष्यं, न तु लक्षणमपरिज्ञातत्वात्, परिज्ञातं हि अपरिज्ञातस्य लक्षणं भवति, यथाऽग्नेर्धूम इति, लक्ष्यलक्षणयोश्च परस्परं सम्बन्धः प्रसिद्धः, प्रयोक्ता लक्षणे प्रयुक्ते लक्ष्यं प्रति साकाङ्क्ष इति पूर्वक्रियायां लक्षणभूतायां लक्ष्यभूताऽन्या क्रिया प्रयोक्त्राऽपेक्ष्यत एव ॥ ५. २. १०. ॥

## कृतास्मरणाऽतिनिह्नवे परोक्षा । ५. २. ११. ॥

**त० प्र०—कृतस्यापि व्यापारस्य चित्तव्याक्षेपादिनाऽस्मरणेऽत्यन्तापह्नवे वा गम्यमाने भूतेऽनद्यतनेऽर्थे वर्तमानाद् धातोः परोक्षाविभक्तिर्भवति । अपरोक्षकालार्थ आरम्भः । सुप्तोऽहं किल विललाप, मत्तोऽहं किल विचचार, चिन्तयन् किलाहं शिरः कम्पयांबभूव, अङ्गुलिं स्फोटयामास । अतिनिह्नवे—कश्चित् केनचिदुक्तः–कलिङ्गेषु त्वया ब्राह्मणो हतः, स तदपह्नुवान आह—कः कलिङ्गान् जगाम को ब्राह्मणं ददर्श, नाहं कलिङ्गान् जगाम, इत्यत्यन्तमपह्नुते । अतिग्रहणादेकदेशापह्नवे ह्यस्तन्येव—न कलिङ्गेषु ब्राह्मणमहमहनम् ॥११॥**

**श० म० न्यासानुसन्धानम्—कृता०।** परोक्षकालविषयिणी परोक्षा प्रथममध्यमपुरुषयोः सम्भवत्यपि तत्रान्यस्य कर्तृत्वेन तस्य क्रियायाः परोक्षत्वस्य सम्भवात्, उत्तमपुरुषे तु प्रयोक्तैव कर्तेति तस्य स्वव्यापारापरोक्षत्वमसम्भवि व्यापारस्य स्वेन क्रियमाणतया प्रत्यक्षत्वाव्यतिरेकादिति तत्र परोक्षां साधयितुमिदं सूत्रमारभ्यते। कृतस्य स्वव्यापारस्य स्मरणं स्यादेवेति कथं कृतास्मरणमित्याशङ्कायां स्वव्यापारस्यास्मरणोपपादनप्रकारमाह—**कृतस्यापि व्यापारस्य चित्तव्याक्षेपादिनाऽस्मरणे** इति—व्यापारकरणावसरे तदनुभवसम्भवेऽपि शैघ्र्यातिशैघ्र्येण चेतसो विषयान्तरगमनशीलत्वात् तदानीमन्तरान्तरा विषयान्तरेषु निक्षेपणाद् दृढसंस्काराभावेन कालान्तरे तत्संस्कारलोपाद् सम्भवति कृतास्मरणम्, संस्कारदार्ढ्येऽपि महारोगादिना तन्नाशेन चित्तविक्षेपणात्, निद्रादिना वा उन्मादादिना वा चित्तविक्षेपणात् कृतास्मरणमिति। अतिनिह्नवशब्दं व्याचष्टे—**अत्यन्तापह्नवे** इति—'कृतस्यापि व्यापारस्य' इत्येतदत्रापि सम्बध्यते, एवं च कृतस्यापि व्यापारस्य केनचित् कारणेन योऽत्यन्तोऽपह्नवोऽपलापस्तस्मिन् क्रियमाणेऽपि, प्रत्यक्षायाः क्रियायाः परोक्षत्वसम्भवेन तत्रापि परोक्षा विधीयत इति भावः। **अपरोक्षकालार्थ आरम्भः** इति—तादृशस्थले कदाचिदप्यप्रत्यक्षत्वाभावेन तत्र परोक्षाया अप्राप्तेस्तद्विधानार्थोऽयमारम्भ इति भावः। उदाहरति—**सुप्तोऽहं किल विललापे**ति—किल संप्रश्न-वार्तयोः। विपूर्वस्य "लप व्यक्ते वचने" इत्यस्य परोक्षाणवि—**विललापे**ति, स्वापसमये चित्तस्य निद्राधीनतया विक्षिप्तत्वेऽपि कृतस्य व्यापारस्य प्रत्यक्षत्वमुपपन्नम्। न चाप्रत्यक्षविषयीभूतस्यार्थस्य पश्चादपि कथं स्मरणम्, अनुभवजन्यं ज्ञानं स्मृतिरिति लक्षणादिति वाच्यम्, स्वेन कृतस्य व्यापारस्य सर्वथानुभवाभावस्याशक्यतया तस्मिन् कालेऽनुभवस्यानुव्यवसायाभावेऽपि तस्य वस्तुतो जातत्वेन स्मरणसम्भवात्। 'चित्तविक्षेपादिना' इत्यत्रादिपदेन ग्राह्याया मत्तताया उदाहरणमाह—**मत्तोऽहं किल विचचारे**ति—विपूर्वस्य "चर भक्षणे च" चकाराद् गतौ, इति 'चर्' धातोः परोक्षाणवि **विचचारे**ति। अत्रापि विचरणसमये मदपरवशतया चेतसः 'अहं विचरामि' इत्यनुभवसत्त्वेन तदनुव्यवसायस्य [ अहं स्वकृतं विचरणमनुभवामीतिरूपस्य ] अभावेऽपि प्रत्यक्षत्वमुपपन्नमिति परोक्षत्वासम्भवः। एवं चिन्ताया उदाहरणमाह—**चिन्तयन् किलाहं शिरः कम्पयांबभूव, अङ्गुलिं स्फोटयामासे**ति—अत्रापि चिन्तापरवशतया चेतसः 'अहं शिरःकम्पनमङ्गुलिस्फोटनं करोमि' इत्यनुभवसत्त्वेन तदनुव्यवसायाभावेऽपि प्रत्यक्षत्वमुपपन्नमिति परोक्षत्वासंभवः। **अतिनिह्नवे** इति—निह्नवो वस्तुस्थितेर्गोपनम्, अतिशयितो निह्नवोऽतिनिह्नवः, येन व्यापारेण निह्नोतुमभिलषितो विषयो दृढतया निह्नुतः स्यात् तत्रेति भावः। तत्र निह्नवहेतूपपादनगर्भं तत्प्रकारमाह—**कश्चित् केनचिदुक्त** इत्यादि, त्वया कलिङ्गेषु ब्राह्मणो हत इति कश्चित् केनचित् उक्त इत्यन्वयः। **कः कलिङ्गान् जगामे**ति—आत्मनो गमनस्य शङ्कामपि वारयति, कश्चिदन्योऽपि गतो नवेत्यपि नाहं जानामीति। **नाहं कलिङ्गान् जगामे**त्यादि तु पूर्ववाक्यस्याशयमात्रं तथापि तदर्थानुवादकत्वेन तत्रापि परोक्षा भवति। **इत्यत्यन्तमपह्नुते** इति—गमनं विना तत्र क्रियायाः स्वत एवासम्भवः, अन्यत्रापि तत्सम्भवे ब्राह्मणादर्शनमेव तद्धननस्यासम्भवताप्रदर्शकम्। तत्र कः कलिङ्गान् जगामेत्यादिपूर्ववाक्येऽन्यस्य कर्तृत्वेन तत्र परोक्षायाः स्वतः प्राप्तिः, तदाशयकोत्तरवाक्ये [ नाहं कलिङ्गान् जगाम न ब्राह्मणं ददर्शेत्यत्र ] आत्मन एव कर्तृत्वेन तत्र परोक्षाया उत्तमपुरुषस्याप्राप्तौ सूत्रमिदमारब्धमिति भावः। नन्वपह्नव एव परोक्षा विधीयताम्, यत्रातिनिह्नवस्तत्रापि स्यादेवेति 'अति'ग्रहणं व्यर्थमित्याशङ्कां वारयन्नाह—**अतिग्रहणादेकदेशापह्नवे ह्यस्तन्येव—न कलिङ्गेषु ब्राह्मणमहमहन**मिति—कलिङ्गेषु त्वया ब्राह्मणो हत इति प्रश्ने वस्तुद्वयं निह्नोतव्यं—कलिङ्गगमनं ब्राह्मणहननं च, तत्र द्वयोरपह्नवेऽत्यन्तापह्नवः, एकस्यापह्नवे च वाक्यस्यैकत्र लब्धप्रसरतया कथञ्चित् प्रामाण्यशङ्का तिष्ठतीति तत्र नात्यन्तापह्नवो भवतीति तत्र न परोक्षा किन्तु ह्यस्तन्येवेति ॥ ५. २. ११. ॥

## परोक्षे । ५. २. १२. ॥

**त० प्र०—अक्षाणां परः-परोक्षः, अत एव निर्देशात् साधुः, अव्युत्पन्नो वा असाक्षात्कारार्थः। भूतानद्यतने परोक्षेऽर्थे वर्तमानाद् धातोः परोक्षा विभक्तिर्भवति।**

**यद्यपि साध्यत्वेनानिष्पन्नत्वात् सर्वोऽपि धात्वर्थः परोक्षस्तथापि प्रत्यक्षसाधनत्वेन तत्र लोकस्य प्रत्यक्षत्वाभिमानोऽस्ति, यत्र स नास्ति स परोक्षः। जघान कंसं वासुदेवः, भरतं विजिग्ये बाहुबली, धर्मं दिदेश तीर्थंकरः ॥१२॥**

---

**श० म० न्यासानुसन्धानम्—परोक्षे**। परोक्षशब्दं व्युत्पादयति—**अक्षाणां परः—परोक्षः** इति—यद्यपि परशब्दस्य दिग्वाचकतया तद्योगे पञ्चमी युक्तेति अक्षेभ्यः पर इति विग्रह उचितः स्यात् तथापि सम्बन्धसामान्यषष्ठ्या सर्वस्य पूर्वापरीभावादिसम्बन्धस्य व्यापनान्न दोषः। अथवा दूरार्थकोऽत्र परशब्दः, तद्योगे च "आरादर्थे" [२. २. ७८.] इति पञ्चमीविकल्पनात् पक्षे षष्ठी। नन्वेवं षष्ठीसमासेऽक्षशब्दस्यैव पूर्वनिपातो युक्तो न परशब्दस्येति चेत्? राजदन्तादित्वाददोषः। नन्वेवं सत्यपि पराक्ष इत्येव स्यात् कथं परोक्ष इति चेत्? अत्राह—**अत एव निर्देशात् साधुरि**ति—सूत्रनिर्देशरूपनिपातनादेव परशब्दस्य पूर्वप्रयोगोऽक्षशब्दाकारस्योत्वं च भवतीति भावः। इन्द्रियसामान्यवाची अक्षशब्दः। अक्षशब्दस्यानेकार्थत्वेऽपि प्रकरणादिना इन्द्रियसामान्यार्थे प्रतीतिः सुलभा। एवं चेन्द्रियेभ्यः परमिन्द्रियगोचरतामनापन्नं वस्तु परोक्षमिति फलति। व्युत्पत्तिपक्षाश्रयणे निपातनादिक्लेशाश्रयणमपहातुमव्युत्पत्तिपक्षमाह—**अव्युत्पन्नो वा असाक्षात्कारार्थः** इति—अप्रत्यक्षार्थे रूढ एव परोक्षाशब्द इति भावः।

पाणिनीये च अक्षिशब्देन सहास्य विग्रहः प्रदर्शितः। तथा चाशङ्कितं भाष्ये "परोक्षे लिट्" [३. २. ११५.] इति सूत्रे—"परोक्षे इत्युच्यते किं परोक्षं नाम। परमक्षणः परोक्षम्। अक्षि पुनः किम्। अश्नोतेरयमौणादिकः करणसाधनः सिप्रत्ययः। अश्नुतेऽनेनेति-अक्षि। यद्येवं पराक्षमिति प्राप्नोति। नैष दोषः—"परोभावः परस्याक्षे परोक्षे लिटि दृश्यताम्"। परशब्दस्याक्षशब्दे उत्तरपदे परोभावो वक्तव्यः। "उत्वं वादेः परादक्ष्णः"। अथवा परशब्दादुत्तरस्याक्षिशब्दस्योत्वं वक्तव्यम्। "सिद्धं वाऽस्मान्निपातनात्"। अथवा निपातनादेवसिद्धं "परोक्षे लिट्" इति।

अयमाशयः—यद्यप्यक्षशब्दोऽपि कोशेष्विन्द्रियवाचकः प्रसिद्धस्तथापि तस्यानेकार्थवाचकत्वेनार्थान्तरपरतायाः सन्देहः स्यादित्याशयेनाक्षिशब्देन परशब्दस्य विग्रहं कृत्वा मयूरव्यंसकादित्वात् समासे अच्प्रत्ययान्ते टच्प्रत्ययान्ते वाऽक्षशब्दे परे परशब्दस्य परोभावः 'परो' इत्यादेशः, अथवा अक्षिशब्दादिभूतस्याकारस्यैवोत्वं निपात्यते। यद्वा सूत्रे निपातनादेव परोक्षशब्दस्य निर्भागस्येन्द्रियागोचरार्थवाचिनः सिद्धिरिति भावः। तत्र यद्यप्यक्षिशब्दश्चक्षुःपर्यायतया प्रसिद्धस्तथापि व्याप्त्यर्थकाश्धातुनिष्पन्नतया सर्वमिन्द्रियमक्षिशब्दो वक्तीति–इन्द्रियगोचरतामनापन्नं वस्तु परोक्षशब्देनाभिधेयमिति। इदं च सर्वेन्द्रियार्थवाचकत्वमस्य वृत्तिविषय एवोक्तभाष्यप्रामाण्यात्, अन्यथा तथा कल्पनेऽतिप्रसङ्गात्।

परोक्षशब्दस्याव्यावर्तकत्वमाशङ्कते—**यद्यपि साध्यत्वेनानिष्पन्नत्वात् सर्वोऽपिधात्वर्थः परोक्षः** इति—निष्पन्नं हि वस्तु इन्द्रियगोचरं भवति, अनिष्पन्नेन सह तस्य सन्निकर्षाभावात् तेन तस्य ग्रहीतुमशक्यत्वात्। धात्वर्थश्च क्रिया, क्रिया च सर्वत्र साध्यैव, तथा चोक्तं हरिणा—

"यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥" इति।

अस्यार्थः—सिद्धमसिद्धं वा सर्वं वस्तु, आश्रितं क्रमरूपं पौर्वापर्यभावो येन तथात्वात् साध्यत्वेनाभिधीयते, सैव च क्रियेत्यभिधीयते। एवं च स्वतः साध्यायास्तस्या इन्द्रियगोचरतायाः सम्भव एव नेति सर्वाऽपि क्रिया परोक्षैवेति परोक्षशब्दोऽव्यावर्तक एवातिप्रसङ्गजनकश्चेति भावः। उत्तरयति—**तथापि प्रत्यक्षसाधनत्वेन तत्र लोकस्य प्रत्यक्षत्वाभिमानोऽस्ति, यत्र स नास्ति स परोक्षः** इति—क्रियायाः साधनानि प्रत्यक्षाणि, तद्गतं प्रत्यक्षत्वं च तज्जन्यायां क्रियायामारोप्य तस्याः प्रत्यक्षत्वव्यवहारः, यत्र च क्रियासाधनविषयकं प्रत्यक्षं नास्ति स परोक्ष इति तत्रास्य प्रवृत्तिविषय इति सार्थकं तस्य ग्रहणमिति भावः।

अत्रेत्थं निर्णीतं पाणिनीये भाष्ये "परोक्षे लिट्" [३. २. ११५.] इति सूत्रे—"कस्मिन् पुनः परोक्षे लिड् भवति? काले। नैव कालाधिकारोऽस्ति॥ एवं तर्हि धातोरिति वर्तते, धातौ परोक्षे। धातुर्नं शब्दो, न च शब्दस्य प्रत्यक्षपरोक्षतायां सम्भवोऽस्ति। शब्दे-

ऽसम्भवादर्थे कार्यं विज्ञास्यते, परोक्षे धातौ—परोक्षे धात्वर्थे इति। कः पुनर्धात्वर्थः? क्रिया, क्रियायां परोक्षायामिति। यद्येवं ह्योऽपचदित्यत्रापि लिट् प्राप्नोति। किं कारणं?। क्रिया नामेयमत्यन्तापरदृष्टाऽनुमानगम्याऽशक्या पिण्डीभूता निदर्शयितुम्। यथा गर्भो निर्लुण्ठितः। एवं तर्हि साधनेषु परोक्षेषु। साधनेषु भवतः कः सम्प्रत्ययः। यदि तावद् गुणसमुदायः साधनम्, साधनमप्यनुमानगम्यम्। अथान्यद् गुणेभ्यः साधनम्, भवति प्रत्यक्षपरोक्षतायां सम्भवः॥ अथ यदाऽनेन रथ्यायां तण्डुलोदकं दृष्टम्, कथं तत्र भवितव्यम्?। यदि तावत् साधनेषु पपाचेति भवितव्यम्। भवन्ति हि तस्य साधनानि परोक्षाणि॥ अथ य एते क्रियाकृता विशेषाः सीत्काराः फुत्काराश्चेति तेषु परोक्षेषु। एवमपि पपाचेति भवितव्यम्॥ कथं जातीयकं पुनः परोक्षं नाम। केचित् तावदाहुः—वर्षशतं परोक्षमिति। अपर आहुः—कुड्यकटान्तरितं परोक्षमिति। अपर आहुः—व्यहवृत्तं त्र्यहवृत्तं चेति" इति।

अयमाशयः—परोक्षे सति लिट् [ परोक्षा ] विधीयते, कस्मिन् परोक्षे इति नोच्यते। धातोरधिकारेऽपि तस्य शब्दरूपतया तस्योच्चार्यमाणस्यानुभूततया प्रत्यक्षत्वेन परोक्षत्वासम्भवात्। एवं च विशेषणत्वे सम्भवव्यभिचारी कारणमिति व्यभिचाराभावाद् यथा प्रत्यक्षत्वं शब्दे न विशेषणं तथा तस्य परोक्षत्वासंभवात् परोक्षत्वमपि तस्य विशेषणं न भवितुमर्हति। इत्थं च धातोः परोक्षत्वं न विशेषणमिति शब्देऽसम्भवादर्थे विशेषणं भविष्यति। तत्रेयं पृच्छा-यत्र भवान् परोक्षत्वं विशेषयति स धात्वर्थः कः? यदि एकैकः क्षणः सः तर्हि तस्य प्रत्यक्षत्वपरोक्षत्वसम्भवाद् विशेषणस्य युक्तत्वम्। यदि चावान्तरानेकक्रियासमुदायाधिकरणः क्षणसमुदायो धात्वर्थस्तर्हि तस्य युगपदसन्निधानादप्रत्यक्षत्वाव्यभिचारात् परोक्षत्वं न विशेषणं भवितुमर्हतीति। तत्रान्तिमपक्षमेव धात्वर्थत्वेन समर्थयति–क्रियेति–अवयवसमुदायरूपेत्यर्थः, तस्याश्च युगपदेकत्र दर्शयितुमशक्यत्वेन पूर्वोक्तशङ्काग्रस्तत्वादाह—एवं तर्हि साधनेषु परोक्षेष्विति–तत्र साधनत्वेन लोके करणादिशक्तिषु तादृशशक्तिमत्सु च व्यवहारो दृश्यते, तत्र शक्तिसमुदायस्य साधनत्वपक्षे पूर्वोक्त एवाप्रत्यक्षत्वदोषः, तस्मात् साधनत्वशक्तिमद् द्रव्यमिह साधनशब्देनाभिप्रेतमिति मन्तव्यम्। तथा च साधनरूपद्रव्यप्रत्यक्षत्वे क्रियायाः प्रत्यक्षत्वाभिमानस्तदप्रत्यक्षत्वे च परोक्षत्वाभिमान इति निष्कर्षः। परोक्षत्वविषये चानेकानि मतानि, तान्यपि स्वरूपतो निदर्शयितुमुपन्यस्तवान् भाष्यकारो न तु तत्र क्वचिदप्यात्मन आग्रहः।

स्वमते तु साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वं परोक्षत्वमित्येव सामान्यतो लक्षणम्। एवं चेन्द्रियागोचरसाधनसाधितानद्यतनक्रियावाचिनः परोक्षा भवतीति सूत्रार्थो निर्णीत इति। **जघान कंसं वासुदेवः** इति—कंसहननक्रियायां साधनत्वेनाभिमतानां द्रव्याणां परोक्षत्वेन धातोः परोक्षसाधनत्वमिति भावः। एवमन्यत्रापि साधनपरोक्षत्वेन परोक्षा साध्येति। "हनंक् हिंसागत्योः" अतो णवि द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे "गहोर्जः" [ ४. १. ४०. ] इति हस्य जकारे, परस्य हस्य "अङे हि-हनो हो घः पूर्वात्" [ २. ४. ६६. ] इति घकारे च—**जघानेति**। **भरतं विजिग्ये बाहुबलीति**—"जि ज्रि अभिभवे" केचित् तु "जि जये" इत्यकर्मकत्वार्थं पृथक् पठन्ति, जयः सर्वोत्कर्ष इति च व्याचक्षते, तदयुक्तम्—उत्कर्षस्याभिभवविशेषत्वात् सकर्मकत्वाकर्मकत्वयोश्च विवक्षानिबन्धनत्वात्। तथा च जयति जिन इत्यकर्मको जयति शत्रूनिति सकर्मकः। जिधातोः परस्मैपदित्वेऽपि "परा-वेर्जेः" [ ३. ३. २८. ] इत्यात्मनेपदे परोक्षाया एप्रत्यये द्वित्वे "जेर्गिः सन्-परोक्षयोः" [ ४. १. ३५. ] इति परस्य जेर्गिभावे "योऽनेकस्वरस्य" [ २. १. ५६. ] इति यत्वे—**विजिग्ये** इति। भरतो बाहुबली च ऋषभदेवस्य पुत्रौ, तत्र भरतश्चक्रवर्ती, बाहुबली च जन्मान्तरकृतमुनिजनामलसेवया चक्रितोऽपि बलीयान् जातः, सार्वभौमत्वाभिमानेन भरतेन संग्रामे कृते बाहुबलिना स पराजित इतीह वृत्तम्। **धर्मं दिदेश तीर्थकरः इति**—"दिशींत् अतिसर्जने" अतिसर्जनं त्यागः [ दानम् ] अतो णवि—**दिदेश**, उपदिदेशेत्यर्थः, तीर्यतेऽनेनेति तीर्थम्, तीर्थं करोतीत्येवंशीलः—**तीर्थकरः**, जिनेश्वर इत्यर्थः॥ ५. २. १२.॥

## ह-शश्वद्-युगान्तःप्रच्छ्ये ह्यस्तनी च ॥ ५. २. १३.॥

**त० प्र०—पञ्चवर्षं युगं, तस्यान्तर्मध्यं, तत्र पृच्छ्यते**

**यः स युगान्तःप्रच्छ्यः। हे शश्वति च प्रयुज्यमाने, युगान्तः-प्रच्छ्ये च भूतानद्यतने परोक्षेऽर्थे वर्तमानाद् धातोर्ह्यस्तनी परोक्षा च विभक्ती भवतः। इति हाऽकरोत्, इति ह चकार, शश्वदकरोत्, शश्वच्चकार। प्रच्छ्ये—किमगच्छस्त्वं मथुराम्, किं जगन्थ त्वं मथुराम्। ह-शश्वद्-युगान्तःप्रच्छ्य इति किम्? जघान कंसं किल वासुदेवः। वेत्येव कृते भूतानद्यतनमात्र भाविन्या ह्यस्तन्याः पक्षे सिद्धौ ह्यस्तनीविधानं स्मृत्यर्थयोगेऽपि ह्यस्तन्येव यथा स्यान्न भविष्यन्तीत्येवमर्थम्, तेन स्मरसि मित्र! कश्मीरेष्वितिहाध्यैमहि, अभिजानासि चैत्र! शश्वदध्यैमहि, इत्यादि सिद्धम्। क्रियान्तराकाङ्क्षायां तु ह-शश्वत्-प्रयोग एव न संभवतीति नोदाह्रियते ॥ १३ ॥**

---

**श० म० न्यासानुसन्धानम्—ह-शश्वद्०।** सूत्रे पठितं युगान्तःप्रच्छ्यशब्दं व्याचष्टे—**पञ्चवर्षं युगमिति**—सन्ति बहूनि युगपरिमाणानि स्वस्वमतानुसारं कल्पितानि पूर्वैः, तत्रेहेष्टं युगपरिमाणं पञ्चवर्षमितमेव, पञ्च वर्षाणि परिमाणमस्येत्यर्थे विहितस्य प्रत्ययस्य लुपा पञ्चवर्षमिति रूपं निष्पद्यते, **तस्यान्तर्मध्यमिति**—मध्यत्वं च तदन्तर्गतत्वमेव, न तु समानाद्यन्तान्तरालवर्तित्वम्, **तत्र पृच्छ्यते यः स** इति—तत्र स्थितेषु साधनादिषु विषये यः पृच्छ्यत इत्यर्थः, स तु भूतार्थस्य विशेषणम्। **ह्यस्तनी परोक्षा चेति**—यद्यपीदृशे विषये परोक्षाया एव प्रवृत्तिस्तथापि विधानसामर्थ्यादुभयं भवतीति भावः। **इति हाऽकरोदिति** ह्यस्तनी, **इतिह चकारेति** परोक्षा, अत्र 'इति' 'ह' इत्यव्ययद्वयं तत्र 'इति' शब्दः "हेतौ, प्रकाशने, निदर्शने, प्रकारे अनुकर्षे, समाप्तौ, प्रकरणे, स्वरूपे, सान्निध्ये, विवक्षानियमे, मते, प्रत्यक्षे, अवधारणे, व्यवस्थायाम्, परामर्शे माने, इत्यमर्थे, प्रकर्षे उपक्रमे च" इति शब्दस्तोममहानिधिः, तत्रैव च 'ह'शब्दः "पादपूरणे, सम्बोधने, नियोगे, क्षेपे, निग्रहे, निन्दायाम्, प्रसिद्धौ च" इति, 'इतिह' इत्यव्ययसमुदायो वा, स चोपदेशपरम्परायाम्, यथा—अत्र वटे यक्ष इत्युपदेशपरम्परैव, न तु केनापि दृष्ट्वा तथा कथितमिति शब्दस्तोममहानिधिः, अभिधानचिन्तामणौ तद्वृत्तौ चेत्थम्—"इतिह स्यात् सम्प्रदाये" इति। वृत्तं जिहीते-इतिह, अव्ययसमुदायो वा, यथा—"इतिह स्माहुराचार्याः" इति। प्रकृते च यथासम्भवं योजना कार्या। 'शश्वत्'शब्दो नैरन्तर्ये पुनःपुनरर्थे चेति शब्दस्तोममहानिधिः, शश्वता योगे ह्यस्तन्याम्—**शश्वदकरोदिति**, परोक्षायां तु—**शश्वच्चकारेति**। प्रच्छ्ये ह्यस्तन्याम्—**किमगच्छस्त्वं मथुरामिति**, परोक्षायां तु—**किं जगन्थ त्वं मथुरामिति**—मथुरागमनं हि न युगतो दूरवर्ति, आसन्नस्यैवात्र पृच्छाविषयत्वात्, ततोऽधिकदिनस्थस्य विषयतायां तु परोक्षैव स्यात्। पदकृत्यं पृच्छति—**ह-शश्वद्-युगान्तःप्रच्छ्य इति किमिति**, उत्तरयति—**जघान कंसं किल वासुदेवः** इति—कंसवधोऽत्र पृच्छ्यमानः, स चेदानींतनप्रयोक्तुरपेक्षया न युगान्तर्वर्ती ततः पूर्वमेव वृत्तत्वात्, एवं न हेन नवा शश्वता योग इति नास्य प्रवृत्तिरिति परोक्षैव भवति। सूत्रस्योभयविभक्तिविधायकत्वं समर्थयति—**वेत्येव कृते** इत्यादि—विकल्पेन परोक्षाविधाने हि पक्षेऽनद्यतनभूतार्थभाविनी ह्यस्तनी विभक्तिः स्यादेवेति सिद्धस्य विधानं नियमार्थमेव, नियमेन च योऽर्थो लभ्यते तमाह—**स्मृत्यर्थयोगेऽपि ह्यस्तन्येवेति**—'अयदि स्मृत्यर्थे भविष्यन्ती' [ ५. २. ९. ] इति सूत्रेण स्मृत्यर्थयोगे भूतानद्यतने भविष्यन्ती विहिता, सा च ह्यस्तन्या अपवाद इति विना नियमं सा वारयितुं न शक्यते इति भावः। नियमफलमाह—**तेन 'स्मरसि मित्र! कश्मीरेष्वितिहाध्यैमहि, अभिजानासि चैत्र! शश्वदध्यैमहि' इत्यादि सिद्धमिति**—नियमबलादिह भविष्यन्तीं प्रबाध्य ह्यस्तन्येव भवतीति भावः। ननु यथा "अयदि स्मृत्यर्थे०" इति भविष्यन्त्या बाध उदाहृतस्तथाऽऽकाङ्क्षायां "वाऽऽकाङ्क्षायाम्" [ ५. २. १०. ] इति भविष्यन्त्या अपि बाध उदाहरणीयः, स च नोदाहृत इति वृत्तिकारस्य न्यूनतेत्याशङ्कायामाह—**क्रियान्तराकाङ्क्षायां तु ह-शश्वत्प्रयोग एव न सम्भवीति नोदाह्रियते** इति, अयमाशयः—'ह-शश्वत्'शब्दौ स्वभावतोऽर्थान्तरानाकाङ्क्षे परिपूर्णे वाक्ये प्रयुज्येते इति क्रियान्तराकाङ्क्षवाक्ये तत्प्रयोगस्यासम्भव इति तदर्थकोदाहरणानुक्तिः। तथा च तत्र ह-शश्वत्प्रयोगे नाकाङ्क्षा, अनाकाङ्क्षायां च न तत्प्रयोग इति तत्र स्वभावत एव ह्यस्तनी स्यादिति। "डुकृंग् करणे" इति

कृधातोर्ह्यस्तन्या दिवि उविकरणे धातोर्विकरणस्य च गुणेऽडागमे च—**अकरोत्**, परोक्षाणवि तु द्वित्वे पूर्वस्य ऋतोऽति कस्य चे, परस्य ऋतो वृद्धौ च—**चकार**। "गम्लृं गतौ" इति 'गम्'धातोर्ह्यस्तन्याः सिवि शवि "गमिषद्यमश्छः" [ ४. २. १०६. ] इति मस्य छादेशे "स्वरेभ्यः" [ १. ३. ३०. ] इति छद्वित्वे पूर्वस्य "अघोषे प्र०" [ १. ३. ५०. ] इति चकारेऽडागमे च—**अगच्छः**, परोक्षाथवि तु द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे गस्य जे, "सृजि-दृशि०" [ ४. ४. ७८. ] इतीटो विकल्पनादिडभावे "म्नां०" [ १. ३. ३९. ] इति मस्य ने—**जगन्थ**। **'जघान'** इति तु प्राग्वत्। "इङ्क् अध्ययने" नित्यमधिपूर्वोऽयम्, अतो ह्यस्तन्या उत्तमपुरुषबहुवचने महिप्रत्यये वृद्धौ—**अध्यैमहि** ॥ ५. २. १३. ॥

## अविवक्षिते । ५. २. १४. ॥

**त० प्र०—भूतानद्यतने परोक्षे परोक्षत्वेनाविवक्षितेऽर्थे वर्तमानाद् धातोर्ह्यस्तनी विभक्तिर्भवति । अभवत् सगरो राजा, अहन् कंसं वासुदेवः । एवं च परोक्षानद्यतने विवक्षावशादद्यतनी–ह्यस्तनी–परोक्षास्तिस्रो विभक्तयः सिद्धाः । तथा च—"अन्वनैषीत् ततो वाली न्यक्षिपच्चाङ्गदं सुग्रीवं प्रोचे सद्भावमागतः ।"**

**'राक्षसेन्द्रस्ततोऽभ्यषीत् सैन्यं समस्तं सोऽयुयुत्सयत् स्वयं युयुत्सयांचक्रे' । तथा—**

**"अभूवंस्तापसाः केचित् पाण्डुपत्रफलाशिनः ।**
**पारिव्राज्यं तदाऽऽदत्त मरीचिश्च तृषार्दितः ।" इति ॥१४॥**

**श० म० न्यासानुसन्धानम्—अवि ।** लोके सामान्यतो भूतमात्रे तिसृणां विभक्तीनां [ ह्यस्तनीपरोक्षाद्यतनीनां ] प्रयोगस्य लोकपारम्पर्येण प्रयुक्ततया तत्साधुत्वायेदं सूत्रमारभ्यते । **परोक्षात्वेनाविवक्षितेऽर्थे** इति—विवक्षातः कारकाणि भवन्तीति सर्वमतसिद्धतया, कारकपदस्य च कारकार्थविहितविभक्ति[ प्रत्यय ]–परत्वात्, कर्तृकारके च ह्यस्तन्यादिस्थाने विभक्तेर्विधानेन तासामपि कारकविभक्तित्वं स्पष्टमिति तासां विवक्षाधीनत्वस्यावश्यकत्वमिति न्यायसिद्धोऽयमर्थः सूत्रेणानूद्यत इति भावः । उदाहरति—**अभवत् सगरो राजा, अहन् कंसं वासुदेवः** इति—अत्र सगरभवनस्य कंसहननस्य च प्रयोक्तुरपेक्षया परोक्षानद्यतनकाले जातत्वेऽपि परोक्षत्वस्यात्राविवक्षणादनेन ह्यस्तनी जाता, "भू सत्तायाम्" इत्यतो ह्यस्तन्या दिवि शवि गुणेऽवादेशे प्रथमाकारलोपेऽडागमे च—**अभवत्**, एवं "हनंक् हिंसागत्योः" अतो ह्यस्तन्या दिवि तल्लोपेऽडागमे च—**अहन्**। विवक्षावशाद् विभक्तिव्यवस्थेति स्वीकारस्य प्रकृते फलमाह—**एवं च परोक्षानद्यते विवक्षावशादद्यतनी–ह्यस्तनी–परोक्षास्तिस्रो विभक्तयः सिद्धाः** इति, अयमाशयः—परोक्षानद्यतने विवक्षाचतुष्टयं भवति, तथाहि—१ परोक्षत्वस्यानद्यतनत्वस्य चाविक्षा, २ परोक्षत्वस्य विवक्षाऽनद्यतनत्वस्य चाविवक्षा, ३ परोक्षत्वस्याविवक्षाऽनद्यतनत्वस्य च विवक्षा, ४ परोक्षत्वस्यानद्यतनत्वस्य चोभयस्य विवक्षेति, तत्र आद्य-द्वितीययोः "विशेषाविवक्षा-व्यामिश्रे" [५. २. ५.] इत्यद्यतनी भवति, तृतीयायामनेन ह्यस्तनी, चतुर्थ्यां च "परोक्षे" [ ५. २. १२. ] इति परोक्षा भवतीति विभक्तित्रयं सिद्धं भवति । तिसृणामपि विभक्तीनां प्राचीनपरीक्षकसम्मतं प्रयोगमाह—**तथा च "अन्वनैषीत् ततो वाली न्यक्षिपच्चाङ्गदं सुग्रीवं प्रोचे सद्भावमागतः"** इति—ततः—तदनन्तरम्, वाली—पौराणिकप्रसिद्ध्या इन्द्रपुत्रः कपिराजः, अन्वनैषीत्—राममिति शेषः, अनुनयं कृतवानित्यर्थः, अनुनयशब्दो विनये प्रणिपाते प्रार्थने सान्त्वने च वर्तते, अङ्गदं—तन्नामकं स्वसुतम्, न्यक्षिपत्—निक्षिप्तवान्, सुग्रीवं—तन्नामकं वानरराजं स्वबन्धुं च, प्रोचे—प्रोक्तवान् कीदृशः सन् ? सद्भावं—साधुभावम्, आगतः—प्राप्तः, रामायणकथान्तर्गतमिदं वाक्यम् । रामकृतबाणप्रहारेण विवशो वाली पूर्वं राममाक्रुश्य तेन स्ववधस्य न्याय्यत्वं साधिक्षेपं प्रत्यायितः पश्चादङ्गदपालनादिकं हृदि निधाय बुद्ध्वा च तदीयमलौकिकं प्रभावमनुनयं कृतवानिति वाक्यप्रकरणसंगतिराभाति । अत्र च विषयस्य वस्तुतः परोक्षत्वेन सर्वत्र वाक्ये परोक्षाया एवौचित्येन तदविवक्षया 'अन्वनैषीत्' इत्यद्यतनी 'न्यक्षिपत्' इति ह्यस्तनी 'प्रोचे' इति परोक्षा, इत्येवं तिस्रोऽपि विभक्तयो विहिताः, एवमग्रिमवाक्येष्वपि । **"राक्षसेन्द्रस्ततो-**

**ऽभैषीत्, सैन्यं समस्तं सोऽयुयुत्सयत् स्वयं युयुत्सयांचक्रे"** इति–ततः–तस्मात्, राक्षसेन्द्रः–रावणः, अभैषीत्–भयं प्राप्तवान्, स–रावणः, समस्तं सैन्यम्, अयुयुत्सयत्–संग्रामरसिकं कृतवान्, स्वयं–स्वं, युयुत्सयांचक्रे–युद्धरसिकं चकार । अत्र 'अभैषीत्' इत्यद्यतनी, 'अयुयुत्सयत्' इति ह्यस्तनी, 'युयुत्सयांचक्रे' इति च परोक्षा । तथा—

**"अभूवंस्तापसाः केचित् पाण्डुपत्रफलाशिनः ।**
**पारिव्राज्यं तदाऽऽदत्त मरीचिश्च तृषार्दितः ॥"**

इति—'अभूवन्' इत्यद्यतनी, 'आदत्त' इति ह्यस्तनी च । श्रीऋषभदेवचरित्रान्तर्गतमिदं वर्णनम् । यदा भगवता ऋषभदेवेन सकलसाम्राज्यं विहाय दीक्षा गृहीता तदा कच्छमहाकच्छादिनृपकुमारादीनां चतुःसहस्र्याऽपि दीक्षा गृहीता, यौगलिककालत्वात् तदानींतना जना अन्नपानादिभिक्षाप्रदानविधिमजानन्तः कञ्चनकामिन्यादिकमग्रे धरन्तीति भगवता वर्षं यावद् भिक्षा न लब्धा, तत्र ये केचनासहिष्णवस्ते भगवतः पृथग्भूय गङ्गातीरं गत्वा तापसा जाताः पाण्डुवर्णपत्रफलादिभिक्षाहारं चक्रुः । एवं भगवतो देशनया प्रतिबुद्धः पौत्रो मरीचिरपि दीक्षितः, चारु च चारित्रं पालयामास, कर्मणो गहना गतिरिति स एकदा ग्रीष्मर्तौ घर्मबाहुल्येन तृषा च पीडितो भग्नचरणपरिणामो भूत्वा मुनिवेषं परावृत्य परिव्राजको जात इति जैनसम्प्रदाये । "णींग् प्रापणे" इति नीधातोरनुपूर्वादद्यतनीदिप्रत्यये सिचि देरादेरीति वृद्धौ सस्य षेऽडागमे च—**अन्वनैषीत्** । "क्षिपींत् प्रेरणे" निपूर्वादितो ह्यस्तन्या दिवि शेऽटि च—**न्यक्षिपत्** । प्रपूर्वाद् ब्रूगादेशाद् वचेः परोक्षाया एप्रत्यये य्वृति द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे समानदीर्घे च—**प्रोचे** । "ञिभींक् भये" इति भीधातोरद्यतनीदिप्रत्यये नीवत्—**अभैषीत्** । "युधिच् सम्प्रहारे" योद्धुमिच्छतीति सनि युयुत्सते, तं प्रयुङ्क्ते इति णिगि 'युयुत्सि' इति धातुः, ततो ह्यस्तनीदिवि शवि गुणेऽयादेशेऽटि च **अयुयुत्सयत्**, परोक्षाणवि तु परोक्षाया आमादेशे णेरयादेशे परोक्षान्तकृगोऽनुप्रयोगे च—**युयुत्सयांचक्रे** । "भू सत्तायाम्" अतोऽद्यतन्या अनि "सिज्-विदोऽभुवः" [ ४. ३. ९२. ] इति पुसादेशाभावे, सिचि "पिबैतिदाभू०" [ ४. ३. ६६. ] इति तल्लोपे "भवतेः सिज्लुपि" [ ४. ३. १२. ] इति गुणप्रतिषेधे "धातोरिवर्णोवर्ण०" [ २. १. ५०. ] इत्युवादेशे "भुवो वः०" [ ४. २. ४३. ] इत्युपान्त्यस्य ऊकारेऽटि च—**अभूवन्** । "डुदांग्क् दाने" आङ्पूर्वादितो ह्यस्तनीतप्रत्यये ह्वादित्वाद् द्वित्वे पूर्वस्य ह्रस्वे आकारस्य "श्नश्चातः" [ ४. २. ९६. ] इति लोपे दस्य तेऽटि समानदीर्घे च—**आदत्त** ॥ ५. २. १४. ॥

## वाऽद्यतनी पुरादौ ॥ ५. २. १५. ॥

**त० प्र०—'परोक्षे' इति निवृत्तम् । भूतानद्यतने परोक्षे चापरोक्षे चार्थे वर्तमानाद् धातोः 'पुरा' इत्याद्युपपदेऽद्यतनी विभक्तिर्भवति वा । अपरोक्षे ह्यस्तन्याः परोक्षे तु परोक्षाया अपवादः । वावचनात् पक्षे यथाप्राप्ति ते अपि भवतः । अवात्सुरिह पुरा छात्राः, अवसन्निह पुरा छात्राः, ऊषुरिह पुरा छात्राः; तदाऽभाषिष्ट राघवः, तदाऽभाषत राघवः, बभाषे राघवस्तदा । भूतानद्यतनपरोक्षेऽद्यतनीं नेच्छन्त्यन्ये, एवमुत्तरसूत्रे पुरादियोगे वर्तमानाम् । हशश्वच्छब्दयोगेऽपि पुरादियोगे परत्वाद् विकल्पेनाऽद्यतनी–इति ह पुराऽकार्षीत्, अकरोत्, चकार; शश्वत् पुराऽकार्षीदकरोच्चकार । भूतमात्रविवक्षयाऽद्यतन्याः सिद्धौ पुरादियोगे तद्वचनं स्मृत्यर्थ-ह-शश्वत्-स्मयोगे सामान्यविवक्षयाऽद्यतनी न भवतीति ज्ञापनार्थम् ॥१५॥**

**श० म० न्यासानुसन्धानम्—वाऽद्य० । 'परोक्षे' इति निवृत्तम्**इति—व्याख्यानादिति भावः । 'भूते' 'अनद्यतने' इति च पदद्वयमनुवर्तत एव । 'परोक्षे' इत्यस्य निवृत्त्या च परोक्षेऽपरोक्षे चास्य प्रवृत्तिः, तदाह—**भूतानद्यतने परोक्षे चापरोक्षे चे**ति । **'पुरा' इत्यादावि**ति—आदिशब्दः प्रकारे, तेन पुराभिन्नः पुरासदृशश्च कालवाचकोऽव्ययशब्दो गृह्यते, स च 'तदा' इत्यादिः, तथा चोदाहरिष्यति—'तदाऽभाषत राघवः' इति । ननु निजनिजार्थे तिस्रोऽपि विभक्तयः स्युरेवेति सूत्रमिदमनर्थकमित्याशङ्क्य समाधत्ते—**अपरोक्षे ह्यस्तन्याः परोक्षे तु परोक्षाया अपवादः** इति—यथास्वं तासां सिद्धावपि परोक्षे परोक्षैव स्यान्नाद्यतनी, अपरोक्षेऽनद्यतने च ह्यस्तन्येव स्यान्नाद्यतनीत्युभयत्र तस्याः पाक्षिकप्रयोगायावश्यकं सूत्रमिदमिति भावः । **वावचनात् पक्षे यथा-**

**प्राप्ति ते अपि भवतः** इति—सूत्रे चाकरणात्, अन्यथा चशब्दं कुर्यादित्यर्थः । तिसृणामपि विभक्तीनां प्रयोगमुदाहरति—**अवात्सुरिह पुरा छात्राः, अवसन्निह पुरा छात्राः, ऊषुरिह पुरा छात्राः** इति—"वस निवासे" इति 'वस्' धातुः, ततोऽद्यतनीप्रथमत्रिकबहुवचनेऽनि सिचि "सिज्विदोऽभुवः" [ ४. २. ९२. ] इत्यनः पुसादेशे "व्यञ्जनानामनिटि" [ ४. ३. ४५. ] इत्युपान्त्यवृद्धौ "सस्तः सि" [ ४. ३. ९२. ] इति धातुसकारस्य तकारेऽटि च—**अवात्सुः** । ह्यस्तनीप्रथमत्रिकबहुवचनेऽनि शवि पूर्वाकारलोपेऽटि च—**अवसन्**, परोक्षाप्रथमत्रिकबहुवचने उसि य्वृति द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे समानदीर्घे च—**ऊषुः** । पुरादावित्यादिपदग्राह्येण तदाशब्देनोदाहरति—**तदाऽभाषिष्ट राघवः, तदाऽभाषत राघवः, बभाषे राघवस्तदेति**—"भाषि च व्यक्तायां वाचि" प्रकृतेः परश्चकारः प्रकृतिमनुकर्षति, तेन क्लेशिभर्भाषिश्च व्यक्तायां वाचि । इति 'भाष्' धातोरात्मनेपदेऽद्यतनीतप्रत्यये सिचि तस्यादावविटि सस्य षे तद्योगे तकारस्य टेऽटि च—**अभाषिष्ट**, ह्यस्तनीतप्रत्यये शवि अटि च—**अभाषत**, परोक्षाया एप्रत्यये द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे ह्रस्वे भस्य बे—**बभाषे** । मतान्तरमाह—**भूतानद्यतनपरोक्षेऽद्यतनीं नेच्छन्त्यन्ये, एवमुत्तरसूत्रे पुरादियोगे वर्तमानामिति** । ह-शश्वत्-पुराशब्दानां युगपत्प्रयोगे विभक्तिव्यवस्थामाह—**ह-शश्वच्छब्दयोगेऽपि पुरादियोगे परत्वाद् विकल्पेनाद्यतनी—इतिह पुराऽकार्षीत्, अकरोत्, चकार; शश्वत् पुराऽकार्षीत्, अकरोत्, चकारेति**—तत्रोभयोः सूत्रयोरुद्देश्यसत्त्वेऽपि परविप्रतिषेधेन व्यवस्थेत्यद्यतन्यपि स्यादेव पूर्वसूत्रस्य च पक्षे प्रवृत्तेरप्रतिहतत्वात्, पुराशब्दप्रयोगाभावे च सुतराम् । विवक्षावशादेव यथाभिलषितविभक्तिसिद्धावस्य वैयर्थ्यमिति पुनराशङ्कितं समाधत्ते—**भूतमात्रविवक्षयाऽद्यतन्याः सिद्धाविति**, तथा च सामान्यविवक्षायामद्यतनी विशेषविवक्षायां च यथास्वं ह्यस्तन्यादिरिति सूत्रविधेयार्थसिद्धिरिति प्रश्नार्थः । **स्मृत्यर्थह-शश्वत्-स्मयोगे** इति—एतेषां प्रयोगे सामान्यतो भूतार्थविवक्षा न शास्त्रकृत्सम्मतेति ज्ञापयितुमिदमिति भावः ॥ ५. २. १५. ॥

## स्मे च वर्तमाना । ५. २. १६. ॥

**त० प्र०—भूतानद्यतने परोक्षेऽपरोक्षे चार्थे वर्तमानाद् धातोः स्मशब्दे पुरादौ चोपपदे वर्तमाना विभक्तिर्भवति । इति स्मोपाध्यायः कथयति, पृच्छति स्म पुरोधसम्, वसन्तीह पुरा छात्राः, भाषते राघवस्तदा, "अथाह वर्णी विदितो महेश्वरः, यावद् गिरः खे मरुतां चरन्ति ।" [ कुमारसम्भवे ] आदिग्रहणमिह पूर्वत्र च प्रयोगानुसरणार्थम् । एवं च पुरादियोगेऽद्यतनी-ह्यस्तनी-परोक्षा-वर्तमानाश्चतस्रो विभक्तयः सिद्धाः, स्म-पुरायोगे तु परत्वाद् वर्तमानैव-नटेन स्म पुराऽधीयते । एवं—ह-शश्वत्-स्म-योगेऽपि— इतिह स्मोपाध्यायः कथयति, शश्वदधीयते स्म । त्रययोगेऽप्येवम्—न ह स्म वै पुराऽग्निरपरशुवृक्णं दहतीति ॥१६॥**

**श० म० न्यासानुसन्धानम्—स्मे० । भूतानद्यतने** इत्यादि सर्वं पूर्वसूत्रत एवानुवृत्तम् । चानुकृष्टं—**पुरादाविति** । तथा च स्मयोगेऽद्यतन्यादीनां बाधाय सूत्रमिदम् । **इति स्मोपाध्यायः कथयति**—स्मशब्दोऽतीतकालद्योतकश्चादिः, "कथण् वाक्यप्रबन्धे" वाक्यप्रतिबन्धे इत्यन्ये, प्रतिबन्धो विच्छेदोदीरणात्, वदने इत्यपरे, अदन्तोऽयं चुरादिः, तस्मात् णिचि "अतः" [ ४. ३. ८२. ] इत्यकारलोपे 'कथि' इति, अलोपस्य स्थानिवद्भावान्नोपान्त्यवृद्धिः, अतस्तिवि शवि गुणेऽयादेशे च—**कथयतीति**—कथितवानित्यर्थः । **पृच्छति स्म पुरोधसमिति**—"प्रछंत् ज्ञीप्सायाम्" "स्वरेभ्यः" [ १. ३. ३०. ] इति छस्य द्वित्वे पूर्वस्य चत्वे 'प्रच्छ्' इत्यतस्तिवि शविकरणे "ग्रह-व्रश्च०" [ ४. १. ८४. ] इति य्वृति—**पृच्छति**, पृष्टवानित्यर्थः, पुरोधसं पुरोहितम् । **वसन्तीह पुरा छात्राः** इति—"वस निवासे" अतोऽन्तिप्रत्यये शवि "लुगस्या०" [ २. १. ११३. ] इति पूर्वाकारलोपे—**वसन्ति**, निवासं कृतवन्तः, पुरादावित्यत्रादिशब्देन तदाग्रहणस्योदाहरणमाह—**भाषते राघवस्तदेति**—"भाषि व्यक्तायां वाचि" अतस्तेप्रत्यये शवि च—**भाषते**, उक्तवानित्यर्थः, राघवो रामचन्द्रः, तदा तदानीम् । एवमादिपदेन यावद्ग्रहणस्योदाहरणमाह—

**"अथाह वर्णी विदितो महेश्वरः, यावद् गिरः**

**खे मरुतां चरन्ति।"**

इदं कुमारसम्भवगतं पद्यार्धम्, वर्णी ब्रह्मचारी, मरुतां देवानाम्, "चर भक्षणे च" चाद् गतौ, अतोऽन्तौ शवि पूर्वाकारलोपे च—**चरन्ति,** गमनं कृतवन्त इत्यर्थः। पुरादावित्यत्रादिग्रहणस्य प्रयोजनं स्फोरयति—**आदिग्रहणमिह पूर्वत्र च प्रयोगानुसरणार्थमिति।** निष्कर्षमाह—**एवं च पुरादियोगेऽद्यतनी-ह्यस्तनी-परोक्षा-वर्तमानाश्चतस्रो विभक्तयः सिद्धाः** इति। केवलं स्मयोगे कस्यापि पूर्वसूत्रस्य बाधनमनावश्यकमिति तत्र निःसन्दिग्धाऽस्य प्रवृत्तिः, स्म-पुरादिशब्दानां समवाये च कथं व्यवस्थेति निर्णेतुमाह—**स्म-पुरायोगे तु परत्वाद् वर्तमानैव—नटेन स्म पुराऽधीयते** इति—पूर्वसूत्रेणाद्यतन्याः प्राप्तावप्यनेन पुरादियोगे विधानसामर्थ्यात् परत्वाच्चास्यैव प्रवृत्तिरुचितेति भावः। अन्यत्राप्येषैव व्यवस्थेत्याह—**एवं—ह-शश्वत्-स्म-योगेऽपि—इतिह स्मोपध्यायः कथयतिः, शश्वदधीयते स्मेति**—उभयत्रोभययोगः। न केवलमेकैकशः पार्थक्येन बाधनमिदं, निमित्तसमुदायसन्निपातेन प्रवर्तमानं सूत्रसमुदायमपि बाधते इत्याह—**त्रययोगेऽप्येवम्—न ह स्म वै पुराऽग्निरपरशुवृक्णं दहतीतीति**—परशुना वृक्णं छिन्नं परशुवृक्णं, न तथा—अपरशुवृक्णमग्निः **दहति**—भस्मीकृतवानित्यर्थः॥ ५. २. १७.॥

## ननौ पृष्टोक्तौ सद्वत्। ५. २. १७.॥

**त० प्र०—अनद्यतन इति निवृत्तम्। पृष्टस्य धात्वर्थस्योक्तिः प्रतिवचनं—पृष्टोक्तिः। ननुशब्दे उपपदे पृष्टोक्तौ भूतेऽर्थे वर्तमानाद् धातोः सद्वत्—वर्तमान इव वर्तमाना विभक्तिर्भवति। सद्वद्वचनादत्र विषये शत्रानशावपि भवतः। किमकार्षीः कटं चैत्र? ननु करोमि भोः! ननु कुर्वन्तं कुर्वाणं मां पश्य, किमवोचः किंचिच्चैत्र? ननु ब्रवीमि भोः! ननु ब्रुवन्तं ब्रुवाणं मां पश्य। पृष्टोक्ताविति किम्? नन्वकार्षीच्चैत्रः कटम्॥१७॥**

**श० म० न्यासानुसन्धानम्—ननौ०।** अस्य भूतमात्रे प्रवृत्तेरिष्टत्वादाह—**अनद्यतन इति निवृत्तमिति**—अपेक्षातोऽधिकारात्, तत्र मूलं तु लक्ष्यानुसारि व्याख्यानमेव। 'पृष्टोक्तौ' इत्यस्यानेकार्थसम्भवादिह ग्राह्यमर्थं ग्राहयति—**पृष्टस्य धात्वर्थस्येति**—पृष्टस्य—पृच्छाविषयीभूतस्य धात्वर्थस्य, उक्तिः—कथनमित्यर्थे सति परकृतधात्वर्थविषयकप्रश्नानुवाद एव ग्रहीष्यतेऽत उक्तिशब्दस्यार्थान्तरमाह—**उक्तिः प्रतिवचनमिति**—नहि प्रश्नानन्तरं प्रश्नस्यानुवादः कश्चन क्रियतेऽपि तु तत्प्रतिवचनमेवेति तदेव ग्राह्यमिति भावः। 'वर्तमाना' इत्यस्यानुवर्तनादेव वर्तमानाया विधाने सिद्धे सद्वदितिशब्देन तद्विशेषणवैयर्थ्यमाशङ्क्य समाधत्ते—**सद्वद्वचनादत्र विषये शत्रानशावपि भवतः** इति—वर्तमानामात्रविधानेऽस्या वर्तमानाया गौणत्वेन तस्याः स्थाने शतृ-अनशौ न स्याताम् *गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः* इति न्यायात्, अतः सद्वदिति वचनेन मुख्यं वर्तमानत्वमतिदिष्टमिति भावः। **किमकार्षीः कटं चैत्र?** इति प्रश्नः, **ननु करोमि भोः!** इति प्रतिवचनम्, अकार्षमित्यर्थः, 'नन्विति सम्बोधने' इति बालमनोरमाकारः, विरोधोक्तौ अनन्वयादौ चेति त्वाचार्यः, 'भोस् अनुशयसंबोधनयोः' इत्यप्याचार्यः, एवं 'किम् प्रश्ने वितर्के च'। अथ प्रतिवचने शतृप्रयोगमानश्प्रयोगं चाह—**ननु कुर्वन्तं कुर्वाणं मां पश्येति। किमवोचः किञ्चिच्चैत्र?** इति प्रश्नः, **ननु ब्रवीमि भोः!** इति च प्रतिवचनम्, एवं प्रतिवचने शतरि आनशि च—**ननु ब्रुवन्तं ब्रुवाणं मां पश्येति।** "डुकृंग् करणे" इति कृधातुरुभयपदी, ततोऽद्यतन्या मध्यमपुरुषैकवचने सौ सिचि सेरादावीति वृद्धौ सस्य षत्वे सेरिदित्त्वात् सस्य विसर्गेऽटि च—**अकार्षीः**, वर्तमानामिवि उविकरणे धातोर्विकरणस्य गुणे—**करोमि,** अकार्षमिति तदर्थः। परस्मैपदमाश्रित्य शतरि उविकरणे धातोर्गुणेऽस्य "अः शित्युत्" [ ४. २. ८९. ] इत्युकारे विकरणस्य वादेशे 'कुर्वत्'शब्दस्य द्वितीयैकवचनेऽमि—**कुर्वन्तमिति**, एवमात्मनेपदमाश्रित्यानशि उविकरणे धातोर्गुणे अतोऽति उविकरणस्य च वादेशे नस्य च णत्वेऽमि—**कुर्वाणमिति**, कुर्वन्तं मामिति तदर्थः। एवं—"ब्रूग्क् व्यक्तायां वाचि" इति ब्रूधातुरपि उभयपदी, ततोऽद्यतनीसौ वचादेशे ततः "शास्त्यसू०" [ ३. ४. ६०. ] इत्यङि "श्वयत्यसूवच०" [ ४. ३. १०३. ] इति वोचादेशेऽटि—**अवोचः**, वर्तमानामिवि तु "ब्रूतः०" [ ४. ३. ६३. ] इतीति गुणेऽवादेशे च—**ब्रवीमीति**, उक्तवानहमिति तदर्थः। एवं प्रतिवचने परस्मैपदमाश्रित्य

"शत्रानशौ०" [ ५. २ २०. ] इति शतरि उवादेशे 'ब्रुवत्' शब्दस्य द्वितीयैकवचने—**ब्रुवन्तमिति**, आत्मनेपदं चाश्रित्यानशि उवादेशे नस्य णत्वे द्वितीयैकवचने—**ब्रुवाणमिति**, उक्तवन्तं मामिति तदर्थः। पदकृत्यं पृच्छति—**पृष्टोक्ताविति किमिति**, उत्तरयति—**नन्वकार्षीश्चैत्रः कटमिति**—अत्र न प्रश्नपूर्वकं प्रतिवचनमित्यद्यतन्येव भवतीति भावः ॥ ५. २. १७. ॥

## न-न्वोर्वा । ५. २. १८. ॥

**त० प्र०**—'न नु' इत्येतयोः शब्दयोरुपपदयोः पृष्टोक्तौ भूतेऽर्थे वर्तमानाद् धातोर्वा वर्तमाना विभक्तिर्भवति, सा च सद्वत्। किमकार्षीः कटं चैत्र? न करोमि भोः! न कुर्वन्तं न कुर्वाणं पश्य माम्; नाकार्षम्। कस्तत्रावोचत्? अहं नु ब्रवीमि, ब्रुवन्तं ब्रुवाणं नु मां पश्य; अहं न्ववोचम् ॥१८॥

**श० म० न्यासानुसन्धानम्—न-न्वो०।** इत्येतयोः **शब्दयोरुपपदयोरिति**—शब्दयोरिति कथनेन तदर्थकान्यशब्दप्रयोगेऽस्य प्रवृत्तिर्वारिता। न निषेधे, नु वितर्के पादपूरणे च। **किमकार्षीः कटं चैत्र?** इति प्रश्नः, **न करोमि भोः!** इति च प्रतिवचनम्; **न कुर्वन्तं न कुर्वाणं पश्य मामित्य**पि शत्रानशोः प्रतिवचनम्, करोमीति वाक्ये शतृप्रत्ययः, कुर्वे इति वाक्ये चानश्, कृतकार्यं मां पश्येत्यर्थः। अस्य **वैकल्पिकत्वात्** पक्षेऽद्यतनीत्याह—**नाकार्षमिति**–किमकार्षीरिति प्रश्नेऽद्यतन्याः प्रयोगेण प्रतिवचनेऽपि पक्षेऽद्यतन्येव प्रयुक्ता–नाकार्षमिति, यदि च ह्यस्तन्या प्रश्नः कृतः स्यात् तदा सैवोत्तरेऽपि पक्षे प्रयुज्येत, अथ च परोक्षायाः प्रयोगः स्यात् तदा परोक्षाऽपि पक्षे स्यादेव, किन्तु नात्राद्यतनादीनां विवक्षेति सामान्यभूतार्थकयाऽद्यतन्यैव प्रश्नस्तयैव च पाक्षिकमुत्तरमिति। तत्त्वबोधिनीकारादिभिस्तु–अनद्यतने तु पक्षे लङ् [ ह्यस्तनी ] इत्युक्तम्, तत् तु सामान्यस्य विशेषाव्यतिरिक्तत्वेन यदि सामान्येनाद्यतनी प्रयुज्येत कुतो ह्यस्तनी न प्रयुज्येत तस्या अपि सामान्यान्तर्गतत्वादित्याशयकम्। दीक्षितादिभिस्तु लुङेव [ अद्यतन्येव ] प्रयुक्ता, इहापि सैव। **कस्तत्रावोचदि**ति प्रश्नः, **अहं नु ब्रवीमि, ब्रुवन्तं ब्रुवाणं नु मां पश्ये**ति प्रतिवचनम्, प्रतिवचने पक्षेऽद्यतन्येवेत्याह—अहं न्ववोचमिति ॥ ५. २. १८. ॥

## सति । ५. २. १९. ॥

**त० प्र०**—सन्–विद्यमानो वर्तमान इत्यर्थः, स च प्रारब्धापरिसमाप्तः क्रियाप्रबन्धः। सत्यर्थे वर्तमानाद् धातोर्वर्तमाना विभक्तिर्भवति। भवति, अस्ति, घटं करोति, ओदनं पचति। 'जीवं न मारयति, मांसं न भक्षयति' इत्यादौ नियमः प्रारब्धोऽसमाप्तश्च प्रतीयते। 'इहाऽधीमहे, इह कुमाराः क्रीडन्ति' इत्यादौ क्रियान्तरव्यवधानेऽप्यध्ययनादिक्रियायाः प्रारम्भापरिसमाप्तिरस्त्येव। 'चैत्रो भुङ्क्ते' इत्यादावपि हि क्रियान्तरव्यवधानमशक्यपरिहारम्, सोऽपि ह्यवश्यं भुञ्जानो हसति जल्पति पानीयं वा पिबतीति। 'तिष्ठन्ति पर्वताः, स्यन्दन्ते नद्यः' इत्यादौ तु स्फुटैव प्रारम्भापरिसमाप्तिः। कथं तर्हि 'तस्थुः स्थास्यन्ति गिरयः' इति? भूत-भाविनां भरत-कल्किप्रभृतीनां राज्ञां याः क्रियास्तदवच्छेदेन पर्वतादिक्रियाणामतीतत्वा-ऽनागतत्वोपपत्तेर्न भूत-भाविप्रत्ययानुपपत्तिदोषः। एवं च विद्यमानकर्तृकेभ्योऽस्त्यर्थेभ्यो धातुभ्यः सर्वा विभक्तयो भवन्ति–कूपोऽस्ति, कूपो भविष्यति, कूपो भविता, कूपोऽभूत्, कूप आसीत्, कूपो बभूव ॥१९॥

**श० म० न्यासानुसन्धानम्—सति।** सूत्रार्थं व्याख्यातुं पदार्थमाह—**सन्–विद्यमानो वर्तमान इत्यर्थः** इति—यद्यपि वर्तमानेऽर्थे शतृप्रत्ययस्य विधाने 'सत्'शब्दस्य वर्तमानार्थत्वम्, तस्य वर्तमानार्थत्वे च तदर्थे विहिताया वर्तमानायाः स्थाने शतृविधानमिति प्रतीयतेऽन्योऽन्याश्रयः, तथापि शब्दानां नित्यत्वस्य वैयाकरणसम्मततया स्वभावत एव 'सत्'शब्दस्य वर्तमानार्थवाचित्वमित्यदोषः। वर्तमानत्वं परिष्करोति—**स च प्रारब्धापरिसमाप्तः क्रियाप्रबन्ध** इति—पूर्व–वाक्य-प्रयोगपूर्वक्षणेषु प्रारब्धोऽपि–साधयितुं प्रस्तुतोऽपि, न परिसमाप्तः क्रियाफलस्य विक्लित्यादेः शास्त्राधिगमादेश्चानुत्पन्नत्वादिति स प्रारब्धापरिसमाप्तशब्दव्यपदेश्य इति भावः। "भू सत्तायाम्" अतो वर्तमानातिवि शवि गुणेऽवादेशे च—**भवति**। "असक् भुवि" अतस्तिवि—**अस्ति**, अत्रात्मधारणानुकूलक्रियायाः प्रारब्धत्वम्, तदीयस्थितेरुत्तरत्रानुवर्तनाच्चापरिसमाप्तत्वं स्फुटम्। "डुकृंग्

करणे" अतस्तिवि उविकरणे धातोर्विकरणस्य च गुणे- **घटं करोतीति**। "डुपचींष् पाके" अतस्तिवि शवि च—**ओदनं पचतीति**। "मृत् प्राणत्यागे" अतो णिगि वृद्धौ 'मारि' इति, ततस्तिवि शवि गुणेऽयादेशे च—**जीवं न मारयति,** "भक्षण् अदने" अतो णिचि तिवि शवि च—**मांसं न भक्षयति, इत्यादाविति**- इत्यादिनियमवाक्येषु, जीवमारणाभावरूपस्य मांसभक्षणाभावरूपस्य चार्थस्यार्थान्तरैर्व्यवहितत्वात् परिसमाप्तत्वमवश्यमेष्टव्यमिति तत्र कथं वर्तमानेति शङ्कामपनेतुमाह—**नियमः प्रारब्धोऽपरिसमाप्तश्च प्रतीयते** इति —इह हि नाभावोऽर्थः किन्तु जीवहननं मांसभक्षणं च न कर्तव्यमित्येवंरूपो नियम आत्मधर्मो विवक्षितः, तस्य सर्वदाऽसमाप्तत्वेन वर्तमानाप्रयोग उचित एवेति। एवमन्यत्रापि क्रियान्तरतो व्यवच्छेदेऽपि वर्तमानत्वं द्रढयति—**'इहाधीमहे, इह कुमाराः क्रीडन्ति' इत्यादाविति**—"इङ्क् अध्ययने" नित्यमधिपूर्वोऽयम्, अतो वर्तमानाया उत्तमपुरुषबहुवचने महेप्रत्यये —**अधीमहे,** "क्रीड़ृ विहारे" अतो वर्तमानाया अन्तिप्रत्यये शवि पूर्वाकारलोपे च—**क्रीडन्ति**। अत्र समाप्तत्वमूलमाह—**क्रियान्तरव्यवधानेऽपीति,** अयमाशयः—अध्ययनं गुरुमुखाच्छास्त्रश्रवणं तदर्थानुसन्धानं तत्स्थिरीकरणाय क्रियान्तरानुष्ठानमिति च, तत्र यद्यपि भोजनादिक्रियां करोति, तेन च यद्यप्यध्ययनक्रिया विच्छिन्ना, तथापि भोजनादिक्रियाया अध्ययनक्रियानान्तरीयकतया न व्यवधायकत्वमिति न प्रारब्धक्रियाया विच्छेद इति। किञ्चैवमवान्तरक्रियाभिर्विच्छेदाभ्युपगमे वर्तमानत्वस्य निर्विषयतापत्तिरूपं दोषं दण्डत्वेन कथयितुमाह—**'चैत्रो भुङ्क्ते' इत्यादावपि हि क्रियान्तरव्यवधानमशक्यपरिहारमिति**—हिशब्दोऽस्य प्रयोगस्य वर्तमानविषयकत्वं सर्ववादिसम्मतत्वमिति द्योतनाय, "भुजंप् पालनाभ्यवहारयोः" अतः "भुनजोऽत्राणे" इत्यात्मनेपदे वर्तमानायास्तेप्रत्यये "रुधां स्वरात्०" [ ३. ४. ८२. ] इति स्वरात् परतः श्ने "श्नास्त्योः०" [ ४. २. ९०. ] इत्यल्लुकि "म्नां०" [ १. ३. ३९. ] इति नस्य ङे—**भुङ्क्ते** इति। क्रियान्तरव्यवधानस्याशक्यपरिहारताहेतुं दर्शयति—**सोऽपि ह्यवश्यं भुञ्जानो हसति जल्पति पानीयं वा पिबतीति**—भोजनं हि अन्नस्य गलबिवराधःकरणरूपो व्यापारः, हसनादिकं च तद्व्यतिरिक्तमिति स्पष्टं भिन्नक्रियया तत्रापि व्यवच्छेदः। परैर्भूतभविष्यद्भिन्नत्वं वर्तमानत्वमिति मत्वा पर्वतादीनां सर्वकाले स्थितत्वेन तत्र वर्तमानप्रयोगः कथमित्याशङ्कितं तदुत्तरयति—**'तिष्ठन्ति पर्वताः, स्यन्दन्ते नद्यः' इत्यादौ तु स्फुटैव प्रारम्भापरिसमाप्तिरिति**—किं पर्वतादिस्थितिः समाप्तेति कथयितुं शक्यते, नो चेत् तदपरिसमाप्तिः स्फुटेति वर्तमानत्वं सुस्थमिति भावः। "ष्ठा गतिनिवृत्तौ" इति स्थाधातोर्वर्तमानान्तिप्रत्यये शवि "श्रौति०" [ ४. २. १०८. ] इति तिष्ठादेशे पूर्वाकारलोपे च—**तिष्ठन्ति**। "स्यन्दौङ् स्रवणे" अतो वर्तमानाया अन्तेप्रत्यये शवि पूर्वाकारलोपे च—**स्यन्दन्ते** इति। नन्वेवं सति सदा तद्विषये वर्तमानाप्रयोग एवोचित इति भूतादिविषयकविभक्तीनां कथं प्रयोग इति शङ्कते—**कथं तर्हि तस्थुः स्थास्यन्ति गिरय** इति, उत्तरयति—**भूतभाविनां भरतकल्किप्रभृतीनां राज्ञां याः क्रियास्तदवच्छेदेन पर्वतादिक्रियाणामतीतत्वानागतत्वोपपत्तेर्न भूतभाविप्रत्ययानुपपत्तिदोषः** इति—भूतानां भरतप्रभृतीनां भाविनां कल्किप्रभृतीनां च याः क्रियास्तत्संयुक्तः कालो भूतादिव्यपदेश्य इति तदवच्छेदेन— तादृशकालसम्बन्धेन पर्वतादिकर्तृकस्थित्यादिक्रियाणां भरतक्रियासम्बन्धिनीनामतीतत्वेन, कल्किक्रियासम्बन्धिनीनामनागतत्वेन चातीतानागतत्वोपपत्तेर्नासौ प्रयोगोऽयुक्त इति न दोष इत्यन्वयः। स्थाधातोः परोक्षाप्रथमत्रिकबहुवचने उसि द्वित्वे पूर्वस्य ह्रस्वे सकारस्य 'अघोषे शिटः' [ ४. १. ४५. ] इति लोपे थस्य तादेशे "इडेत्पुसि०" [ ४. ३. ९४. ] इत्यन्त्याकार लोपे च—**तस्थुः**। भविष्यन्त्या अन्तिप्रत्यये च **स्थास्यन्ति**। अन्यत्राप्युक्तन्यायं प्रयोजयति—**एवं च विद्यमानकर्तृकेभ्योऽस्त्यर्थेभ्यो धातुभ्यः सर्वा विभक्तयो भवन्तीति**— विद्यमानपर्वतादिकर्तृकेभ्योऽस्त्यर्थेभ्यो यथा राजादिक्रियासम्बन्धादतीतत्वादिव्यवहारो दर्शितस्तथाऽन्यत्रापि स व्यवहार उपपन्न इति भावः। "असक् भुवि" इति 'अस्'धातोर्वर्तमानायाम्—**कूपोऽस्ति,** अस्याशिति प्रत्यये "अस्ति–ब्रुवोर्भू०" [ ४. ४. १. ] इति 'भू' इत्यादेशो भवतीति भविष्यन्त्याम्—**कूपो भविष्यति,** श्वस्तन्याम्—**कूपो भविता,** ह्यस्तन्याम्—**कूप आसीत्,**

परोक्षायां—**कूपो बभूवेति**—एष्वेक एव कर्ता, धात्वर्थः सत्ताऽपि एकैव, अथापि भूतभाविनृपादीनां क्रियासम्बन्धेन क्रियाभेदादिह सर्वा विभक्तयः सिद्धा इति भावः ।

पाणिनीये "वर्तमाने लट्" [ ३. २. १२३. ] इति सूत्रे भाष्यकृता वर्तमानकालसत्त्वासत्त्वे विवादं प्रस्तुत्य सिद्धान्तितम्, तच्चेत्थम्—"अपर आह–नास्ति वर्तमानः काल इति। अपि चात्र श्लोकानुदाहरन्ति—

"न वर्तते चक्रमिषुर्न पात्यते न स्यन्दन्ते सरितः सागराय ।
कूटस्थोऽयं लोको न विचेष्टिताऽस्ति, यो ह्येवं पश्यति सोऽप्यनन्धः ॥
मीमांसको मन्यमानो युवा मेधाविसंमतः ।
काकं स्मेहाऽनुपृच्छति 'किं ते पतितलक्षणम्' ॥
अनागते न पतसि अतिक्रान्ते च काक न ।
यदि सम्प्रति पतसि सर्वो लोकः पतत्ययम् ॥
हिमवान् गच्छति ॥
अनागतमतिक्रान्तं वर्तमानमिति त्रयम् ।
सर्वत्र च गतिर्नास्ति गच्छतीति किमुच्यते ॥

अयमाशयः—निष्पन्नस्यार्थस्य भूतत्वात् अनिष्पन्नस्य च भविष्यत्त्वात् निष्पन्नानिष्पन्नव्यतिरेकेण च रूपान्तरत्वाभावात् वर्तमानत्वं नास्तीति वर्तमानकालोऽलीक इति वर्तमाने विभक्तिविधानमयुक्तमिति। क्षणभङ्गुरपदार्थमात्रवादिमते वस्तुमात्रे क्रियाश्रयत्वासम्भवात् क्रियायां भूतभविष्यत्प्रतिद्वन्द्विवर्तमानत्वाभावेन कालविभागानवगतेः "वर्तमाने लट्" इति सूत्रमनर्थकम्, अतीतानागतानामतीतत्वेनानागतत्वेन च वर्तमानत्वं नास्ति, यच्चास्ति द्रव्यं तदपि क्षणभङ्गवादिमते न क्रियाश्रयो भवितुमर्हति, क्रियां प्रति द्रव्यस्य समवायिकारणत्वेनोत्तरक्षणे क्रिया वाच्या, तत् तु न सम्भवति, तदुत्तरक्षणे पूर्वक्षणीयद्रव्यस्य नष्टतयाऽन्यस्यैव भावात् । तदुपपादनायाह—अपि चात्र श्लोकानुदाहरन्तीति

श्लोकानामयमाशयः—चक्रं वर्तते इति न, 'इषुः पात्यते' इति न, 'सरितः सागराय स्यन्दन्ते' इति न, पूर्वोक्ताः प्रयोगा वर्तमानकालस्य सत्त्वे एव संगच्छन्ते, वर्तमानकालस्य चाभावान्न युक्ता इति। वर्तमानस्याभावे हेतुमाह—कूटस्थोऽयं लोक इति—अयं लोक सर्वदा स्वरूप एव तिष्ठति, न विचेष्टिताऽस्ति—व्यापारकर्ता नास्ति, एतज्ज्ञानस्य फलमाह– यो ह्येवं पश्यति- वेत्ति, सोऽप्यनन्धः—याथार्थ्यज्ञानवानित्यर्थः, यदि केवलज्ञानस्यैतावत् फलं तर्हि तदनुसारमनुष्ठानस्य फलाय किं वक्तव्यमित्याशयः । यद्यप्ययं श्लोकः संसारानित्यतातिशयबोधकः, आत्मा न क्रियाश्रयो नो वा दृश्यो लोकः क्रियाश्रयस्य तस्य विनश्वरत्वात् तथापि आपाततः प्रतीयमानमर्थमादाय क्षणभङ्गवादिमतसाधकत्वेनोपन्यस्तः । न केवलं क्षणभङ्गवादिन एव वर्तमानत्वमनिष्टमपि तु मीमांसक[विचारक]स्यापीत्याह—मीमांसको मन्यमानो युवा मेधाविसम्मत इत्यादि—आत्मानं विचारकं मन्यमानो मेधावी चासौ सर्वसम्मतश्च, युवा–अविकलेन्द्रियो मीमांसकः—तत्त्वाऽतत्त्वविचारकः काकमिहानुपृच्छति स्म, किमित्याह—किं ते पतितलक्षणमिति–ते पतितस्य—पातस्य लक्षणं किमिति, किंस्वरूपस्ते पात इति वद, यदि च तस्य निर्णीतं रूपं न तर्हि पतनक्रिया नास्त्येवेत्यर्थः । तदाह–अनागते न पतसि—यः कालो—नागतस्तत्र कथं पतसीति व्यवहारः स्यात् । एवं हे काक ! अतिक्रान्तेऽपि न पतसि—तत्रापि पतसीति वर्तमानप्रयोगो नोचितः । यदि सम्प्रति—प्रयोगकाले पतसीति कथयिष्यसि, तदा सर्वो लोकः पतिष्यति—क्रियाया वर्तमानत्वाभावेऽपि यदि पततीति व्यवहारः स्यात् तदा सर्वस्मिन् विषये पततीति व्यवहारः कुतो नेत्यर्थः । अयं भावः—माऽस्तु क्षणभङ्गवादः, विचारकाणामपि मते क्रिया त्रिक्षणं तिष्ठति, तथापि क्षणत्रयस्यातिसूक्ष्मत्वाज्ज्ञातुमशक्यत्वेन तस्याः क्रियायाः कथं वर्तमानत्वेन व्यवहारो भविष्यति, अज्ञाताया अपि क्रियाया यदि वर्तमानत्वेन व्यवहारस्तदा असत्या अपि क्रियाया वर्तमानत्वेन व्यवहारः कुतो न स्यात् । तथा च हिमवानपि गच्छतीति व्यवहारः स्यात् । तथा च किमायातमित्याह अनागतमतिक्रान्तमिति, अयमाशयः—एक एव क्षण उपलभ्यते वर्तमानः, अतीतोऽनागतश्च नोपलम्भयोग्यो भवति, एकस्यैव क्षणस्य पदार्थाधिकरणस्य गमनादिक्रियासम्बन्धः कथमुपलब्धियोग्यः स्यात् । एवं च सर्वत्र पदार्थे काले वा गतिर्नास्ति तर्हि गच्छतीति वर्तमानप्रयोगः किमुच्यत इति शङ्का स्थिरेति । अत्राह—

"क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद् विचेष्टितम् ।

तद् समीक्ष्य प्रयुञ्जीत गच्छतीत्यविचारयन् ॥

क्रियारम्भे यो हेतुः प्रयोजकं फलं, तदर्थं फलार्थं, यद् विचेष्टितं यो व्यापारः क्रियासमूहरूपः, तत् समीक्ष्य तदनुकूलत्वेन बुद्धिविषयीकृत्य, बुद्धिपरिकल्पितस्य क्रियासमूहस्य बुद्धिकल्पितमेव वर्तमानत्वमादाय गच्छतीति प्रयोगं कुविकल्पशङ्काकलङ्करहितं कुर्वीतेति। सोऽयं घट इत्यादिप्रत्यभिज्ञानाद् क्षणभङ्गनिरासे कृते देवदत्तस्य देशान्तरप्राप्तिरूपं गमनं निर्हेतुकं न सम्भवति, अतो देशान्तरप्राप्तिरूपं फलमेव तस्या निमित्तं भवितुमर्हति, तां गमनक्रियामाश्रित्य गच्छतीति प्रत्ययोऽबाधित उपपद्यत इति क्रियाया वर्तमानत्वमवगम्यते। वर्तमानत्वाभावे च भूतभविष्यतोरप्यभावप्रसङ्गः, वर्तमान एव हि भूतत्वं भविष्यत्त्वं च प्रतिपद्यते। तत्रानेकक्षणसमूहात्मकं क्रियाप्रबन्धरूपं बुद्ध्या संकल्प्य गच्छतीत्यादि प्रयुज्यत इत्यर्थः। एवं वास्तववर्तमानक्रियाभावमङ्गीकृत्यानुमितबौद्धसमूहरूपक्रियां तद्वर्तमानत्वं च बौद्धमङ्गीकृत्य प्रयोगानुपपाद्येदानीं वास्तववर्तमानक्रियां तत्तत्क्षणवर्तिनीं योगिप्रत्यक्षप्रमाणिकामाश्रित्य समाधत्ते —अपर आह—अस्ति वर्तमानकाल इति। आदित्यगतिवन्नोपलभ्यते। अपि चात्र श्लोकमुदाहरन्ति—

"बिसस्य बाला इव दह्यमाना,
न लक्ष्यते विकृतिः सन्निपाते।
अस्तीति तां वेदयन्ते त्रिभावाः,
सूक्ष्मो हि भावोऽनुमितेन गम्यः॥" इति।

अयमाशयः—क्रियायां त्रिक्षणावस्थायित्वेन वर्तमानकालो भवितुमर्हति, किन्त्वादित्यस्य गतिवत् प्रत्यक्षेण नोपलक्ष्यते, क्रियाप्रत्यक्षत्वाभिमानिनो यथातिदूरत्ववशात् सूर्यस्य विद्यमानाऽपि गतिः प्रत्यक्षेणोपलब्धुमशक्यत्वादनुमेयैव भवति, तथाऽतिसूक्ष्मकालावच्छिन्नत्वादेकैकक्षणावच्छिन्नक्रियाऽप्यनुमेयैवेति। ननु कार्येणोत्तरदेशसंयोगादिना एकैकक्षणवर्त्यतिसूक्ष्मवर्तमानक्रियायाः कथमनुमानमत आह—अपि चात्र श्लोकमुदाहरन्तीति। बिसे दह्यमाने दह्यमाना अपि बिसस्य बालाः प्रत्यक्षं दह्यमानत्वेन नावसीयन्ते, किन्तु बिसान्तर्गतत्वाद् बिसदाहे तेषामपि दाहोऽनुमानेन प्रतीयते। तथा कारकसन्निपाते एकैकक्षणग्रहणे क्रियावेशलक्षणा विकृतिः प्रत्यक्षेण न गृह्यते, किन्तु तां त्रिभावाः— त्रिषु कालेषु भावो भावना येषां ते, अस्तीति निश्चिन्वन्ति। अस्माकं च तादृशकालत्रयप्रत्यक्षीकरणरूपसामर्थ्याभावादनुमानमेव शरणम्, यतः सूक्ष्मो भावोऽनुमितेनानुमानेनैव गम्य इति। एवं च क्रियाया वर्तमानत्वस्याप्रत्यक्षत्वेऽप्यनुमानेनैव तस्या वर्तमानत्वव्यवहार इति शम् ॥ ५. २. १९. ॥

## शत्रानशावेष्यति तु सस्यौ। ५. २. २०. ॥

**त० प्र०—सत्यर्थे वर्तमानाद् धातोः शत्रानशौ प्रत्ययौ भवतः, एष्यति तु— एष्यन्मात्रे भविष्यन्तीविषयेऽर्थे, सस्यौ— स्यप्रत्ययसहितौ शत्रानशौ भवतः। स्योऽपि प्रत्ययत्वाद् धातोरेव। यान्, यान्तौ, यान्तः; शयानः शयानौ, शयानाः; निरस्यन्, निरस्यमानः; पचन्, पचमानः। एकविषयत्वाद् वर्तमानाऽपि— याति, यातः, यान्ति; एवं सर्वत्र। तथा— सन्, अस्ति; अधीयानः, अधीते; विद्यमानः, विद्यते; जुह्वत्, जुहोति; विदन् वेत्ति; जानन् जानाति ब्राह्मणः। तथा तरादौ प्रत्यये— पचत्तरः, पचत्तमः, पचतितरां, पचतितमाम्। पचद्रूपः, पचतिरूपम्। जल्पत्कल्पः, जल्पतिकल्पम्। पश्यद्देश्यः, पश्यतिदेश्यम्। पठद्देशीयः, पठतिदेशीयम्। एवं— पचमानतरः, पचमानतमः, पचतेतरां पचतेतमामित्यादि। द्वितीयाद्यन्तपदसामानाधिकरण्य-संबोधन-तरादिवर्जिततद्धितप्रत्ययोत्तरपद-क्रियालक्षण-क्रियाहेतुषु वर्तमानाया अन्ययायोगात् शत्रानशावेव— पचन्तं पचमानं पश्य, पचता पचमानेन कृतम्, पचते पचमानाय देहि पचतः पचमानाद् भीतः, पचतः पचमानस्य स्वम्, पचति पचमाने गतः, संबोधने— हे पचन्! हे पचमान!। तराद्यन्यतद्धिते— कुर्वतोऽपत्यं कौर्वतः, पाचतः, वैक्षमाणिः, कुर्वत्पाशः, पचत्पाशः; कुर्वच्चरः, पचच्चरः। उत्तरपदे— भज्यत इति भक्तिः, कुर्वन् भक्तिरस्य— कुर्वद्भक्तिः, कुर्वाणभक्तिः; कुर्वत्प्रियः, कुर्वाणप्रियः; ब्रुवन्माठरः, ब्रुवाणमाठरः। क्रियाया लक्षणं ज्ञापकं चिह्नम्, तत्र— तिष्ठन्तोऽनुशासति गणकाः, शयाना भुञ्जते यवनाः, बहुषु मूत्रयत्सु कश्चैत्र इति पृष्टः कश्चिदाह— यस्तिष्ठन् मूत्रयति, एवं— यो गच्छन् भक्षयति, यः शयानो भुङ्क्ते, योऽधीयान् आस्ते। तथा यः पठन् पचति स मैत्रः, एवं— यः पचन् पठति; योऽधीयान आस्ते, य आसीनोऽधीते। तथा**

**"फलन्ती वर्द्धते द्राक्षा, पुष्प्यन्ती वर्द्धतेऽब्जिनी।**

शयाना वर्धते दूर्वा, आसीनं वर्धते बिसम् ॥"

क्रियाया हेतुर्जनकस्तत्र– अर्जयन् वसति, अधीयानो वसति ।

एष्यति तु सस्यौ– यास्यन्, शयिष्यमाणः, पक्ष्यन्, पक्ष्यमाणः; यास्यति, शयिष्यते, पक्ष्यति, पक्ष्यते । तथा– भविष्यन्, भविष्यति; अध्येष्यमाणः, अध्येष्यते ब्राह्मण इत्यादि । तथा– पक्ष्यत्तरः, पक्ष्यमाणतमः, पक्ष्यतितराम्, पक्ष्यतितमामित्यादि; सर्वेष्वेकविषयत्वाद् भविष्यन्त्यपि । 'पक्ष्यन् व्रजति, पक्ष्यमाणो व्रजति' इति क्रियायां क्रियार्थायाम्, एकविषयत्वाच्च भविष्यन्त्यपवादयोऽपि– पक्ष्यामीति व्रजति, पाचको व्रजति, पक्तुं व्रजति । पूर्ववदेव च द्वितीयाद्यन्तसामानाधिकरण्यादिषु भविष्यन्त्याः समन्वयाभावादभावः–पक्ष्यन्तं पश्य, पक्ष्यमाणं पश्य । हे पक्ष्यन् ! हे पक्ष्यमाण ! ब्राह्मण ! पाक्ष्यतः, पाक्ष्यमाणिः, पक्ष्यमाणदाशः, पक्ष्यद्भक्तिः, पक्ष्यमाणप्रियः; जल्पिष्यन्तो ज्ञास्यन्ते पण्डिताः, अध्येष्यमाणा वत्स्यन्तीत्यादि । सदेष्यतोरभावे तु श्वः पक्ता ।

बहुलाधिकाराद् द्रव्य-गुणयोर्लक्षणे, हेतुहेतुमद्भावद्योतके स्यादियोगे च न भवति– यः कम्पते सोऽश्वत्थः, यत् तरति तल्लघु, हन्तीति पलायते, वर्षतीति धावति करिष्यतीति व्रजति, हनिष्यतीति नश्यति, पचत्यतो लभते, विजयतेऽतः पूज्यते । क्रियाया अपि लक्षणे चादियोगे न भवति– यः पचति च पठति च स चैत्रः, योऽधीते चास्ते च स मैत्रः, शकारः शित्कार्यार्थः । ऋकारो ङ्यार्थः ॥२०॥

---

**श० म० न्यासानुसन्धानम्**–शत्रा० । 'सति' इत्यनुवर्तते, तदाह–**सत्यर्थे वर्तमानादिति** । **एष्यन्मात्रे** इति–सत्यर्थे एष्यति च सस्यौ शत्रानशौ भवत इत्यर्थस्यापाततः प्रतीयमानस्य वारणाय 'एष्यन्मात्रे' इत्युक्तम्, तथा च वर्तमाने केवलौ, भविष्यति च सस्यौ शत्रानशाविति विवक्षितमिति भावः । साहित्यस्य पूर्वापरोभयसाधारण्येन कदाचित् परतः स्यो मा भूदित्यत आह– **सोऽपि प्रत्ययत्वाद् धातोरेवेति**– प्रत्ययस्य प्रकृतेरव्यवधानेन परतया विधानस्य "परः" [ ७. ४. ११८. ] इति परिभाषया प्रतिपादितत्वात् प्रत्ययः स्यः प्रकृतेर्धातोरेव परो भवति, न तु प्रत्यययोः शत्रानशोरिति भावः । शतृप्रत्यये शकार ऋकारश्चानुबन्धौ 'अत्' इत्यवशिष्यते, आनशि च शकारोऽनुबन्धः, 'आन' इत्यवशिष्यते, "नवाऽऽद्यानि शतृ-क्वसू च परस्मैपदम्" [ ३. ३. १९. ] इति शतुः परस्मैपदत्वात् स परस्मैपदिनो धातोर्भवति । "पराणि कानाऽऽनशौ चात्मनेपदम्" [ ३. ३. २०. ] इत्यानश आत्मनेपदसंज्ञत्वात् स आत्मनेपदिनो धातुतो भवति । "यांक् प्रापणे" अतः शतरि समानदीर्घे–'यात्' शब्दः, अतो घुटि सौ परे "ऋदुदितः" [ १. ४. ७०. ] इति स्वरात् परतो नागमे संयोगान्तलोपे–**यान्**, द्विवचने–**यान्तौ**, बहुवचने च–**यान्तः** । "शीङ्क् स्वप्ने" अत आनशि "शीङ एः शिति" [ ४. ६. १०४. ] इत्येकारेऽयादेशे च 'शयान' शब्दः, तस्य प्रथमायां–**शयानः, शयानौ, शयानाः** । "असूच् क्षेपणे" निस्पूर्वस्यास्य "उपसर्गादस्योहो वा" [ ३. ३. २५. ] इति वाऽऽत्मनेपदं भवति, तत्र परस्मैपदे शतरि श्यविकरणे पूर्वाकारलोपे सौ–**निरस्यन्**, आनशि तु "अतो म आने" [ ४. ४. ११४. ] इति मागमे–**निरस्यमानः** । "डुपचींष् पाके" ईदित्त्वादस्य "ईगितः" [ ३. ३. ९५. ] इति फलवति कर्तर्यात्मनेपदमन्यत्र च परस्मैपदं भवति, तत्र परस्मैपदे शतरि–**पचन्**, आत्मनेपदे चानशि–**पचमानः** । **एकविषयत्वाद् वर्तमानाऽपीति**–वर्तमानाऽपि सत्यर्थे विहिता, एतावपि तत्रैवेत्येकविषयत्वमेतेषाम्, तथा च वर्तमानाविधानमुत्सर्गः, शत्रानशौ तदपवादः, किन्त्वसरूपापवादस्य विकल्पेन बाधकतया उक्तत्वाद् वर्तमानाऽपि भवतीति भावः । यद्यपि च वर्तमाना प्रथमान्तेन सामानाधिकरण्ये विहिता, एतौ तु अप्रथमान्तेन सामानाधिकरण्येऽपीति वक्ष्यति, तथा च नैकविषयत्वमेतेषामिति न विकल्पः प्राप्नोति, तथापि क्वचित् प्रथमासामानाधिकरण्य उभयोरपि प्राप्त्या तत्रोभयोर्विकल्पेन विधानमिति तात्पर्यम् । वर्तमानायामुदाहरति–**याति, यातः, यान्ति** । अतिदिशति–**एवं सर्वत्रेति** । "असक् भुवि" अतः शतरि "श्नाऽस्त्योर्लुक्" [ ४. २. ९०. ] इति धातोरकारलोपे सौ–**सन्**, वर्तमानायां तु–**अस्ति** । "इङ्क् अध्ययने" नित्यमधिपूर्वोऽयम्, अत आनशि "धातोरिवर्णो०" [ २. १. ५०. ] इतीयादेशे समानदीर्घे सौ–**अधीयानः**, वर्तमानायां तु–**अधीते** । "विदिच् सत्तायाम्" अत

श्राने दिवादित्वात् श्यविकरणे–**विद्यमानः,** वर्तमानायां तु **विद्यते** । "हुंक् दानादनयोः" अतः शतरि ह्वादित्वाद् द्वित्वे "ह्विणो०" [ ४. ३. १५. ] इति वादेशे "अनो लुक्" [ ४. २. ९४. ] इति नागमलोपे–**जुह्वत्,** वर्तमानायां तु गुणे–**जुहोतीति** ।"विदक् ज्ञाने" अतः शतरि–**विदन्,** वर्तमानायां तु–**वेत्ति** । "ज्ञांश् अवबोधने" अतः शतरि क्र्यादित्वात् श्नाविकरे "जा ज्ञा–जनो०" [४. २. १०४.] इति जादेशे 'श्नश्चातः' [४. २. ९६.] इत्याकारलोपे च–**जानन्,** वर्तमानायां तु–**जानाति, 'ब्राह्मणः'** इति सर्वत्र योज्यमिति । **तथा तरादौ प्रत्यये** इति–तरादौ प्रत्यये परतोऽपि क्वचिदिमौ क्वचिच्च वर्तमानेति विकल्प इत्यर्थः । द्वाविमौ पचन्तौ, अयमनयोः प्रकृष्टः पचन्–**पचत्तरः** इति–अत्र "द्वयोर्विभज्ये च तरप्" [७. ३. ६.] इति तरप् प्रत्ययः, पकारोऽनुबन्धः । इमे सर्वे पचन्तः, अयमेषां प्रकृष्टः पचन्–**पचत्तमः** इति–"प्रकृष्टे तमप्" [७. ३. ५.] इति तमप् प्रत्ययः पकारोऽनुबन्धः । द्वाविमौ पचतः, अयमनयोरतिशयेन पचतीति प्राग्वत् तरपि "किंत्याद्ये०" [७. ३. ८.] इत्यन्तस्याऽऽमादेशे च–**पचतितराम्** । सर्वे इमे पचन्ति, अयमेषां प्रकृष्टं पचतीति प्राग्वत् तमपि अन्त्यस्य चामादेशे–**पचतितमामिति,** त्याद्यन्तानां क्रियाप्रधानत्वात् तस्याश्च साध्यत्वेन लिङ्गसंख्याभ्यामयोगात् तरबाद्यन्तानामौत्सर्गिकमेकवचनं नपुंसकलिङ्गं च भवति. एवमग्रेऽपि, प्रशस्तः पचन् इति "त्यादेश्च प्रशस्ते रूपप्" [७.२.१०.] इति रूपप्प्रत्यये–**पचद्रूपः** इति–पकारोऽनुबन्धः । एवं प्रशस्तं पचतीति–**पचतिरूपम्** । ईषदपरिसमाप्तौ जल्पन् इति "अतमबादेरीषदसमाप्ते कल्पप् देश्यप् देशीयर्" [७. ३. ११.] इति कल्पप्प्रत्यये–**जल्पत्कल्पः,** एवमीषदपरिसमाप्तं जल्पतीति–**जल्पतिकल्पम्** । एवं देश्यपि–**पश्यद्देश्यः, पश्यतिदेश्यम्,** देशीयरि च–**पठद्देशीयः, पठतिदेशीयम्** । उक्तदिशाऽऽनशि उदाहर्तुमाह–**एवमि**ति, इमौ द्वौ पचमानौ, अयमनयोरतिशयेन पचमान इति–**पचमानतरः,** इमे सर्वे पचमानाः, अयमेषामतिशयेन पचमान इति–**पचमानतमः,** इमौ पचेते, अयमनयोरतिशयेन पचते इति–**पचतेतराम्,** इमे सर्वे पचन्ते, अयमेषामतिशयेन पचते इति–**पचतेतमाम्,** क्व केवलौ शत्रानशौ क्व च वर्तमानया पाक्षिकाविति विषयवस्थामाह–**द्वितीयान्तपदसामानाधिकरण्ये**त्यादि, तथा चाप्रथमान्तसामानाधिकरण्ये, संबोधने, तरादिभिन्नतद्धितप्रत्यये विवक्षिते, उत्तरपदे परतः, क्रियालक्षणे, क्रियाहेतौ च नित्यमेतौ प्रत्ययौ भवतः, तत्र वर्तमाना कुतो नेत्याह–**अन्वयायोगादि**ति–वर्तमानाया एषु स्थलेषु अन्वयस्यायोगादसम्भवादित्यर्थः । तत्र तावत् द्वितीयाद्यन्तेन वर्तमानाया न सामानाधिकरण्यम्, वर्तमाना हि क्रियाभिधायिनी, द्वितीयाद्यन्तं पदं च कारकरूपद्रव्यमभिधत्ते इति न तयोः सामानाधिकरण्यं संभवति, क्रियाया हि कर्त्रा कर्मणा च प्रथमान्तपदाभिधेयेनैव सामानाधिकरण्यस्य प्रमितत्वात् । "सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः" इति हरिरीत्या संबोधनान्तस्य सिद्धरूपत्वेन वर्तमानान्तवाच्यक्रियायाश्च साध्यरूपत्वेन सिद्धसाध्ययोः सामानाधिकरण्येनान्वयो न भवतीति तत्रापि वर्तमानाया अन्वयायोग एवेति । तरादिभिन्नतद्धितप्रत्ययान्तानां च स्याद्यन्ताद् विधानाद् वर्तमानान्तस्यापत्याद्यर्थेन सदान्वयायोगाच्च तत्रापि न वर्तमाना । एतच्च सर्वमुदाहरणैः स्पष्टतया प्रतिपादयितुमुपक्रमते–**पचन्तं पचमानं पश्ये**त्यादिना, सम्बोधनान्तमुदाहृत्य तरादिभिन्नतद्धिते उदाहर्तुमवतारयति–**तराद्यन्यतद्धित** इति. कुर्वतोऽपत्यमित्यणि आद्यस्वरवृद्धौ च–**कौर्वतः** । एवं–पचतोऽपत्यमित्यणि आद्यस्वरवृद्धौ च–**पाचतः** । वीक्षमाणस्यापत्यमिति "अत इञ्" [६. १. ३१] इति इञि आद्यस्वरवृद्धौ "अवर्णेवर्णस्य" [७. ४. ६८.] इत्यकारलोपे च–**वैक्षमाणिः** । निन्द्यः पचन् इति–**पचत्पाशः** इति–"निन्द्ये पाशप्" [७. ३. ४.] इति पाशप् प्रत्ययः पकारोऽनुबन्धः । कुर्वतो भूतपूर्व इति–**कुर्वच्चरः** इति–"षष्ठ्या रूप्य–प्चरट्" [७. २. ८०] इति प्चरट् प्रत्ययः, पकारटकारावनुबन्धौ । एवं पचतो भूतपूर्व इति **पचच्चरः** । **उत्तरपदे–भज्यत इति भक्तिः,** अत्र कर्मणि क्तौ भक्तिः, सेव्य इत्यर्थः, अत्र वाच्ये पुंलिङ्गेऽपि शब्दशक्तिस्वाभाव्यात् क्त्यन्तस्य स्त्रीलिङ्गतैव । **कुर्वन् भक्तिरस्य–कुर्वद्भक्तिः** । एवं कुर्वाणो भक्तिरस्येति–**कुर्वाणभक्तिः** । कुर्वन् प्रियोऽस्येति–**कुर्वत्प्रियः,** कुर्वाणः प्रियोऽस्येति–**कुर्वाणप्रियः** । ब्रुवन् ब्रुवाणो वा माठरोऽस्येति–**ब्रुवन्माठरः, ब्रुवाणमाठरः** ।

क्रियालक्षणक्रियाहेतुशब्दयोः परस्परं भेदं प्रदर्शयितुमुभयोरर्थं व्याचष्टे, तत्र क्रियालक्षणशब्दार्थमाह– **क्रियाया लक्षणं ज्ञापकं चिह्न**मिति। अत्रोदाहरणमाह– **तिष्ठन्तोऽनुशासति गणकाः** इति–कथमनुशासति गणकाः? इति प्रश्ने प्रतिवचनमिदमिति तदनुशासनक्रियाया लक्षणं स्थानमिति तदर्थाद् धातोः शतृप्रत्ययः। **शयाना भुञ्जते यवनाः** इति–कथं भुञ्जते यवनाः? इति प्रश्ने प्रतिवचनमिदमिति तद्भोजनक्रियाया लक्षणं शयनमिति तदर्थाद् धातोरानश् प्रत्ययः। बहुषु मूत्रयत्सु कश्चैत्र इति प्रश्नः, यस्तिष्ठन् मूत्रयतीति प्रतिवचनम्, तदाह–**बहुषु मूत्रयत्सु कश्चैत्र इति पृष्टः कश्चिदाह– यस्तिष्ठन् मूत्रयती**ति– अत्र स्थितिक्रिया मूत्रणक्रियाया लक्षणम्, एवमग्रेऽपि प्रश्नोत्तरव्यवस्था ज्ञेया। एवं–**यो गच्छन् भक्षयती**ति–अत्र गमन क्रिया भोजन क्रियाया लक्षणम्। **यः शयानो भुङ्क्ते** इति-अत्र शयनक्रिया भक्षणक्रियाया लक्षणम्। **योऽधीयान आस्ते** इति–अत्राध्ययनक्रिया आसनक्रियाया लक्षणम्। **तथा यः पठन् पचति स मैत्रः** इति–अत्र पठनक्रिया पचनक्रियाया लक्षणम्, **एवं यः पचन् पठती**ति–अत्र पचनक्रिया पठनक्रियाया लक्षणम्। **योऽधीयान आस्ते** इति–अत्राध्ययनक्रिया आसनक्रियाया लक्षणम्। **य आसीनोऽधीते** इति– अत्रासनक्रिया अध्ययनक्रियाया लक्षणम्, "आसीनः" [ ४. ४. ११५. ] इत्यास्तेः परस्यानस्यादेरीर्निपात्यते। तत्त्वाख्यानमपि लक्षणं भवति, यथा चैतन्यलक्षणो जीव इति अतस्तत्रोदाहरति– **तथा फलन्ती वर्धते द्राक्षे**ति–अत्र फलनक्रिया वृद्धिक्रियाया लक्षणम्, **पुष्प्यन्ती वर्धतेऽब्जिनी**ति–अत्र विकसनक्रिया वृद्धिक्रियाया लक्षणम्, **शयाना वर्धते दूर्वे**ति– अत्र शयनक्रिया वृद्धिक्रियाया लक्षणम्, **आसीनं वर्धते बिसमि**ति–अत्रासनक्रिया वृद्धिक्रियाया लक्षणमिति।

अथ क्रियाहेतुशब्दं व्याचष्टे–**क्रियाया हेतुर्जनक** इति–तत्र–**अर्जयन् वसती**ति–अत्र वासक्रियाया अर्जनक्रिया हेतुः, "अर्जण् प्रतियत्ने" इति चौरादिको धातुः **अधीयानो वसती**ति–अत्राध्ययनं वसनक्रियाया हेतुः। **एष्यति तु स्यौ** इति–भविष्यदर्थे तु स्यसहितौ शत्रानशौ भवत इत्यर्थः। एष्यदर्थे स्यसहिते शतरि याधातोः– **यास्यन्**, स्यसहिते आनशि शीधातोः– **शयिष्यमाणः**, अत्र धातोः सेट्त्वादिटि सस्य षत्वं विज्ञेयम्। 'पच्'धातोः– **पक्ष्यन् पक्ष्यमाणः**, अत्र चस्य कः, तद्योगात् सस्य षत्वं नस्य णत्वं च ज्ञेयम्। एकविषयत्वात् पक्षे भविष्यन्ती विभक्तिरपि भवतीत्याह–**यास्यति, शयिष्यते, पक्ष्यति पक्ष्यते** इति। भूधातोरुदाहरति–**भविष्यन्, भविष्यन्ती** 'इङ्क्' धातोः **–अध्येष्यमाणः, अध्येष्यते ब्राह्मण इत्यादी**ति। अथ तरादौ प्रत्यये उदाहरति– **पक्ष्यत्तर** इत्यादि, इमौ पक्ष्यन्तौ, अयमनयोः प्रकृष्टः पक्ष्यन् इति– **पक्ष्यत्तरः** इति, इमे सर्वे पक्ष्यन्तः, अयमेषां प्रकृष्टः पक्ष्यन् इति– **पक्ष्यत्तमः,** इमौ पक्ष्यतः, अयमनयोरतिशयेन पक्ष्यतीति **–पक्ष्यतितराम्**। इमे सर्वे पक्ष्यन्ति, अयमेषामतिशयेन पक्ष्यतीति– **पक्ष्यतितमाम्**। एष्यति दर्शितेषूदाहरणेषु शत्रानशौ भवतां नाम, भविष्यन्ती विभक्तिः कथमिति चेत्? अत्राह–**सर्वेष्वेकविषयत्वाद् भविष्यन्त्यपी**ति–भविष्यन्त्यपि एष्यदर्थे विहिता, एतावपि तत्रैवेत्येकविषयत्वमेतेषाम्, तथा च भविष्यन्तीविधानमुत्सर्गः शत्रानशौ तदपवादः, किन्तु असरूपस्यापवादस्य विकल्पेन बाधकताया उक्तत्वाद् भविष्यन्त्यपि भवतीति भावः। यद्यपि च भविष्यन्ती प्रथमान्तेन सामानाधिकरण्ये विहिता, एतौ तु अप्रथमान्तेन सामानाधिरण्येऽपीति वक्ष्यति, तथा च नैकविषयत्वमेतेषामिति न विकल्पः प्राप्नोति, तथापि क्वचिद् प्रथमासामानाधिकरण्ये द्वयोरपि प्राप्त्या तत्रोभयोर्विकल्पेन विधानमिति तात्पर्यम्। एकविषयत्वमाश्रित्य यथा भविष्यन्ती दर्शिता तथा भविष्यन्तीं णकं तुमं च दर्शयति–**'पक्ष्यन् व्रजति, पक्ष्यमाणो व्रजति' इति क्रियायां क्रियार्थायामि**ति अत्र सस्यौ शत्रानशौ एष्यति क्रियायां क्रियार्थायां ह्युपपदे विहितावित्यर्थः, ततः किमित्याह– **एकविषयत्वाद् भविष्यन्त्यादयोऽपी**ति–समानविषयत्वात् तत्रार्थे "क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती" [ ५. ३. १३. ] इति तुम् णकच् भविष्यन्ती च वा भवन्तीत्यर्थः, तत्र भविष्यन्त्यां– **पक्ष्यामीति व्रजती**ति, पक्ष्यतीति णकचि– **पाचको व्रजती**ति, तुमि च **पक्तुं व्रजती**ति। पूर्वं यथा वर्तमाना द्वितीयाद्यन्तसामानाधिकरण्यादौ न भवतीति दर्शितं सयुक्तिकं तथा

भविष्यन्तीविषयेऽपि ज्ञेयमित्याह–**पूर्ववदेव चे**त्यादिना। दिक्प्रदर्शनाय द्वितीयासामाधिकरण्ये उदाहरति– **पक्ष्यन्तं पश्य, पक्ष्यमाणं पश्ये**ति। सम्बोधने– **हे पक्ष्यन्! हे पक्ष्यमाण! ब्राह्मण!** इति। तरादिभिन्नतद्धिते–पक्ष्यतोऽपत्यमित्यणि–**पाक्ष्यतः**, पक्ष्यमाणस्यापत्यमिति इञि– **पाक्ष्यमाणिः**। निन्द्यः पक्ष्यमाण इति पाशपि– **पक्ष्यमाणपाशः**। उत्तरपदे– भज्यत इति भक्तिः, पक्ष्यन् भक्तिरस्येति– **पक्ष्यद्भक्तिः**, पक्ष्यमाणः प्रियोऽस्य–**पक्ष्यमाणप्रियः**। क्रियालक्षणे– **जल्पिष्यन्तो ज्ञास्यन्ते पण्डिताः** इति–अत्र हि जल्पनक्रिया ज्ञानक्रियाया लक्षणम्। क्रियाहेतौ– **अध्येष्यमाणा वत्स्यन्ती**ति–अत्र वसनक्रिया अध्ययनक्रियाया हेतुः, एषु सत्यपि एष्यत्त्वे भविष्यन्ती न भवतीति भावः। यत्र न वर्तमानत्वविवक्षा नवा एष्यत्त्वविवक्षा तत्र न वर्तमाना न भविष्यन्ती नवा शत्रानशावित्याह– **सदेष्यतोरभावे तु यः पक्ते**ति। बहुलाधिकारात् शत्रानशोः क्वचित् प्रवृत्तिर्न भवतीत्यप्रवृत्तिं दर्शयति– **द्रव्यगुणयोर्लक्षणे, हेतुहेतुमद्भावद्योतके त्यादियोगे च न भवतीति**। **यः कम्पते सोऽश्वत्थः** इति– अत्र हि कम्पनं लक्षणं भवतीति तेनाश्वत्थो लक्ष्यते, न तु तत् क्रियाविषयम्, किं तर्हि? द्रव्यविषयम्, अश्वत्थरूप द्रव्यविषयत्वात्। **यत् तरति तल्लघु** इति– अत्र तरणेन लघुसंज्ञको गुणो लक्ष्यत इति गुणविषयं तद्, न तु क्रियाविषयम्। **हन्तीति पलायते, वर्षतीति धावती**ति– अत्र यद्यपि हननवर्षणाभ्यां पलायनधावनक्रिये लक्ष्येते, तथापि शत्रानशौ न भवतः। **हनिष्यतीति नश्यती**ति–अत्र हननक्रिया नशनक्रियायां हेतुरिति हेतुहेतुमद्भावः। **पक्ष्यतो लभते** इति– अत्र पचनक्रिया लाभक्रियाया हेतुः। **करिष्यतीति व्रजतीति** अत्र करणक्रिया व्रजनक्रियायां हेतुरिति हेतुहेतुमद्भावो विज्ञेयः। **विजयतेऽतः पूज्यते** इति–अत्र विजयक्रिया पूजने हेतुः। क्रियालक्षणेऽपि क्वचिन्न भवतीत्याह– **क्रियाया अपि लक्षणे चादियोगे न भवतीति**। तदुदाहरति– **यः पचति च पठति च स चैत्रः, योऽधीते चास्ते च स मैत्रः** इति। अत्र लघुन्यासे– इत्थम्– "**चादियोगे न भवती**ति–न केवलं द्रव्यगुणयोर्लक्षणे चादियोगे सति क्रियाया अपि लक्षणे न भवति, **यः पचति चे**त्यादौ न क्रिययोर्लक्ष्यलक्षणभावो विवक्षितः क्रमेण हि प्रतीयमानयोरर्थयोर्लक्ष्यलक्षणभावः स्यात् जन्यजनकभावो वा, अत्र तु तुल्यकालतैव क्रिययोरत एव तद्द्योतकौ चशब्दौ प्रयुज्येते इति। स मैत्र इत्युभयत्र सम्बध्यते इति द्रव्यलक्षणे न भवति, क्रियालक्षणेऽपि न भवति, तथाहि– कुत्रापि एकस्मिन् प्रमातरि पचनपठनयोर्लक्ष्यलक्षणभावो येन गृहीतः स एवं ब्रवीति– यः पचति च स पठति च। एवं पचनक्रिया लक्षणं पठनक्रिया लक्ष्या। चादियोगाभावे तु शत्रानशौ भवत एव यथा–पचन् पचमानो वा स पठति" इति। अनुबन्धफलमाह– **शकारः शित्कार्यार्थः** इति– शित्कार्यविकरणादि। **ऋकारो ङ्यार्थः** इति– "अधातूदितः" [ २. ४. २. ] इति ङीविधानार्थः, आदिपदात् "ऋदुदितः" [ १. ४. ७०. ] इत्यादिना नागमादिसंग्रहः॥ ५. २. २०.॥

## तौ माङ्याक्रोशेषु। ५. २. २१.॥

**त० प्र०—माङ्युपपदे आक्रोशे गम्यमाने सति तौ– शत्रानशौ प्रत्ययौ भवतः, बहुवचनादसत्यपि। मा पचन् वृषलो ज्ञास्यति, मा पचमानोऽसौ मर्तुकामः,**

**"मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति।**
**तस्याजननिरेवास्तु जननीक्लेशकारिणः॥१॥**

**[ शिशुपालवधे, सर्ग-२ ]**

**शत्रानशोरनुवृत्तावपि 'तौ'ग्रहणमवधारणार्थम्, तेनात्र विषये असरूपविधिनाऽप्यद्यतनी न भवति। भवतीत्यपि कश्चित्॥ २१॥**

**श० म० न्यासानुसन्धानम्–तौ०।** सतीत्यनुवर्तत इति भूतादौ न स्यादित्याशङ्कामपनेतुमाह– **बहुवचनादसत्यपी**ति– बहुवचनस्य सर्वकालिकाक्रोशव्याप्त्यर्थकत्वात्, ये केचन वर्तमानेऽवर्तमाने वा आक्रोशास्तेषु सर्वेषु शत्रानशौ भवत इति भावः। उदाहरति—**मा पचन् वृषलो ज्ञास्यती**ति– माङ् निषेधे, वृषलो दासजातिः, 'पचन्' इति शतृप्रत्ययान्तः, भूतकालिकपचनाभावविशिष्टो वृषलोऽग्रे ज्ञास्यतीति प्रयोगार्थः। **मा पचमानोऽसौ मर्तुकामः** इति– पचमान इत्यानश्प्रत्ययान्तः, मर्तुं कामो यस्य स मर्तुकामः, "तुमश्च मनः-कामे" [ ३. २. १४०. ] इति मलोपः, भूतकालिकपचनाभावविशिष्टोऽसौ मरणे-

च्छुरिति प्रयोगार्थः । **'मा जीवन् यः'** इत्यादि शिशुपालवधद्वितीयसर्गे बलदेवस्योक्तिः 'यः परस्मात्-शत्रोः अवज्ञा-अपमानम्, तज्जन्येन दुःखेन दग्धोऽपि, जीवति—प्राणान् धारयति, स मा जीवन्—आक्रोशविषयीभूतभूतकालिकप्राणधारणानुकूलव्यापारः' इति पूर्वार्धार्थः, उत्तरार्धं तु स्पष्टमेव । असरूपापवादन्यायेन कदाचिदद्यतनी स्यादित्याशङ्कां वारयितुमाह—**शत्रानशोरनुवृत्तवपि तौग्रहणमवधारणार्थमिति**-तावेव स्यातामिति नियमार्थमिति भावः । फलितार्थमाह—**तेनात्र विषये असरूपविधिनाऽप्यद्यतनी न भवतीति**—नियमशास्त्राणां निषेधमुखेनापि प्रवृत्तेरङ्गीकारादिति भावः । तौग्रहणस्य शत्रानशोरनुवादकतामाश्रित्य पक्षेऽद्यतनीं विदधानानां मतमाह—**भवतीत्यपि कश्चिदिति** ॥ ५. २. २१. ॥

## वा वेत्तेः क्वसुः । ५. २. २२. ॥

**त० प्र०—सत्यर्थे वर्तमानाद् वेत्तेः क्वसुप्रत्ययो वा भवति, पक्षे यथाप्राप्तम् । विद्वान्, साधुस्तत्त्वं विद्वान् विदन् वेत्ति । विदुषा कृतम्, विदता कृतम् । हे विद्वन् !, हे विदन् ! । वैदुषः, वैदतः । विद्वद्भक्तिः । विदद्भक्तिः । विद्वानास्ते, विदन्नास्ते । विद्वाल्ँलभते, विदल्ँलभते । द्वितीयाद्यन्तपदसामानाधिकरण्यादिषु पूर्ववदनन्वयादेव न वर्तमाना । ककारः कित्कार्यार्थः । उकारो ङ्याद्यर्थः ॥ २२ ॥**

**श० म० न्यासानुसन्धानम्—वा वेत्तेः०** । पूर्वसूत्रे बहुवचनेनाधिकार्यलाभमाश्रित्यासत्यपि काले तयोर्विधानमाश्रितम्, इह तु तत्सम्बन्धस्य विच्छिन्नतासम्भावना स्यादिति तां वारयितुमाह—**सत्यर्थे वर्तमानादिति**—न सतीत्यस्य विच्छेदोऽपि तु बहुवचनसामर्थ्यात् तस्याकिञ्चित्करत्वमेव तत्र, इह तु तदनुवृत्तिः सुलभैवेति भावः । विकल्पफलमाह—**पक्षे यथाप्राप्तमिति**—शतृप्रत्ययो वर्तमाना विभक्तिश्चापि भवतीति भावः । तदाह—**साधुस्तत्त्वं विद्वान् विदन् वेत्ति** इति—क्वसौ ककार उकारश्चानुबन्ध इति 'वस्' अवशिष्यते, शतरि शकार ऋकारश्चानुबन्ध इति 'अत्' अवशिष्यते, "विदक् ज्ञाने" अतः क्वसौ सौ "ऋदुदितः" [१. ४. ७०.] इति स्वरात् परतो नागमे "न्स्-महतोः" [१. ४. ८६.] इति दीर्घे संयोगान्तलक्षणे सकारलोपे च—**विद्वान्**, एवं शतरि नागमे संयोगान्तलक्षणे तलोपे च—**विदन्**, उभयत्र व्यञ्जनान्तत्वात् सिलोपः, वर्तमानातिवि तूपान्त्यगुणे—**वेत्ति**, दस्य "अघोषे०" [१. ३. ५०.] इति तः । इदं च प्रथमान्तसामानाधिकरण्ये, यत्र च द्वितीयान्ताद्यन्तसामानाधिकरण्यं संबोधनादि वा तत्र तु पूर्ववदेव शतैव भविष्यति, न वर्तमानेत्याह—**विदुषा कृतम्, विदता कृतमिति**—"क्वसुष् मतौ च" [२. १. १०५.] इति क्वसोरुषादेशे—**विदुषा** । सम्बोधने—**हे विद्वन् ! हे विदन्** इति—सम्बोधनसेः शेषघुट्त्वाभावाद् दीर्घाभावे—**विद्वन् ! हे विदन् !** । तराद्यन्यतद्धिते—विदुषोऽपत्यमित्यणि—**वैदुषः**, एवं विदतोऽपत्यं—**वैदतः** । उत्तरपदे—विद्वान् भक्तिरस्येति—**विद्वद्भक्तिः**, एवं विदन् भक्तिरस्येति—**विदद्भक्तिः** । क्रियालक्षणे—**विद्वान् आस्ते, विदन्नास्ते** । क्रियाहेतौ—**विद्वाल्ँलभते, विदल्ँलभते** इति—"लि लौ" [१. ३. ६५.] इति नकारस्य सानुनासिको लकारः । उक्तप्रयोगेषु वर्तमाना कथं नेत्याह—**द्वितीयाद्यन्तसामानाधिकरण्यादिषु पूर्ववदनन्वयादेव न वर्तमानेति** । अनुबन्धयोः सार्थक्यमाह—**ककारः कित्कार्यार्थः** इति—कित्कार्यं गुणाभावः, **उकारो ङ्याद्यर्थः** इति—आदिपदेन नागमो बोध्यः । अत्रेत्थं लघुन्यासे—"असरूपोऽपवादो०" [५. १. १६.] इत्यनेन विकल्पे सिद्धे वाग्रहणमत्र प्रकरणे असरूपविधेर्लक्ष्यानुरोधार्थम्, अत एव "वयः-शक्ति०" इत्यत्रानभिधानात्र वाऽसरूपः शतृरित्युक्तम्" इति ॥५. २. २२.॥

## पूङ्-यजः शानः । ५. २. २३. ॥

**त० प्र०—सत्यर्थे वर्तमानाभ्यां पवति-यजिभ्यां परः शानः प्रत्ययो भवति, कृत्त्वात् कर्तरि । पवते—पवमानः, मलयं पवमानः । यजति यजते वा—यजमानः । आनशायोगे न षष्ठीसमासो, न च यजेरफलवति कर्तरि सोऽस्तीति वचनम्, एवमुत्तरत्रापि । शकारः शित्कार्यार्थः ॥ २३ ॥**

**श० म० न्यासानुसन्धानम्—पूङ्०** । शाने शकारोऽनुबन्धः 'आन' अवशिष्यते । अर्थविशेषोक्तिं विना विहितः शानः कृत्त्वात् कर्तरि भवतीत्याह—**कृत्त्वात् कर्तरीति**—"कर्तरि" [५. १. ३.] इति सूत्रेणेत्यर्थः । "पूङ् पवने" पवते इति शाने शवि गुणेऽवादेशे "अतो

म आने" [ ४. ४. ११४. ] इति मागमे च—**पवमानः**। एवं—**मलयं पवमानः** इति— अत्र "कर्मणि कृतः" [ २.२-८३.]इति षष्ठ्या: "तृन्नुदन्ता०" [२.२.९०] इति निषेधात् "कर्मणि"[२.२.४०.] इति द्वितीया भवति। "यजीं देवपूजासङ्गतिकरणदानेषु"यजति यजते वेति शाने शवि मागमे च-**यजमानः**। "पराणि कानाऽऽनशौ चात्मनेपदम्" [ ३. ३. २० ] इत्यानश आत्मनेपदसंज्ञा, पूर्वो ङित्त्वात् " इङितः०" [ ३. ३. २२. ] इत्यात्मनेपदम्, यजेरीदित्त्वात् फलवति कर्तरि "ईगितः" [३. ३. ९५.] इत्यात्मनेपदमित्याभ्यामप्यात्मनेपदस्य प्राप्त्या पूर्वसूत्रेणैवानशः सिद्धया रूपे विशेषाभावेन सूत्रस्य वैयर्थ्यं हृदि निधायाह—**आनशा योगे न षष्ठीसमासः** इति— "तृप्तार्थपूरणाव्ययातृश्शत्रानशा" [ ३. १. ८५. ] इति सूत्रेणानशन्तयोगे षष्ठीसमासस्य निषेध उक्तः, तत्र च *तदनुबन्धकग्रहणे नातदनुबन्धकस्य* इत्यादिन्यायेन यद्यपि नेष्टसिद्धिरुभयोरपि समानानुबन्धकत्वात्, तथापि *सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्* इति न्यायेन शतृसहचरितस्यैवाऽऽनशब्दस्य ग्रहणं न तु शानशब्दीयानस्येति न शानान्तस्य षष्ठीसमासनिषेध इति विशेषार्थं पृथगिदं सूत्रमिति भावः। फलान्तरमप्याह—**न च यजेरफलवति कर्तरि सोऽस्तीति वचनमि**ति- 'यज्'धातुरुभयपदी, तत्र कर्तृगामिनि क्रियाफले आत्मनेपदं परगामिनि च परस्मैपदमिति विवेकः। एतत्सूत्राभावे च यत्र परगामि क्रियाफलं स्यात् तत्रात्मनेपदाभावे आनश् न स्यादिति यजमान इति रूपं न स्यात्, कृते च सूत्रे द्वयोरपि विषये शानो भवतीति सूत्रमावश्यकमिति। उक्तन्यायमन्यत्राप्यतिदिशति-**एवमुत्तरत्रापी**ति- "वयः-शक्ति-शीले" इति सूत्रेऽपीति भावः, षष्ठीसमासार्थं परस्मैपदविधानार्थमेवाग्रिममपि सूत्रमिति भावः, विशेषश्च तत्रैव सूत्रे वक्ष्यते। अनुबन्धप्रयोजनमाह—**शकारः शित्कार्यार्थः** इति--शित्कार्यं शविकरणादि ।।५. २. २३।।

---

**वयः शक्ति-शीले** । ५. २ २४. ।।

**त० प्र०**-सत्यर्थे वर्तमानाद् धातोर्वयः-शक्ति-शीलेषु गम्यमानेषु शानो भवति। वयः–प्राणिनां कालकृता बाल्याद्यवस्था, कतीह शिखण्डं वहमानाः, स्त्रियं गच्छमानाः। शक्तिः–सामर्थ्यम्, कतीह हस्तिनं निघ्नानाः, समश्नानाः। शीलं–स्वभावः, कतीहात्मानं वर्णयमानाः, परान्निन्दमानाः। अनभिधानाच्च वाऽसरूपः शतृः।।२४।।

**श० म०**– **न्यासानुसन्धानम्**—**वयः**०। सूत्रार्थं सामान्यतो व्याख्याय विशेषतो बोधयितुं पदार्थं विवेचयति--**वयः–प्राणिनां कालकृता बाल्याद्यवस्थे**ति—वयःशब्दस्यान्यार्थेऽपि [ पक्षिण्यपि ] प्रयोगादिदं व्याख्यानमावश्यकम्, सुखित्वदुःखित्वादिकमपि कस्यचिन्मते कालकृतमेव भवतीति तद्वारणाय बाल्यादीत्युक्तम्। उदाहरति—**कतीह शिखण्डं वहमानाः** इति- शिखण्डं हि बालैः शिरसि धार्यमाणा असंस्कृता [ जन्मतः प्रभृति च्छेदनमप्राप्ताः ] केशा उच्यन्ते, तद्वहनेन हि अवस्थाविशेषो गम्यत इति वयोगमनं स्पष्टम्। "वही प्रापणे" अतः शाने शवि मागमे च—**वहमानाः**। **स्त्रियं गच्छमानाः** इति-'कतीह' इत्यत्रापि योजनीयम्, स्त्रीगमनमपि तद्योग्यमवस्थाविशेषमेव गमयति, "गम्लृ गतौ" इति 'गम्'धातुः परस्मैपदी, ततोऽपि शानो विधानसामर्थ्यादेव, अतः शाने शवि "गमि०" [४.२.१०६.] इत्यन्तस्य छादेशे मागमे च—**गच्छमानाः**। शक्तिपदार्थं व्याचष्टे–**शक्तिः सामर्थ्यमिति**— सामर्थ्यं हि समीहितकार्यसम्पादनयोग्यतैव। **कतीह हस्तिनं निघ्नानाः** इति–हस्तिहननेन हि हन्तुः सामर्थ्यातिशयो गम्यते। "हनंक् हिंसा-गत्योः" अतः शाने "गम-हन०" [ ४. २. ४४. ] इत्युपान्त्यलोपे "हनो ह्नो घ्नः" [ २. १. ११२. ] इति घ्नादेशे निना योगे— **निघ्नानाः**। **समश्नानाः** इति-'कतीह' इत्यत्रापि योज्यम्, सम्यग्भोजनकर्तृत्वमपि सामर्थ्यद्योतकमेव, नासमर्थो भोक्तुमपि प्रभवति कुतः सम्यग्भोजनम्, "अशश् भोजने" अतः शाने श्नाविकरणे समा योगे—**समश्नानाः**। शीलपदार्थं व्याचष्टे—**शीलं स्वभावः** इति— स्वीयो भावः प्रकृतिरित्यर्थः, **कतीहात्मानं वर्णयमानाः** इति—आत्मप्रशंसनं हि न सर्वसाधारणी प्रकृतिः सभ्यैस्तस्य गर्हितत्वात् परित्यक्तत्वाच्च, तथा च कस्यचिदेवाल्पमेधसस्तच्छीलमिति भावः। "वर्णण् वर्णक्रिया-विस्तार-गुणवचनेषु" अतः शाने णिचि शवि गुणेऽयादेशे मागमे च —**वर्णयमानाः**। **परान् निन्दमानाः** इति- परनिन्दा हि न सर्वसाधारणी प्रकृतिः किन्तु कस्यचिदेव स्वभावः। "णिदु कुत्सायाम्" इति 'निन्द्'धातोः शाने शवि मागमे च—**निन्दमानाः**। सर्वत्र शानस्यैव विधीयमानतयाऽसरूपापवादन्यायेन पक्षे शताऽपि युक्तः, स कथं

न प्रयुक्त इत्याशङ्कामपनेतुमाह—**अनभिधानान्न शतृरिति**—शतृशब्दस्य प्रथमैकवचने यद्यपि 'शता' इति रूपमुचितं तथापि प्रत्ययस्वरूपभङ्गभिया तादृशं रूपं न निर्दिष्टमपि तु शतृरित्येवेत्यनुमीयते, अलमधिकेन लक्ष्यैकचक्षुष्काणां प्रयोगेषु पर्यनुयोगो नेति ॥ ५. २. २४. ॥

## धारीङोऽकृच्छ्रेऽतृश् । ५. २. २५. ॥

**त० प्र०—अकृच्छ्रः—सुखसाध्यः, अकृच्छ्रे सत्यर्थे वर्तमानाद् धारेरिङश्च परोऽतृश् प्रत्ययो भवति । धारयन् आचाराङ्गम्, अधीयन् द्रुमपुष्पीयम् । अकृच्छ्र इति किम् ? कृच्छ्रेण धारयति यतिधर्मम्, कृच्छ्रेणाधीते पूर्वगतम् । इङ आनशि प्राप्ते धारेरुभयप्राप्तौ वचनम् । वाऽसरूपोऽपि नेष्यत एव ॥ २५ ॥**

**श० म० न्यासानुसन्धानम्—धारी० । अकृच्छ्रः—सुखसाध्यः** इति—सुखेन— अनायासेन, साध्यः—साधयितुं शक्य इति भावः । चुरादेराकृतिगणत्वात् "धृगण् धारणे" अतृशि ऋकारः शकारश्चानुबन्ध इति 'अत्' अवशिष्यते । **धारयन् आचाराङ्गमिति**— णिचि वृद्धौ 'धारि' इत्यतोऽनेनातृशि शवि गुणे पूर्वाकारलोपे—धारयत्, ततः सौ नागमे संयोगान्तलक्षणे तलोपे व्यञ्जनान्तलक्षणे सिलोपे च—**धारयन्**, आचरणमाचारः, आचर्यते वा, शिष्टाचरितो ज्ञानाद्यासेवनविधिरित्यर्थः, तत्प्रतिपादकग्रन्थोऽपि आचारः, प्रवचनपुरुषस्याङ्गमिवाङ्गम्, आचारश्चासौ अङ्गं च **आचाराङ्गं** तत् । "इङ्क् अध्ययने" इङिकोरधिनाऽवश्यंभावी योगः, यदाह—कश्चित् तमनुवर्तते । **अधीयन् द्रुमपुष्पीयमिति**—अनेनातृशि इयादेशे समानदीर्घे 'अधियत्' इत्यतः सौ—**अधीयन्** इति, दशवैकालिकसूत्रस्य प्रथममध्ययनं—**द्रुमपुष्पीयमिति** । पदकृत्यं पृच्छति—**अकृच्छ्र इति किमिति**, उत्तरयति—**कृच्छ्रेण धारयति यतिधर्मम्, कृच्छ्रेणाधीते पूर्वगतमिति**. **यतिधर्मं** दशविधं मुनिधर्मम्, यदुक्तम्—

"खंती मद्दव अज्जव मुत्ती तव संजमे अ बोधव्वे ।
सच्चं सोअं आकिंचणं च, बंभं च जइधम्मो ॥"
[क्षान्तिर्मार्दवमार्जवं मुक्तिस्तपः संयमश्च बोद्धव्यः ।
सत्यं शौचमाकिञ्चनं च, ब्रह्म च यतिधर्मः ॥" ]

ब्रह्माण्डपुराणेऽपि प्रोक्तम्—"इह हि इक्ष्वाकुलवंशोद्भवेन नाभिसुतेन मरुदेवानन्दनमहादेवेन ऋषभेण दशप्रकारो धर्मः स्वयमेवाचीर्णः केवलज्ञानलाभाच्च प्रवर्तितः ।।" इति । अकृच्छ्रार्थं इह न प्रतिपिपादयिषित इति द्योतयितुमत्र 'कृच्छ्रेण' इति पदम् । वस्तुतस्तु धारयति यतिधर्ममित्येव प्रयोगः, अतृशोऽभावादेव अकृच्छ्रार्थाभावप्रतीतेः, अतृशोऽभावे च सकृद्गताविति न्यायेन न शत्रानशौ किन्तु वर्तमानैव तत्रोचितेति धारयतीत्येव प्रयोग इति स्वमतम् । **पूर्वगतमिति**—दृष्टिवादनाम्नोऽङ्गस्य पूर्वगतमिति चतुर्थो भेदस्तत् तथा, यदाहुः—"परिकर्म-सूत्र-पूर्वानुयोग-पूर्वगत-चूलिकाः पञ्च स्युर्दृष्टिवादभेदाः० ॥" इति । केचित् तु वर्तमानावत् शत्रानशावपीह भवत इत्याहुः, तन्मूलं तु मृग्यम्, पुनः प्रसङ्गविज्ञानं वा शरणम् । सूत्रस्य सार्थक्यमुपपादयति—**इङ आनशि प्राप्ते धारेरुभयप्राप्तौ वचनमिति**, अयमाशयः—इङो ङित्त्वादात्मनेपदित्वमिति ततः परस्मैपदसंज्ञकः शतृप्रत्ययः प्राप्नोत्येव न, किन्तु आत्मनेपदसंज्ञक आनश् एव प्राप्नोति, तन्निवारणाय अतृशो विधानाय च सूत्रकथनम्, एवं धारेर्णित्त्वेन तत्र फलवति कर्तरि आत्मनेपदे आनश्, अन्यत्र परस्मैपदे शतृप्रत्यय इत्युभयप्राप्तौ अतृश् एव स्यादिति नियमनार्थं च वचनम् । नन्विह शतृप्रत्यय एव विधीयतां तावताऽपि रूपसाम्यमुक्तार्थलाभश्च भविष्यतीति चेत् ? न—इङो हि परस्मैपदित्वाभावेऽपि विधानसामर्थ्यात् भवतु नाम शतृप्रत्ययः किन्तु धारेः परस्मैपदित्वसम्भवात् तत्रैव परस्मैपदसंज्ञकः स स्यान्न तु फलवति कर्तर्यात्मनेपदे इति तत्रापि विधानायातृशो विधानमुचितमेव, अतृशो हि नात्मनेपदसंज्ञा नवा परस्मैपदसंज्ञेति सर्वत उपपत्तेः । यद्वा प्राकृते "शत्रानशा०" [ ८. ३. १८१ ] इत्यत्र प्रयोजनम् । नन्वनेन सूत्रेण केवलस्यातृशो विधानेऽपि वाऽसरूपविधिनाऽऽनश् अपि भविष्यति, वर्तमाना च प्रथमान्तसामानाधिकरण्य इति चेत् ? अत्राह—**वाऽसरूपोऽपि नेष्यत एवेति**—यदि हि स इष्टः स्यात् तदाऽनेन विशिष्यातृशो विधानमनर्थकं स्यात्, सामान्यसूत्रेणैव शत्रानशोर्विधानेन वाऽसरूपविधिना च वर्तमानाया विधानेनैव सिद्धेः । तथा चैतद्विधानसामर्थ्याद् वाऽसरूपविधेरभावः ॥ ५. १. २५. ॥

## सुग्-द्विषा-ऽर्हः सत्रि-शत्रु-स्तुत्ये । ५. २. २६. ॥

**त० प्र०—सत्यर्थे वर्तमानात् सुनोतेर्द्विषोऽर्हश्च धातोर्यथासंख्यं सत्रिणि शत्रौ स्तुत्ये च कर्तरि अतृश् प्रत्ययो भवति । सत्री – यजमानः, सर्वे सुन्वन्तः, यज्ञस्वामिन इत्यर्थः । चौरं द्विषन्, चौरस्य द्विषन्, शत्रुरित्यर्थः । पूजामर्हन्, प्रशस्य इत्यर्थः । एष्विति किम् ? सुरां सुनोति, भार्यां द्वेष्टि परं पश्यन्तीम्, वधमर्हति चौरः ॥२६॥**

**श० म० न्यासानुसन्धानम्—सुग्०** । सत्रिशब्दार्थमाह—**सत्री यजमानः** इति । **सर्वे सुन्वन्तः** इति, एतदर्थमाह—**यज्ञस्वामिन इत्यर्थः** इति, सत्रं हि यागसामान्यमिति बहवः, अनेकस्वामिको यागः सत्रमिति परे, तथा चानेकस्वामिकयागे सर्वेषां यागस्वामिनां यजमानत्वेन सर्वे सुन्वन्त इति बहुवचनमुपपद्यते, तत्र यागे च यजमाना एव ऋत्विग्भिः कर्तव्यं सोमाभिषवणं कुर्वन्तीति तद्यागसम्प्रदायविद आहुः । यागसामान्यमिति पक्षे चैकस्यैव सत्रस्वामित्वेन सर्वे सुन्वन्त इति पदं यजमानपरं न स्यादिति चेत् ? न—अनेकयागस्वामिनामेकदा परिचायने तथाव्यवहारस्य कर्तुं शक्यत्वात् । वस्तुतस्तु एकस्वामिकयागे यजमानस्य ऋत्विग्भिः कर्तव्ये सोमाभिषवेऽधिकाराभावादनेकयागस्वामिनामेकदा निर्देशेऽपि सर्वे सुन्वन्त इति व्यवहारस्य कर्तुमशक्यत्वेनानेकस्वामिको यागः सत्रमित्येव पक्षो ज्यायानिति बोध्यम् । "षुंग्ट् अभिषवे" क्लेदनं सन्धानाख्यं पीडनमन्थने वाऽभिषवः, अतोऽतृशि श्नुविकरणे वादेशे—**सुन्वन्तः** । "द्विषींक् अप्रीतौ" अतोऽतृशि—**चौरं द्विषन्, चौरस्य द्विषन्** इति—"द्विषो वाऽतृशः" [ २. २. ८४. ] इति विकल्पेन कर्मणि षष्ठी, 'द्विषन्' इत्यस्यार्थमाह—**शत्रुरित्यर्थः** इति—शत्रुरित्यस्य शातयितेत्यर्थः, साधारण्येन चौरः सर्वेषामेव द्वेषविषयोऽनुचितकारित्वात्, तत्र यस्तस्य शातयिता भवति स एवैवमपदिश्यते । **पूजामर्हन्** इति, एतदर्थमाह—**स्तुत्य इत्यर्थः** इति, "अर्हं पूजायाम्" अतोऽतृशि शवि पूर्वाकारलोपे सौ—**अर्हन्** । पदकृत्यं पृच्छति—**एष्विति किमिति**, उत्तरयति—**सुरां सुनोती**ति—अर्थनिर्देशस्याभावे सूत्रस्यानर्थक्येन सामान्यसूत्रेणापि 'शतृः' अत्र स्यादिति 'एष्वेवार्थेषु एभ्यो धातुभ्यः' इति नियामकं सूत्रमिदमावश्यकमिति भावः । **भार्यां द्वेष्टि परं पश्यन्तीमिति**—नात्रायं भार्यायाः शत्रुरपि तु तस्या अनुचितं कर्म परपुरुषदर्शनं न सहत इत्येवाभिप्राय इति नात्रातृश् इष्टः । **वधमर्हति चौर** इति—नात्रार्हधातुः स्तुतौ वर्ततेऽपि तु योग्यतायाम्, वधयोग्यतया चात्र निन्दैव गम्यत इति नात्र स्तुतिरतोऽतृश् न भवति, सूत्राभावे तु स्यादिति भावः ॥ ५. २. २६. ॥

## तृन् शील-धर्म-साधुषु । ५. २. २७. ॥

**त० प्र०—शीले धर्मे साधौ च सत्यर्थे वर्तमानाद् धातोस्तृन् प्रत्ययो भवति । शीले— कर्ता कटम्, वदिता जनापवादान्, करणं वदनं चास्य शीलमित्यर्थः । धर्मः— कुलाद्याचारः, तत्र— वधूमूढां मुण्डयितारः श्राविष्ठायनाः, श्राद्धे सिद्धमन्नमपहर्तार आह्वरकाः, मुण्डनादि तेषां कुलधर्म इत्यर्थः । साधौ— गन्ता खेलः, कर्ता विकटः, साधु गच्छति साधु करोतीत्यर्थः । नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तृशब्दा औणादिकाः पितृमात्रादिवत्, अत एवैषामाविधौ पृथगुपादानम् । शीलादिष्विति किम् ? कर्ता कटस्य । बहुवचनं "सन्-भिक्षाशंसेरुः" [ ५. २. ३३. ] इत्यादौ यथासंख्यपरिहारार्थम् । नकारः सामान्यग्रहणविघातार्थः ॥ २७ ॥**

**श० म० न्यासानुसन्धानम्—तृन्०** । **शीले धर्मे साधौ चेति**—शीलादिरर्थो धात्वर्थस्य विशेषणम्, तथाहि—धात्वर्थः शीलं यत्र विवक्ष्यते, एवं धात्वर्थो धर्मत्वेन यत्र विवक्ष्यते, धात्वर्थसम्पादने साधुत्वं यत्र विवक्ष्यत इत्येवं क्रमेणार्थः कार्यः सामान्यतः शीलादिपदानामकिञ्चित्करत्वात्, अत एव पाणिनीये "तच्छील-तद्धर्म-तत्साधुकारिषु" [ ३. २. १३४. ] इति निर्देशः श्रूयते, तत्र तत्पदत्रयं प्रातिस्विकरूपेण तत्तद्धात्वर्थपरमिति तट्टीकाकृत आहुः । यथोद्देशन्यायेन पूर्वं शीलार्थे उदाहर्तुमाह—**शीले** इति । **कर्ता कटम्, वदिता जनापवादानि**ति—कृधातोरनेन तृनि गुणे सौ—**कर्ता**, "वद व्यक्तायां वाचि" अतस्तृनि इटि सौ च—**वदिता**, "तृन्नुदन्ता०" [ २. २. ९०. ] इति षष्ठीनिषेधाद् द्वितीया । शीलार्थं दर्शयति—**करणं वदनं चास्य शीलमित्यर्थः** इति—कटकरणं जनापवादवचनं चेति भावः ।

धर्मपदार्थमाह–**धर्मः कुलाद्याचारः** इति–आदिपदेनाश्रमादि गृह्यते, तथा च कुलोचित आश्रमोचितो वा आचारविशेष एवात्र धर्मपदेन गृह्यते न तु सामान्यधर्मो दयादाक्षिण्यादिः। तत्र धर्मार्थे–**वधूमूढां मुण्डयितारः श्राविष्ठायनाः** इति– मुण्डां कुर्वन्तीति णिचि अन्त्यस्वरादिलोपेऽनेन तृनि इटि गुणेऽयादेशे जसि– **मुण्डयितारः**, 'श्राविष्ठायन' इति गोत्रविशेषस्य नाम, तद्गोत्रीया जना वधूमूढां मुण्डयन्तीति तेषां कुलाचारः। **श्राद्धे–सिद्धमन्नमपहर्तार आह्वरकाः** इति–आह्वरकाः श्राद्धे सिद्धमन्नमपहरन्तीत्येतेषामाचारः। धर्मार्थं संगमयति–**मुण्डनादि तेषां कुलधर्म इत्यर्थः** इति। **साधौ–गन्ता खेलः** इति–खेटं लीलया गच्छतीति खेलः, खेटं यो लीलया गच्छति स साधु गच्छतीत्यर्थः। **कर्ता विकटः** इति–विकटशब्दो विस्तृतार्थे, व्याकरणान्तरे तु कर्ता कटमिति पाठः, यः कटं साधु करोतीति स कर्ता कटमिति। साधुतां संगमयति–**साधु गच्छति साधु करोतीत्यर्थः** इति। नप्तृ–नेष्टृप्रभृतयः शब्दाः कैश्चनात्र प्रकरणे व्याख्याताः. तेषु च न केवलप्रत्ययविधानमात्रेण निर्वाहोऽपि त्वन्यदपि निपात्यं भवति, तच्चेहानुक्तमिति न्यूनतां परिहरति– **नप्तृ०शब्दा औणादिकाः पितृमात्रादिवद्**इति, तथा चात्र तत्साधनमनावश्यकमित्यर्थः। औणादिकत्वे च मानमाह–**अत एवैषामाविधौ पृथगुपादानमिति**–"तृ-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्त्रो घुट्यार्" [ १. ४. ३८. ] इति सूत्रे 'तृ'इत्यनेन तृन्-तृचोर्ग्रहणमिष्टम्, नप्त्रादीनां तृन्नन्तत्वे तु तृन्नन्तत्वादेव सिद्धौ तेषां पृथगिहोपादनमनर्थकं स्यात्। एषामौणादिकत्वे तु *उणादयोऽव्युत्पन्नाः* इत्यव्युत्पन्नत्वेन तत्र प्रकृतिप्रत्ययविभागस्याभावान्न तृन्नन्तत्वेन तृजन्तत्वेन वा तेषां ग्रहणं स्यादिति तेष्वारो विधानायात्र ग्रहणमावश्यकमिति। यदि च व्युत्पन्नानि उणादीनि नामानीति मतमाश्रीयते तदा चौणादिष्वप्येषां तृन्नन्तत्वेन तृजन्तत्वेन वा साधनात् तृग्रहणेनैव सिद्धौ नप्त्रादिग्रहणं नियमयति– उणादिनिष्पन्नानां तृन्-तृजन्तानां चेदनेनार्भवति तर्हि नप्त्रादीनामेव, तेन पित्रादीनां न भवतीति फलमिति। पदकृत्यं पृच्छति–**शीलादिष्विति किमिति**, उत्तरयति–**कर्ता कटस्येति**– नात्र शीलाद्यर्थो विवक्षित इति तृनोऽप्राप्त्या "णक-तृचौ" [ ५. १. ४८. ] इति तृच् भवति, तथा च षष्ठीनिषेधाप्राप्त्या "कर्मणि कृतः" [ २. २. ८३. ] इति षष्ठी भवति। समाहारविवक्षयैकवचनेनैव सिद्धे बहुवचनस्य वैयर्थ्यमाशङ्क्य समाधत्ते– **बहुवचनं "सन्-भिक्षाऽऽशंसेरुः" [ ५. २. ३३. ] इत्यादौ यथासंख्यपरिहारार्थमिति**, अयमाशयः–'शीलधर्मसाधौ' इत्येकवचनेन निर्देशे कृते तस्य "द्युद्०" [ ५. २. ८६. ] इति सूत्रं यावदनुवर्तनाद् यत्र सूत्रे धातुत्रयमेकवचनेन निर्दिष्टं तत्र यथासंख्यं स्यात्, यथा "सन्-भिक्षाऽऽशंसेरुः" [ ५. २. ३३. ] इत्यत्र 'शीले सन्नन्तात्, धर्मे भिक्षेः, साधौ–आशंसेः' इति, इष्यते च प्रत्येकात् त्रिष्वप्यर्थेषु, अतो यथासंख्यवारणाय बहुवचनं, कृते तु बहुवचने विरुद्धसंख्यात्वेन यथासंख्यन्यायस्याप्राप्त्या सर्वेष्वप्यर्थेष्वेकस्मादपि भवतीति। किञ्च बहुवचनेन व्यापकत्वमर्थो लभ्यते, तथा च सर्वार्थव्यापकत्वं प्रतिप्रकृतिविहितस्य लभ्यत इति न यथासंख्यमित्यपि बोध्यम्। नकारस्य प्रयोगेऽश्रवणादानर्थक्यमाशङ्क्य समाधत्ते–**नकारः सामान्यग्रहणाविघातार्थः** इति–सामान्येन तृन्-तृचोर्ग्रहणमिष्टम्, तदविघातो यथा स्यादित्येवमर्थः। अयमाशयः–अत्र नकाराभावेऽयं निरनुबन्धकः, तृच् च सानुबन्धकः, तथा च "तृ-स्वसृ-नप्तृ०" [ १. ४. ३८. ] इत्यादिप्रदेशेषु 'तृ' इत्यस्य निरनुबन्धकस्य ग्रहणेऽस्यैव ग्रहणं स्यात्, तृचो ग्रहणं न स्यात् *निरनुबन्धग्रहणे न सानुबन्धकस्य* इति न्यायेन, उभयोः सानुबन्धकत्वे च निरनुबन्धकस्याभावेन सूत्रे सानुबन्धकस्यैव सिद्धौ निरनुबन्धन्यायस्य विषयाभावेन तृन्-तृचोरुभयोः सामान्येन ग्रहणं सिद्धं भवतीति भावः ॥ ५. २. २७. ॥

---

**भ्राज्यलंकृग्-निराकृग्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजना-ऽपत्रप इष्णुः ।५. २. २८.॥**

**त० प्र०—एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य इष्णुः प्रत्ययो भवति। भ्राजनशीलो भ्राजनधर्मा साधु भ्राजते वा– भ्राजिष्णुः, "भ्राजिष्णुना लोहितचन्दनेन"। अलंकृग्– अलंकरिष्णुः। निराकृग्– निराकरिष्णुः। भू– भविष्णुः, "सर्वेषां भविष्णूनां जन्यानां न तु स योग्यः"। सह्– सहिष्णुः। रुच्– रोचिष्णुः। वृत्– वर्तिष्णुः। वृध्– वर्धिष्णुः। चर्– चरिष्णुः। प्रजन्– प्रजनिष्णुः। अपत्रप्– अपत्रपिष्णुः। भ्राजेर्नेच्छन्त्येके ॥ २८ ॥**

**श० म० न्यासानुसन्धानम्–भ्राज्य०।** प्रतिप्रकृतितः सर्वस्मार्थे प्रत्ययो भवतीति बोधयितुं विगृह्योदाहरति–**भ्राजनशीलो भ्राजनधर्मा साधु भ्राजते वा–भ्राजिष्णुरि**ति–"भ्राजि दीप्तौ" इति 'भ्राज्' धातुः, साधु प्रशस्तं क्रियाविशेषणत्वाद् नपुंसकत्वं द्वितीया च, तस्याश्च लोपः। **"भ्राजिष्णुना लोहितचन्दनेन"** इति–लौकिकोऽयं प्रयोगः, अस्योपन्यासो भाषायामपि प्रयोगो न तु छन्दस्येवेति प्रदर्शनार्थः। **अलंकृग्** इति–अलंपूर्वः करोतिः, अस्य–**अलंकरिष्णुरि**ति–अत्र नाम्यन्तलक्षणो गुणः, **निराकृग्** इति–निराङ्पूर्वः करोतिः, अस्य–**निराकरिष्णुः**। "भू सत्तायाम्" भवनशील इत्यादिविग्रहे–भविष्णुः, भाषायामप्यस्य प्रयोगं दर्शयति–**सर्वेषां भविष्णूनां जन्यानां न तु स योग्य** इति। "षहि मर्षणे" इति 'सह्'धातोः–**सहिष्णुः**। माघे प्रथमसर्गे रावणासुरवर्णनप्रस्तावे पद्यमिदम्–

"बृहच्छिलानिष्ठुरकण्ठघट्टनाद्,
विकीर्णलोलाग्निकणं सुरद्विषः।
जगत्प्रभोरप्रसहिष्णु वैष्णवं,
न चक्रमस्याक्रमताधिकन्धरम्॥" इति।

बृहच्छिलावत् निष्ठुरेण कण्ठेन घट्टनात् संघर्षात् विकीर्णा लोला अग्निकणा यस्मात् तादृशं वैष्णवं चक्रं सुदर्शनं नाम, अप्रसहिष्णु– अक्षमाशीलमपि, जगत्प्रभोरस्य रावणस्याधिकन्धरं न अक्रमत–प्रवेशं न लेभे इति पद्यार्थः। अत्र 'अप्रसहिष्णु' इति पदमेतत्सूत्रलक्ष्यमित्यर्थः। "रुचि अभिप्रीत्यां च" चकाराद् दीप्तौ, अभिप्रीतिरभिलाषः, रोचनशीलो- **रोचिष्णुः**। "वृतूङ् वर्तने" वर्तनशीलो–**वर्तिष्णुः**। "वृधूङ् वृद्धौ" वर्धनशीलो–**वर्धिष्णुः**, त्रिष्वपि नाम्युपान्त्यलक्षणो गुणः। "चर भक्षणे च" चात् गतौ, चरणशीलः-**चरिष्णुः**। "जनैचि प्रादुर्भावे" प्रपूर्वस्यास्य- **प्रजनिष्णुः**, प्रजननशील इत्यादि वाक्यम्। "त्रपौषि लज्जायाम्" अपत्रपणशीलः–**अपत्रपिष्णुः**। तृनोऽपवादः। येऽत्र सोपसर्गाः पठितास्तेभ्य एतदुपसर्गपूर्वेभ्य एव भवति, अन्येभ्यस्त्वनियमेन। मतान्तरमाह–"**भ्राजेर्नेच्छन्त्येके** इति, पाणिनीये तस्यैतद्विषये "अलंकृञ्०" [ ३. २. १३६. ] इति सूत्रे पाठाभावः, अत्रोक्तं दीक्षितेन–चकारोऽनुक्तसमुच्चयार्थ इति, अनुक्ता ये धातवो येभ्य इष्णुप्रत्ययचेष्टस्तेषां संग्रहार्थमिह चकारः, तेन भ्राजिष्णुरिति सिध्यतीति वृत्तिकृतां मतम्, परं तु नैतद् भाष्ये दृष्टम्, भाष्यादृष्टत्वाच्च न प्रमाणमिति तदाशयः। यदि च शिष्टप्रयोगो दृश्येत तदा चकारेण साधनीय इति वृत्तिकृतामाशयः॥ ५. २. २८.॥

## उदः पचि-पति-पदि-मदेः। ५. २. २९.॥

**त० प्र०—उत्पूर्वेभ्य एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य इष्णुर्भवति। उत्पचिष्णुः, उत्पतिष्णुः, उत्पदिष्णुः, उन्मदिष्णुः। पदेर्नेच्छन्त्यन्ये॥ २९॥**

**श० म० न्यासानुसन्धानम्–उदः०।** "डुपचींष् पाके" उत्पचनशील इति–**उत्पचिष्णुः**। "पत्लृ गतौ" उत्पतनशील इति–**उत्पतिष्णुः** "पदिंच् गतौ" उत्पादशील इति–**उत्पदिष्णुः** "मदैच् हर्षे" उन्मादशील इति–**उन्मदिष्णुः**। मतान्तरमाह–**पदेर्नेच्छन्त्यन्ये** इति। पाणिनीयेऽपि "अलंकृञ्०" [ ३. २. १३६. ] इति। सूत्रे पदिग्रहणं नोपलभ्यते, तत्रोक्तं तत्त्वबोधिनीकृता–"केचित् तु 'पत्' इत्यस्य स्थाने दान्तं सूत्रे पठित्वा 'पद गतौ' इत्यस्मात् प्रत्ययमाहुः।" इति। योगविभागश्चैकदैवोपसर्गपाठेन धातुचतुष्टयस्य तदुपसर्गयोगार्थः, एकयोगे हि सर्वैः सहोपसर्गः पठनीयः स्यात्, वाक्यभेदो वा भवेदिति पृथग् योगकरणमेव वरमिति प्रतीमः॥ ५. २. २९.॥

## भू-जेः ष्णुक्। ५. २. ३०.॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानाभ्यां भू-जिभ्यां ष्णुक् प्रत्ययो भवति। भूष्णुः, जिष्णुः। ककारः कित्कार्यार्थः॥ ३०॥**

**श० म० न्यासानुसन्धानम्–भू-जेः०।** "भू सत्तायाम्" भवनशीलो–**भूष्णुः**। "जि जये" जयशीलो–**जिष्णुः**। पाणिनीये भवतेः पाठो नास्ति, तथापि "ग्लाजिस्थश्च ग्स्नुः" [३.२.१३९.] इति सूत्रे भाष्ये ग्स्नोः कित्त्वं गित्त्वं वा कार्यमिति प्रस्तावे गित्करणपक्षे "भुव इट्प्रतिषेधश्च। भुव इट्प्रतिषेधश्च वक्तव्यः। किञ्चान्यत्-गुणप्रतिषेधश्च। भूष्णुरिति पूर्वपक्षे गुणप्रतिषेधेट्प्रतिषेधसूत्रयोर्गकारस्यापि प्रश्लेषं कृत्वा समाहितमिति पाणिनीयानामिष्टः प्रत्यय इति लाभात् कौमुदीकृता "ग्लाजिस्थश्च ग्स्नुः" इति सूत्र-

व्याख्यायां "चाद् भुवः श्नुकः किति" [ ७. २. ११.] इतीट्प्रतिषेधसूत्रे गकारप्रश्लेषान्नेट् भूष्णुः' इत्युक्तम्, तथा च भवतेरुभौ प्रत्ययौ–भूष्णुर्भविष्णुरिति च। अनुबन्धसार्थक्यमाह– **ककारः कित्कार्यार्थः** इति–कित्कार्यं गुणाभावः, इट्प्रतिषेधश्च, भूष्णुरित्यत्र "नामिनो गुणोऽक्ङिति" [ ४ ३. १. ] इति गुणाभावः "उवर्णात्" [४. ४. ५८. ] इतीडभावश्च; जिष्णुरित्यत्र ग्विटः प्राप्तिरेव नास्तीति गुणाभाव एव, तदर्थं कित्करणमिति भावः ॥ ५. २. ३०. ॥

## स्था-ग्ला-म्ला-पचि-परिमृजि-क्षेः स्नुः ॥ ५. २. ३१. ॥

**त० प्र०–एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः स्नुप्रत्ययो भवति। स्थास्नुः, म्लास्नुः, पक्ष्णुः, परिमार्क्ष्णुः, क्षेष्णुः। ग्लादिभ्यः केचिदेवेच्छन्ति ॥ ३१ ॥**

**श० म० न्यासानुसन्धानम्–स्था०।** "ष्ठां गतिनिवृत्तौ" तिष्ठतीत्येवंशील इति–**स्थास्नुः**। "ग्लैं हर्षक्षये" इह हर्षक्षयो धात्वपचयः, ग्लायतीत्येवंशील इति–**ग्लास्नुः**। "म्लैं गात्रविनामे" विनामः कान्तिक्षयः, म्लायतीत्येवंशील इति–**म्लास्नुः**। "डुपचींष् पाके' पचतीत्येवंशील इति स्नौ "चजः कगम्" [२.१.८६.] इति चस्य के "नाम्यन्तस्थाकवर्गात्०" [२. ३. १५.] इति सस्य षे "रषृवर्णान्नो णः०" [ २. ३. ६३ ] इति नस्य णे–**पक्ष्णुः**। "मृजौक् शुद्धौ" परिमार्ष्टीत्येवंशील इति स्नौ "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इत्युपान्त्यगुणे "मृजोऽस्य" [ ४. ३. ४२. ] इति वृद्धौ "यज-सृज-मृज०" [ २. १. ८७ ] इति जस्य षत्वे "षढोः कः सि" [ २. १. ६२. ] इति षस्य कत्वे "नाम्यन्तस्थाकवर्गात्" [ २. ३. १५. ] इति प्रत्ययसकारस्य षत्वे नस्य णत्वे च–**परिमार्क्ष्णुः** "धूगौदितः" ४. ४. ३८.] इति वा इटि तु–परिमार्जिष्णुरित्यपि भवति। "क्षि क्षये" "क्षित् निवासगत्योः" क्षयशील इति—**क्षेष्णुरिति**–अत्र नाम्यन्तलक्षणो गुणः, नामिनः परतया सस्य च षः, "क्षिष्णुश् हिंसायाम्" इत्यस्य न सानुबन्धत्वात्। मतान्तरमाह–**ग्लादिभ्यः केचिदेवेच्छन्तीति**–पाणिनीयादयो नेच्छन्तीत्यर्थः ॥ ५. २. ३१. ॥

## त्रसि-गृधि-धृषि-क्षिपः क्नुः ॥ ५. २. ३२. ॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानेभ्य एभ्यः क्नुः प्रत्ययो भवति। त्रस्नुः, गृध्नुः, धृष्णुः, क्षिप्नुः ॥३२॥**

**श० म० न्यासानुसन्धानम्–त्रसि०।** "त्रसैंच् भये" त्रसनशील इति–**त्रस्नुः**। "गृधूच् अभिकाङ्क्षायाम्" गृध्यतीत्येवंशील इति–**गृध्नुः**, "ञिधृषाट् प्रागल्भ्ये" धृष्णोतीत्येवंशील इति–**धृष्णुः**, नस्य णः, "क्षिपंच् प्रेरणे" "क्षिपींत् प्रेरणे" क्षेपशील इति–**क्षिप्नुः**, अत्र प्रत्ययस्य कित्त्वात् सर्वत्र गुणाभावः ॥ ५. २. ३२. ॥

## सन्-भिक्षाऽऽशंसेरुः ॥ ५. २. ३३. ॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानात् सन्प्रत्ययान्ताद् धातोर्भिक्षा-शंसिभ्यां च पर उः प्रत्ययो भवति। चिकीर्षुः, जिहीर्षुः, भिक्षुः। 'आशंस्' इति "आङः शसुङ् इच्छायाम्" इत्यस्य ग्रहणम्, न तु "शंसू स्तुतौ च" इत्यस्य, तत्राङ्योगस्यानियतत्वात्। आशंसुः। स्तुत्यर्थस्यापीच्छन्त्यन्यः ॥३३॥**

**श० म० न्यासानुसन्धानम्–सन्०।** सूत्रे 'सन्'-शब्द उपात्तः, स च द्विविधः– "तुमर्हादिच्छायां सन्०" [ ३. ४. २१. ] इत्यादिना विहितः सन् प्रत्ययरूपः, "षन संभक्तौ" इति "षणूयी दाने" इति च धातुगणपठितः सन् धातुरूपः, तत्र कस्येह ग्रहणमिति विचारणायां भिक्षिसाहचर्याद् धातोरेव ग्रहणमित्याशङ्कामपाकर्तुमाह–**'सन्'प्रत्ययान्ताद् धातोरिति**– *प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणम्* इति न्यायेन प्रत्ययस्यैव ग्रहणमित्यर्थः, अथवा गर्गादिषु जिगीषुशब्दपाठात् प्रत्ययस्यैव ग्रहणमिति विज्ञायते, स हि प्रत्ययग्रहणे उपपद्यते, न धातुग्रहणे। तथा च प्रत्ययग्रहणे तदन्तविज्ञानात् धातोः प्रकृतत्वाच्चोक्तार्थलाभ इति भावः। कर्तुमिच्छतीत्येवंशील इति सनि कृगोऽनुस्वारेत्त्वादिडभावे "स्वर-हन०" [ ४. १. १०४. ] इति दीर्घे "नामिनोऽनिट्" [ ४. ३. ३३. ] इति सनः कित्त्वे "ऋतां क्ङितीर्" [ ४. ४. ११६. ] इतीरादेशे "सन्-यङश्च" [ ४. १. ३. ] इत्याद्यस्यैकस्वरांशस्य द्वित्वे पूर्वकस्य "कङश्चञ्" [ ४. १. ४६. ] इति चत्वे "भ्वादेर्नामिनो०" [२. १. ६३.] इति दीर्घे 'चिकीर्ष' इति सन्नन्ताद् धातोरनेन उप्रत्यये "अतः"

[४. ३. ८२.] इत्यकारलोपे–**चिकीर्षुः**। एवं हर्तुमिच्छतीत्येवंशील इति–**जिहीर्षुरि**ति–अत्र "गहोर्जः" [४. १. ४०.] इति पूर्वहस्य ज इति विशेषः शेषं समानम्। "भिक्षी याच्ञायाम्" भिक्षणशीलो–**भिक्षुः**। 'शंस्'धातुर्द्विविधः, तथाहि–"आङः शसुङ् इच्छायाम्" आङ इति आङः पर एवायं प्रयुज्यते, नान्योपसर्गान्नापि केवल इति ज्ञापनार्थम्, "शंसू स्तुतौ च" चकाराद्धिसायामिति। तत्रेच्छार्थस्य ग्रहणमिहाभिमतमन्यस्य तु न, तदुपायमाह– **तत्राङ्योगस्यानियतत्वादि**ति। अयमाशयः–इच्छार्थकस्य हि आङं विना प्रयोग एव न भवतीति तत्राङ्योगः स्वाभाविकः, स्तुत्यर्थकस्य तु तद्योग ऐच्छिकः, तत्र सूत्रे 'आशंस्' इत्याङ्विशिष्टपाठेन यत्राङ्प्रयोगो नियतस्तस्यैव ग्रहणस्य युक्तत्वात्। तथा सन्' अपि इच्छार्थकः, भिक्षधातोरर्थेऽपि इच्छाऽन्तर्भूतैव. लब्धुमिच्छयैव याच्यते किञ्चित्, तथा च ताभ्यां साहचर्यादपीच्छार्थकस्यैव ग्रहणमुचितमिति। किञ्चाङो योगे सति शंसेः स्तुत्यर्थस्य प्रतीत्यभावस्य स्वाभाविकत्वेनापि स्तुत्यर्थान्नायं प्रत्यय इत्युचितम्। आशंसनशील इति–**आशंसुः**। मतान्तरमाह–**स्तुत्यर्थस्यापीच्छत्यन्यः** इति ॥ ५. २. ३३. ॥

## विन्द्विच्छू ॥ ५. २. ३४. ॥

**त० प्र०–शीलादौ सत्यर्थे वर्तमानाद् वेत्तेरिच्छतेश्च उः प्रत्ययो यथासंख्यं नोपान्त्य-छकारान्तादेशौ च निपात्यन्ते। वेदनशीलो–विन्दुः, एषणशील–इच्छुः। कथमपां विन्दुः? विन्देरवयवार्थात् औणादिक उः। अन्ये त्वस्यैव निपातनं, क्रियानिमित्तस्तु विन्दुरित्यनागमिक एवेत्याहुः। सर्वविदीनां सर्वेषीणां च निपातनमिदमित्यन्यः ॥३४॥**

**श० म० न्यासानुसन्धानम्–वि०। यथासंख्यं नोपान्त्य-छकारान्तादेशाविति**–नोपान्त्यश्च छकारान्तादेशश्चेति द्वन्द्वः, नोपान्त्यशब्दे च नश्चासावुपान्त्य इति विग्रहः, अन्त्यसमीपस्थो नकारो निपात्यत इत्याशयः। अत्र प्रत्ययस्य प्रकरणलब्धत्वमेवेति नोपान्त्य-छकारादेशयोरेव विषये निपातनस्य व्यापार उचितस्तथापि, निपातनं नाम प्रकृति-प्रत्ययविभागविवेकं विनैव तत्तत्प्रयोगस्य साधुत्वकल्पनमिति, तत्र प्रत्ययादिकल्पना तु बालानामुपलालनार्थमेवेति तत्र किं लक्षणलब्धम्, किं चालाक्षणिकमिति विवेकाभावः। "विदक् ज्ञाने" वेदनशीलो–**विन्दुः**। "इषत् इच्छायाम्" एषणशील–**इच्छुः**। **कथमपां विन्दुरि**ति–तस्य वेदनशीलत्वाभावात् प्रश्नः, वेदनस्वभावो हि प्राणिधर्म इति विन्दोः प्राणित्वाभावात् तत्र सोऽर्थो न संघटत इति भावः। समाधत्ते–**विन्देरवयवार्थात् औणादिक उरि**ति–"विदु अवयवे" अवयव एकदेशः, अनेन स्वगता क्रिया लक्ष्यते। उदित्वान्नं विन्दति, यद्यभिधानमस्ति, विन्दुरिति तु दृश्यते, यथा गण्डति गण्ड इति। उणादौ–"भृ-मृ-तॄ-त्सरि०"[७.१.६] इत्युः–विन्दुः" इति हैमधातुपारायणे। मतान्तरमाह–**अन्ये त्वस्यैव निपातनमि**ति—बाहुल्येन तस्यैव प्रयोगादित्यर्थः। वेदनशीलार्थकस्य प्रयोगे का गतिरिति चेत्? अत्राह–**क्रियानिमित्तस्तु विन्दुरित्यनागमिक एवेत्याहुरि**ति–न तत्र शास्त्रानुसृतिः किन्तु रूढिरेवेति भावः। अत्राहुरित्यस्वरसः। तथा च शीलार्थस्य प्रकरणादवयवार्थस्य विन्दोश्च शीलाभावात् तत्रार्थाघटनान्न तस्यैतत्प्राकरणिकत्वमिति ज्ञानार्थकस्यैव निपातनमिदमित्यास्थेयम्, अवयवार्थकस्य विन्दुशब्दस्योक्तरीत्यौणादिकतया सिद्धौ बाधकाभावात्। निपातनस्य केवलं शब्दस्वरूपसाधुत्वप्रतिपादनमात्रपरत्वेन, तदर्थस्य च लोकव्यवहारानुसारं प्रकरणानुसारं च निर्णेयत्वेन धातुविशेषनियमने मूलाभावादविशेषेण सर्वेषां ग्रहणमिति स्वतन्त्रमतमाह–**सर्वविदीनां सर्वेषीणां च निपातनमिदमित्यन्यः** इति–प्रयोगं निपात्य यथार्थं तस्य वेदनशीलेऽवयवे च वृत्तिरिति भावः। "विदक् ज्ञाने" "विदिंच् सत्तायाम्" "विद्लृंती लाभे" "विदिप् विचारणे" "विदिण् चेतनाख्याननिवासेषु" इति विदयः। "इषच् गतौ" "इषत् इच्छायाम्" "इषश् आभीक्ष्ण्ये" इति इषयः ॥ ५. २. ३४. ॥

## शॄ-वन्देरारुः ॥ ५. २. ३५. ॥

**त० प्र०–शीलादौ सत्यर्थे वर्तमानाभ्यां शॄ-वन्दिभ्यामारुः प्रत्ययो भवति। शृणातीत्येवंशीलः–शरारुः, विशीर्यते–विशरारुः। वन्दते–वन्दारुः ॥ ३५ ॥**

**श० म० न्यासानुसन्धानम्–शॄ०** "शॄश् हिंसायाम्" शृणातीत्येवंशील इत्यनेन आरुप्रत्यये गुणे च–**शरारुः**। कर्मण एव कर्तृत्वविवक्षायाम् "एकधातौ०" [३. ४.

८६.] इति क्ये आत्मनेपदे च विशीर्यते इति भवति, तावता च कृत्प्रत्ययधर्मस्य कर्त्रर्थकत्वरूपस्याक्षतेः, विशीर्यते इत्येवंशील इति—**विशरारुः** । "वदुङ् स्तुत्यभिवादनयोः" स्तुतिर्गुणैः प्रशंसा, अभिवादनं पादयोः प्रणिपातः, वन्दनशीलो—**वन्दारुः** ॥ ५. २. ३५. ॥

## दा-ट्धे-सि-शद-सदो रुः । ५. २ ३६. ॥

**त०प्र०—शीलादौ सत्यर्थे वर्तमानेभ्यो 'दारूप ट्धे सि शद सद' इत्येतेभ्यो रुः प्रत्ययो भवति । ददाति दयते यच्छति द्यति दाति दायति वेत्येवंशीलो—दारुः । कथं द्यति तदिति—दारु काष्ठम् ? औणादिकः कर्मणि रुः । धयति—धारुर्वत्सो मातरम् । सिनोति—सेरुः । शीयते—शद्रुः । सीदति—सद्रुः । एभ्य इति किम् ? दधातीत्येवंशीलो—दधिर्गाः । ट्धेग्रहणाद् दारूपमिह गृह्यते न संज्ञा ॥३६॥**

**श० म० न्यासानुसन्धानम्—दा०** । वृत्तौ 'दारूप' इति व्याख्यानस्य फलं दर्शयितुं विगृह्योदाहरति—**ददातीत्यादि** । "डुदांग्क् दाने" इत्यस्य—**ददाती**ति, "देंङ् पालने" इत्यस्य—**दयते** इति, "दांम् दाने" इत्यस्य "श्रौति०" [ ४. २. १०८. ] इत्यादिना यच्छादेशे—**यच्छती**ति, "दोंच् छेदने" इत्यस्य "न शिति" [ ४. २. २. ] इत्यात्वप्रतिषेधे "ओतः श्ये" [ ४. २. १०३. ] इत्योकारस्य लोपे—**द्यती**ति, "दांव्क् लवने" इत्यस्य **दाती**ति, "दैंव् शोधने" इत्यस्य च—**दायती**ति, सर्वेषां दारूपत्वस्यौपदेशिकत्व-प्रायोगिकत्वयोरन्यतरस्य सत्त्वाद् भवतीह ग्रहणमिति भवति सर्वेषां—**दारुरि**ति भावः । इह दारुशब्दस्य कर्तरि निष्पाद्यमानत्वेन कर्मणि तस्य कथं प्रयोग इति शङ्कते—**कथं द्यति तदिति—दारु काष्ठमि**ति, उत्तरयति—**औणादिकः कर्मणि रुरि**ति । यद्यपि द्यते रुप्रत्ययस्य विधानं न सर्वेषु तन्त्रेषु श्रूयते, तथापि—

"संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥"

इत्यभियुक्तैरुक्ततया यथाप्रयोगं प्रत्ययास्तदर्थाश्च कल्पयितुं शक्या इति दारुशब्दस्य सिद्धौ बाधकाभावः, दीयते खण्ड्यते स्वयमेवेति विग्रहे विशरारुवत् कर्मकर्तरि वा प्रत्यय इति समाधेयम् । "ट्धें पाने" धयतीत्येवंशील इति—**धारुर्वत्सो मातरमि**ति— "तृन्नुदन्त०" [ २. २. ९०. ] इति षष्ठीनिषेधात् 'मातरम्' इत्यत्र द्वितीया । "षिग्ट् बन्धने" "षिग्श् बन्धने" सयनशीलः—**सेरुरि**ति—अत्र नाम्यन्तलक्षणो गुणः "शद्लृं शातने" "शदेः शिति" [३.३.४१.] इत्यात्मनेपदे "श्रौति०" [ ४.२.१०८. ] इति शीयादेशे 'शीयते' इति भवति, शीयते इत्येवंशील इति—**शद्रुः** । "षद्लृं विशरण-गत्यवसादनेषु" विशरणं शटनम्, अवसादोऽनुत्साहः, "षद्लृंत् अवसादने" सादनशीलः—**सद्रुः** । **सीदती**ति तु "श्रौति०" [ ४. २. १०८. ] इति सीदादेशे । पदकृत्यं पृच्छति—**एभ्य इति किमि**ति, उत्तरयति—**दधातीत्येवंशीलो—दधिर्गाः** इति—"डुधांग्क् धारणे च" चकाराद् दाने, "सस्रि-चक्रि-दधि-नेमि" [५.२.३९.] इति निपातनाद् डौ धानशीलो दधिः, "तृन्नुदन्ता०" [ २. २. ९०. ] इति षष्ठीनिषेधात् 'गाः' इत्यत्र द्वितीया । *कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः* इति न्यायेन सूत्रस्थ'दा'पदेन दासंज्ञको धातुर्ग्राह्यो न तु दारूपमिति शङ्कायामाह—**ट्धेग्रहणाद् दारूपमिह गृह्यते न संज्ञे**ति, अयमाशयः—यदि दासंज्ञेह ग्रहीतुमिष्टा स्यात् तर्हि ट्धेधातोरपि दासंज्ञकत्वेन तस्येह ग्रहणं व्यर्थं स्यात्, कृते च तत्र संज्ञाग्रहणव्यावृत्तौ दारूपग्रहणे दाति-दायत्योरपि ग्रहणं भवतीति दाति दायतीत्येवंशीलेऽपि प्रत्ययः सिद्धः ॥५. २. ३६. ॥

## शीङ्-श्रद्धा-निद्रा-तन्द्रा-दयि-पति-गृहि-स्पृहेरालुः । ५. २. ३७. ॥

**त० प्र०—एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य आलुः प्रत्ययो भवति । शेते इत्येवंशीलः—शयालुः । श्रत्पूर्वो धाग्, श्रद्धत्ते—श्रद्धालुः । निद्राति निद्रायति वा—निद्रालुः, तत् द्राति द्रायति वा—तन्द्रालुः, निपातनात् तदो दस्य नः, तन्द्रेति सौत्रो वा । दयते—दयालुः । पति-गृहि-स्पृहयोऽदन्ताश्चौरादिकाः, पतिगृही सौत्राविकारान्तौ वा, पतयति—पतयालुः, गृहयते—गृहयालुः, स्पृहयति—स्पृहयालुः, मृगयतेरपि कश्चित्—मृगयालुः । लज्जालुः, ईर्ष्यालुः, शलालुप्रभृतयस्त्वौणादिकाः । कृपालु-हृदयालू मत्वर्थीयान्तौ ॥ ३७ ॥**

**श० म० न्यासानुसन्धानम्–शीङ्०** । "शीङ्क् स्वप्ने" शेते इत्येवंशील इत्यालौ गुणे च—**शयालुः** । "डुधांग्क् धारणे च" चकाराद् दाने, श्रत्पूर्वादत आलौ समानदीर्घे च–**श्रद्धालुः** । "द्रांक् कुत्सितगतौ" कुत्सिता गतिः पलायनं स्वप्नश्च, "द्रा स्वप्ने" निद्राणशीलो **निद्रालुः** । तन्द्राधातोः पाठाभावेन कथं तस्मात् प्रत्यय इत्याशङ्कायामाह—**तत् द्राति द्रायति वा–तन्द्रालुः**, दः कुत्र गतो नः कुतश्चागत इत्याशङ्कायामाह—**निपातनात् तदो दस्य नः** इति, समाधानान्तरमाह–**'तन्द्रा' इति सौत्रो वेति**—अत्रैव सूत्रे 'तन्द्रा' इति निर्देशात् सौत्रो धातुः स मन्तव्य इत्यर्थः, समाधानान्तरानुसरणमूलं तु पूर्वोक्तविग्रहे तत्पदस्य किमर्थकत्वमिति शङ्कैव, तदित्यस्य सर्वनामत्वेन तस्याननुगतत्वात् । "दयि दान-गति-हिंसा-दहनेषु" चकाराद् रक्षणे, दयते इत्येवंशील इति—**दयालुः** । सूत्रे 'दयि' इति स्वरूपबोधकेक्प्रत्ययान्तो निर्दिष्टस्तथा पति-गृहीत्यादयोऽपि इक्प्रत्ययान्ता एव, ण्यन्तत्वे च पाति-ग्राहीति रूपं स्यादित्याशङ्कायामाह– **पति-गृहिस्पृहयोऽदन्ताश्चौरादिकाः इति**, तथा च स्वार्थे णिचि लुप्तस्याकारस्य स्थानिवद्भावाच्च वृद्धिर्गुणो वेति निर्देशः संगत इत्याशयः । पतधातोरदन्तत्वस्य स्वार्थिकण्यन्तत्वस्य कुत्रचिन्मते वैकल्पिकत्वस्यापि दृष्टतया समाधानान्तरमाह–**पति-गृही सौत्राविकारान्तौ वेति**– अत्रैव सूत्रे पाठेनैतयोरिकारान्तमेव धातुरूपमिति लक्ष्यानुरोधात् स्वीकार्यमिति भावः । "पतण् गतौ वा" वाशब्दो णिजदन्तत्वयोर्युगपद्विकल्पार्थः, पतनशीलः—**पतयालुः** । "गृहणि ग्रहणे" गृहणशीलः—**गृहयालुः** । "स्पृहण् ईप्सायाम्" स्पृहाशीलः–**स्पृहयालुः** । मतान्तरमाह– **मृगयतेरपि कश्चित्– मृगयालुः** इति– "मृगणि अन्वेषणे"मृगयते इत्येवंशील इति वाक्यम् । अन्येषामप्यालुप्रत्ययान्तानामेतत्सूत्रलक्ष्यातिरिक्तानां स्मरणात् तत्साधनप्रकारमुपदिशति—**लज्जालुः, ईर्ष्यालुः, शयालुप्रभृतयस्त्वौणादिकाः** इति–"ओलस्जैति व्रीडे" लज्जालुर्लज्जनशीलः, "ईर्ष्य ईर्ष्यार्थः" ईर्ष्यालुरीर्ष्याशीलः, "शल गतौ" शलालुर्वृक्षावयवः, त्रिष्वपि "लस्जीर्ष्यिशलेरालुः" [उणा०८२२.] इत्यनेनालुप्रत्ययः, आदिशब्दात् 'अपालुः' इत्यादेः संग्रहः । शब्दान्तरे प्रकारान्तरमनुशिष्टं तदाह– **कृपालु-हृदयालू मत्वर्थीयान्तौ** इति–कृपाशब्दात् हृदयशब्दाच्च "कृपा-हृदयादालुः" [ ७. २. ४२. ] इत्यनेन मत्वर्थे आलुप्रत्यय इत्यर्थः ।।५.२.३७।।

**ङौ सासहि-वावहि-चाचलि-पापति** ५.२.३८।।

**त० प्र०—शीलादौ सत्यर्थे वर्तमानानां सहि-वहि-चलि-पतीनां यङन्तानां ङौ सति यथासंख्यमेते निपात्यन्ते । अत एव वचनात् ङिरपि । सासह्यते इत्येवंशीलः–सासहिः । वावह्यते–वावहिः । चाचल्यते–चाचलिः । पनीपत्यते–पापतिः, निपातनात् न्यागमाभावः । ङाविति ङकारः "तृन्नुदन्ताव्ययक्वस्वान०" [ २. २. ९०. ] इत्यत्र विशेषणार्थः ।। ३८ ।।**

**श० म० न्यासानुसन्धानम्–ङौ०** । ङौ सतीति कथनेन ङेस्ततः पूर्वमेव विधानमित्यायाति, तथा च तद्विधायकसूत्राभावात् कथमिदमित्याशङ्कायामाह—**अत एव वचनाद् ङिरपीति**, तथा च ङिप्रत्ययान्ता एते निपात्यन्त इति भावः । "षहि मर्षणे" भृशं पुनः पुनर्वा सहते इति यङि सासह्यते, सासह्यत इत्येवंशील इति ङौ "अतः" [ ४. ३. ८२. ] इति यङोऽकारलोपे "योऽशिति" [ ४. ३. ८०. ] इति यलोपे च–**सासहिः** । "वहीं प्रापणे" भृशं पुनः पुनर्वा वहतीति वावह्यते, वावह्यते इत्येवंशील इति–**वावहिः** । "चल कम्पने" भृशं पुनः पुनर्वा चलतीति चाचल्यते, चाचल्यते इत्येवंशील इति–**चाचलिः** । "पत्लृ गतौ" कुटिलं पततीति यङि "वञ्च-स्रंस०" [ ४. १. ५०. ] इति पूर्वस्य न्यागमे–पनीपत्यते इति, पनीपत्यते इत्येवंशील इति–**पापतिः**, न्यागमः क्व गत इत्याशङ्कायामाह–**निपातनात् नागमाभावः** इति–यङि द्वित्वे पूर्वस्य न्यागमः प्राप्तस्तदभावोऽपीह निपात्य इति भावः । ननु सासहीत्यादीनां स्वरूपमात्रस्यैव निपातनं युक्तं लाघवात्, प्रत्ययादिकल्पने तत्राप्यनुबन्धकल्पने च गौरवं व्यर्थमित्याशङ्कायामाह—**ङाविति ङकार** इत्यादि—परिषहान् सासहिरित्यादौ "कर्मणि कृतः" [ २. २. ८३. ] इत्यनेन षष्ठीं प्राप्तां निषेद्धुं "तृन्नुदन्ता०" [ २. २. ९०. ] इति सूत्रे ङिग्रहणं क्रियते, तथा चात्र ङकाराभावे तत्रास्य ग्रहणं न स्यादिति षष्ठीनिषेधो न स्यादित्यावश्यकं ङित्करणमिति ।। ५. २. ३८. ।।

**सस्त्रि-चक्रि-दधि-जज्ञि-नेमि** ।५. २. ३९ ।।

**त० प्र०—एते शीलादौ सत्यर्थे कृतद्विर्वचना ङिप्रत्य-**

यान्ता निपात्यन्ते । सरतीत्येवंशीलः–सस्रिः, करोति–चक्रिः, दधाति–दधिः, जायते जानाति वा–जज्ञिः, नमति –नेमिः, द्विर्वचनाभाव एत्वं च निपातनात् ॥ ३९ ॥

**श० म० न्यासानुसन्धानम्–सस्रि०** "सृं गतौ" सरतीत्येवंशील इति निपातनात् डौ द्वित्वे च पूर्वऋतोऽत्वेऽन्त्यस्य रादेशे ङित्वाद् गुणाभावे च–**सस्रिः** । एवं–करोतीत्येवंशील इति–**चक्रिः** । "डुधांग्क् धारणे च" दधातीत्येवंशील इति–**दधिरिति**–अत्र द्वित्वे पूर्वस्य ह्रस्वे दत्वेऽन्तस्यातः "इडेत्पुसि०" [४. ३. ९४.]इति लोपः । "जनैंचि प्रादुर्भावे" "ज्ञांश् अवबोधने" जायते जानाति वेत्येवंशील इति–**जज्ञिरिति**, जनेर्डौ द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे उपान्त्यलोपे नस्य ञे च–जज्ञिः, जानातेस्तु द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे ह्रस्वे, अन्त्याकारलोपे च–जज्ञिः । "णमं प्रह्वत्वे" प्रह्वत्वं नम्रता, नमतीत्येवंशील इति–**नेमिरिति** । नन्विह प्राग्वत् कथं न द्वित्वं कथं वा इएकार स्याशङ्कायामाह–**द्विर्वचनाभाव एत्वं च निपातनादिति** ॥ ५. २. ३९. ॥

## शृ-कम-गम-हन-वृष-भू-स्थ उकण् । ५. २. ४०. ॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानेभ्य एभ्य उकण् प्रत्ययो भवति । शृणातीत्येवंशीलः– शारुकः, प्रशारुकः शरः । कामुकः, कामुकी रिरंसुः, कामुका येच्छां विना कामयते, कामुका अन्यस्य स्त्रियो भवन्ति । गामुकः, आगामुकः स्वगृहम् । घातुकः, आघातुको व्याघ्रः । वर्षुकः, प्रवर्षुकः पर्जन्यः । भावुकः, प्रभावुकः क्षत्रियः । स्थायुकः प्रमत्तः, उपस्थायुको गुरुम्, गुणानधिष्ठायुकः ॥४०॥**

**श० म० न्यासानुसन्धानम्—शृ०** । "शृश् हिंसायाम्" शृणातीत्येवंशील इत्युकणि "नामितोऽकलि०" [ ४. ३. ५१. ] इति वृद्धौ–**शारुकः**, प्रपूर्वस्य तु–**प्रशारुकः**, एवंविधः क इत्याह–**शरः** । "कमूङ् कान्तौ" कान्तिरभिलाषः, कामनशीलः–**कामुकः**, कामनशीलेति स्त्रियां यदा रिरंसुरर्थस्तदा "भाज-गोण०" [ २. ४. ३०. ] इति ङीर्भवति, तदाह–**कामुकी रिरंसुरिति**–रिरंसुर्मैथुनेच्छावती । अन्यार्थे तु कामुकशब्दादाबेव भवति, तदाह–**कामुका येच्छां विना कामयते** इति–इच्छां मैथुनेच्छां विना, कामयते–प्रार्थयते, मैथुनादन्यद् धनादिकं कामयितुं शीलमस्याः सा कामुका, तथा च धनादिकामनावती कामुका, तदाह–**कामुका अन्यस्य स्त्रियो भवन्तीति**–या हि स्वीया सा तु सर्वस्य धनादेः स्वामिन्येव सा कुतः पत्युर्धनादिकं कामयेत, परकीयैव परस्य धनादिकं कामयत इति भावः । तथा चात्र सम्बन्धसामान्ये षष्ठी–**अन्यस्येति**, यदि च "अकमेरुकस्य" [ २. २. ९३. ] इति सूत्रे कमिवर्जनादिह कर्मणि षष्ठीति मन्यते तर्हि अन्यस्य– अन्यं पुरुषं प्रति कामुका धनादिप्रार्थनावत्यो भवन्तीति वाक्यार्थः । "गम्लृं गतौ" गमनशीलो–**गामुकः**, आगमनशीलः–**आगामुकः**, किं प्रतीत्याह–**स्वगृहमिति**– "अकमे०" [ २. २. ९३. ] इति षष्ठीनिषेधाद् द्वितीया । "हनंक् हिंसा-गत्योः" हननशील इत्युकणि "ञ्णिति घात्" [ ४. ३. १००. ] इति घातादेशे–**घातुकः**, आहननशीलः– **आघातुकः**, ईदृशः क इत्याह– **व्याघ्रः** । "वृषू सेचने" वर्षणशीलो–**वर्षुकः** इति–"लघो०" [ ४. ३. ४. ] इत्युपान्त्यगुणः, प्रवर्षणशीलः–**प्रवर्षुकः**, ईदृशः क इत्याह–**पर्जन्यः** । भवतीत्येवंशीलो–**भावुकः**, प्रभवतीत्येवंशीलः–**प्रभावुकः**, ईदृशः क इत्याह–**क्षत्रियः** । तिष्ठतीत्येवंशील इत्युकणि "आत ऐः कृञ्ञौ" [ ४. ३. ५३. ] इत्यैकारे आयादेशे च–**स्थायुकः**, ईदृशः क इत्याह–**प्रमत्तः**, उपतिष्ठतीत्येवंशील इति–**उपस्थायुको गुरुमिति**–गुरुसमीपस्थितिशील इत्यर्थः । गुणान् अधितिष्ठतीत्येवंशीलः–**गुणान् अधिष्ठायुकः** ॥ ५. २. ४०. ॥

## लष-पत-पदः । ५. २. ४१. ॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानेभ्य एभ्य उकण् प्रत्ययो भवति । अपलषतीत्येवंशीलमपलाषुकं नीचसांगत्यम्, अभिलाषुकः । उत्पातुकं ज्योतिः, प्रपातुका गर्भाः । उपपादुका देवाः । योगविभाग उत्तरार्थः ॥४१॥**

**श० म० न्यासानुसन्धानम्—लष०** । "लषी कान्तौ" कान्तिरिच्छा, अपलषतीत्येवंशील इत्युकणि "ञ्णिति" [ ४. ३. ५०. ] इत्युपान्त्यवृद्धौ–**अपलाषुकं नीचसांगत्यम्** । अभिलषतीत्येवंशीलः–**अभिलाषुकः** । "पत्लृ गतौ" उत्पतनशीलम्–**उत्पातुकं ज्योतिः** । प्रपतनशीलाः–**प्रपातुका गर्भाः** । "पदिच् गतौ" उपपादशीलाः–**उपपादुका देवाः** । पूर्वसूत्र

एवंतेऽपि धातवः पठनीयाः पृथक् सूत्रकरणं व्यर्थमित्याशङ्कायामाह–**योगविभाग उत्तरार्थः** इति– उत्तरसूत्रे त्रयाणामेवैषां सम्बन्धाय पृथक् सूत्रमिदमिति भावः । एकसूत्रत्वे हि सहैव सर्वेषामनुवृत्तिर्निवृत्तिर्वा स्यात् *एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः* इति न्यायात्, अतः पृथग्योग आवश्यकः ।।५. २. ४१.।।

## भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुचश्चानः

। ५. २. ४२. ।।

**त० प्र०– भूषार्थेभ्यः क्रोधार्थेभ्यो जु-सृ-गृधि-ज्वल-शुचिभ्यो लष-पत-पदिभ्यश्च शीलादौ सत्यर्थे वर्तमानेभ्योऽनः प्रत्ययो भवति । भूषार्थे– भूषयतीत्येवंशीलो– भूषणः कुलस्य, मण्डना गगनस्य भाः, प्रसाधनः । क्रोधार्थे– क्रोधनः, कोपनः, रोषणः । जवतिः सौत्रो वेगाख्ये संस्कारे वर्तते, तेन चल्यर्थद्वारेण न सिध्यतीतीहोपादानम् । जवनः । सृ– सरणः । गृधू– गर्धनः । ज्वल– ज्वलनः । शुच– शोचनः । लष– अभिलषणः । पत– पतनः । पदेरिदित्वादुत्तरेणैव सिद्धे सकर्मकार्थं वचनम् । अर्थस्य पदनः, ग्रन्थस्य पदनः, पदनः क्षेत्राणाम् । उत्तरत्र सकर्मकेभ्योऽपि विधिरित्येकेषां दर्शनम्, तथा चोकणा बाधितोऽप्यसरूपत्वात् पदेरनः प्रत्ययो भविष्यतीति चेत् ? एवं तर्हि शीलादिप्रत्ययेष्वसरूपत्वेन शीलादिप्रत्ययो न भवतीति ज्ञापनार्थं पदिग्रहणम् । तेन– चिकीर्षिता कटम्, अलंकर्ता कन्यामिति न भवति । कथं तर्हि 'गन्ता खेलः, आगामुकः; भविता, भावुकः; जागरिता, जागरूकः; विकत्थनः, विकत्थी; भासनं, भासुरम्; वर्धनः, वर्धिष्णुः; अपलाषुकः, अपलाषी; कम्पना कम्प्रा शाखा; कमना कामुका युवतिः ?' क्वचित् समावेशोऽपि भवति । एतदर्थमेव च "न ण्यादि०" [ ५. २. ४५. ] सूत्रे दीपिग्रहणम्, अन्यथा रेणाऽनोऽस्य बाध्येतेति तदनर्थकं स्यात् । अनस्यैव विषये समावेश इत्येके ।।४२।।**

**श० म० न्यासानुसन्धानम्–भूषा०** । "भूष तसुण् अलङ्कारे" भूषयतीत्येवंशील इति– **भूषणः कुलस्य** । "मडुण् भूषायाम्" मण्डयतीत्येवंशीला– **मण्डना गगनस्य भाः** । चुरादेराकृतिगणत्वात् 'साध्'-चुरादिः प्रपूर्वकश्च भूषार्थकः, प्रसाधयतीत्येवंशीलः– **प्रसाधनः** । "क्रुधंच् कोपे" क्रोधशीलः– **क्रोधनः** । "कुपच् कोपे" कोपशीलः–**कोपनः** । "रुषच् रोषे" रुष्यतीत्येवंशीलः– **रोषणः** । गत्यर्थकतया जुधातोरुत्तरसूत्रेण "चलशब्दार्थादकर्मकात्" इत्यनेन सिद्धेऽत्र ग्रहणमनर्थकमित्याशङ्कायामाह– **जवतिः सौत्रो वेगाख्ये संस्कारे वर्तते** इति, तथा च तस्य चलनार्थत्वाभावः, चलनं हि वेगजन्यम्, वेगश्चोत्तरदेशसंयोग[गति-चलन]-हेतुः संस्कारविशेषो न तु गतिश्चलनं वा, तदाह–**तेन चल्यर्थद्वारेण न सिध्यतीतीहोपादानमिति** । जवतीत्येवंशीलः– **जवनः** । "सृं गतौ" सरतीत्येवंशीलः– **सरणः** । "गृधूच् अभिकाङ्क्षायाम्" गृध्यतीत्येवंशीलः– **गर्धनः** । "ज्वल दीप्तौ" ज्वलतीत्येवंशीलः– **ज्वलनः** । "शुच शोके" शोचतीत्येवंशीलः–**शोचनः** । अभिलषतीत्येवंशीलः–**अभिलषणः** । पततीत्येवंशीलः–**पतनः** । "पदिच् गतौ" गतिर्यानं ज्ञानं च, अयमिदित्, अस्माच्च "इडितो व्यञ्जनाद्यन्तात्" [ ५. २. ४४ ] इति सूत्रेणैव सिद्धिरिति तस्येह ग्रहणं व्यर्थमित्याशङ्कते–**पदेरिदित्वादुत्तरेणैव सिद्धे** इति, समाधानमाह–**सकर्मकार्थं वचनमिति**—"चलशब्दार्थादकर्मकात्" [५. २. ४३.] इत्युत्तरसूत्रे स्थितस्य 'अकर्मकात्' इत्यस्याग्रेऽनुवृत्तेः "इडितः०" इत्यस्याप्यकर्मकादेव प्राप्तेरिति भावः । पदधातुश्च स्वभावतः सकर्मक एव, अविवक्षितकर्मतयैव क्वचिदकर्मकत्वमिति सकर्मकादस्मादुत्तरेणासिद्धिरितीह ग्रहणम् । पद्यत इत्येवंशील इति–**अर्थस्य पदनः, ग्रन्थस्य पदनः, पदनः क्षेत्राणामिति**– अर्थज्ञानशीलः, ग्रन्थज्ञानशीलः, क्षेत्रगमनशील इति क्रमेणार्थः । मतान्तरमाह-**उत्तरत्र सकर्मकेभ्यो विधिरित्येकेषां दर्शनमिति**–चलनं हि गतिः, तथा च गत्यर्थकानां सकर्मकत्वस्य निर्विवादत्वात् सकर्मकादप्यविवक्षितकर्मत्वेन भवतीति तेषां दर्शनमिति भावः । एवं च सकर्मकार्थमेतत्सूत्रे पदग्रहणमिति बाधितमिति समाधानान्तरमाह---**तथा चोकणा बाधितोऽप्यसरूपत्वादिति**, अयमाशयः-"लष-पद-पतः" [५.२.४१.] इति सूत्रविहित उकण् विशेषविहितत्वात् "चलशब्दार्थाद्०" [ ५. २. ४३. ] इति विहितस्यानस्य बाधक इत्युकणैव यद्यपि भवितुं युक्तस्तथापि वाऽसरूपन्यायेनानोऽपि भविष्यत्येवेति पदिग्रहणमिहानर्थकं सत् 'शीलादिप्रत्ययेषु वाऽसरूपन्यायो न प्रवर्तते' इति ज्ञापयति, तथा च तन्न्यायस्याप्रवृत्त्या उकणा

नित्यमेवानस्य बाधः स्यादिति पदेरनः प्रत्ययो न स्यात्, इष्यते च स इति तदर्थमिह पदग्रहणं सार्थकमिति। ज्ञापनस्यान्यत्र फलमपेक्षितमिति तद् दर्शयति---**तेन चिकीर्षिता कटम्, अलंकर्ता कन्यामिति न भवतीति**। नन्वेवं ताच्छीलिकेषु नित्यमेव बाध्यबाधकभाव इत्यायातम्, तथा च 'गन्ता, गामुकः' 'भविता, भावुकः' इत्येवमादयस्तृन्नन्ता उकणन्ताश्च प्रयोगा कथं सम्पत्स्यन्त इत्याशङ्कते—**कथं तर्हि गन्ता खेल** इत्यादिना, एषु सर्वत्र "तृन् शील-धर्म-साधुषु" [ ५. २. २७. ] इति तृन्, 'आगामुक भावुक कामुका' इत्यत्र "शृ-कम०" [ ५. २. ४०. ] इत्युकण्, 'जागरूक' इत्यत्र "जागुः" [ ५. २. ४८. ] इत्यूकण्, 'विकत्थनः, वर्धनः, कम्पना, कमना, भासन' इत्यत्र "इङितो०" [ ५. २. ४४. ] इत्यनः,, 'अपलाषुक' इत्यत्र ' लस०" [ ५. २. ४१. ] इत्युकण्, 'वर्धिष्णुः' इत्यत्र "भ्राज्य०" [ ५. २. २८. ] इतीष्णुः, 'भासुर' इत्यत्र "भञ्जि-भासि०" [५.२.७४.] इति घुरः, 'विकत्थी' इत्यत्र "वेविच०" [ ५. २. ५६] इति घिनण्, 'अपलाषी' इत्यत्र "व्यपा०" [५.२.६०.] इति घिनण्, 'कम्प्र' इत्यत्र "स्म्यजस०" [५. २. ७६.] इति रः। समाधानमाह—**क्वचित् समावेशोऽपि भवतीति**—परस्परमविरोधेन वृत्तिः समावेशः, सोऽपि भवति लक्ष्यानुरोधेनेति। किं वचनादेवाथ किमपि तत्र गमकमित्याशङ्कायामाह—**एतदर्थमेव "न ण्यादि०" सूत्रे दीपिग्रहणमिति**—एष ताच्छीलिकानां क्वचित् समावेशज्ञापनरूपोऽर्थः प्रयोजनं यस्य तादृशं दीपिग्रहणमित्यर्थः। तस्यानर्थक्यं दर्शयति-- **अन्यथा रेणानोऽस्य बाध्येतेति**, अयमर्थः--"स्म्यजस०" [ ५. २. ७६. ] इति विशेषविहितेन रेण सामान्यविहितस्यानस्य नित्यमेव बाधः स्यादेवेत्यननिषेधाय सूत्रमिदमनर्थकमिति क्वचित् समावेशं ज्ञापयतीति। मतान्तरमाह—**अनस्यैव समावेश इत्येके** इति, एतन्मते 'गन्ता, भविता' इत्यादयः शीलार्थे नेष्टा इति ॥ ५. २. ४२. ॥

---

## चाल-शब्दार्थादकर्मकात् । ५. २. ४३. ॥

**त० प्र०—चलनार्थाच्छब्दार्थाच्च धातोः शीलादौ सत्यर्थे वर्तमानादकर्मकादविवक्षितकर्मकाद् वा परोऽनः प्रत्ययो भवति।** चलतीत्येवंशीलः– **चलनः, कम्पनः, चोपनः, वेष्टनः।** शब्दयतीत्येवंशीलः–**शब्दनः, रवणः, आक्रोशनः।** अकर्मकादिति किम्? **पठिता विधाम्** ॥४३॥

---

**श० म० न्यासानुसन्धानम्–चाल०।** चलनं चालः, चालश्च शब्दश्च चालशब्दौ, तौ अर्थौ यस्य तस्मादिति विग्रहः, *द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते* इति न्यायेन द्वन्द्वान्ते श्रूयमाणस्यार्थपदस्योभाभ्यामन्वयाद् योऽर्थः सम्पन्नस्तमाह--**चलनार्थाच्छब्दार्थाच्चेति**। अकर्मकादित्यस्यार्थमाह–**अविद्यमानकर्मकाद् अविवक्षितकर्मकाद् वेति**। अकर्मकस्य लक्षणमिदमुक्तमभियुक्तैः—

"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥" इति।

अस्यार्थः--धातोरर्थान्तरे वृत्तेः १, धात्वर्थेन कर्मण उपसंग्रहात् २, कर्मणः प्रसिद्धेः ३, कर्मणोऽविवक्षातः ४, [च] क्रिया अकर्मिका भवतीति। तत्राद्ययोरकर्मकत्वमेव, अन्त्ययोश्चाविवक्षितकर्मकत्वमिति फलतो द्विधैवाकर्मकत्वं भवति, तयोर्द्वयोरपीह संग्रहः क्रियते। एवं च सकर्मकस्यापि चलधातोरविवक्षितकर्मकतयाऽकर्मकत्वमिति चलन इत्यादिसिद्धिः। चलधातोश्च सकर्मकत्वमकर्मकत्वं च प्रयुक्तं कविभिः, तथाहि—"यदा मनुष्याः प्रचलन्ति गङ्गां रुदन्ति पापाः प्रवदन्ति किञ्चित्।" इति सकर्मकत्वम्, "चचाल वसुधा चेलुः सकलाश्च महीधराः" इत्यादावकर्मकत्वमिति। एवं च दर्शितोदाहरणतः केवलस्याकर्मकत्वं सोपसर्गस्य सकर्मकत्वं विज्ञायते। "चल कम्पने" चलनशीलः–**चलनः**। "कपुङ् कम्पने" कम्पत इत्येवंशीलः-**कम्पनः**। "चुप मन्दायाम्" गतावित्यनुवृत्तेर्मन्दायां गतौ, चोपतीत्येवंशीलः—**चोपनः**। "चेष्टि चेष्टायाम्" चेष्टाशीलः–**चेष्टनः**। "शब्दण् उपसर्गाद् भाषाविष्कारयोः" भाषो भाषणम्, भाषे आविष्कारे चार्थे शब्द इत्ययं धातुरुपसर्गात् परश्चुरादिः। योगविभागोऽत्रेति नन्दी, शब्द उपसर्गादित्येकः, शब्द इत्ययं धातुरुपसर्गात् परश्चुरादिः। भाषाविष्कारयोरित्यपरः, अनुपसर्गार्थोऽयमारम्भः, पूर्वस्तु भाषणाविष्करणार्थः। अन्यस्तु शब्द शब्दक्रियायामित्यधीते, भाषणस्यापि शब्दविशेषक्रियारूपत्वादत्रैवान्तर्भावः, तत उपसर्गादाविष्कारे इति पठित्वा प्रशब्दयति विशब्दयतीत्याविष्कारमात्रे उदाहरन्ति। शब्दयतीत्ये-

वंशील इति—**शब्दनः** । "रुक् शब्दे" रौतीत्येवंशीलः—**रवणः** । "क्रुशं आह्वानरोदनयोः" आक्रोशतीत्येवंशीलः—**आक्रोशनः** । पदकृत्यं पृच्छति-**अकर्मकादिति किमिति** उत्तरयति—**पठिता विद्यामि**ति—"पठ व्यक्तायां वाचि" पठतीत्येवंशील इति "तृन् शीलधर्मसाधुषु" [५.२.२७] इति तृनि पठिता, सकर्मकत्वादस्यात्राप्रवृत्तिः, "कर्मणि कृतः" [ २. २. ८३ ] इति न षष्ठी "तृन्नुदन्ता०" [ २. २. ९०. ] इति निषेधात्, अतो विद्यामित्यत्र "कर्मणि" [२.२.४०.] इति द्वितीया ॥ ५. २. ४३. ॥

## इङितो व्यञ्जनाद्यन्तात् । ५. २. ४४. ॥

**त० प्र०—व्यञ्जनमादिरन्तश्च यस्य सव्यञ्जनाद्यन्तः । इदनुबन्धात् ङानुबन्धाच्च व्यञ्जनाद्यन्ताद् धातोः शीलादौ सत्यर्थे वर्तमानादनः प्रत्ययो भवति । इदित्, स्पर्धि—स्पर्धनः । ङित्, वृतूङ्—वर्तनः, वृधूङ्—वर्धनः । णेरतश्च विषय एव लोपे व्यञ्जनान्तत्वात् इहापि भवति-चितिण्—चेतनः, गुपि-जुगुप्सनः, मानि-मीमांसनः । इङित इति किम् ? स्वसा । व्यञ्जनाद्यन्तादिति किम् ? एधिता, शयिता । अकर्मकादित्येव-वासिता वस्त्रम्, सेविता विषयान् । कथमुत्कण्ठावर्धनैरिति ? नात्र कर्मषष्ठीसमासो वृधेरकर्मकत्वात्, किन्तु तृतीयासमासः, उत्कण्ठया वर्धनैः, वर्धमानोत्कण्ठाशीलैरिति यावत् । अन्ये त्वकर्मकादेवेति नेच्छन्ति । ४४ ।**

**श० म० न्यासानुसन्धानम्-इङितो०** । सूत्रार्थं स्फोरयितुं पदार्थमाह—**व्यञ्जनमादिरन्तश्च यस्येति**—न तु व्यञ्जनादिरन्तो यस्येति । **इङितः** इति—इश्च ङ् च इङौ, ताविती यस्येत्यर्थे इत्पदस्य द्वन्द्वान्ते श्रूयमाणतया प्रत्येकमन्वयादाह—**इदनुबन्धात् ङानुबन्धाच्चेति** । "स्पर्धि संघर्षे" संघर्षः पराभिभवेच्छा, स्पर्धत इत्येवंशीलः—**स्पर्धनः** । "वृतूङ् वर्तने" वर्तनं स्थितिः, वर्तत इत्येवंशीलः—**वर्तनः** । "वृधूङ् वृद्धौ" वर्धत इत्येवंशीलः—**वर्धनः** । ण्यन्तस्य व्यञ्जनादित्वेऽपि तदन्तत्वाभावात्, सन्नन्तस्य चादन्तत्वात् ताभ्यामस्य प्रत्ययस्याप्राप्तिरित्याशङ्कायामाह-**णेरतश्च विषय एव लोपे व्यञ्जनादित्वादिहापि भवतीति**—अनप्रत्ययविषय एव "णेरनिटि"[४.३.८२.] इति णेर्लुप्ततया, एवमनप्रत्ययविषय एव "अतः" [४.३.८३.] इति सनोऽकारस्य लुप्ततया व्यञ्जनान्तत्वमपि भवतीति भावः । "चितिण् संवेदने" चुरादित्वात् स्वार्थे णिचि चेतयत इत्येवंशील इति—**चेतनः**, अत्र प्रागेव णिलोपे ततोऽनप्रत्ययः । "गुपि गोपन-कुत्सनयोः" अतो गर्हायां "गुप्-तिजोर्गर्हा-क्षान्तौ सन्" [ ३. ४. ५. ] इति सनि जुगुप्सत इत्येवंशीलः—**जुगुप्सनः**, अत्र प्रागेव सनोऽकारलोपे ततोऽनप्रत्ययः । "मानि पूजायाम्" अतो विचारार्थे "शान्-दान्-मान्०" [ ३. ४. ७. ] इति सनि मीमांसत इत्येवंशीलः—**मीमांसनः** । यद्यपि सन्नन्तस्य न ङित्त्वमित्त्वं वा मूलधातोरेव तथात्वात् तथापि * अवयवेऽचरितार्था अनुबन्धाः समुदायस्योपकारका भवन्ति * इति न्यायेन समुदायस्यापि इङित्त्वफलं भवति । न च तथापि विशेषविहितेन "सन्-भिक्षाशंसेरुः" [५. २. ३३.] इत्युप्रत्ययेन बाधात् कथं सन्नन्तादयं प्रत्यय इति चेत् ? न-दीपिग्रहणेनानेन सहान्यस्यापि शीलार्थकप्रत्ययस्य समावेश इत्यर्थस्योक्तत्वात् । पदकृत्यं पृच्छति—**इङित इति किमिति**, उत्तरयति—**एधिताः** इति—"एधि वृद्धौ" एधत इत्येवंशील इति तृनि—एधिता । "शीङ्क् शये" शेत इत्येवंशील इति तृनि **शयिता** । अकर्मकादित्यनुवृत्तेर्व्यावर्त्यं दर्शयति—**अकर्मकादित्येवेति**—"वासिक् आच्छादने" वस्त इत्येवंशील इति तृनि—**वसिता वस्त्रम्** । "सेवृङ् सेवने" सेवत इत्येवंशील इति तृनि—**सेविता विषयानि**ति । अकर्मकादेव प्रत्ययविधानेन 'वृध्' धातोर्ण्यन्तस्य सकर्मकत्वेन 'उत्कण्ठाया वर्धनः' इत्यर्थे 'उत्कण्ठावर्धन' इति प्रयोगः समुपलभ्यते, स कथं संगच्छते, अकर्मकादेव विधानादित्याशयेन शङ्कते—**कथम् 'उत्कण्ठावर्धनैः इति ?** इति, उत्तरयति—**नात्र कर्मषष्ठीसमास** इति, तत्र, हेतुमाह—**वृधेरकर्मकत्वादिति**, तथा च नात्र ण्यन्तत्वं तस्येति भावः । प्रयोगं विगृह्य समर्थयति—**उत्कण्ठया वर्धनैरिति** । यदि चात्र वर्धयतीति वर्धन इत्येव विग्रहः, तथा च ण्यन्तत्वेनात्र वृधेः सकर्मकत्वमित्याग्रहस्तर्हि मतान्तरेण समर्थनीयमित्याह—**अन्ये त्वकर्मकादेवेति नेच्छन्तीति** ॥ ५, २. ४४. ॥

## न णिङ्-य-सूद-दीप-दीक्षः । ५. २. ४५. ॥

**त० प्र०—णिङन्तेभ्यो यान्तेभ्यः सूदादिभ्यश्च धातुभ्यः शीलादौ सत्यर्थेऽनः प्रत्ययो न भवति । भावयिता, हस्तयिता, उत्पुच्छयिता, क्ष्मायिता, क्नूयिता, दयिता,**

**सूविता, दीपिता, दीक्षिता । मधुसूदनाऽरिसूदन-बलसूदनादयो नन्द्यादिषु द्रष्टव्याः ॥ ४५ ॥**

**श० म० न्यासानुसन्धानम्—न णिङ्०** । "भूङः प्राप्तौ णिङ्" [ ३. ४. १९. ] इति वचनाद् भूधातोः प्राप्त्यर्थत्वं ङित्त्वं णिङ् च, भावयते इत्येवंशील इति "तृन् शीलधर्मसाधुषु" [ ५. २. २७. ] इति तृनि–**भावयिता** । हस्तौ निरस्यतीति "अङ्गान्निरसने णिङ्" [ ३. ४. ३८. ] इति णिङि हस्तयते, हस्तयते इत्येवंशील इति—**हस्तयिता** । पुच्छमुदस्यतीति "पुच्छादुत्परिव्यसने" [ ३. ४. ३९. ] इति णिङि—उत्पुच्छयते, उत्पुच्छते इत्येवंशील इति-**उत्पुच्छयिता** । पूर्वत्र विषयसप्तमीमाश्रित्य व्याख्यानात् णिङन्तस्य णिलोपे कृते सति व्यञ्जनाद्यन्तत्वं ङकारनुबन्धत्वं च स्वत इति भावयितेत्यादौ प्राप्तिरनस्य, साऽनेन प्रतिषिध्यते । भूधातोर्णिङि वृद्धौ 'भावि' इति धातुः, हस्तोत्पुच्छशब्दाभ्यां णिङि तु "त्र्यन्त्यस्वरादेः" [ ७. ४. ४३. ] इत्यन्त्यस्वरलोपे 'हस्ति' इति 'उत्पुच्छि' इति च धातुरिति विशेषः । "क्ष्मायैङ् विधूनने" क्ष्मायते इत्येवंशील इति-**क्ष्मायिता** । "क्नूयैङ् शब्दोन्दनयोः" उन्दनं क्लेदनम्, क्नूयते इत्येवंशील इति—**क्नूयिता** । "दयि दान-गति-हिंसा-दहनेषु च" दयते इत्येवंशील इति—**दयिता,** एषु यान्तत्वादनप्रतिषेधे तृन् भवति । "षूदि क्षरणे" सूदते इत्येवंशीलः—**सूविता** । "दीपैचि दीप्तौ" दीप्यते इत्येवंशील इति–**दीपिता** । "दीक्षि मौण्डेज्योपनयननियमव्रतादेशेषु"-मौण्ड्यं वपनम्, इज्या यजनम्, उपनयनं मौञ्जीबन्धः, नियमः संयमः, व्रतादेशः संस्कारादेशः, दीक्षते इत्येवंशीलः—**दीक्षिता** । सूदेरनस्य प्रतिषेधात् मधुसूदनादयः प्रयोगाः कथं स्युरित्याशङ्कायामाह—**मधुसूदनाऽरिसूदनबलसूदनादयो नन्द्यादिषु द्रष्टव्याः** इति—नात्र शीलाद्यर्थे प्रत्ययोऽपि तु "नन्द्यादिभ्योऽनः" [ ५. १. ५२. ] इति सामान्यतः कर्तरीति भावः । किञ्चात्र शीलाद्यर्थप्रतीतिरपि नेति बोध्यम् ॥ ५. २. ४५. ॥

## द्रम-क्रमो यङः । ५. २. ४६. ॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानाभ्यां यङन्ताभ्यां द्रमि-क्रमिभ्यामनः प्रत्ययो भवति । कुटिलं द्रमति क्रामतीत्येवंशीलः–दन्द्रमणः, चङ्क्रमणः । सकर्मकार्थं वचनम्, य इति प्रतिषेधनिवृत्त्यर्थं च । "अतः" [ ४. ३. ८२. ] इति हि लुक् प्रत्यये विषयभूतेऽपि भवति ॥ ४६ ॥**

**श० म० न्यासानुसन्धानम्—द्रम०** । यङः प्रत्ययत्वात् तदन्तविज्ञानमित्याह—**यङन्ताभ्यामिति** । यकारान्तस्यानः पूर्वेण निषिध्यत इति प्रतिप्रसवार्थमिदं सूत्रम्, व्याख्यानाच्चात्र 'अनः' सम्बध्यते, पूर्वसूत्रस्थो नकारो न सम्बध्यते, तदाह्—**अनः प्रत्ययो भवतीति** । "द्रम गतौ" कुटिलं द्रमति गच्छतीत्येवंशील इति "गत्यर्थात् कुटिले" [ ३. ४. ११. ] इति यङि द्वित्वे पूर्वस्य "मुरतोऽनुनासिकस्य" [ ४. १. ५१. ] इति म्वागमे [ मे ] तस्य "म्नां०" [ १. ३. ३९. ] इति नकारे 'दन्द्रम्य' इत्यतोऽने "अतः" [ ४. ३. ८२. ] इत्यकारलोपे "योऽशिति" [ ४. ३. ८०. ] इति यलोपे नस्य णत्वे—**दन्द्रमणः** । "क्रमू पादविक्षेपे" कुटिलं क्रामतीति—**चङ्क्रमणः** । पूर्वेण सिद्धे सूत्रस्यानर्थक्यमाशङ्क्य समाधत्ते—**सकर्मकार्थं वचनमिति**, सकर्मकस्यापि कदाचिदविवक्षितकर्मकत्वेनाकर्मकत्वं भवतीति तथापि पूर्वेणैव सिद्धिरिति चेत् ? अत्राह—**य इति प्रतिषेधनिवृत्त्यर्थं चेति**– यान्तत्वेनास्यानः प्रतिषिद्धः, तस्य निष्पत्तिर्यथा स्यात् परत्वाद् विधानसामर्थ्याद् वेति तदर्थमित्यर्थः । नन्वस्य व्यञ्जनाद्यन्तत्वाभावेन कथं पूर्वेण प्राप्तिरिति चेत् ? अत्राह—**"अतः" इति हि लुक् प्रत्यये विषयभूतेऽपि भवतीति**, तथा च प्रत्ययात् पूर्वमेव तद्विषयतासम्भावनया अतो लुकि कृते व्यञ्जनाद्यन्तत्वेन प्राप्तिः, यान्तत्वेन च तत्प्रतिषेधस्य प्राप्तिरिति तस्यापि वारणाय सूत्रमिदमिति समुदितार्थः ॥ ५. २. ४६. ॥

## यजि-जपि-दंशि-वदादूकः । ५. २. ४७. ॥

**त० प्र०—एभ्यो यङन्तेभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य ऊकः प्रत्ययो भवति । भृशं पुनः पुनर्वा यजतीत्येवंशीलो–यायजूकः, जंजपूकः, दन्दशूकः, वावदूकः । अन्येभ्योऽपीति केचित्–दंदहूकः, पापयूकः, निजागदूकः, नानशूकः, पंपशूकः ॥ ४७ ॥**

**श० म० न्यासानुसन्धानम्—यजि०** । "यजीं देव-

पूजासंगतिकरणदानेषु" **यायजूकः** इति–अत्र द्वित्वे पूर्वस्य आकारः, शेषं प्राग्वत् । "जप मानसे च" मनोनिर्वर्त्ये वचने चकाराद् व्यक्ते वचने, गर्हितं जपतीत्येवंशील इति "गृ-लुप०" [ ३. ४. १२. ] इति यङि "जप-जभ०" [ ४. १. ५३. ] इति पूर्वस्य मागमे–**जंजपूकः** । "दंशं दशने" गर्हितं दशतीत्येवंशील इति–**दन्दशूकः** इति, जपवत् मागमादि । "वद व्यक्तायां वाचि" भृशं पुनः पुनर्वा वदतीत्येवंशील इति–**वावदूकः** । मतान्तरमाह–**अन्येभ्योऽपीति केचिदिति**, तन्मते–गर्हं दहतीत्येवंशीलः– **दंदहूकः**, "पथि गतौ" कुटिलं पयतेइत्येवंशील इति– **पापथूकः**, "गद व्यक्तायां वाचि" भृशं पुनः पुनर्वा निगदतीत्येवंशीलः– **निजागदूकः**, "नशौच् अदर्शने" भृशं पुनः पुनर्वा नश्यतीत्येवंशीलः– **नानशूकः**, "पश बन्धने" इति सौत्रो धातुः, भृशं पुनः पुनर्वा पशतीत्येवंशीलः–**पंपशूकः** इति ।।५. २. ४७.।।

## जागुः । ५ २. ४८. ।।

**त० प्र०–शीलादौ सत्यर्थे वर्तमानाज्जागर्तेरूकः प्रत्ययो भवति । यङ इति निवृत्तम् । जागर्तीत्येवंशीलो–जागरूकः ।। ४८ ।।**

**श० म० न्यासानुसन्धानम्–जागुः ।** जागर्तेरनेकस्वरत्वेन यङन्तत्वस्यासम्भवादाह–**यङ इति निवृत्तमिति**– विशेषणत्वे हि सम्भवव्यभिचारौ प्रयोजकौ, तत्र सम्भवाभावप्रयुक्तो यङो विशेषणत्वाभावः स्यादित्यानर्थक्यात् तन्नानुवर्तते, लक्ष्यानुरोधाच्चेति भावः । "जागृक् निद्राक्षये" जागरणं हि न केवलं निद्राक्षय एव, अपि तु निद्रापदेन स्वकर्तव्यविषयिणी निष्क्रियतोच्यते, अतस्तत्क्षय एव जागरूकशब्दे विवक्षित इति 'जागरूकोऽरिपक्षः' इत्यादयोऽपि प्रयोगाः सुसंगता भवन्तीति ।। ५. २. ४८. ।।

## शमष्टकाद् घिनण् । ५. २. ४९. ।।

**त० प्र०–शीलादौ सत्यर्थे वर्तमानेभ्यः शमादिभ्योऽष्टाभ्यो धातुभ्यो घिनण् प्रत्ययो भवति । शाम्यतीत्येवंशीलः–शमी, दमी, तमी श्रमी क्षमी, प्रमादी, उन्मादी क्लमी । घञन्तान्मत्वर्थीयेन सिद्ध्यति तृन्बाधनार्थं तु वचनम् । अष्टकादिति किम् ? असिता । णकारो वृद्धयर्थः । घकार उत्तरत्र कत्व-गत्वार्थः । अभिधानात् घिनण् अकर्मकेभ्यस्तेनेह न भवति–अरण्यं भ्रमिता, सकर्मकेभ्यस्तु यथादर्शनं दर्शयिष्यामः ।। ४९ ।।**

**श० म० न्यासानुसन्धानम्–शम०** । "शमू दमूच् उपशमे" शाम्यतीत्येवंशील इति घिनणि "मोऽकम्यमि०" [ ४. ३. ५५. ] इति वृद्धयभावे–**शमी,** एवं दाम्यतीत्येवंशीलः–**दमी** । "तमूच् काङ्क्षायाम्" ताम्यतीत्येवंशीलः–**तमी** । "श्रमूच् खेद-तपसोः" श्राम्यतीत्येवंशीलः–**श्रमी** । "क्षमौच् सहने" क्षाम्यतीत्येवंशीलः–**क्षमी** । "मदैच् हर्षे" प्रमाद्यति उन्माद्यतीत्येवंशीलः–**प्रमादी, उन्मादी**ति–"ञ्णिति" [ ४. ३. ५०. ] इत्युपान्त्यस्य वृद्धिः । सूत्रस्य वैयर्थ्यं शङ्कते–**घञन्तान्मत्वर्थीयेनैव सिध्यती**ति–शमनं शमः, सोऽस्यास्तीत्यर्थे नित्ययोगार्थकेन मत्वर्थीयेन शीलार्थप्रतीतिः स्यादिति प्रष्टुराशयः, समाधत्ते–**तृन्बाधनार्थं तु वचनमि**ति–मा शमितेति भूदित्यर्थमिति भावः । पदकृत्यं पृच्छति–**अष्टकादिति–किमि**ति, उत्तरयति–**असिते**ति–"असूच् क्षेपणे" अस्यतीत्येवंशील इति तृनि–असिता । घिनणि 'इन्' अवशिष्यते शेषा अनुबन्धाः, तत्र घफलं दर्शयति–**घकार उत्तरत्र कत्व-गत्वार्थः** इति–"क्तेऽनिट०" [ ४. १. १११ ] इति चस्य कत्वाय जस्य च गत्वायेत्यर्थः, एतच्चोत्तरसूत्रे दर्शयिष्यते, अत्र तु न तत्फलमिति भावः । अकर्मकादित्यस्यानुवृत्तेर्व्यवहितत्वात् सकर्मकादपि घिनण् स्यादित्याशङ्कायामाह–**अभिधानाद् घिनण् अकर्मकेभ्यः** इति–अकर्मकेभ्य एव घिनणः प्रयोगस्योपलम्भादित्यर्थः । तत्फलमाह–**तेनेह न भवति–अरण्यं भ्रमिता** इति–"भ्रमूच् अनवस्थाने" भ्रम्यतीत्येवंशील इति तृनि भ्रमिता । सकर्मकेभ्यस्तर्हि कः प्रत्यय इति चेत् ? अत्राह–**सकर्मकेभ्यस्तु यथादर्शनं दर्शयिष्यामः** इति–अग्रे यथाभिधानं प्रत्यया वक्ष्यन्त इति भावः ।।५ २. ४९. ।।

## युज-भुज-भज-त्यज-रञ्ज-द्विष-दुष-द्रुह-दुहा-ऽभ्याहनः । ५. २. ५०. ।।

**त० प्र०–एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः घिनण् भवति । युज्यते युनक्ति वा इत्येवंशीलो–योगी । भुङ्क्ते भुनक्ति भुजतीति वा–भोगी । भागी, कल्याणभागी । त्यागी, प्राणत्यागी । रागी 'अकद्घिनोश्च रञ्जेः"**

**[४. २. ६०.] इति नलोपः । द्वेषी, दोषी, द्रोही, दोही, अभ्याघाती । अकर्मकादित्येव–गां दोग्धा, शत्रूनभ्याहन्ता ॥५०॥**

**श० म० न्यासानुसन्धानम्—युज० ।** "युजिंच् समाधौ" समाधिश्चित्तवृत्तिनिरोधः,"युजं पी योगे" आभ्यां घिनणि "क्तेऽनिट्श्चजोः कगौ घिति" [ ४. १. १११ ] इति जस्य गत्वे योगशीलो–**योगी** । "भुजप् पालनाभ्यवहारयोः" अभ्यवहारो भोजनम्, "भुनजोऽत्राणे" [ ३. ३. ३७. ] इत्यपालनार्थे आत्मनेपदे–भुङ्क्ते, त्राणे तु परस्मैपदे–भुनक्तीति,"भुजोंत् कौटिल्ये" भुजतीति, अत्रापि जस्य गत्वे-**भोगी** । "भजीं सेवायाम्" भजतीत्येवंशील इति–**भागी** । कल्याणं भजतीत्येवंशीलः—**कल्याणभागी** । "त्यजं हानौ" हानिस्त्यागः, त्यजतीत्येवंशीलः–**त्यागी**, प्राणान् त्यजतीत्येवंशीलः–**प्राणत्यागी** । "रञ्जीं रागे" "रञ्जींच् रागे" रञ्जनशील इति–**रागी**, नकारः क्व गत इत्याह–**"अकट्घिनोश्च रञ्जे०" [४.२.६०.] इति नलोपः** इति । "द्विषींक् अप्रीतौ" द्वेषणशीलः–**द्वेषी** । "दुषंच् वैकृत्ये" वैकृत्यं रूपभङ्गः, दुष्यतीत्येवंशीलः–**दोषी** । "दुहींक् क्षरणे" दोग्धीत्येवंशीलः—**दोही** । "हनंक् हिंसागत्योः" अभ्याहननशीलः–**अभ्याघाती** । लक्ष्यानुरोधादकर्मकादित्यनुवृत्तेर्व्यावर्त्यं दर्शयति **–अकर्मकादित्येव–गां दोग्धा** इति-अत्र तृनि "भ्वादेर्दादेर्घः" [ २. १. ८३. ] इति हस्य घे "अधश्चतुर्थात्०" [ २. १. ७६. ] इति तकारस्य धे "तृतीयस्तृतीयचतुर्थे" [ १. ३. ३६. ]इति धस्य गे–**दोग्धा, शत्रून् अभ्याहन्ते**ति–अत्रापि तृन्, उभयत्र षष्ठीनिषेधात् कर्मणि द्वितीया ॥ ५. २. ५०. ॥

## आङः क्रीड-मुषः । ५. २. ५१. ॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानाभ्यामाङः पराभ्यामाभ्यां घिनण् भवति । आक्रीडत इत्येवंशीलः–आक्रीडी, आमोषी । शीलादिप्रत्ययान्ताः प्रायेण रूढिप्रकारा यथादर्शनं प्रयुज्यन्त इति उपसर्गान्तराधिक्ये न भवति । एवमुत्तरत्रापि ॥५१॥**

**श० म० न्यासानुसन्धानम्–आङः० ।** "क्रीड़ विहारे" "अन्वाङ्परेः" [ ३. ३. ३४. ] इत्यात्मनेपदे आक्रीडते, आक्रीडनशीलः—**आक्रीडी**ति । "मुष हिंसायाम्" "मुषश् स्तेये" आमोषणशीलः–**आमोषी** । आङोऽव्यवहितपराभ्यामाभ्यां प्रत्ययो विहित इति पूर्वमुपसर्गान्तरयोगेऽपि 'अभि– आङ्'पूर्वकात् 'उत्-आङ्'पूर्वकाद् वाऽन्योपसर्गपूर्वकाद् वाऽपि प्रत्ययः स्यादित्याशङ्कायामाह–**शीलादिप्रत्ययान्ताः** इति, **प्रायेण रूढिप्रकाराः** इति रूढेर्भिन्ना अपि रूढिसदृशा योगरूढा इत्यर्थः, यथादर्शनं प्रयुज्यन्त इत्युपसर्गान्तराधिक्ये न भवतीति–यदुपसर्गपूर्वकाणामेषां प्रयोगस्तदुपसर्गस्यैव सूत्रेषु निर्देशादुपसर्गान्तराधिक्ये रूढिव्याघातादिति भावः । न केवलमेतत्सूत्रविषय एवायं नियमोऽपि तु सर्वत्रेति स्पष्टयति–**एवमुत्तरत्रापी**ति । यत्र चोपसर्गयोगः पूर्वमनुक्तस्तत्रोपसर्गयोगेऽपि क्वचिद् भवति, यथा विरागो वियोगीत्यादौ, घिनन्ताद् वा मत्वर्थीयेना ते साध्या इत्युपसर्गरहितेभ्य एव प्रत्यय इति वा मतान्तरमिति ॥ ५. २. ५१. ॥

## प्राच्च यम-यसः । ५. २. ५२. ॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानाभ्यां प्रादाङश्च पराभ्यामाभ्यां घिनण् भवति । प्रयच्छतीत्येवंशीलः–प्रयामी, आयामी; प्रयासी, आयासी ॥५२॥**

**श० म० न्यासानुसन्धानम्–प्राच्च० ।** चकारेण पूर्वोक्त आङ् समुच्चीयते, अत्र च धातुद्वयेन सह तयोर्न यथासंख्यं सूत्रान्तरनिर्दिष्टेन चकारानुकृष्टेन सह यथासंख्यस्यादर्शनादिति उभाभ्यामपि प्रत्येकं योगे प्रत्ययो भवति । "यमू उपरमे" उपरमो निवृत्तिः, प्रयमणशीलः–**प्रयामी**, आयमनशीलः—**आयामी** । "यसूच् प्रयत्ने" प्रयासशीलः–**प्रयासी**, अयासशीलः–**आयासी** ॥ ५. २. ५२. ॥

## मथ-लपः । ५. २. ५३. ॥

**त० प्र०—प्राद् पराभ्यामाभ्यां शीलादौ सत्यर्थे वर्तमानाभ्यां घिनण् भवति । प्रमथतीत्येवंशीलः– प्रमाथी, प्रलापी ॥५३॥**

**श० म० न्यासानुसन्धानम्–मथ०** "मथे विलोडने" प्रमथनशीलः–**प्रमाथी** । "लप व्यक्तं वचने" प्रलपनशीलः–**प्रलापी** ॥ ५. २. ५३. ॥

## वेश्च द्रोः । ५. २. ५४. ।।

**त० प्र०—वेः प्राच्च पराच्छीलादौ सत्यर्थे वर्तमानाद् द्रवतेर्घिनण् भवति । विद्रवतीत्येवंशीलो– विद्रावी, प्रद्रावी ।।५४।।**

**श० म० न्यासानुसन्धानम्—वे०** । चकारेण पूर्वोक्तः प्रशब्दः समुच्चीयते, तदाह—**वेः प्राच्चेति** । "द्रु गतौ" विद्रवणशीलः—**विद्रावी,** प्रद्रवणशीलः—**प्रद्रावी** ।। ५. २. ५४. ।।

## वि-परि-प्रात् सर्तेः । ५. २. ५५. ।।

**त० प्र०—वि-परि-प्रेभ्यः पराच्छीलादौ सत्यर्थे वर्तमानात् सर्तेर्घिनण् भवति । विसरतीत्येवंशीलो– विसारी, परिसारी, प्रसारी ।।५५।।**

**श० म० न्यासानुसन्धानम्—वि०** । "सृ गतौ" विसरणशीलः—**विसारी,** परिसरणशीलः—**परिसारी,** प्रसरणशीलः—**प्रसारी** ।। ५. २. ५५. ।।

## समः पृचैप्-ज्वरेः । ५. २. ५६. ।।

**त० प्र०—शीलादौ सत्यर्थे वर्तमानाभ्यां समः पराभ्यां पृणक्ति-ज्वरिभ्यां घिनण् भवति । संपृणक्तीत्येवंशीलः–संपर्की । पिन्निर्देशादादादिकस्य न ग्रहणम्–संपर्चिता । संज्वरतीत्येवंशीलः– संज्वारी । केचिद् ण्यन्तादपीच्छन्ति–संज्वरी । त्वरयतेरपि कश्चिद्–संत्वरी । अकर्मकादित्येव– संपृणक्ति शाकम् ।।५६।।**

**श० म० न्यासानुसन्धानम्—समः०** । "पृचैप् संपर्के" सम्पर्कशीलः—**सम्पर्कीति**– अत्र "क्तेऽनिट०" [ ४. १. १११. ] इति चस्य कः । अत्र "पृचैङ्क् सम्पर्चने" इति पृचेरादादिकस्य ग्रहणं नेष्टमपि तु रौधादिकस्यैव, संपृणक्तीति विग्रहकरणात्,, तदुपायमाह—**पिन्निर्देशादिति**-पानुबन्धा रुधादय इति वचनात् । तर्हि आदादिकस्य शीलार्थः कः प्रत्यय इत्याह—**संपर्चितेति**–तृन् प्रत्यय इत्यर्थः । "ज्वर रोगे" संज्वरतीत्येवंशीलः–**संज्वारी** । मतान्तरमाह—**केचिद् ण्यन्तादपीच्छन्ति–संज्वरीति**–संज्वरयतीत्येवंशीलः–संज्वरी, घटादित्वाद् ह्रस्वः । पुनर्मतान्तरमाह **-त्वरयतेरपि कश्चित् संत्वरीति** –"ञित्वरिष् संभ्रमे" संत्वरयतीत्येवंशीलः **संत्वरी** घटादित्वाद् ह्रस्वः ।**अकर्मकादित्येव–संपृणक्ति शाकमिति**–सकर्मकत्वादिह न प्रत्ययः ।। ५. २. ५७.

## सं-वेः सृजः । ५. २. ५७. ।।

**त० प्र०—शीलादौ सत्यर्थे वर्तमानात् सं-विभ्यां परात् सृजेर्घिनण् भवति । संसृजतीत्येवंशीलः संसृज्यते वा– संसर्गी, विसर्गी ।।५७।।**

**श० म० न्यासानुसन्धानम्–संवेः०**। 'सृजित् विसर्गे' "सृजंत् विसर्गे" संसर्गशीलः-**संसर्गी,** विसर्गशीलः–**विसर्गी** "क्तेऽनिटः०" [ ४. १- १११. ] इति जस्य गः ।। ५. २. ५७. ।।

## सं-परि-व्यनु-प्राद् वदः । ५. २. ५८. ।।

**त० प्र०—शीलादौ सत्यर्थे वर्तमानात् सं-परि-व्यनु-प्रेभ्यः पराद् वदेर्घिनण् भवति । संवदतीत्येवंशीलः– संवादी, परिवादी, विवादी, अनुवादी, प्रवादी । परिपूर्वाण्ण्यन्तादपीति केचित् ।।५८।।**

**श० म० न्यासानुसन्धानम्–संपरि०** । "वद व्यक्तायां वाचि" संवदनशीलः-**संवादी**, परिवदनशीलः–**परिवादी**, विवदनशीलः—**विवादी**, अनुवदनशीलः—**अनुवादी**, प्रवदनशील.—**प्रवादी** । परिपूर्वविषये मतान्तरमाह— **परिपूर्वाण्ण्यन्तादपीति केचिदिति**–ण्यन्तस्याण्यन्तस्य रूपे भेदाभावेऽपि अर्थे विशेषः स्पष्ट एव, तथा च ण्यर्थप्रतीतौ ततोऽपि प्रत्ययः स्वीकार्यः, परमीदृशप्रयोगे तादृशार्थप्रतीतेरनुपलब्धेरेवानुभविकत्वमिति ।। ५. २. ५८. ।।

## वेर्विच-कत्थ-स्रम्भू-कष-कस-लस-हनः । ५. २. ५९. ।।

**त० प्र०—एभ्यो विपूर्वेभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो घिनण् भवति । विविनक्तीत्येवंशीलो– विवेकी । विकत्थी, विस्रम्भी, विकाषी, विकासी, विलासी, विघाती ।।५९।।**

**श० म० न्यासानुसन्धानम्–वेर्विच०** । "विचूंपी पृथग्भावे" विवेकशीलः–**विवेकी** "क्तेऽनिटः०" [४. १. १११.] इति चस्य कः । "कत्थि श्लाघायाम्" श्लाघा गुणारोपः, विकत्थते इत्येवंशीलः— **विकत्थी** ।

"न णिङ्य०" [५.२.४५.] इत्यत्र दीपिग्रहणेन ताच्छीलिकेऽप्युत्सर्गसमावेशस्य ज्ञापनादने– **विकत्थनः** । "स्रम्भूङ् विश्वासे" विस्रम्भशीलः—**विस्रम्भी** । "कष हिंसायाम्" विकषणशीलः—**विकाषी** । "कस गतौ" विकसनशीलः—**विकासी** । "लस श्लेषण-क्रीडनयोः" विलसनशीलः–**विलासी** । "हनंक् हिंसा-गत्योः" विहननशीलः–**विघाती**, "ञ्णिति घात्" [४. ३. १००. ] इति हनो घातादेशः ॥ ५. २. ५९. ॥

## व्यपा-ऽभेर्लषः । ५. २. ६०. ॥

**त० प्र०—व्यपा-ऽभिभ्यः पराच्छीलादौ सत्यर्थे वर्तमानाल्लषेर्घिनण् भवति । विलषतीत्येवंशीलो– विलाषी, अपलाषी, अभिलाषी ॥६०॥**

**श० म० न्यासानुसन्धानम्—व्यपा०** । "लषी कान्तौ" कान्तिरिच्छा, विलाषशीलः—**विलाषी**, अपलाषशीलः—**अपलाषी**, अभिलाषशीलः– **अभिलाषी** ॥ ५. २. ६०. ॥

## सं-प्राद् वसात् । ५. २. ६१. ॥

**त० प्र०—सं-प्राभ्यां पराच्छीलादौ सत्यर्थे वर्तमानाद् वसतेर्घिनण् भवति । संवसतीत्येवंशीलः– संवासी, प्रवासी । शव्निर्देशाद् वस्तेर्न भवति ॥६१॥**

**श० म० न्यासानुसन्धानम्—संप्रा०** । "वसं निवासे" संवसनशीलः —**संवासी**, प्रवसनशीलः–**प्रवासी** । वस इत्यकारान्तनिर्देशः शवा सहितस्य तस्य बोधनार्थः, अन्यथा 'वसः' इत्येव निर्देशो लघीयान् स्यात्, तत्प्रयोजनमाह—**शव्निर्देशाद् वस्तेर्न भवतीति**– "वसिक् आच्छादने" इत्यादादिकात् शवनर्हात् प्रत्ययो नेष्ट इति भावः ॥ ५. २. ६१. ॥

## समत्यपाभिव्यभेश्चरः । ५. २. ६२. ॥

**त० प्र०—'सम् अति अप अभि व्यभि' इत्येतेभ्यः पराच्छीलादौ सत्यर्थे वर्तमानाच्चरेर्घिनण् भवति । संचरतीत्येवंशीलः– संचारी, अतिचारी, अपचारी, अभिचारी, व्यभिचारी ॥६२॥**

**श० म० न्यासानुसन्धानम्—सम०** । "चर भक्षणे च" चाद् गतौ, संचरणशीलः—**संचारी**, अतिचरणशीलः—**अतिचारी**, अपचरणशीलः—**अपचारी**, अभिचरणशीलः—**अभिचारी**, व्यभिचरणशीलः—**व्यभिचारी** ॥ ५. २. ६२. ॥

## समनुव्यवाद् रुधः । ५. २. ६३. ॥

**त० प्र०—'सम् अनु वि अव' इत्येभ्यः पराच्छीलादौ सत्यर्थे वर्तमानात् रुधेर्घिनण् भवति । संरुन्धे इत्येवंशीलः– संरोधी, अनुरोधी, विरोधी, अवरोधी ॥६३॥**

**श० म० न्यासानुसन्धानम्—सम०** । "रुधृंपी आवरणे" आवरणं व्यापित्वम्, संरोधशीलः—**संरोधी**, अनुरोधशीलः—**अनुरोधी**, विरोधशीलः—**विरोधी**, अवरोधशीलः—**अवरोधी** ॥ ५. २. ६३. ॥

## वेर्दहः । ५. २. ६४. ॥

**त० प्र०—विपूर्वाच्छीलादौ सत्यर्थे वर्तमानाद् दहेर्घिनण् भवति । विदहतीत्येवंशीलो– विदाही ॥६४॥**

**श० म० न्यासानुसान्धानम्—वे०** । "दहं भस्मीकरणे" विदहनशील:—**विदाही** ॥ ५. २. ६४. ॥

## परेर्देवि-मुहश्च । ५. २. ६५. ॥

**त० प्र०—देवीति देवृधातोरण्यन्तस्य ण्यन्तस्य च ग्रहणम् । परिपूर्वाभ्यां शीलादौ सत्यर्थे वर्तमानाभ्यामाभ्यां दहश्च घिनण् भवति । परिदेवते परिदेवयति वा– परिदेवी । ण्यन्तान्नेच्छन्त्यन्ये । परिमोही, परिदाही ॥ ६५ ॥**

**श० म० न्यासानुसन्धानम्—परे०** । देवीति सामान्येन निर्देशात् "दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु" जयेच्छा–विजिगीषा, पणिः—व्यवहारः क्रयादिः, इति दीव्यतेर्ण्यन्तस्य ग्रहणमुत "देवृङ् देवने" इत्यस्य ण्यन्तयस्याण्यन्तस्य चेत्याशङ्कायामाह—**देवीति देवृधातोरण्यन्तस्य ण्यन्तस्य च ग्रहणमिति**– उभयोरपि रूपे विशेषाभावेन विनिगमकाभावादुभयोर्ग्रहणम्, अर्थप्रतीतिस्तु रूढिवशाद् यथायोगं भविष्यतीति भावः । दीव्यतेस्तु ण्यन्तस्य न ग्रहणं तस्य देवीति रूपस्य लाक्षणिकत्वात्, *लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्* इति न्यायात् । अण्यन्तस्य—**देवते** इति, ण्यन्तस्य—**देवयती**ति, उभयथाप्युदाहरणं—**परिदेवी,**

मतान्तरमाह—**ण्यन्तान्नेच्छन्त्यन्ये** इति– पाणिनीयमतमिदम् । "मुहौच् वैचित्त्ये" वैचित्त्यमविवेकः, परिमोहशीलः—**परिमोही** ॥ ५. २. ६५. ॥

## क्षिप-रटः । ५. २. ६६. ॥

**त० प्र०—परिपूर्वाभ्यामाभ्यां शीलादौ वर्तमानाभ्यां घिनण् प्रत्ययो भवति । परिक्षिप्यति परिक्षिपति वा—परिक्षेपी, परिक्षेप्यम्भसाम्, परिराटी ॥ ६६ ॥**

**श० म० न्यासानुसन्धानम्—क्षिप० ।** "क्षिपंच् प्रेरणे" "क्षिपींत् प्रेरणे" परिक्षेपशीलः—**परिक्षेपी, परिक्षेप्यम्भसामिति**– परिक्षेपी अम्भसामिति विच्छेदः, "कर्मणि कृतः" [ २. २. ८३. ] इति षष्ठी । "रट परिभाषणे" परिरटनशीलः– **परिराटी** ॥ ५. २. ६६. ॥

## वादेश्च णकः । ५. २. ६७

**त० प्र०–परिपूर्वाच्छीलादौ सत्यर्थे वर्तमानाद् वादयतेः क्षिप-रटिभ्यां च णकः प्रत्ययो भवति । परिवादयतीत्येवंशीलः–परिवादकः । वदेरपि केचित् । परिक्षेपकः । परिराटकः । असरूपत्वात् "णक-तृचौ" [५.१.४८.] इति सिद्धे पुनर्विधानं शीलादिप्रत्ययेष्वशीलादिकृत्प्रत्ययोऽसरूपविधिना न भवतीति ज्ञापनार्थम्, तेनालंकारकः, परिक्षिपः, परिरट इत्यादि शीलाद्यर्थे न भवति । बाहुलकात् क्वचिद् भवत्यपि– "काम-क्रोधौ मनुष्याणां खादितारौ वृकाविव" । अत्र णकविषये तृच् ॥६७॥**

**श० म० न्यासानुसन्धानम्—वादे० । वादयते**रिति– "वद व्यक्तायां वाचि" ण्यन्तादस्मादित्यर्थः । चकारेण पूर्वोक्तौ क्षिप-रटी संगृह्येते इत्याह—**क्षिप-रटिभ्यां चे**ति । परिवादनशीलः—**परिवादकः** । केवलादपि वदेरिति केचिन्मन्यन्ते, तदाह—**वदेरपि केचि**दिति, रूपे तु न कश्चन विशेषः, पाणिनीयेऽपि वादेरेव विधीयते न वदेः । परिक्षेपशीलः—**परिक्षेपकः**, परिरटनशीलः—**परिराटकः** । सामान्यकर्तरि विहिता अपि प्रत्ययाः प्रकरणवशेन शीलादिविशिष्टमपि कर्तारमभिधास्यन्त एव, सर्वविशेषस्य सामान्यान्तर्गतत्वात्, तथा च कर्तरि विहितो "णक-तृचौ" [ ५. १. ४८. ] इति णकप्रत्ययः शीलार्थेऽपि वाऽसरूपविधिना भविष्यत्येवेति सूत्रमिदं व्यर्थम्, न च पूर्वं "भूषाक्रोधार्थं०" [ ५. २. ४२. ] इति सूत्रे पदिग्रहणेन ताच्छीलिकेषु वाऽसरूपविधेरभावो ज्ञापित इति वाच्यम्, शीलाद्यर्थकेष्वपि परस्परं तदभावस्यैव ज्ञापितत्वात्, इत्याशङ्कते—**असरूपत्वात् "णक-तृचौ" [ ५. १. ४८. ] इति सिद्धे** इति, उत्तरयति—**पुनर्विधानं शीलादिप्रत्ययेष्वशीलादिकृत्प्रत्ययोऽसरूपविधिना न भवतीति ज्ञापनार्थ**मिति, तथा च णकोऽशीलाद्यर्थकः शीलाद्यर्थे न भविष्यतीति विधानस्य स्वांशे चारितार्थ्यम् । अन्यत्र फलं दर्शयति—**तेनालंकारकः, परिक्षिपः, परिरट इत्यादि शीलाद्यर्थे न भवतीति**–"णक-तृचौ" [ ५. १. ४८. ] इति णकः, "नाम्युपान्त्य०" [ ५. १. ५४. ] इति कः, "अच्" [ ५. १. ४९. ] इति अच् च शीलाद्यर्थे न भवन्ति, किन्तु सामान्यकर्तर्येवेति भावः । सति च क्वचिच्छीलाद्यर्थे तृजादिप्रयोगस्य प्रामाणिकत्वे का गतिरिति चेत् ? अत्राह—**बाहुलकात् क्वचिद् भवत्यपि**, क्वेत्याह—**काम-क्रोधाविति**– अत्र च तृनि सति मनुष्याणामित्यत्र षष्ठी न स्यादिति खादितारावित्यत्र तृजेवं विज्ञेय इति परसूत्रविहितणकविषयेऽपि तृच्, तदाह—**अत्र णकविषये तृजिति**, ज्ञापकसिद्धं न सर्वत्रेति न्यायो वाऽऽश्रयणीयः ॥ ५. २. ६७. ॥

## निन्द-हिंस-क्लिश-खाद-विनाशि व्याभाषा-ऽसूया-ऽनेकस्वरात् । ५. २. ६८. ॥

**त० प्र०–एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो णको भवति । निन्दतीत्येवंशीलो–निन्दकः, हिंसकः, क्लिश्नाति क्लिश्यते वा–क्लेशकः, खादकः, विनाशयति–विनाशकः, व्याभाषकः । असूयः कण्ड्वादौ–असूयकः । दरिद्रायकः । चकासकः, गणकः, चुलुम्पकः । अनेकस्वरत्वादेव सिद्धेऽसूयग्रहणं कण्ड्वादिनिवृत्त्यर्थम्, तेन–कण्डूयिता, मन्तूयिता, सूत्रेव । विनाशिग्रहणं तु अन्यस्य ण्यन्तस्य निवृत्त्यर्थम्–कारयिता । अनेकस्वरान्नेच्छन्त्यन्ये । क्लिशेर्विशेषेण ग्रहणाद् दैवादिकादिदित्त्वेऽपि अनो न भवति ॥६८॥**

**श० म० न्यासानुसन्धानम्—निन्द० ।** "णिदु कुत्सायाम्" निन्दनशीलः—**निन्दकः** । "हिसुप् हिंसा-

याम्" हिंसाशीलः—**हिंसकः**। "क्लिशौश् विबाधने" "क्लिशिच् उपतापे" क्लेशशील:—**क्लेशकः**। "खादृ भक्षणे" खादनशील:—**खादकः**। "नशौच् अदर्शने" अदर्शनमनुपलब्धिः, अतो णौ णके च विनाशनशीलः—**विनाशकः** इति– अत्र णावुपान्त्यस्य वृद्धिः, णके परे च णेर्लोपः। "भाषि च व्यक्तायां वाचि" व्याभाषणशील:—**व्याभाषकः। असूयः कण्ड्वादाविति**—कण्ड्वादिगणे "असु मानसोपतापे" इति पठ्यते, ततः "धातोः कण्ड्वादेर्यक्" [ ३. ४. ८. ] इति यकि "दीर्घश्च्वि-यङ्-यक्०" [ ४. ३. १०८. ] इति दीर्घे 'असूय' इति भवतीत्यर्थः, असूयतीत्येवंशीलः– [ असूयाशीलः– ] **असूयकः**, गुणेषु दोषाविष्करणशील एवमुच्यते। अथानेकस्वरोदाहरणावसरः, "दरिद्राक् दुर्गतौ" दरिद्रातीत्येवंशील इति णके "आत ऐः०" [ ४. ३. ५३. ] इत्यैकारे आयादेशे च—**दरिद्रायकः**। "चकासृक् दीप्तौ" चकास्तीत्येवंशीलः—**चकासकः**। "गणण् संख्याने" अदन्तत्वादनेकस्वरत्वम्, गणयतीत्येवंशीलः–**गणकः** इति– अत्र स्वार्थे णिचि "अतः" [ ४. ३. ८२. ] इत्यकारलोपः, णके च णिलोपः। "चुलुम्प" इति वाक्यकरणीयो धातुरिति पारायणे, स च लोल्ये इति शब्दस्तोममहानिधौ, चुलुम्पतीत्येवशीलः– **चुलुम्पकः**। अनेकस्वरत्वादसूयग्रहणमन्यथासिद्धमिति शङ्कते—**अनेकस्वरत्वात् सिद्धे** इति, समाधानमाह—**असूयग्रहणं कण्ड्वादिनिवृत्त्यर्थमिति**– कण्ड्वादीनामनेकस्वराणां चेत्? असूयतेरेवेति नियमद्वारेति भावः। यद्यपि नात्र कण्ड्वादित्वेनासूयस्य ग्रहणमिति नियमकोटौ कण्ड्वादिपदप्रवेशो दुष्करस्तथापि वस्तुतस्तस्य कण्ड्वादित्वेन नियमकोटौ प्रवेशो लक्ष्यानुरोधादभ्युपेय इति बोध्यम्। नियमस्य फलमाह—**कण्डूयिता, मन्तूयिता, तृन्नेवेति**–"कण्डूग् गात्रविघर्षणे" "मन्तु रोष-वैमनस्ययोः" कण्डूयति मन्तूयतीत्येवंशील इति "तृन् शीलधर्मसाधुषु" [५.१.५७.] इति तृनि—कण्डूयिता, मन्तूयितेति तृन्नेव भवति, नानेन णक इत्यर्थः। अनेकस्वरत्वादेव विनाशेरपि प्रत्ययः स्यादेवेति तद्वैयर्थ्यमाशङ्क्याह—**विनाशिग्रहणं तु अन्यस्य ण्यन्तस्य निवृत्त्यर्थमिति**–ण्यन्तश्चेत्? विनाशेरेवेति नियमाकारः। तत्फलमाह–**कारयितेति**–कारयतीत्येवंशील इति तृनि–कारयिता, नियमबलादत्र शीलाद्यर्थे णको न भवतीति भावः। क्लिशधातुर्दिवादिः क्र्यादिश्च, तत्र दैवादिक इदिदिति "इङितो व्यञ्जनाद्यन्तात्" [ ५. २. ४४ ] इत्यनप्रत्ययः प्राप्तः स कस्मान्न भवेदित्याशङ्कायामाह—**क्लिशेरविशेषेण ग्रहणाद् दैवादिकादिदित्त्वेऽपि अनो न भवतीति**– विशेषग्राहकस्य विनिगमकस्याभावादविशेषेणग्रहणमिति भावः, ततश्चानं बाधित्वा परत्वाण्णक एव भवतीति भावः। सति हि विशेषे विषयविभागः स्यादित्युभयोरत्र ग्रहणमिति ॥ ५. २. ६८. ॥

## उपसर्गाद्दे देवृ-देवि-क्रुशः । ५. २. ६९. ॥

**त० प्र०—उपसर्गात् परेभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य एभ्यो णको भवति। आदेवत इत्येवंशीलः–आदेवकः, परिदेवकः। देवीति दीव्यतेर्देवतेर्वा ण्यन्तस्य ग्रहणम्। आदेवयतीति–आदेवकः, परिदेवकः। आक्रोशकः, परिक्रोशकः। उपसर्गादिति किम्? देवनः, देवयिता, क्रोष्टा। देवतेर्ण्यन्तादेवेति कश्चित् ॥६९॥**

**श० म० न्यासानुसन्धानम्—उप०**। "देवृङ् देवने" आदेवनशीलः–**आदेवकः**, परिदेवनशीलः–**परिदेवकः**। देवीत्येकेनैव निर्देशेन सर्वेषां संग्रहात् पृथग् देवृग्रहणस्य फलमाह—**देवीति दीव्यतेर्देवतेर्वा ण्यन्तस्य ग्रहणमिति**—ण्यन्तत्वाभावे हि देवीति निर्देश एव न संगच्छेत 'देवृ' इत्यस्य पृथग् निर्दिष्टत्वादिति दीव्यतेर्ण्यन्तस्य देवतेर्वा तथाभूतस्यैवायं निर्देश इति लभ्यते। आदेवयतीत्येवंशीलः– **आदेवकः**, परिदेवयतीत्येवंशीलः– **परिदेवकः**। "क्रुशं रोदनाह्वानयोः" आक्रोशनशीलः–**आक्रोशकः**। परिक्रोशनशीलः—**परिक्रोशकः**। पदकृत्यं पृच्छति–**उपसर्गादिति किमिति**, उपसर्गाभावे मा भूदित्याशयेन प्रत्युदाहरति—**देवनः** इति—देवते इत्येवंशील इति "इङितो व्यञ्जनाद्यन्तात्" [५. २. ४४.] इत्यनः, देवयतीत्येवंशील इति तृनि—**देवयिता**, क्रोशतीत्येवंशील इति तृनि–**क्रोष्टा**। मतान्तरमाह–**देवतेर्ण्यन्तादेवेति कश्चिदिति** ॥ ५. २. ६९. ॥

## वृङ्-भिक्षि-लुण्टि-जल्पि-कुट्टाट्टाकः । ५. २. ७०. ॥

**त०प्र०—एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यष्टाकः**

**प्रत्ययो भवति । वृणीते इत्येवंशीलो–वराकः, वराकी । भिक्षाकः, भिक्षाकी । लुण्टाकः, लुण्टाकी । जल्पाकः, जल्पाकी । कुट्टाकः, कुट्टाकी । टकारो ङ्यर्थः ॥७०॥**

**श० म० न्यासानुसन्धानम्—वृङ्०** । "वृङ्श् संभक्तौ" संभक्तिः संसेवा, वरणशीलः–**वराकः**, प्रत्ययस्य टित्वात् "अणञे०" [ २. ४. २० ] इति स्त्रियां ङीप्रत्यये "अस्य ङ्यां लुक्" [२. ४. ८६.] इत्यकारलोपे च–**वराकी** । "भिक्षि याच्ञायाम्" भिक्षणशीलः–**भिक्षाकः**, भिक्षणशीला–**भिक्षाकी** । "लुटु स्तेये च" चकारादनादरे, लुण्टनशीलः– **लुण्टाकः**, स्त्रियां– **लुण्टाकी** । "जल्प व्यक्ते वचने" जल्पनशीलः– **जल्पाकः**, स्त्रियां—**जल्पाकी** । "कुट्टण् कुत्सने च" चकाराच्छेदने, कुट्टनशीलः– **कुट्टाकः**, स्त्रियां– **कुट्टाकी** । टकारस्य प्रयोगेऽश्रूयमाणतया तस्य व्यर्थतामाशङ्क्य समाधत्ते– **टकारो ङ्यर्थः** इति ॥ ५. २. ७०. ॥

## प्रात् सु-जोरिन् । ५. २. ७१. ॥

**त० प्र०—प्रात् पराभ्यां सुवति-जुभ्यां शीलादौ सत्यर्थे वर्तमानाभ्यामिन् प्रत्ययो भवति । 'सू' इति निरनुबन्धग्रहणात् सुवतेर्ग्रहणम्, न सूति-सूयत्योः । प्रसुवतीत्येवंशीलः–प्रसवी । प्रजवी ॥ ७१ ॥**

**श० म० न्यासानुसन्धानम्—प्रात्०** । "षूङौक् प्राणिगर्भविमोचने" "षूङौच् प्राणिप्रसवे" "षूत् प्रेरणे" इति त्रिधा सूधातुः, तत्र प्रेरणार्थकस्य तौदादिकस्यैव सुवतेर्ग्रहणमिष्टं नेतरयोः, तत्साधनायाह—**'सू' इति निरनुबन्धग्रहणात् सुवतेर्ग्रहणं न सूति-सूयत्योरिति**– * निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम् * इति न्यायेनेति भावः । प्रसुवतीत्येवंशील इति—**प्रसवी**, प्रसुवतीत्यस्य कर्मणि प्रेरयति लोकमिति फलादिकं प्रकटयतीति वाऽर्थः । "जुंङ् गतौ" इति भौवादिकः, जुं सौत्रो वेगाख्यसंस्कारे वा, प्रजवनशीलः–**प्रजवी** ॥ ५. २. ७१ ॥

## जीण्-दृ-क्षि-विश्रि-परिभू-वमा-ऽभ्यमा-ऽव्यथः । ५. २. ७२. ॥

**त० प्र०—एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्य इन् भवति । जि–जयतीत्येवंशीलो–जयी । इण्–अत्ययी, उदयी । दृ–आदरी । क्षीति क्षि-क्षितोर्ग्रहणम्, क्षयी । विश्रि–विश्रयी । परिभू–परिभवी । वम्–वमी । अभ्यम्–अभ्यमी । अव्यथ्–न व्यथते इति–अव्यथी ॥ ७२ ॥**

**श० म० न्यासानुसन्धानम्–जीण्०** । "जि अभिभवे" जयशीलः–**जयी** । "इंण्क् गतौ" अत्येतीत्येवंशील इति–**अत्ययी**, उदेतीत्येवंशीलः–**उदयी** । "दृङ्त् आदरे" आदरशीलः—**आदरी** । "क्षि क्षये" "क्षित् निवासगत्योः" "क्षिष्श् हिंसायाम्" इति त्रिधा क्षिधातुः, तत्र हिंसार्थस्य न ग्रहणमित्याह–**क्षीति क्षिक्षितोर्ग्रहणमिति**– निरनुबन्धग्रहणन्यायेनाद्ययोर्ग्रहणम्, अन्त्यस्य तु न सानुबन्धकत्वात्, क्षयशीलः–**क्षयी** । "श्रिग् सेवायाम्" विश्रयणशीलः—**विश्रयी** । "भू सत्तायाम्" परिभवतीत्येवंशीलः—**परिभवी** । "टुवम् उद्गिरणे" वमनशीलः– **वमी** । "अम शब्दभक्त्योः" अभ्यमनशीलः–**अभ्यमी** । "व्यथिष् भय-चलनयोः" अव्यथनशीलः—**अव्यथी** ॥ ५. २. ७२. ॥

## सृ-घस्यदो मरक् । ५. २. ७३. ॥

**त० प्र०—एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो मरक् प्रत्ययो भवति । सरतीत्येवंशीलः–सृमरः, घस्मरः, अद्मरः ॥ ७३ ॥**

**श० म० न्यासानुसन्धानम्–सृ०** । "सृ गतौ" मरकि ककारोऽनुबन्धः, कित्त्वाद् गुणाभावे–**सृमरः** "घस्लृं अदने" घसतीत्येवंशीलः–**घस्मरः** । "अदंक् भक्षणे" अदनशीलः– **अद्मरः** ॥ ५. २. ७३. ॥

## भञ्जि-भासि-मिदो घुरः । ५. २, ७४. ॥

**त० प्र०—एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो घुरः प्रत्ययो भवति । भज्यते स्वयमेवेत्येवंशीलं–भङ्गुरं काष्ठम् । भासते–भासुरं वपुः, मेद्यति मेदते वा–मेदुरः । घकारो गत्वार्थः ॥ ७४ ॥**

**श० म० न्यासानुसन्धानम्—भञ्जि०** । "भञ्जोंप् आमर्दने" "व्याप्ये घुर-केलिम-कृष्टपच्यम्" [५. १. ४] इति घुरस्य व्याप्ये कर्तरि विहितत्वादाह—**भज्यते**

स्वयमेवेत्येवंशीलमिति, घुरस्य घित्वात् "क्तेऽनिटः चजोः कगौ घिति" [४. १. १११.] इति जस्य गत्वे नकारस्थानीयञकारस्य "म्नां०" [१. ३. ३९.] इति ङत्वे—**भङ्गुरं काष्ठमिति**— अत्र कर्मैव कर्तृभूतमिति कर्मकर्तरि प्रत्ययः। "भासि दीप्तौ" अस्याकर्मकत्वेन कर्मणोऽसम्भवात् कर्तृत्वविवक्षायामप्ययं भवतीत्याह—**भासते—भासुरं वपुरिति**—भासनशीलं **भासुरमिति**। "ञिमिदाच् स्नेहने" "मिदृग् मेधा-हिंसयोः" अनयोरप्यकर्मकत्वात् कर्तरि प्रत्ययः, तदाह—**मेद्यति मेदते वेति**— "मिदः श्ये" [ ४. ३. ५. ] इति गुणे—**मेद्यति**, मेदनशीलः—**मेदुरः**। घकारस्य प्रयोगेऽश्रवणादानर्थक्यमाशङ्क्याह—**घकारो गत्वार्थः** इति—भङ्गुरमित्यत्र जकारस्य गत्वं यथा स्यादित्येवमर्थ इति भावः ॥५.२.७४॥

## वेत्ति-छिद-भिदः कित् । ५, २, ७५. ।

**त० प्र०—एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः कित् घुरः प्रत्ययो भवति। वेत्तीत्येवंशीलो—विदुरः, छिद्यते भिद्यते स्वयमेव—छिदुरः, भिदुरः, कित्त्वाद् गुणो न भवति। वेत्तीति तिव्निर्देश इतरविदित्रयव्युदासार्थः ॥७५॥**

**श० म० न्यासानुसन्धानम्—वेत्ति०**। ज्ञानार्थस्यैव ग्रहणमिति वक्ष्यमाणत्वादाह—**वेत्तीत्येवंशील** इति। "विदक् ज्ञाने" वेदनशीलः—**विदुरः**, कित्त्वाद् गुणाभावः। यद्यपि विदः सकर्मकत्वमिति कर्मणोऽपि कर्तृत्वविवक्षया व्याप्ये कर्तर्येव प्रत्ययो विधेय इत्यायाति, तथापि ज्ञानरूपस्य धात्वर्थस्य जडे कर्मणि विवक्षाया असम्भवेनास्यापि कर्मकर्तुरभाव एवेति शुद्ध एव कर्तरि प्रत्ययो विहितः। "छिदूंपी द्वैधीकरणे" "भिदूंपी विदारणे" **छिद्यते भिद्यते स्वयमेवेति**—अत्र क्रियाफलस्य छेदस्य भङ्गस्य च कर्मणि सम्भवात् तस्य कर्मकर्तृत्वविवक्षा युक्तैव, स्वयं छेदनशीलो भेदनशीलो वा—**छिदुरः,भिदुरः**। कित्करणस्य फलमाह—**कित्त्वाद् गुणो न भवतीति**— "लघोरुपान्त्यस्य" [४. ३. ४.] इति गुणविधायके किद्वर्जनादित्यर्थः। यथा छिदभिदोः स्वरूपत एव तथैव विदोऽपि स्वरूपत एव निर्देशः कुतो नेत्याशङ्कायामाह—**वेत्तीति तिव्निर्देश इतरविदित्रयव्युदासार्थः** इति—विदयश्चत्वारः, तथाहि—"विदक् ज्ञाने" वेत्ति, "विदिंच् सत्तायाम्" विद्यते, "विद्लृंती लाभे" विन्दते, विन्दति, "विदिंप् विचारणे" विन्ते, तत्राद्यस्य ग्रहणं, न शेषत्रयस्येति भावः, अत्रायं संग्राहकः श्लोकः—

"सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यत्-लुक्-श्नम्-शेष्विदं क्रमात्॥"

॥ ५, २, ७५. ॥

## भियो रु-रुक-लुकम् । ५. २. ७६. ॥

**त० प्र०—शीलादौ सत्यर्थे वर्तमानाद् बिभेते 'रु रुक लुक' इति प्रत्ययत्रयं किद् भवति। बिभेतीत्येवंशीलो—भीरुः, भीरुकः भीलुकः। ऋफिडादित्वात् लत्वं प्रयोगानुसारणाद् गरीय इति लाघवार्थं लुकवचनम् ॥ ७६. ॥**

**श० म० न्यासानुसन्धानम्—भियो०**। किदित्यनुवर्तते, अत आह—**किद् भवतीति**। "ञिभीक् भये" भयशीलः—**भीरुः, भीरुकः, भीलुकः**। कित्त्वात् सर्वत्र गुणाभावः। ऋफिडादौ भीरुकशब्दपाठेन लत्वे सिद्धे पृथग्लुकप्रत्ययस्य विधानमनुचितमित्याशङ्कायामाह—**ऋफिडादित्वात् लत्वं प्रयोगानुसरणाद् गरीय इति लाघवार्थं लुकवचनमिति**—"ऋफिडादीनां डश्च लः" [२. ३. १०४.] इति सूत्रे पठिता ऋफिडादयो न स्वरूपतः क्वचन परिगणिताः किन्तु प्रयोगत एवानुसर्तव्या इति के तत्र ग्राह्याः के नेति विचारस्य लक्ष्यानुरोधितया ज्ञानगौरवाधायकत्वाद् वरं लुकप्रत्ययस्य पार्थक्येन विधानमिति भावः ॥ ५. २. ७६. ॥

## सृ-जीण्-नशष्ट्वरप् । ५. २. ७७. ॥

**त० प्र०—एभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यः कित् ट्वरप् प्रत्ययो भवति। सरतीत्येवंशीलः—सृत्वरः, सृत्वरी। जित्वरः, जित्वरी। इण्—इत्वरः, इत्वरी। क्रूरकर्मणि पथिके नीचे दुर्विधे। नश्वरः, नश्वरी। टकारो ङ्यर्थः। पकारस्तागमार्थः ॥७७॥**

**श० म० न्यासानुसन्धानम्—सृ०**। "सृं गतौ" प्रत्यये टकारः पकारश्चानुबन्धः, सरतीत्येवंशील इति किति ट्वरपि कित्त्वाद् गुणाभावे पित्त्वाच्च "ह्रस्वस्य तः पित्कृति" [४. ४. ११३.] इति तागमे—**सृत्वरः**, स्त्रियां तु "अणञे०" [ २. ४. २०. ] इति टित्त्वाद् ङ्यां—

**सृत्वरी** । "जि जये" जयशीलः—**जित्वरः**, स्त्रियां तु—**जित्वरी** । "इंण्क् गतौ" एतीत्येवंशीलः—**इत्वरः**, स्त्रियाम्—**इत्वरी** । गमनशीलार्थे निष्पन्नोऽपीत्वरशब्दो नानार्थक इत्याह—**क्रूरकर्मणि पथिके नीचे दुर्विधे** इति—शब्दानां व्युत्पत्तिनिमित्तमन्यदन्यच्च प्रवृत्तिनिमित्तं भवतीति भावः । "नशौच् अदर्शने" अदर्शनमनुपलब्धिः, नाशस्वभावः—**नश्वरः**, स्त्रियां तु—**नश्वरी** । टकार-पकारयोः प्रयोगेऽश्रवणात् व्यर्थतामाशङ्क्य तत्फलं दर्शयति—**टकारो ङ्यर्थः, पकारस्तागमार्थः** इति ॥ ५. २. ७७. ॥

## गत्वरः । ५. २. ७८. ॥

**त० प्र०—गमेष्ट्वरप् मकारस्य च तकारो निपात्यते । गत्वरः, गत्वरी ॥७८॥**

**श० म० न्यासानुसन्धानम्—गत्वरः** । निपातनसूत्रमिदम्, किमत्र निपातनीयमित्याह—**गमेष्ट्वरप् मकारस्य च तकारो निपात्यते** इति । गमनशीलः—**गत्वरः**, स्त्रियां तु टित्वात् ङ्यां—**गत्वरी** ॥ ५. २. ७८. ॥

## स्म्यजस-हिंस-दीप-कम्प-कम-नमो रः । ५. २. ७९. ॥

**त० प्र०—स्म्यादिभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो रः प्रत्ययो भवति । स्मयत इत्येवंशीलं— स्मेरं मुखम् । अजसिति "जसूच् मोक्षणे" नञ्पूर्वः, न जस्यति—अजस्रं श्रवणम्, अजस्रा प्रवृत्तिः, अजस्रः पाकः, अजस्रं पचति । अजस्रशब्दोऽयं स्वभावात् सातत्यविशिष्टां क्रियामाह, तेन धात्वर्थ एव कर्तरि रः प्रत्ययोऽन्यथा क्रियाभिधानानुपपत्तेः, तेनाजस्रो घट इति न भवति । अजस्रमित्यव्ययमपि नित्यार्थं क्रियाविशेषणमस्ति । हिंस्-हिंस्रो व्याधः । दीप्—दीप्रो दीपः । कम्प्—कम्प्रः । कम्-कामयते कम्रा युवतिः । बहुलाधिकारात् कर्मण्यपि, कम्यते—कम्रः, तत एव कमितेत्यपि । नम्—नमतीति—नम्रः । अजसि-कमि-नमिभ्यः कर्मकर्तर्येवेच्छन्त्येके ॥ ७९ ॥**

**श० म० न्यासानुसन्धानम्—स्म्यज०** । "ष्मिङ् ईषद्धसने" स्मयते इत्येवंशील इति रे गुणे च—**स्मेरं मुखमिति** । 'अजस्'विषये विशेषमाख्यातुमुपक्रमते—**'अजस्' इति "जसूच् मोक्षणे" नञ्पूर्वः** इति स्वरूपव्याख्यानम्, **न जस्यतीति** वाक्यम्, अथोदाहरणान्याह—**अजस्रं श्रवणम्, अजस्रा प्रवृत्तिः, अजस्रः पाकः, अजस्रं पचतीति**— एतैरजस्रशब्दस्यानव्ययत्वं दर्शितम् । विशेषमाह—**अजस्रशब्दोऽयं स्वभावात् सातत्यविशिष्टां क्रियामाहेति**— यद्यपि प्रकृतिप्रत्ययानुगुण्येनामोचनशीलोऽर्थः प्रतीयते, तथापि अभिधानस्वाभाव्यान्नात्र योगार्थप्रतीतिरपि तु सातत्यविशिष्टक्रियारूपार्थस्यैव भानमिति तत्रैवायं रूढ इति । वस्तुतस्तु सातत्यमेव तस्यार्थः क्रिया तु विशेष्यभूतधातुनैव वाच्येति मन्तव्यम् । एवं च कर्तरि विहितोऽयं रप्रत्ययस्तदन्तश्चाजस्रशब्दश्चेत् क्रियागतं सातत्यमाह तर्हि क्रियाया विशेषणमिति भवति निष्कर्षः । तथा च यस्य धातोरयं विशेषणभूतस्तदर्थ एवास्य कर्ता वाच्य इति फलति, तदाह—**तेन धात्वर्थ एव कर्तरि रप्रत्यय** इति । कुत इति चेत्? अत्राह—**अन्यथा क्रियाभिधानानुपपत्तेः**, अयमाशयः—'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्यैव प्राधान्यम्' इति न्यायेनाजस्रशब्देन कर्तृप्रत्ययान्तेन कर्ता वाच्यः, स चान्यश्चेत् तर्हि धात्वर्थविशेषणत्वमस्य न स्यादतोऽगत्या धात्वर्थस्यैव [ विशेष्यभूतधात्वर्थस्यैव ] कर्तृत्वमिहेति मन्तव्यमिति । फलितमाह—**तेनाजस्रो घट इति न भवतीति**—घटस्य विशेषणत्वमस्य न भवतीति भावः । अजस्रशब्दान्तरस्यापि क्रियाविशेषणत्वमेवेति पूर्वोक्तार्थं द्रढयति—**अजस्रमित्यव्ययमपि नित्यार्थं क्रियाविशेषणमस्ती**ति । "हिंसुप् हिंसायाम्" हिंसाशीलः—**हिंस्रो व्याधः** । "दीपैचि दीप्तौ" दीपनशीलः—**दीप्रः** । "कपुङ् चलने" कम्पत इत्येवंशीलः—**कम्प्रः** । "कमूङ् कान्तौ" कान्तिरभिलाषः, कामयत इत्येवंशीला—**कम्रा युवतिः** । कर्मणि कम्र इति प्रयोग उपलभ्यते, स कथमुपपादनीय इत्याह—**बहुलाधिकारात् कर्मण्यपि—कम्यते—कम्रः** । बहुलाधिकारादेव प्रयोगान्तरमुपपादयति—**तत एव कमितेत्यपी**ति । "णमं प्रह्वत्वे" नमनशीलः—**नम्रः** । मतान्तरमाह—**अजसि-कमि-नमिभ्यः कर्मकर्तर्येवेच्छन्त्येके** इति । अत्रेदं विचार्यते— अजस्रशब्दस्य क्रियाविशेषणत्वमिति निर्णीतं सर्वैः, ततश्च क्रियाविशेषणभूतस्य न किञ्चित् कर्म भवितुमर्हति परतन्त्रत्वादिति तत्र कर्मणः कर्तृत्वाभावः सुतराम्, धात्वर्थस्यैव कर्तृत्वस्य पूर्वं निर्णी-

तत्वात् । कर्मिरिच्छार्थः, आत्मगुणश्चेच्छा न परस्मिन् कर्मभूते विवक्षितुं शक्येति तस्यापि कर्मणः कर्तृत्वाभाव एवेति तस्मादपि कर्तरि प्रत्ययाप्राप्तिः । एवं नमधात्वर्थस्य प्रह्वीभावस्य कर्तृमात्रनिष्ठतया तस्यापि कर्मकर्तरि प्रत्ययाप्राप्तिः, अत एतेभ्यः कर्मकर्तर्येव प्रत्यय इति कथनं न विचारकोटिमारोहति ॥ ५. २. ७९. ॥

## तृषि-धृषि-स्वपो नजिङ् । ५. २. ८०. ॥

**त० प्र०—तृषि-धृषि-स्वपिभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो नजिङ् प्रत्ययो भवति । तृष्यतीत्येवंशीलः— तृष्णक्, तृष्णजौ । धृष्णक्, धृष्णजौ । स्वप्नक्, स्वप्नजौ । ङकारो गुणप्रतिषेधार्थः । इकार उच्चारणार्थः । धृषो नेच्छन्त्येके ॥८०॥**

**श० म० न्यासानुसन्धानम्—तृषि०** । "ञितृषच् पिपासायाम्" तर्षशील इति नजिङि तस्य ङित्वाद् गुणाभावे–**तृष्णक्** इति, "चजः कगम्" [२. १. ८६.] इति जस्य गत्वे "विरामे वा" [ १. ३. ५१. ] इति कत्वं विज्ञेयम् । द्विवचने--**तृष्णजौ** । "ञिधृषाट् प्रागल्भ्ये" धर्षशीलः--**धृष्णक्**, द्विवचने–**धृष्णजौ**, उभयत्र "रषृवर्णा०" [ २. ३. ६३. ] इति नस्य णकारः । "ञिष्वंपक् शये" स्वापशीलः–**स्वप्नक्, स्वप्नजौ** । अनुबन्धद्वयस्य सार्थक्यं दर्शयति-**ङकारो गुणप्रतिषेधार्थः** इति–तृषि-धृषोर्विषये इदम् । **इकार उच्चारणार्थ** इति–श्रुतिसुखदोच्चारणार्थः, एवं च 'नज्'इत्यवशिष्यते प्रत्ययः। मतान्तरमाह–**धृषो नेच्छन्त्येके** इति–पाणिनीये "स्वपितृषोर्नजिङ्" [ ३. २. १७२. ] इति सूत्रे धृषो ग्रहणं न दृश्यते, काशिकायां च "धृषश्चेति वक्तव्यम्" इति वार्तिकमेतत्सूत्रे दृश्यते, भाष्यादौ तु नोपलभ्यते ॥ ५. २. ८० ]

## स्थेश-भास-पिस-कसो वरः । ५. २. ८१. ॥

**त० प्र०—स्थादिभ्यः शीलादौ सत्यर्थे वर्तमानेभ्यो वरः प्रत्ययो भवति । तिष्ठतीत्येवंशीलः–स्थावरः, स्थावरा । ईश्वरः ईश्वरा । कथमीश्वरी ? "अश्नोरीच्चादेः" [ ४४२. ] इत्यौणादिके वरटि भवति । भास्वरः, भास्वरा । पेस्वरः, पेस्वरा । विकस्वरः, विकस्वरा । प्रमदेरपीति कश्चित्–प्रमाद्यति–प्रमद्वर ॥ ८१ ॥**

**श० म०—न्यासानुसन्धानम्–स्थेश०** । "ष्ठां गतिनिवृत्तौ" तिष्ठतीत्येवंशील इति वरे-**स्थावरः**, स्त्रियां तु "आत्" [ २ ४. १८. ] इत्यापि–**स्थावरा** । "ईशिक् ऐश्वर्ये" ईष्टे इत्येवंशीलः–**ईश्वरः**, स्त्रियामापि–**ईश्वरा** । ननु स्त्रियामीश्वरा इति प्रयोगस्तदा 'ईश्वरी' इति प्रयोगः कथमुपपादनीय इति चेद् ? अत्राह–**कथमीश्वरी ? "अश्नोरीच्चादेः"[उ० ४४२.] इत्यौणादिके वरटि भवती**ति– "अशौटि व्याप्तौ" अत औणादिके वरटि प्रत्यये आदेरिकारे तस्य च टित्वात् "अणजे०" [ २. ४. २०. ] इति ङ्याम् 'ईश्वरी' इति भविष्यतीति भावः । "भासि दीप्तौ" भासत इत्येवंशीलः-**भास्वरः**, स्त्रियामापि–**भास्वरा** । "पिसृ गतौ" पेसनशीलः--**पेस्वरः** इति–अत्र नाम्युपान्त्यलक्षणो गुणः । "कस गतौ" विकसनशीलः--**विकस्वरः**, स्त्रियामापि-- **विकस्वरा** । मतान्तरमाह--**प्रमदेरपि कश्चिदि**ति, तन्मते-प्रमाद्यति–**प्रमद्वरः**, अत्र प्रपूर्वो "मदैच् हर्षे" इति धातुः ॥ ५. २. ८१ ॥

## यायावरः । ५. २. ८२. ॥

**त० प्र०—यातेर्धातोः शीलादौ सत्यर्थे वर्तमानाद् यङन्तात् वरः प्रत्ययो निपात्यते । कुटिलं यातीत्येवंशीलो–यायावरः ॥८२॥**

**श० म० न्यासानुसन्धानम्—याया०** । "यांक् प्रापणे" कुटिलं यातीत्येवंशील इति यङि वरे च—**यायावरः** । यङि द्वित्वे 'याया' इति ततो वरः ॥ ५. २. ८२. ॥

## दिद्युद्-ददृज्जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राड्-भ्राजादयः क्विपः । ५. १. ८३. ॥

**त० प्र०—एते शब्दाः क्विबन्ताः शीलादौ सत्यर्थे निपात्यन्ते । द्योतते इत्येवंशीलो–दिद्युत्, दिद्युतौ, दृणातीति–ददृत्, ददृतौ, गच्छतीति–जगत्, जुहोतीति–जुहूः, एषु द्वित्वम्, दृणाति-जुहोत्योर्ह्रस्वत्वदीर्घत्वे च । वक्तीति-वाक् । पृच्छतीति–प्राट्, प्राशौ;शब्दप्राट्, तत्त्वप्राट् । दधाति ध्यायति वा–धीः, श्रयतीति–श्रीः । शतं द्रवतीति–शतद्रूः, स्रवतीति-स्रूः । जवतीति–जूः । आयतं स्तौतीति–आयत-**

स्नूः,कटं प्रवते—कटप्रूः, परिव्रजतीति—परिव्राट्,परिव्राजौ; एषु दीर्घत्वम् दधातेराकारस्य ध्यायतेर्याशब्दस्य चेकारः । बहुलाधिकारादशीलादावपि । धीः, प्रधीः, आधीः । भ्राजादि—विभ्राजत इति—विभ्राट्, विभ्राजौ । भासत इति—भाः, भासौ, भासः । पिपर्तीति—पूः, पुरौ, पुरः । धूर्वतीति-धूः, धूरौ, धूरः । विद्योतते—विद्युत्, विद्युतौ । ऊर्जयतीति—ऊर्क्, ऊर्जौ, ऊर्जः । ग्रावाणं स्तौति—ग्रावस्तुत्, ग्रावस्तुतौ । पचतीति—पक् । शक्नोतीति—शक् । भिनत्तीति—भित् । वेत्तीति—वित् । शोकच्छित् । "भुवः संज्ञायामेव" । भूः—पृथिवी । शंभूः—शिवः । आत्मभूः—कामः । मनोभूः—स एव । स्वयंभूर्ब्रह्मा, स्वभूर्विष्णुश्च । मित्रभूर्नाम कश्चित् । प्रतिभूः—उत्तमर्णाधमर्णयोरन्तरस्थः । हन्भूः-व्यसनसहायः । कारभूः-पण्यमूल्यादिनिर्णेता । वर्षाभूर्दर्दुर ओषधिश्च । पुनर्भूः—पुनरूढा ओषधिश्च, संज्ञायाम् । अन्यत्र—भविता । शीलादिषु असरूपविधिनास्ति, तेन—सामान्यलक्षणः क्विप् न प्राप्नोतीति पुनर्विधीयते । शीलादिप्रत्ययानां पूर्णोऽवधिः । केचित् तु संज्ञाशब्दानां शीलाद्यर्थेषु कामचारस्ते यथाकथंचिद् व्युत्पादनीया इति मन्यन्ते ॥८३॥

---

**श० म० न्यासानुसन्धानम्—दिद्यु०** । क्विपः प्रत्ययत्वात् तदन्तविज्ञानम्, 'शीलादौ सत्यर्थे' इत्यनुवर्तते, सूत्रं च निपातनपरमतो निष्पन्नमर्थमाह—**एते शब्दाः क्विबन्ताः शीलादौ सत्यर्थे निपात्यन्ते** इति । "द्युति दीप्तौ" द्योतनशीलः—**दिद्युत्, दिद्युतौ** इति— अत्र निपातनाद् द्वित्वम्, द्वित्वे सति च पूर्वस्य इकारस्तु "द्युतेरिः" [ ४. १. ४१. ] इत्यनेन सिद्ध एव, एवमनादिव्यञ्जनलोपादिकमपि । "दॄश् विदारणे" दृणातीत्येवंशीलः—**दद्दत्, दद्दतौ** इति—अत्र निपातनाद् द्वित्वम्, द्वित्वे च पूर्वस्य ह्रस्वत्वमृतोऽत्वं च स्वतः सिद्धम्, निपातनात् परस्य ह्रस्वत्वम्, ह्रस्वत्वे च तागमः स्वतः सिद्धः । "गम्लृं गतौ" गच्छतीत्येवंशीलं—**जगत्** इति—अत्र निपातनाद् द्वित्वम्, द्वित्वे सति च अनादिव्यञ्जनलोपजकारौ पूर्वस्य, परस्य च मलोप-तागमौ स्वतः सिद्धौ । "हुंक् दानादनयोः" हवनशीलः—**जुहूः** इति— अत्र निपातनाद् द्वित्वमन्त्यस्य दीर्घत्वं च, शेषं स्वतः सिद्धम् । ग्रन्थकृत् स्वयमेव निपातनीयमाह- **एषु द्वित्वम्, दृणातिजुहोत्योर्ह्रस्वत्वदीर्घत्वे चेति** । "वचंक् भाषणे" वचनशीलः– **वाक्** इति–अत्र निपातनाद् दीर्घत्वम् । "प्रच्छंत् ज्ञीप्सायाम्" प्रश्नशीलः– **प्राट्** इति– अत्र निपातनाद् दीर्घत्वम्, "अनुनासिके च०" [ ४. १. १०८. ] इति छस्य शकारः, तस्य च "यज-सृज०" [ २. १. ८७. ] इति षकारः, तस्य च "धुटस्तृतीयः" [ २. १. ७६. ] इति डकारः, तस्य "विरामे वा" [ १. ३. ५१. ] इति टकारः । द्विवचने तु– **प्राशौ** इति–अत्र न षत्वादिविधिर्धुट्पदान्तत्वाभावात् । शब्दं तत्त्वं च पृच्छतीत्येवंशील इति क्विपि दीर्घे ङस्युक्तसमासे च- **शब्दप्राट्, तत्त्वप्राट्** इति । 'डुधांग्क् धारणे च" चकाराद् दाने, ' ध्यैं चिन्तायाम्" दधाति ध्यायति वेत्येवंशीलः– **धीः**, अत्र निपातनाद् दधातेराकारस्य ध्यायतेर्याशब्दस्य चेकारः । "श्रिग् सेवायाम्" श्रयतीत्येवंशीलः– **श्रीः**, अत्र निपातनाद् दीर्घत्वम् । "द्रुं गतौ" शतं द्रवतीत्येवंशील इति–**शतद्रूः**, अत्र ङस्युक्तसमासो निपातनाद् दीर्घत्वं च । "स्रुं गतौ" स्रवतीत्येवंशीलः–**स्रूः**, निपातनाद् दीर्घत्वम् । ' जुं सौत्रो वेगाख्यसंस्कारे" जवतीत्येवंशीलः–**जूः**, निपातनाद् दीर्घत्वम् । "ष्टुंग्क् स्तुतौ" आयतं स्तौतीत्येवंशीलः-**आयतस्तूः**, अत्र ङस्युक्तसमासो निपातनाद् दीर्घत्वं च । "प्रुंङ् गतौ" कटं प्रवत इत्येवंशीलः–**कटप्रूः**–नदीतीरः, अत्र प्राग्वत् समासदीर्घौ । "व्रज गतौ" परितो व्रजतीत्येवंशीलः– **परिव्राट्** इति– अत्र निपातनतो दीर्घत्वं "यज-सृज०" [ २. १. ८७. ] इति जस्य षत्वे डत्वे टत्वं विज्ञेयम्, द्विवचने–**परिव्राजौ** । सर्वसाधारणं निपात्यमाह–एषु **दीर्घत्वमिति**, निपात्यान्तरमाह–**दधातेराकारस्य ध्यायतेर्याशब्दस्य चेकारः** इति ।

धीप्रमुखाः शब्दा अशीलादावपि दृश्यन्ते तत्र का गतिरित्याशङ्कायामाह– **बहुलाधिकारादशीलादावपीति** । "ध्यैं चिन्तायाम्" ध्यायति सुष्ठु ध्यायति प्रकर्षेण ध्यायति आध्यायतीति- **धीः, सुधीः, प्रधीः, आधीरिति** । अथ भ्राजादीनुदाहर्तुमाह–**भ्राजादीति** । "टुभ्राजि दीप्तौ" विभ्राजत इति- **विभ्राट्, विभ्राजौ**, अत्र "यज-सृज०" [ २. १. ८७. ] इति जस्य षत्वे डत्वं टत्वं च ज्ञेयम् । "भासि दीप्तौ" भासत इति– **भाः, भासौ** । "पृंक् पालनपूरणयोः" पिपर्तीतीति तु अर्थप्रदर्शनाय वाक्यम्, रूपं तु "पॄश् पालनपूरणयोः" इत्यस्येति पृणातीति क्विपि "ओष्ठ्यादुर्" इत्युरादेशे 'पुर्' इति, ततः

सौ "पदान्ते" [ २. १. ६४. ] इति दीर्घे च–**पूः**, द्विवचने **पुरौ**, बहुवचने च– **पुरः**। आदादिकत्वे तु उरादेशो न स्यात् दीर्घस्य ऋकारस्याभावात्। "धुर्वै हिंसायाम्" धूर्वतीति क्विपि "राल्लुक्" [ ४. १. ११०. ] इति वलोपे 'धुर्' इति, ततः सौ दीर्घे च– **धूः**, द्विवचने – **धुरौ**, बहुवचने- **धुरः**। "द्युति दीप्तौ" विद्योतत इति–**विद्युत्, विद्युतौ**। "ऊर्जण् बलप्राणनयोः" प्राणनं जीवनम्, ऊर्जयतीति क्विपि णेर्लोपे–**ऊर्क्** इति, "रात् सः" [ २. १. ९०. ] इति नियमादत्र संयोगान्तलुग् नास्तीति जस्य गत्वे कत्वम्, द्विवचने- **ऊर्जौ**, बहुवचने– **ऊर्जः**। ग्रावाणं स्तौतीति क्विपि ङस्युक्तसमासे "नाम्नो नो०" [ २. १. ९१. ] इति 'ग्रावन्'शब्दस्य नलोपे– **ग्रावस्तुत्, ग्रावस्तुतौ,** "ह्रस्वस्य तः०" [ ४. ४. ११३. ] इति तागमः। पचतीति- **पक्**, "चजः कगम्" [ २. १. ८६. ] इति चस्य कः। "शक्लृंट् शक्तौ" शक्नोतीति– **शक्**। "भिदृंपी विदारणे" भिनत्तीति– **भित्**। "विदक् ज्ञाने" वेत्तीति– **वित्**। "छिदृंपी द्वैधीकरणे" शोकं छिनत्तीति– **शोकच्छित्**। भूधातोः संज्ञायामेव क्विबित्याह– **"भुवः संज्ञायामेव"** इति। भवतीति–**भूः–पृथिवी**। शं सुखं तत्र भवतीति– **शंभूः शिवः**। आत्मनि भवतीति–**आत्मभूः–कामः**। मनसि भवतीति–**मनोभूः**, ईदृशः क इत्याह–**स एवेति**–काम एवेत्यर्थः। स्वयं भवतीति–**स्वयंभूर्ब्रह्मा,** स्वेन भवतीति- **स्वभूर्विष्णुश्च,** चकाराद् ब्रह्मार्थपरिग्रहः। मित्रं भवतीति–**मित्रभूर्नाम कश्चित्**। प्रतिभवतीति–**प्रतिभूः,** ईदृशः क इत्याह– **उत्तमर्णाधमर्णयोरन्तरस्थः** इति। "दृहु वृद्धौ" अत उदित्वान्नागमे क्विप्यन्तलोपे च–दृन्, धातूनामनेकार्थत्वाद् हिंसापि गम्यते, दृन् भवतीति– **दृन्भूः** इति, ईदृशः क इत्याह–**व्यसनसहायः**। क्रियत इति कारः, कारे भवतीति- **कारभूः– पण्यमूल्यादिनिर्णेता**। वर्षासु भवतीति- **वर्षाभूः–दर्दुर औषधिश्च**। पुनर्भवतीति– **पुनर्भूः– पुनरूढा [स्त्री] औषधिश्चेति**। **संज्ञायामिति**- दर्शिता भूप्रमुखाः शब्दा संज्ञायामेव साधवो नाज्ञायाम्। एवं तर्हि असंज्ञायां किमित्याह–**अन्यत्र भवितेति**–तृप्रत्यय एव भवतीत्यर्थः। ननु येषु विशेषतो निपात्यं नास्ति तेभ्योऽनेन क्विब्वचनं व्यर्थं सामान्यसूत्रेणैव तस्य सिद्धेः, येषु च किञ्चिन्निपात्यमस्ति तेभ्योऽपि क्विब्वचनं व्यर्थमेव, केवलं विशेषार्थनिपातनमात्रेणेष्टसिद्धेः। न च तृना बाधितः क्विप् न स्य दिति वाच्यम्, असरूपविधेर्वैकल्पिकत्वेन सिद्धेरत आह– **शीलादिष्वसरूपविधिर्नास्तीति**– प्रतिपादितश्चायमर्थः पूर्वत्र। तेन सामान्यलक्षणः क्विप् न प्राप्नोतीति वचनमिति, तथा चासरूपविधेरभावात् तृन् विशेषविहितः सामान्यविहितं क्विपं बाधिष्यत इति क्विप् न स्यादिति पुनर्विधानमावश्यकमिति। **शीलादिप्रत्ययानां पूर्णोऽवधिरिति**–एतत्पर्यन्तं शीलाद्यर्थे एव प्रत्यय इति शीलादिषु वाऽसरूपविधिर्नास्तीति नियमः प्रवर्तत एवेति तात्पर्यम्। मतान्तरमाह– **केचित् तु संज्ञाशब्दानां शीलाद्यर्थेषु कामचारः, ते यथाकथञ्चित् व्युत्पादनीया इति मन्यन्ते** इति– तेषां व्युत्पादनमेव व्याकरणस्य विषयः, अर्थबोधश्च लोकव्यवहाराधीनः, यदि तादृशेऽर्थे ते लोकैः प्रयुक्ताः स्युस्तदा तादृशार्थं बोधयेयुः स्वभावादिति तत्र न शास्त्रकृतामादर इति भावः ॥ ५. २. ८३. ॥

**शं-सं-स्वयं-विप्राद् भुवो डुः । ५. २. ८४. ॥**

**त० प्र०**– एभ्यः पराद् भुवः सत्यर्थे वर्तमानाड्डुः प्रत्ययो भवति। **शं सुखं तत्र भवति– शंभुः शंकरः, संभुर्जनिता, स्वयंभुः, विभुर्व्यापकः, प्रभुः स्वामी। बहुलाधिकारात् शंभुः संज्ञायाम्। अन्ये त्वसंज्ञायामपि। मितद्र्वादयस्त्वौणादिकाः ॥८४॥**

**श० म० न्यासानुसन्धानम्**—**शं०**। प्रत्यये डकारोऽनुबन्धः। "भू सत्तायाम्" "शं सुखे" इति वचनात् शमिति मान्तं सुखार्थकमव्ययम्, तदाह– **शं सुखं तत्र भवति– शंभुः शंकरः** इति–"डित्यन्त्यस्वरादेः" [ २. १. ११४. ] इत्यूकारलोपः। सम्पूर्वको भवतिर्जन्मार्थेऽपि, सम्भवति जायते इति–**संभुर्जनिता**। स्वयमात्मना भवतीति– **स्वयंभुः**। विपूर्वको भवतिर्व्याप्तौ वर्तते, विभवतीति–**विभुर्व्यापकः**। प्रपूर्वको भवतिः स्वाम्यर्थेऽपि वर्तते, प्रभवतीति– **प्रभुः स्वामी**। विशेषविनिगमकाभावात् सर्वेषां यौगिकत्वे प्राप्ते शंभुशब्दस्य रूढत्वमाह–**बहुलाधिकारात् शंभुः संज्ञायामिति**– तथा च तस्य व्यक्तिविशेषवाचकत्वं भवतीत्यर्थः। यदि च बहुलाधिकारादेकत्र संज्ञात्वमवगम्यते तर्हि तुल्यन्यायेन सर्वे-

षामपि संज्ञावाचकत्वमेव युक्तं न तु यौगिकत्वमिति चेत् ? अत्राह-**अन्ये त्वसंज्ञायामपीति**- बाहुलकस्यानेकरूपार्थलाभफलकत्वं सर्ववादिसम्मतमिति कस्यचिद् रूढत्वमपरत्र यौगिकत्वं रूढत्वं चेति कल्पयितुं शक्यत्वादिति भावः । "द्रुं गतौ" मितं द्रवतीत्यर्थे क्विपि "ह्रस्वस्य तः पित्कृति" [ ४. ४. ११३. ] इति तागमः स्यात्, तस्य विजन्तत्वस्वीकारे धातुत्वनिमित्तको मितद्रुव इति स्वरादिस्यादिविषयकप्रयोगे "स्यादौ वः" [२. १. ५७. ] इति वकारः स्यादिति तस्यापि डुप्रत्ययान्तत्वमेवाभ्युपेयम्, तदर्थं च न किमपि शासनमिहोपलब्धमित्याशङ्कां परिहरति- **मितद्र्वादयस्त्वौणादिकाः** इति- मितं द्रवतीति "हृरि-पीत-मित-शत-वि-कु-कद्रुघो द्रुवः" [ उणा० ७४५. ] इति डिति उप्रत्यये- **मितद्रुः** समुद्रस्तुरङ्गो मितंगमश्च । तथा चौणादीनामव्युत्पत्तिव्युत्पत्तिपक्षयोरुभयोरपि यथाकार्यं स्वीकृतत्वेन न कश्चिद् दोष इत्याशयः । पाणिनीये चैतदर्थं "विप्रसंभ्यो ड्वसंज्ञायाम्" [ ३. २. १८०.] इति सूत्रे 'डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानं, धातुविधितुक्प्रतिषेधार्थम्' इति वार्तिकमुक्तं भाष्ये च व्याख्यातम्, तस्य स्वमते तेषामौणादिकत्वस्वीकारेणानावश्यकता ध्वनिता ॥५. २. ८४.॥

## पुव इत्रो दैवते । ५. २. ८५. ॥

त० प्र०- **सामान्यनिर्देशात् पवतेः पुनातेश्च दैवते- देवतायां कर्तरि सत्यर्थे इत्रः प्रत्ययो भवति । पुनाति पवते वा-पवित्रोऽर्हन्, स मां पुनातु । करणेऽप्यन्ये ॥८५॥**

श० म० न्यासानुसन्धानम्- **पुव०** । पूधातुर्द्विविधः- "पूङ् पवने" पवनं नीरजीकरणम्, "पूगृश् पवने" पवनं शुद्धिरिति, तत्र द्वयोरन्यतरस्य वा ग्रहणमित्याशङ्कायामाह- **सामान्यनिर्देशात् पवतेः पुनातेश्चेति**- उभयसाधारणपूमात्रग्रहणात् विशेषग्रहणे विनिगमकाभावादुभयोरपि ग्रहणमिति भावः । अनेन इत्रे गुणेऽवादेशे च- **पवित्रोऽर्हन्** इति । मतान्तरमाह- **करणेऽप्यन्ये** इति ॥ ५. २. ८५. ॥

## ऋषि-नाम्नोः करणे । ५. २. ८५. ॥

त० प्र०- **सत्यर्थे वर्तमानात् पुवः करणे इत्रो भवति, ऋषौ संज्ञायां च । पूयतेऽनेनेति- पवित्रोऽयमृषिः । नाम्नि- दर्भः पवित्रः, बर्हिः पवित्रम्, यज्ञोपवीतं पवित्रम्, ओघोपकरणं पवित्रम्, पवित्रा नदी । दर्भादीनां पवित्रमिति संज्ञा । ऋषौ कर्तर्यपि केचित् ॥८६॥**

श० म० न्यासानुसन्धानम्- **ऋषि०** । ऋषिर्मन्त्र इति साम्प्रदायिकाः, तथा च तस्य पवनकरणत्वमुपपद्यते । उदाहरणानि स्पष्टानि । कर्तरीत्यस्य निवृत्तत्वात् ऋषौ संज्ञायां च करण एव प्रत्यय इति स्वमतम् । मतान्तरमाह- **ऋषौ कर्तर्यपीति केचिदिति**- अपिना करणे, तथा च "कर्तरि चर्षि-देवतयोः" [३. २. १८६.] इति पाणिनीयसूत्रे चकारेण करण इत्यस्यानुवृत्तेः ऋषि-देवतयोरर्थयोः कर्तरि करणे च प्रत्यय इति भाष्यकैयटाद्याशय इति "कर्तरि कृत्" [ ३. ४. ६७. ] इति सूत्रे शब्दकौस्तुभकारः । काशिकाकारेण तु- करणे ऋषौ कर्तरि देवतायामिति पृथक् यथासंख्येन व्याख्यातम्, तदेव च दीक्षितादिनाऽनुसृतम्, परं तत् भाष्यविरुद्धमिति ॥ ५. २. ८६. ॥

## लू-धू-सू-खन-चर-सहा-र्तेः । ५. २. ८७. ॥

त० प्र०- **एभ्यः सत्यर्थे वर्तमानेभ्यः करणे इत्रो भवति । लुनात्यनेन- लवित्रम् । धुवत्यनेन- धुवित्रम् । धूनोतेरपि कश्चित्- धवित्रम् । सुवत्यनेन- सवित्रम् । निरनुबन्धनिर्देशात् धूग्-सूङोर्न भवति । खनित्रम्, चरित्रम्, सहित्रम्, ऋच्छत्यर्यर्ति वा-ऽनेनारित्रम् । वहेरपि कश्चित्- वहित्रम् ॥८७॥**

श० म० न्यासानुसन्धानम्- **लू०** । "लूगश् छेदने" गुणेऽवादेशे च- **लवित्रमिति** । "धूगट् कम्पने" "धूत् विधूनने" "धूगश् कम्पने" "धूगण् कम्पने" इत्यनेको धूधातुः, तत्र तौदादिकस्यात्र ग्रहणमित्याह-**धुवत्यनेन- धुवित्रमिति** । स्वादेरपि ग्रहणमिति मतान्तरमाह- **धूनोतेरपि कश्चित्- धवित्रमिति**- अत्र धूनोत्यनेनेति वाक्यम् । "षूङौक् प्राणिगर्भविमोचने" "षूङौच् प्राणिप्रसवे" "षूत् प्रेरणे" इत्यनेकधा सूधातुः, तत्रापि तौदादिकस्यैवात्र ग्रहणमित्याह- **सुवत्यनेन- सवित्रमिति** । तौदादिकस्यैवात्र ग्रहणे प्रमाणं दर्शयति- **निरनुबन्धनिर्देशात् धूग्-सूङोर्न भवतीति**- *निरनुबन्धग्रहणे न सानुबन्धकस्य* इति न्यायेनेति भावः । रूपस्य समान-

त्वेऽप्यर्थभेदार्थमित्थं निर्देशः । "खनूग् अवदारणे" खनत्यनेनेति- **खनित्रम्** । "चर भक्षणे च" चकाराद् गतौ, चरत्यनेनेति- **चरित्रम्** । "षहि मर्षणे" सहतेऽनेनेति- **सहित्रम्** । "ॠ प्रापणे च" चकाराद् गतौ, "ॠक् गतौ" ॠच्छति इयर्ति वाऽनेनेति- **अरित्रम्** । मतान्तरमाह- **वहेरपि कश्चित्- वहित्रमिति-** वहत्यनेनेति वाक्यम् ॥ ५. २. ८७. ॥

## नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट् । ५. २. ८८. ॥

**त० प्र०- एभ्यः सत्यर्थे वर्तमानेभ्यः करणे त्रट् प्रत्ययो भवति । नयत्यनेन- नेत्रम् । दांव्, दान्त्यनेन- दात्रम् । शसू- शस्त्रम् । यु- योत्रम् । युज्- योक्त्रम् । स्तु- स्तोत्रम् । तुद्- तोत्त्रम् । सि- सेत्रम् । सिच्- सेक्त्रम् । मिह्- मेढ्रम् । पत्- पत्त्रम् । पा- पात्रम्, पात्री । नह्- नद्ध्रः, नद्ध्री । टकारो ङ्यर्थः ॥८८॥**

**श० म० न्यासानुसन्धानम्- नी०** । "णींग् प्रापणे" नयन्त्यनेनेति त्रटि गुणे- **नेत्रम्** । "दांवक् लवने" दान्त्यनेनेति- **दात्रम्** । "शसू हिंसायाम्" शसत्यनेनेति- **शस्त्रम्**, "स्ताद्यशितोऽत्रोणादेरिट्" [ ४. ४. ३२. ] इत्यत्र त्रवर्जनादिडभावः । "शंसू स्तुतौ च" चकाराद्धिसायाम्, अस्य "चि-मिदि०" [ उणा० ४४५. ] इति किति त्रे नलोपे च- शस्त्रं स्तोत्रमायुधं च । "युजिच् समाधौ" "युजूंपी योगे" युज्यतेऽनेनेति- **योक्त्रम्** । "तुदींत् व्यथने" तुदत्यनेनेति- **तोत्त्रम्** । "षिग्ंश् बन्धने" सिनुतेऽनेनेति- **सेत्रम्** । "षिचींत् क्षरणे" सिञ्चत्यनेनेति- **सेक्त्रम्** । "पां पाने" "पांक् रक्षणे" पिबति पाति वाऽनेनेति- **पात्रम्**, टित्त्वात् स्त्रियां ङ्यां- **पात्री** । "णहींच् बन्धने" नह्यत्यनेनेति त्रटि "नहाहोर्धतौ" [ २. १. ८५. ] इति हस्य धकारे "अधश्चतु०" [ २. १. ७९. ] इति तकारस्य धकारे- **नध्रः**, स्त्रियां- **नध्री** । टकारस्य प्रयोगेऽश्रूयमाणतया तत्प्रयोजनमाह- **टकारो ङ्यर्थः** इति ॥ ५. २. ८८. ॥

## हल-क्रोडाऽऽस्ये पुवः । ५. २. ८९. ॥

**त० प्र०- आस्यं मुखम् । पुवो धातोः सत्यर्थे हलास्ये क्रोडास्ये च करणे त्रट् प्रत्ययो भवति । पुनाति पवते वाऽनेन- पोत्रम्, हलस्य सूकरस्य च मुखमुच्यते ॥८९॥**

**श० म० न्यासानुसन्धानम्- हल०** । "पूङ् पवने" "पूग्श् पवने" पूयतेऽनेनेति- **पोत्रम्** । अनेन किमुच्यत इत्याह- **हलस्य सूकरस्य च मुखमुच्यते** इति- नात्र योगार्थमात्रघटनेति भावः ॥ ५. २. ८९. ॥

## दंशेस्त्रः । ५. २. ९०. ॥

**त० प्र०- दंशेः सत्यर्थे वर्तमानात् करणे त्रः प्रत्ययो भवति । दशत्यनया- दंष्ट्रा । प्रत्ययान्तरकरणमाबर्थम् ॥९०॥**

**श० म० न्यासानुसन्धानम्- दंशे०** । "दंशं दशने" दशनं दन्तकर्म, दशति अनया इति त्रे "यज-सृज०" [ २. १. ८७. ] इति शस्य षे तद्योगे तकारस्य टे स्त्रियामापि- **दंष्ट्रा** । पूर्वतस्त्रटः क्रमानुवृत्तेः सत्त्वेऽपि प्रत्ययान्तरकरणं किमर्थमित्याशङ्कायामाह- **प्रत्ययान्तरकरणमाबर्थम्**इति- पूर्वस्मिन्ननुवृत्ते तद्विधाने टित्त्वात् ङीः स्यादित्यर्थः । पाणिनीये च न प्रत्ययान्तरं क्रियते, किन्तु अजादिगणे दंष्ट्राशब्दस्य पाठः क्रियत इत्याब् भवतीति । स्वमते च गणपाठापेक्षया प्रत्ययान्तरकरणस्यैव लाघवमादृतमिति ॥ ५. २. ९०. ॥

## धात्री । ५. २. ९१. ॥

**त० प्र०- ट्धेर्दधातेर्वा कर्मणि त्रट् प्रत्ययो निपात्यते । धयन्ति तामिति- धात्री स्तनदायिनी । दधति तां भैषज्यार्थमिति- धात्री आमलकी ॥९१॥**

**श० म० न्यासानुसन्धानम्- धात्री** । "नी-दाव्०" इति सूत्र एव धाशब्दपाठेनैव "ट्धें पाने" "डुधांग्क् धारणे च" इति धयति-दधात्योर्ग्रहणसम्भवे धात्रीत्यस्य सिद्धौ किमर्थं निपातनाश्रयणमित्याशङ्कायामुत्तरगर्भं विग्रहमाह- **धयन्ति तामि**ति, अयं भावः- पूर्वत्र पाठे करणार्थकत्वं स्यान्न तु कर्मार्थकत्वमिति निपातनमाश्रितमिति ॥ ५. २. ९१. ॥

## ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः । ५. २. ९२. ॥

**त० प्र०- ज्ञानार्थेभ्य इच्छार्थेभ्योऽर्चा पूजा तदर्थेभ्यो**

ञीद्भ्यः शील्यादिभ्यश्च धातुभ्यः सत्यर्थे वर्तमानेभ्यः क्तः प्रत्ययो भवति । पूर्ववच्चास्य कर्तृ-कर्माद्यर्थनिर्देशः । ज्ञानार्थ– राज्ञां ज्ञ तः, राज्ञां बुद्धः, राज्ञां विदितः, राज्ञामवगतः। इच्छार्थ–राज्ञामिष्टः, राज्ञां मतः। अर्चार्थ– राज्ञामर्चितः, राज्ञां पूजितः। ञीत्– ञिमिदा– मिन्नः, क्ष्विण्णः, स्विन्नः, धृष्टः, तूर्णः, सुप्तः, भीतः, इद्धः, तृषितः, फुल्लः। शील्यादि—

शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट उद्यतः।
संयतः शयितस्तुष्टो रुष्टो रुषित आशितः ॥१॥
कान्तोऽभिव्याहृतो हृष्टस्तृप्तः सृप्तः स्थितो भृतः।
अमृतो मुदितः पूर्तः शक्तोऽक्तः श्रान्त-विस्मितौ ॥२॥
संरब्धाऽऽरब्ध-दयिता दिग्धः स्निग्धोऽवतीर्णकः।
आरूढो मूढ आयस्तः क्षुधित-क्लान्त-व्रीडिताः ॥३॥
मत्तश्चैव तथा क्रुद्धः श्लिष्टः सुहित इत्यपि।
लिप्त-दृप्तौ च विज्ञेयौ सति लग्नादयस्तथा ॥४॥

बहुलाधिकाराद् यथाभिधानमेभ्यो भूतेऽपि क्तो भवति, तथा च तद्योगे तृतीयासमासोऽपि सिद्धः– "अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः" इति, एवं–शीलितो मैत्रेण, रक्षितो मैत्रेणाऽऽक्रुष्टश्चैत्रेणेत्यादावपि द्रष्टव्यम्। वर्तमानक्ते तु षष्ठ्येव– "कान्तो हरिश्चन्द्र इव प्रजानाम्" इति। अन्ये तु– ज्ञानाद्यर्थेभ्यः *तक्रकौण्डिन्य*न्यायेन भूते क्तस्य बाधनात् वर्तमानक्तेन च योगे कर्तरि षष्ठीविधानात् 'त्वया ज्ञातो मया ज्ञातः' इत्यादिरपशब्द इति मन्यन्ते ॥९२॥

---

श० म० न्यासानुसन्धानम्– ज्ञाने०। अत्र सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यः कर्तरि क्तः प्रयुज्यत इति कथं लभ्यमिति चेत्? अत्राह–**पूर्ववच्चास्य कर्तृ-कर्माद्यर्थनिर्देशः** इति–एतद्विषये न किमपि विशेषतो विधेयमपि त्वस्मिन्नध्याये प्रथमपादादौ यथा यस्माद् धातोर्यः प्रत्ययो यत्रार्थे विहितस्तत्रैव स्यात्, केवलं भूतार्थविषयत्वमेव न स्वीकर्तव्यमिति वर्तमानकालमात्रस्यैवात्र विशेषतो विधेयत्वमित्याशयः। यथोद्देशन्यायेन पूर्वं ज्ञानार्थादुदाहर्तुमाह– **ज्ञानार्थे**ति। "ज्ञांश् अवबोधने" अतः सकर्मकत्वात् कर्मणि क्तेऽनेन वर्तमानकालतायां– **राज्ञां ज्ञातः** इति– "क्तयोरसदाधारे" [ २. २. ९१. ] इत्यत्र वर्तमानकालवर्जनान्न षष्ठीनिषेध इति "कर्तरि" [ २. २. ८६. ] इति षष्ठ्यां राज्ञामिति, अनुस्वारेत्त्वादिडभावे च– ज्ञात इति, राजभिर्ज्ञायमान इति तदर्थः। "बुधिच् ज्ञाने" अविवक्षितकर्मकत्वेन "गत्यर्थाकर्मकपिबभुजेः" [ ५. १. ११. ] इति कर्तरि क्तेऽनेन वर्तमानकालतायां– बुद्धः, सकर्मकत्वे तु– **राज्ञां बुद्धः** इति– "क्तयोरसदाधारे' [ २. ३. ९१. ] इत्यत्र वर्तमानकालवर्जनान्न षष्ठीनिषेध इति "कर्तरि" [२. २. ८६.] इति षष्ठ्यां– राज्ञामिति, अनुस्वारेत्त्वादिडभावे 'अधश्चतुर्थात् तथोर्धः" [२. १. ७९.] इति तकारस्य धकारे– बुद्ध इति, राज्ञा ज्ञायमान इति तदर्थः, एवमग्रेऽपि। "विदक् ज्ञाने" **राज्ञां विदितः**। अवपूर्वो "गम्लृं गतौ" गत्यर्थाश्च ज्ञानार्था इत्याह– **राज्ञामवगतः** इति– "यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति" [ ४.२.५५. ] इति गमेर्मलोपे–अवगतः। इच्छार्थादुदाहर्तुमाह–**इच्छार्थे**ति। "इषत् इच्छायाम्" **राज्ञामिष्टः** इति– "सहलुभेच्छ०" [४.४.४६.] इति वेट्त्वात् "वेटोऽपतः" [४.४.६२.] इति क्ते परे इडभावे षकारयोगे तकारस्य टकारे–इष्ट इति, राजभिरिष्यमाण इत्यर्थः। मनेरपीच्छार्थपर्यवसानादाह– **राज्ञां मतः** इति– "मनिच् ज्ञाने" अतः क्ते मलोपे–मत इति। अर्चार्थादुदाहर्तुमवतारयति– **अर्चार्थे**ति। "अर्च पूजायाम्" इति भ्वादिः, "अर्चिण पूजायाम्" इति चुरादिः, आभ्यां क्ते इटि– **राज्ञामर्चितः** इति– तत्र यदा चुरादिस्तदा 'णेरनिटि" [ ४. ३. ८३. ] इति णिलोपः। "पूजण् पूजायाम्" **राज्ञां पूजितः** इति– राजभिः पूज्यमान इत्यर्थः। सर्वत्र "ज्ञानेच्छार्चार्थाधारक्तेन" [ ३. १. ८६. ] इति समासाभावः। ञीत उदाहर्तुमाह– **ञीत्** इति– ञि इत् यस्य स तथा। "ञिमिदांङ् स्नेहने" "ञिमिदाच स्नेहने" स्नेहनं स्नेहयोगः, "आदितः" [ ४. ४. ७१. ] इतीट्प्रतिषेधे "रदादमूर्छमदः०" [४. २. ६९.] इति क्तस्य धातुदस्य च नकारे– **मिन्नः**। एवं "ञिक्ष्विदाङ् मोचने च" "ञिक्ष्विदाच् मोचने च" चकारात् स्नेहने, आभ्यां क्ते–**क्ष्विण्णः** इति–अत्र प्रथमनकारस्य णत्वे तद्योगे द्वितीयनकारस्य "तवर्गस्य०" [ १. ३. ६०. ] इति णत्वं विज्ञेयम्। "ञिष्विदाङ् मोचने च" चकारात् स्नेहने, अतः क्ते– **स्विन्नः** इति– अत्र "षः सो०" [ २. ३. ९८.] इति षस्य सः। "ञिधृषाट् प्रागल्भ्ये" अस्य– **धृष्टः**। "ञित्वरिष् संभ्रमे" सम्भ्रमोऽत्राशुकारिता, अतः

क्ते "श्वस-जप-वम-रुष-त्वर०" [ ४. ४. ७५. ] इति वा नेटि- **त्वरितः**, पक्षे "मव्यवि०" [४. १. १०६.] इति वस्योपान्त्येन सहोटि- तूर्णः। "ञिष्वपंक् शये" अनुस्वारेत्त्वादिडभावे- **सुप्तः**। "ञिभीक् भये" **भीतः**। "ञिइन्धैपि दीप्तौ" अतः क्ते उपान्त्यलोपे ऐदित्त्वात् "डीयश्व्यैदितः [ ४. ४. ६१. ] इति इट्प्रतिषेधे च- **इद्धः**। "ञितृषच् पिपासायाम्" **तृषितः**। "ञिफला विशरणे" अतोऽनेन वर्तमाने क्ते "अनुपसर्गाः क्षीबोल्ल०" [ ४. २. ८०. ] इति निपातनात्- **फुल्लः**।

शील्यादिभ्य उदाहर्तुमवतारयति- **शील्यादीति**। शीलितादीन् कारिकाभिः संगृह्णाति-"**शीलितो रक्षितः क्षान्तः**" इति। "शील समाधौ" समाधिरैकाग्र्यम्, "शीलण् उपधारणे" उपधारणमभ्यासः परिचयो वा, अतः क्ते-**शीलितः**। "रक्ष पालने" **रक्षितः**। "क्षमौषि सहने" "क्षमौच् सहने" अतः क्ते वेट्त्वादिडभावे "अहन्पञ्चमस्य०" [ ४. १. १०७. ] इति दीर्घे "म्नां०" [ १. ३. ३९. ] इति मस्य नकारे- **क्षान्तः**। "क्रुशं आह्वानरोदनयोः" आङ्पूर्वादतः क्ते शस्य षत्वे तकारस्य टत्वे च- **आक्रुष्टः**। "जुषैति प्रीति-सेवनयोः" अतः क्ते इडभावे तकारस्य टत्वे- **जुष्टः**। "यमूं उपरमे" उत्पूर्वादतः क्तेऽनुस्वारेत्त्वादिडभावे "यमि-रमि०" [ ४. २. ५५. ] इति मलोपे च-**उद्यतः**, एवं सम्पूर्वस्य-**संयतः**। "शीङ्क् स्वप्ने" अतः क्ते **इटि** "न डीङ्-शीङ्०" [ ४. ३. २७. ] इति कित्त्वप्रतिषेधाद् गुणे च- **शयितः**। "तुषंच् तुष्टौ" अनुस्वारेत्त्वादिडभावे- **तुष्टः**। "रुषच् रोषे" "श्वस-जप०" [ ४ ४. ७५. ] इति वेटि- **रुष्टः**, रुषितः। "अशश् भोजने" "भावे चाशिताद्०" [ ५. १. १३०. ] इति निर्देशात् कर्तरि क्ते दीर्घे च, आङ्पूर्वादविवक्षितकर्मणो वा क्ते- **आशितः**- तृप्तः॥ "कमूङ् कान्तौ" कान्तिरिच्छा, अतः क्ते "वेटोऽपतः" [ ४. ४. ६२. ] इति नित्यमिडभावे उपान्त्यदीर्घे मस्य नकारे- **कान्तः**। "हृंग् हरणे" अतः 'अभि-वि-आङ्'पूर्वाद् क्ते- **अभिव्याहृतः**, केवलात् तु- **हृतः**। "तृपौच् प्रीतौ" प्रीतिः सौहित्यम्, वेट्त्वादिडभावे- **तृप्तः**। "सृप्लृं गतौ" **सृप्तः**। "ष्ठा गतिनिवृत्तौ" अतः क्तेऽनुस्वारेत्त्वादिडभावे "दोसोमास्थ इः" [ ४. ४. ११. ] इतीत्वे च- **स्थितः**। "भृंग् भरणे" "डुडुभृंग्क् पोषणे च" चकाराद् धारणे; अत क्ते- **भृतः**। "मृंत् प्राणत्यागे" नञ्पूर्वादतः क्ते- **अमृतः**। "मुदि हर्षे" अकर्मकोऽयम्, अतः क्ते- **मुदितः**। "पृश् पालनपूरणयोः" अतः क्ते "ॠवर्ण०" [ ४. ४. ५७. ] इतीडभावे "ॠल्वादे०" [ ४, २. ६८. ] इत्यत्र प्रो वर्जनात् तकारस्य नत्वाभावे "ओष्ठ्यादुर्" [ ४. ४. ११७. ] इत्युरादेशे "म्वादेर्नामिनो०" [ २. १. ६३. ] इति दीर्घे च- **पूर्तः**। "शकींच् मर्षणे" मर्षणं क्षमा, "शक्लृंट् शक्तौ"- **शक्तः**। "अञ्चूग् गतौ च" चकारात् पूजायाम्, ऊदित्त्वात् क्त्वायां वेट्त्वेन नित्यमिडभावे "अञ्चोऽनर्चायाम्" [ ४. २. ४६. ] इति नलोपे "चजः कगम्" [ २. १. ८६. ] इति चस्य कत्वे-**अक्तः**, अर्चायां तु "लुभ्यञ्चे०" [ ४. ४. ४४. ] इति नित्यमिटि- अञ्चिता अस्य गुरवः। "श्रमूच् खेद-तपसोः" अतः क्ते ऊदित्त्वेन क्त्वि वेट्त्वात् नित्यमिडभावे उपान्त्यदीर्घे मस्य ने- **श्रान्तः**। "ष्मिङ् ईषद्धसने" विपूर्वादतः क्ते- **विस्मितः**॥ "रभि राभस्ये" राभस्यं कार्योपक्रमः, अतः क्ते-ऽनुस्वारेत्त्वादिडभावे "अधश्चतुर्थात्०" [२. १. ७९.] इति तकारस्य धे "तृतीयस्तृतीयचतुर्थे" [ १. ३. ४९. ] इति भस्य बे, सम्पूर्वस्य- **संरब्धः**, आङ्पूर्वस्य च- **आरब्धः**। "दयि दान-गति-हिंसा-दहनेषु च" चकाराद् रक्षणे, अतः क्ते- **दयितः**। "दिहींक् लेपे" अतः क्तेऽनुस्वारेत्त्वादिडभावे "भ्वादेर्दादेर्घः" [२. १. ८३.] इति हस्य घे तकारस्य धे घस्य च गे- **दिग्धः**। "ष्णिहौच् प्रीतौ" अतः क्ते वेट्त्वादिडभावे "मुह-द्रुह०" [२. १. ८४.] इति हस्य घे- **स्निग्धः**। 'तृ प्लवनतरणयोः" प्लवनं मज्जनम्, तरणमुल्लङ्घनम्, अतः क्ते "ॠवर्ण०" [ ४. ४. ५७. ] इतीटः प्रतिषेधे "ॠतां क्ङितीर्" [ ४. ४. ११६. ] इतीरादेशे "म्वादेर्नामिनो०" [ २. १. ६३. ] इति दीर्घे पादपूरणार्थं स्वार्थिके के च- **अवतीर्णकः**। "रुहं जन्मनि" आङ्पूर्वादतः "श्लिषशीङ्०" [ ५. १. ९. ] इति सकर्मकादपि कर्तरि वा क्तेऽनुस्वारेत्त्वादिडभावे 'हो धुट्-पदान्ते" [२. १. ८२.] इति हस्य ढे तकारस्य धे तस्य ढयोगे ढे "ढस्तड्ढे" [ १. ३. ४२. ] इति पूर्वढलोपे दीर्घे च- **आरूढः**। "मुहौच् वैचित्ये वैचित्यमविवेकः, अतः क्ते औदित्त्वेन वेट्त्वादिडभावे हस्य ढे तकारस्य धे तस्य ढे पूर्वढलोपे दीर्घे च- **मूढः**। "यसूच् प्रयत्ने" अतः क्ते ऊदित्त्वेन

क्त्वि वेट्त्वादिडभावे आङः परत्वे–**आयस्तः**। "क्षुधंच् बुभुक्षायाम्" अतः क्ते "क्षुधवसस्तेषाम्" [४. ४. ४३.] इतीटि–**क्षुधितः**। "क्लमूच् ग्लानौ" अतः क्त ऊदित्त्वेन क्त्वि वेट्त्वादिडभावे उपान्त्यदीर्घे मस्यं ने–**क्लान्तः**।"व्रीडच् लज्जायाम्" **व्रीडितः**॥ "मदैच् हर्षे" अतः क्ते ऐदित्त्वादिडभावे "रदादमूर्च्छमदः" [४. २. ६९] इत्यत्र मदेर्वर्जनान्नत्वाभावे–**मत्तः**। "क्रुधच् कोपे" अतः क्तेऽनुस्वारेत्त्वादिडभावे तकारस्य धे पूर्वधस्य दे–**क्रुद्धः**। "श्लिषू दाहे" वेट्त्वादिडभावे तकारस्य टे–**श्लिष्टः**, यद्वा "श्लिषंच् आलिङ्गने" "गत्यर्थाकर्मक०" [५. १. ११.] इति इति वा,अतः कर्तरि क्ते–श्लिष्टो मैत्रः,साप्यादपि"श्लिषशीङ्०" [५. १. ९.] इति वा कर्तरि क्ते–**आश्लिष्टो** मैत्रः, पक्षे कर्मणि क्ते–आश्लिष्टा कन्या। "डुधांग्क् धारणे च" चकाराद् दाने, सुपूर्वादतः क्ते "धागः" [४. ४. १५.] इति 'हि' इत्यादेशे–**सुहितः**। "लीपीत् उपदेहे" उपदेहो वृद्धिः, **लिप्तः**। "दृपौच् हर्ष-मोहनयोः" वेट्त्वादिडभावे–**दृप्तः**। "ओलजैङ् ओलस्जैति व्रीडे" उभयोरप्यैदित्त्वादिडभावः, ओदित्त्वाच्च "सूयत्याद्योदितः" [४. २. ७०.] इति क्तस्य नत्वं च, नस्य "क्तादेशोऽषि" [२. १. ६१.] इति असत्त्वबुद्धया "चजः कगम् [२. १. ८६. ] इति जस्य गत्वं च, द्वितीयस्य च "संयोगस्यादौ स्कोर्लुक्" [२. १. ८८.] इति सकारलोपः, एवं चोभयोरपि क्ते–**लग्नः**। "लगे सङ्गे" अतः क्ते "क्षुब्ध-विरिब्ध-०" [ ४. ४. ७०. ] इति क्ते निपातनात्–**लग्नः** सक्तः, लगितोऽन्यः॥

पाणिनीये भाष्ये तु–

"शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि।
रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि॥१॥
हृष्ट-पुष्टौ तथा कान्तस्तथोभौ संयतोद्यतौ।
कष्टं भविष्यतीत्याहुरमृताः पूर्ववत् स्मृताः॥" इति

एतावन्त एव परिगणिताः। तत्र 'अमृताः' इति पृथगुक्तेन बहुवचनेनान्येषामपि संग्रह इति नवीनाः। किञ्च सर्वेषां वर्तमानार्थत्वेऽपि कष्टमित्यस्य कषिष्यतीति भविष्यति निपातनमिति विशेषः॥

अत्र वर्तमानकालविहितेन क्तेन भूतकालभावी क्तो बाधिष्यते तक्रकौण्डिन्यन्यायात्, तथाहि– 'सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतां, तक्रं कौण्डिन्याय' इति वाक्ये ब्राह्मणत्वेन प्राप्तं दधिदानं तक्रदानेन कौण्डिन्ये बाध्यते, तथा सामान्यतः प्राप्तो भूते क्तो वर्तमानकालविहितेन क्तेन बाध्यत इति भूतार्थे पूजितादिप्रयोगो न स्यादित्याशङ्कायामाह– **बहुलाधिकाराद् यथाभिधानमेभ्यो भूतेऽपि क्तो भवतीति**– न सर्वेभ्यो भूते प्रत्ययो विधेय एवापि तु येभ्यो भूते शिष्टप्रयोग उपलभ्येत तेभ्य एवेत्युक्तं–यथाभिधानमिति। भूते विहितस्य क्तस्य न केवलं भूतकालावगतिरेव फलं किन्त्वन्यदप्यस्तीत्याह– **तथा च तद्योगे तृतीयासमासोऽपि सिद्धः** इति, अयमाशयः– भूते क्ते सति "कर्तरि" [ २. २. ८६. ] इति प्राप्तायाः षष्ठ्याः "क्तयोरसदाधारे" [ २. २. ९१. ] इति निषेधो भवतीति "हेतु-कर्तृ-करणेत्थम्भूतलक्षणे" [ २. २. ४४. ] इति सामान्यसूत्रेण कर्तरि तृतीयान्तत्वे "कारकं कृता" [ ३. १. ६८. ] इति तृतीयासमासः सिध्यतीति। एतादृशतृतीयासमासप्रयोगः क्वापि दृष्टः? ओमित्याह–**अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः**" इति– अर्हद्भ्यः– तीर्थंकरेभ्यः, नम इति सम्बन्धः, कीदृशेभ्य? त्रिभुवनराजपूजितेभ्यः– त्रयाणां भुवनानां समाहारः– त्रिभुवनम्, त्रिभुवनस्य राजानः– त्रिभुवनराजाः, त्रिभुवनराजैः पूजिता इति तृतीयासमासे– त्रिभुवनराजपूजिताः, तेभ्यस्तथेत्यर्थः। न केवलमिहैवेदमपि त्वन्यत्रापीत्याह– **एवं– 'शीलितो मैत्रेण, रक्षितो मैत्रेण, आक्रुष्टश्चैत्रेण' इत्यादावपि द्रष्टव्यमि**ति–एषु भूते क्तः, तृतीया, तृतीयासमासश्च भवतीति विज्ञेयमिति। ननु वर्तमाने क्तेऽपि कर्तुः कर्तृत्वमव्याहतमेवेति सामान्यशास्त्रेण तृतीया भविष्यत्येवेति चेत्? अत्राह–**वर्तमानक्ते तु षष्ठ्येवे**ति 'क्तयोरसदाधारे" [ २. ५. ९१.] इत्यत्र वर्तमानवर्जनात् षष्ठीनिषेधाभावे "कर्तरि" [२. २. ८६.] इति विशेषविहिता षष्ठ्येव भवति, न सामान्यशास्त्रविहिता तृतीया, "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्" इति वचनप्रामाण्यात्। उक्तार्थं प्राचां प्रयोगेण द्रढयति–"**कान्तो हरिश्चन्द्र इव प्रजानाम्**" इति–अत्र वर्तमानक्तान्तकान्तस्य कर्तरि प्रजानामित्यत्र षष्ठ्येव। ननु भवतु नाम षष्ठी, समासे सति च सा लुप्ता भविष्यति, तथा च कर्तृत्वावगतिः स्यादेवेति चेत्? न–तत्र समास एव न भवति "ज्ञानेच्छाऽर्चार्थाऽऽधारक्तेन" [३. १. ८६.] इति वर्तमानक्तान्तेन सह समासनिषेधात्। इह न केवलं क्त एव विधेयोऽपि तु

वर्तमानकालविशिष्टः क्तः, विशेष्ये च स्थिता विधेयता विशेष्यपारतन्त्र्याद् विशेषणे कालेऽपि स्थितैवेति तस्यापि विधेयत्वमेवेति तक्रकौण्डिन्यन्यायः प्रवर्तयिष्यत एवेति निरङ्कुशानां मतमाह-**अन्ये तु ज्ञानाद्यर्थेभ्य** इत्यादि, एवं च त्वया ज्ञातो, राज्ञा पूजित इत्यादिप्रयोगः कथमिति चेत्? अत्राह-'**त्वया ज्ञातो, मया ज्ञातः' इत्यादिरपशब्द** इति-न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्तनीयमिति भाष्यादिसिद्धान्तेन लक्षणप्रतिकूलाः प्रयोगा अपशब्दा एवेति तदाशयः। वस्तुतस्तु तादृशानां प्रयोगाणां प्रामाणिकैरपि प्रयुक्तत्वेन तदर्थं बाहुलकमाश्रयणीयमेव, तादृशलक्ष्याणां साधुत्वानुशासनार्थेवास्यानुशासनस्य प्रवृत्तत्वादिति तत्त्वम् ॥ ५. २. ९२ ॥

## उणादयः । ५. २. ९३ ॥

**त० प्र०-बहुलमिति वर्तते, सत्यर्थे वर्तमानाद् धातोरुणादयः प्रत्यया बहुलं भवन्ति। करोतीति-कारुः, वायुः, पायुः। बहुलवचनात् प्रायः संज्ञाशब्दाः, केचित्त्वसंज्ञाशब्दा इति अनुक्ता अपि प्रत्यया भवन्ति। ऋफिडः, ऋफिड्डः। तथा सति विहिता उणादयः क्वचिद् भूतेऽपि दृश्यन्ते-भसितं तदिति भस्म, कषितोऽसौ-कषिः, ततोऽसौ-तनिः वृत्तं तदिति-वर्त्म, चरितं तदिति-चर्म, अद्भ्यः सरन्ति स्म-अप्सरसः। उक्तं च-**

**"संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।**
**कार्यानुबन्धोपपदं विज्ञातव्यमुणादिषु ॥१॥"**
**तथा-**
**"बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम् ।**
**कार्यसशेषविधेश्च तदूह्यं नैगम-रूढिभवं हि सुसाधु ॥२॥**
**नाम च धातुजमाह निरुक्ते**
**व्याकरणे शकटस्य च तोकम् ।**
**यन्न पदार्थविशेषसमुत्थं**
**प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥३॥ इति ॥९३॥**

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ पञ्चमस्याध्यायस्य द्वितीयः पादः ॥

अकृत्वाऽऽसननिर्बन्धमभित्त्वा पावनीं गतिम् ।
**सिद्धराजः परपुरप्रवेशवशितां ययौ ॥ १८ ॥**

**श० म० न्यासानुसन्धानम्-उणा०**। उणादीनां प्रकृतितोऽर्थतः प्रत्ययतश्च विशिष्य शासनस्य सत्त्वेऽप्यसंभाव्यत्वात् तदुपायमाह- **बहुलमिति वर्तते** इति- "लांक् आदाने" बहून् अर्थात् लातीति "आतो डोऽह्वा-वा-मः" [ ५. १. ७६. ] इति डे-बहुलमिति। बहवः पुनरर्थाः क्वचित् प्रवृत्त्यादयः, तथा चोक्तम्-

"क्वचित् प्रवृत्तिः, क्वचिदप्रवृत्तिः, क्वचिद् विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य, चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥" इति ।

"डुकृंग् करणे" **करोतीति-कारुः,** निरनुबन्धग्रहणे सामान्यग्रहणात् "कृंग्ट् हिंसायाम्" इत्यस्यापि कृणोतीति वा-**कारुः** कारी नापितादिरिन्द्रश्च। "वांक् गतिगन्धनयोः" "वैं ओवैं शोषणे" वा, वाति वायति वा द्रव्याणीति- **वायुः**- नभस्वान्, "आत ऐः०" [ ४. ३. ५३. ] इत्यैकारे आयादेशो ज्ञेयः। "पां पाने" पिबन्त्यनेन तैलादि द्रव्यमिति- **पायुः**- अपानमुपस्थश्च, पाति-पायत्योरर्थासंगतेर्न ग्रहणम्। बहुलमित्यस्य फलमाह-**बहुलवचनात् प्रायः संज्ञाशब्दाः** इति- अत्र प्रकरणे [उणादिषु] बाहुल्येन संज्ञाशब्दा एव व्युत्पादिता इति, प्रायोग्रहणं विशदयति- **केचित् त्वसंज्ञाशब्दा इती**ति, ततः किमित्याह-**अनुक्ता अपि प्रत्यया भवन्ती**ति, केचन [पूर्वमनुक्ताः संज्ञाशब्दसदृशाश्च] यौगिका अपि शब्दा इह व्युत्पादयिष्यन्ते, तथा च तेषां व्युत्पादनायेह प्रत्यया उक्तास्ते तु स्युरेव, केचनानुक्ता अपि प्रयोगमनुसृत्य बोध्या इति भावः। तदाह- **ऋफिडः, ऋफिड्डः** इति- अर्तेः फिड-फिड्डावौणादिकौ प्रत्ययावनुक्ता अपि ज्ञातव्याविताशयः। न केवलमनुक्ताः प्रत्यया एव ज्ञेया अपि त्वर्थोऽप्यनुक्तोऽनुसर्तव्य इत्याह- **तथा, सति विहिता उणादयः क्वचिद् भूतेऽपि दृश्यन्ते** इति- सति- वर्तमानकाले, विहिता अपि, क्वचिद्- शिष्टप्रयोगे भूतेऽपि दृश्यन्त इत्यर्थः। तदाह-**भसितं तदिति-भस्मे**ति-"भस भर्त्सनदीप्त्योः" इति सौत्रो धातुः, भसितं तदिति भस्म क्लीबलिङ्गः "मन्" [ उणा० ९११. ] इति मन्, भस्म भूतिः। "कष हिंसायाम्" **कषितोऽसाविति- कषिः**- निकषोपलः काष्ठमश्मकर्णः खनित्रं च, "कृ-शृ०" [उणा०

६१६. ] इति इप्रत्ययः । "तनूयी विस्तारे" **ततोऽसाविति तनिः**, औणादिक इप्रत्ययः । "वृतूङ् वर्तने" **वृत्तं तदिति– वर्त्म,** औणादिको मन् प्रत्ययः, वर्त्म पन्थाः । "चर भक्षणे च" **चरितं तदिति– चर्म** औणादिको मन्प्रत्ययः, चर्म– अजिनम् । "सृं गतौ" **अद्भ्यः सरन्ति स्मेति–अप्सरसो** देवगणिकाः, औणादिकोऽस् प्रत्ययः, समुद्रमन्थनेन ततोऽप्सरसः सम्भूता इत्यैतिह्यम् । एवं च भस्मादिषु वर्तमानकालविहितोऽप्यौणादिकप्रत्ययो भूतेऽपि बहुलवचनाद् भवतीति भावः ।

प्रकृतिप्रत्ययादिकल्पनाविषये प्राचां वाचं दर्शयितुमाह– **उक्तं चेति**, **संज्ञासु** इति– य एते निरूढाः साधुत्वेन शब्दास्तेष्वेव संज्ञातः कल्पना कर्तव्या नान्यत्र; न सर्वत्र कल्पना कर्तव्या किन्तु साधुत्वेनाभिमतासु संज्ञासु [ प्रसिद्धसंज्ञाशब्देषु ] इति भावः । **धातुरूपाणीति**– कल्पितव्यानीति शेषः । **प्रत्ययाश्च ततः परे** इति– कल्पयितव्या इति शेषः । **कार्यानुबन्धोपपदमिति**– कार्यम् 'ऋफिड' प्रभृतिषु गुणाभावादिकम्, अनुबन्धः ककारादिः, एवम्– उपपदं **विज्ञातव्यम्** अनुमातव्यम्, क ? **उणादिषु** इति, अयमाशयः– उणादिषु साधुप्रयोग दृष्ट्वा तदनुरूपप्रकृति-प्रत्यय-कार्याऽनुबन्धोपपदानां कल्पना विधेयेति ॥ अत्र भाष्यादिषु "कार्याद् विद्यादनुबन्धमेतच्छास्त्रमुणादिषु" इत्येवमुत्तरार्धं दृश्यते, तदर्थश्चायम्– कार्याद्–गुणाभावादिकाद् विद्यात्–जानीयात् अनुबन्धं –ककारादिकम्, एतद् अनन्तरोक्तं शास्त्रम्, उणादिषु, शास्त्रोपनिबन्धनत्वाच्छास्त्रविषयत्वाद् वा शास्त्रमित्युक्तम् ॥

बाहुलकस्यौचित्यं दर्शयति– **बाहुलकं प्रकृतेस्तनुदृष्टे:०** इत्यादिना, बहुलस्य भावो बाहुलकम्, बहुलशब्दस्य चोरादिगणपाठात् "चोरादेः" [ ७. १. ७३. ] इत्यकञ् प्रत्ययः, बह्वर्थादानं च बहुलशब्दस्य प्रवृत्तिनिमित्तमिति तत्रायं भावप्रत्ययः । **तद्** बाहुलकं **प्रकृतेस्तनुदृष्टेरूह्यम्,** प्रत्ययमनादि कृत्वा यः पूर्वमुपादीयते सा प्रकृतिरित्युच्यते, प्रत्ययात् पूर्वं क्रियते प्रकृतिः, प्रकर्षेण नियमेन प्रत्ययः क्रियते तस्या इति वा प्रकृतिः, प्रकृतेरिति जातौ षष्ठ्येकवचनम् । **तनुदृष्टेरिति**– "गम्ययपः कर्माधारे" [ २. २. ७४. ] इति कर्मणि पञ्चमी, तनुदृष्टिं वीक्ष्य बाहुलकमूह्यमिति, "गुणादस्त्रियां नवा" [ २. २. ७४. ] इत्यनेन त्विह पञ्चमी न भवति, अस्त्रियामिति प्रतिषेधात् । अथवा "गुणान्नवा" इति योगविभागादिह पञ्चमी वेदितव्या । तनुशब्दः शरीरवचनोऽप्यस्ति, गुणवचनोऽपि, इह तु गुणवचनः, प्रकृतेरल्पत्वं नाम यो गुणस्तस्य वाचकः । दर्शनं दृष्टिरुपलब्धिः, तनोर्गुणस्य दृष्टिस्तनुदृष्टिः, ततो गुणो नित्यं गुणिनमपेक्षत इति गमकत्वात् तनुशब्दस्य प्रकृतिमपेक्षमाणस्यापि दृष्टिशब्देन समासो भवति । अयं त्वर्थः– प्रकृतेर्गुणस्य, तयोर्दर्शनादिति । अथवा तनुर्दृष्टिर्यस्याः प्रकृतेः सा तनुदृष्टिः, अत्र पक्षे यद्यपि तनुगुणो दृष्टेर्विशेषणं तथाप्यसौ दृष्टेः प्रकृतेरपि विशेषणत्वेन प्रतीयत एव, प्रकृतेस्तनुत्वादेव हि तद्दृष्टितनुत्वं भवति । उणादिषु स्वल्पाः प्रकृतयो दृश्यन्ते, ततोऽन्याभ्योऽपि प्रकृतिभ्यः प्रत्यया दृश्यन्ते, तस्माद् बहुलग्रहणाद् भवन्ति । यथाहि– "हृषि-वृति०" [ उणा० ४८५. ] इति "हृषच् तुष्टौ" "हृषू अलीके" वा, इत्यस्माद् उल उक्तस्तथा "शकुङ् शङ्कायाम्" इत्यतोऽपि भवति– शङ्कुलेति, मतान्तरापेक्षयेदं, तन्मते उलविधायके शङ्केरग्रहणात्, स्वमते तु शङ्केस्तत्र ग्रहणात् वल्गुलादिकमुदाहरणमादिपदेन सूचितं ज्ञेयम् । किञ्च **प्रायसमुच्चयनादपि तेषां** तदूह्यमिति सम्बन्धः, तदिति बाहुलकं परामृश्यते, तेषामुणादीनां प्रायेण बाहुल्येन समुच्चयनं ग्रहणं विधानं वा प्रायसमुच्चयनम् "तृतीया" [ ३. १. ६५. ] इति योगविभागात् समासः । अपिशब्दः समुच्चये, न केवलं प्रकृतेस्तनुदृष्टेस्तदूह्यमपि तु प्रायसमुच्चयनादपि तेषाम्, एतदुक्तं भवति–न केवलं प्रकृतयस्तन्व्यः पठिता अपि तु प्रत्यया अपि प्रायेण समुच्चिताः, न सर्वे, तदर्थं बाहुलकमिति । तथाहि– "ऋ-कृ-वृ-धृ-दारिभ्य उणः" [ उणा० १९६. ] इत्यत्र 'ऋ' धातुः पठितः, फिड-फिड्डौ तु प्रत्ययौ न विहितौ, तथापि ऋफिड-ऋफिड्डशब्दयोर्दर्शनात् तावपि विधीयेते । **कार्यसशेषविधेश्च तदूह्यमिति**– चशब्दः समुच्चये, पूर्वोक्तकारणद्वयात् एतस्मात् तद् बाहुलकमूह्यम्, विधानं विधिः करणम्, सह शेषेण वर्तते यो विधिः स सशेषः, सशेषश्चासौ विधिश्च सशेषविधिः, कार्याणां सशेषविधिः कार्यसशेषविधिः, तस्माच्च बाहुलकमूह्यम् । एतदुक्तं भवति– प्रकृतेः प्रत्ययाश्रितानि कार्याणि न निःशेषाणि उणादिप्रकरणे दर्शितानि, इष्यन्ते चादर्शितान्यपि तानि, अतस्तत्सिद्ध्यर्थं तद् बाहु–

लकमुक्तम्, तेन 'ऋफिड ऋफिड्ड' इत्यत्र गुणप्रतिषेधः सिद्धो भवति, मतान्तरापेक्षयेदम, स्वमते तु प्रत्ययस्य कित्त्वकरणादेव गुणाभावः, तथा च स्वमते "बिलत् भेदने" अतो "बलि–बिलि०" [उणा० ८१.] इत्याहकप्रत्यये–बिलाहको वज्रः, अत्र बाहुलकात् गुणाभावः । एवमादि तावत् प्रत्ययाश्रितं कार्यं सिद्धं भवति । "षन भक्तौ" अतः "शमि-षणिभ्यां ढे–षण्ढो नपुंसकम्, अत्र 'षः स०" [ २. ३. ९८. ] इति षस्य सो बाहुलकान्न भवति, सत्यपि वा सत्वे पुनः षत्वमेव क्रियत इत्येवमादि प्रकृत्याश्रितमपि कार्यं बाहुलकाद् भवति । **नैगमरूढिभवं हि सुसाधु** इति–निगमः– छन्दः, आम्नाय इति लघुन्यासकारः, निगमे भवा नैगमाः, निगमस्य वा इमे नैगमाः, रूढिः प्रसिद्धिः, भवन्तीति भवाः, रूढौ भवा रूढिभवाः "सप्तमी" [३. १. ८८.] इति योगविभागात् समासः, लोकप्रसिद्धा इत्यर्थः । नैगमाश्च रूढिभवाश्च नैगमरूढिभवम्, समाहारविवक्षयैकत्वं क्लीबत्वं च । हिशब्दो यस्मादर्थे, यस्मादेतदेव बाहुलकमनेकार्थस्य साधकं तस्मात् नैगमरूढिभवं सुष्ठु साधु भवति, व्याकरणे बहुलग्रहणेन संस्कृतत्वात्, अन्यथाऽसंस्कृतत्वाद् गाव्यादिशब्दानामिव तस्यासाधुत्वं स्यात् ॥

अन्यैरपि प्रमाणपुरुषैर्नैगमरूढिभवानां व्युत्पाद्यत्वमभ्युपेतमिति दर्शयितुमाह– **नाम च धातुजमाहे**त्यादि, **निरुक्ते** इति– निरुक्ते शास्त्रे, **नामे**ति– "अधातुविभक्तिवाक्यमर्थवन्नाम" [ सिद्धहेम० १. १. १७. ] इति परिभाषितम्, यस्य पाणिनीये प्रातिपदिकसंज्ञा, धातोर्जातत्वात् **धातुजम्**, धातुग्रहणमुपलक्षणं तेन प्रत्ययादयोऽपि गृह्यन्ते, निरुक्तकारः स्वशास्त्रे निरुक्ते नाम धातुजमाह, धातुप्रत्ययादिविभागेन व्युत्पादितत्वात्, चशब्दोऽवधारणे भिन्नक्रमश्च, धातुजमेवेत्येवं द्रष्टव्यम् । न केवलं निरुक्तकार एवेहापि तु– **व्याकरणे शकटस्य च तोक**मिति, तोकशब्दोऽपत्यपर्यायः, व्याकरणेऽपि यः शकटस्य पुत्रः शाकटायनः सोऽपि नाम धातुजमेवाह, तदेवं निरुक्तकारशाकटायनदर्शनेन त्रयी शब्दानां प्रवृत्तिः– जातिशब्दा गुणशब्दाः क्रियाशब्दा इति, न सन्ति यदृच्छाशब्दा इति । अथवा जातिगुणशब्दानामपि क्रियाशब्दत्वमेव धातुजत्वात्, ततश्चैकैव शब्दानां प्रवृत्तिः– क्रियाशब्दा इति । अथ यदि प्रकृतिविशेषं प्रत्ययविशेषं चोपादाय न व्युत्पादितं शब्दरूपं तस्य कथं धातुजत्वं वेदितव्यम् ? नहि प्रकृतिप्रत्ययानवधारणे धातुजत्वं शक्यं निश्चेतुमत आह– **यत्र पदार्थविशेषसमुत्थमि**ति, अर्थशब्दः प्रयोजनवाची, पदमर्थः प्रयोजनं यस्य प्रकृत्यादेः स पदार्थः, कथं पुनः पदमर्थः प्रकृत्यादेर्भवति ? तदुद्दिश्य तदुपादानात्, पदं हि व्युत्पादयिष्यामीत्येवमर्थं प्रकृत्यादेरुपादानम्, कस्मात् ? प्रकृतिप्रत्ययश्च पदार्थः, तस्य विशेषः पदार्थविशेषः, समुत्थानं समुत्थः प्रादुर्भावः, भावे प्रत्ययः । पदार्थविशेषात् समुत्थः प्रादुर्भावो यस्य तत् पदार्थविशेषसमुत्थम्, यदेवंविधं न भवति शब्दरूपं **प्रत्ययतः प्रकृतेश्च तदूह्यमि**ति, धातुजत्वेनापि तदुक्तं भवति, यस्य प्रतिपदोक्तप्रकृतिप्रत्ययविशेषानासादितात्मा निर्वृत्तिस्तस्य प्रकृतिविशेषात् प्रत्ययविशेषाच्च धातुजत्वं निश्चेतव्यमिति । ननु च तथाविधस्य प्रकृतिप्रत्ययविशेषस्यापरिज्ञानादेवाशक्यं धातुजत्वं निश्चेतुमिति मत्वा परेण चोदितम्, तत् कथं प्रत्ययतः प्रकृतेश्च तदूह्यमित्युक्तं युज्यते ? नैष दोषः– एवं हि ब्रुवताऽनेन प्रकृतिप्रत्ययावेवं तावद्धि ऊहितव्यौ, ततस्ताभ्यां तच्छब्दरूपमित्येतदप्यर्थादुक्तं भवति, नह्यनवधारिताभ्यां प्रकृतिप्रत्ययाभ्यां शक्यं धातुजत्वं कस्यचिन्निश्चेतुमिति किमत्रायुक्तम् ? यत्र प्रसिद्धप्रत्ययावयवेन शब्दान्तरेण कस्यचिद् भागस्य सारूप्याधिगमोऽस्ति तत्र प्रत्ययं दृष्ट्वा परिशिष्टो भागः प्रकृतित्वेनोत्प्रेक्षितव्यः, यथा– "कमि-प्रु-गार्ऽतिभ्यस्थ" [ उणा० २२५. ] इति थप्रत्ययान्तं कन्थादिकं प्रसिद्धप्रत्ययावयवम्, तेन च डित्थडवित्थशब्दयोः किञ्चित् सारूप्यमस्ति, तथैषामिव हि तेषां थशब्दोऽवयवो विशिष्टदेशवर्ती विद्यते । तत्र तत्र थप्रत्ययान्ते शब्दरूपे यो दृष्टस्थशब्दः प्रत्ययसंज्ञकस्तत्सादृश्यात् डित्थडवित्थशब्दस्थं थशब्दमवधार्य ततः परिशिष्टस्तयोर्भागो 'डित् डवित्' इति च धातुत्वेनोह्यः । ततश्चैवं सूत्रं कर्तव्यं "डीङस्थो डित् डविच्च" इति, "डीङ् विहायसां गतौ" इत्यस्मात् थप्रत्ययः, डीङश्च 'डित्' 'डवित्' इत्येतावादेशौ भवतः । यत्र तु शब्दरूपे निर्ज्ञातधात्ववयवेन शब्दान्तरेण किञ्चिद्भागगतं सारूप्यमस्ति तत्र प्रकृतिं दृष्ट्वा परिशिष्टो भागः प्रत्ययत्वेनोहितव्यः, यथा ऋतमिति दृष्टं शब्दरूपं प्रसिद्धप्रकृत्यवयवम्, तेन ऋफिडशब्दस्य ऋफिड्डशब्दस्य च किञ्चिद्भागगतं सारूप्यमस्ति, उभयेषां तेषामृकारादित्वात् । तत्र क्तप्रत्ययान्ते

ऋतशब्दे य ऋकारावयवो धातुसंज्ञकस्तत्साहश्याद् ऋफिड-ऋफिड्डशब्दस्थं च ऋवर्णं धातुमवधार्य ततः परिशिष्टस्तयोर्भागः फिड इति फिड्ड इति च प्रत्ययत्वेनोह्यः, ततश्चैवं सूत्रं कर्तव्यम् "अर्तेः फिडफिड्डौ" इति, "ऋ क् गतौ" इत्यस्मात् फिड-फिड्डौ प्रत्ययौ भवतः, ऋफिडः, ऋफिड्डः, गुणः पूर्वोक्तकारणान्न भवति, अथवा कितावेवैतौ प्रत्ययौ विधातव्यौ । एवं प्रकृति-प्रत्ययावूहित्वा तस्य शब्दरूपस्य धातुजत्वमूहितव्यम् । यत् प्रकृतिप्रत्ययविशेषावयवानुगतं न तद् धातुजत्वं व्यभिचरति, यथा– कर्तव्यं करणीयमित्येवमादयः शब्दाः ॥ ५. २. ९३. ॥

इति श्रीकलिकालसर्वज्ञ–**श्रीहेमचन्द्रसूरि**भगवद्विरचिते
स्वोपज्ञतत्त्वप्रकाशिकाप्रकाशे **शब्दमहार्णवन्यासे**
त्रुटितस्थले तपोगच्छाधिपति–सूरिसम्राट्–**श्रीविजयनेमि**सूरीश्वरपट्टालङ्कार–कविरत्न–शास्त्रविशारद–व्याकरणवाचस्पति–**श्रीविजयलावण्यसूरि**निर्मितानुसन्धानेन पूर्णतां नीते पञ्चमाध्यायस्य **द्वितीयः पादः समाप्तः** ॥

अनुसन्धायकस्य व्याख्या—

**आसननिर्बन्धम्** आसनस्य– राजनीतिप्रसिद्धदुर्गाश्रयणरूपस्य योगशास्त्रप्रसिद्धपद्माद्याकारोपवेशनप्रक्रियाविशेषस्य च, निर्बन्धम्– आग्रहं साधनं वा, **अकृत्वा** अविधाय, **पावनीं** पवित्रामथ च योगशास्त्रप्रसिद्धां शरीरस्थवायुसम्बन्धिनीम्, **गतिम्** आचारं क्रियां वा, **अभित्वा** अनुच्छिद्य अनिगृह्य वा, **सिद्धराजः** तन्नामको राजा, अथ योगिराजः, **परपुरप्रवेशवशितां** परेषां-शत्रूणां, पुराणि– नगराणि, तेषु प्रवेशस्य– अन्तर्गमनस्य, वशितां– पाटवम्, किञ्च परपुरेषु शरीरान्तरेषु, यः प्रवेशः– स्वप्राणादिसंचारणं तस्य वशितां– साधकत्वं, **ययौ** प्राप्तवान् । अयमाशयः– योगी कश्चित् योगशास्त्रप्रसिद्धानि आसनानि सुचिरं बद्ध्वा प्राणायामैः शरीरवायोः स्वच्छन्दगमनं भित्त्वा च शरीरान्तरप्रवेशरूपं कार्यं साधयति, अयं च सिद्धराज आसननिर्बन्धादिकमकृत्वैव, परपुर[शत्रुनगर]प्रवेशवशितां प्राप्तवानिति राजा-[योगिराजा]न्तरापेक्षयास्य वैलक्षण्यमिति व्यतिरेकालङ्कारध्वनिः ॥१८॥

॥ अर्हं ॥

# ॥ अथ तृतीयपादः ॥

## वर्त्स्यति गम्यादिः । ५. ३. १. ॥

**त० प्र०–गम्यादयः शब्दा वर्त्स्यति–भविष्यति धात्वर्थे इन्नादिप्रत्ययान्ताः साधवो भवन्ति, अनेन सामान्यतः सिद्धानां प्रत्ययानां भविष्यद्धात्वर्थता विधीयते । गमिष्यतीति–गमी ग्रामम्, इन्नौणादिकः सति प्राप्तो वर्त्स्यति भवति । आगामी, भावी, प्रस्थायी, एभ्य औणादिको णिन् । प्रयायी, प्रतियायी, प्रबोधी, प्रतिबोधी प्रतिरोधी, एभ्योऽजातेः शील आवश्यके वा णिन् सिद्धो भविष्यति नियम्यते । कथं श्वो ग्रामं गमी ? भविष्यत्सामान्ये पदं निष्पाद्य पश्चाच्छ्वःशब्देन योगः कार्यः ॥१॥**

**श० म० न्यासानुसन्धानम्–वर्त्स्यति०** । "गमेरिन्" [उणा० ९१८.] इत्यादिना 'गमिन्'प्रभृतीनां साधुत्वस्य वक्ष्यमाणत्वेन सूत्रमिदं किमर्थमित्याशङ्कायामाह–**अनेन सामान्यतः सिद्धानां प्रत्ययानां भविष्यद्धात्वर्थता विधीयते** इति, अयमाशयः– यद्यप्युणादिषु 'सति' इत्यस्यानुवृत्तिरिति वर्तमानरूपे कालविशेषे तेषां सिद्धिर्न तु सामान्यतः सिद्धिस्तथापि बहुलग्रहणेन सति विहितानामन्यस्मिन्नपि काले विधानमित्यर्थस्य पूर्वमुक्तत्वेन उणादिप्रत्ययानां सामान्येनैव विधानमिति सिद्धम् । तथा च यत्र विशेषतः कालविशेषस्य बोधोऽभिलषितस्तत्र विधानमावश्यकमेव, अन्यत्र च यथाप्रयोगं व्यवस्थेति मनसि निधाय सूत्रमिदमारब्धमिति । किञ्च गम्यादिषु न केवलमौणादिका एव प्रत्यया विधीयन्तेऽपि तु "अजातेः शीले" [ ५. १. १५४. ] इत्यादिना विहिता अपि । तथा च क्वचित् कालान्तरे प्राप्तस्य भविष्यति विधानार्थं, सामान्यतः प्राप्तस्य च तदर्थे विधानार्थमित्येकः पक्षः; सामान्यतः प्राप्तस्य भविष्यत्यपि प्राप्तत्वमेवेति प्राप्ते सति विधिर्नियमार्थ इत्यपरः पक्ष इति पक्षद्वयं सम्भवति, तत्र सारासारविचारे पर एव पक्षः श्रेयानिति प्रतिभाति । "गम्लृं गतौ" गमिष्यतीति "गमेरिन्" [ ९१९. ] इत्यौणादिके इनि–**गमी ग्राममि**ति– जिगमिषुरित्यर्थः । नन्वनेन सिद्ध एवेति किमर्थमत्र पाठ इति चेत् ?

अत्राह– **इन् औणादिकः सति प्राप्तो वर्त्स्यति भव तीति**– "उणादयः०" [ ५. २. ९३. ] इत्यत्र सतीत्यनुवर्तनात् सति प्राप्तत्वम्, विशेषविधानेनानेन भविष्यति भवतीत्यर्थः। तथा च पाठः सार्थकः। आगमिष्यतीति– **आगामी,** प्रोषितादिः। "आङश्च णित्" [ उणा० ६२०. ] इति णित् इन् प्रत्ययः। भविष्यतीति–**भावी** कर्मविपाकादिः, "भुवो वा" [ उणा० ६२२. ] इति वा णित् इन्। प्रस्थास्यते इति– **प्रस्थायी** गन्तुमनाः, "प्रात् स्थः" [उणा० ६२४.] इति णित् इन्। स्वयं प्रत्ययमाह– **एष्य औणादिको णिन्** इति। "अजातेः शीले" [५. १. १५४.] इत्यत्र 'अजातेः' इति प्रसज्यप्रतिषेधादसत्त्ववाचिनोऽप्युपसर्गाद् भवतीति प्रयास्यति प्रतियास्यति प्रबोधिष्यति प्रतिबोधिष्यति प्रतिरोत्स्यतीत्येवंशील इति णिनि– **प्रस्थायी, प्रतियायी, प्रबोधी, प्रतिबोधी प्रतिरोधी**ति, अथवा अवश्यं प्रयास्यतीत्याद्यर्थे णिनि तथा। नन्वनेन किं प्रत्ययोऽपि विधीयत इत्याशङ्कायामाह–**एष्य** इत्यादि, शीलार्थे "अजातेः शीले" [ ५. २. १५४. ] इत्यनेन, आवश्यकार्थे च "णिन् चावश्यकाधमर्ण्ये" [ ५. ४. ३६. ] इत्यनेन च णिन् सिद्ध एव, तस्य कालसामान्ये विधानादनेन भविष्यति नियम्यते स्थाप्यत इति भावः। "प्रप्रतेर्याबुधिभ्याम्" [ उणा० ६२३. ] इति णिनि– प्रयास्यतीति–**प्रयायी**, प्रतियास्यतीति–**प्रतियायी**, प्रभोत्स्यते इति–**प्रबोधी,** प्रतिभोत्स्यते इति– **प्रतिबोधी** बालादिः, इत्यौणादिकानामप्यत्र पाठः। ननु भविष्यति विहितोऽयं प्रत्ययः सामान्ये भविष्यति स्यात्, अनद्यतने न स्यादिति तत्र श्वस्तन्यैव भवितव्यमिति तत्र नायं प्रत्यय इति श्वो गमीति प्रयोगः कथं साधुरिति चेत् ? अत्राह– **भविष्यत्सामान्ये पदं निष्पाद्य पश्चाच्छ्वः शब्देन योगः कार्यः** इति– पूर्वमनद्यतनविवक्षामनादृत्य गमीति भविष्यति साधु कृत्वा पश्चाच्छ्वःशब्दयोगेन तन्महिम्नाऽनद्यतनकालः प्रतीयत इति नानुपपत्तिः ॥५.३.१॥

## वा हेतुसिद्धौ क्तः । ५. ३. २. ॥

**त० प्र०– हेतुः–कारणं तस्य सिद्धिः–निष्पत्तिः, वर्त्स्यत्यर्थे वर्तमानाद् धातोर्धात्वर्थे हेतोः सिद्धौ सत्यां क्तः प्रत्ययो वा भवति। किं ब्रवीषि वृष्टो देवः संपन्नास्तर्हि शालयः संपत्स्यन्त इति वा, प्राप्ता नौस्तीर्णा तर्हि नदी तरिष्यत इति वा ॥ २ ॥**

**श० म० न्यासानुसन्धानम्– वा०।** वाक्यार्थं ग्राहयितुं पदार्थमाह– **हेतुः कारणं तस्य सिद्धिरिति**। एवमपि न स्फुटतया प्रतीतिः, यत् कस्य हेतोः सिद्धिरपेक्षितेति, तदपि स्फोरयति–**धात्वर्थे हेतोरिति**– यस्माद् धातोः प्रत्ययोऽयं चिकीर्षितस्तद्धात्वर्थे–तस्य निष्पत्तौ यो हेतुस्तस्य निष्पत्तिरिहापेक्षितेति भावः। **किं ब्रवीषि वृष्टो देवः सम्पन्नास्तर्हि शालयः** इति– अत्र सम्पूर्वात् "पदिच् गतौ" इत्यतः प्रत्ययश्चिकीर्षित इति तदर्थभूतायाः [ शालि ] निष्पत्तेर्हेतुर्वर्षणं तस्य सिद्धिर्वृषः क्तप्रत्ययेनोक्तैवेति भवति सम्पूर्वात् पदेः क्तप्रत्ययोऽनेन, अनुस्वारेत्त्वादिडभावे क्तस्य धातुदस्य च "रदादमूर्छमदः" [ ४. २. ६९. ] इति नादेशे– **सम्पन्ना** इति। अस्य वैकल्पिकत्वात् पक्षे भविष्यन्त्यपि भवतीत्याह– **सम्पत्स्यन्त इति वेति। प्राप्ता नौस्तीर्णा तर्हि नदी**ति– अत्रापि पारगमनरूपधात्वर्थस्य निष्पत्तौ हेतुभूता नौः, हेतुभूतं वा तदागमनं सिद्धमिति हेतुसिद्धिः स्पष्टेति, "तॄ प्लवनतरणयोः" अतः क्ते "ऋवर्णं०" [४. ४. ५७.] इतीटो निषेधे "ऋल्वादे०" [ ४. २. ६८. ] इति क्तस्य नादेशे "क्तादेशोऽषि" [२. १. ६१.] इति तस्यासत्त्वे "ॠतां क्ङितीर्" [ ४. ४. ११६. ] इतीरादेशे "भ्वादेर्नामि०" [ २. १. ६३. ] इति दीर्घे "रषृवर्णा०" [ २. ३. ६३. ] इति नस्य णत्वे स्त्रियामापि च– **तीर्णा**। पक्षे भविष्यन्तीत्याह– **तरिष्यते इति वेति** ॥ ५. ३. २. ॥

## कषोऽनिटः । ५. ३. ३. ॥

**त० प्र०–कषेः कृच्छ्र-गहनयोरनिट्त्वमुक्तम्, तस्माद् वर्त्स्यति वर्तमानात् क्तो भवति। कषिष्यतीति-'कष्टम्, कष्टा दिशस्तमसा। सत्यपि कश्चित्, कषति– कष्टम्। अनिट इति किम् ? कषिताः शत्रवः शूरेण ॥ ३ ॥**

**श० म० न्यासानुसन्धानम्– कषो०।** "कष हिंसायाम्" अस्यानुस्वारेत्त्वाभावेऽपि "कषः कृच्छ्र-गहने" [ ४. ४. ६७. ] इति क्तयोरनिट्त्वमुक्तम्, तदेव स्मारयति– **कृच्छ्र गहनयोरनिट्त्वमुक्तमिति**। कृच्छ्रं दुःखम्, गहनं दुष्प्रवेशम्। कषिष्यतीति क्ते "तवर्गस्य०" [ १. ३. ६०. ] इति तस्य टे– **कष्टमिति**– कृच्छ्रं गहनं वा। गहनार्थे प्रयोगमाह– **कष्टा दिशस्तमसेति**– गहनेत्यर्थः। मतान्तरमाह– **सत्यपि कश्चिदिति**, तन्मते–

**कषतीति कष्टमिति**, अयमाशयः– पाणिनीये शीलितादिकारिकामध्ये शील्यादीनां वर्तमान एव क्तप्रत्ययान्ततया निपातितत्वेनानुशिष्टत्वेन वा तन्मध्यपतितः कष्टशब्दोऽपि वर्तमानक्तान्त एवोचित इति वादिनो मतमिदम्, "कष्टं भविष्यतीत्याहुः" इति भाष्यग्रन्थे 'आहुः' इति कथनेनान्येषां मतमिदं न तु स्वमतमित्यस्वरस उद्भावित इति तदाशयः। पदकृत्यं पृच्छति– **अनिट इति किमिति**, उत्तरयति–**कषिताः शत्रवः शूरेणेति**– अत्र कषेः कृच्छ्रगहनयोर्न प्रयोगोऽपि तु निर्मूलनेऽतस्तस्यानिट्त्वं नेति न भविष्यति क्तोऽपि तु भूत एव, अनिट इत्यस्याभावे तु भविष्यत्येव कषेः क्तप्रत्ययः स्यान्न तु भूते, तथा चायं प्रयोगो न स्यात्। अत्र कैश्चिद् द्व्यङ्गवैकल्यमूहितम्, तथाहि– नात्रानिट्त्वं न च भविष्यदर्थ इति न केवलमनिट्त्वाभावप्रयुक्ताऽप्रवृत्तिरत्र भवति किन्तु भविष्यत्त्वाभावादपीति नेदमनिट इत्यस्य प्रत्युदाहरणं भवितुमर्हतीति तेषामाशयः। तत्रेदमुच्यते– यदि तक्रकौण्डिन्यन्यायमाश्रित्य भविष्यति विहितस्य क्तस्य वर्तमानार्थविहितक्तप्रत्ययबाधकत्वमाश्रीयते तर्हि अत्रानिट्त्वाभावमात्रस्य सत्त्वेऽपि 'अनिटः' इत्यस्याभावे भविष्यति क्तः प्रत्ययः केन व्यावर्तिष्यते, न भूतार्थेन तस्य बाध्यमानत्वात्। पूजितादिप्रयोगे च भविष्यति विहितेन क्तेन भूतार्थस्योक्तन्यायेन बाधमाशङ्क्यैव हि बाहुलकमाश्रितम्, तद्धि अगतिकगतिः, सा च लक्ष्यसाधनाय शास्त्रत्रुटिपरिमार्जिका, न तु शास्त्रे त्रुटिसम्पादिकेति नात्र द्व्यङ्गविकलता। अतश्चानिट इति विशेषणे सत्येव वत्स्यतीति प्रवर्तते नान्यथेति समाधानमपि नावश्यकम्, न च युक्तिसहमिति प्रतिभाति। विशेषश्च विभावनीयः सुधीभिरिति ॥ ५. ३. ३. ॥

## भविष्यन्ती ॥ ५. ३. ४. ॥

**त० प्र०–वत्स्यत्यर्थे वर्तमानाद् धातोः परा भविष्यन्ती विभक्तिर्भवति। गमिष्यति, भोक्ष्यते ॥ ४ ॥**

**श० म० न्यासानुसन्धानम्–भविष्यन्ती**। "गम्लृं गतौ" अस्यानुस्वरित्त्वेऽपि "गमोऽनात्मने" [ ४. ४. ५१. ] इतीट्– **गमिष्यतीति**। "भुजंप् पालनाभ्यवहारयोः" अभ्यवहारो भोजनम्। त्राणादन्यत्र "भुनजोऽत्राणे" [ ३. ३. ३७. ] इत्यात्मनेपदे– **भोक्ष्यते** इति– अत्र "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इति गुणः "चजः कगम्" [ २. १. ८६. ] इति जस्य गः, तस्य "अघोषे प्रथमो०" [ १. ३. ५०. ] इति कः "नाम्यन्तस्था०" [ २. ३. १५. ] इति सस्य षः ॥ ५. ३. ४. ॥

## अनद्यतने श्वस्तनी ॥ ५. ३. ५. ॥

**त० प्र०– न विद्यतेऽद्यतनो यत्र तस्मिन् वत्स्यति धात्वर्थे वर्तमानाद् धातोः श्वस्तनी विभक्तिर्भवति। कर्ता श्वः, कर्ता। अनद्यतन इति बहुव्रीहिः किम्? व्यामिश्रे भविष्यन्ती मा भूत्-अद्य श्वो वा गमिष्यति। कथं श्वो भविष्यति? मासेन गमिष्यति? पदार्थे भविष्यन्ती पश्चात् श्वःशब्देन योगः ॥ ५ ॥**

**श० म० न्यासानुसन्धानम्–अनद्य०**। समासान्तर्गतस्य नञो भेदबोधकत्वस्य दृष्टतयाऽनद्यतनशब्दस्याद्यतनभिन्ने भविष्यतीत्यर्थः स्यात्, स चानिष्ट इति पर्युदासमनादृत्याप्यप्रसज्यप्रतिषेधपरत्वमाह– **न विद्यतेऽद्यतनकालो यत्रेति**, एवं चाद्यतनभिन्ने सत्यप्यद्यतनसत्तायां न भवति, निषेधस्य बलीयस्त्वेनेत्यग्रे स्फोरयिष्यति। उदाहरति– **कर्ता श्वः, कर्ता** इति–"डुकृंग् करणे" अतः श्वस्तनीताप्रत्ययेऽनुस्वारेत्त्वादिडभावे गुणे च–कर्ता, अनन्तरागामिदिनवाचकेन श्वसा योगेऽयोगे वा श्वस्तनी भवतीति ज्ञापनार्थमुदाहरणद्वयं दत्तमुभयत्रानद्यतनभविष्यदर्थविवक्षासद्भावात्। आगामिन्या रात्रेः पूर्वार्धादिग्रिमः कालः श्वःशब्दवाच्यः, स एव चानद्यतनपदार्थः, तत्र हि कालेऽद्यतनकालो नास्तीति भावः। न चाद्यतनेऽप्यद्यतनो नास्तीति बहुव्रीह्याश्रयणेऽद्यतनेऽपि भविष्यति श्वस्तनी कुतो नेति वाच्यम्, षष्टिघटिकात्मकः कालस्तदवयवाश्च प्रत्येकमद्यतनशब्दवाच्या इत्यद्यतनेऽप्यद्यतनसत्त्वेन बहुव्रीह्याश्रयणे दोषाभावात्। पूर्वोक्तबहुव्रीहिमाक्षिपति– **अनद्यतन इति बहुव्रीहिः किमिति**– समानाधिकरणेन नञ्समासेनैव पर्युदास एवाश्रयणीयो लाघवात्, बहुव्रीहावन्यपदार्थप्राधान्ये गौरवस्य सत्त्वादिति शङ्कार्थः। उत्तरयति–**व्यामिश्रे मा भूदिति**–अद्यतनानद्यतनयोरेकत्र समावेशो व्यामिश्रं तत्र मा भूदिति भावः। क्वेत्याह–**अद्य श्वो वा गमिष्यतीति**– अत्र हि निश्चयाभावेनाद्यतनोऽनद्यतनो वा कालो भवतेरधिकरणमिति निश्चयस्य वक्तुमशक्यतयाऽनद्यतनस्य निश्चेतुमशक्यत्वान्न भवति श्वस्तनी,

अद्यतनस्यापि सत्त्वात्, बहुव्रीहिनिर्देशाभावे चाद्यतनस्य तत्र सत्त्वेऽप्यनद्यतनस्यापि सत्त्वात् भविष्यति श्वस्तनीति भावः। **कथं श्वो भविष्यतीति**– सर्वथाऽनद्यतनस्य सत्त्वेन श्वस्तन्यैव भवितव्यमिति प्रश्नः। उत्तरयति– **पदार्थे भविष्यन्ती पश्चाच्छ्वःशब्देन योगः** इति– पदस्य साधुत्वार्थं पूर्वं भविष्यन्तीमाश्रित्य भविष्यतीति समाप्य पश्चात् श्वःशब्दयोगः, तन्महिम्नाऽनद्यतनार्थप्रतीतिर्नाख्यातमहिम्नेत्युत्तरार्थः। इदमत्राकूतम्– संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसम्बन्धो भवतीति भाष्योक्तिमनुरुध्य पदसंस्कारपक्षमाश्रित्य भविष्यतीति प्रयोगे साधिते,तेन च श्वःशब्दस्य योगेऽपि साधारण्येनैव भविष्यदर्थो बोध्यते न त्वनद्यतनत्वेन, अनद्यतनार्थस्य श्वःशब्देनैव प्रतिपादनीयत्वादनन्यलभ्यस्यैव शब्दार्थतान्यायात्। न च तर्हि श्वो भवितेत्यादौ श्वःशब्दप्रयोगो वृथेति वाच्यम्, श्वःशब्देन ह्यद्यतनाव्यवहितोत्तरषष्टिघटिकात्मकः कालः प्रतिपाद्यते, न त्वनद्यतनत्वेन; श्वस्तन्या च न स कालः प्रतिपाद्यतेऽपि त्वद्यतनभिन्नो महाकाल एवेति तयोरेकार्थत्वाभावात्। एवं **'मासेन गमिष्यती**त्यत्रापि पश्चादेव मासशब्दयोगो बोध्यः, तेनापि च त्रिंशद्दिनात्मक एव कालः प्रतिपाद्यते न त्वनद्यतनत्वविशिष्टः, अनद्यतनत्वेनानद्यतने प्रतिपादनीये एव श्वस्तन्याः प्रसर इति नात्र तदवसर इति संकलितोऽर्थः। तथा चेदृशाः प्रयोगा व्याख्याता इति ॥ ५. ३. ५. ॥

## परिदेवने । ५. ३. ६. ॥

**त० प्र०– परिदेवनमनुशोचनम्, तस्मिन् गम्यमाने वर्त्स्यति धात्वर्थे वर्तमानाद् धातोः श्वस्तनी विभक्तिर्भवति। अनद्यतनार्थ आरम्भः। इयं नु कदा गन्ता यैवं पादौ निदधाति, अयं नु कदाऽध्येता य एवमनभियुक्तः। विशेषविधानात् कदा-कर्हिलक्षणा विभाषा बाध्यते ॥६॥**

**श० म० न्यासानुसन्धानम्– परि०**। परिदेवनस्य रोदनार्थतया प्रतीतस्यार्थान्तरमाह-**परिदेवनमनुशोचनमिति**– अनु– पश्चात्, शोचनं– तद्विषयकदुःखप्रकटनमित्यर्थः। अनद्यतनग्रहणस्यानुवृत्तौ सूत्रस्य वैयर्थ्यं तत्र पूर्वसूत्रेणैव सिद्धेरित्याशङ्क्याह–**अनद्यतनार्थ आरम्भः** इति– भविष्यत्सामान्यस्य विवक्षायां पूर्वेण श्वस्तन्या अप्राप्तौ सूत्रमिदमिति भावः। **इयं नु कदा गन्ता यैवं पादौ निदधाती**ति-या एवमतिविलम्बितं पादौ निदधाति सा प्राप्तव्यं स्थानं कदा गमिष्यतीति चिन्ता, द्रुतं पादनिक्षेपे हि समये गन्तव्यस्थानप्राप्तिः सम्भवति, न विलम्बितेनेति तस्याः स्थानप्राप्तिरनिश्चितेति भावः। "गम्लृ गतौ" अतः श्वस्तनीताप्रत्ययेऽनुस्वारेत्त्वादिड्भावे "म्नां०" [ ५. ३. ८. ] इति मस्य नकारे– **गन्तेति**। **अयं नु कदाऽध्येता य एवमनभियुक्तः** इति– य एवमत्यन्तमनभियुक्तोऽभ्यासरहितः स कदाऽध्येता स्वपाठं परिशीलयिष्यतीति चिन्ता, "इङ्क् अध्ययने" नित्यमधिपूर्वोऽयम्, अतः श्वस्तनीताप्रत्ययेऽनुस्वारेत्त्वादिड्भावे गुणे यादेशे च–**अध्येता**। एवं चात्राद्य श्वो वा गमिष्यति. अद्य श्वो वाऽध्येष्यत इति निश्चयाभावेनानद्यतननिश्चयाभावान्न पूर्वेण सिद्धिरिति सूत्रमिदमावश्यकमिति। अत्र कदाशब्दस्य प्रयोगसत्त्वेन "कदा-कर्ह्योर्नवा" [ ५. ३. ९. ] इति पाक्षिकी वर्तमाना कुतो नेत्याशङ्कायामाह– **विशेषविधानात् कदा-कर्हिलक्षणा विभाषा बाध्यते** इति– "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्" इति न्यायेन सामान्यतः कदाकर्हियोगे भविष्यति विधीयमाना पाक्षिकी वर्तमाना, केवलं परिदेवनार्थे विशिष्य विधीयमानया श्वस्तन्या बाध्यत इति भावः। तथा चात्र केवलं श्वस्तन्येव भविष्यति, न तु वर्तमाना-श्वस्तनी-भविष्यन्त्यस्तिस्र इति तत्त्वमिति ॥ ५. ३. ६. ॥

## पुरा-यावतोर्वर्तमाना । ५. ३. ७. ॥

**त० प्र०–पुरा-यावतोर्निपातयोरुपपदयोर्वर्त्स्यति धात्वर्थे वर्तमानाद् धातोर्वर्तमाना विभक्तिर्भवति। पुरा भुङ्क्ते, यावद् भुङ्क्ते। भविष्यदनद्यतनेऽपि परत्वाद् वर्तमानैव–पुरा श्वो भुङ्क्ते, यावच्छ्वो व्रजति। लाक्षणिकत्वादिह न भवति– महत्या पुरा जेष्यति ग्रामम्, यावद् दास्यते तावद् भोक्ष्यते, यत्परिमाणमित्यर्थः ॥७॥**

**श० म० न्यासानुसन्धानम्– पुरा०**। 'पुरा भूतभविष्यत्परीप्साचिरंतनेषु' इति स्वरादिपठितमव्ययं सत्त्वभूतकाले, चादिपठितमसत्त्वभूते, 'यावत् मर्यादावधारणपरिमाणेषु' इति चादिपठितमव्ययम्, एवं 'पुर्'-

शब्दो नगरवाची, तस्य तृतीयैकवचने 'पुरा' इति, एवं यत् परिमाणं यस्य तत् 'यावत्' इति तद्धितान्तमनव्ययं नाम, तथा च पुरायावतोरव्ययत्वानव्ययत्वभेदेन द्वैविध्ये कीदृशयोर्ग्रहणमित्याशङ्कायामाह– **पुरा-यावतोर्निपातयोरि**ति–अव्यययोरित्यर्थः, तत्र कारणं तु स्वयं वक्ष्यति । **पुरा भुङ्क्ते, यावद् भुङ्क्ते** इति– "भुजंप् पालनाभ्यवहारयोः" अतः "भुनजोऽत्राणे" इत्यात्मनेपदे वर्तमानाते च– **भुङ्क्ते** इति । सामान्यतो भविष्यति विधीयमानाऽनेन वर्तमाना, अनद्यतने भविष्यति विशेषविहितया श्वस्तन्या बाधिष्यत इत्याशङ्कायामाह– **भविष्यदनद्यतनेऽपि परत्वाद् वर्तमानैवे**ति, अयमाशयः– अस्य सूत्रस्य न भविष्यत्कालसामान्यं प्रवृत्तिविषयोऽपि तु पुरा-यावन्निपातयोरुपपदयोः सतोरेव, एवं च निपातद्वययोगविधीयमानत्वरूपं विशेषविहितत्वमस्यापीति न सामान्यविशेषभावोऽनयोः प्रवृत्तौ विनिगमको भवितुमर्हति । तथा च "स्पर्धे परः" इति परिभाषयैव व्यवस्था कार्येति । तथा च प्रयोगावाह–**पुरा श्वो भुङ्क्ते, यावच्छ्वो व्रजती**ति, इह च पुराशब्दो न कालविशेषवाचकोऽपि तूभावपि निपातौ निश्चयार्थद्योतकाविति दीक्षितसिद्धान्तः, पुराशब्दस्य कालविशेषवाचकत्वे चेह भविष्यदर्थबोधो न स्यात्, अत्र च भविष्यत्येव पुरा भुङ्क्ते यावद् भुङ्क्ते इति प्रयोगौ भवतो न तु वर्तमाने । एतयोर्निपातयोरुपपदयोर्वर्तमानाया वर्तमानार्थत्वस्य बाधादिति कैयटादिभिः सिद्धान्तितम् "भविष्यति गम्यादयः" [ ३. ३. ३. ] इति पाणिनीयसूत्रव्याख्यायाम् । पाणिनीये तृतीयान्तपुराशब्दस्य परिमाणार्थकयावच्छब्दस्य च योगेऽस्य सूत्रस्य प्रवृत्तिर्मा भूदित्येतदर्थं सूत्रे निपातयोरित्युच्यते, स्वमते तद्वारणोपायमाह– **लाक्षणिकत्वादिह न भवति– महत्या पुरा जेष्यति ग्रामम्, यावद् दास्यते तावद् भोक्ष्यते, यत्परिमाणमित्यर्थः** इति– अत्र हि पुराशब्दः 'पुर्'शब्दात् तृतीयाविभक्तौ निष्पादित इति लाक्षणिकः, एवं यावच्छब्दोऽपि परिमाणार्थे निष्पादितः । तथा च प्रतिपदोक्तयोर्निपातयोरेव ग्रहणमुचितमिति भावः ।। ५. ३. ७. ।।

**कदा-कर्ह्योर्नवा । ५. ३. ८. ।।**

**त० प्र०– कदा-कर्ह्योरुपपदयोर्वर्त्स्यत्यर्थे वर्तमानाद् धातोर्वर्तमाना वा भवति, पक्षे भविष्यन्ती-श्वस्तन्यावपि भवतः । कदा भुङ्क्ते, कदा भोक्ष्यते, कदा भोक्ता; कर्हि भुङ्क्ते, कर्हि भोक्ता, कर्हि भोक्ष्यते; इति । कर्हिशब्दस्यानद्यतनार्थवृत्तित्वान्न प्राप्नोति, श्वो गमिष्यतीत्यादिवत् तु भविष्यति । भूते तु नित्यं परोक्षादयः–कदा बुभुजे, कदा भुक्तवान्; कर्हि बुभुजे, कर्हि भुक्तवान् ।।८।।**

**श० म० न्यासानुसन्धानम्–** कदा० । **पक्षे भविष्यन्ती-श्वस्तन्यावपि भवतः** इति– सामान्यतो भविष्यति विहिताया वर्तमानाया अभावे, अनद्यतने भविष्यति श्वस्तनी, सामान्ये भविष्यति भविष्यन्तीति विवेकः । अनेन वर्तमानायां–**कदा भुङ्क्ते,** पक्षे भविष्यन्त्यां–**कदा भोक्ष्यते,** श्वस्तन्यां च–**कदा भोक्ता**; एवं कर्हि-शब्दयोगेऽपि ज्ञेयम् । कस्मिन् काले इति कालाधिकरणे "किं-यत्-तद्०" [७. २. ९५.] इति दाप्रत्यये किमः कादेशे–कदा, कस्मिन् अनद्यतने काले इति अनद्यतनकालाधिकरणे "अनद्यतने र्हिः" [७. २. १०१.] इति र्हौ "किमः कस्तसादौ च" [ २. १. ४०. ] इति कादेशे– कर्हि । ननु दाप्रत्ययस्य कालसामान्ये विधानात् तद्योगे भवतु नाम भविष्यन्ती, किन्तु र्हिप्रत्ययोऽनद्यतने विहित इति तद्योगे श्वस्तन्या भवितव्यमिति **कर्हि भोक्ष्यत इत्यत्र कथं भविष्यन्ती**त्याशङ्कामुत्थाप्य समाधत्ते– **श्वो गमिष्यतीत्यादिवत् भविष्यती**ति–यथा श्वो ग्रामं गमिष्यतीति प्रयोगे भविष्यतीति प्रयोगं पूर्वं प्रसाध्य पश्चाच्छ्वःशब्दयोगोऽभिहितस्तथेहापीत्यर्थः । अयं भावः– भोक्ष्यत इत्येतत् पदं भविष्यत्काल एव वर्तते, अनद्यतनकालावगतिस्तु कर्हिशब्दसन्निधाने सति वाक्याद् भवति । न च वाक्यगम्येऽर्थे भविष्यन्ती भवति, तथाहि– पदमिह संस्क्रियते, न च पदसंस्कारे वाक्यगम्योऽर्थ उपयुज्यते, तस्मात् भविष्यत्सामान्ये विवक्षिते भविष्यन्ती भवति, भविष्यति विशेषेऽप्यनद्यतने विवक्षिते श्वस्तनी भवतीति । भविष्यदर्थादेव धातोः कदाकर्हिशब्दयोर्योगेऽनेन वर्तमाना विधीयतेऽतो भूतेऽस्य सूत्रस्याप्राप्तौ यथास्वं परोक्षादय एव भविष्यन्ति बाधकाभावादत आह–**भूते तु नित्यं परोक्षादय** इति– न तु पाक्षिकी वर्तमानेत्यर्थः, तथा चोदाहरति– **कदा बुभुजे, कदा भुक्तवान्; कर्हि बुभुजे, कदा भुक्तवानि**ति ।। ५. ३. ८. ।।

## किंवृत्ते लिप्सायाम् । ५. ३. ९. ॥

**त० प्र०– विभक्त्यन्तस्य डतर-डतमान्तस्य च किमो वृत्तं– किंवृत्तमिति वैयाकरणसमयः, तेन कितरां कितमामिति न किंवृत्तम्। तस्मिन्नुपपदे प्रष्टुर्लिप्सायां गम्यमानायां वर्त्स्यत्यर्थे वर्तमानाद् धातोर्वर्तमाना वा भवति, पक्षे भविष्यन्ती-श्वस्तन्यावपि भवतः। लब्धुमिच्छा– लिप्सा। को भवतां भिक्षां ददाति दास्यति दाता वा, के के भवन्तो भोजयन्ति भोजयिष्यन्ति भोजयितारो वा, कतरो भवतोर्भिक्षां ददाति दास्यति दाता वा, कतमो भवतां भिक्षां ददाति दास्यति दाता वा। किंवृत्त इति किम्? भिक्षां दास्यति। लिप्सायामिति किम्? कः सिद्धपुरं यास्यति ॥९॥**

**श० म० न्यासानुसन्धानम्– किंवृत्ते०।** किमा– किंशब्देन, वृत्तं– निष्पन्नं– किंवृत्तम्, किमः– किंशब्दात् वृत्तमिति वा किंवृत्तशब्दार्थः, तथा च 'कितराम्, कितमाम्, कदा, कर्हि' इत्यादिशब्दा अपि किंवृत्ता एवेति तद्योगेऽपि लिप्सायां सत्यामिदं सूत्रं प्रवर्तेतेति शङ्कावारणाय किंवृत्तपदग्राह्यमर्थमाह– **विभक्त्यन्तस्य डतर-डतमान्तस्य च किमो वृत्तं-किंवृत्तमिति**। कुत एष विशेषार्थलाभ इति चेत्? अत्राह– **वैयाकरणसमयः** इति– वैयाकरणानामाचार एवात्र प्रमाणमिति भावः। नहि सर्वः सिद्धान्तः पदैरेव प्रतिपादयितुं शक्यते, कश्चित् पदैः प्रतिपाद्यते, कश्चित् प्रयोगदर्शनेनानुमीयत इति भावः। तत्फलमाह– **तेन कितरां कितमामिति न किं वृत्तमिति**। वर्तमानाया अभावे यथास्वं प्रत्यय इत्याह–**पक्षे भविष्यन्ती-श्वस्तन्यावपि भवतः** इति। लिप्सापदार्थमाह– **लब्धुमिच्छा लिप्सेति**– "डुलभिष् प्राप्तौ" अत इच्छायां सनि "रभ-लभ-०" [ ४. १. २१. ] इति पूर्वस्य इत्वे द्वित्वाभावे च 'लिप्स' इत्यतो भावे "शंसिप्रत्ययात्" [ ५. ३. १०५. ] इति स्त्रियाम् अप्रत्यये आपि च– **लिप्सा**। पूर्वमेकवचने विभक्त्यन्तेन किमा योगे उदाहरति– **को भवतां भिक्षां ददातीति**– "डुदांग्क् दाने" अनेन वर्तमानायां तिवि॰ **ददातीति**, पक्षे सामान्यभविष्यत्कालविवक्षायां भविष्यन्त्यां स्यतौ– **दास्यतीति**, अनद्यतनभविष्यत्कालविवक्षायां श्वस्तन्यां ताप्रत्यये–**दाता वेति**। अथ बहुवचने विभक्त्यन्तेन किमा योगे उदाहरति– **के के भवन्तो भोजयन्तीति**– "भुजंप् पालनाभ्यवहारयोः" अतो णिगि वर्तमानाया अन्तौ– **भोजयन्तीति**, प्राग्वत् पक्षे भविष्यन्त्यां– **भोजयिष्यन्तीति**, श्वस्तन्यां तु– **भोजयितारः** इति। "यत्-तत्-किमन्यात्" [ ७. ३. ५३. ] इति द्वयोरेकस्मिन् निर्धार्येऽर्थे किमो डतरप्रत्यये– कतर इति भवति, "बहूनां प्रश्ने डतमश्च वा" [ ७. ३. ५४. ] इति बहूनां मध्ये निर्धार्येभ्यो यदादिभ्यः प्रश्ने डतरो डतमश्च भवतीति– कतरः, कतमः। इति निष्पन्नस्य डतर-डतमप्रत्ययान्तस्य किमो योग उदाहरति– **कतरो भवतोर्भिक्षां ददाति दास्यति दाता वा, कतमो भवतां भिक्षां ददाति दास्यति दाता वा**। पदकृत्यं पृच्छति– **किंवृत्त इति किमिति**, उत्तरयति– **भिक्षां दास्यतीति**– यद्यप्यत्र लिप्साद्योतकमपि पदं नास्ति, किमादिप्रयोगे सा स्पष्टं प्रतीयते, तथापि वक्तुः स्वरादिवैचित्र्यादेव प्रकरणवशाद् वा लिप्सा प्रतीयत इति किंवृत्तपदाभावे स्यादेवेह वर्तमानेति भावः। पुनः पृच्छति–**लिप्सायामिति किमिति**, उत्तरयति– **कः सिद्धपुरं यास्यतीति**– अत्र गमनविषयकप्रश्न एव न तु लिप्सेति नास्य प्रवृत्तिः ॥ ५. ३. ९. ॥

## लिप्स्यसिद्धौ । ५. ३. १०. ॥

**त० प्र०– लब्धुमिष्यमाण ओदनादिर्लिप्स्यस्तस्मात् सिद्धौ– स्वर्गाद्यवाप्तिलक्षणायां गम्यमानायां वर्त्स्यत्यर्थे वर्तमानाद् धातोर्वा वर्तमाना भवति, पक्षे भविष्यन्ती-श्वस्तन्यावपि भवतः। अकिंवृत्तार्थोऽयमारम्भः। यो भिक्षां ददाति दास्यति दाता वा स स्वर्गलोकं याति यास्यति याता वा, लिप्स्याद् भक्तात् स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति ॥१०॥**

**श० म० न्यासानुसन्धानम्**– लिप्स्य०। अर्थसिद्धिः कार्यसिद्धिरित्यादिलौकिकव्यवहारे सिद्धिशब्देन सह षष्ठीसमासस्य प्रसिद्धतयाऽत्रापि तथा भ्रमो मा भूदित्येतदर्थमवयवार्थव्युत्पादनद्वारा सूत्रार्थं स्पष्टीकरोति– **लब्धुमिष्यमाण ओदनादिरिति, तस्मात् सिद्धौ स्वर्गाद्यवाप्तिलक्षणायामिति**, तस्मादित्यत्र प्रयोजकत्वं पञ्चम्यर्थः, तत्प्रयोज्यायां सिद्धौ गम्यमानायामिति भावः। लिप्स्यमानसिद्धिर्हि लिप्सायामेव सत्यां सम्भवति, नासत्यामिति यत्र लिप्स्यमानसिद्धिर्गम्यते तत्रावश्यं लिप्सया

भवितव्यम्, तथा च पूर्वेणैव सिद्धम्, तत् किमर्थोऽयमारम्भ इत्यत आह– **अकिंवृत्तार्थोऽयमारम्भ** इति– पूर्वसूत्रस्य किंवृत्तसत्त्व एव प्रवृत्तिरस्याकिंवृत्ते इति विषयाभावात् पूर्वेणाप्राप्तिरिति भावः। यद्येव पूर्वसूत्र एव किंवृत्तग्रहणमकृत्वा प्रत्ययो विधेयः, एवं हीदं नारब्धव्यं भवति; नैतदस्ति– एवं हि यथा लिप्स्यमानसिद्धौ गम्यमानायां किंवृत्ते चाकिंवृत्ते च भवति तथा यत्रापि लिप्स्यमानसिद्धिरहितं लिप्स्यमानं गम्यं तत्रापि स्यात्, किंवृत्त एव तत् तत्रेष्यते, तस्मात् पूर्वयोगे किंवृत्तग्रहणं कर्तव्यम्, तस्मिंश्च सतीदमप्यकिंवृत्तार्थमारब्धव्यम्। उदाहरति– **यो भिक्षां ददाति दास्यति दाता वा स स्वर्गलोकं याति याता यास्यति वेति**– अत्रोभयोर्वाक्ययोर्मिलितयोर्लिप्स्यसिद्धिरवगम्यते तेनोभयत्र वर्तमाना सिद्धा, यो भिक्षां ददाति स स्वर्गं यातीत्युक्त्या भविष्यदर्थस्यापि द्रुतत्वप्रतिपादनाय वर्तमानत्वमिव प्रकटयत्ययं शब्दः। एवं चावश्यं स्वर्गप्राप्तिलोभेन दातारं प्रवर्तयतीत्याह– **भक्तात् स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयतीति**– भक्तदानविषयेऽस्य प्रोत्साहं जनयतीत्यर्थः ॥ ५. ३. १०. ॥

## पञ्चम्यर्थहेतौ । ५. ३. ११. ॥

**त० प्र०– पञ्चम्यर्थः प्रैषादिस्तस्य हेतुर्निमित्तमुपाध्यायागमनादि तस्मिन्नर्थे वर्त्स्यति वर्तमानाद् धातोर्वर्तमाना वा भवति, पक्षे भविष्यन्ती-श्वस्तन्यावपि भवतः। उपाध्यायश्चेदागच्छति आगमिष्यति आगन्ता वा, अथ त्वं सूत्रमधीष्व, अथ त्वमनुयोगमादत्स्व; अत्र भविष्यदुपाध्यायागमनमध्ययनादिविषयस्य प्रैषस्यातिसर्गस्य प्राप्तकालतायाश्च हेतुर्भवति ॥११॥**

**श० म० न्यासानुसन्धानम्– पञ्च०। पञ्चम्यर्थः** इति– पञ्चमीविधाने निमित्तभूतो योऽर्थः स पञ्चम्यर्थः, स च प्रैषादिरित्याह– **प्रैषादिरिति**– "प्रैषा-ऽनुज्ञा-ऽवसरे" [ ५. ४. २९. ] इति प्रैषादिषु कृत्याः पञ्चमी च विधीयन्ते, न्यक्कारपूर्विका प्रेरणा प्रैषः, अनुज्ञा कामचारानुमतिः, अतिसर्ग इति यावत्; अवसरः प्राप्तकालता, निमित्तभूतकालोपनतिरिति यावत्; एवं हि "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थने" [५. ४. २८.] इति सप्तमी पञ्चमी च विधीयेते। उदाहरति– **उपाध्यायश्चेदागच्छतीति**– "गम्लृं गतौ" आङ्पूर्वादतोऽनेन वर्तमानायां तिवि शवि "गमिषद्यमश्छः" [ ४. २. १०६. ] इति छादेशे "स्वरेभ्यः" [ १. ३. ३०. ] इति छस्य द्वित्वे पूर्वस्य च "अघोषे प्र०" [ १. ३. ५०. ] इति चादेशे च– **आगच्छति**। पक्षे भविष्यन्त्याः स्यतौ "गमोऽनात्मने" [४. ४. ५१.] इतीटि– **आगमिष्यति**। श्वस्तनीताप्रत्यये तु "एकस्वरादनुस्वारेतः" [ ४. ४. ५६. ] इति इडभावे "म्नां०" [ १. ३. ३९. ] इति मस्य ने– **आगन्ता**। "इंङ्क् अध्ययने" नित्यमधिपूर्वोऽयम्, ततः पञ्चमीमध्यमपुरुषस्य स्वे परे– **अधीष्व**। "डुदांग्क् दाने" आङ्पूर्वादतः स्वे परे "ह्वः शिति" [ ४. १. १२. ] इति द्वित्वे पूर्वस्य ह्रस्वे "श्नश्चातः" [ ४. २. ९६. ] इत्याकारलोपे "अघोषे प्र०" [ १. ३. ५०. ] इति दस्य ते– **आदत्स्व, अनुयोगम्**– अनुयोगद्वारनामकं सूत्रं व्याख्यानं वा। उभयत्र "प्रैषानुज्ञावसरे०" [ ५. ४. २९. ] इति पञ्चमी ज्ञेया। प्रयोगे सूत्रार्थमनुगमयति– **अत्र भविष्यदुपाध्यायगमनमि**त्यादिना, **प्रैषस्य** निकृष्टप्रेरणस्य, **अतिसर्गस्य** कामचारानुज्ञानस्य, **प्राप्तकालतायाः** अवसरगमनस्य च प्रतिपिपादयिषितस्य निमित्तं भवतीति भावः। उपाध्यायागमनादेव हेतोर्निकृष्टः सूत्राध्ययने प्रेर्यते, समानो वाऽनुयोगादानेऽनुज्ञायते, उभौ वा प्राप्तावसरं बोध्येते इति ॥ ५. ३. ११. ॥

## सप्तमी चोर्ध्वमौहूर्तिके । ५. ३. १२. ॥

**त० प्र०– ऊर्ध्वं मुहूर्ताद् भव ऊर्ध्वमौहूर्तिकः "नाम नाम्ना०" [ ३. १. १८. ] इति समासः, उत्तरपदवृद्धिस्त्वस्मादेव निर्देशात्। पञ्चम्यर्थहेतौ ऊर्ध्वमौहूर्तिके वर्त्स्यर्थे वर्तमानाद् धातोः सप्तमी चकाराद् वर्तमाना च विभक्तिर्वा भवति, पक्षे भविष्यन्ती-श्वस्तन्यावपि भवतः। ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य परं मुहूर्तादुपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा, अथ त्वं तर्कमधीष्व, अथ त्वं सिद्धान्तमधीष्व ॥१२॥**

**श० म० न्यासानुसन्धानम्– सप्तमी०।** ऊर्ध्वमौहूर्तिकशब्दं व्युत्पादयति– **ऊर्ध्वं मुहूर्ताद् भव** इति विग्रहः, ऊर्ध्वमिति विभक्तिप्रतिरूपकमव्ययमित्येके, केचित् तु ऊर्ध्वमिति द्वितीयान्तमकर्मकधातूनां कालाद्याधारस्य वा कर्मत्वात्, ऊर्ध्वमुहूर्तशब्दाद् भवार्थे इकण्, ऊर्ध्वमौहूर्तिक

इति च समासः, ननु "दिगधिकं संज्ञातद्धितोत्तरे" [ ३. १. ९८. ] इत्यत्र दिगधिकग्रहणात् समानाधिकरणाधिकाराच्चात्र कथं समास इत्यत आह– "नाम नाम्ना०" [ ३. १. १८. ] इति समासः । पूर्वपदे आदिवृद्धिमाशङ्क्याह– **उत्तरपदवृद्धिस्त्वस्मादेव निर्देशा**दिति– सूत्रे 'ऊर्ध्वमौहूर्तिके' इति कथनादेवेत्यर्थः, **'ऊर्ध्वं मुहूर्तात्'** इत्यस्यार्थं प्रकारद्वयेनाह– **उपरि मुहूर्तस्येति परं मुहूर्ता**दिति वा, 'उपरि मुहूर्तस्य' इत्यत्र "रि-रिष्टात्०" [ २. २. ८२. ] इति षष्ठी, 'परं मुहूर्तात्' इत्यत्र च दिक्शब्दयोगे "प्रभृत्यन्यार्थदिक्शब्द०" [ २. २. ७५. ] इति पञ्चमी, सर्वं चैतत् उपाध्यायागमनरूपक्रियाविशेषणमेव । **उपाध्यायश्चेत् आगच्छेत् आगच्छतीति**– अत्रानेन सप्तमी वर्तमाना च, पक्षे सामान्यभविष्यति भविष्यन्त्याम्– **आगमिष्यती**ति, अनद्यतनभविष्यति तु श्वस्तन्यां– **आगन्ता वे**ति । **अथ त्वं तर्कमधीष्व, अथ त्वं सिद्धान्तमधीष्वे**ति– अत्र "प्रैषानुज्ञावसरे०" [ ५. ४. २९. ] इति सप्तमी । उपाध्यायागमनं यथा पूर्वसूत्रीयोदाहरणे प्रैषादेर्निमित्ततया प्रतिपादितं तथेहापि, ऊर्ध्वमुहूर्तभवत्वमात्रं तत्र विशेषः । एवं च यद्यप्युपाध्यायागमनस्य सन्निकृष्टभविष्यत्कालविषयत्वं गम्यतेऽतो नानद्यतनस्य विषयता तथापि शब्दव्यापारस्य मुहूर्तादुपरि निरवधिकतया प्रतीतेर्न श्वस्तन्या अनवकाश इति साऽपि भविष्यत्येव यथास्वमिति ॥ ५. ३. १२. ॥

## क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती ॥ ५. ३. १३. ॥

**त० प्र०–वेति निवृत्तम् । यस्माद् धातोस्तुमादिस्तद्वाच्या या क्रिया साऽर्थः प्रयोजनं यस्याः सा क्रियार्था, तस्यां क्रियायामुपपदे वर्त्स्यत्यर्थे वर्तमानाद् धातोस्तुम्-णकच्-भविष्यन्तीप्रत्यया भवन्ति । कर्तुं व्रजति, कारको व्रजति, करिष्यामीति व्रजति; भोक्तुं व्रजति, भोजको व्रजति, भोक्ष्ये इति व्रजति । क्रियायामिति किम् ? भिक्षिष्ये इत्यस्य जटाः । क्रियार्थायामिति किम् ? धावस्ते पतिष्यति वासः, अत्रास्ति धावनक्रियोपपदं न त्वसौ पतनार्थमुपात्तेति न भवति । "णक-तृचौ" [ ५. १. ४८. ] इति सामान्येन सिद्धे क्रियार्थोपपदभाविन्या भविष्यन्त्या बाधा मा भूदिति णकज्विधानम्, असरूपविधिना णकोऽपि भविष्यतीति चेत् ? एवं तर्हि असरूपविधिना तृजादयो मा भूवन्निति पुनर्णकज्विधानम्, तेनौदनस्य पाचको व्रजति, पक्ता व्रजति, पचो व्रजति; विक्षिपो व्रजतीत्यादि न भवति ॥१३॥**

**श० म० न्यासानुसन्धानम्– क्रियायां०** । "कदाकर्ह्योर्नवा" [ ५. ३. ८. ] इत्यतो नवेत्यस्यानुवृत्तिरिति प्राप्ते आह– **वेति निवृत्तमिति**– अत्र च व्याख्यानमेव मूलम् । केचित् त्वाहुः– विभक्तिविधानप्रकरणपठितं तत् कृत्प्रत्ययेन सह विभक्तिविधायकेऽस्मिन् सूत्रे प्रकरणभेदान्नानुवर्तत इति । यद्यप्यत्र न किमपि गमकं तथापि स्थितस्य गतिश्चिन्तनीयेति रीत्या तदपि समाधानमस्तु । क्रियार्थायां क्रियायामित्युच्यते, उभे अपि च क्रिये– तुमादिप्रत्ययप्रकृतिभूता, उपपदभूता च, तत्र संदेहः– क्रियार्थायामिति पदे क्रियाग्रहणेन का क्रिया ग्रहीतव्येति, तद्वारणायाह– **यस्माद् धातोस्तुमादिरि**ति, तथा च तुमादिप्रकृतिभूतधातुवाच्यक्रियोद्देश्यिकायां क्रियायां समीपोच्चारितायां सत्यामेते प्रत्यया भवन्तीति फलितम् । **कर्तुं व्रजतीति**– "डुकृंग् करणे" "क्त्वा तुमम् भावे" [ ५. १. १३. ] इति भावेऽनेन तुमि अनुस्वारेत्त्वाद् इडभावे गुणे च– कर्तुमिति "व्रज गतौ" अनो वर्तमानातिवि शवि– व्रजतीति, एवमनेन णकचि वृद्धावारादेशे च– **कारको व्रजती**ति– अनिर्दिष्टार्थकृत्त्वात् 'कर्तरि" [ ५. १. ३. ] इति कर्तरि णकच् । अनेन भविष्यन्त्यां– **करिष्यामीति व्रजती**ति– 'हनृतः स्यस्य" [ ४. ४. ४९. ] इतीट् । यथा हि नामार्थद्वयोरभेदातिरिक्तः सम्बन्धो न भवति समानत्वात् तथा क्रिययोरप्यभेद एव सम्बन्धः स्यात्, स चानुपपन्न उभयोः परस्परं भिन्नार्थकत्वात्, अन्यस्य सम्बन्धस्य शब्दोपस्थितस्याभावाच्चानन्वयापत्तेरिति 'इति' शब्देनोभयोः सम्बन्धः क्रियते, इतिशब्दो निमित्तार्थकः, एवं च यथा कर्तुं व्रजतीत्यत्र भविष्यत्कालिककृत्युद्देश्यकं वर्तमानकालिकं यानमित्यर्थः, यथा वा कारको व्रजतीत्यत्रापि स एवार्थः, केवलमत्र णकचा कर्तृत्वमपि प्रतीयते [ भविष्यत्कालिककृतिकर्तृकर्तृकं तादृशकृत्युद्देश्यकं च यानमित्यर्थात् ] तथेहापि भविष्यत्कालिककृत्युद्देश्यकं यानमित्येव बोधः, स चेतिशब्दसहकारेणैव, एवमन्यत्राप्यूह्यम् । एवं "भुजंप् पालनाभ्यवहारयोः" इत्यस्यापि– **भोक्तुं**

**व्रजति, भोजको व्रजति, भोक्ष्ये इति व्रजतीति**– "भुनजोऽत्राणे" [ ३. ३. ३७. ] इत्यात्मनेपदे– भोक्ष्ये इति । पदकृत्यं पृच्छति– **क्रियायामिति किमिति**, उत्तरयति– **भिक्षिष्ये इत्यस्य जटाः** इति– अत्र यद्यपि जटाधारणस्योद्देश्यं भिक्षैव, किन्तु ता न धारणक्रियामुखेनोक्ता अपि तु द्रव्यत्वेनेति भिक्षेरिह भविष्यत्सामान्ये भविष्यन्त्येव, न तु तुम्-णकचाविति भावः । यदि च भिक्षितुं जटा इत्यपि प्रयोगः क्वचिच्छ्रूयत इत्युच्यते तर्हि स धारयतीत्यध्याहृत्यैव कथञ्चिद् व्याख्येयः । नन्वस्तु तद्वारणाय क्रियायामुपपद एतावदेव, सा क्रिया तदर्था वाऽस्तु अन्यार्था वा तावतैवेह वारणसम्भवादित्याशङ्कायामाह-**क्रियार्थायामिति किमिति**, उत्तरयति- **धावतस्ते पतिष्यति वासः** इति– "धावूग् गतिशुद्धयोः" इत्यस्य "सृ गतौ" "वेगे सर्तेर्धाव्" [ ४. २. १०७. ] इत्यादेशस्य वा शतरि षष्ठ्येकवचने– धावतः, अत्रोपपदभूता धावनक्रिया, किन्तु न सा पतनार्थमुपादीयते, किन्तु अन्यार्थं धावतस्तस्य गात्रचाञ्चल्यादिना वासः पतति, किञ्चेदृशस्थले समानकर्तृकत्वमपि दृश्यते, न चात्र तथा यत् पतति वासो न तद् धावति, यो धावति नासौ पततीति भिन्नकर्तृकत्वमपि क्रिययोः । एवं च क्रियार्थायामित्यस्याभावे निमित्तभूतायामपि धावनक्रियायामुपपदे प्रत्ययः स्यादिति भावः । णकच्विधानस्य वैयर्थ्यमाशङ्कते– **"णक-तृचौ" [५. १. ४८.] इति सामान्येन सिद्धे** इति– सामान्यतः कालमात्रे विहितस्य भविष्यत्यपि विधाने क्षत्यभावादिति शङ्काशयः । समाधत्ते– **क्रियार्थोपपदभाविन्या भविष्यन्त्या बाधा मा भूदिति णकज्विधानमिति**, अयमाशयः– भविष्यति क्रियार्थायां क्रियायामुपपदे सति विहिता भविष्यन्ती ह्यपवादो विशेषविहितत्वादिति सा स्वविषये णकं बाधेतेति तद्वारणायानेन विशिष्य णकचो विधानमिति । पुनराक्षिपति–**असरूपविधिना णकोऽपि भविष्यतीति**, उत्तरयति– **एवं तर्हि असरूपविधिना तृजादयो मा भूवन्निति पुनर्णकज्विधानमिति**, अयमाशयः– सिद्धे सत्यारभ्यमाणो विधिर्नियमार्थो भवतीति णकज्विधानं नियमयति– 'अत्र प्रकरणेऽसरूपविधिना तृजादयो न भवन्ति' इति, तथा च सामान्यविहितस्य तृचो निवृत्तिरेवास्य फलमिति न अपि तु अन्येऽपि 'अच्' प्रभृतयः प्रत्यया न भवन्ति, तदाह– **तेनोदनस्य पाचको व्रजति, पक्ता व्रजति, पचो व्रजति, विक्षिपो व्रजतीत्यादि न भवतीति**, वाऽसरूपेण तृजादयो न भवन्तीति ज्ञापितेऽपि न स्वांशे चारितार्थ्यं भवितुमर्हति, णकस्य तृचः पूर्वं पठितत्वादिति तृजादिरित्यत्र तन्त्रेण तत्पुरुष-बहुव्रीहिसमासयोर्निदेशः स्वीकार्यः, तृच आदिरिति तत्पुरुषसमासेन णकोऽपि तृजादिरेव भवतीति नियमेन तस्यापि व्यावृत्तिः स्यादिति तद्विधानस्य स्वांशे चारितार्थ्यम् । तृच् आदिर्यस्येति बहुव्रीहिसमासाश्रयणेन 'अच्'प्रभृतयोऽपि न भवन्तीति समासद्वयस्याश्रयणमावश्यकमेवेति तत्त्वविदो विभावयन्तु । **ओदनस्य पाचको व्रजती**ति–अत्र "णक-तृचौ" [ ५. १. ४१. ] इति कालसामान्ये णकः, 'ओदनस्य' इत्यत्र "कर्मणि कृतः" [ २. २. ८३. ] इति षष्ठी, अनया च णकोऽत्रेति सूच्यते, णकचि तु "तृन्नुदन्ता०" [ २. २. ९०. ] इति षष्ठीनिषेधे "कर्मणि" [ २. २. ४०. ] इति द्वितीया स्यात्, तथानियमबलान्नायं प्रयोग इति भावः । एवमग्रेऽपि । तृचि– **पक्ता व्रजति**, "अच्" [ ५. १. ४९. ] इत्यचि– **पचो व्रजतीति**, "क्षिपंत् प्रेरणे" अतो "नाम्युपान्त्य०" [ ५. १. ५४. ] इति के–**विक्षिपो व्रजतीति । इत्यादि न भवतीति**– कालसामान्ये निष्पन्ना उक्तप्रयोगा नियमबलान्न भवन्तीति भावः ॥ ५. ३. १३. ॥

## कर्मणोऽण् । ५. ३. १४. ॥

त० प्र०–क्रियायां क्रियार्थायामुपपदे कर्मणः पराद्वत्स्यर्त्यर्थे वर्तमानात् धातोरण् प्रत्ययो भवति । कुम्भकारो व्रजति, काण्डलावो व्रजति । "कर्मणोऽण्" [ ५. १. ७२. ]इति सामान्येन विहितोऽण् णकचाऽनेन बाध्येतासरूपविधिश्च नास्तीति पुनर्विधीयते, सोऽपवादत्वाण्णकच बाधते, परत्वात् सामान्यस्याणो बाधकान् टगादीनपि, तेन–वक्रगायो व्रजति, सुरापायो व्रजति, गोदायो व्रजति । बहुलाधिकाराण्णकच्-भविष्यन्त्यावपि भवतः– कटं कारको व्रजति, ओदनं भोजको व्रजति, काण्डानि लविष्यामीति व्रजति, कम्बलं वास्यामीति व्रजति ।१४॥

श० म० न्यासानुसन्धानम्–कर्म० । कुम्भं करिष्यामीति व्रजतीति [ बाहुलकमाश्रित्य भविष्यन्तीह ] वाक्ये कृधातोरनेनाणि ङस्युक्तसमासे–**कुम्भकारो व्रज-**

तीति । "लूञ् छेदने" काण्डं लविष्यामीति व्रजतीति वाक्ये लूधातोरणि ङस्युक्तसमासे च–**काण्डलावो व्रजतीति**, भविष्यत्कालिककुम्भकर्तृकर्तृकं कुम्भकरणोद्देश्यकं च यानमिति, भविष्यत्कालिककाण्डलवनकर्तृकर्तृकं काण्डलवनोद्देश्यकं च गमनमिति च प्रयोगार्थः । अत्रापि पूर्ववत् सामान्येन सिद्धिमाशङ्क्य पूर्वज्ञापनेनास्य चारितार्थ्यमाह– **"कर्मणोऽण्" [५. १. ७२.] इति सामान्येन विहितोऽण् णकचाऽनेन बाध्येत, असरूपविधिश्च नास्तीति पुनर्विधीयते** इति–णकचाऽनेन–पूर्वसूत्रविहितेन णकचेत्यर्थः । नन्वस्तु सार्थक्यमस्य किन्तु पूर्वसूत्रविहितो णकच् प्रत्ययोऽप्येतद्विषये भविष्यत्येवेति चेत् ? अत्राह– **सोऽपवादत्वाण्णकचं बाधते** इति–सामान्यतः क्रियार्थायां क्रियायामुपपदे णकच् विहितः, अयमण् च कर्मोपपदे विशेषेण विहित इति विशेषविहितत्वादपवाद इति भावः । परत्वमपि णकच्प्रत्ययत इत्यन्यत् । परत्वेनापि केषाञ्चित् प्रत्ययानामनेन बाध्यत्वमित्याह– **परत्वात् सामान्यस्याणो बाधकान् टगादीनपी**ति–परत्वात्–"स्पर्धे परः" इति परत्वबलात्, सामान्यस्याणः–"कर्मणोऽण्" [ ५. १. ७२. ] इति सामान्यशास्त्रविहितस्य, अणो बाधकान्, टगादीनपि–"गायोऽनुपसर्गाट्टक्" [ ५. १. ७४. ] इत्यनेन "सुरासीध्वोः पिबः" [ ५. ७५. ] इत्यादिना च विहितं टक्प्रत्ययम्, आदिपदेन "आतो डोऽह्वा-वा-मः" [ ५. १. ७६. ] इत्यादिना विहितं डादिप्रत्ययं च प्रकृतसूत्रविहितोऽण् बाधते इत्यर्थः । बाधफलमाह–**तेन वक्रगायो व्रजती**ति–वक्रं गास्यामीति व्रजतीति वाक्यम्, अत्र टकं प्रबाध्यानेनाण्, एवं–सुरां पास्यामीति व्रजतीति वाक्ये–**सुरापायो व्रजती**त्यत्रापि टकं प्रबाध्यानेनाण्, तथा गां दास्यामीति व्रजतीति वाक्ये– **गोदायो व्रजती**त्यत्र डं प्रबाध्यानेनाण्, सर्वत्र "आत ऐः०" [४. ३. ५३.] इत्यात ऐकारस्तस्यायादेशश्च विज्ञेयः । अत्रेदं शङ्क्यते–इदं सूत्रमपवादविषये [टगादिविषये] उत्सर्गविषये ["कर्मणोऽण्" ५. १. ७२. इति विषये ] च प्रवर्तते इत्येतावदुक्तं पूर्वग्रन्थेन, तन्न सङ्गतम्– एकस्यैव सूत्रस्यापवादशास्त्रोत्सर्गशास्त्रोभयविषयत्वं न सम्भवति, तत्रापवादशास्त्रविषयेऽप्रवृत्तौ वक्रगायो व्रजतीत्यादि न स्यात्, उत्सर्गविषये चाप्रवृत्तौ काण्डलावो व्रजतीत्यादि न स्यात् णकचा बाधापत्तेरिति । न च वाऽसरूपेणोत्सर्गोऽण् भविष्यतीति वाच्यम्, इदानीमेव तृजादयोऽसरूपविधिना न भवन्तीत्यर्थस्य ज्ञापितत्वादित्युभयस्य प्रवृत्तिरावश्यकीति सा कथं सिध्येदिति । न चापवादत्वादुत्सर्गविषये णकचं परत्वाच्चापवादानिति व्यवस्थोक्तैवेति वाच्यम्, अपवादतामापन्नस्य परत्वव्याघातात्, परत्वं हि स्पर्धे सति बलवत्त्वहेतुर्भवति, अपवादेन सह च स्पर्धस्याभावः स्पष्ट एवेति, न च ययोः शास्त्रयोः परस्परं बाध्यबाधकभावो माऽस्तु तयोः स्पर्धः, यं प्रति स्पर्धस्तं प्रति परत्वेन प्रवृत्तौ का हानिः, तथा च णकचं प्रति बाध्यबाधकभावोऽपवादत्वमूलक इति न तत्र परत्वेन व्यवस्थाऽस्तु, टगादीन् प्रति तु न बाध्यबाधकभाव इति तत्र परत्वं व्यवस्थापकमस्त्विति वाच्यम्, यतो णकचा बाधितस्य "कर्मणोऽण्" [ ५. १. ७२. ] इत्यस्य प्रतिप्रसवार्थमिदं सूत्रमिति तद्धर्मतापन्नं सत् टगादिभिर्बाध्यमेवेति टगादिभिः सहास्य बाध्यबाधकभाव एव, णकचश्चेदं बाधकं प्रतिपदविधित्वादिति सर्वैरेवानेन सह बाध्यबाधकभाव एव, केनचिदिदं बाध्यं कस्यचिद् बाधकमिति प्राप्ते ब्रूमः–"कर्मणोऽण्" इति प्रथमपादीयसूत्रस्य प्रतिप्रसवार्थस्यास्य तद्धर्मत्वमिति न युक्तम्, तद्धर्मत्वे णकचो बाधकत्वानुपपत्तेः । तथा च णकचो बाधकं, टगादींश्चपरत्वाद् बाधते इति किमत्र चित्रम् । कर्मोपपदेऽपि णकच्-भविष्यन्त्यौ साधयति–**बहुलाधिकाराण्णकच्-भविष्यन्त्यावपि भवतः** इति, कर्मण्युपपदेऽपि णकचः शिष्टप्रयोगोपलब्धौ भविष्यन्त्याश्च प्रयोगे सति बाहुलकेनैव समाधेयमिति भावः । तदेवोदाहरति– **कटं कारको व्रजती**ति–"तृन्नुदन्ता०" [२. २. ९०.] इति षष्ठीनिषेधात् कर्मणि द्वितीया, इदं णकचि, एवम्– **ओदनं भोजको व्रजती**ति । भविष्यन्त्यामुदाहरति– **काण्डानि लविष्यामीति व्रजति, कम्बलं दास्यामीति व्रजती**ति–बाहुलकात् पूर्वसूत्रेण णकच् भविष्यन्ती च ज्ञेया ।। ५. ३. १४. ।।

---

भाववचनाः । ५. ३. १५. ।।

**त० प्र०– भाववचना घञ्-क्त्यादयस्ते क्रियायां क्रियार्थायामुपपदे वर्त्स्यत्यर्थे वर्तमानाद् धातोर्भवन्ति ।**

**क्रियार्थोपपदेन तुमा मा बाधिषतेति वचनम्, असरूपविध्यभावस्य ज्ञापितत्वात् । पाकाय व्रजति, पक्तये व्रजति, पचनाय व्रजति, पाचनायै व्रजति । वचनग्रहणाद् यो यथा विहितः स तथा भवति । "तुमोऽर्थे भाववचनात्" [ २. २. ६१. ] इति चतुर्थी ॥१५॥**

**श० म० न्यासानुसन्धानम्–भाव०** । ब्रुवन्तीति वचनाः, बहुलवचनात् कर्तरि अनः, भावस्य वचना भाववचनाः, भाववचनत्वं चात्र भावाधिकारविहितत्वात्, ते के इत्याह–**घञ्-क्त्यादय** इति– आदिपदादनडादिसंग्रहः । यद्यप्यकर्मकाद् धातोर्विहितानां वर्तमानादिविभक्तीनामपि भाववचनत्वं दृष्टं तथापि न भावाधिकारविहितत्वमिति तन्निरासः । नन्वसत्यप्यस्मिन् सूत्रे ते प्रत्ययाः क्रियार्थायां क्रियायामुपपदेऽन्यत्र च भविष्यन्तीति व्यर्थमिदं सूत्रमित्याशङ्कायामाह– **क्रियार्थोपपदेन तुमा मा बाधिषतेति वचनमिति**, अयमाशयः–यथा घञादयो भाववचनास्तथा तुमपि "क्त्वा तुमम् भावे" [ ५. १. ३५. ] इति वचनात्, घञादयश्च सामान्यविहिताः, तुम् च क्रियार्थोपपदे विहितो विशेषविहित इति तेऽनेन बाधिष्यन्तेऽसति विशेषवचने, तदर्थमिदं सूत्रमिति भावः । ननु तुमपि भविष्यति, तेऽपि पक्षे भविष्यन्त्यसरूपत्वादिति चेत् ! अत्राह–**असरूपविध्यभावस्य ज्ञापितत्वादिति**- ततश्च वचनं विना ते पक्षेऽपि न भविष्यन्तीति भावः । "डुपचींष् पाके" पचनं–पाकः, अत्रानेनघञि "क्तेऽनिट०" [ ४. १. १११. ] इति चस्य कत्वम् "ञ्णिति" [ ४. ३. ५०. ] इत्युपान्त्यवृद्धिश्च, "तुमोऽर्थे भाववचनात्" [ २. २. ६१. ] इति चतुर्थ्याः– **पाकाय व्रजतीति**, अत्र घञो भाववचनत्वं "भावाकर्त्रोः" [ ५. ३. १८. ] इति भावे विधानात्, एवमनेन क्तौ–**पक्तये व्रजतीति**– अत्र क्तेर्भाववचनत्वं "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति भावे क्तिविधानात्, **पचनाय व्रजतीति**–अत्रानेनानट्प्रत्ययः, अनटो भाववचनत्वं च "अनट्" [ ५. ३. १२४. ] इति भावेऽनटो विधानात् । एवं ण्यन्तात् पचेरनेनानप्रत्यये–**पाचनायै व्रजतीति**–अनस्यात्र भाववचनत्वं च "णि-वेत्त्यास०" [ ५. ३. १११. ] इति भावे स्त्रियामनस्य विधानात् । ननु भाववचना घञादयः प्रकृतिविशेषेभ्यो यथायथमुक्ता इह च प्रकृतिविशेषाणां पाठो नास्तीति सर्वाभ्यः प्रकृतिभ्योऽपि सर्व एव भाववचनाः प्रत्ययाः स्युरिति चेत् ? अत्राह–**वचनग्रहणाद् यो यथाविहितः स तथा भवती**ति, अयमाशयः–"भावे" इति कथनेऽपि भावे ये प्रत्यया उक्तास्ते स्युरेव, वचनग्रहणेन येषां याभ्यः प्रकृतिभ्यः परत्वे भाववाचकत्वं दृष्टं ते ताभ्य एव प्रकृतिभ्यः स्युरिति । उक्तोदाहरणेषु चतुर्थी केनेत्याह–**"तुमोऽर्थे भाववचनात्"** [ २. २. ६१. ] **इति चतुर्थी**ति ॥ ५. ३. १५. ॥

## पद-रुज-विश-स्पृशो घञ् । ५. ३. १६. ॥

**त० प्र०–एभ्यो धातुभ्यो घञ् प्रत्ययो भवति, कृत्वात् कर्तरि । वत्स्र्यतीत्यादि निवृत्तम् । पद्यते पत्स्यते अपादि पेदे वा-पादः, एवं-रागः, वेशः, स्पर्शो व्याधिविशेषः, स्पर्शो देवदत्तः कम्बलस्य, घकारः कत्वगत्वार्थः । ञकारो वृद्ध्यर्थः ॥१६॥**

**श० म० न्यासानुसन्धानम्–पद०** । अर्थविशेषस्यानभिधानादाह–**कृत्वात् कर्तरी**ति–"कर्तरि" [ ५. १. ३. ] इत्यनेन कर्तरि घञ् भवतीत्यर्थः, अथवा घञो भावाकर्त्रोर्हिष्टतयाऽत्रापि तथा भ्रमो मा भूदित्येतदर्थमिहास्यार्थविशेषकथनमिति । कालविशेषविवक्षाऽभावोऽपीत्याह–**वत्स्र्यतीत्यादि निवृत्तमि**ति–लक्ष्यानुसारि व्याख्यानमिह मूलम्, प्रकृतिविशेषनिर्देशात् प्रकरणान्तरत्वमिति वा तदननुवृत्तौ हेतुः, आदिपदात् क्रियार्थायां क्रियायामुपपदे इति च ज्ञेयम् । कालत्रयेऽप्ययं प्रत्ययो भवतीति तथैव विशृङ्खलाति–**पद्यते पत्स्यते अपादि पेदे वे**ति- "पदिच् गतौ" इति दैवादिक आत्मनेपदी अनिट् 'पद' धातुः, अतो वर्तमानायां तेप्रत्यये श्यविकरणे च–**पद्यते**, भविष्यन्तीस्यतेप्रत्यये–**पत्स्यते**, अद्यतनीतप्रत्यये "ञिच् ते पदस्तलुक् च" [ ३. ४. ६६. ] इति ञिचि तलोपे उपान्त्यवृद्धौ च– **अपादि**, परोक्षाया एप्रत्यये च "अनादेशादे०" [ ४. १. २४. ] इत्यत एकारे द्वित्वप्रतिषेधे च– **पेदे**, वाशब्दोऽन्यतमक्रियापदार्थेऽयं प्रत्ययो भवतीति सूचनार्थः । तथा च कालविशेषे कालसामान्ये वा पदो घञि उपान्त्यवृद्धौ–**पादः** । एवं "रुजोंत् भङ्गे" इत्यतो घञि उपान्त्यगुणे "क्तेऽनिटः" [ ४. १. १११. ] इति जस्य गत्वे–**रोगः** । "विशंत् प्रवेशने" अतो घञि

**वेशो** वेश्यावाटः । "स्पृशंत् स्पर्शे" अतः प्राग्वत् कर्तरि घञि–**स्पर्शः**, तदर्थमाह–**व्याधिविशेषः**, एवं–**स्पर्शो देवदत्तः कम्बलस्येति**, अनेन व्याधिवाचकत्व एव घञिति परमतमननुमतमिति द्योतितम् । पाणिनीये हि भाष्ये "पदरुजविशस्पृशो घञ्" [ ३. ३. १६. ] इति सूत्रे–"स्पृश उपतापे । स्पृश उपतापे इति वक्तव्यम् । इह मा भूत्–कम्बलस्पर्श इति" इत्युक्तम् । कैयटेन च "उपतापो रोगः । स्पर्शो नाम व्याधिविशेषः । अन्यत्र पचाद्यज् भवति । स्वरे विशेषः ।" इत्युक्तम् । तथा च घञि सति आद्युदात्तत्वम्, अचि चान्तोदात्तत्वमित्येव तत्र भेदो न रूपे । स्वमते च स्वरस्याननुशासनात् तन्निमित्तकभेदस्यानाश्रयणान्न रोगविशेषे नियमनं स्वीकृतमिति । घञि घकारो ञकारश्चानुबन्धः, तयोः सार्थक्यमाह–**घकारः कत्वगत्वार्थः** इति "क्तेऽनिटश्चजोः कगौ घिति" इत्यनेनेत्यर्थः । **ञकारो वृद्ध्यर्थः** इति–"ञिणि" [ ४. ३. ५०. ] इत्यादिनेत्यर्थः ॥ ५. ३. १६. ॥

## सर्तेः स्थिर-व्याधि-बल-मत्स्ये । ५. ३. १७. ॥

**त० प्र०–सर्तेरेषु कर्तृषु घञ् भवति । स्थिरे–सरति कालान्तरमिति सारः स्थिरः पदार्थः, सालसारः, खदिरसारः, कार्ष्यसारः । व्याध्यादौ– अतीसारो व्याधिः, सारो बलम्, विसारो मत्स्यः ॥१७॥**

**श० म० न्यासानुसन्धानम्–सर्तेः० ।** **सर्तेरिति**–"सृं गतौ" इत्यस्माद् धातोरित्यर्थः । **एषु** इति–स्थिर-व्याधि-बल-मत्स्येषु, **कर्तृषु** इति–एतेन स्थिरादिग्रहणं प्रत्ययार्थस्य कर्तृविशेषणं न तूपपदमिति दर्शयति । **घञ् भवतीति**– तृजाद्यपवादः । यथोद्देशन्यायेन पूर्वं स्थिरे उदाहर्तुमवतारयति–**स्थिरे** इति । स्थिरत्वं नाम कालान्तरप्राप्तिमत्त्वमिति कैयटादिकृतलक्षणमनुमत्याह–**सरतिकालान्तरमितिसारः**, एतदर्थमाह–**स्थिरः पदार्थः** इति । एवं–**सालसारः, खदिरसारः, कार्ष्यसारः** इति–सालो वृक्षविशेषः, तस्य सार इति षष्ठीसमासः, एवं खदिरस्य वृक्षविशेषस्य सारः खदिरसारः, कार्ष्यस्य सालवृक्षस्य सारः कार्ष्यसारः । व्याध्यादेश्चाशुविनाशित्वेनास्थिरत्वमिति तेषां पृथगुपादानम्, तत्रोदाहर्तुमाह–**व्याध्यादाविति, अतीसारो व्याधिरिति**– "घञ्युपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति दीर्घः । **सारो बलम्, विसारो मत्स्यः** इति । कालान्तरसरणे कालान्तरस्य नियतकालविशेषपरत्वस्वीकारात्, व्याध्यादेश्च तादृशनियतकालान्तरप्राप्तेरनिश्चितत्वेनास्थिरत्वात् तेषां पृथगुपादानमिति न कोऽपि शङ्कावसरः, तथा च स्थिरार्थकस्य सालसारादिरेवोदाहरणम् । बलार्थस्य सारो बलमित्येव, तस्यापि नियतकालप्राप्तिमत्त्वाभावादस्थिरत्वमेव, कस्य बलं कियत्कालं स्थास्यतीत्यस्यानियमादिति ॥ ५. ३. १७. ॥

## भावा-ऽकर्त्रोः । ५. ३. १८. ॥

**त० प्र०– भावे वाच्ये कर्तृवर्जिते कारके च सर्वधातुभ्यो घञ् भवति । पचनं पाकः, एवं-रागः, त्यागः; प्रकुर्वन्ति तमिति–प्राकारः, एवं-प्रासः, प्रसेवः, समाहारः, कारः, करणाधिकरणयोरनट् तदपवादश्च व्यञ्जनान्तेभ्यो घञ् वक्ष्यते । दाशन्तेऽस्मा इति–दाशः, तालव्योपान्त्योऽयम् । आहरन्त्यस्मादित्याहारः । असंज्ञायामपि– दायो दत्तः, लाभो लब्धः । 'कृतः कटो हृतो भारः' इत्यादौ बहुलाधिकारान्न भवति । अकर्त्रीति पर्युदासेन कारकाश्रयणात् संबन्धे न भवति– देवदत्तस्य पच्यते । भावा-ऽकर्त्रोरिति किम् ? पचः । भावो भवत्यर्थः साध्यरूपः क्रियासामान्यं धात्वर्थः, स धातुनैवोच्यते तत्रैव च त्यादयः क्त्वातुमम्तव्यानीयादयश्च भवन्ति । यस्तु भावो धात्वर्थधर्मः सिद्धता नाम लिङ्गसंख्यायोगी स द्रव्यवद् धात्वर्थान्वयः, तत्रायं घञादिविधिः, तेन तद्योगे लिङ्गवचनभेदः सिद्धो भवति–पाकः पाकौ पाकाः, पचनं पचने पचनानि, पक्तिः पक्ती पक्तय इति ॥१८॥**

**श० म० न्यासानुसन्धानम्– भावा० । भावे वाच्ये** इति–भावपदार्थमग्रे निर्वक्ष्यति, तस्मिन् वाच्ये तन्मात्रप्रतिपिपादयिषायामिति भावः । यद्यपि भावो धात्वन्तर्गत एवार्थः, स च धातुनैवोक्त इति तदभिधानाय प्रत्ययस्य नावश्यकता, तथापि भावस्य साध्यत्वसिद्धत्वभेदेन द्वैविध्यात् साध्यत्वावस्थापन्नो भावो धातुवाच्यः, सिद्धत्वावस्थापन्नो घञादिवाच्य इति विवेकः । सर्वं चैतदग्रे स्फुटीभविष्यति । अकर्तृपदेन कर्तृभिन्नः कर्तृसदृशोऽर्थो ग्राह्यः * नञिवयुक्तमन्यसदृशाधिकरणे, तथा ह्यर्थगतिः * इति न्यायात्, स च कारकरूप एव भवितुमर्हति,

अस्ति हि कर्तरि कारकत्वं तद्भिन्नेषु कर्मादिष्वप्यपि चेति तद्भिन्नत्वे सति तत्सदृशत्वात् कारकान्तराणाम्, अत आह– **कर्तृवर्जिते कारके चे**ति । "डुपचींष् पाके" अनेन भावे घञि पचनं–**पाकः**, चकारस्य कः, उपान्त्यस्य च वृद्धिः । एवं–"रञ्जीं रागे" "रञ्जींच् रागे" रञ्जनं–**रागः**, अनेन भावे घञि "घञि भावकरणे" [ ४. २. ५२. ] इति नलोपे "क्तेऽनिटश्चजोः कगौ घिति" [ ४. १. १११. ] इति जस्य गत्वे च–राग इति । "त्यजं हानौ" त्यजनं–**त्यागः**, अत्राप्युपान्त्यवृद्धिः, जकारस्य च गकारो बोध्यः । अथ कर्मण्युदाहरति–**प्रकुर्वन्ति तमिति–प्राकारः** इति–अत्र "डुकृंग् करणे" इति कृधातुः, "नामिनो०" [ ४. ३. ५१. ] इति वृद्धिः, "घञ्युपसर्गस्य बहुलम्" [ ३ २. ८६. ] इति दीर्घो विज्ञेयः । "असूच् क्षेपणे" प्रास्यन्ति तमिति– **प्रासः** । "षिवूच् उतौ" उतिर्वानं तन्तुसन्तान इत्यर्थः, प्रसीव्यन्ति तमिति– **प्रसेवः** । "हृंग् हरणे" समाहरन्ति तमिति–**समाहारः** । कुर्वन्ति तमिति–**कारः** । अथ करणोदाहरणावसरेऽपि न तत्रोदाहार्यं, तत्र कारणमाह–**करणाधिकरणयोरनट् तदपवादश्च व्यञ्जनान्तेभ्यो घञ् वक्ष्यत** इति, अयमाशयः–अनेन सूत्रेण हि सामान्यतः सर्वेष्वपि कारकेषु वाच्येषु घञ् विधीयत इत्युत्सर्गत्वमस्य, करणाधिकरणयोश्चार्थयोरनट् विशिष्य विधीयते परत्वं च तस्येति तयोरर्थयोः स एव भविष्यति । यत्र च व्यञ्जनान्तधातुस्थले सोऽप्यपवादेन घञा बाध्यते तत्र मा प्रवर्ततां नामेत्यन्यत् । सम्प्रदाने उदाहरति–**दाशन्तेऽस्मा इति–दाशः** इति– "दाशृग् दाने" इति दाशृधातोरनेन घञि–दाशः, 'दाशन्ते अस्मै इति' इत्यवस्थायाम् "एदोतः पदान्तेऽस्य लुक्" [ १. २. २७. ] इत्यकारलोपः, "एदैतोऽयाय्" [ १. २. २३. ] इत्यैकारस्यायादेशः, "स्वरे वा" [ १. ३. २४. ] इति यकारस्य लोपः, तस्मिन् सति चासन्धौ दाशन्तेऽस्मा इतीति । **तालव्योपान्त्योऽयमि**ति–अयं दाशशब्दो हि तालव्यशकारोपान्त्यः, शकारान्तधातुनिष्पन्नत्वात्, न तु "दासृग् दाने" इति सकारान्तेन निष्पन्न इति भावः । अथापादाने उदाहरति–**आहरन्त्यस्मादित्याहारः** इति–आङ्पूर्वात् "हृंग् हरणे" इत्यतो घञि वृद्धौ चाहारः । कैश्चित् कर्तृवर्जिते कारकेऽभिधेये संज्ञायामेव घञुक्तः । पाणिनीयेऽपि "अकर्तरि च कारके संज्ञायाम्" [ ३. ३. १९. ] इति सूत्रे संज्ञायामित्युक्तं, तत् स्वमते नेत्याह– **असंज्ञायामपी**ति, दीयते इति कर्मणि घञि– **दायो दत्तः**, एवं लभ्यते इति कर्मणि घञि–**लाभो लब्धः** इति । भाष्येऽप्युक्तसूत्रे– "संज्ञाग्रहणानर्थक्यं सर्वत्र च घञो दर्शनात् । संज्ञाग्रहणं चानर्थकम् । किं कारणम् ? सर्वत्र घञो दर्शनात् । असंज्ञायामपि हि घञ् दृश्यते । को भवता दायो दत्तः । को भवता लाभो लब्धः ।" इति । नन्वेवं संज्ञाया अन्यत्रापि कारके वाच्ये यदि घञ् भवति तर्हि कृतः कट इत्यर्थे कारः कट इति भवितव्यम्, हृतो भार इत्यर्थे हारो भार इति भवितव्यमिति चेत् ? अत्राह–'**कृतः कटो हृतो भार**' **इत्यादौ बहुलाधिकारान्न भवती**ति । भाष्येऽप्यस्यैवमेव परिहारः कृतः । तथाहि–यदि संज्ञाग्रहणं न क्रियतेऽतिप्रसङ्गो भवति । कृतः कट इत्यत्र कारः कट इति प्राप्नोति, अतिप्रसङ्ग इति चेदभिधानलक्षणत्वात् प्रत्ययस्य सिद्धम् । अतिप्रसङ्ग इति चेत् तन्न । किं कारणम् ? अभिधानलक्षणत्वात् प्रत्ययस्य सिद्धम् । अभिधानलक्षणाः कृत्-तद्धित-समासाः । अनभिधानान्न भविष्यन्ति ।" इति । तत्रापि बहुलग्रहणं सर्वत्रानुवर्तत एव, तस्यैतदेव प्रयोजनं यत् यत्र यस्य प्रत्ययस्यार्थाभिधाने शक्तिर्दृष्टा स एव यथा स्यादिति । अकर्तृपदेन कर्तृभिन्ने विभक्त्यर्थे गृहीते सम्बन्धस्यापि विभक्त्यर्थत्वात् तत्रापि प्रत्ययः प्राप्नोतीत्याशङ्कां वारयति– **अकर्त्रिति पर्युदासेन कारकाश्रयणात् सम्बन्धे न भवति–देवदत्तस्य पच्यते** इति–उक्तं चैतत् पूर्वमेव । पदकृत्यं पृच्छति–**भावाकर्त्रोरिति किमि**ति । उत्तरयति–**पचः** इति–पचतीति-पचः, "अच्" [ ५. १. ४९. ] इति कर्तरि अच्, कर्तृत्वादत्र नास्य प्रवृत्तिरित्यर्थः । भावपदार्थं निर्वक्ति–**भावो भवत्यर्थः साध्यरूपः** इति– भवतेर्हि आत्मधारणमर्थः, स चानिष्पन्नस्य निष्पत्तिरेव, तच्च साध्यत्वमेवेति भावः । तदुक्तं भाष्येऽपि "भावे" [ ३. ३. १८. ] इति सूत्रे– "अथवा कृभ्वस्तयः क्रियासामान्यवाचिनः । क्रियाविशेषवाचिनः पचादयः । यच्चात्र पचतेर्भवतिर्भवति, न तद्भवतेः पचतिर्भवति । यच्च भवतेः पचतिर्भवति, न तत् पचतेर्भवतिर्भवति । किञ्च पचतेर्भवतिर्भवति ? क्रियासामान्यम् । किञ्च भवतेः पचतिर्भवति ? विशेषः" इति । अयमाशयः– सर्वेष्वपि पचादिधात्वर्थेषु भवत्यर्थः

साध्यत्वरूपोऽनुस्यूतः, न तथा पचत्यर्थो विशेषरूपः सर्वधात्वर्थेष्वनुस्यूतः, भवतेर्विशेषाभिधान एव पचतिः प्रयुज्यत इति । अयमर्थश्च लौकिकदृष्टान्तेनापि साधितस्तत्र, तथाहि–"तद्यथा–उपाध्यायस्य शिष्यो मातुलस्य भागिनेयं गत्वाह–उपाध्यायं भवानभिवादयतामिति । स गत्वा मातुलमभिवादयते । तथा मातुलस्य भागिनेय उपाध्यायस्य शिष्यं गत्वाह–मातुलं भवानभिवादयतामिति, स गत्वोपाध्यायमभिवादयते । एवमिहापि पचतेर्भवतौ यत् तन्निर्दिश्यते ।" इति । अयमाशयः– आचार्यस्योपाध्यायत्वधर्मः साधारणः स भागिनेयं प्रत्यप्यस्ति शिष्यं प्रत्यपि, परंतु मातुलत्वं शिष्यं प्रति नास्ति, भागिनेयं प्रत्येवास्ति । किन्तु तौ धर्मौ नैकेन शब्देन प्रतिपाद्यौ, किन्तु भिन्नाभ्यां शब्दाभ्याम् । एवं पचतेर्यो धर्मो भवत्यन्तर्गतः स एव भावपदेनाभिधेय इति । तदुक्तं कैयटेन–यथैकस्मिन् वस्तुनि मातुलत्वमुपाध्यायत्वं च भिन्नसम्बन्धाश्रयं परस्परमबाधेन व्यवस्थितं, तथा पाकादिषु विशेषरूपता भावशब्दस्य वाच्यं च सामान्यमिति । तदुक्तं हरिणा—

"आचार्यो मातुलश्चेति यथैको व्यपदिश्यते ।
सम्बन्धिभेदादर्थात्मा स विधिः पक्तिभावयोः ॥"
इति ।

तदेवाह– **क्रियासामान्यं धात्वर्थः** इति । येन यदुच्यते स एव तदर्थ इति नियमेनाह– **स धातुनैवोच्यते** इति । **तत्रैव च त्यादयः** इति– आख्यातविभक्तय इति भावः, तन्मात्रेऽभिधेये आख्यातविभक्त्यन्तस्य क्त्वातुमादेश्च प्रयोग इति । यद्यप्येष्वधिकोऽप्यर्थो भासते तथापि धात्वर्थमपि ते वदन्तीति भावः । त्यादिषु विभक्त्याश्रयवाचकत्वमिति वैयाकरणसमयेनात्र 'तत्रैव च त्यादयः' इत्युक्तेस्तत्रैवाभिधेये त्याद्यन्तस्य प्रयोग इत्येवार्थः करणीयः । **यस्तु भावो धात्वर्थधर्मः** इति– सामान्यरूपेण वर्तमानस्य साध्यत्वस्य विशेषेणावभासने हेतुः स तद्धर्म एव, स कीदृश इत्याह– **सिद्धता नाम लिङ्गसंख्यायोगी स द्रव्यवद् धात्वर्थादन्यः** इति– सिद्धता– सिद्धस्वरूपेण भासमानः सः, द्रव्यवत् लिङ्गसंख्या[कारक]-योगी, यथा द्रव्ये लिङ्ग-संख्यासंबन्धस्तथा तत्रापि, अत एव स धात्वर्थात् साध्यत्वरूपेण भासमानात्, अन्यो भिन्नः । युक्तं चैतत् धात्वर्थविशेषकस्य तस्य धात्वर्थभेदः स्वाभाविक एव । उक्तं च हरिणा–

"आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता ।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥
साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥" इति ।

अयमाशयः– पचतीत्याख्यातशब्दे 'पच्' इति धातुभागः, 'ति' इति प्रत्ययभागः, तत्र धातुभागेन साध्यत्वेन प्रतीतिः, प्रत्ययभागेन च सिद्धत्वेन साधनत्वेन वा कर्तृत्वादिरूपेण प्रतीतिः । एवं घञन्तप्रयोगेऽपि पच्धातुना साध्यत्वेनैव प्रतीतिः, प्रत्ययभागेन च सिद्धत्वेनेत्यत एव पाक इत्यत्र पुंस्त्वस्यैकत्वादेश्च संख्यायाः कर्त्रादिकारकस्य च सम्बन्धो भासते । अतोऽयं विशेषो घञादिप्रत्ययकृत एव 'तदागमे हि दृश्यते' इति न्यायात् । तदाह– **तत्रायं घञादिविधिरि**ति, **तेन** घञादीनां तादृशभाववाचकत्वेन, **तद्योगे** तेषां सम्बन्धे धातुपरस्वरूपे सति, **लिङ्गवचनभेदः सिद्धो भवती**ति– लिङ्गभेदो वचनभेदश्च सिध्यतीत्यर्थः । तदेव दर्शयति– **पाकः, पाकावि**त्यादिना, 'पाकः' इति घञन्ते पुंस्त्वम्, तथा च लिङ्गानुशासने– "पुंलिङ्गं······घघञौ······" [१] इति, घप्रत्ययान्तं घञ्प्रत्ययान्तं च नाम पुंलिङ्गं भवेदिति तदर्थः । पचनमित्यनडन्ते नपुंसकत्वम् । तथा च लिङ्गानुशासने– "····कृत्याः क्तानाः खल् त्रिन् भावे···"[६] इति, भावे विहिता ये कृत्याद्यास्तदन्तं नाम नपुंसकम्, क्ताना इति प्रश्लेषाद् बहुवचननिर्देशाच्च आन-अनट्-अना गृह्यन्ते । 'पक्तिः' इति क्त्यन्ते च स्त्रीत्वमिति । तथा च लिङ्गानुशासने– "······स्त्र्युक्ताः······" [६] इति, स्त्रियामुक्ता विहिताः स्त्र्युक्तास्तदन्तं नाम स्त्रीलिङ्गमिति तदर्थः, "स्त्रियां क्तिः" [५. ३. ९१.] इत्यनेन क्तिः स्त्रियां विहितः ।

अत्रेदं विचार्यते– भावशब्देन पुंलिङ्गेनार्थभूतेन विहिताः प्रत्ययाः पुंस्त्वेनैव भावं वक्ष्यन्तीति सर्वत्र पुंलिङ्ग एव भावो युक्तो न नपुंसकत्वादिप्रतीतिर्युक्तेति कथं लिङ्गभेद इति चेत् ? न–लिङ्गस्य भावशब्देऽविवक्षितत्वात् । तदुक्तं भाष्ये "भावे" [ ३. ३. १८. ] इति सूत्रे– "भावे सर्वलिङ्गो निर्देशः । किं प्रयोजनम् ? भावे सर्वलिङ्गो निर्देशः कर्तव्यः– भूतौ भवने

भावे इति। किं पुनः कारणं न सिध्यति। पुंलिङ्गेनायं निर्देशः क्रियते, एक वचनान्तेन च। तेन पुंलिङ्ग एव भावे एकवचने चैते प्रत्ययाः स्युः। स्त्रीनपुंसकयोर्द्विवचनबहुवचनयोश्च न स्युः। नात्र निर्देशस्तन्त्रम्। कथं पुनस्तेनैव च नामनिर्देशः क्रियते, तच्चातन्त्रं स्यात्। तत्कारी च भवांस्तद्द्वेषी च? नान्तरीयकत्वादत्र पुंलिङ्गेन निर्देशः क्रियते, एकवचनेन च। अवश्यं कयाचिद् विभक्त्या केनचिच्च लिङ्गेन निर्देशः कर्तव्यः। तद्यथा—कश्चिदन्नार्थी शालिकलापं सतुषं सपलालमाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मांसार्थी मत्स्यान् सशकलान् सकण्टकानाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति। एवमिहापि नान्तरीयकत्वात् पुंलिङ्गेन निर्देशः, एकवचनान्तेन च। नह्यत्र निर्देशस्तन्त्रम्। कयाचिद् विभक्त्या केनचिच्च लिङ्गेन निर्देशः कर्तव्यः॥" इति।

अयमत्र निष्कर्षः—यद्यपि शब्देन योऽर्थः प्रतिपाद्यते यल्लिङ्गसंख्यायुक्तस्तस्यैवाभिधायकेन तेन भाव्यमिति "स्त्रियां भावे" इति सामानाधिकरण्येन सम्बन्धासम्भवात् स्त्रियामकर्तरि च कारके क्तिन् प्रत्ययः स्यात्, भावे तु पुंसि। एवं नपुंसके भावे क्तः ["क्लीबे क्तः" [५. ३. १२३.] इत्यत्र चाकर्तरि च कारके इत्यस्य निवृत्तत्वात् कर्तरि क्तः स्यात्, भावे तु पुंसि। द्विवचनबहुवचनयोश्च पाकौ पाका इत्यादौ प्रत्यया न स्युरिति प्राप्नोति। तथापि सत्त्वभूतस्यार्थस्य विना लिङ्गं संख्यां च निर्देष्टुमशक्यतया तयोः शब्देनोपादानम्। शब्दसंस्कारमात्रमेव तदुपादाने प्रयोजनम्, किन्तु प्रयोगमूलत्वाद् व्याकरणस्मृतेः, प्रयोगे च सर्वलिङ्गसंख्ये भावे प्रत्ययानां दर्शनादिह लिङ्गसंख्ययोरविवक्षेति मन्तव्यम्। अत्र प्रत्ययमात्रस्य विधेयत्वेनार्थस्य च लोकसिद्धत्वेन सिद्धस्य च विधानाभावादनुवाद्यत्वमेवेत्यनुवाद्ये च लिङ्गसंख्ययोरविवक्षायाः सर्ववादिसम्मतत्वेनात्र 'भावे' इत्यत्रापि तदविवक्षा संगतेति तत्त्वम्॥ ५. ३. १८.॥

## इङोऽपादाने तु टिद् वा। ५. ३. १९.॥

**त० प्र०—इङो धातोर्भावाऽकर्त्रोर्घञ् भवति, अपादाने तु कारके वा टिद् भवति। अध्ययनमध्यायः, अधीयत इति-अध्यायः, उपेत्याधीयतेऽस्मादिति-उपाध्यायः। टिद्विधानसामर्थ्यात् स्त्रियां क्तिर्बाध्यते—उपाध्यायी उपाध्याया॥१९॥**

**श० म० न्यासानुसन्धानम्—इङो०।** "इङ्क् अध्ययने" नित्यमधिपूर्वोऽयम्। "युवर्ण०" [५. ३. २८.] इत्यलोऽपवादोऽयम्। भावे—**अध्ययनमध्यायः।** कर्मणि—**अधीयत इति-अध्यायः।** अपादाने—**उपेत्याधीयतेऽस्मादिति-उपाध्यायः** इति, अत्र घञ् वा टिद् भवति, तस्य फलं दर्शयति—**टिद्विधानसामर्थ्यात् स्त्रियां क्तिर्बाध्यते** इति—टित्त्वस्य हि "अणजे०" [२. ४. २०.] इत्यनेन स्त्रियां ङीप्रत्ययः फलम्, अथ यदि स्त्रियां क्तिर्भवेत् तदा टिद्विधानमेव विफलतां व्रजेदिति विधानसामर्थ्यात् क्तिर्बाध्यत इत्यर्थः। न चात्र प्रकरणेऽसरूपविध्यभावस्य ज्ञापितत्वेन घञा बाधितः क्तिर्न स्यादेवेति तद्बाधनार्थं स्त्रियां टित्त्वविधानमपार्थकमिति वाच्यम्, साजात्यात् प्रकृत्याश्रयस्यैव बाधः स्यान्न तु स्त्रीत्वरूपार्थस्येति स्त्रीत्वरूपार्थाश्रयनिमित्तं क्तिप्रत्ययं बाधितुं टित्त्वस्यावश्यकत्वात्, कृते च टित्त्वे तस्य स्त्रियामेव साफल्येन स्त्रीत्वनिमित्तस्यापि तस्य [क्तिप्रत्ययस्य] अनेन बाधः सिध्यतीति। तथा चापादाने वा टित्त्वात् यदा टित्त्वमाश्रीयते तदोक्तसूत्रेण ङीः, टित्त्वानाश्रयणे तु "आत्" [२. ४. १८.] इत्याप् भवति, तदेवोदाहरणयुगलेन सूचयति—**उपाध्यायी, उपाध्याया,** इति—उपेत्याधीयतेऽस्या इतीह वाक्यम्। यदा तूपाध्यायस्य स्त्रीति धवयोगो विवक्ष्यते तदा "मातुलाचार्योपाध्यायाद् वा" [२. ४. ६३.] इति नित्यं ङ्यां तद्योगे च वा 'आन्' इत्यन्तागमे—उपाध्यायानी, उपाध्यायीति। सर्वत्र घञि "नामिनो०" [४. ३. ५१.] इति वृद्धावायादेशः॥ ५. ३. १९.॥

## श्रो वायु-वर्ण-निवृते। ५. ३. २०.॥

**त० प्र०—'शॄ' इत्यस्माद् भावाऽकर्त्रोर्वाय्वादिष्वर्थेषु घञ् भवति। शीर्यते औषधादिभिरिति—शारो वायुः, मालिन्येन शीर्यते इति—शारो वर्णः, निवृतं निवरणं प्रावरणमित्यर्थः, निशीर्यते शीताद्युपद्रवो येन तत्—नीशारो**

निवृतम्, "गौरिवाकृतनीसारः प्रायेण शिशिरे कृशः" निवृता द्यूतोपकरणमिति कश्चित्, 'नियमेन वृता' इत्यन्वर्थात्, शारैरिव क्रीडितम्। एष्विति किम्? शरः ॥२०॥

**श० म० न्यासानुसन्धानम्—श्रो०।** "शॄश् हिंसायाम्" **शीर्यते औषधादिभिरिति—शारो वायुरिति**—अत्र कर्मणि घञ्, तस्मिन् परे च वृद्धिः। **मालिन्येन शीर्यत इति— शारो वर्णः** इति—अत्रापि कर्मणि घञ्, शारः कर्बुरवर्णः। निवृतपदार्थमाह— **निवृतं निवरणमिति**, नैतेनापि स्पष्टावगतिरित्याह—**प्रावरणमित्यर्थः** इति—शीतादिदुःखोपशमनहेतुर्निवरणमुच्यत इति भावः। क्वचित् निवरणस्थाने निवारणेति पाठः। **निशीर्यते शीताद्युपद्रवो येन तत्—नीशारो निवृतमिति**— अत्र करणे घञ्, "घञ्युपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति दीर्घत्वम्, नीशारो हिमानिलापहं वस्त्रमित्यर्थः। 'बाहुलकात् परमप्यनटं घं वा बाधते घञ् प्रत्ययः' इति लघुन्यासकारः। उक्तार्थे प्राचीनकविप्रयोगमाह—**"गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः।"** इति—अकृतशीतनिवारण इत्यर्थः। प्रकृतसूत्रेऽर्थपरिगणनाद् द्यूतोपकरणविषये कथं शारशब्दस्य प्रयोग इत्याशङ्कायामाह—**निवृता द्यूतोपकरणमिति कश्चिदिति**, तत्र हेतुमाह—**'नियमेन वृता' इत्यन्वर्थादिति**—द्यूतक्रीडायां नियमनं शारिस्वीकारश्च भवति, तत्र कविप्रयोगमाह—**शारैरिव क्रीडितमिति**, "शारः शारिश्च खेलनी" इत्यभिधानचिन्तामणिः। समाहारसमासेन निर्देशात् तस्य ह्रस्वत्वेन सूत्रे निर्देश इति तत्संग्रहः। नचैवं मति निवृतग्रहणाभावे प्रावरणे कथं शॄधातोर्घञिति "गौरिवाकृतनीशारः" इति महाकविप्रयोगः कथं संगच्छतामिति वाच्यम्, उभयोस्तन्त्रेण निर्देशस्वीकारात्। तत्त्वबोधिन्यां तु—'ननु दक्षिणप्रसव्यगामिनां शाराणामिति कथं प्रयोगः? वायुवर्णेत्यर्थपरिगणनादिति चेत्? अत्राहुः—अत एव वार्तिकप्रयोगादक्षेष्वपि शृणातेर्घञ्' इत्युक्तम्। पदकृत्यं पृच्छति—**एष्विति किमिति**, उत्तरयति—**शरः** इति—शृणन्ति तेनेति शरः "पुन्नाम्नि घः" [ ५. ३. १३०. ] इति घः। अत्र बाणाद्यर्थत्वेन परिगणितार्थाभावान्नास्य प्रवृत्तिः॥ ५. ३. २०.॥

## निरभेः पू-ल्वः। ५. ३. २१॥

**त० प्र०—'पू' इति पूग्-पूङोः सामान्येन ग्रहणम्, निरभिपूर्वाभ्यां यथासंख्यं पू-लूभ्यां परो भावाऽकर्त्रोर्घञ् भवति। निष्पूयते—निष्पावः, अभिलावः॥२१॥**

**श० म० न्यासानुसन्धानम्—निर०।** पूधातुर्द्विविधः—"पूङ् पवने" इति, "पूग्श् पवने" इति च, तत्र कस्य ग्रहणमित्याशङ्कायामाह—**'पू' इति पूग्-पूङोः सामान्येन ग्रहणमिति**— विशेषानुपादानेन विशेषग्रहणे विनिगमकाभावादुभयोर्ग्रहणमित्यर्थः। **यथासंख्यमिति**— * यथासंख्यमनुदेशः समसंख्यानाम् * इति न्यायेन निरुपसर्गेण पुवः सम्बन्धः, अभिना च लुवः। ननु च 'पूग् पूङ् लू' इति त्रयो धातवः, उपसर्गौ तु द्वौ, अतः संख्यावैषम्याद् यथासंख्येन न भवितव्यमिति चेत्? न— धातुरूपमुत्सृष्टानुबन्धसामान्यमेकमेव, ततो नास्ति वैषम्यमित्यदोषः। एवं निर्देशसाम्यात् 'निस् निर्' इत्युभयोरपि ग्रहणम्। **निष्पूयते** इति कर्मणि घञि वृद्धावावादेशे "निर्दुर्बहिराविष्प्रादुश्चतुराम्" [ २. ३. ९. ] इति षत्वे च— **निष्पावः**, अयं कङ्करे राजमाषे श्वेतशिम्बिधान्यादौ च वर्तते, एवं करणेऽपि भवति, तथाहि— निष्पूयते तुषाद्यपनयनेन शोध्यतेऽनेनेति— निष्पावः सूर्पादिवायौ, तेन हि खलस्थधान्यादिकं कङ्करादिशून्यं करोति। "लूग्श् छेदने" अभिलवनम्—**अभिलावः**॥५. ३. २१.॥

## रोरुपसर्गात्। ५. ३. २२॥

**त० प्र०—उपसर्गपूर्वाद् रौतेर्भावाऽकर्त्रोर्घञ् भवति। संरवणं-संरावः, उपरावः, विरावः। उपसर्गादिति किम्? रवः। संराविणमित्यत्र ञिन् बाधकः। कथं रावः? बहुलाधिकारात्॥२२॥**

**श० म० न्यासानुसन्धानम्— रो०।** "रुक् शब्दे" भावे— **संरवणं— संरावः**, एवमुपरवणं विरवणमिति— **उपरावः, विरावः।** "युवर्ण०" [ ५. ३. २८. ] इत्यलोऽपवादः। पदकृत्यं पृच्छति— **उपसर्गादिति किमिति**, उत्तरयति— **रवः**, अत्रोपसर्गतः परत्वाभावादस्याप्रवृत्तौ "युवर्ण०" [ ५. ३. २८. ] इत्यल् भवतीत्यर्थः। अनेन विहितस्य घञो विशेषतो रुधातोर्विहितत्वमिति सर्वधातुभ्यः सामान्येन विहितस्य ञिनो बाधकत्वमित्याशङ्क्या

सांराविणमित्यत्रायमेव स्यादिति संदेहमपाकरोति– **सांराविणमित्यत्र ञिन् बाधक**: इति, अयमाशयः– यदि सर्वोऽपि विषयोऽस्य सूत्रस्य "अभिव्याप्तौ भावेऽन-ञिन्" [ ५. ३. ६०. ] इति परेण सूत्रेण व्याप्तः स्यात्, स्यादिदं सूत्रं तस्य बाधकम्, किन्तु तथा नास्ति, अभिव्याप्तेरन्यत्रास्य चारितार्थ्यादिति परत्वात् सोऽस्य बाधक इति। समन्ताद् राव इति "अभिव्याप्तौ०" [ ५. ३. ६०. ] इति ञिनि ततः स्वार्थे "नित्यं ञ-ञिनोऽण्" [ ७. ३. ५८. ] इत्यणि "नोऽपदस्य तद्धिते" [ ७. ४. ६१. ] इति प्राप्तस्यान्त्यस्वरादिलोपस्य "अनपत्ये" [ ७. ४. ५५. ] इति निषेधे सांराविणमिति। **कथं रावः ?** इति– उपसर्गतः परत्वाभावेऽपि कथमिह घञ् इति शङ्काशयः, उत्तरयति– **बहुलाधिकारादि**ति– बहुलाधिकारबलात् क्वचिदुपसर्गाभावेऽपि भवतीत्यर्थः, अन्यथा बहुलाधिकारो विफलो भवेत् ॥ ५. ३. २२. ॥

## भू-श्र्योदऽल । ५. ३. २३. ॥

**त० प्र०–'भू श्रि अद्' इत्येतेभ्य उपसर्गपूर्वेभ्यो भावाकर्त्रोरल् प्रत्ययो भवति । प्रभवः, विभवः, संभवः; प्रश्रयः, प्रतिश्रयः, संश्रयः; प्रघसः, विघसः, संघसः । उपसर्गादित्येव**– भावः, श्रायः, घासः । **भू-श्र्योरुपसर्गादेवेति नियमार्थं वचनम् । कथं प्रभावः, विभावः, अनुभावः ? बहुलाधिकारात्, प्रकृष्टो भाव इत्यादिप्रादिसमासो वा । लकारो "मिग्-मीगोऽखलचलि" [ ४. २. ८. ] इत्यत्र विशेषणार्थः ॥ २३ ॥**

**श० म० न्यासानुसन्धानम्– भू०** । "भू सत्तायाम्" उपसर्गवशाच्च धातोरनेकोऽर्थः प्रकाशते, यथा प्रभवतीति स्वाम्यर्थः प्रथमत उपलम्भश्च । पराभवति परिभवति अभिभवतीति तिरस्कारः। संभवतीति जन्मार्थः प्रमाणानतिरेकेण धारणं च । अनुभवतीति संवेदनम् । विभवतीति व्याप्तिः । आभवतीति भागागतिः । उद्भवतीति उद्भेदः । प्रतिभवतीति लग्नकत्वमिति । भवतेः सोपसर्गादनेनालि गुणे– **प्रभवः, विभवः, संभवः** । "श्रिग् सेवायाम्" **प्रश्रयः, प्रतिश्रयः, संश्रयः** । "अदंक् भक्षणे" इति सोपसर्गादत्तेरलि "घस्लृ सनद्यतनीघञचलि" [ ४. ४. १७. ] इति घसादेशे– **प्रघसः, विघसः, संघसः** । उपसर्गादित्यस्य पूर्वसूत्रादनुवृत्तेराह– **उपसर्गादित्येवे**ति, व्यावर्त्यं दर्शयति– **भावः** इति– अत्र पूर्वेण घञ्, एवं **श्रायः, घासः** इत्यत्रापि ज्ञेयम् । ननु भूधातोरुवर्णान्तत्वेन श्रिधातोरिवर्णान्तत्वेन च "युवर्ण०" [ ५. ३. २८. ] इति सामान्यसूत्रेणैव सिद्धेरनेनालो विधानं निरर्थकमिति चेत् ? अत्राह– **भू-श्र्योरुपसर्गादेवेति नियमार्थमि**ति– उपसर्गात् परत्व एवाल् नान्यत्रेति भावाकर्त्रोर्भवः श्रय इति प्रयोगो नेति भावः । क्वचित्तु कविप्रयोगे भवतेरप्यल् भावे पठ्यते, यथा कालिदासेन रघुवंशे–

"दिशः प्रसेदुर्मरुतो ववुः सुखाः
प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं
भवो हि लोकाभ्युदयाय तादृशाम् ॥"

इति पद्ये भव इत्यस्य भावे प्रयोगः कृतः, स च बाहुलकादेव समाधेयः । एवमुपसर्गपूर्वकत्वे कथं घञिति शङ्कते– **कथं प्रभावः, विभावः, अनुभावः ?** इति, तस्यापि तदेव समाधानमित्याह– **बहुलाधिकारादि**ति। नन्वियमगतिकगतिरिति चेत् ? अत्राह– **प्रकृष्टो भाव इति प्रादिसमासो वे**ति– भवतेर्भावं संसाध्य पश्चात् "प्रात्यव०" [ ३. १. ४७. ] इति प्रशब्दस्य भावशब्देन सह समास इति भावः । लकारस्यानुबन्धस्य प्रयोगार्थत्वाभावस्य इष्टतया तत्फलमाह– **"मिग्-मीगोऽखलचलि" [ ४. २. ८. ] इत्यत्र विशेषणार्थः** इति– तत्र चालि आत्वं पर्युदस्यते, अयमेव चाल् अग्रे गच्छति, तथा च "युवर्ण०" [ ५. ३. २८. ] इति विहितेऽलि मय इत्यादौ "मिग्-मीगो०" [ ४. २. ८. ] इत्यात्वं नेति भावः । तदर्थमनुबन्धान्तरकरणे तस्यैव च "मिग्-मीगो०" इत्यत्र विशेषणे च न कोऽपि विशेष इति न तदाशङ्कनीयमिति लकार एव पठनीय इति भावः ॥ ५. ३. २३. ॥

## न्यादो नवा । ५. ३. २४. ॥

**त० प्र०– निपूर्वाददेरलि घस्लृभावोऽकारस्य दीर्घत्वं च वा निपात्यते । न्यादः, निघसः ॥२४॥**

**श० म० न्यासानुसन्धानम्– न्या०** । निपातनसूत्रमिदम्, तत्र प्रकृतिं प्रत्ययं निपात्यं च दर्शयति– **निपूर्वाददेरलि०** इत्यादि, पूर्वेणाल् प्राप्त एव, केवलं 'घस्लृ'-आदेशोऽनेन विकल्प्यतेऽतो वा दीर्घत्वं च । निपातने–

**न्याद** इति, निपातनाभावे च पूर्वेण **निघस** इति ॥ ५. ३. २४. ॥

### सं-नि-व्युपाद् यमः । ५. ३. २५. ॥

**त० प्र०— एभ्य उपसर्गेभ्यः पराद् यमेर्भावा-ऽकर्त्रोरल् वा भवति । संयमः, संयामः; नियमः, नियामः; वियमः, वियामः; उपयमः, उपयामः ॥२५॥**

**श० म० न्यासानुसन्धानम्— सं-नि०** । 'सम् नि वि उप' एषां समाहारः । "यमू उपरमे" उपरमो निवृत्तिः, अतः सोपसर्गाद् वाऽलि पक्षे घञि च—**संयमः, संयामः नियमः, नियामः; वियमः, वियामः; उपयमः, उपयामः** ॥ ५. ३. २५. ॥

### नेर्नद-गद-पठ-स्वन-क्वणः । ५. ३. २६. ॥

**त० प्र०— नेरुपसर्गात् परेभ्य एभ्यो भावा-ऽकर्त्रोरल् प्रत्ययो वा भवति । निनदः, निनादः; निगदः, निगादः; निपठः, निपाठः; निस्वनः, निस्वानः; निक्वणः, निक्वाणः ॥२६॥**

**श० म० न्यासानुसन्धानम्— ने०** । 'नद गद पठ स्वन क्वण्' एषां समाहारः । "णद अव्यक्ते शब्दे" "गद व्यक्तायां वाचि" "पठ व्यक्तायां वाचि" "स्वन शब्दे" "क्वण शब्दे" शब्दः शब्दक्रिया । निपूर्वादेभ्यो वाऽलि पक्षे घञि च— **निनदः, निनादः; निगदः, निगादः; निपठः, निपाठः; निस्वनः, निस्वानः; निक्वणः, निक्वाणः** ॥ ५. ३. २६. ॥

### वैणे क्वणः । ५. ३. २७. ॥

**त० प्र०— वीणायां भवो— वैणः, वैणेऽर्थे वर्तमानादुपसर्गपूर्वात् क्वणेर्भावाऽकर्त्रोरल् वा भवति । प्रक्वणो वीणायाः, प्रक्वाणो वीणायाः; एवं— निक्वणः, निक्वाणः । वैण इति किम् ? प्रक्वाणः शृङ्खलस्य । कथं क्वणः क्वाणो वीणायाः ? "नवा क्वण०" [ ५. ३. ४८. ] इत्यादिना सामान्येन विधानाद् वैणेऽपि भवति ॥२७॥**

**श० म० न्यासानुसन्धानम्— वैणे०** । वैणपदं व्याख्याति— **वीणायां भवो वैणः** इति ।

"निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ।
वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ॥"

इत्यमरेणापि वीणायाः क्वणिते तस्य प्रयुक्तत्वावगतेरिति भावः । सोपसर्गात् क्वणेरनेन वाऽलि पक्षे घञि च— **प्रक्वणो वीणायाः, प्रक्वाणो वीणायाः** इति, अतिदिशति— **एवं— निक्वणः, निक्वाणः** इति— पूर्वेणापि तथासिद्धौ न वैणार्थप्रतीतिः । पदकृत्यं पृच्छति— **वैण इति** किमिति, उत्तरयति— **प्रक्वाणः शृङ्खलस्ये**ति— अत्र घञेव भवति । ननु वैणेऽर्थेऽनेन सोपसर्गादेव वाल् विधीयत इति निरुपसर्गस्य कथं क्वणः क्वाण इति शङ्कते— **कथं क्वणः क्वाणो वीणायाः** इति, समाधत्ते— **"नवा क्वण०" [ ५. ३. ४८. ] इत्यादिना सामान्येन विधानाद् वैणेऽपि भवती**ति—सामान्यतो विहितस्य विशेषेऽपि सामान्यधर्ममादाय प्रयोगे बाधकाभाव इति भावः । सामान्ये विशेषप्रयोगोऽनुचितो न तु विशेषे सामान्यप्रयोग इति भावः, यथा मनुष्योऽपि जीव इति कथयितुं शक्यते, न तु पशुर्मनुष्य इति, तथा क्वाणक्वणयोर्वाद्यान्तरशब्दे वीणाशब्दे च प्रयोगः सुकरः । क्वणक्वाणशब्दौ शब्दरूपार्थे एव वर्तेते किन्तु वीणाशब्दसान्निध्यात् तत्र वीणाभवत्वं प्रतीयत इति निष्कर्षः ॥ ५. ३. २७. ॥

### युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः । ५. ३. २८. ॥

**त० प्र०—'उपसर्गाद् वा इति च निवृत्तम् । इवर्णान्तेभ्य उवर्णान्तेभ्यो वृ-दृ-वश-रण-गमिभ्य ऋकारान्तेभ्यो ग्रहेश्च धातोर्भावाऽकर्त्रोरल् भवति । घञोऽपवादः । चयः, निश्चयः जयः, क्षयः, क्रयः; यवः, रवः; नवः; स्तवः, लवः, पवः; वारः, प्रवरः; दरः, आदरः, वशः, रणः, गमः, अवगमः; कृ-करः, गॄ-गरः, तॄ-तरः वॄ-वरः, शॄ शरः, ग्रहः । कथं वारः समूहः, वारोऽवसरः, वारः क्रियाभ्यावृत्तिः ? बहुलाधिकाराद् घञ् । परिवार इति तु ण्यन्तादचि सिद्धम् ॥ २८ ॥**

**श० म० न्यासानुसन्धानम्—युवर्ण० । उपसर्गाद् वेति निवृत्तमि**ति— "आङो रु-प्लोः" [ ५. ३. ४९. ] इति सूत्रकरणादित्यर्थः, तथा चानुपसर्गादपि नित्यमेव, अल् एव न तु घञिति भावः । तदाह— **घञोऽपवादः** इति । इश्च उश्च— यु, तादृशश्चासौ वर्णश्च— युवर्णः, द्वन्द्वान्ते श्रूयमाणतया प्रत्येकमन्वयो वर्णशब्दस्य, विशेषणतया विज्ञानाच्च तदन्तविज्ञानमित्याह— **इवर्णान्तेभ्य उवर्णान्तेभ्य** इति, वृप्रभृतीनां स्वरूपेण ग्रहणमित्याह— **वृ-दृ-वश-रण-गमिभ्य**' इति, 'ऋद्' इत्यनेन ऋकारो

ग्राह्यः, तस्य विशेषणतया विवक्षणात् तदन्तविज्ञानमित्याह– **ऋकारान्तेभ्यः** इति ग्रहेः स्वरूपेण ग्रहणमित्याह– **ग्रहेश्च धातोरिति**। "चिगट् चयने" अतोऽलि गुणे च– **चयः**, 'निर्'पूर्वस्य तु **निश्चयः**। "जि जये" **जयः**। "क्षि क्षये" **क्षयः**। "डुक्रींग्श् द्रव्यविनिमये" **क्रयः**। "युक् मिश्रणे" **यवः**। "रुक् शब्दे" **रवः**। "णुक् स्तुतौ" **नवः**। "ष्टुंग्क् स्तुतौ" **स्तवः**। "लूग्श् छेदने" **लवः**। "पूङ् पवने" "पूग्श् पवने" **पवः**। "वृग्ट् वरणे" "वृङ्श् संभक्तौ" **वरः**, **प्रवरः**। "दृङ्त् आदरे" दरः, **आदरः**। "वशक् कान्तौ" कान्तिरिच्छा, **वशः**। "रण शब्दे" **रणः**। "गम्लृ गतौ" **गमः**, **अवगमः**। "कॄत् विक्षेपे" "कॄश् हिंसायाम्" **करः**। "गॄत् निगरणे" निगरणं भोजनम्, "गॄश् शब्दे" **गरः**। "तॄ प्लवनतरणयोः" **तरः**। "दॄश् विदारणे" **दरः**। "शॄश् हिंसायाम्" **शरः**। "ग्रहीश् उपादाने" उपादानं स्वीकारः, **ग्रहः**। शङ्कते– **कथं वारः समूहः, वारोऽवसरः, वारः क्रियाभ्यावृत्तिः ?** इति– यदि च घञोऽपवादोऽयं तर्हि कथं वारशब्दस्य समूहादिषु प्रयोग इति शङ्काशयः, समाधत्ते– **बहुलाधिकाराद् घञिति**। परिवारयतीत्यर्थे परिवार इत्यत्र न घञ् किन्तु "अच्" [ ५. १. ४९. ] इति कर्तरि अच्प्रत्यय एवेति समर्थयति– **परिवार इति तु ण्यन्तादचि सिद्धमिति** ॥ ५. ३. २८. ॥

## वर्षादयः क्लीबे । ५. ३. २९ ॥

**त० प्र०–वर्षादयः शब्दा अलन्ताः क्लीबे यथादर्शनं भावाद्यकर्त्रोर्निपात्यन्ते। नपुंसके क्तानड्निवृत्त्यर्थं वचनम्। वर्षं भयं धनं वनं खलं पदम्। युगम्, अत्र रथाङ्गकालविशेष-युग्मेष्वल् गत्वगुणाभावौ च निपातनात्। अनपुंसकक्तस्तु असरूपविधिना भवत्येव-वृष्यते स्म– वृष्टं मेघेन, भीतं बटुना ॥२९॥**

**श० म० न्यासानुसन्धानम्– वर्षा०। यथादर्शनमिति**–निपातनस्याभिधामूलकत्वाद् यथाभिधानमेव प्रत्ययेन भाव्यमिति भावः। क्लीबे इति विशिष्य निपातनस्य किं प्रयोजनमिति चेत्? अत्राह– **नपुंसके क्तानड्निवृत्त्यर्थं वचनमिति**– "क्लीबे क्तः" [५. ३. १२३.] इत्यनेन नपुंसके क्तो विधीयते, "अनट्" [५. ३. १२४.] इत्यनेन नपुंसकेऽनट् विधीयते, तयोर्निवृत्त्यर्थमित्यर्थः, विशिष्य विहित एव तौ निवर्तयितुं शक्नोतीति भावः। "वृषू सेचने" **वर्षम्**। "ञिभींक् भये" **भयम्**। "धन शब्दे" धन्यत इति– **धनम्**। "वन शब्दे" **वनम्**। "खल संचये च" चकाराच्चलने, **खलम्**। "पदिच् गतौ" गतिर्यानं ज्ञानं च, **पदम्**। "युजिच् समाधौ" समाधिश्चित्तवृत्तिनिरोधः, "युजूंपी योगे" **युगमिति**, नात्रालेवापि तु निपातनात् कार्यान्तरमपीत्याह– **अत्र रथाङ्गकालविशेष-युग्मेष्वल् गत्वगुणाभावौ च निपातनादिति**। क्वचिच्चानड् भवति विशेषविनिगमकसत्त्वे, यथा वर्षणमित्यत्र, तत्र च पस्पशाह्निकस्थं भाष्यं मानम्, तत्र हि त्रिधा बद्धो वृषभो रोरवीतीति महोदेवो मर्त्याना-विवेशेत्यस्य व्याख्यानावसरे वृषभो वर्षणादिति तेनोक्तम्। एवं च "अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो मनुष्यः।" इत्यादिनीतिप्रयोगा अपि व्याख्याताः। अत्र नपुंसके विहित एव प्रत्ययो निवर्त्यः साजात्यान्न तु विजातीयः सामान्येन विहित इत्याह-**अनपुंसकक्तस्तु असरूपविधिना भवत्येवेति**, तदुदाहरति– **वृष्यते स्म– वृष्टं मेघेन, भीतं बटुनेति**– अत्र "तत् साप्यानाप्यात् कर्मभावे कृत्यक्तखलर्थाश्च" [३. ३. २१.] इति सामान्यतो भावे क्तः, न नपुंसके, एवं सत्यपि "कृत्याः क्तानाः खल् ञिन् भावे" [ नं० ९ ] इति लिङ्गानुशासनवचनान्नपुंसकत्वं विज्ञेयम्। नन्वेकत्र लिङ्गानुशासनेन नपुंसकत्वं दर्शितमपरत्र "क्लीबे क्तः" [ ५. ३. १२३. ] इति सूत्रेणापीति कोऽनयोर्विशेष इति चेत्? उच्यते– लिङ्गानुशासनेन नपुंसकत्वविधानं क्तान्तस्य न तु क्तविधानम्, सूत्रेण च नपुंसके क्तविधानमिति विशेषः, किञ्च नपुंसकविहितक्तस्य कर्तरि "वा क्लीबे" [ २. २. ९२. ] इति वा षष्ठी भवति, यथा मयूरस्य मयूरेण वा नृत्तमिति, अन्यक्तस्य कर्तरि तु "क्तयोरसदाधारे" [ २. २. ९१. ] इति षष्ठीनिषेधात् तृतीयैव भवति, यथा प्रकृते। "वृषू सेचने" अस्योदित्त्वेन क्त्वि वेट्त्वात् क्ते परे "वेटोऽपतः" [ ४. ४. ६२. ] इनीटो निषेधे– वृष्टमिति। "ञिभींक् भये" अतः क्तेऽनुस्वारेत्त्वादिडभावे– भीतमिति ॥ ५. ३. २९. ॥

## समुदोऽजः पशौ । ५. ३. ३० ॥

**त० प्र०–समुदूभ्यां परादजतेः पशुविषये धात्वर्थे**

**वर्तमानात् भावा-कर्त्रोरल् भवति । समजः पशूनाम्, समूह इत्यर्थः; उदजः पशूनां, प्रेरणमित्यर्थः । समुद इति किम् ? व्याजः पशूनाम् । पशाविति किम् ? समाजः साधूनाम्, उदाजः खगानाम् ॥३०॥**

**श० म० न्यासानुसन्धानम्-समु०** । "अज क्षेपणे च" चकाराद् गतौ, संवीयत इति-**समजः** इति, तदर्थमाह-**पशूनां समूह इत्यर्थः** इति । **उदजः** इति, तदर्थमाह-**पशूनां प्रेरणमित्यर्थः** । पदकृत्यं पृच्छति-**समुद इति किमि**ति, **व्याजः पशूनामि**त्युत्तरम्, अत्र घञेव भवति । पुनः पृच्छति-**पशाविति किमि**ति, उत्तरयति-**समाजः साधूनाम्, उदाजः खगानामि**ति-"समजस्तु पशूनां स्यात् समाजस्त्वन्यदेहिनाम्" इति हैमः, अत्र घञेव भवति । घञि अलि वाऽजेर्न वीभावः "अघञ्क्यबलच्यजेर्वी" [ ४. ४. २. ] इत्यत्र तयोर्वर्जनात् ॥ ५. ३. ३०. ॥

## सृ-ग्लहः प्रजनाऽक्षे । ५. ३. ३१. ॥

**त० प्र०-सर्ति-ग्लहिभ्यां यथासंख्यं प्रजनाऽक्षविषये धात्वर्थे वर्तमानाभ्यां भावाऽकर्त्रोरल् भवति । गवामुपसरः, पशूनामुपसरः, "वीनामुपसरं दृष्ट्वा"; प्रजनो गर्भग्रहणम्, तदर्थं स्त्रीषु पुंसां प्रथमं सरणमुपसर उच्यते । अक्षाणां ग्लहः, ग्रहणमित्यर्थः, ग्रहेः सूत्रनिपातनाल्लत्वम्, ग्लहिः प्रकृत्यन्तरं वा । प्रजनाऽक्ष इति किम् ? उपसारो भृत्यै राज्ञाम्, ग्लहः ग्लाहो वा पादस्य । कथं परिसरविषमेषुलीढमुक्तौ ? अधिकरणे पुंनाम्नि घेन सिद्धम् ॥३१॥**

**श० म० न्यासानुसन्धानम्-सृ०** । "सृं गतौ" उपपूर्वादतोऽलि गुणे च- **गवामुपसरः, पशूनामुपसरः** इति, एतदर्थे कविप्रयोगमाह-**"वीनामुपसरं दृष्ट्वा"** इति- वीनां पक्षिणामित्यर्थः । सूत्रार्थसमन्वयाय प्रजनपदार्थमाह- **प्रजनो गर्भग्रहणमि**ति- अत्र प्रजनपदाभिधेयं गर्भग्रहणं प्रयोगविषयतया निर्दिष्टं न प्रत्ययार्थः, तद्विषयतैव प्रत्ययार्थः, तथा चाह- **तदर्थं स्त्रीषु पुंसां प्रथमं सरणमुपसर उच्यते** इति- उपसर्गभूतोपशब्दस्याद्यार्थकत्वेन प्रथममित्यर्थलाभः, सरणं धातुप्रत्ययोभयसहकृतोऽर्थः, "प्रजने स्यादुपसरः" इत्यभिधानचिन्तामणेर्वृत्तावित्थम्-"प्रजायतेऽस्मिन् पशूनां गर्भग्रहणकालः प्रजनस्तत्र, "न जनवधः" [ ४. ३. ५४. ] इति घञि वृद्ध्यभावः । स्त्रीषु पुंसा प्रथममुपसरणमुपसरः "सृ-ग्लहः प्रजनाक्षे" [ ५. ३. ३१. ] इत्यल्" इति । शब्दकल्पद्रुमे च उपसरशब्दव्याख्यानावसरे-'स्त्रीगवादिषु पुंगवादीनां प्रथमगर्भाधानाय मैथुनाभियोगः' इत्येवमर्थो निरूपितः । एवं च गर्भाधानाय सरणं प्रयोगार्थतया लभ्यते । यद्यपि प्रजननं प्रजन इति व्युत्पत्त्या प्रसूतिरेव प्रजनशब्दस्य वाच्योऽर्थस्तथापि प्रशब्दबलादत्र तस्यान्यार्थत्वं यथा प्रतिष्ठते इत्यत्र प्रादुर्भाव इति तत्त्वबोधिन्यामुक्तम् । कौमुद्यां च प्रजनं प्रथमगर्भग्रहणमित्युक्तम् । तत्रोक्तं तत्त्वबोधिन्याम्-'काशिकानुरोधेनेदमुक्तम् । प्रथमं द्वितीयं वेत्यनाग्रहः किन्तु गर्भग्रहणमित्यन्ये' इति । "ग्रहीश् उपादाने" अतोऽलि-**अक्षाणां ग्लहः** इति, ग्लहशब्दार्थमाह- **ग्रहणमित्यर्थः** इति, रस्य लत्वं कुत इत्याशङ्कायामाह- **ग्रहेः सूत्रनिपातनाल्लत्वमि**ति- सूत्रे रस्थाने लकारनिर्देशरूपनिपातनबलादत्र लत्वमित्यर्थः । तथा चाक्षकर्मकग्रहणमिति भावः । प्रकारान्तरेण साधनमाह- **ग्लहिः प्रकृत्यन्तरं वे**ति- "ग्लहीङ् ग्रहणे" इत्यन्य एव धातुस्तस्य ग्लह इति प्रयोगः, तथा च न निपातनाश्रयणमिति भावः । स्वोपज्ञाभिधानचिन्तामणौ तु- "तत्पणो ग्लहः" इत्युक्तम् । तद्वृत्तिश्चेत्थम्-"पण्यते पणो बन्धकः, तेषु अक्षेषु पणस्तत्पणः, अक्षाणां ग्रहणं ग्लहः "सृ-ग्लहः प्रजनाक्षे" [ ५. ३. ३१. ] इत्यल् ग्रहेश्च निपातनाद् लत्वम्, ग्लहिः प्रकृत्यन्तरं वा" इति । कौमुद्यां च- "अक्षशब्देन देवनं लक्ष्यते, तत्र यत् पणरूपेण ग्राह्यं तत्र ग्लह इति निपात्यते" इत्युक्तम् । तथा च 'अक्षाणां ग्लहः' इत्यस्याक्षदेवनविषयको ग्राह्यः पदार्थः पणरूपो द्रव्यादिरिह ग्लहशब्दार्थ इति कर्मव्युत्पत्तिरिहेति तदाशयः । उदाहरणत्वेन च "व्यात्युक्षीमभिसरणग्लहामदीव्यन्" इति माघकविप्रयोग उक्तः । अयं प्रयोगो जलविहारवर्णनसमये कृतः, श्रीकृष्णस्य भटाः स्त्रीभिः सहाभिसरणं स्वयमेव रतये समीपगमनमेव ग्लहः पणबन्धो यत्र तादृशीं व्यात्युक्षीं परस्परजलसेचनक्रीडाम् अदीव्यन् द्यूतरूपेण चक्रुरित्यर्थः । पदप्रयोजनं पृच्छति- **प्रजनाक्ष इति किमि**ति, उत्तरयति- **उपसारो भृत्यै राज्ञामि**ति- भृतिर्वेतनं तदर्थं नृपसमीपगमनमित्यर्थः ।

**ग्लहः, ग्लाहो वा पादस्येति**– पादस्य ग्रहणमित्यर्थः, तत्र ग्लह इति "ग्लहौङ्" ग्रहणे इत्यस्य बाहुलकाद् घञर्थे के रूपम्, घञि ग्लाहः, इति। परिसर इत्यादिप्रयोगः कथमिति, शङ्कते– **कथं 'परिसरविषमेषुलीढमुक्तौ'?** इति, समाधत्ते– **अधिकरणे पुंनाम्नि घेन सिद्धमिति**– "पुंनाम्नि घः" [५. ३. १३०.] इति पुंसः संज्ञायामधिकरणे घप्रत्यये परिसर इति सिद्ध्यतीत्यर्थः, परिसरन्ति तस्मिन्निति परिसरः पर्यन्तभूः ॥ ५. ३. ३१. ॥

## पणेर्माने । ५. ३. ३२. ॥

**त० प्र०– पणेर्मानेऽर्थे वर्तमानाद् भावाऽकर्त्रोरल् भवति। मूलकपणः, शाकपणः, पण्यत इति पणः, मूलकादीनां संव्यवहारार्थं परिमितो मुष्टिरित्यर्थः। माने इति किम्? पाणः। घञोऽपवादो योगः ॥३२॥**

**श० म० न्यासानुसन्धानम्–पणे०**। "पणि व्यवहारस्तुत्योः" मूलकस्य पणो **मूलकपणः**, शाकस्य पणः **शाकपणः**. पणशब्दोऽत्र कर्मणि निष्पन्न इत्याह–**पण्यत इति पणः** इति। पणशब्दस्य मानत्वं परिचाययति– **मूलकादीनां संव्यवहारार्थं परिमितो मुष्टिरित्यर्थः** इति–परिमितो मितः परिच्छिन्नः, द्वयोस्त्रयाणां चतुर्णां वा मूलकादिद्रव्याणां यो मुष्टिः परिमाणविशेषो बध्यते संव्यवहारार्थः स मूलकपण इत्यादिना शब्देनाभिधीयते। शाकवणिजः क्रेतॄणां परिज्ञानाय कियता मूल्येन कियल्लभ्यमिति निश्चेतुं यथावस्तुभेदं मुष्टिमानेन पूर्वमेव परिच्छिद्य वस्तूनि आपणे प्रसारयन्ति, तदेव पणनार्थं मानं पणशब्देन व्यवह्रियत इति भावः। पदकृत्यं पृच्छति– **माने इति किमिति**, उत्तरयति– **पाणः** इति– नात्र मानार्थः किन्तु सामान्यतो व्यवहारो वा स्तुतिर्वेति नास्य प्रवृत्तिरिति घञेव भवतीत्यर्थः। विशेषतो निपातनीयस्याभावेन "युवर्ण०" [५. २. २८.] इत्यादिसूत्र एव पणेर्ग्रहणे कर्तव्ये पृथग्योगः किमर्थ इत्याशङ्कायामाह– **घञोऽपवादो योग** इति– मानेऽर्थे पणतेर्घञ् मा भूदन्यत्रास्त्वित्यर्थ एव पृथगयं योग इति भावः। न त्वर्थविषयकनियमनं प्रयोजनं व्यवहारार्थमात्रप्रतीत्याऽपि मानविशेषस्यावगतिसम्भवादिति भावः ॥ ५. ३. ३२. ॥

## संमद-प्रमदौ हर्षे । ५. ३. ३३. ॥

**त० प्र०–'संमद प्रमद' इत्येतौ भावाऽकर्त्रोर्हर्षेऽर्थेऽलन्तौ निपात्येते। सम्मदः कोकिलानाम्, प्रमदः कन्यानाम्। हर्ष इति किम्? संमादः, प्रमादः। "संप्रान्मदे" इत्यनुक्त्वा निपातनं रूपनिग्रहार्थम्, तेनोपसर्गान्तरयोगे न भवति–प्रसंमादः, संप्रमादः, अभिसंमादः ॥३३॥**

**श० म० न्यासानुसन्धानम्–संमद०**। "मदैच् हर्षे" अस्य प्रपूर्वस्य प्रमदः, सम्पूर्वस्य च सम्मदः। पक्षिणां हर्षे– **सम्मदः कोकिलानाम्**, बालिकानां हर्षे–**प्रमदः कन्यानाम्**। पदकृत्यं पृच्छति–**हर्षे इति किमिति**, उत्तरयति– **सम्मादः, प्रमादः** इति। लघुना योगेन सिद्धे गुरुयोगस्य निपातनादिफलकताप्रतीतिर्भवति, तच्च नेह किमप्यलाक्षणिकं कार्यं लभ्यमिति गुरुयोगो व्यर्थ इत्याशङ्कते–**"सम्प्रान्मदः" इत्यनुक्त्वा निपातनं रूपनिग्रहार्थमिति**– "सम्प्रान्मदः" इत्युक्तौ हि कथञ्चिदनयोरुपसर्गयोरुपपदत्वे सति प्रत्ययः स्यात्, तथा चानयोः सहोपपदत्वे उपसर्गान्तरपूर्वस्योपपदत्वे वा प्रत्ययः स्यात् स चानिष्ट इत्युक्तं– रूपनिग्रहार्थमिति, 'संमदः, प्रमदः' इत्येवं रूपं स्यात् न त्वन्यदित्यर्थः। **प्रसंमाद** इति– उभयोः सह प्रयोगे घञेवेति भावः। पूर्वमेकोपसर्गयोगे प्रमदसंमदौ संसाध्य पश्चादुपसर्गान्तरयोगविवक्षा तु शक्यत एवेति **सम्प्रमदः** [सम्यक् प्रमद इत्यर्थे] **प्रसम्मदः** [प्रकृष्टः सम्मद इत्यर्थे] इति भवत्येवेति ॥ ५. ३. ३३. ॥

## हनोऽन्तर्घनाऽन्तर्घणौ देशे । ५. ३. ३४. ॥

**त० प्र०–अन्तःपूर्वाद्धन्तेरल् प्रत्ययो घन-घणौ चादेशौ निपात्येते, देशेऽभिधेये भावाऽकर्त्रोः। अन्तर्हण्यतेऽस्मिन्निति–अन्तर्घनः, अन्तर्घणो वा वाहीकेषु देशविशेषः; अन्तर्घातोऽन्यः। एके त्वन्तः संहतो देशोऽन्तर्घनः। अभ्यन्तरो देश इति केचित्– 'तस्मिन्नन्तर्घणेऽपश्यत्'। घणिः प्रकृत्यन्तरमित्यन्ये ॥३४॥**

**श० म० न्यासानुसन्धानम्–हनो०**। 'अन्तर्' इत्यव्ययं मध्यार्थे वर्तते, "हनंक् हिंसा-गत्योः", **अन्तर्हण्यतेऽस्मिन्निति**– अन्तर्हण्यते इत्यत्र "हनः" [२. ३. ८२.] इति नस्य णः, यत्र देशेऽन्तर्गता अन्ये जना हन्यन्त इति भावः, उक्तार्थेऽनेनालि निपातनात् हन्तेर्घनादेशो घणादेशे च– **अन्तर्घनः, अन्तर्घणो** वेति, तत्रासदाचारिणां सन्निवेशात् तेषां वाहीकनामधेयवत्त्वम्, वाहीकदेशस्य परिभाषा च तद्धितप्रकरणे प्रतिपादिता, कोऽयमित्याह–

**वाहीकेषु देशविशेष** इति–वाहीका नाम एको महान् भूभागः, तदेकदेशोऽन्तर्घणशब्दवाच्य इति भावः । पाणिनीये तु वाहीकग्रामविशेषस्य संज्ञेयमित्युक्तम् । विनापि निपातनमन्तर्घनान्तर्घणयोः साधनप्रकारमाह–**एके त्वन्तः संहतो देशोऽन्तर्घनः** इति, अयमाशयः–निचिते निरन्तरेऽर्थे घन इत्यग्रे निपातनीयमेव, तथा च तेन सहान्तः शब्दस्य समासेनैवान्तर्घनशब्दः संसाध्यः, एवं घणिरपि प्रकृत्यन्तरम्, तस्माच्चाल्प्रत्ययविधानमात्रमावश्यकं न तु तत्र निपातनापेक्षेति । मतान्तरं तदनुमतं प्रयोगं चाह–**अभ्यन्तरो देश इति केचित्–"तस्मिन्नन्तर्घणेऽपश्यत्"** इति । **घणिः प्रकृत्यन्तरमित्येके** इति–पाणिनीये च घणिः प्रकृत्यन्तरं न दृश्यते, अन्तर्घनशब्द एव केवलं निपात्यते "अन्तर्घनो देशे" [ ३. ३. ७८. ] इति सूत्रेण, 'अन्तर्घण' इति पाठान्तरमिति च तत्रोक्तम्, तथा चैक एव शब्दो निपात्यस्तत्रेति भावः । वस्तुतस्तु हन्तेरिदं पृथगेवार्थविशेषप्रतिपत्त्यर्थं निपातनमुचितम्, नहि पूर्वमुक्तोऽन्तर्हननरूपोऽर्थो घनशब्देन सह समासे कृते लभ्यतेऽतः सूत्रमिदमावश्यकमिति ॥ ५. ३. ३४. ॥

## प्रघण-प्रघाणौ गृहांशे । ५. ३. ३५. ॥

**त० प्र०–प्रपूर्वाद्धन्तेर्गृहांशेऽभिधेयेऽल् प्रत्ययो घण-घाणौ चादेशौ निपात्येते । प्रघणः प्रघाणो वा द्वारालिन्दकः; प्रघातोऽन्यः ॥३५॥**

**श० म० न्यासानुसन्धानम्– प्रघण०** । गृहस्य द्वारदेशे द्वौ प्रकोष्ठकौ अलिन्दसंज्ञकौ, एको बाह्योऽपर आभ्यन्तरः, तत्र बाह्ये प्रकोष्ठे निपातनमिदम्, प्रकर्षेण हन्यते प्रविशद्भिर्जनैरित्यन्वर्थात् । तथा चात्र कर्मण्यल् प्रत्ययः । यद्यपि सूत्रे गृहांशस्य सामान्येनार्थतयोपादानं तथापि प्रयोगार्थसंघट्टनबलाद् द्वारप्रकोष्ठ एव निपातनमिति लभ्यते, अन्यत्र घञेव, तस्मिन् परे च "ञ्णिति घात्" [ ४. ३. १००. ] इति घातादेशः, तथा चाह–**प्रघातोऽन्यः** इति । "प्रघाणः प्रघणोऽलिन्दो बहिर्द्वारप्रकोष्ठके" इत्यभिधानचिन्तामणिः, तद्वृत्तिश्चेत्थम्–"प्रहन्यते प्रघणः, प्रघाणः, "प्रघण-प्रघाणौ गृहांशे" [ ५. ३. ३५. ] इत्यलि निपात्यते, अलति भूषयति द्वारमलिन्दः पुंक्लीबलिङ्गः, "कल्यलि०" [उणा० २४६.] इतीन्दक्, द्वारप्रकोष्ठकाद् बहिर्द्वाराग्रवर्ति चतुष्किकान्ते उपालिन्दकाख्यः" इति ॥ ५. ३. ३५. ॥

## निघोद्घ-संघोद्घना-ऽपघनोपघ्नं निमित-प्रशस्त-गणा-ऽत्याधाना-ऽङ्गा-ऽऽसन्नम् । ५. ३. ३६. ॥

**त० प्र०– हन्तेर्निघादयः शब्दा यथासंख्यं निमितादिषु वाच्येषु कृतघत्वादयोऽलन्ता निपात्यन्ते । समन्ततो मितं तुल्यमविशेषेण वा मितं परिच्छिन्नं-निमितम्, तुल्यारोहपरिणाहमित्यर्थः । निर्विशेषं निश्चयेन वा हन्यन्ते ज्ञायन्ते-निघा वृक्षाः, निघाः शालयः, निघा बृहतिका, निघं वस्त्रम्; निघातोऽन्यः । उत्कर्षेण हन्यते ज्ञायते–उद्घः प्रशस्तः, उद्घातोऽन्यः । गणः–प्राणिसमूहः, संहतिः संघः, अन्यत्र संघातः । कथं संघातो मनुष्याणाम् ? संघातशब्दः समुदायमात्रे । अत्याधीयन्ते छेदनार्थं कुट्टनार्थं च काष्ठादीनि यत्र तदत्याधानम्, उद्धन्यतेऽस्मिन्निति-उद्घनः, काष्ठोद्घनः, ताम्रोद्घनः, लोहोद्घनः, घनः, स्कन्धः; उद्घातोऽन्यः । अङ्गं– शरीरावयवः, अपहन्यतेऽनेनेत्यपघनोऽङ्गम्, "घणिभिरपघनैर्घर्घराव्यक्तघोषान्" । पाणिः पादश्चापघनो नापरमङ्गमित्यन्ये । अपघातोऽन्यः । उपहन्यते-समीप इति ज्ञायते-उपघ्न आसन्नः, गुरूपघ्नः, ग्रामोपघ्नः, उपघातोऽन्यः । निपातनादेवोपात्तार्थविशेषे वृत्तिरसरूपप्रत्ययबाधनं च विज्ञायते ।।३६।।**

**श० म० न्यासानुसन्धानम्–निघो०** । अर्थविशेषे निपातनसूत्रमिदम्, निघादि निपात्यते निमितादि वाच्यं चेत्, तथा चार्थानामत्र सामानाधिकरण्येन निर्देशो वाच्यवाचकभावरूपसामानाधिकरण्यमूलकः । एतदेव विशदयति–**हन्तेर्निघादयः शब्दा यथासंख्यं निमितादिषु वाच्येषु** इति । निमितशब्दार्थमाह– **समन्ततो मितं तुल्यमिति**–नहि कस्मिंश्चिद् भागेऽधिकं कस्मिंश्चिन्न्यूनं वा, तमेवार्थं शब्दान्तरेणाह–**अविशेषेण वा मितं परिच्छिन्नं निमितमिति**–न कश्चन भागः कुतश्चन विशिष्टः, सर्वस्तुल्य एवेति, तदाह–**तुल्यारोहपरिणाहमित्यर्थः** इति–तुल्यौ आरोहपरिणाहौ यस्य तत् तथोक्तम्, आरोह उच्छ्रायः, परिणाहो विस्तारः । वृक्षादेर्यावान् आरोहस्तावता परिणाहेन भवितव्यमिति तत् सर्वथा तुल्यमिति भावः । पूर्वोक्तनिमितपदार्थस्य यथा प्रयोगव्युत्पत्ति-

लम्यत्वं तथा तदाह–**निर्विशेषं निश्चयेन वा हन्यन्ते–ज्ञायन्ते–निघा वृक्षाः** इति– हन्धातोर्गत्यर्थत्वेन 'ये ये गत्यर्थास्ते ते ज्ञानार्थाः' इति नियमेनात्र तस्य ज्ञानार्थत्वमिति भावः, अत्र कर्मण्यल्, एवं ते निर्विशेषं ज्ञायन्ते यदि समन्तादारोहतः परिणाहतश्च तुल्या भवन्ति, पूर्वोक्तस्य निमितशब्दार्थस्य निर्विशेषमित्यनेनैव विग्रहेण प्रतीतिः। निश्चयेन वा मितं निमितमित्यन्यार्थत्वेऽपि विग्रहो विधातुं शक्यत इत्याशयेन 'निश्चयेन वा हन्यन्ते' इत्यपरो विग्रहः प्रदर्शित इति विवेचनीयं निशब्दस्योभयथाऽप्यर्थस्य प्रसिद्धत्वात्। एवं–**निघाः शालयः, निघा बृहतिका, निघं वस्त्रमि**त्यत्रापि ज्ञेयम्, शालिः कलमादिधान्यम्, बृहतिका उत्तरासङ्गः। अथ द्वितीये प्रशस्तेऽर्थे उद्घशब्दं व्युत्पादयति–**उत्कर्षेण हन्यते ज्ञायते– उद्घः प्रशस्तः** इति–अत्रापि गत्यर्थत्वादेव ज्ञानार्थत्वं हनः प्राग्वद् विज्ञेयम्, "मर्चचिका प्रकाण्डोद्घौ प्रशस्यार्थप्रकाशकाः" इत्यभिधानचिन्तामणिः। तृतीयं गणशब्दार्थमाह:– **गणः प्राणिसमूहः** इति–न तु बहुत्वमात्रमर्थः, **संहतिः–संघः** इति– अत्र भावेऽल्। शङ्कते– **कथं संघातो मनुष्याणामि**ति–इह प्राणिसमूहत्वात् कथं संघ इति न निपातनमिति शङ्काशयः, समाधत्ते– **संघातशब्दः समुदायमात्रे** इति–पूर्वं समुदायसामान्ये संघातशब्दं निष्पाद्य पश्चान्मनुष्यशब्देन सम्बन्ध इति संघात शब्दः सामान्ये एव वर्तते किन्तु मनुष्यशब्दसन्निधानात् तत्र मनुष्यसम्बन्धावगतिरिति भावः। चतुर्थमत्याधानशब्दार्थमाह–**अत्याधीयन्ते छेदनार्थं कुट्टनार्थं च काष्ठादीनि यत्र तदत्याधानमि**ति–अतिशब्द उपरिभावे वर्तते, आदधातिः स्थापने, तथा च अत्याधीयन्ते– उपरि स्थाप्यन्ते यत्र काष्ठेऽन्यस्मिन् वा उच्छ्रिते वस्तुनि तदत्याधानमित्यर्थः, अधिकरणेऽनट् प्रत्ययः, किमर्थमुपरिस्थापनमत उक्तं–छेदनार्थं कुट्टनार्थं चेति, किं स्थाप्यत इत्यत उक्तं–काष्ठादीनीति, तत्र प्रयोगमाह– **उद्धन्यतेऽस्मिन्निति–उद्घनः** इति–अत्रापि चाधिकरणेऽल्, एवं– **काष्ठोद्घनः, ताम्रोद्घनः, लोहोद्घनः** इति-आद्ये छेदनार्थम्, द्वितीये तृतीये च कुट्टनार्थम्, अत्र च षष्ठीसमासः। **घनः स्कन्धः** इत्यत्र च भाराक्रमणेन कुट्टनार्थमिवेति विज्ञेयम्। अङ्गशब्दस्य शरीरावयवसामान्ये प्रसिद्धेराह–**अङ्गं शरीरावयवः** इति, तत्र प्रयोगमाह– **अपहन्यतेऽनेनेति– अपघनोऽङ्गमि**ति– अत्र करणार्थेऽल्। अङ्गशब्दस्य सामान्यतो देहावयवार्थग्रहणे प्राच्यकविप्रयोगं प्रमाणतया दर्शयति–"**व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्**" इति-व्रणयुक्तैर्देहावयवैर्घर्घराव्यक्तध्वनीनिति तदर्थः। मतान्तरमाह–**पाणिः पादश्चापघनो नापरमङ्गमित्यन्ये** इति-एवं चापघातकरणत्वेन प्रसिद्धस्याङ्गविशेषस्यैव संज्ञेयमिति पाणिनीयानां मतमन्येषां च केषाञ्चित्, तथा च तेषां मते "व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्" इति प्राचीनकविप्रयोगो नोपपद्यते। सम्भवति च व्रणयुक्ताङ्गानां पाणिपादातिरिक्तानामपि करणत्वमपघातस्येति। उपघ्नशब्दस्यासन्नार्थकत्वं व्युत्पादयति–**उपहन्यते–समीपे इति ज्ञायते इति–उपघ्न आसन्नः** इति–उपशब्दस्य समीपार्थकत्वं हन्तेर्ज्ञानार्थकत्वं च प्रसिद्धमेव, एवं **गुरूपघ्नः, ग्रामोपघ्नः** इति–षष्ठीसमासोऽत्र, गुरुसमीपभूतो ग्रामसमीपभूत इत्यर्थः, कर्मणि चाल् प्रत्ययः। सर्वत्र प्रत्युदाहरणे घञ्, तस्मिन् परे च घातादेशः। नन्वेवं प्रकृतिप्रत्ययसमुदायादेवोक्तार्थप्रतीतिरिति निपातनाश्रयणं वृथेति चेत्? अत्राह–**निपातनादेवोपात्तार्थविषये वृत्तिरसरूपप्रत्ययबाधनं चे**ति, अयमाशयः–प्रकृतिप्रत्ययाभ्यामुक्तार्थस्य प्रतीतिसम्भवेऽप्युक्तार्थमात्रे वृत्तिर्नान्यत्रेति नियन्तुमशक्यमन्यत्राप्युक्तार्थघटनात् प्रत्ययापत्तिः, असरूपः समानार्थकश्च प्रत्ययोऽत्राप्यर्थे स्यादिति तयोर्बाधनार्थमेव निपातनमाश्रितमिति भावः, तथा चोक्तेष्वर्थेष्वेते प्रयोगा अन्यत्र नेत्यपि फलतीति तत्त्वम्॥ ५. ३. ३६.॥

## मूर्त्ति-निचिताऽभ्रे घनः। ५. ३. ३७.॥

**त० प्र०–हन्तेर्मूर्त्यादिष्वर्थेषु अल् प्रत्ययो घनादेशश्च निपात्यते। मूर्त्तिः काठिन्यम्, अभ्रस्य घनः, काठिन्यमित्यर्थः; एवं-दधिघनः, लोहघनः। निचितं निरन्तरं तत्र, घनाः केशाः, घना व्रीहयः। अभ्रं मेघस्तत्र-घनः। कथं घनं दधि? गुणशब्दोऽयं तद्योगाद् गुणिन्यपि वर्तते॥३७॥**

**श० म० न्यासानुसन्धानम्–मूर्ति०। मूर्तिः काठिन्यमिति**–मूर्छत्यस्यां चक्षुरिति विगृहीतस्य मूर्तिशब्दस्य न केवलं चक्षुर्व्यवधायकत्वमात्रं प्रवृत्तिनिमित्तमपि तु चक्षुष्पदं तत्र बाह्येन्द्रियपरं, तेन हस्तादेरपि रोधकत्वं

तत्रायाति, कठिने हि वस्तुनि हस्ताद्यपि व्यापारितं रुद्धं भवति । **अभ्रस्य** मेघस्य, **घनः** काठिन्यं परिपूर्णत्वमित्यर्थः । एवं दध्नो घनः काठिन्यमिति षष्ठीसमासे-**दधिघनः**, लोहस्य घनः काठिन्यमिति-**लोहघनः** । निरन्तरं चितं संघीभूतमित्यर्थेन निचितशब्दस्य निरन्तरवस्तुविषयकत्वं भवति, तदाह-**निचितं निरन्तरमिति** तत्रोदाहरति- **घनाः केशाः, घना व्रीहयः** इति-निरन्तरा इत्यर्थः । अभ्रशब्दार्थमाह-**अभ्रं मेघः** इति, तत्रोदाहरति-**घनः** इति-मेघ इत्यर्थः । घनशब्दस्य मूर्त्यर्थपरस्य धर्मवाचकत्वं पर्यवसन्नम्, तथा च तस्य धर्मिणा सह सम्बन्धस्यैव निर्देश उचित इति षष्ठ्या तस्यान्वय उचितः, तथा च सामानाधिकरण्येन तस्य प्रयोगो बहुस्थलेषु समुपलभ्यमानः कथं साधीयानित्याशङ्कते--**कथं घनं दधी**ति, शङ्काबीजं स्वयमाह-**गुणशब्दोऽयमि**ति, उत्तरयति-**तद्योगाद् गुणिन्यपि वर्तते** इति, जैनदर्शने स्याद्वादाश्रयणेन गुणगुणिनोः कथञ्चित् तादात्म्यस्वीकारात्, वेदान्तादिनयेऽपि गुणगुणिनोर्हि तादात्म्यस्याङ्गीकारात् गुणवाचकपदस्य शुक्लादिपदानामिव गुणिपरत्वमपि नानुपपन्नमिति भावः । गुणगुणिनोः समवायसम्बन्धवादिमते च-

"तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च।
तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः ॥"

इत्यभियुक्तोक्तलक्षणामूलेषु ताद्धर्म्यस्यापि लक्षणामूलतयोक्तेस्ताद्धर्म्येणैवात्र गुणपदस्य गुणिलक्षकत्वमिति ज्ञेयम् । व्याकरणदृष्ट्या च मतुलोपादभेदोपचारेण धर्मशब्देन धर्मी भण्यते, यथा शुक्लः पटः शुक्लशब्देन, शुक्लगुणः पट इति भावः ॥ ५. ३. ३७. ॥

**व्ययो-द्रोः करणे** । ५. ३. ३८. ॥

**त० प्र०-'वि अयस् द्रु' इत्येतेभ्यः पराद्धन्तेः करणेऽल् प्रत्ययो घनादेशश्च निपात्यते । भावस्य कारकान्तरस्य चानुप्रवेशो मा भूदिति करणग्रहणम् । विहन्यतेऽनेन तिमिरं-विघनः, विघनेन्दुसमद्युतिः, वयः पक्षिणो हन्यन्तेऽनेनेति वा-विघनः । अयोघनः । द्रुर्हन्यतेऽनेनेति-द्रुघनः कुठारः । कथं द्रुघणः ? अरीहणादिपाठाण्णत्वे भविष्यति, घणतेर्वाऽजन्तस्य रूपम्, स्त्रियां त्वडेव परत्वात्-विहननी, अयोहननी, द्रुहननी ॥३८॥**

**श० म० न्यासानुसन्धानम्- व्य०** । भावाकर्त्रोरित्यस्यानुवृत्तेः सत्त्वात् कर्तृभिन्ने कारके विधीयमानः प्रत्ययोऽभिधानसामर्थ्यादिह करणे स्यादेवेति करणग्रहणमनावश्यकमित्याशङ्कायामाह- **भावस्य कारकान्तरस्य चानुप्रवेशो मा भूदिति करणग्रहणमि**ति, अयमाशयः- अभिधानसामर्थ्यात् क्वचन करणार्थस्यैव प्रतीतिरस्तु तथापि क्वचित् भावस्य कर्तृभिन्नकारकाणां चार्थतया प्रवेशो मा जायीति तद्वारणाय स्पष्टप्रतिपत्तये च करणग्रहणमिति, अन्यथाऽत्र करणे प्रत्ययोऽन्यत्र वेति संशयः स्यादेवेति भावः । विगृह्योदाहरति- **विहन्यतेऽनेन तिमिरं- विघनः** इति- अग्रे इन्दोर्विशेष्यतयोदाहरणीयत्वेन तत्रार्थसंगतये तिमिरमिति कर्मोपात्तम्, विग्रहस्तु विहन्यतेऽनेनेत्येतावदेव, तेनान्यत्रापि विघातकरणे विघनशब्दस्य प्रयोगो भवत्येव । **विघनेन्दुसमद्युतिरि**ति, अत्र यद्यपि विरहितो विमुक्तो वा घनेन मेघेनेति विघनः, स चासाविन्दुस्तत्समद्युतिरित्यर्थ एव विशेषतो रमणीयः, इन्दौ तिमिरनाशकत्वस्य प्रसिद्धत्वात् तत्र विघनेति [तिमिरनाशकरणार्थक] पदस्य विशेषणतया प्रयोगानौचित्यमेव, नहि स तिमिरनाशकरणं तथा सति कर्तुरन्यस्यापेक्षणीयत्वापत्तेस्तथापि यथाकथञ्चिदस्याप्यर्थस्य प्रतीतिस्तत्र सम्भवतीत्याशयेनेदमुदाहरणम् । अयोद्रुशब्दयोरुपसर्गभिन्नयोः साहचर्याद् विशब्दोऽप्युपसर्गभिन्न एवात्र ग्राह्य इत्याशयवान् अन्यथा विगृह्णाति- **वयः पक्षिणो हन्यतेऽनेनेति वा विघनः** इति, तथा च विघनपदस्य न विशिष्टहननकरणपरत्वमपि तु पक्षिहननकरणपरत्वमिति भावः । एवं च 'विघनेन्दुसमद्युतिः' इत्यत्र पूर्वोक्त एव मेघरहितार्थक विघनशब्द इति स्पष्टमायाति, तन्त्रेणोभयनिर्देशात् पक्षिवाचकविशब्दापेक्षयोपसर्गस्य तस्याधिकप्रसिद्धत्वाच्चोपसर्गोपपदत्वेऽपि प्रत्ययो भविष्यत्येवेति वा मन्तव्यम् । **द्रुर्हन्यतेऽनेनेति-द्रुघनः कुठारः** इति-"हनो घि" [२. ३. ९४.] इति व्याप्त्या प्रवृत्तेः "पूर्वपदस्थान्नाम्न्यगः" [२. ३. ६४.] इति न णत्वमिति द्रुघन इति भवतीति । नन्वेवं तर्हि समुपलभ्यमानस्य द्रुघणशब्दस्य का गतिरिति शङ्कते-**कथं द्रुघणः ?** इति, समाधानमाह-**अरीहणादिपाठाण्णत्वे भविष्यतीति**- "अरीहणादेरकण्" [६. २. ८३.] इत्यत्र निर्दिष्टेऽरीहणादिगणे 'द्रुघण' इति पाठबलाद् भवति णत्वमित्यर्थः । तत्र पाठस्याप्रामाणिकत्वे

समाधानान्तरमाह–**घणतेर्वाऽजन्तस्य रूपमिति**–घणिः सौत्रः, द्रूणि दारूणि घणतीति लिहाद्यचि द्रुघण इति भावः। निपातनस्यापीह सत्त्वेन, निपातनानि च नियतविषयाणीति संज्ञायामेव प्राय एते प्रयोगा भवन्ति, तथा चायोघनादीनां पुंस्त्वविशिष्टे नाम्न्येव प्रसिद्धतया स्त्रियामस्य सूत्रस्य व्यापाराभाव इति तत्र परत्वेन व्यवस्थामाह–**स्त्रियां त्वनङेव परत्वादिति**, तत्र प्रयोगानाह–**विहननी, अयोहननी, द्रुहननीति**–टित्वात् ङीः ॥ ५. ३. ३८. ॥

## स्तम्बाद् घ्नश्च ॥ ५. ३. ३९. ॥

**त० प्र०–स्तम्बशब्दात् पराद्धन्तेरल् घ्न-घनादेशौ च निपात्येते करणे । स्तम्बो हन्यतेऽनेन–स्तम्बघ्नो दण्डः स्तम्बघ्नो यष्टिः, स्त्रियां परत्वादनङेव–स्तम्बहननी यष्टिः । केचित् तु–कप्रत्यये निपातनं कृत्वा स्त्रियामपि स्तम्बघ्नेतीच्छन्ति । अन्ये तु–स्तम्बपूर्वस्यापि हन्तेः "साति-हेति०" [५. ३. ९४.] इति निपातनात् स्तम्बहेतिरितीच्छन्ति । करण इत्येव–स्तम्बहननं स्तम्बघातः । कथं स्तम्बघ्नीषीका ? करणस्यापि कर्तृत्वविवक्षया "अचित्ते टक्" [५. ३. ९४.] इत्यनेन टकि सिद्धम् ॥ ३९ ॥**

**श० म० न्यासानुसन्धानम्–** स्त० । स्तम्बशब्दो व्रीह्यादौ दण्डसहितेऽपि प्रसिद्धः, अत्र तस्यैव ग्रहणम् । स्तम्बो हन्यतेऽनेनेत्यलि घ्नादेशे– **स्तम्बघ्नो दण्डः**, घनादेशे च– **स्तम्बघनो यष्टिरिति**– यष्टिशब्दस्योभयलिङ्गत्वेन पुंस्यपि प्रयोगः। स्त्रियां पूर्ववद् व्यवस्थामाह– **स्त्रियां परत्वादनङेव–स्तम्बहननी यष्टिरिति** । मतान्तरमाह– **केचित् कप्रत्यये निपातनं कृत्वा स्त्रियामपि स्तम्बघ्नेतीच्छन्तीति**– स्त्रियामपि कप्रत्ययं घ्नादेशं चेच्छन्ति, तत्र चाबेव भवतीत्यर्थः । पुनरपि मतान्तरमाह– **अन्ये तु स्तम्बपूर्वस्यापि हन्तेः "साति-हेति०" [ ५. ३. ९४. ] इति निपातनात् स्तम्बहेतिरितीच्छन्तीति**– स्वमते केवलस्यैव हेतिरित्यादेश इत्यर्थः। पूर्वसूत्रात् 'करणे' इत्यनुवृत्तेर्व्यावर्त्यं दर्शयति– **करण इत्येव– स्तम्बहननं स्तम्बघातः** इति– भावे विवक्षिते घञेव भवतीत्यर्थः, घञि च "ञ्णिति" [ ४. ३. १००. ] इति घातादेशः। **कथं स्तम्बघ्नीषीकेति**– अनेन स्त्रियामनिपातनस्याश्रयात्, मतान्तरे स्त्रियां प्रत्ययसत्त्वेऽपि आबन्तस्यैव सम्भवात् कथं ङ्यन्तत्वमिति प्रश्नः, उत्तरयति– **करणस्यापि कर्तृत्वविवक्षयेति**– इषीका ह्यचेतनत्वेन स्वतो हनने न प्रवर्ततेऽपि तु केनापि प्रयुक्तेवेति तस्याः कर्तृत्वासम्भवेन करणत्वस्य च युक्तत्वेन करणार्थे चास्यैव सूत्रस्य प्रवृत्त्या भाव्यमिति, किन्तु करणस्यापि 'असिश्छिनत्ति' इत्यादौ कर्तृत्वविवक्षायाः प्रसिद्धत्वेनात्र कर्तृत्वविवक्षया टक्प्रत्यये स्त्रियां ङीः सुलभ इति भावः ॥ ५. ३. ३९. ॥

## परेर्घः ॥ ५ ३. ४०. ॥

**त० प्र०–परिपूर्वाद्धन्तेरल् घादेशश्च करणे निपात्यते । परिहण्यतेऽनेनेति–परिघोऽर्गला, लत्वे पलिघः ॥ ४० ॥**

**श० म० न्यासानुसन्धानम्– परे०** । परिहन्यतेऽनेनेति करणेऽलि घादेशे च– **परिघः** इति– तदर्थमाह– **अर्गला** इति– दारुमयो लौहो वा दण्डः, लोहबद्धो दण्डो वा परिघः। "परेर्घाङ्कयोगे" [ २. ३. १०३. ] इति रस्य वा लत्वे– **पलिघः** ॥ ५. ३. ४०. ॥

## ह्वः समाह्वया-ऽऽह्वयौ द्यूत-नाम्नोः ॥ ५. ३. ४१. ॥

**त० प्र०–करण इति निवृत्तम् । द्यूते नाम्नि चाभिधेये यथासंख्यं समाङ्पूर्वादाङ्पूर्वाच्च ह्वयतेरल् ह्वयादेशश्च निपात्यते । समाह्वयः प्राणिद्यूतम्, आह्वयो नाम ॥४१॥**

**श० म० न्यासानुसन्धानम्– ह्वः०** । **करण इति निवृत्तमिति**–अर्थविशेषोपादानादित्यर्थः। "ह्वेंग् स्पर्धा-शब्दयोः", **समाह्वयः प्राणिद्यूतमिति**– संघर्षेण आहूयन्तेऽत्रेति– समाह्वयः, प्राणिभिः कुक्कुटादिभिर्द्यूतं प्राणिद्यूतमिति, अथवा संपृच्छन्त्याह्वयं नामात्रेति समाह्वय इति युद्धे वर्तते । आहूयतेऽनेन– **आह्वयो नाम** ॥ ५. ३. ४१. ॥

## न्यभ्युप-वेर्वश्चोत् ॥ ५. ३. ४२. ॥

**त० प्र०– नि-अभि-उप-विभ्यः परात् ह्वयतेर्भावाकर्त्रोरल् तत्संनियोगे च वाशब्द उकारो भवति, अभेदनिर्देशः सर्वादेशार्थः। निहवः, अभिहवः, उपहवः, विहवः । न्यभ्युपवेरिति किम् ? प्रह्वायः । ह्व इत्येव–निवायः । ह्वो हव इत्यनिपातनं किम् ? यङ्लुपि निपातनं मा भूत्,**

**तेन विजोहव इति सिद्धम्, अन्यथा विहव इति स्यात् । जुहोतिनैव सिद्धे ह्वयते रूपान्तरनिवृत्त्यर्थं वचनम्** ॥४२॥

**श० म० न्यासानुसन्धानम्– न्यभ्यु०** । 'नि अभि उप वि' एषां समाहारः। समाहारस्य क्लीबत्वेऽपि सौत्रत्वात् पुंस्त्वेन निर्देशः, * आगमशासनमनित्यम् * इति न्यायाद् वा क्लीबत्वेऽपि नागमाभावो विज्ञेयः, तथा निर्देशे लाघवं बीजमित्यर्थः । सूत्रे 'वाश्चोत्' इति समानाधिकरणविभक्त्या निर्देशाद् वृत्तावपि 'वाशब्द उकारो भवति' इत्युक्ततया सामानाधिकरण्यं गम्यते, स्थान्यादेशयोश्च न सामानाधिकरण्यमेकत्व एवान्यस्य सत्ताभ्युपगमादिति स निर्देशोऽयुक्त इत्याशङ्कायामाह– **अभेदनिर्देशः सर्वादेशार्थः** इति– यथा दुग्धं दधि भवतीत्यत्र सामानाधिकरण्येन निर्देशाद् कृत्स्नस्य दुग्धस्य दधितया विपरिणामो विवक्षितस्तथा वाशब्द उकारो भवतीत्यनेन वाशब्द उकाररूपेण विपरिवर्तत इत्याशयो विवक्षितः, अन्यथा स्थानिनि षष्ठीविभक्तेरौचित्यात् षष्ठ्या निर्देशे "षष्ठ्याऽन्त्यस्य" [ ७. ४. १०६. ] इति परिभाषया वाशब्दाकारस्यैवोकारः स्यादिति भावः । अनेनालि वाशब्दस्योकारे गुणेऽवादेशे च– **निहवः, अभिहवः, उपहवः, विहवः** इति । उपसर्गविशेषग्रहणप्रयोजनं पृच्छति– **न्यभ्युपवेरिति किमिति**, अन्योपसर्गपूर्वान्मा भूदित्याशयेनोत्तरयति– **प्रह्वायः** इति– अत्रास्याप्रवृत्त्या घञेव भवति, तस्मिन् परे च "आत ऐः०" [ ४. ३. ५३. ] इत्यात ऐकारे आयादेशः । ह्व इत्यस्यानुवृत्तिमन्तराऽपि 'वाश्चोत्' इत्यनेन वाघटितधातुग्रहणे ह्वाधातोरेव ग्रहणं भविष्यतीति ह्व इत्यस्यानुवृत्तिर्विफलेति न वाच्यम्, तथा सति "वांक् गतिगन्धनयोः" इत्यस्यापि ग्रहणप्रसङ्गात्, एतदेवाह– **ह्व इत्येव– निवायः** इति– अनुवृत्तिबलादत्रास्याप्रवृत्त्या घञेव भवतीति भावः । 'ह्वो हवः' इत्येव निपात्यतामर्थात् ह्व इत्यस्यानुवृत्तेः 'वाश्चोत्' इत्येतस्य स्थाने 'हवः' इत्येव निपातनीयम्, तथा च लाघवमिति तत् कथं न कृतमिति शङ्कते– **ह्वो हव इत्यनिपातं किमिति**, * प्रकृतिग्रहणे यङ्लुबन्तस्यापि ग्रहणम् * इति न्यायेन यङ्लुपः प्रकृतिग्रहणेन ग्रहणस्य सर्वसम्मततया यङ्लुपि द्विरुक्तायाः प्रकृतेर्हवादेशोऽनिष्टः स्यादित्याशयेनोत्तरयति– **यङ्लुपि निपातनं मा भूदिति, तेन** निपातनाभावेन, **विजोहव इति सिद्धमिति**– भृशं पुनः पुनर्वा विह्वयतीति यङि तल्लोपे "द्वित्वे ह्वः" [ ४. १. ८७. ] इति ह्वृति प्रत्ययलोपलक्षणे द्वित्वे 'विजोह्व' इत्यतोऽनेनालि गुणेऽवादेशे च– विजोहव इति सिद्ध्यतीत्यर्थः । निपातनस्वीकारे दण्डमाह– **अन्यथा विहव इति स्यादिति**– युक्तिरुक्तैव । "हुंक् दानादनयोः" इति जुहोतिरपि आह्वानार्थं वक्तुमीष्टे धातूनामनेकार्थत्वस्य दृष्टत्वात् तेनैव निहवादिसिद्धौ ह्वयतेरिदं साधनमनुचितमित्याशङ्कते– **जुहोतिनैव सिद्धे** इति, उत्तरयति– **ह्वयते रूपान्तरनिवृत्त्यर्थं वचनमिति**, अयमाशयः– अनेन सूत्रेण साधनीयानि रूपाणि यद्यपि सेत्स्यन्ति किन्तु ह्वयतेर्न्यादिपूर्वस्यान्यदेव रूपं 'निह्वाय' इत्यादि स्यादिति तन्निवृत्त्यर्थं सूत्रमिति । तथा च जुहोतेर्न भवति ॥ ५. ३. ४२. ॥

## आङो युद्धे । ५. ३. ४३. ॥

**त० प्र०– आङ्पूर्वाद् ह्वयतेर्युद्धेऽर्थे भावाऽकर्त्रोरल् भवति, वाशब्दश्चोकारः । आहूयन्ते योद्धारोऽस्मिन्निति–आहवो युद्धम् । युद्ध इति किम् ? आह्वायः, आह्वानम्** ॥४३॥

**श० म० न्यासानुसन्धानम्– आङो०** । युद्धार्थानुरूपं विगृह्योदाहरति– **आहूयन्तेऽस्मिन्निति– आहवो युद्धमिति**– अधिकरणेऽल् । पदकृत्यं पृच्छति– **युद्ध इति किमिति**, उत्तरयति– **आह्वायः, आह्वानमिति**– प्रथमे घञ् द्वितीये चानट्, युद्धार्थाभावादत्र नास्य प्रवृत्तिः ॥ ५. ३. ४३. ॥

## आहावो निपानम् । ५. ३. ४४. ॥

**त० प्र०–निपिबन्त्यस्मिन्–निपानम्, पशु-शकुनीनां पानार्थं कृतो जलधारः । आङ्पूर्वात् ह्वयतेर्भावाकर्त्रोरल्, आहावादेशश्च निपात्यते, निपानं चेदभिधेयं भवति। आहूयन्ते पशवः पानायास्मिन्नित्याहावः पशूनाम्, आहावः शकुनीनाम्, निपानमित्यर्थः। निपानमिति किम् ? आह्वायः, आह्वानम्** ॥४४॥

**श० म० न्यासानुसन्धानम्– आहावो०** । निपानमित्यत्र भावेऽनटः सम्भवादिष्टार्थानुपपत्तावाह– **निपिबन्त्यस्मिन्– निपानमिति**, तथा चाधिकरणेऽत्रानडिति

भावः। न तदपि यत्किञ्चित् पानाधिकरणं विवक्षितमपि तु नियतविषयमित्याह– **पशुशकुनीनां पानार्थं कृतो जलाधारः** इति, "आहावस्तु निपानं स्यादुपकूपजलाशये" इत्यमरेणापि कूपसमीपनिर्मिते पश्वादिपानार्थजलाधार एव शक्तेरवधारणादिति भावः। वाच्यवाचकयोरिह सामानाधिकरण्येन निर्देशः प्रसिद्धवाचकत्वपरिग्रहार्थः, सप्तमीनिर्देशेऽवश्यप्राप्तार्धमात्रालाघवार्थश्च। **निपानमिति किमि**ति प्रश्नः, **आह्वायः, आह्वानमि**त्युत्तरं स्पष्टमिति ॥ ५. ३. ४४. ॥

## भावेऽनुपसर्गात् । ५. ३. ४५. ॥

**त० प्र०–अविद्यमानोपसर्गात् ह्वयतेर्भावेऽल् वाशब्दश्चोकारो भवति। अकर्तरीत्यस्यानुप्रवेशो मा भूदिति भावग्रहणम्।** ह्वानं हवः। **भाव इति किम्? कर्मणि** ह्वायः। **अनुपसर्गादिति किम्?** आह्वायः ॥४५॥

**श० म० न्यासानुसन्धानम्– भावे०**। भावाकर्त्रोरित्यस्यानुवृत्तेः सत्त्वादनुक्तेऽपि 'भावे' इति पदे भावार्थे प्रत्ययः स्यादेवेति भावग्रहणं व्यर्थमित्याशङ्कायामाह– **अकर्तरीत्यस्यानुप्रवेशो मा भूदिति भावग्रहणमि**ति– * सन्नियोगशिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिः * इति न्यायेनोभयोरप्यर्थयोः सहैवानुवृत्तिः स्यादिति भाववत् कर्तृभिन्ने कारकेऽपि प्रत्ययः स्यादिति तद्वारणाय भावाभिधानमावश्यकम्, क्वचिदेकदेशानुवृत्तेश्च विनिगमकप्रमाणव्याख्यानादिसापेक्षत्वेन तदाश्रयणापेक्षया 'व्याख्यानाद् वरं करणम्' इति न्यायेन भावपदग्रहणस्यैव लघीयस्त्वमिति भावः। भावे विगृह्योदाहरति– **ह्वानं हवः** इति। पृच्छति– **भाव इति किमि**ति, कर्मणि मा भूदित्याशयेनोत्तरयति– **कर्मणि ह्वायः** इति– ह्वयत इति कर्मणि घञि ह्वाय इत्येव भवतीत्यर्थः। **अनुपसर्गस्य किमि**ति प्रश्नः, **आह्वाय** इति चोत्तरम्, अत्र घञेवेत्यर्थः ॥ ५. ३. ४५. ॥

## हनो वा वध् च । ५. ३. ४६. ॥

**त० प्र०–अनुपसर्गाद्धन्तेर्भावेऽल् वा भवति, तत्संनियोगे चास्य वधादेशः। हननं वधः, घातः। अनुपसर्गादित्येव–संघातः ॥४६॥**

**श० म० न्यासानुसन्धानम्– हनो०**। "हनंक् हिंसागत्योः" 'भावे, अनुपसर्गात्, अल्' इति पूर्वतोऽनुवर्तते, चकार आदेशस्य प्रत्ययसन्नियोगशिष्टताज्ञापनार्थः, तथा चाह– **अनुपसर्गाद्धन्तेर्भावेऽल् वा भवति, तत्सन्नियोगे चास्य वधादेशः** इति। भावे विगृह्योदाहरति– **हननं–वधः** इति, पक्षे घञि हनो घातादेशे– **घातः** इति। व्यावर्त्यं दर्शयति– **अनुपसर्गादित्येव– संघातः**, अत्रापि घञेव ॥ ५. ३. ४६. ॥

## व्यध-जप-मद्भ्यः । ५. ३. ४७. ॥

**त० प्र०–एभ्योऽनुपसर्गेभ्यो भावाकर्त्रोरल् भवति। बहुवचनाद् भाव इति निवृत्तम्। व्यधः, जपः, मदः। अनुपसर्गादित्येव–आव्याधः, उपजापः, उन्मादः ॥४७॥**

**श० म० न्यासानुसन्धानम्– व्यध०**। निवर्तकस्य 'भावे' इत्यस्य निवृत्तौ पुनः 'भावाकर्त्रोः' इत्यायातीत्याह– **भावाकर्त्रोरि**ति। कथं 'भावे' इत्यस्य निवृत्तिरित्याशङ्कायामाह– बहुवचनाद् भाव इति निवृत्तमिति– एकवचनेनापि निर्वाहे सत्यपि बहुवचननिर्देशः स्वसाफल्याय व्याप्तिं गमयति, सा च भावाकर्त्रोः प्रत्ययविधानेन सम्भवतीति भावः। "व्यधंच् ताडने" "जप मानसे च" मनोनिर्वर्त्ये वचने, चकाराद् व्यक्ते वचने, "मदैच् हर्षे" अतोऽनेनालि– **व्यधः, जपः, मदः**। व्यावर्त्यं दर्शयति– **अनुपसर्गादित्येव– आव्याधः, उपजापः, उन्मादः** इति– अत्र घञि उपान्त्यवृद्धिः ॥ ५. ३. ४७. ॥

## नवा क्वण-यम-हस-स्वनः । ५. ३. ४८. ॥

**त० प्र०–अनुपसर्गेभ्य एभ्यो भावाकर्त्रोरल् वा भवति। क्वणः, क्वाणः; यमः, यामः; हसः, हासः; स्वनः, स्वानः। अनुपसर्गादित्येव–प्रक्वाणः, प्रयामः, प्रहासः, विष्वाणः। अप्राप्तविभाषेयम् ॥४८॥**

**श० म० न्यासानुसन्धानम्– नवा०**। "क्वण शब्दे" "यमू उपरमे" "हसे हसने" "स्वन शब्दे" अतोऽनेनालि पक्षे घञि उपान्त्यवृद्धौ च– **क्वणः, क्वाणः; यमः, यामः; हसः, हासः; स्वनः, स्वानः**। व्यावर्त्यं दर्शयति– **अनुपसर्गादित्येव– प्रक्वाणः, प्रयामः, प्रहासः, विष्वाणः** इति– एषु घञि उपान्त्यवृद्धिः, 'विष्वाणः' इत्यत्र "व्यवात् स्वनोऽशने" [ २. ३. ४३. ] इति सस्य षत्वम्, "रषृवर्णान्नो ण०" [ २. ३. ६३. ]

इति नस्य णत्वं च विज्ञेयम् । नवेति विभाषायाम्, सा च त्रिधा– प्राप्तेऽप्राप्ते प्राप्ताप्राप्ते च, तत्र च कीदृशीयमित्याह– **अप्राप्तविभाषेयमिति**– एभ्यो न केनापि सूत्रेणाल: प्राप्तिरित्यप्राप्तविभाषात्वमित्यर्थ: ॥ ५. ३. ४८. ॥

## आङो रु-प्लोः । ५. ३. ४९. ॥

**त० प्र०–आङः पराभ्यां रु-प्लुभ्यां भावाऽकर्त्रोरल् वा भवति । आरवः, आरावः; आप्लवः आप्लावः । आङ इति किम् ? विरावः, विप्लवः । रौतेर्घञि प्लवतेरलि नित्यं प्राप्ते विकल्पः ॥४९॥**

**श० म० न्यासानुसन्धानम्– आङो० । रुप्लोरिति**– लाघवाय सौत्रोऽयं निर्देशः । तथाहि– रुश्च प्लुश्चानयोः समाहार इति समाहारे नपुंसकस्यौत्सर्गिकत्वेऽपि सौत्रत्वात् पुंस्त्वेन नपुंसकलिङ्गप्रयुक्तनागमाभावः, यद्वा नपुंसकत्वेऽपि * आगमशासनमनित्यम् * इति नागमाभावः, न चैवं तर्हि "संयोगात्" [ २. १. ५२. ] इत्युवादेशेन भाव्यमिति वाच्यम्, * प्रकृतिवदनुकरणं वा भवति * इति न्यायेन विकल्पेन धातुत्वातिदेशे पक्षे धातुत्वाभावादुवादेशाभावः । यथा तन्त्रान्तरे कृधातोरनुकरणे धातुत्वातिदेशे इरादेशे–'कीः' इति भवति, धातुत्वातिदेशाभावे च 'कृः' इति रूपद्वयं भवतीति । न च "इवर्णादेरस्वे स्वरे" [ १. २. २१. ] इति वत्वेन भाव्यमिति वाच्यम्, "ङित्यदिति" [ १. ४. २३. ] इत्योकारे "एदोद्भ्यां ङसिङसो रः" [ १. ४. ३५. ] इति ङसे रादेशो भवति, यथा भानोः । भवन्ति ह्येवंविधाः सौत्रा निर्देशा लाघवायानेकत्र, तथाहि–"यु-पू-द्रोर्घञ्" [५. ३. ५४. ] "प्रात् स्नु-द्रु-स्तोः" [ ५. ३. ६७. ] "क्षु-श्रोः" [ ५. ३. ७१. ] इत्यादिषु, क्वचिच्च धातुत्वातिदेशेनापि स्पष्टोच्चारप्रतिपत्त्यादिकृते निर्देशो भवति, यथा–"पुव इत्रो दैवते" [ ५. २. ८५. ] इत्यादि । "रुक् शब्दे" "प्लुंङ् गतौ" अतोऽनेनालि गुणेऽवादेशे, पक्षे घञि वृद्धावावादेशे च–**आरवः, आरावः; आप्लवः, आप्लावः** इति । पृच्छति–**आङ इति किमिति**, उत्तरयति-**विरावः, विप्लवः** इति-अत्रास्याप्रवृत्त्या नित्यं घञ् अल् च । अस्य सूत्रस्य प्राप्ताप्राप्तविभाषात्वमाह-**रौतेर्घञिप्लवतेरलि नित्यं प्राप्ते विकल्पः** इति– "रोरुपसर्गात्" [ ५. ३. ६२. ] इति घञो नित्यं प्राप्तिरिति अल् न प्राप्तः, प्लवतेरुवर्णान्तलक्षणोऽल् नित्यं प्राप्त इति प्राप्ताप्राप्तविभाषात्वम् ॥ ५. ३. ४९. ॥

## वर्षविघ्नेऽवाद् ग्रहः । ५. ३. ५०. ॥

**त० प्र०–अवपूर्वात् ग्रहेर्वर्षविघ्ने वाच्ये भावाऽकर्त्रोरल् वा भवति । अवग्रहः, अवग्राहः; वृष्टेः प्रतिबन्ध इत्यर्थः । वर्षविघ्न इति किम् ? अवग्रहः पदस्य, अवग्रहोऽर्थस्य ॥५०॥**

**श० म० न्यासानुसन्धानम्– वर्ष० । वर्षविघ्ने वाच्ये** इति–वर्षस्य वृष्टेः, विघ्नः प्रतिबन्धः, तस्मिन् वाच्ये इत्यर्थः । "युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः" [ ५. ३. २८. ] इति नित्यमलि प्राप्ते पक्षे घञः प्रवृत्त्यर्थं विकल्पविधानमित्यर्थः । "ग्रहीश् उपादाने" अवपूर्वादतोऽनेनालि पक्षे घञि उपान्त्यवृद्धौ च– **अवग्रहः, अवग्राहः**, एतदर्थमाह– **वृष्टेः प्रतिबन्ध इत्यर्थः** । पृच्छति– **वर्षविघ्न इति किमिति**, उत्तरयति– **अवग्रहः पदस्य, अवग्रहोऽर्थस्येति**–वैदिकाः पदक्रियायां पदानि अवगृह्णन्ति-पृथक् पृथक् कुर्वन्ति छेदं, स च्छेदोऽवग्रहपदवाच्यस्तस्मिन् नित्यमेवाल् भवति, पूर्वं पदसान्निध्येनार्थपदेनात्र तदभिधेय एव गृह्यते न धनादिरिति, तस्य चावग्रहो विविच्य ग्रहणं ज्ञानमिति । जैनदर्शने च मतिज्ञानविशेषोऽवग्रहः, स च द्विविधः–व्यञ्जनावग्रहः [ शब्दावग्रहः ] अर्थावग्रहश्चेति, तदनुरूपमपि प्रत्युदाहरणयुगलमिति ॥ ५. ३. ५०. ॥

## प्राद् रश्मि-तुलासूत्रे । ५. ३. ५१. ॥

**त० प्र०–प्रपूर्वाद् ग्रहे रश्मौ तुलासूत्रे चार्थे भावाऽकर्त्रोरल् वा भवति । प्रगृह्यत इति–प्रग्रहः, प्रग्राहः; अश्वादेः संयमनरज्जुस्तुलासूत्रं चोच्यते, अन्यस्तु प्रग्रहः ॥५१॥**

**श० म० न्यासानुसन्धानम्– प्राद्०** । कर्मणि विगृह्योदाहरति– **प्रगृह्यत इति– प्रग्रहः, प्रग्राहः** इति– आद्यमलि द्वितीयं घञि चोदाहरणम्, तदर्थमाह– **अश्वादेः संयमनरज्जुः, तुलासूत्रं चोच्यते** इति– ननु अश्वादेः संयमनरज्जुरित्यर्थः कुतो लभ्यते ? यावता रश्मिशब्दः सामान्यवचनः, यथैवासौ अश्वादिसंयमनार्थायां रज्ज्वां वर्तते तथा चन्द्रार्कादिसम्बन्धिष्वपि रश्मिषु, उच्यते– **यथा** "नेर्वुः" [ ५. ३. ७४. ] इत्यत्र धान्यशब्दस्य सामान्य-

शब्दस्यापि धान्यविशेष एव गृह्यते, प्रत्ययान्तेन शब्दशक्तिस्वाभाव्याद् धान्यविशेषस्य वाऽभिधानात् तथा यद्यपि रश्मिशब्दः सामान्यवाची तथापि प्रत्ययान्तः स्वभावाद् रज्जुविशेष एव वर्तते, तस्मात् तस्यैव ग्रहणं युक्तमिति । उक्तार्थादन्यत्र तु "युवर्ण०" इत्यादिना नित्यमला भवितव्यमत आह– **अन्यत्र तु प्रग्रह** इति ॥ ५. ३. ५१. ॥

## वृगो वस्त्रे । ५. ३. ५२. ॥

**त० प्र०–प्रपूर्वाद् वृणोतेर्वस्त्रविशेषे वाच्ये भावाऽकर्त्रोरल् वा भवति । प्रवृण्वन्ति तमिति–प्रवरः, प्रावारः; "घञ्युपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति दीर्घः । अन्ये तु प्राङ्पूर्व एव वृणोतिः स्वभावाद् वस्त्रविशेषे वर्तते, तेन प्रावारः प्रावरः इति भवति । वस्त्र इति किम् ? प्रवरो यतिः ॥५२॥**

**श० म० न्यासानुसन्धानम्– वृगो०** । **वृग** इति गानुबन्धनिर्देशात् "वृग्ट् वरणे" इत्यस्य ग्रहणम्, न तु "वृङ्श् संभक्तौ" इत्यस्यात आह– **वृणोते**रिति । अत्रापि प्राग्वत् 'वस्त्रे' इति सामान्यनिर्देशेऽपि वस्त्रविशेषस्य ग्रहणमित्याह– **वस्त्रविशेषे वाच्ये** इति । कर्मणि विग्रहोदाहरति– **प्रवृण्वन्ति तमिति– प्रवरः, प्रावारः** इति– अलि प्रवरः घञि वृद्धौ "घञ्युपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति दीर्घे च– प्रावारः, उत्तरासङ्ग इत्यर्थः । घञि सत्येवोपसर्गस्य दीर्घेण भाव्यमलि तु नेत्यलि सति प्रावर इति प्रयोगस्यान्यैः कृतस्य तदुक्तामुपपत्तिमाह– **अन्ये तु प्राङ्पूर्व एव वृणोतिः स्वभावाद् वस्त्रविशेषे वर्तते, तेन प्रावारः प्रावर इति भवती**ति– सूत्रे 'वस्त्रे' इत्येतावदुक्तेरपि लोकप्रसिद्धवस्त्रपदस्यात्र वस्त्रविशेषपरत्वमाश्रितं वृत्तौ, वृणोतिर्यद्यपि स्वत आच्छादनार्थे प्रसिद्धः किन्तु आच्छादनविशेषे तस्य प्रयोगः 'प्र-आङ्' इत्युपसर्गद्वयसहकारेणैवेति तत्पूर्वकादेवात्र प्रत्यय इति तदाशयः । न च पूर्वसूत्रात् प्रादिति वर्तते, तथा च पञ्चम्या अव्यवहितांशोपस्थितिरिति प्रशब्दाव्यवहितपरत्व एव सूत्रमिदं प्रवर्तत इति प्राङ्पूर्वादस्य प्राप्तिरेव नेति प्रावर इति प्रयोगो वस्त्रेऽसाधुरेवेति वाच्यम्, प्रादित्यस्य लक्ष्यानुरोधादिहाकारप्रश्लेषसमाहाराश्रयणात् । "प्रावारप्रवरौ समौ" इति कोशवचनमपि न बाधकं कोशकाराणां वैमत्यदर्शनादिति मतान्तरीयः सारः । वस्तुतस्तु नेदृशी क्लिष्टकल्पनोचितेति मतान्तरत्वेनोपेक्षितमाचार्येणेति भावः । पदकृत्यं पृच्छति– **वस्त्र इति किमिति**, उत्तरयति– **प्रवरो यति**रिति– अत्र वस्त्रार्थाभावादस्याप्रवृत्त्या "युवर्ण०" [५. ३. २८.] इति नित्यमल् भवतीत्यर्थः ॥ ५. ३. ५२. ॥

## उदः श्रेः । ५. ३. ५३. ॥

**त० प्र०– उत्पूर्वाच्छ्रयतेर्भावाऽकर्त्रोरल् वा भवति । उच्छ्रयः, उच्छ्रायः । नित्यमलि प्राप्ते विकल्पः ॥५३॥**

**श० म० न्यासानुसन्धानम्– उदः०** । "श्रिग् सेवायाम्" उत्पूर्वादतोऽनेनालि गुणे पक्षे घञि वृद्धौ "प्रथमादधुटि शश्छः" [ १. ३. ४. ] इति शस्य छत्वे तकारस्य चत्वे च– **उच्छ्रयः, उच्छ्रायः** इति– दस्य तकारस्तु "अघोषे प्र०" [ १. ३. ५०. ] इत्यनेन । श्रिधातोरिवर्णान्तत्वेन "युवर्ण०" [ ५. ३. २८. ] इति नित्यमलि प्राप्ते विभाषेयमित्याह– **नित्यमलि प्राप्ते विकल्प** इति । पाणिनीये चोदः श्रेर्घञेव विधीयते, अत उच्छ्राय इत्येव रूपम्, तदनुसारेण तत्रेत्थं शङ्कितं दीक्षितेन– कथं "पतनान्ताः समुच्छ्रयाः" इति । घञि नित्ये कथमलन्त[अबन्त]प्रयोग इति शङ्का । उत्तरितं च तेनैव– बाहुलकादिति । बहुलग्रहणस्य सर्वत्रानुवृत्तेः क्वचिदपि [अलपि] भवतीति भावः, बहुलाश्रयणमगतिकगतिरिति केचनैवमाहुः– विभाषाग्रहणमिह [ "उदि श्रयतियौतिपूद्रुवः" ३-३-४९ इत्यत्र ] सम्बध्यते, न च यौतिप्रभृतीनामपि विकल्पेन प्रत्ययः प्रसज्यत इति वाच्यम्, व्यवस्थितविभाषया अतिप्रसङ्गाभावादिति ॥ ५. ३. ५३. ॥

## यु-पू-द्रोर्घञ् । ५. ३. ५४. ॥

**त० प्र०–वेति निवृत्तं पृथग्योगात् । उत्पूर्वेभ्य एभ्यो भावाऽकर्त्रोर्घञ् भवति । अलोऽपवादः । उद्यावः, उत्पावः, उद्द्रावः ॥५४॥**

**श० म० न्यासानुसन्धानम्– यु०** । घञो नित्यं विधेयत्वेनास्य च विकल्पप्रकरणाद् 'वा' इत्यस्यानुवृत्तौ विकल्पापत्तिरित्याशङ्कायामाह– **वेति निवृत्तमिति**, तत्र मानमाह– **पृथग्योगादिति**– यदि वानुवृत्तिरभिमता

स्यात् तर्हि पूर्वसूत्र एवैषामपि धातूनां ग्रहणे कृते विकल्पेनाल एव विधाने पक्षे घञः स्वभावत एव सिद्धेः, घञो ग्रहणाच्च तदसम्बन्धः सूचित इति भावः । **अलोऽपवादः** इति– उवर्णान्तलक्षणेन नित्यं प्राप्तस्य तस्यायमपवाद इति भावः । "युक् मिश्रणे" "पूङ् पवने" "पूग्श् पवने" "द्रुं गतौ" उत्पूर्वादितो घञि वृद्धावावादेशे च– **उद्यावः, उत्पावः, उद्द्रावः** ॥ ५. ३. ५४. ॥

## ग्रहः । ५. ३. ५५. ॥

**त० प्र०–उत्पूर्वात् ग्रहेर्भावाऽकर्त्रोर्घञ् भवति । अलोऽपवादः । उद्ग्राहः । उद इत्येव–ग्रहः, विग्रहः ॥५५॥**

**श० म० न्यासानुसन्धानम्–ग्रहः । अलोऽपवादः** इति– "युवर्ण०" [ ५. ३. २८. ] इत्यनेन प्राप्तस्यालोऽपवादः । "ग्रहीश् उपादाने" अत उत्पूर्वाद् घञि उपान्त्यवृद्धौ– **उद्ग्राहः** । व्यावर्त्यं दर्शयति–**उद इत्येव-ग्रहः, विग्रहः** इति– उदोऽभावादस्याप्रवृत्त्या "युवर्ण०" इत्यनेन नित्यमलित्यर्थः ॥ ५. ३. ५५. ॥

## न्यवाच्छापे । ५. ३. ५६. ॥

**त० प्र०–न्यवाभ्यां पराद् ग्रहेः शापे–आक्रोशे गम्यमाने भावाऽकर्त्रोर्घञ् भवति । निग्राहो ह ते वृषल ! भूयात्, अवग्राहो ह ते जाल्म ! भूयात् । शाप इति किम् ? निग्रहश्चौरस्य, अवग्रहः पदस्य ॥५६॥**

**श० म० न्यासानुसन्धानम्–न्यवा०** । शापोऽशुभाशंसनम् । **निग्राहो ह ते वृषल ! भूयादिति**– निग्राहो बाधः, ह इत्यव्ययं निश्चयार्थम् । **अवग्राहो ह ते जाल्म ! भूयादिति**–अवग्राहोऽभिभवः । पृच्छति–**शाप इति किमिति**, उत्तरयति–**निग्रहश्चौरस्येति**– निग्रहो बन्धनम्, अवग्रहस्तूक्त एव पदच्छेदादिरूपः । पूर्वत्र यद्यपि निग्रहोऽशुभ एव, किन्तु न स केनाप्याक्रुष्टोऽपि तु स्वाभाविक एव विषयः प्रतिपादित इति तत्र न भवतीति ॥ ५. ३. ५६. ॥

## प्राल्लिप्सायाम् । ५. ३. ५७. ॥

**त० प्र०–प्रपूर्वाद् ग्रहेर्लिप्सायां गम्यमानायां भावाऽकर्त्रोर्घञ् भवति । पात्रप्रग्राहेण चरति पिण्डपातार्थी भिक्षुः, स्रुवस्य प्रग्राहेण चरति दक्षिणार्थी द्विजः । लिप्सायामिति किम् ? स्रुवस्य प्रग्रहः ॥५७॥**

**श० म० न्यासानुसन्धानम्–प्राल्लि०** । लब्धुमिच्छा लिप्सा । **पात्रप्रगाहेण चरति पिण्डपातार्थी भिक्षुरिति**–'पात्रप्रगाहेण' इत्यनेनोदाहरणम्, भिक्षालाभायेति गम्यते, भिक्षापात्रोपादानेन, पात्रं गृहीत्वेति यावत्, 'पिण्डपातार्थी' इत्यनेन लिप्सा दर्शिता; एवं–**स्रुवस्य प्रगाहेण चरति दक्षिणार्थी द्विजः** इति–स्रुवस्य पात्रविशेषस्य, प्रगाहेणेत्युदाहरणम्, दक्षिणार्थीत्यनेन लिप्सा दर्शिता । पृच्छति–**लिप्सायामिति किमिति**, उत्तरयति–**स्रुवस्य प्रग्रहः** इति–अत्र स्रुवस्य प्रकर्षेण ग्रहणमात्रं विवक्षितं न तु लिप्सेति नास्य प्रवृत्तिः, किन्तु "युवर्ण०" इत्यनेनालेव भवति ॥ ५. ३. ५७. ॥

## समो मुष्टौ । ५. ३. ५८. ॥

**त० प्र०–संपूर्वाद् ग्रहेर्मुष्टिविषये धात्वर्थे भावाऽकर्त्रोर्घञ् भवति । मुष्टिरङ्गुलिसंनिवेशो न परिमाणम्, तत्र "माने" [ ५. ३. ८१. ] इत्येव सिद्धत्वात् । संग्राहो मल्लस्य, अहो मौष्टिकस्य संग्राहः, मुष्टेर्दार्ढ्यमुच्यते । मुष्टाविति किम् ? संग्रहः शिष्यस्य ॥५८॥**

**श० म० न्यासानुसन्धानम्–समो०** । ग्रहेः क्रियावाचित्वान्मुष्टेश्चाक्रियात्मकत्वात् तत्र ग्रहिर्न सम्भवति, तस्मान्मुष्टिग्रहे योऽर्थस्तस्य विषयो विज्ञायत इत्याह– **मुष्टिविषये धात्वर्थे** इति, अस्त्येवायं मुष्टिशब्दः परिमाणे– शाकस्य मुष्टिरिति, अङ्गुलीनां रचनाविशेषे यथा- हन्ति मुष्टिनेति । तत्राङ्गुलीनां रचनाविशेषवृत्तेरिह ग्रहणमित्याह–**मुष्टिरङ्गुलिसन्निवेशः** इति–सन्निवेशो रचनाविशेषः । परिमाणार्थवृत्तिं निषेधति–**न परिमाणमिति**, तत्र कारणमाह–**तत्र "माने" [५. ३. ८१.] इत्येव सिद्धत्वादिति**, अयमाशयः–यदीह परिमाणवृत्तेर्ग्रहणं स्यादस्य सूत्रस्य वैयर्थ्यं स्यात् "माने" इत्यनेनैव सिद्धत्वात्, तस्मादङ्गुलीनां रचनाविशेषवृत्तेरिह ग्रहणं विज्ञायते । **संग्राहो मल्लस्येति**–अत्र घञि उपान्त्यवृद्धिः, एवम्–**अहो मौष्टिकस्य संग्राहः** इति–अहो

इत्याश्चर्यं, मुष्टिः प्रहरणं यस्य तादृशस्य मल्लस्य, संग्राहशब्दार्थं प्राह–**मुष्टेर्दार्ढ्यमित्यर्थः** । पदकृत्यं पृच्छति–**मुष्टाविति किमिति**, उत्तरयति– **संग्रहः शिष्यस्येति**–मुष्ट्यर्थाभावादस्याप्रवृत्त्या "युवर्ण०" [ ५. ३. २८. ] इत्यलेव भवति ॥ ५. ३. ५८. ॥

## यु-दु-द्रोः । ५. ३. ५९. ॥

**त० प्र०–संपूर्वेभ्य एभ्यो भावाऽकर्त्रोर्घञ् भवति । संयावः, संदावः, संद्रावः । सम इत्येव– विद्रवः, उपद्रवः ॥५९॥**

**श० म० न्यासानुसन्धानम्– यु०** । "युक् मिश्रणे" "दु द्रु गतौ" सम्पूर्वादितो घञि वृद्धावावादेशे च– **संयावः, संदावः, संद्रावः** । समोऽनुवृत्तेर्व्यावर्त्यं दर्शयति–**विद्रवः, उपद्रवः** इति– समोऽभावादस्याप्रवृत्त्या "युवर्ण०" [५. ३. २८.] इत्युवर्णान्तलक्षणोऽलेव भवतीत्यर्थः ॥ ५. ३. ५९. ॥

## नियश्चानुपसर्गाद्वा । ५. ३. ६०. ॥

**त० प्र०–अविद्यमानोपसर्गान्नयतेर्यु-दु-द्रोश्च भावाऽकर्त्रोर्घञ् वा भवति । नयः, नायः; यवः, यावः; दवः, दावः; द्रवः, द्रावः । अनुपसर्गादिति किम् ? प्रणयः ॥६०॥**

**श० म० न्यासानुसन्धानम्– निय० । अनुपसर्गादिति**– अविद्यमान उपसर्गोऽस्येति बहुव्रीहिरित्याह– **अविद्यमानोपसर्गादिति** । प्रकृतेः परश्चकारः प्रकृतिमनुकर्षतीत्याह– **युदुद्रोश्चेति** । "णींग् प्रापणे" अतोऽनेन घञि वृद्धावायादेशे आवादेशे, पक्षे "युवर्ण०" [ ५. ३. २८. ] इत्यलि गुणेऽयादेशेऽवादेशे च–**नयः, नायः; यवः, यावः; दवः, दावः; द्रवः, द्रावः** । पृच्छति– **अनुपसर्गादिति किमिति**, उत्तरयति– **प्रणयः** इति-अत्रालेव, "अदुरुपसर्ग०" [ २. ३. ७७. ] इति नकारस्य णः ॥ ५. ३. ६०. ॥

## वोदः । ५. ३. ६१. ॥

**त० प्र०–उत्पूर्वान्नयतेर्भावाऽकर्त्रोर्वा घञ् भवति । उन्नायः, उन्नयः ॥६१॥**

**श० म० न्यासानुसन्धानम्– वोदः** । पूर्वसूत्रतो वाशब्दानुवृत्त्या विकल्पे सिद्धेऽत्र वाग्रहणं किमर्थमिति चेत् ? उच्यते– पुरा ज्ञापितमेतत्, यदुत– यत्र नवाशब्दोपादानं तत एव विकल्पानुवृत्तिर्न तु वाशब्दोपादाने, तथा च पूर्वसूत्रतो वाशब्दानुवृत्त्यसम्भवादत्र वाशब्दोपादानं सार्थकम्, किञ्चात उत्तरत्रापि विकल्पानुवृत्तिर्न भवतीति । अनेन घञि पक्षे इवर्णान्तलक्षणेऽलि च– **उन्नायः, उन्नयः** ॥ ५. ३. ६१. ॥

## अवात् । ५. ३. ६२. ॥

**त० प्र०–अवपूर्वान्नयतेर्भावाऽकर्त्रोर्घञ् भवति । अवनायः ॥६२॥**

**श० म० न्यासानुसन्धानम्– अवात्** । अनेन नित्यं घञि– **अवनायः** ॥ ५. ३. ६२. ॥

## परेर्द्यूते । ५. ३. ६३. ॥

**त० प्र०–परिपूर्वान्नयतेर्द्यूतविषये धात्वर्थे वर्तमानाद् भावाऽकर्त्रोर्घञ् भवति । परिणायेन शारीन् हन्ति, समन्तान्नयनेनेत्यर्थः । द्यूत इति किम् ? परिणयः कन्यायाः ॥६३॥**

**श० म० न्यासानुसन्धानम्– परे०** । **द्यूते** इत्यत्र विषयसप्तमीत्याह– **द्यूतविषये धात्वर्थे** इति । द्यूतविषयकं प्रयोगमुदाहरति–**परिणायेन शारीन् हन्तीति**, परिणायेनेत्यस्यार्थमाह– **समन्तान्नयनेनेत्यर्थः** । पृच्छति– **द्यूत इति किमिति**, उत्तरयति– **परिणयः कन्यायाः** इति– परिणयो विवाहः, अत्र "युवर्ण०" [ ५. ३. २८. ] इति नित्यमल् ॥ ५. ३. ६३. ॥

## भुवोऽवज्ञाने वा । ५. ३. ६४. ॥

**त० प्र०–परिपूर्वाद् भवतेरवज्ञानेऽर्थे वर्तमानाद् भावाकर्त्रोर्घञ् वा भवति । अवज्ञानमसत्कारपूर्वकोऽवक्षेपः । परिभावः, परिभवः । अवज्ञान इति किम् ? समन्ताद् भवनं परिभवः ॥६४॥**

**श० म० न्यासानुसन्धानम्– भुवो०** । अवज्ञानपदार्थमाह– **अवज्ञानमसत्कारपूर्वकोऽवक्षेपः** । अनेन वा घञि वृद्धावावादेशे, पक्षेऽलि गुणेऽवादेशे च– **परिभावः, परिभवः** । पृच्छति– **अवज्ञान इति किमिति**, उत्तरयति– **समन्ताद् भवनं– परिभवः** इति– अत्रोवर्णान्तलक्षणोऽलेव ॥ ५. ३. ६४. ॥

### यज्ञे ग्रहः । ५. ३. ६५. ॥

**त० प्र०–परिपूर्वाद् ग्रहेर्यज्ञविषये प्रयोगे भावाऽकर्त्रोर्घञ् भवति । पूर्वपरिग्राहः, उत्तरपरिग्राहः, वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यामभिधीयते । यज्ञ इति किम् ? परिग्रहः कुटुम्बिनः ॥६५॥**

**श० म० न्यासानुसन्धानम्–यज्ञे० । पूर्वपरिग्राहः, उत्तरपरिग्राहः** इति– पूर्वः प्रथमः कर्मारम्भात् पूर्वं परिग्रहणं स्फ्ये वेदेः स्वीकरणं-पूर्वपरिग्राहः, उत्तरः कर्मविधानानन्तरं कृतं परिग्रहणं स्फ्ये वेदेः स्वीकरणमुत्तरपरिग्राहः कथ्यते, स्फ्यो नाम काष्ठनिर्मितं खड्गाकृति यज्ञीयं पात्रम्, तद्धस्ते कृत्वा समन्ताल्लेखया यज्ञाङ्गभूतां वेदिं स्वीकरोति याज्ञिकस्तत्रेद मुदाहरणमित्याह– **वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यामभिधीयते** इति-एताभ्यां पूर्वोत्तरपरिग्राहाभ्यामित्यर्थः । पदकृत्यं पृच्छति– **यज्ञ इति किमिति**, उत्तरयति– **परिग्रहः कुटुम्बिनः** इति– कुटुम्बपरिपालनार्थं राजादिप्रदत्तस्य धनादेः परिग्रहणं स्वीकार इत्यर्थः, नात्र घञ् किन्तु "युवर्ण०" [ ५. ३. २८. ] इत्यलेव भवतीति भावः ॥ ५. ३. ६५. ॥

### संस्तोः । ५. ३. ६६. ॥

**त० प्र०–संपूर्वात् स्तौतेर्भावाऽकर्त्रोर्यज्ञविषये घञ् भवति । संस्तुवन्त्यत्रेति संस्तावश्छन्दोगानाम्, समेत्य स्तुवन्ति छन्दोगा यत्र देशे स देशः संस्ताव उच्यते । यज्ञ इत्येव–संस्तवोऽन्यदृष्टे ॥६६॥**

**श० म० न्यासानुसन्धानम्– संस्तोः ।** "ष्टुंग्क् स्तुतौ" अधिकरणे विगृह्योदाहरति– **संस्तुवन्त्यत्रेति–संस्तावश्छन्दोगानामिति** सामवेदिनो ब्राह्मणाश्छन्दोगा उच्यन्ते, गीयमानो वेदः सामेति नाम्ना प्रसिद्धः, गानं च पृथगपि भवति कार्यविशेषे स्थलविशेषे च संघीभूयापि, तत्र यत्र देशे संघीभूय सामगाः साम गायन्ति स देश इह वाच्यः । एवं चाधिकरणे कारके प्रत्ययः, तदाह– **समेत्य स्तुवन्ति छन्दोगा यत्र देशे स देशः संस्ताव उच्यते** । यज्ञानुवृत्तेर्व्यावर्त्यं दर्शयति–**यज्ञ इत्येव-संस्तवोऽन्यदृष्टे** इति-अन्यदृष्टे वस्तुनि संस्तवः परिचय इत्यर्थः, अत्रोवर्णान्तिलक्षणोऽलेव भवति ॥ ५. ३. ६६. ॥

### प्रात् स्रु-द्रु-स्तोः । ५. ३ ६७. ॥

**त० प्र०–प्रात् परेभ्यः स्रवत्यादिभ्यो भावाऽकर्त्रोर्घञ् भवति । प्रस्रावः, प्रद्रावः, प्रस्तावः । प्रादिति किम् ? स्रवः, द्रवः, स्तवः । कथं स्रावः ? बहुलाधिकारात् ॥६७॥**

**श० म० न्यासानुसन्धानम्–प्रात्० ।** "स्रुं द्रुं गतौ" अनुकर्षणाय चकारे कृते सम्पूर्वस्यैव स्तोरनुकर्षणं स्यात्, तच्च नेष्टमिति स्तोरुपादानमत्र । अनेन घञि– **प्रस्रावः, प्रद्रावः, प्रस्तावः** । पदप्रयोजनं पृच्छति– **प्रादिति, किमिति**, उत्तरयति–**स्रवः, द्रवः, स्तवः** इति– अनुपसर्गत्वादस्याप्रवृत्त्या उवर्णान्तिलक्षणोऽलेव भवति । यद्येवं तर्हि समुपलभ्यमानस्य स्राव इति प्रयोगस्य का गतिरिति शङ्कते– **कथं स्रावः** इति, समाधत्ते– **बहुलाधिकारादिति** ॥ ५. ३. ६७. ॥

### अयज्ञे स्त्रः । ५. ३. ६८. ॥

**त० प्र०–प्रपूर्वात् 'स्तॄ' इत्येतस्मात् धातोर्भावाऽकर्त्रोर्घञ् भवति । अयज्ञे–न चेत् यज्ञविषयः प्रयोगो भवति । प्रस्तारः, मणिप्रस्तारः, विमानप्रस्तारः, नयप्रस्तारः । अयज्ञ इति किम् ? बर्हिष्प्रस्तरः, "समासेऽसमस्तस्य" [२. ३. १३.] इति षत्वम् ॥६८॥**

**श० म० न्यासानुसन्धानम्– अयज्ञे० ।** "स्त्रोऽयज्ञे" इति निर्देशेऽर्धमात्रालाधवेऽपि 'यज्ञे' इति छेदशङ्कापाकरणाय "अयज्ञे स्त्रः" इति निर्देशः । **अयज्ञे** इत्यत्र प्रसज्यप्रतिषेध इत्याह–**न चेत् यज्ञविषयः प्रयगो भवतीति**। "स्तृग्श् आच्छादने" **प्रस्तारः** इति– इष्टकासन्निवेशविशेष इति याज्ञिकाः, **मणिप्रस्तारः, विमानप्रस्तारः, नयप्रस्तारः** इति– षष्ठीसमासः, मणीनां विमानानां नयानां च प्रस्तारो रचनाविशेष इत्यर्थः । पृच्छति– **अयज्ञ इति किमिति**, उत्तरयति– **बर्हिष्प्रस्तरः** इति– बर्हिषः प्रस्तरो मुष्टिविशेषः, षत्वमिह केनेत्याह– **"समासेऽसमस्तस्य" [२. ३. १३.] इति षत्वमिति** ॥ ५. ३. ६८. ॥

### वेरशब्दे प्रथने । ५. ३. ६९. ॥

**त० प्र०– प्रथनं विस्तीर्णता, वेः परात् स्तृणातेर-**

**शब्दविषये प्रथनेऽभिधेये घञ् भवति । विस्तारः पटस्य। प्रथन इति किम् ? तृणस्य विस्तरः, छादनमित्यर्थः। अशब्द इति किम् ? अहो द्वादशाङ्गस्य विस्तरः ॥६९॥**

**श० म० न्यासानुसन्धानम् वेर०।** प्रथनपदार्थमाह–**प्रथनं विस्तीर्णता। विस्तारः पटस्येति**–पटस्य विस्तीर्णतेत्यर्थः। पृच्छति–**प्रथन इति किमिति**, उत्तरयति– **तृणस्य विस्तरः** इति, कथमिह न प्रथनमित्याशङ्कामपाकर्तुं तदर्थमाह– **छादनमित्यर्थः** इति– तृणाच्छादनमिति भावः, अत्र ऋकारान्तलक्षणोऽलेव भवतीत्यर्थः। पुनः पृच्छति–**अशब्द इति किमिति**, उत्तरयति– **अहो द्वादशाङ्गस्य विस्तरः** इति–द्वादशानामाचारादीनामागमाङ्गानां समाहारस्तस्य, अत्र प्रथनस्य शब्दविषयत्वादस्याप्रवृत्त्या ऋदन्तलक्षणोऽलेव भवतीति भावः ॥ ५. ३. ६९. ॥

## छन्दोनाम्नि । ५. ३. ७०. ॥

**त० प्र०– छन्दः–पद्यो वर्णविन्यासः,विपूर्वात् स्तृणातेश्छन्दोनाम्नि विषये घञ् भवति । विष्टारपङ्क्तिः। केचित् तु वेरन्यतोऽपीच्छन्ति–आस्तारपङ्क्तिः, प्रस्तारपङ्क्तिः, छन्दोनाम ॥७०॥**

**श० म० न्यासानुसन्धानम्–छन्दो०।** छन्दःशब्दस्य वेदेऽभिलाषे वाग्बन्धविशेषे च प्रयोगादिह ग्राह्यमर्थं स्पष्टयति– **छन्दः पद्यो वर्णविन्यासः** इति– वर्णानां वैशिष्ट्येन तत्तत्क्रमविशेषयुक्तत्वेन न्यासो निवेशः पद्यपदेनोच्यत इति स एव छन्दःशब्दाभिधेय इति। **विष्टारपङ्क्तिरिति**–पङ्क्तिपर्यन्तं छन्दोनामेति वाक्यावस्थायां घञ् न प्राप्नोतीति विस्तारश्चासौ पङ्क्तिश्चेति कर्मधारयः, विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ्, "वेः स्त्रः" [ २. ३. २३. ] इति संज्ञायां सस्य षः। **केचित् तु वेरन्यतोऽपीच्छन्तीति**– आस्तारपङ्क्तिरित्यादिप्रयोगानुरोधेन वेरिति नानुवर्तयन्ति, प्रयोगानुरोधादिह 'स्त्रः' इत्यनुवर्तयन्ति, उत्तरत्र च मण्डूकप्लुत्या तस्य सम्बन्ध इति भावः, तन्मतेनोदाहरति– **आस्तारपङ्क्तिः,प्रस्तारपङ्क्तिः, छन्दोनामेति** ॥५.३.७०.॥

## क्षु-श्रोः । ५. ३. ७१. ॥

**त० प्र०– क्षौतेः शृणोतेश्च विपूर्वाद् भावाऽकर्त्रोर्घञ् भवति। विक्षावः, विश्रावः। वेरित्येव–क्षवः, श्रवः ॥७१॥**

**श० म० न्यासानुसन्धानम्–क्षु०।** "टुक्षुक् शब्दे" "श्रुंट् श्रवणे" विपूर्वादितो घञि– **विक्षावः, विश्रावः।** वेरित्यस्यानुवृत्तेर्व्यावर्त्यं दर्शयति– **क्षवः, श्रवः** इति– अत्रोवर्णान्तलक्षणोऽलेव ॥ ५. ३. ७१. ॥

## न्युदो ग्रः । ५. ३. ७२. ॥

**त० प्र०– न्युद्भ्यां परात् गिरतेर्गृणातेर्वा भावाऽकर्त्रोर्घञ् भवति । निगारः, उद्गारः । न्युद इति किम् ? गरः, संगरः ॥७२॥**

**श० म० न्यासानुसन्धानम्–न्यु०। ग्रः** इति गॄधातोरनुकरणात् पञ्चम्येकवचने रूपम्। "गॄत् निगरणे" "गॄश् शब्दे" इति द्विविधो गॄधातुः, तत्रान्यतरग्रहणे विनिगमकाभावादुभयोरपि ग्रहणमित्याह–**गिरतेर्गृणातेर्वेति**। निपूर्वस्य–**निगारः**, उत्पूर्वस्य–**उद्गारः**। पृच्छति–**न्युद इति किमिति**, उत्तरयति–**गरः, संगरः** इति–उपसर्गाभावे उपसर्गान्तरे वाऽस्याप्रवृत्त्या ऋदन्तलक्षणोऽल् भवतीत्यर्थः। संगीर्यते अभ्युपगम्यते योद्धृभिरिति संगरो युद्धम्, संगरणं वा तदा प्रतिज्ञार्थः ॥ ५. ३. ७२. ॥

## किरो धान्ये । ५. ३. ७३. ॥

**त० प्र०–न्युत्पूर्वात् किरतेर्धान्यविषये धात्वर्थे वर्तमानाद् भावाऽकर्त्रोर्घञ् भवति । निकारो धान्यस्य, उत्कारो धान्यस्य, राशिरित्यर्थः । धान्य इति किम् ? फलनिकरः, पुष्पोत्करः ॥७३॥**

**श० म० न्यासानुसन्धानम्–किरो०।** इरादेशस्य निर्देशात् "कॄत् विक्षेपे" इत्यस्यैव ग्रहणम्, न तु "कॄश् हिंसायाम्" इत्यस्य। किञ्चानभिधानादपि हिंसार्थस्य न ग्रहणम्, शब्दशक्तिस्वाभाव्यादुत्कारनिकारशब्दाभ्यां धान्यविषयो विक्षेप एवाभिधीयते, न हिंसा, यस्य चार्थः प्रत्ययान्तेनाभिधीयते तस्यैव ग्रहणं युक्तं नेतरस्य, उत्कारो धान्यस्येति विक्षेपो धान्यस्येत्यर्थः। धान्यमिह प्रकृत्यर्थो वा स्यात् प्रत्ययार्थो वा स्यात् ? प्रकृत्यर्थस्तावन्नो-

पद्यते धान्यस्य द्रव्यत्वाद् धातोश्च क्रियावाचित्वात् । प्रत्ययार्थस्तूपपद्यते धान्यम्, किन्तु प्रत्ययेनाभिहितत्वादुत्कारो धान्यस्येति धान्यशब्दस्य प्रयोगो न प्राप्नोति । अथापि प्रयोगः स्यादेवमपि प्रत्ययार्थेऽन्तर्भूतत्वात्, षष्ठी नोपपद्यते उत्कारो धान्यस्येति, सामानाधिकरण्यमेव प्रत्ययान्तेन स्यात्, एवं हि प्रत्ययार्थो भवति यदि प्रत्ययान्तेन सामानाधिकरण्यं भवति, यथा इतिहरिः पशुरिति, तस्मान्नेदं प्रत्ययार्थो नापि प्रकृत्यर्थः, अपि तु प्रकृत्यर्थविशेषणमिति मत्वाह–**धान्यविषये धात्वर्थे** इति । अनेन घञि वृद्धौ च–**निकारो धान्यस्य, उत्कारो धान्यस्ये**ति, तदर्थमाह–**राशिरित्यर्थः** इति–धान्यस्येति शेषः । पृच्छति–**धान्य इति किमि**ति, उत्तरयति–**फलनिकरः, पुष्पोत्करः** इति–फलानां पुष्पाणां च राशिरित्यर्थः, अत्र धान्यार्थाभावादस्याप्रवृत्त्या ऋदन्तलक्षणेऽलि गुणे च तथारूपमित्यर्थः ॥ ५. ३. ७३. ॥

## नेर्वुः । ५. ३. ७४. ॥

**त० प्र०–निपूर्वाद् वृणोतेर्वृणातेर्वा धान्यविशेषेऽभिधेये भावाऽकर्त्रोर्घञ् भवति । निव्रियन्त इति– नीवारा नाम व्रीहिविशेषाः, "घञ्युपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति दीर्घत्वम् । धान्य इत्येव–निवरा कन्या, स्वभावादलन्तोऽप्ययं स्त्रियां वर्तते, क्तिस्तु बहुलाधिकारान्न भवति ॥७४॥**

**श० म० न्यासानुसन्धानम्–ने०** । अनुकृतस्य वृधातोः पञ्चम्येकवचने **वु**रिति, वृधातुश्च द्विविधः–"वृग्ट् वरणे" "वृङ्श् संभक्तौ" इति च, तत्र सामान्योपादानाद् विशेषग्रहणे विनिगमकाभावादुभयोरपि ग्रहणमित्याह–**वृणोतेर्वृणातेर्वे**ति । कर्मणि विगृह्योदाहरति–**निव्रियन्त इति–नीवारा नाम धान्यविशेषाः** इति–नीवारा वनव्रीहयः, एतेन यद्यपि धान्यशब्देन सामान्यवाचिनाऽयं व्युत्पाद्यते तथापि प्रत्ययान्तं शब्दशक्तिस्वाभाव्याद् धान्यविशेष एव वर्तत इति दर्शयति । कथमिह दीर्घत्वमित्याह–**"घञ्युपसर्गस्य बहुलम्" [ ३. २. ८६. ] इति दीर्घत्वमिति** । धान्यानुवृत्तेर्व्यावर्त्यं दर्शयति–**धान्य इत्येव– निवरा कन्ये**ति–निव्रियत इत्यलि निवरा, "पुंलिङ्गं···इमनलौ ·····" [ लिङ्गानुशासने–१ ] 'इमन्'प्रत्ययान्तमल्प्रत्ययान्तं च नाम पुंलिङ्गं भवेत्, इत्यलन्तस्य पुंस्त्वेन 'निवरा' इत्यत्र कथं स्त्रीत्वमित्याशङ्कायामाह–**स्वभावतोऽलन्तोऽप्ययं स्त्रियां वर्तते** इति–लिङ्गाधिकारेऽलन्तस्य पुंलिङ्गताप्रतिपादनं तत् प्रायिकं वेदितव्यमित्यर्थः, स्वयमप्याचार्येण लिङ्गानुशासनप्रान्ते प्रोक्तं "तद् बहुलम् ।।" [ तत् पूर्वोक्तं लिङ्गलक्षणं बहुलं द्रष्टव्यम् ], वृत्तिप्रान्ते च–

"वाग्विषयस्य महतः संक्षेपेण लिङ्गविधिरुक्तः ।
यन्नोक्तमत्र सद्भिस्तल्लोकत एव विज्ञेयम् ।।"

"लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" इति च" इति । ननु यदीह स्त्रीत्वं निश्चितं तर्हि परत्वात् "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिप्रत्ययेन भाव्यमिति चेत् ? अत्राह–**क्तिस्तु बहुलाधिकारान्न भवतीति**–बाहुलकात् तस्येहाप्रवृत्तिरित्यर्थः ॥ ५. ३. ७४. ॥

## इणोऽभ्रेषे । ५. ३. ७५. ॥

**त० प्र०–स्थितेरचलनमभ्रेषः, निपूर्वादिणोऽभ्रेषविषयेऽर्थे वर्तमानाद् भावाऽकर्त्रोर्घञ् प्रत्ययो भवति । शास्त्रलोकप्रसिद्ध्यादिना नियतमयनं–न्यायः । अभ्रेष इति किम् ? न्ययं गतश्चौरः ॥७५॥**

**श० म० न्यासानुसन्धानम्– इणो०** । अभ्रेषशब्दं व्याचष्टे–**स्थितेरचलनमभ्रेषः** इति– स्थितिर्लोकमर्यादा तस्या अचलनं तदपरित्यागोऽभ्रेष इत्यर्थः, "भ्रेषृग् चलने च" चकराद् भये, अतो घञि भ्रेषणं भ्रेषः, न भ्रेषोऽभ्रेषः । अभ्रेषं संगमय्योदाहरति– **शास्त्रलोकप्रसिद्ध्यादिना नियतमयनं– न्यायः** इति– "इंणक् गतौ" निपूर्वादितो घञि वृद्धौ आयादेशे इकारस्य च यादेशे न्यायः । यत्र विषये शास्त्रेण व्यवस्था कथिता तत्र विषये तदनुसरणम्, शास्त्रानभिहिते च विषये लोकव्यवहारप्रसिद्धव्यवस्थया तदुपगमनं न्यायशब्दार्थ इति भावः । पृच्छति–**अभ्रेष इति किमि**ति, उत्तरयति– **न्ययं गतश्चौरः** इति– अत्रेवर्णान्तलक्षणेऽलि गुणेऽयादेशे च-- न्यय इति, न्ययो नाशस्तं प्राप्त इत्यर्थः । निकृष्टमयनं गतिरिति व्युत्पत्त्या न्ययशब्दस्य कुत्सिताचारपरत्वमपि, प्रसिद्धिस्तु नियतमयनमिति व्युत्पत्त्या नाशे– मृत्यावेवेति ॥ ५. ३. ७५. ॥

**परेः क्रमे** । ५. ३. ७६. ॥

**त० प्र०– क्रमः परिपाटी, परिपूर्वादिणः क्रमविषयेऽर्थे वर्तमानाद् भावाऽकर्त्रोर्घञ् भवति । तव पर्यायो भोक्तुम्, मम पर्यायो भोक्तुम्, क्रमेण पदार्थानां क्रियासंबन्धः पर्यायः । क्रम इति किम् ? पर्ययः स्वाध्यायस्य, अतिक्रम इत्यर्थः, विपर्ययो मतेः, अन्यथाभवनमित्यर्थः ॥७६॥**

**श० म० न्यासानुसन्धानम्– परेः०** । "क्रमू पादविक्षेपे" अतो घञि "मोऽकमि०" [ ४. ३. ५५. ] इति वृद्धिनिषेधे– **क्रमः** । क्रमपदार्थमाह– **परिपाटीति** । उदाहरति– **तव पर्यायो भोक्तुम्, मम पर्यायो भोक्तुमिति**। क्रमस्य पूर्वापरीभावमात्रे प्रसिद्धया पर्यायस्य ततो विशिष्टार्थबोधकत्वेनात्र कथं क्रम इत्याशङ्कायां तदर्थं क्रमविशेषमाह– **क्रमेण पदार्थानां क्रियासम्बन्धः पर्यायः** इति– क्रियाऽत्र भोजनम्, भोक्तारः पदार्थभूताः, तेषां क्रमेण नियतपूर्वापरीभावेन भोजनक्रियया सह सम्बन्धात् क्रमत्वं स्पष्टमिति भावः । पृच्छति-**क्रम इति किमिति**, उत्तरयति– **पर्ययः स्वाध्यायस्येति**, पर्ययशब्दार्थमाह– **अतिक्रम इत्यर्थः** इति– अतिक्रमोऽतिपात उल्लङ्घनमिति भावः, यथा स्वाध्यायो विधातुमुचितस्तथा न कृत इति भावः । **विपर्ययो मतेरिति**, विपर्ययपदार्थमाह– **अन्यथाभवनमित्यर्थः** इति ॥ ५. ३. ७६. ॥

**व्युपाच्छीङः** । ५. ३. ७७. ॥

**त० प्र०– व्युपाभ्यां पराच्छीङो भावाऽकर्त्रोर्घञ् भवति, क्रमे–क्रम विषयश्चेद् धात्वर्थो भवति । तव राजविशायः, मम राजोपशायः । क्रमप्राप्तं पर्यायसाध्यं शयनमुच्यते । अन्ये तु शयितुं पर्याय उच्यते इत्याहुः । क्रम इति किम् ? विशयः, उपशयः ॥७७॥**

**श० म० न्यासानुसन्धानम्– व्युपा०** । "शीङ्क् स्वप्ने" इति शीधातोरनेन घञि वृद्धावायादेशे च– **तव राजविशायः, मम राजोपशायः** इति, प्रयोगार्थे वैमत्यं दर्शयितुं पूर्वं स्वमतमाह– **क्रमप्राप्तं पर्यायसाध्यं शयनमुच्यते** इति– राजनियोज्यः कश्चित् राजसमीपे जागर्ति, अन्यश्च स्वपिति तत्रैव, तत्र च क्रमो नियतो भवति, तत्र पर्यायस्य प्रसिद्धतयेह शयनमेव बोधनीयं विशेष्यतयेति भावः । एवं सति पर्यायस्य प्रयोगार्थबहिर्भावापत्तिरिति पर्यायबोधनस्यैव तत्प्रयोगविषयत्वमिति मन्वानानां मतमाह– **अन्ये तु शयितुं पर्याय उच्यत इत्याहुरिति**– अहं पूर्वं सुप्तस्तव शयनस्यायं क्रमः प्राप्त इति कश्चन बोध्यत इति भावः । पदकृत्यं पृच्छति– **क्रम इति किमिति**, उत्तरयति– **विशयः, उपशयः** इति- विशयः संशयः, उपशयः समीपशयनम्, अत्र पर्यायो न विवक्षित इत्यस्याप्रवृत्त्या इवर्णान्तलक्षणोऽल् भवतीति भावः ॥ ५. ३. ७७. ॥

**हस्तप्राप्ये चेरस्तेये** । ५. ३. ७८. ॥

**त० प्र०–हस्तेनोपायान्तरनिरपेक्षेण प्राप्तुं शक्यं–हस्तप्राप्यम्, तद्विषयाच्चिनोतेर्भावाऽकर्त्रोर्घञ् भवति, अस्तेये– न चेद् धात्वर्थः स्तेये–चौर्ये भवति । हस्तप्राप्यशब्देन प्रत्यासत्तिः प्राप्यस्य लक्ष्यते, तेन प्रत्यासत्तिविषये धात्वर्थे विधानम् । पुष्पप्रचायः, फलावचायः, फलोच्चायः, फलोच्चायश्च संहृतः । उदो नेच्छन्त्यन्ये– फलोच्चयः । हस्तप्राप्य इति किम् ? पुष्पप्रचयं करोति तरुशिखरे । अस्तेय इति किम् ? स्तेयेन पुष्पप्रचयं करोति । हस्तप्राप्यशब्देन प्रमाणमप्युच्यते– यद्धस्ते संभवति न हस्तादतिरिच्यते इति, ततश्च "माने" [ ५. ३. ८१. ] इत्यनेनैव सिद्धे नियमार्थं वचनम्–अस्तेय एवेति, तेन पुष्पाणां हस्तेन प्रचयं करोति चौर इत्यत्र "माने" [ ५. ३. ८१. ] इत्यनेनापि घञ् न भवति ॥७८॥**

**श० म० न्यासानुसन्धानम्–हस्त०** । हस्तेन हि सर्वं वस्तु यथाकथञ्चित् प्राप्तुं शक्यत एवेति हस्तप्राप्यशब्दस्याव्यावर्तकतामाशङ्क्याह– **हस्तेनोपायान्तरनिरपेक्षेण प्राप्तुं शक्यं हस्तप्राप्यमिति**– उपायान्तरसापेक्षेण हि तेन सर्वं वस्तु प्राप्तुं शक्यमेवेति हस्तप्राप्यशब्दोपादानेनैतादृशोऽर्थोऽवश्यं कल्पनीय इति भावः । न तावद्धस्तप्राप्यशब्दस्य स्वार्थपरत्वम्, यदेव प्रांशुनोपायान्तरनिरपेक्षेण हस्तेन प्राप्तुं शक्यते तदेव खर्वेणोपायान्तरसापेक्षेणेति तत्र न स्यात् प्रत्ययोऽतस्तस्यार्थान्तरलक्षकत्वमप्याश्रयणीयमित्याह– **हस्तप्राप्यशब्देन प्रत्यासत्तिः प्राप्यस्य लक्ष्यते** इति– हस्तेनोपायान्तरनिरपेक्षेण

प्राप्यत्वं प्रत्यासत्तित एव वस्तुनो भवति, तस्माद् हस्तप्राप्यग्रहणेन प्राप्यस्य वस्तुन प्रत्यासन्नतोपलक्ष्यते हस्तप्राप्यशब्दाभिधेयस्यार्थस्य प्रत्यासत्तेः साहचर्यात् । यद् वस्तु साधारण्येन सर्वैः प्रत्यासन्नतया समीपस्थितत्वेनावगत्य प्राप्तये प्रयत्यते तत्रेति भावः । तथा च यत् फलितं तदाह– **तेन प्रत्यासत्तिविषये धात्वर्थे विधानमि**ति । "चिंगट् चयने" अतो घञि षष्ठीसमासे च–**पुष्पप्रचायः, फलावचायः, फलोच्चायः,** अत्रार्थे कविप्रयोगमाह– **'फलोच्चायश्च संहृतः'** इति । मतभेदेन विशेषमाह– **उदो नेच्छन्त्यन्ये-फलोच्चायः** इति–उदुपसर्गो हि तेषामुच्चैश्रितत्वमात्रं बोधयति, न तु हस्तप्राप्यता गम्यत इति तेषामाशयः । पदकृत्यं पृच्छति– **हस्तप्राप्य इति किमि**ति, उत्तरयति– **पुष्पप्रचयं करोति तरुशिखरे** इति–तरुशिखरस्थानां पुष्पाणां हस्तप्राप्यत्वानवगतेस्तेषां तरुमारुह्यान्योपायेन वा हस्तप्राप्यत्वं न तूपायान्तरनैरपेक्ष्येणेति तत्र हस्तप्राप्यत्वं नास्तीति भावः । पुनः पृच्छति–**अस्तेय इति किमि**ति, उत्तरयति–**स्तेयेन पुष्पप्रचयं करोती**ति–सर्वत्र प्रत्युदाहरणे इवर्णान्तलक्षणोऽल् विज्ञेयः । स्तेयेऽनेन वाऽन्येन वा घञ् प्रत्ययो मा भूदित्येतदर्थमस्य नियमार्थत्वमुपपादयति–**हस्तप्राप्यशब्देन प्रमाणमप्युच्यते** इति, कीदृशं तदित्याह– **यद् हस्ते सम्भवती**ति–हस्ते संमातीत्यर्थः, तस्यैवार्थमाह– **न हस्तादतिरिच्यते** इति । किमनेन व्याख्यानेनेत्याह– **ततश्च "माने" [ ५. ३. ८१. ] इत्यनेनैव सिद्धे नियमार्थं वचनमि**ति । नियमाकारमाह–**अस्तेय एवे**ति, अयमाशयः–पूर्वोक्तरीत्या हस्तप्राप्यशब्दस्य मानपरत्वमायातमित्यग्रिमसूत्रेणैवात्रापि सिद्धे सत्यारभ्यमाणोऽयं विधिर्मानेऽपि चेदस्तेय एवेति नियमयतीति । नियमफलमाह–**तेन पुष्पाणां हस्तेन प्रचयं करोति चौर इत्यत्र "माने" [ ५. ३. ८१. ] इत्यनेनापि घञ् न भवती**ति ॥ ५. ३. ७८. ॥

## चिति देहाऽऽवासोपसमाधाने कश्चादेः

॥ ५. ३. ७९. ॥

**त० प्र०–चीयत इति–चितिर्यज्ञेऽग्निविशेषः, तदाधारो वा; देहः शरीरम्, आवासो निवासः, उपसमाधानमुपर्युपरि राशीकरणम् । एष्वर्थेषु चिनोतेर्भावाऽकर्त्रोर्घञ्, तत्संनियोगे चादेः ककारादेशो भवति । आकायमग्निं चिन्वीत । देहे–कायः शरीरम् । आवासे-ऋषिनिकायः । उपसमाधाने- गोमयनिकायः, गोमयपरिकायः । कथं काष्ठनिचयः ? बहुत्वमात्रविवक्षया । एष्विति किम् ? चयः । चः क इत्येव सिद्धे आदिग्रहणमादेरेव यथा स्यात्, तेन चेर्यङ्लुपि–निकेचाय इत्येव भवति ॥७९॥**

---

**श० म०** न्यासानुसन्धानम्–चिति० । इह ग्राह्यं चितिशब्दार्थमाह–**चीयत इति चितिर्यज्ञेऽग्निविशेषः** इति–कर्मणि प्रत्यय इति भावः । पक्षान्तरमाह– **तदाधारो वे**ति–अग्निविशेषस्याधारभूतं कुण्डमिह वाच्यमित्यर्थः, तथा चाधिकरणे घञिति भावः । यथोद्देशन्यायेनोदाहर्तुमवतारयति–**चितौ** इति । उदाहरति– **आकायमग्निं चिन्वीते**ति–यज्ञीयमग्निविशेषं चयनेन सम्पादयेदित्यर्थः, अधिकरणे प्रत्ययविधाने तु आधारभूतस्याकायस्य चिनोतेर्योगेऽनुक्तं कर्म बोध्यम्, अथवा चिनोतेर्द्विकर्मकत्वस्वीकारादुभे अपि कर्मणी एव, तथा चाचीयतेऽग्निरस्मिन्, अथवा आचीयन्ते इष्टका अस्मिन्निति–आकायोऽग्निस्थापनस्थलविशेषः, तमग्निं च चयनेन सम्पादयेदित्यर्थः । देहे उदाहरति–**कायः**, तदर्थमाह– **शरीरमि**ति । आवासे उदाहरति–**ऋषिनिकायः** इति–ऋषीणामावास इत्यर्थः । उपसमाधाने उदाहरति– **गोमयनिकायः, गोमयपरिकायः** इति–गोमयस्योपर्युपरि राशिकरणमित्यर्थः । उपसमाधानस्य राशीकरणमात्रार्थत्वमाश्रित्य शङ्कते–**कथं काष्ठनिचयः ?** इति–काष्ठानि राशीकृतान्येव तिष्ठन्तीति तत्र निकाय इति घञन्तप्रयोगेण भाव्यमिति प्रश्नः, उत्तरयति–**बहुत्वमात्रविवक्षये**ति, अयमाशयः–उपसमाधानं ह्युपर्युपरिधारणक्रमेण राशीकरणमित्युक्तम्, इह तु न तादृशोऽर्थो विवक्षितोऽपि त्वनायासनिष्पन्नं काष्ठबहुत्वं शब्दतोऽनूद्यत इति तत्रोपसमाधानाभावान्न घञिति । पदप्रयोजनं पृच्छति–**एष्विति किमि**ति, उत्तरयति–**चयः** इति–अत्र चयनमात्रार्थत्वेनास्याप्रवृत्त्याऽलेवेवर्णान्तलक्षण इत्यर्थः । चिधातावेकस्यैव चकारस्य सत्त्वेनादिग्रहणाभावेऽप्यादेरेव तस्य स्यान्नान्यस्येत्यादिग्रहणं व्यर्थमित्याशङ्क्य तस्य यङ्लुपि द्वित्वे चकारद्वयस्थाने ककारविधानाभावार्थत्वं व्याचष्टे–**'चः कः' इत्येव सिद्धे** इत्यादिना, अय-

माशयः– 'चः कः' इत्येतावत्युच्यमाने प्रकृतिग्रहणे न यङ्लुबन्तस्यापि ग्रहणस्य सिद्धान्तितत्वात् ततोऽपि प्रत्ययविधानावश्यंभावेन तत्र स्थितयोर्द्वयोरपि चकारयोः कत्वं दुर्निवारम्, तथा च निकेकाय इत्येव प्रयोगः स्यात्, स चानिष्ट इति तद्वारणायादिग्रहणमावश्यकमिति, तत्र च पुनः पुना राशीकरणं प्रयोगार्थः। भृशं पुनः पुनर्वा चिनोतीति यङि तल्लुपि प्रत्ययलोपलक्षणन्यायेनाद्यैकस्वरांशस्य द्वित्वे पूर्वस्य गुणे 'निचेचि' इति जातेऽनेन भावे घञि आद्यचस्य कत्वे वृद्धावायादेशे च **'निकेचायः'** इति भवतीति भावः ॥ ५. ३. ७९. ॥

## संघेऽनूर्ध्वे । ५. ३. ८०. ॥

**त० प्र०–न विद्यते कुतश्चिदूर्ध्वमुपरि किंचिद् यस्मिन् सोऽनूर्ध्वः, तस्मिन् संघे–प्राणिसमुदायेऽभिधेये चिनोतेर्भावाऽकर्त्रोर्घञ् तत्संनियोगे चादेः को भवति। वैयाकरणनिकायः, तार्किकनिकायः। संघ इति किम्? सारसमुच्चयः, प्रमाणसमुच्चयः। अनूर्ध्व इति किम्? सूकरनिचयः, सूकरा ह्युपर्युपरि चीयन्ते ॥८०॥**

**श० म० न्यासानुसन्धानम्– संघ०।** अनूर्ध्वशब्दस्य संघेन सह सामानाधिकरण्यं प्रकटयति–**न विद्यते कुतश्चिदूर्ध्वमुपरि किञ्चिद् यस्मिन् सोऽनूर्ध्वः** इति–समुदायान्तर्गतवस्तूनामूर्ध्वाधोभावो यत्र न भवेत् तादृशः संघो वाच्य इति तात्पर्यम्। संघशब्दस्य प्राणिसमुदायपरत्वं पूर्वोक्तमेव वृत्तौ समाश्रितं **'संघे प्राणिसमुदायेऽभिधेये'** इति कथनेन। **वैयाकरणनिकायः, तार्किकनिकायः** इति– वैयाकरणानां तार्किकाणां च समुदाय इत्यर्थः। पदकृत्यं पृच्छति– **संघ इति किमिति**–प्राणिसमुदायवाचकसंघशब्दमपहाय समुदायमात्रवाचकः कश्चित् शब्दो ग्राह्यः सूत्र इति प्रश्नः, अनूर्ध्वपदस्य बहुव्रीहित्वेन विगृहीतत्वादन्यः पदार्थः कश्चन शब्दो ग्राह्य एवेति संघशब्दस्थानीयशब्दान्तराभावेऽवाचकत्वमेव सूत्रस्य स्यात्। उत्तरयति– **सारसमुच्चयः, प्रमाणसमुच्चयः** इति– सारादिपदं न प्राणिपरमपि तु प्राण्यप्राणिसाधारणधर्मविशेषपरमेवेति तत्समुदाये वाच्येऽस्याप्रवृत्त्या इवर्णान्तलक्षणोऽलेव भवतीति भावः। पुनः पृच्छति– **अनूर्ध्व इति किमिति**, उत्तरयति– **सूकरनिचयः** इति– नात्रोर्ध्वाधोभावाभाव इत्यलेवेत्यर्थः, कथमिहोर्ध्वाधोभाव इति चेत्? अत्राह– **सूकरा ह्युपर्युपरि चीयन्ते** इति– सूकरा हि स्वत एवैकस्योपर्येक इति क्रमेणाल्पस्थान एव शतशस्तिष्ठन्तीति तेषां जातिस्वभावः, एवं चोपसमाधानार्थादिप्ययं भिन्न इति उपर्युपरिभावमात्रेणोपसमाधानार्थे पूर्वेणापि घञ् न। "पूर्वेणापि न भवति व्यावृत्तिबलात्" इति लघुन्यासकारः। उपसमाधानमुपर्युपरि राशीकरणमित्युक्ततया केनापि यदि ते राशीभवनाय प्रेरिताः स्युरथवा बलाद् राशीकृताः स्युस्तदैव प्रत्ययस्य प्राप्तिः स्यात्, न चात्र तथेति तस्याप्राप्तिरेवेति तदर्थं व्यावृत्तिबलाश्रयणमनावश्यकमिति प्रतिभाति ॥ ५. ३. ८०. ॥

## माने । ५. ३. ८१. ॥

**त० प्र०–माने गम्यमाने धातोर्भावाऽकर्त्रोर्घञ् भवति। मानमियत्ता, सा च द्वेधा-संख्या परिमाणं च। एको निघासः, द्वौ निघासौ; एकस्तण्डुलावक्षायः; एकस्तण्डुलनिश्चायः; एकः कारः, द्वौ कारौ, त्रयः काराः; द्वौ सूर्पनिष्पावौ; समित्संग्राहः, तण्डुलसंग्राहः, मुष्टिरित्यर्थः। मान इति किम्? निश्चयः। अल एवायमपवादः, तस्यादिभिस्तु बाध्यते- एका तिलोच्छितिः, द्वे प्रसृती ॥८१॥**

**श० म० न्यासानुसन्धानम्– माने।** मानशब्दस्य सम्मानाभिमानादावप्यर्थे प्रसिद्धया कोऽर्थोऽत्र ग्राह्य इत्याशङ्कायामाह–**मानमियत्तेति**– एतत्परिमाणमिदमित्यर्थप्रतिपादनमिति भावः। यद्यपि चेयत्ताप्रतिपादनरीतेर्भिन्नभिन्नरूपेण भिन्नभिन्नशब्दान्तरप्रतिपाद्यत्वेन बहुत्वमस्ति, तथाहि–

"ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः॥"

इत्यभियुक्तोक्ता मानविशेषाः, तथापीह द्वयोरेव मानयोर्ग्रहणमित्याह–**सा च द्वेधा संख्या परिमाणं चेति**– संख्या हि एकत्वादिका, उन्मान-प्रमाण-संख्याभिन्नमियत्तापरिच्छेदकसामान्यं परिमाणम्, द्विविधयोरेव ग्रहणे शिष्टकृतं व्याख्यानमेव शरणम्। एतच्च मानं कस्येत्यत्र नागेशेनोक्तम्– 'परिच्छित्तिश्च[अत्र] प्रत्ययार्थस्यैव' इति, तथा च परिच्छिद्यमानेऽर्थे घञ् भवतीति भावः। "घस्लृ अदने" **एको निघासः, द्वौ निघासौ** एकादिपदोपादानमियत्ताज्ञापनार्थम्। "क्षि क्षये" **एकस्तण्डुलावक्षायः** इति– अत्रावक्षयणस्य पुनः पुनर्निष्तुषीकरणक्रियाया घञा सिद्धत्वेन कथ्यमानाया एवैकत्वं गम्यते। निश्चीयते–

निःशेषेण राशीक्रियत इति– **एकस्तण्डुलनिश्चायः** इति– अत्र यद्यपि राशेरेकत्वं गम्यते तथापि राश्यन्तर्गतानामवयवानामपि राशिद्वारा परिच्छेदो भवत्येव, किन्तु आर्थिको न तु शब्दमर्यादया लभ्यः। "कॄत् विक्षेपे" **एकः कारः, द्वौ कारौ, त्रयः काराः**। "पूङ् पवने" "पूग्श् पवने" **द्वौ सूर्यनिष्पावौ**। "ग्रहीश् उपादाने" **समित्संग्राहः, तण्डुलसंग्राहः** इति, एतदर्थमाह– **मुष्टिरित्यर्थः** इति। पृच्छति– **मान इति किमिति**, उत्तरयति– **निश्चयः** इति– अत्र मानार्थाभावादस्याप्रवृत्त्यैवर्णान्तलक्षणोऽलेव भवति। भावाकर्त्रोर्विधीयमानानां सर्वेषां प्रत्ययानामपवादत्वे प्राप्ते आह– **अल एवापवाद** इति– अल्क्तिप्रत्यययोर्मध्ये पठितोऽयं * मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् * इति न्यायेन पूर्वपठितस्याल एवायमपवादो न त्वग्रे पठिष्यमाणस्य क्तेरिति भावः। तदाह– **एका तिलोच्छ्रितिः, द्वे प्रसृती** इति– "श्रिग् सेवायाम्" उत्पूर्वादतः स्त्रीत्वप्रतिपत्तये क्तिः, "तेर्ग्रहादिभ्यः" [ ४. ४. ३३. ] इति नियमान्नेट्, "सृंगतौ" प्रपूर्वादतः क्तिः, नात्राल् प्रत्ययो भवतीत्यर्थः ॥ ५. ३. ८१. ॥

## स्थादिभ्यः कः । ५. ३. ८२. ॥

**त० प्र०– स्थादिभ्यो धातुभ्यो भावाऽकर्त्रोः कः प्रत्ययो भवति। आखूनामुत्थानम्-आखूत्थो वर्तते, शलभोत्थो वर्तते, प्रतिष्ठन्त्यस्मिन्निति-प्रस्थः सानुः, संतिष्ठन्तेऽस्यामिति-संस्था, व्यवतिष्ठन्तेऽनयेति–व्यवस्था, प्रस्नान्त्यस्मिन्निति–प्रस्नः, प्रपिबन्त्यस्यामिति–प्रपा, विध्यतेऽनेनेति–विधः, आविध्यतेऽनेनेत्याविधः, विहन्यतेऽनेनास्मिन् वा-विघ्नः, आयुध्यन्तेऽनेनेत्यायुधम्। आध्यायन्ति तमित्याढ्यः, पृषोदरादित्वात् धस्य ढः। सर्वापवादत्वादनटमपि कप्रत्ययो बाधते। कथमाव्याधः, घातः, विघातः, उपघातः? बहुलाधिकारात्। बहुवचनं प्रयोगानुसरणार्थम् ॥८२॥**

**श० म० न्यासानुसन्धानम्– स्था०।** "ष्ठां गतिनिवृत्तौ" इति स्थाधातोरुत्पूर्वात् भावे विगृह्योदाहरति– **आखूनामुत्थानम्– आखूत्थो वर्तते** इति– "उदः स्थास्तम्भः सः" [ १. ३. ४४. ] इति सकारलोपः, "इडेत्पुसि चातो लुक्" [ ४. ३. ९४. ] इत्याकारलोपश्चात्र विज्ञेयः। एवं– शलभानामुत्थानमिति– **शलभोत्थो वर्तते** इति। अधिकरणे विगृह्योदाहरति– **प्रतिष्ठन्त्यस्मिन्निति– प्रस्थः सानुः** इति–प्रपूर्वस्तिष्ठतिर्गत्यर्थ इति क्षीरः, यदि प्रतिष्ठते मानार्थमिति क्रियते तदा "उपसर्गादातो डोऽश्यः" [ ५. १. ५६. ] इति डे प्रस्थो मानमिति भवतीति लघुन्यासकारः। **संतिष्ठन्तेऽस्यामिति– संस्था** इति, "उपसर्गादातः" [५. ३. ११०.] इत्यङं बाधित्वा स्त्रियाः खलनाविरयनट् स्यादित्यत्र पाठः' इति लघुन्यासकारः। करणे विगृह्योदाहरति– **व्यवतिष्ठन्तेऽनयेति– व्यवस्था**। "ष्णांक् शौचे" इति स्नाधातोः प्रपूर्वादधिकरणे विगृह्योदाहरति– **प्रस्नान्त्यस्मिन्निति– प्रस्नः** इति। एवं "पां पाने" इत्यस्य **प्रपिबन्त्यस्यामिति– प्रपा**। "व्यधंच् ताडने" अतः करणे विगृह्योदाहरति– **विध्यतेऽनेनेति– विधः**, शस्त्रोपकरणम्, अत्र "ज्याव्यधः क्ङिति" [ ४. १. ८१. ] इत्यनेन य्वृत्। "हनंक् हिंसागत्योः" विपूर्वादतः करणेऽधिकरणे च विगृह्योदाहरति– **विहन्यतेऽनेनास्मिन् वा– विघ्नः** इति– "गमहन०" [ ४. २. ४४. ] इत्युपान्त्यलोपे "हनो ह्नो घ्नः" [ २. १. ११२. ] इति घ्नादेशः। स्थादिगणपाठबलात् करणेऽपि कः प्रत्ययो न तु "व्ययोद्रोः करणे" [ ५. ३. ३८. ] इत्यनेनालिति लघुन्यासः। "युधिच् सम्प्रहारे" आङ्पूर्वादतः करणे विगृह्योदाहरति– **आयुध्यन्तेऽनेनेति-आयुधमिति**। "ध्यैं चिन्तायाम्" आङ्पूर्वादतः कर्मणि विगृह्योदाहरति- **आध्यायन्ति तमिति आढ्यः** इति, धस्य कथं ढत्वमित्याह– **पृषोदरादित्वात् धस्य ढः** इति। ननु 'स्त्रियाः खलनौ०" इत्यनट् अस्य बाधको भवेदिति चेत्? अत्राह– **सर्वापवादत्वादनटमपि कप्रत्ययो बाधते** इति। ननु कप्रत्ययस्यास्य यदि सर्वापवादत्वं तर्हि घात इत्यादयो घञन्ताः प्रयोगाः कथमिति शङ्कते– **कथमाव्याधः, घातः, विघातः, उपघातः?** इति, समाधत्ते– **बहुलाधिकारादिति**। एकवचनेनापि निर्वाहे बहुवचनं किमर्थमित्याह– **बहुवचनं प्रयोगानुसरणार्थमिति**-दर्शितेभ्योऽन्ये कप्रत्ययान्ताः शिष्टप्रयोगा यद्युपलभ्येरन् तदा तत्पाठोऽप्यत्र विज्ञेय इत्यर्थः ॥ ५. ३. ८२. ॥

## ट्वितोऽथुः । ५. ३. ८३. ॥

**त० प्र०– ट्वितो धातोर्भावाऽकर्त्रोरथुः प्रत्ययो**

**भवति। वेपथुः, वमथुः, श्वयथुः, स्फूर्जथुः, भ्रासथुः, नन्दथुः, क्षवथुः, दवथुः। असरूपत्वाद् घञलावपि–वेपः, क्षवः ॥८३॥**

**श० म० न्यासानुसन्धानम्–ट्वितो०।** टु इत् यस्य तस्मादित्यर्थः, ट्वितो धातवश्चेमे– "टुवेपृङ् चलने" "टुवमूं उद्गिरणे" "ट्वोश्वि गति-वृद्धयोः" "टुओस्फूर्जा वज्रनिर्घोषे" "टुभ्रासि दीप्तौ" "टुनदु समृद्धौ" "टुक्षुक् शब्दे" "टुदुंदू उपतापे" इत्यादयः। अतोऽनेनाथौ– **वेपथुः, वमथुः, श्वयथुः, स्फूर्जथुः, भ्रासथुः नन्दथुः, क्षवथुः, दवथुरिति,** 'श्वयथुः, क्षवथुः, दवथुः' इत्यत्र "नामिनो गुणो०" [ ४. ३. १. ] इति नाम्यन्तलक्षणे गुणे प्रथमेऽयादेशः, इतरयोरवादेशो विज्ञेयः। "असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [ ५. १. १६. ] इति घञ् अल् चापि भवतीत्याह–**असरूपत्वाद् घञलावपि** इति, तत्र सामान्यसूत्रेण घञि उपान्त्यगुणे च– **वेपः** इति, उपर्णान्तिलक्षणेऽलि च–**क्षवः** इति ॥ ५. ३. ८३. ॥

## ड्वितस्त्रिमक् तत्कृतम् । ५. ३. ८४. ॥

**त० प्र०– ड्वितो धातोर्भावाऽकर्त्रोस्त्रिमक् प्रत्ययो भवति, तेन-धात्वर्थेन, कृतं-निर्वृत्तमित्येतस्मिन्नर्थे। पाकेन निर्वृत्तं-पक्त्रिमम्, उप्त्रिमम्,कृत्रिमम्, लब्धिमम्,विहित्रिमम्, याचित्रिमम्, द्विवदसाविति कश्चित्-याचथुः। ककारः कित्कार्यार्थः ॥८४॥**

**श० म० न्यासानुसन्धानम्– ड्वित०।** डु इत् यस्य तादृशादिरयर्थः। तत्कृतमित्यस्यार्थस्य यद्यपि तद्धितस्वभावत्वम्, तथाहि– तत्र व्याख्यास्यते तेन कृतमिति, तथा च यस्य तृतीयान्तत्वयोग्यता तत एव प्रत्ययेन भाव्यमिति नाम्न एवायं प्रत्यय उचितः। कृतश्चात्र व्याकरणान्तरे [ पाणिनीयादौ ] "ड्वितः क्त्रिः" [ ३. ३. ८८.] इति सूत्रेण भावार्थे क्त्रिः, तस्माच्च तेन निर्वृत्तमित्यस्मिन्नर्थे मप्प्रत्ययविधिस्तद्धिते, स च नित्यमेव भवतीति मप्प्रत्ययान्तस्यैव प्रयोगो न केवलं क्त्रिप्रत्ययान्तस्य। किञ्च तत्कृतमित्यत्र करोतेः कर्मणि प्रत्ययस्तस्यैवार्थानुकूलत्वम्। तथा च भावाकर्त्रोरित्यनेन सह कथं तस्यान्वयः। भाववाचकत्वं तु तस्य व्याहतमेव, कर्तृभिन्नकर्मकारकवाचकत्वं तु तत्कृतमित्यनेनोक्तमिति तस्यासम्बन्ध एव कर्तव्यः स्यात्, कृते चासम्बन्धे उत्तरत्र तस्य सम्बन्धाय मण्डूकप्लुत्याऽनुवृत्तिकल्पना प्रसज्येतेति द्वितीया प्रतिकूलतेति दोषद्वयवारणाय **तेने**त्यस्य **धात्वर्थेन** इत्यर्थः कृतः। तथा च नात्र तृतीयान्तात् प्रत्ययोऽपि तु प्रयोगार्थप्रत्यायनाय विग्रहमात्रप्रदर्शनमेतदिति कृत्प्रत्यय एवायम्। कृतमित्यस्यार्थमाह– **निर्वृत्तमिति**– करोतेरुत्पत्त्यनुकूलव्यापारोऽर्थः, क्तप्रत्ययार्थो विषयतारूपं कर्मत्वम्, तथा च करोतेर्व्यापारांशत्यागात् फलमात्रस्य च परिग्रहादिहोत्पत्तिविषयभूतार्थमात्रविवक्षेति निर्वृत्तमिति व्याख्यानस्वरसः, अन्यथा कृतमित्यस्य निर्वर्तितमित्यर्थः कर्तव्यः स्यात्। धात्वर्थस्य च तृतीयान्ततया निर्देशाय घञन्तेन विग्रहः, नहि धातोस्तृतीया विभक्तिरुत्पादयितुं शक्यते। तदाह–**पाकेन निर्वृत्तमिति**। "डुपचींष् पाके" ड्वित्वादनेन त्रिमकि "चजः कगम्" [ २. १. ८६. ] इति चस्य कत्वे– **पक्त्रिममिति**। एवं "डुवपीं बीजसन्ताने" वापेन निर्वृत्तमिति त्रिमकि "यजादिवचेः किति" [ ४. १. ७९. ] इति य्वृति– **उप्त्रिममिति**। "डुकृंग् करणे" करणेन निर्वृत्तमिति– **कृत्रिममिति**। "डुलभिंष् प्राप्तौ" लाभेन निर्वृत्तमिति त्रिमकि "अधश्चतुर्थात् तथोर्धः" [२. १. ७९.] इति तकारस्य धे "तृतीयस्तृतीयचतुर्थे" [ १. ३. ४८. ] इति भस्य बे **लब्धिममिति**। "डुधांग्क् धारणे च" चकराद् दाने, विधिना निर्वृत्तमिति त्रिमकि "धागः" [ ४. ४. १५. ] इति 'हि' इत्यादेशे–**विहित्रिममिति**। "डुयाचृग् याच्ञायाम्" याचनेन निर्वृत्तमिति त्रिमकि "स्ताद्यशितो०" [४. ४. ३२. ] इतीटि च– **याचित्रिममिति**। याचेः पाणिनीयादौ ड्वित्त्वेनाह– **द्विवदसाविति कश्चिदिति**, तथा च ततो नायं प्रत्ययोऽपि तु पूर्वविहितोऽथुरेवेत्याह–**याचथुरिति**। ककारस्य प्रयोगेऽश्रूयमाणतया तद्वैयर्थ्यमाशङ्क्य समाधत्ते–**ककारः कित्कार्यार्थः** इति–कित्कार्यं च प्रकृते य्वृत् गुणाभावो ह्यादेशश्च ॥ ५. ३. ८४. ॥

## यजि-स्वपि-रक्षि-यति-प्रच्छो नः । ५. ३. ८५. ॥

**त०प्र०– एभ्यो भावाऽकर्त्रोर्नः प्रत्ययो भवति। यज्ञः, स्वप्नः, रक्षणः, यत्नः, प्रश्नः ॥८५॥**

**श० म० न्यासानुसन्धानम्– यजि०।** "यजीं देवपूजासंगतिकरणदानेषु" अतो ने "तवर्गस्य०" [ १. ३. ६०.] इति नस्य ञे जञयोर्ज्ञ इति ज्ञे-**यज्ञः** इति। "ञिष्वपंक्

शये" **स्वप्नः** । "रक्ष पालने" अतो ने "रषृवर्णा०" [ २. ३. ६३. ] इति नस्य णे– **रक्षणः** । "यतैङ् प्रयत्ने" **यत्नः** । "प्रच्छंत् ज्ञीप्सायाम्" ज्ञीप्सा जिज्ञासा, अतो ने "अनुनासिके च०" [ ४. १. १०८. ] इति छस्य शे "न शात्" [ १. ३. ६२. ] इति जनिषधे– **प्रश्नः** ॥ ३. ४. ८५. ॥

## विच्छो नङ् । ५. ३. ८६. ॥

**त० प्र०–विच्छेर्भावाकर्त्रोर्नङ् प्रत्ययो भवति । विश्नः । ङकारो गुणप्रतिषेधार्थः ॥८६॥**

**श० म० न्यासानुसन्धानम् विच्छो०** । "विछत् गतौ" अतो नङि "अनुनासिके०" [४. १. १०८.] इति छस्य शे– **विश्नः**, प्राग्वत् जप्रतिषेधः । ङकारानुबन्धफलमाह– **ङकारो गुणप्रतिषेधार्थः** इति– "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इत्यनेन प्राप्तस्येत्यर्थः ॥ ५. ३. ८६. ॥

## उपसर्गाद् दः किः । ५. ३. ८७. ॥

**त० प्र०–उपसर्गपूर्वाद् दासंज्ञकाद् धातोर्भावाऽकर्त्रोः किः प्रत्ययो भवति । आदिः, प्रदिः प्रधिः, आधिः, निधिः, उपविधिः, संधिः, समाधिः । किस्करणमाकारलोपार्थम् ॥८७॥**

**श० म० न्यासानुसन्धानम्–उपसर्गा०** । "धातोः पूजार्थ०" [ ३. १. १. ] इति प्रादेरुपसर्गसंज्ञा प्राग् विहिता । "अवौ दाधौ दा" [ ३. ३. ५. ] इत्यनेन "दांम् दाने" "देंङ् पालने" "डुदांग्क् दाने" "दोंच् छेदने" "टधें पाने" "डुधांग्क् धारणे च" इति षण्णां दासंज्ञा विहिता । दारूपाद् दासंज्ञकात् सोपसर्गादनेन के "इडेत्पुसि चातो लुक्" [ ४. ३. ९४. ] इत्याकारलोपे च– **आदिः, प्रदिः** । धारूपाच्च दासंज्ञकात् के आकारलोपे च– **प्रधिः, आधिः, निधिः, उपविधिः, सन्धिः, समाधिरिति** । यस्य धातुपाठे आत्वं नास्ति तस्य "आत् सन्ध्यक्षरस्य" [ ४. २. १. ] इत्यनेनात्वे दारूपत्वं धारूपत्वं च बोध्यम् । प्रत्ययककारस्य प्रयोगेऽश्रूयमाणतया तत्प्रयोजनमाह–**किस्करणमाकारलोपार्थमिति**– एतच्च दर्शितमेव ॥ ५. ३. ८७. ॥

## व्याप्यादाधारे । ५. ३. ८८. ॥

**त० प्र०–व्याप्याद् कर्मणः पराद् दासंज्ञकादाधारे–अधिकारणे कारके किर्भवति । जलं धीयतेऽस्मिन्निति–जलधिः, शरधिः, इषुधिः, वालधिः, शेवधिः । आधारग्रहणमर्थान्तरनिषेधार्थम् ॥८८॥**

**श० म० न्यासानुसन्धानम्–व्याप्या०** । व्याप्यमिति कर्मणः संज्ञेत्याह– **व्याप्यात्–कर्मणः** इति, परत्वार्थे पञ्चमीत्याह–**परादिति** । आधार इत्यधिकरणस्य संज्ञेत्याह–**आधारे–अधिकरणे** इति । अधिकरणे विगृह्योदाहरति–**जलं धीयतेऽस्मिन्निति–जलधिः** । एवं– शरा इषवो वालाश्च धीयन्तेऽस्मिन्निति– **शरधिः, इषुधिः, वालधिः** । शेवं स्थाप्यं धनं धीयतेऽस्मिन्निति– **शेवधिः** । भावाकर्त्रोरित्यस्यानुवृत्तेरकर्तरि कारके विधानादाधारे भविष्यत्येवेत्याधारग्रहणानर्थक्यमित्याशङ्कायामाह– **आधारग्रहणमर्थान्तरनिषेधार्थमिति**, अयमाशयः– जलधिरित्यादौ लक्ष्यानुसारमस्त्वाधार एव विधिस्तथापि कर्तृभिन्नेऽन्यत्रापि कारकेऽयं प्रत्ययः क्वचित् स्यादिति तन्निवृत्त्य इदमिति ॥ ५. ३. ८८. ॥

## अन्तर्धिः । ५. ३. ८९. ॥

**त० प्र०– अन्तःपूर्वाद् दधातेर्भावाऽकर्त्रोः किः प्रत्ययो निपात्यते । अन्तर्धिः ॥८९॥**

**श० म० न्यासानुसन्धानम्– अन्त०** । पूर्वेणोपसर्गपूर्वत्वाभावादप्राप्तौ वचनमिदम् । अन्तर्धानम्– **अन्तर्धिः** ॥ ५. ३. ८९. ॥

## अभिव्याप्तौ भावेऽन-ञिन् । ५. ३. ९०. ॥

**त० प्र०– क्रियया स्वसंबन्धिनः साकल्येनाभिसंबन्धोऽभिव्याप्तिः, तस्यां गम्यमानायां भावे धातोः 'अन ञिन्' इत्येतौ प्रत्ययौ भवतः । समन्ताद् रावः–संरवणं सांराविणं सेनायां वर्तते । संकुटनं सांकौटिनमेषाम् । अभिव्याप्ताविति किम् ? संरावः, संकोटः । भावग्रहणं कर्मादिप्रतिषेधार्थम् । असरूपविधिना क्त-घञादिनिवृत्त्यर्थमनग्रहणम् ॥९०॥**

**श० म० न्यासानुसन्धानम् अभिः०** । अभितः सर्वतो व्यापनमभिव्याप्तिरिति योगमर्यादालभ्यस्यार्थस्य केन कस्य व्यापनमिति सन्दिह्यमानतया तस्य स्पष्टप्रतिपादनायाह– **क्रियया स्वसम्बन्धिनः साकल्येनाभिसम्ब-**

न्धोऽभिव्याप्तिरिति– 'क्रियया' इत्यत्र "द्विहेतो०" [ २. २. ८७. ] इति कर्तरि वा षष्ठीविधानादिह तृतीया। साकल्येनेत्यभिशब्दार्थः, नहि क्रिया नाम मूर्तिमद् द्रव्यं या स्वसम्बन्धिनं सर्वतो व्याप्य वर्तेतेति क्रियासम्बन्धिषु सर्वेषु क्रियायाः साकल्येन सम्बन्धोऽभिधेयश्चेदित्यर्थ आश्रयणीय इति भावः। "रुक् शब्दे" **समन्ताद् रावः** इति विग्रहवाक्यम्, अनेनाने गुणे च– **संरवणमि**त्युदारणम्, एवमनेन ञिनि तु "नित्यं ञ-ञिनोऽण्" [ ७. ३. ५८. ] इति स्वार्थे नित्यमणि आद्यस्वरस्य वृद्धौ "अनपत्ये" [ ७. ४. ५५. ] इत्यन्त्यस्वरादिलोपनिषेधे– **सांराविणं सेनायां वर्तते** इति। एवं "कुटत् कौटिल्ये" अतो भावेऽनेनाने "कुटादेङिद्वदञ्णित्" [ ४. ३. १७. ] इति तस्य ङित्वेन गुणाभावे– **संकुटनमि**ति, ञिनो ञित्वेन कित्वाभावेन गुणे 'संकोटिन्' इत्यतः स्वार्थेऽणि वृद्धौ च– **सांकोटिनमेषामिति**। पदप्रयोजनं पृच्छति– **अभिव्याप्ताविति किमिति**, उत्तरयति– **संरावः, संकोटः** इति– अत्राभिव्याप्तिविवक्षाविरहादस्याप्रवृत्त्या रुधातोः "रोरुपसर्गात्" [५. ३. २२.] इत्यनेनालोऽपवादे घञि– संरावः, कुटतेस्तु सामान्यसूत्रेण घञि– संकोटः इति। भावार्थस्यानुवर्तमानत्वात् तदानर्थक्यमाशङ्कयाह– **भावग्रहणं कर्मादिप्रतिषेधार्थमि**ति, अयमाशयः– भावाकर्त्रोरिति सन्नियोगशिष्टं समस्तं पदमनुवृत्तम्, तस्यानुवृत्तिविवक्षायामकर्तरि कारके कर्मादावपि प्रत्ययः स्यात्, एकदेशभूतस्य भावपदमात्रस्यानुवृत्तिविवक्षायां व्याख्यानादिक्लेशाद् 'व्याख्यानाद् वरं करणम्' इति मतमाश्रित्य भावग्रहणं कृतम्, कृते च तस्मिन् भावाकर्त्रोरिति निवृत्तमिति कर्मादौ प्रत्ययोऽयं न भवतीति। नन्वसरूपत्वाद् भावे विधीयमानोऽनो भविष्यत्येवेति तद्ग्रहणं व्यर्थमिति चेत्? अत्राह– **असरूपविधिना क्तघञादिनिवृत्त्यर्थं वचनमि**ति– यथाऽसरूपविधिनाऽनो भविष्यति तथा क्तौ घञ् च भावे विहितावसरूपौ च ताविति स्याताम्, तयोरन्यस्य वाऽसरूपप्रत्ययस्य निवृत्तिरनेन विहितेन ज्ञाप्यत इति भावः ॥ ५. ३. ९०. ॥

## स्त्रियां क्तिः । ५. ३. ९१. ॥

**त० प्र०– स्त्रियामिति प्रत्ययार्थविशेषणम्। धातोर्भावाऽकर्त्रोः स्त्रीलिङ्गे क्तिः प्रत्ययो भवति। घञादेरपवादः। कृतिः, हृतिः, चितिः, नीतिः, नुतिः, भूतिः। स्त्रियामिति किम्? कारः, चयः ॥९१॥**

**श० म० न्यासानुसन्धानम्– स्त्रियां०। स्त्रियामिति** कस्य विशेषणमित्याशङ्कायामाह– **स्त्रियामिति प्रत्ययार्थविशेषणमि**ति, अयमाशयः– विशेषणं हि सन्निहितस्य भवति, सन्निहितं चात्र द्वयं– धातुः प्रत्ययश्च, तत्र धातोरिह विशेष्यत्वं न सम्भवति, असत्त्वरूपत्वेन तस्य क्रियामवर्तनात्, तथा च पारिशेष्यात् प्रत्यय एवावशिष्यते, शब्दे चार्थस्य विशेषणत्वमयुक्तमिति तदर्थे विशेषणम्, एवं च स्त्रीत्वविशिष्टे भावेऽकर्तरि च कारके वाच्ये क्तिः प्रत्यय इति फलितम्। अयं च स्त्रियां विशिष्य विहित इति साधारण्येन विहितानां प्रत्ययानामपवाद एवेत्याह– **घञादेरपवादः** इति। "डुकृंग् करणे" "हृंग् हरणे" आभ्यां घञोऽपवादे क्तौ– **कृतिः, हृतिरि**ति। "चिंगट् चयने" "णींग् प्रापणे" "णुक् स्तुतौ" "भू सत्तायाम्" एभ्य इवर्णान्तोवर्णान्तलक्षणस्यालोऽपवादे क्तौ– **चितिः, नीतिः, नुतिः, भूतिरि**ति– कित्त्वात् सर्वत्र गुणाभावो बोध्यः। पदकृत्यं पृच्छति– **स्त्रियामिति किमि**ति, उत्तरयति– **कारः, चयः** इति– अत्र स्त्रीत्वाविवक्षणादस्याप्रवृत्त्या प्रथमे घञ् द्वितीयेऽलित्यर्थः ॥ ५. ३. ९१. ॥

## श्र्वादिभ्यः । ५. ३. ९२. ॥

**त० प्र०– शृणोत्यादिभ्यो धातुभ्यो स्त्रीलिङ्गे भावाऽकर्त्रोः क्तिर्भवति। वक्ष्यमाणैः क्विबादिभिः सह समावेशार्थं वचनम्। श्रु– श्रुतिः, प्रतिश्रुत्। स्तु– स्तुतिः, प्रतिस्तुत्। पद्-संपत्तिः, सपद्। सद्– आसत्तिः, संसद्; उपनिषद्, निषद्या। विद्– संवित्तिः, संवित्; विद्या, वेदना। लभ्– लब्धिः, लभा। अर्द्–शिरोऽर्तिः, अर्दिका। शस्– प्रशस्तिः, प्रशंसा। पच्-पक्तिः, पचा। कण्डूय– कण्डूतिः, कण्डूः, कण्डूया। व्यवकुश्– व्यवकुष्टिः, व्यावक्रोशी। इष्– इष्टिः, इच्छा। यज्– इष्टिः, इज्या। मन्– मतिः, मन्या। आस्– आस्या, उपास्तिः, उपासना। शास्– अनुशिष्टिः, आशीः। भृग्–भृतिः, भृत्या। स्तूयते इज्यते इष्यतेऽनयेति-स्तुतिः, इष्टिः, इष्टिरिति, संज्ञाशब्दत्वात् करणेऽपि क्तिरेव नानट्। एवं– स्तुतिः। अन्यत्र तु स्पर्धे परत्वात् * स्त्रीखलना अलो बाधकाः, स्त्रियाः खलनौ * इति न्यायः ॥९२॥**

**श० म० न्यासानुसन्धानम्– श्रुवा०** । पूर्वसूत्रेण सामान्यतो धातुमात्रात् क्तिर्विहित एवेत्यस्य वैयर्थ्यमाशङ्क्याह– **वक्ष्यमाणैः क्विबादिभिः सह समावेशार्थं वचनमिति**– अन्यथा तेभ्यो विशिष्य विहितः क्विबादिः सामान्यविहितं क्तिं बाधेतेति भावः । कृते च विशिष्य तेभ्यः क्तिविधाने भवति तेभ्योऽपि क्तिरिति 'सम्पद् सम्पत्तिः' इति रूपद्वयं फलितमिति । "श्रुंट् श्रवणे" अनेन स्त्रियां क्तौ कित्त्वाद् गुणाभावे– **श्रुतिरिति**, एवं सम्पदादिगणपाठात् "क्रुत्-सम्पदादिभ्यः क्विप्" [ ५. ३. ११४.] इति क्विपि "ह्रस्वस्य तः पित्कृति" [४.४.११३.] इति तागमे- **प्रतिश्रुत्** इति । एवं- "स्रुं गतौ" अतोऽनेन क्तौ- **स्रुतिः**, सम्पदादित्वात् क्विपि च- **प्रतिस्रुत्** । "पदिच् गतौ" क्तौ– **सम्पत्तिः**, क्विपि च- **सम्पद्** । 'षद्लृं विशरणगत्यवसादनेषु" अतः क्तौ- **आसत्तिः**, क्विपि च- **संसद्, उपनिषद्**, "सदोऽप्रतेः०" [ २. ३. ४४. ] इति सस्य षत्वम्, "समज-निपन्निषद०" [ ५. ३. ९९. ] इति क्यपि– **निषद्या** । "विदक् ज्ञाने" अतोऽनेन क्तौ- **संवित्तिः**, सम्पदादित्वात् क्विपि- **संवित्**, प्राग्वत् क्यपि- **विद्या**, "णि-वेत्ति०" [ ५. ३. १११. ] इत्यने गुणे आपि- च **वेदना** । "डुलभिष् प्राप्तौ" अतोऽनेन क्तौ "अधश्चतुर्थात्०" [२.१.७९.] इति तकारस्य धे "तृतीयस्तृतीयचतुर्थे" [ १.३.४९. ] इति भस्य बे- **लब्धिः**, "षितोऽङ्" [ ५. ३. १७७. ] इत्यङि आपि च- **लभा** । "अर्द गतियाचनयोः" अतोऽनेन क्तौ "धुटो धुटि स्वे वा" [१. ३. ४८. ] इति दस्य वा लोपे- **शिरोऽर्तिरिति**– शिरोवेदनेत्यर्थः, "भावे" [५. ३. १२२.] इति णके च– **अर्दका** । "शंसू स्तुतौ च" चकाराद्धिंसायाम्, अतः क्तौ "नो व्यञ्जनस्यानुदितः" [ ४. २. ४५. ] इत्युपान्त्यलोपे– **प्रशस्तिः**, "शंसि-प्रत्ययात्" [ ५. ३. १०५. ] इत्यप्रत्यये आपि च– **प्रशंसा** । "डुपचींष् पाके" अतोऽनेन क्तौ "चजः कगम्" [ २. १. ८६. ] इति चस्य के– **पक्तिः**, षित्त्वाच्च "षितोऽङ्" [ ५. ३. १७७. ] इत्यङि आपि च– **पचा** । "कण्डूग् गात्रविकर्षणे" अतः "धातोः कण्ड्वादेर्यक्" [ ३. ४. ८. ] इति यकि 'कण्डूय' इत्यतोऽनेन क्तौ "अतः" [ ४. ३. ८२. ] इत्यकारलोपे "य्वोः प्वय्व्यञ्जने लुक्" [ ४. ४. १२१.] इति यलोपे च– **कण्डूतिः** । "क्व्यादिभ्यो वा" [ ५. ३. ११५. ] इति क्विपि प्राग्वत् अकारयकारलोपे– **कण्डूरिति** । "शंसि-प्रत्ययात् [ ५. ३. १०५.] इत्यप्रत्यये पूर्वाकारलोपे आपि च– **कण्डूया** । "क्रुशं आह्वानरोदनयोः" अनेन क्तौ परस्परमाक्रोशनं **व्यवक्रुष्टिरिति**– "यजसृज०" [ २. १. ८७. ] इति शस्य षे, तस्य टे तथा रूपम्, "व्यतिहारे०" [५. ३. १०६.] इति ञे "नित्यं ञ०" [ ७. ३. ५८. ] इत्यणि "अणञे०" [ २. ४. २०. ] इति ङ्यां च– **व्यावक्रोशीति** भवति । "इषत् इच्छायाम्" अनेन क्तौ तकारस्य टे– **इष्टिः** । "मृगयेच्छा०" [ ५. ३. १०१. ] इति च **'इच्छा'** इति निपात्यते, निपातने शः क्याभावश्च, शे परे च "गमिषद्०" [ ४.२.१०६. ] इत्यन्त्यस्य छः । "यजीं देवपूजासङ्गतिकरणदानेषु" अतोऽनेन क्तौ "यजसृज०" [ २. १. ८७. ] इति जस्य षे तद्योगे च तकारस्य टे– **इष्टिः**, "आस्यटि-व्रज्-यजः क्यप्" [ ५. ३. ९७. ] इति क्यपि य्वृत्ति च– **'इज्या'** इति च । "मनिच् ज्ञाने" अतोऽनेन क्तौ "यमि-रमि०" [४. २. ५.] इति नल्लुकि- **मतिः** । "समज०" [ ५. ३. ९९. ] इति क्यपि च– **मन्या** । "आसिक् उपवेशने" अतोऽनेन क्तौ– **उपास्तिः**, "आस्यटि०" [ ५. ३. ९७. ] इति क्यपि आपि च– **आस्या**, "णि-वेत्ति०" [५. ३. १११.] इत्यने आपि च– **उपासना** । "शासूक् अनुशिष्टौ" अनुशिष्टिर्नियोगः, अतोऽनेन क्तौ "इसासः०" [ ४. ४. ११८. ] इत्यास इसादेशे "नाम्यन्तस्था०" [ २. ३. १५. ] इति सस्य षत्वे तद्योगे तकारस्य टत्वे च– **अनुशिष्टिः**, सम्पदादित्वात् क्विपि च "क्वौ" [ ४. ४. ११९. ] इति इसादेशे "सो रुः" [ २. १. ७२. ] इति सस्य रुत्वे "पदान्ते" [ २. १. ६४. ] इति दीर्घे विसर्गे च– **आशीः** इति । "भृंग् भरणे" "डुभृंग् पोषणे च, चकाराद् धारणे, अतोऽनेन क्तौ– **भृतिः**, "भृगो नाम्नि" [५. ३. ९८.] इति क्यपि तागमे आपि च– **भृत्या** । "ष्टुंग्क् स्तुतौ" **स्तूयते इज्यते इष्यतेऽनयेति– स्तुतिः, इष्टिः, इष्टिरिति**– अत्रानेन क्तिः, ननु भावेऽकर्तरि च कारके सामान्यतो विहितैः क्विबादिभिः सह समावेशोऽस्तु, यश्च प्रत्ययो विशिष्य करणे विहितः स एनं बाधिष्यते, तथा च करणेऽनडेव स्यान्नायमिति स्तूयतेऽनयेत्यर्थे स्तुतिरित्यादयः प्रयोगा न स्युरिति चेत् ? अत्राह– **संज्ञाशब्दत्वात्**

**करणेऽपि क्तिरेव नानडिति–** प्रयुक्तानामिदमन्वाख्यानमिति सर्वसम्मतमिति ये करणेऽपि क्तिप्रत्ययान्ता एव शिष्टैः प्रयुक्तास्तेभ्योऽयमेव स्यात्, बाहुलकान्नानडिति भावः । अतिदिशति– **एवं– स्तुतिरिति** । संज्ञाभिन्ने का व्यवस्थेत्याह– **अन्यत्र तु *स्पर्धे परत्वात् स्त्रीखलना अलो बाधकाः, स्त्रियाः खलनौ* इति न्यायः** इति– तथा चालः परत्वात् स्त्रीखलना भवन्ति, तेषु च स्त्रियाः परत्वात् खलनौ भवत इति व्यवस्थेति । खलनयोस्तु स्पर्धो नास्त्येवार्थभेदात्, करणाधारयोरनड् विहितः कर्मणि च खल्, भावे यद्यप्युभयोः प्राप्तिरस्ति तथापि खलः कृच्छ्राकृच्छ्रार्थेभ्यो दुःस्वीषद्भ्यः परत्वे विधानमनडस्तु सामान्यत इति खलो विषयस्य भिन्नत्वात्, तथा चेयं व्यवस्था निर्दोषेति ।। ५. ३. ९२. ।।

## समिणासुगः । ५. ३. ९३. ।।

**त० प्र०– संपूर्वादिण आङ्पूर्वात् सुनोतेश्च भावाऽकर्त्रोः स्त्रियां क्तिर्भवति । क्यपोऽपवादः । समितिः, आसुतिः । समाङोऽन्यत्र– इत्या, सुत्येति क्यबेव भवति ।।९३।।**

**श० म० न्यासानुसन्धानम्– समि०** । "स्त्रियां क्तिः" [ ५. ३. ९१. ] इत्यनेनैव सिद्धत्वात् सूत्रस्य वैयर्थ्यमाशङ्क्याह– **क्यपोऽपवादः** इति– "समज०" [ ५. ३. ९९. ] इत्यादिना सुग इणश्च क्यप् विधास्यते स क्तिं बाधेतेति तद्बाधनायेदमावश्यकमिति । "इंण्क् गतौ" सम्पूर्वादितोऽनेन क्तौ– **समितिः** । "षुंग्ट् अभिषवे" आङ्पूर्वादितोऽनेन क्तौ– **आसुतिः** । एतच्च समाङ्पूर्वादेव प्रवर्ततेऽतोऽन्यत्र क्यबेवेत्याह– **समाङोऽन्यत्र– इत्या, सुत्येतीति**– अत्र "समज०" [ ५. ३. ९९. ] इत्यनेन क्यपि तागमे आपि चोक्तरूपे ।। ५. ३. ९३. ।।

## साति-हेति-यूति-जूति-ज्ञप्ति-कीर्ति । ५. ३. ९४. ।।

**त० प्र०– एते शब्दा भावाऽकर्त्रोः क्तिप्रत्ययान्ता निपात्यन्ते । सिनोतेः सुनोतेः स्यतेर्वा आत्वमित्वाभावश्च निपात्यते–सातिः । हिनोतेर्गुणे हन्तेर्वाऽन्त्यस्वरादेरेत्वे–हेतिः । यौतेर्जवतेश्च दीर्घत्वे– यूतिः, जूतिः । ज्ञपयतेर्ज्ञप्तिः, कीर्तयतेः– कीर्तिः, आभ्यां ण्यन्तलक्षणोऽनो न भवति । कीर्तनेत्यपि कश्चित् ।।९४।।**

**श० म० न्यासानुसन्धानम्– साति०** । निपातनसूत्रमिदम्, तत्र किं निपात्यत इत्याह– **सिनोतेः सुनोतेः स्यतेर्वा आत्वमित्वाभावश्च निपात्यते– सातिरिति**– "षिग्ट् बन्धने" इत्यस्य इकारस्य, "षुंग्ट् अभिषवे" इत्यस्य उकारस्य च आत्वं निपात्यते, "षोंच् अन्तकर्मणि" अस्य ओकारस्य "आत् सन्ध्यक्षरस्य" [४. २. १.] इत्यात्वे जाते तस्य "दोसोमास्थ इः" [ ४. ४. ११. ] इति इत्वे प्राप्ते तदभावश्च निपात्यते, तथा च त्रयाणामपि सातिरिति भवतीति भावः । **हिनोतेर्गुणे हन्तेर्वाऽन्त्यस्वरादेरेत्वे–हेतिरिति**– "हिंट् गतिवृद्ध्योः" अस्य इकारस्य एकारः, "हनंक् हिंसागत्योः" इत्यस्यान एकारो वा निपात्यते, तथा च द्वयोरपि हेतिरिति भवतीति भावः । **यौतेर्जवतेश्च दीर्घत्वे– यूतिः, जूतिरिति**– "युक् मिश्रणे" "जुं गतौ" अनयोर्दीर्घत्वं निपात्यत इत्यर्थः । **ज्ञपयतेर्ज्ञप्तिरिति**– "ज्ञाण् मारणादिनियोजनेषु" मारणादयो "मारणतोषणनिशाने ज्ञश्च" [ ४. २. ३०. ] इति सूत्रोक्ताः, तेषु नियोजने चार्थे जानातिश्चुरादिः, चुरादित्वात् णिचि "अर्ति-ह्री०" [ ५. २. २१. ] इति प्वागमे "मारण०" [ ४. २. ३०. ] इति ह्रस्वे "णेरनिटि" [ ४. ३. ८३. ] इति णिलोपे च– ज्ञप्तिः । "कृतण् संशब्दने" संशब्दनं ख्यातिः, "कॄतः कीर्तिः" [ ४. ४. १२३. ] इति कीर्तादेशे णिचि क्तौ णिलोपे च– **कीर्तिः** । ननु साधिते रूपे स्वतः सिद्धे एव निपातनस्य किं प्रयोजनमिति चेत् ? अत्राह– **आभ्यां ण्यन्तलक्षणोऽनो न भवतीति**–"णि-वेत्त्या०" [ ५. ३. १११. ] इत्यनेनेति भावः, निपातनप्रयोजनमेतदित्यर्थः । अत्र कश्चिदनमपीच्छतीत्याह– **कीर्तनेत्यपि कश्चिदिति** ।। ५. ३. ९४. ।।

## गा-पा-पचो भावे । ५. ३. ९५. ।।

**त० प्र०– एभ्यो भावेऽर्थे स्त्रियां क्तिर्भवति । 'गा' इति सामान्येन ग्रहणम्, प्रगीतिः, संगीतिः । 'पा' इति गा-पचिसाहचर्यात् पिबतेर्ग्रहणम्, प्रपीतिः, संपीतिः । पक्तिः, प्रपक्तिः । भावग्रहणमर्थान्तरनिरासार्थम् । बाधकस्याङोऽपवादः ।।९५।।**

**श० म० न्यासानुसन्धानम्– गा०** । "गैं शब्दे" अस्य "आत् सन्ध्यक्षरस्य" [ ४. २. १. ] इत्यात्वे 'गा'

इति भवति, "गांङ् गतौ" इति तु स्वत एव 'गा' इति, तत्र सूत्रस्थगाशब्देन कस्य ग्रहणमित्याह- **'गा' इति सामान्येन ग्रहणमिति**- * गा-मा-दाग्रहणेष्वविशेषः * इति न्यायेनोभयोरपि ग्रहणमिति भावः। आभ्यामनेन क्तौ "ईर्व्यञ्जने०" [ ४. ३. ९७. ] इत्याकारस्य ईत्वे- **प्रगीतिः, संगीतिरिति**। "पां पाने" "पैं शोषणे" "पांक् रक्षणे" इति त्रयः पारूपा धातवस्तत्र सूत्रस्थपाशब्देन कस्य ग्रहणमित्याह- **'पा' इति गा-पचिसाहचर्यात् पिबतेर्ग्रहणमिति**- "गांङ् गतौ" इति भ्वादिः, पचिरपि भ्वादिरेव शब्विकरण इति तयोर्मध्ये पठितोऽसौ * सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् * इति न्यायेन भ्वादिरेव पाधातुर्गृह्यते, यस्य पिबतीति रूपं भवति, यद्यपि पैधातुरपि भ्वादिः शोषणार्थकः, तस्यात्वे कृते 'पा' इति रूपं सम्भवति तथापि तस्येह न ग्रहणं लाक्षणिकत्वात् *लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्* इति न्यायात्। पाधातोः प्राग्वदीत्वे- **प्रपीतिः, संपीतिः**। "डुपचींष् पाके" इति 'पच्धातोश्चस्य' "चजः कगम्" [ २. १. ८६. ] इति कत्वे- **पक्तिः, प्रपक्तिः**। भावाकर्त्रोरित्यस्यानुवर्तमानत्वात् भावार्थे लब्धे भावग्रहणस्य वैयर्थ्यमाशङ्क्याह- **भावग्रहणमर्थान्तरनिरासार्थमिति**- कर्तृभिन्नकारकरूपार्थान्तरस्य व्यावर्तनायेति भावः। "स्त्रियां क्तिः" [ ५. ३. ९१. ] इत्यनेनैव भावेऽपि क्तिरेभ्यः सिद्ध एवेति किमर्थं सूत्रमित्याशङ्कायामाह- **बाधकस्याङोऽपवाद** इति- "उपसर्गादातः" [ ५. ३. ११०. ] इति वक्ष्यमाणसूत्रेण प्राप्तो हि अङ् सामान्यविहितस्य क्तेर्बाधक इति तद्बाधायेदं सूत्रमिति भावः। पचेस्तु "षितोऽङ्" [ ५. ३. १०७. ] इत्यङ् प्राप्त इति सर्वेषां विषये बाधकत्वमिति ॥ ५. ३. ९५. ॥

## स्थो वा। ५. ३. ९६. ॥

**त० प्र०- तिष्ठतेर्भावेऽर्थे स्त्रियां क्तिर्वा भवति। प्रस्थितिः, उपस्थितिः। वावचनादङपि-आस्था, व्यवस्था, संस्था। पूर्ववदङोऽपवादः ॥९६॥**

**श० म० न्यासानुसन्धानम्- स्थो वा।** "ष्ठां गतिनिवृत्तौ" इति स्थाधातोरनेन क्तौ "दो-सो-मा-स्थ इः" [ ४. ४. ११. ] इतीत्वे-**प्रस्थितिः, उपस्थितिः**। वाग्रहणप्रयोजनमाह- **वाग्रहणादङपीति**- "उपसर्गादातः" [ ५. ३. ११०. ] इत्यनेनाङपीत्यर्थः, तदुदाहरति- **आस्था, व्यवस्था, संस्थेति**- अत्राङि "इडेत्पुसि चातो लुक्" [ ४. ३. ९४. ] इत्यालोपे आपि च- 'आस्था' इत्यादि। पूर्वसूत्रे एव पठितव्ये विकल्पविधानायेदं सूत्रम्। "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिः, "उपसर्गादातः" [ ५. ३. ११०. ] इत्यङ् च पर्यायेण सिद्ध एवेति सूत्रस्य वैयर्थ्यमाशङ्क्याह- **पूर्ववदङोऽपवादः** इति, अयमाशयः- स्त्र्यधिकारोक्तप्रत्ययेषु नित्यमेव बाध्यबाधकभावस्य स्वीकृतत्वात् क्तिप्रत्ययमङ् बाधिष्यते, स च नित्य इत्यङेव स्यान्न क्तिरिति अङ्बाधनाय सूत्रमिदम्। इदं च पाक्षिकमिति पक्षेऽङपि भवतीति ॥ ५. ३. ९६. ॥

## आस्यटि-व्रज्-यजः क्यप्। ५. ३. ९७. ॥

**त० प्र०- एभ्यः परो भावेऽर्थे स्त्रियां क्यप् प्रत्ययो भवति। आस्- आस्या। अट्-अट्या, "वृथाऽट्या खलु सा तस्याः"। व्रज्- व्रज्या। यज्- इज्या। ककारः कित्कार्यार्थः। पित्करणमुत्तरत्र तागमार्थम् ॥९७॥**

**श० म० न्यासानुसन्धानम्- आस्य०।** "आसिक् उपवेशने" अतः क्यपि- **आस्या**। "अट गतौ" **अट्या**। अत्र कविप्रयोगमाह- **"वृथाऽट्या खलु सा तस्याः"** इति। "व्रज गतौ" **व्रज्या**। "यजीं देवपूजासंगतिकरणदानेषु" अतः क्तौ "यजादिवचेः किति" [ ४. १. ७९. ] इति य्वृति- **इज्या**। प्रयोगे यकारमात्रस्य श्रवणादनुबन्धयोर्वैयर्थ्यमिति चेत्? अत्राह- **ककारः कित्कार्यार्थ** इति- कित्कार्यमिज्येत्यत्र य्वृत्करणं तदर्थं इति। पकारस्य यद्यप्येतत्सूत्रीयलक्ष्येषु न प्रयोजनं तथाऽप्यस्योत्तरत्रानुवर्तनात् तत्र प्रयोजनं भविष्यतीत्याह- **पित्करणमुत्तरत्र तागमार्थमिति**- "भृगो नाम्नि" [ ५. ३. ९८. ] इत्यादिसूत्रोदाहरणेषु तत्फलमिति भावः, तथा च भृत्या सुत्येत्यादौ तागमसिद्धिरिति पित्करणमपि सार्थकमिति ॥ ५. ३. ९७. ॥

## भृगो नाम्नि। ५. ३. ९८. ॥

**त० प्र०- भृगः परो भावेऽर्थे स्त्रियां नाम्नि- संज्ञायां क्यप् प्रत्ययो भवति। भरणं- भृत्या। नाम्नीति किम्? भृतिः। भाव इत्येव- भ्रियत इति-भार्या वधूः ॥९८॥**

**श० म० न्यासानुसन्धानम्–भृगो०** । "भृंग् भरणे" "डुडुभृंग्क् पोषणे च" चकाराद् धारणे, अतोऽनेन स्त्रियां भावे क्यपि तागमे च–**भरणं– भृत्येति** । पदकृत्यं पृच्छति– **नाम्नीति किमिति**, उत्तरयति– **भृतिरिति**– अत्र नामत्वाभावादस्याप्रवृत्त्या "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिः । भावानुवृत्तेर्व्यावर्त्यं दर्शयति– **भाव इत्येव– भ्रियत इति– भार्या वधूरिति**– अत्र "ऋवर्ण०" [ ५. १. १७. ] इति कर्मणि घ्यणि वृद्धिः, आप् च ॥ ५. ३. ९८. ॥

## समज-निपन्निषद्-शीङ्-सुग्-विदि-चरि-मनीणः ॥ ५. ३. ९९. ॥

**त० प्र०– योगविभागाद् भाव एवेति निवृत्तम् । एभ्यः परो नाम्नि भावाऽकर्त्रोः स्त्रियां क्यप् भवति । समज्– समजन्त्यस्यामिति– समज्या । निपन्निषदेति संहितानिर्देशात् पतेः पदेश्च ग्रहणम्, निपतन्त्यस्यामिति– निपत्या, निपद्या । निषद्– निषदनं निषीदन्त्यस्यामिति वा– निषद्या । शीङ्– शेरतेऽस्यामिति– शय्या । सुग्– सवनं सुन्वन्त्यस्यामिति वा– सुत्या । विद्– वेदनं विदन्ति तस्यां तया वा हिताहितमिति–विद्या । चर्–चरणं चरन्ति अनयेति वा–चर्या । मन्–मननं मन्यतेऽनयेति वा–मन्या । इण्– अयनमेत्यनयेति वा– इत्या । नाम्नीत्येव– संवीतिः, निपत्तिः, निषत्तिः ॥९९॥**

**श० म० न्यासानुसन्धानम्–समज०** । "अज क्षेपणे च" चकाराद् गतौ, **योगविभागाद् भाव एवेति निवृत्तमिति**– भृगोऽप्यत्रैव निर्देशे एकेनैव सूत्रेण सिद्धे योगद्वयविधानेन ततो वैलक्षण्यं सूच्यत इति पूर्वस्य भावमात्रे प्रवृत्तावप्यस्याकर्तरि कारकेऽपि प्रवृत्तिरिति भावः । भावपदमात्रस्यानुवृत्तावपि तस्यार्थान्तरव्यावर्तनार्थत्वस्य पूर्वमुक्ततया 'भाव एव' इत्यर्थपरत्वं लब्धमिति तत्संस्कारेण भाव एवेति कथितम् । यद्यपि प्रयोगानुरोधादधिकरणमात्रेऽयं प्रत्ययः, भाष्येऽपि– "क्यब्विधिरधिकरणे च" इत्युक्तम् [३. ३. ९८.] सूत्रे, अतो नान्यत्र कारके प्रवर्तते, तथापि पूर्वमनुवर्तमानेन भावाकर्त्रोरिति पदेनैवाधिकरणेऽपि भविष्यत्येवेति नाधिकरणे पृथग् विधानमावश्यकम् । न चान्यत्र कारकेऽपि स्यादिति वाच्यम्, लक्ष्यानुरोधात् तद्वारणात् । "अज क्षेपणे च" चकाराद् गतौ, सम्पूर्वादितो विगृह्योदाहरति– **समजन्त्यस्यामिति– समज्या** । पति-पदिभ्यामुभाभ्यां प्रत्ययस्येष्टत्वेन तत्संग्रहोपायमाह– **'निपन्निषद' इति संहितानिर्देशात् पतेः पदेश्च ग्रहणमिति**– कृतसन्धिनिर्देशेन हि तकारस्य दकारस्य वा स्थाने नकार इति विनिगमकाभावादुभयोर्ग्रहणं सिद्धमिति भावः । "पत्लृ गतौ" **निपतन्त्यस्यामिति– निपत्या** । "पदिच् गतौ" निपद्यन्तेऽस्यामिति– **निपद्या** । "षद्लृं विशरणगत्यवसादनेषु" अतो भावेऽधिकरणे च विगृह्योदाहरति– **निषदनं निषीदन्त्यस्यामिति वा– निषद्या,** "सदोऽप्रतेः०" [ २. ३. ४४. ] इति सस्य षत्वम् । "शीङ्क् स्वप्ने" शेरतेऽस्यामिति– **शय्या,** "क्ङिति यि शय्" [ ४. ३. १०५. ] इति शयादेशः शीङ इति ज्ञेयम् । अत्राधिकरणे प्रत्ययः । "षुंगट् अभिषवे" भावेऽधिकरणे च विगृह्योदाहरति– **सवनं सुन्वन्त्यस्यामिति वा– सुत्या** । "ह्रस्वस्य तः पित्कृति" [४. ४. ११३.] इति तागमः, एवमन्यत्रापि । भावेऽधिकरणे करणे च विगृह्योदाहरति–**वेदनं विदन्ति तस्यां तया वा हिताहितमिति– विद्या,** अनेन "विदक् ज्ञाने" इत्यादादिकस्य ग्रहणं संज्ञात्वेन, संज्ञायाश्च नियतार्थवृत्तित्वादिति न "विद्लृंती लाभे" इति लाभार्थकस्य "विदिच् सत्तायाम्" इति सत्तार्थकस्य "विदिप् विचारणे" इति विचारार्थकस्य वा ग्रहणमिति फलितम् । "चर भक्षणे च" चकाराद् गतौ, अतो भावे करणे च विगृह्योदाहरति– **चरणं चरन्ति अनयेति वा– चर्या** । एवं "मनिच् ज्ञाने" इत्यस्य **मननं मन्यतेऽनयेति वा– मन्या,** गलपार्श्वस्थशिराया नाम, तयैव हि जनो विचारयति, अवबुध्यते वा । "इंण्क् गतौ" **अयनमेत्यनयेति वा– इत्या** इति– अत्र तागमः, 'इत्या' इति शिबिकाया मनुष्यवाह्यचतुरस्रयानविशेषस्य नाम । नाम्नीत्यस्यानुवृत्तेर्व्यावर्त्यं दर्शयितुमाह– **नाम्नीत्येवेति**, सम्पूर्वादजेः क्तौ "अघञ्क्य०" [ ४. ४. २. ] इति वीभावे– **संवीतिः**, निपूर्वात् पतेः पदेर्वा क्तौ– **निपत्तिः**, निपूर्वात् सदेः क्तौ "सदोऽप्रते०" [ २. ३. ४४. ] इति सस्य षे च– **निषत्तिरिति**, "अघोषे प्रथमोऽशिटः" [ १. ३. ५०. ] इति दस्य तः ॥ ५. ३. ९९. ॥

**कृगः श च वा । ५. ३. १००. ॥**

**त० प्र०– करोतेर्भावाऽकर्त्रोः स्त्रियां शः प्रत्ययो वा भवति, चकारात् क्यप् च । क्रिया, कृत्या, पक्षे-कृतिः । क्रियेति यदा भाव-कर्मणोः शस्तदा मध्ये क्यः, यदा त्वपादानादौ शस्तदा क्यो नास्तीति रेरिकारस्येयादेशः ॥१००॥**

**श० म० न्यासानुसन्धानम्– कृगः०** । चकारः क्यपोऽनुकर्षणार्थ इत्याह– **चकारात् क्यप् चेति**, तथा च "चानुकृष्टं नोत्तरत्र" इति न्यायादुत्तरत्र न क्यपोऽनुवृत्तिः । "डुकृंग् करणे" अतोऽनेन शे "रिः श-क्या-ऽऽशीर्ये" [४. ३. ११०.] इति ऋतो 'रि' इत्यादेशे "धातोरिवर्णो०" [२. १. ५०.] इतीयादेशे–**क्रिया**, क्यपि तु तागमे–**कृत्या** । अस्य वैकल्पिकत्वात् पक्षे क्तौ-**कृतिः** । ननु यदा भावकर्मणोः शस्तदा मध्ये "क्यः शिति" [ ३. ४. ७०. ] इति क्येन भवितव्यम्, यदा त्वपादानादौ शस्तदा क्यो न प्राप्नोतीति शे रूपद्वयेन भाव्यमिति चेत् ? न– उभयत्रापि 'क्रिया' इत्येकस्यैव रूपस्य जायमानत्वात्, कथमिति चेत् ? अत्राह– **क्रियेति भाव-कर्मणोः शस्तदा मध्ये क्यः** इति– क्ये परे च "रिः श-क्या०" [ ४. ३. ११०. ] इत्यनेन ऋतो रिरादेश इति 'क्रिया' इत्येव स्यात्, **यदा त्वपादानादौ शस्तदा क्यो नास्तीति**– भाव-कर्मविहिते शे परे एव क्यविधानादित्यर्थः, किन्तु शे परे रिरादेशो भवत्येव, ततः किमित्याह– **रेरिकारस्येयादेशः** इति– "धातोरिवर्णो०" [ २. १. ५०. ] इत्यनेन इकारस्येयादेशेऽपि 'क्रिया' इत्येव स्यात्, उभयत्र स्त्रीलिङ्गे विधानात् "आत्" [ २. ४. १८. ] इत्याप् प्रत्ययो विज्ञेयः ॥ ५. ३. १००. ॥

**मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-ऽन्तर्धा । ५. ३. १०१. ॥**

**त० प्र०– एते शब्दाः स्त्रियां निपात्यन्ते । तत्रेच्छा भाव एव, शेषास्तु भावाऽकर्त्रोः । अन्ये तु सर्वान् भाव एवानुमन्यन्ते । मृगयतेः शः शव् च क्याभावो निपात्यते–मृगया । इच्छतेः शः क्याभावश्च–इच्छा । याचि-तृष्योर्न-नङौ–याच्ञा, तृष्णा । कृपेरङ् रेफस्य च ऋकारः-कृपा । भातेरङ्-भा । श्रत्पूर्वादन्तःपूर्वाच्च दधातेरङ्-श्रद्धा, अन्तर्धा ॥१०१॥**

**श० म० न्यासानुसन्धानम्– मृग०** । तत्र भावाकर्त्रोर्मध्ये, **इच्छा भाव एवेति**– अभिधानस्वाभाव्यात्, करणार्थे संज्ञाशब्दत्वात् क्तिरेवेति पूर्वमिष्टिरित्यस्य साधितत्वादन्यत्र कारके च प्रायः प्रयोगाभावात् सत्त्वेऽपि च तत्र क्तिरेव भविष्यति निपातनस्य विशेषविषयतायाः स्वीकारात् । सह पठितानामपि भावमात्रे निपातनमिति संशयापाकरणायाह– **शेषास्तु भावाकर्त्रोरिति । अन्ये तु सर्वान् भाव एवानुमन्यन्त** इति– पाणिनीयेऽपि दीक्षितादिभिर्भाव एव विगृहीतमिति तेषामपि भावमात्रवाचकत्वमेषामिति मतं प्रतिभाति । निपातनस्यालाक्षणिककार्यलाभार्थत्वेन कुत्र किं निपात्यमित्याह– **मृगयतेः शः शव् च क्याभावो निपात्यते** इति– "मृगणि अन्वेषणे" इति चौरादिकोऽदन्तो धातुः, अतो णिचि "अतः" [ ४. ३. ८२. ] इत्यकारलोपे 'मृगि' इति, ततः शप्रत्यये शवि विकरणे गुणेऽयादेशे आपि च– **'मृगया'** इति, अत्र "क्यः शिति" [ ३. ४. ७०. ] इति शे परे क्यः प्राप्तः, तदभावोऽपि निपात्यते, तथा चात्र निपातनात् त्रयं लब्धमिति भावः । **इच्छतेः शः क्याभावश्च– इच्छेति**– "इषत् इच्छायाम्" अतः शप्रत्यये "गमिषद्यमश्छः" [ ४. २. १०६. ] इत्यन्त्यस्य छे तस्य द्वित्वे पूर्वस्य चत्वे– इच्छा, अत्र क्याभावश्च प्राग्वत् निपातनादिति द्वयं निपातनलभ्यम् । **याचि-तृष्योर्न-नङौ** इति– "डुयाचृग् याच्ञायाम्" अतो ने तस्य "तवर्गस्य०" [ १. ३. ६०. ] इति ञत्वे आपि च– **याच्ञा** । "ञितृषच् पिपासायाम्" अतो नङि ङित्त्वाद् गुणाभावे "रषृवर्णा०" [ २. ३. ६३. ] इति नस्य णत्वे आपि च– **तृष्णा** । "कृपि कृपायाम्" अतोऽनेन निपातनादङि रस्य ऋकारे ङित्त्वाद् गुणाभावे चापि कृपेत्याह–**कृपेरङ् रेफस्य च ऋकारः– कृपेति**– अत्र द्वयं निपातनलभ्यम् । **भातेरङ्– भा** इति–"भांक् दीप्तौ" अतोऽङि ङित्त्वाच्च "इडेत्पुसि०" [४. ३. ९४.] इत्याकारलोपे आपि च– भा । **श्रत्पूर्वादन्तःपूर्वाच्च दधातेरङ्–श्रद्धा, अन्तर्धा** इति–"डुधांग्क् धारणे च" चकाराद् दाने, 'श्रद्' इति 'अन्तर्' इति चाव्ययम्, अनयोरुपसर्गत्वाभावाद् "उपसर्गादातः" [५. ३. ११०.]

इत्यनेनाप्राप्तौ निपातनमनयोः, अनेनाङि आकारलोपे चापि–श्रद्धा, अन्तर्धा ।। ५. ३. १०१. ।।

## परेः सृ-चरेर्यः । ५. ३. १०२. ।।

**त० प्र०– परिपूर्वाभ्यां सृ-चरिभ्यां परः स्त्रियां यः प्रत्ययो भवति, भावाऽकर्त्रोः । भाव इत्यन्ये । परिसर्या, परिचर्या । परेरिति किम् ? संसृतिः, चूर्तिः ।।१०२।।**

**श० म० न्यासानुसन्धानम्– परेः०** । "सृं गतौ" परिपूर्वादितो ये गुणे आपि च– **परिसर्या** । "चर भक्षणे च" चकाराद् गतौ, **परिचर्या** । पृच्छति– **परेरिति किमिति**, अन्योपसर्गपूर्वात् केवलाच्च मा भूदित्याशयेनोत्तरयति– **संसृतिः**, अत्र क्तिरेव, एवं–**संचूर्तिरिति**–अत्र "ति चोपान्त्यातोऽनोदुः" [४. १. ५४.] इत्यत उः, तस्य "भ्वादेर्नामिनो०" [२. १. ६३.] इति दीर्घः ।। ५. ३. १०२. ।।

## वाऽटाट्यात् । ५. ३. १०३. ।।

**त० प्र०–अटतेर्यङन्तात् स्त्रियां यः प्रत्ययो वा भवति, भावाऽकर्त्रोः । भाव इत्यन्ये । अटाट्या, पक्षे–अः प्रत्ययः–अटाटा । अन्ये तु क्तिप्रत्ययबाधनार्थमटतेर्यङन्तस्य यप्रत्ययं द्विर्वचनं पूर्वदीर्घत्वं च निपातयन्ति-अटनमटाट्या ।।१०३।।**

**श० म० न्यासानुसन्धानम्– वाऽ०** । अटाट्येति धातुपाठेऽदृष्टत्वादाह– **अटतेर्यङन्तादिति** । **भाव एवेत्यन्ये** इति– पाणिनीयेऽपि भावमात्र एव विगृहीतत्वमुक्तं पूर्वत्र । "अट गतौ" भृशं पुनः पुनर्वा अटनमिति "अट्यर्ति०" [ ३. ४. १०. ] इति यङि "स्वरादेर्द्वितीयः" [ ४. १. ४. ] इति द्वितीयस्यैकस्वरांशस्य 'ट्य' इत्यस्य द्वित्वे पूर्वस्यानादिव्यञ्जनलोपे "आगुणावन्यादेः" [ ४. १. ४८. ] इत्यस्य आकारे च 'अटाट्य' इति यङन्तो धातुः, ततोऽनेन ये "अतः" [ ४. ३. ८२. ] इत्यकारलोपे "योऽशिति" [ ४. ३. ८०. ] इति यलोपे स्त्रियामापि च– **अटाट्या** । अस्य वैकल्पिकत्वाद् पक्षे किमित्याह– **पक्षे-अः प्रत्ययः– अटाटेति**– "शंसिप्रत्ययात्" [ ५. ३. १०५. ] इति अप्रत्यये प्राग्वदकारयकारयोर्लोपे स्त्रियामापि च–अटाटा । अटतेर्यङ्लुबन्तस्यैवं रूपसिद्धावपि अटतिरिति रूपं स्यादेव, तच्चानिष्टमिति मन्वानैस्तदर्थं कृतमुपायमाह–**अन्ये तु क्तिप्रत्ययबाधनार्थमटतेरयङन्तस्य यप्रत्ययं द्विर्वचनं पूर्वदीर्घत्वं च निपातयन्ति– अटनमटाट्येति** । तदुक्तम्– "परिचर्या-परिसर्या-मृगया-ऽटाट्यानामुपसंख्यानम्" इति वार्तिके दीक्षितेन–अटतेः शे यकि ट्यशब्दस्य द्वित्वं पूर्वभागे यकारनिवृत्तिर्दीर्घश्चेति । अटतेर्यङन्ताद् तु प्रत्ययान्तनिमित्तेऽकारप्रत्यये कृतेऽलोपे यलोपे चाटाटेति रूपं तैः स्वीक्रियते । पुनः पुनरटनमटाटा, अटनमटाट्येति ।। ५. ३. १०३. ।।

## जागुरश्च । ५. ३. १०४. ।।

**त० प्र०–जागर्तेः स्त्रियामः प्रत्ययो यश्च भवति । भावाऽकर्त्रोः । भाव इत्यन्ये । जागरा, जागर्या ।।१०४।।**

**श० म० न्यासानुसन्धानम्– जागु०** । "जागृक् निद्राक्षये" अतोऽप्रत्यये यप्रत्यये च गुणे स्त्रियामापि च– **जागरा, जागर्या** । स्त्रियां क्त्यपवादौ, तेन जागर्तिरिति जागुभवि प्रयुज्यमानः प्रयोगोऽसाधुरेव, क्वचित् कोशादावपि जागर्तिरिति प्रयुक्तः स बाहुलकादिति मन्तव्यम् ।। ५. ३. १०४. ।।

## शंसि-प्रत्ययात् । ५. ३. १०५. ।।

**त० प्र०– शंसेः प्रत्ययान्तेभ्यश्च धातुभ्यो भावाऽकर्त्रोः स्त्रियामः प्रत्ययो भवति । प्रशंसा, गोपाया, ऋतीया, मीमांसा, कण्डूया, लोलूया, चिकीर्षा, पुत्रकाम्या, पुत्रीया, गवा, गल्भा, श्येनाया, पटपटाया । शंसूः क्तेऽनिट् इति वचनम् ।।१०५।।**

**श० म० न्यासानुसन्धानम्– शंसि०** । "शंसू स्तुतौ च" चकाराद् हिंसायाम् अतोऽनेन 'अ'प्रत्यये स्त्रियामापि च– **प्रशंसा** । 'गुपौ रक्षणे' अतः "गुपौ-धूप०" [ ३. ४. १. ] इति स्वार्थे आयप्रत्यये उपान्त्यगुणे च 'गोपाय' इति प्रत्ययान्ताद् धातोरनेन 'अ'प्रत्यये पूर्वाकारलोपे स्त्रियामापि च–**गोपाया** । "ऋत घृणागतिस्पर्धेषु" अतः "ऋतेर्डीयः" [ ३. ४. ३. ] इति स्वार्थे डीयप्रत्यये ङित्त्वादुपान्त्यगुणाभावे 'ऋतीय' इत्यतोऽप्रत्यये– **ऋतीया** । "मानि पूजायाम्" अतो विचारार्थे "शान्-दान्-मान्०" [ ३.४. ७. ] इत्यनेन स्वार्थे सनि "सन्-यङश्च" [ ४. १. ३. ] इत्याद्यस्यैकस्वरांशस्य

द्वित्वे पूर्वस्य ह्रस्वे "सन्यस्य" [ ४. १. ५९. ] इत्यत इकारे तस्य "शान्-दान्-मान्०" इत्यनेन दीर्घत्वे नस्यानुस्वारे 'मीमांस' इत्यतोऽप्रत्यये स्त्रियामापि च– **मीमांसा** । "कण्डूग् गात्रविकर्षणे" अतः "धातोः कण्ड्वादेर्यक्" [ ३. ४. ८. ] इति स्वार्थे यकि कित्त्वाद् गुणाभावे 'कण्डूय' इत्यतोऽनेन 'अ'प्रत्यये पूर्वाकारलोपे स्त्रियामापि– **कण्डूया** इति । "लूग्श् छेदने" भृशं पुनः पुनर्वा लवनमिति यङि आद्यैकस्वरांशस्य द्वित्वे पूर्वस्य "आ-गुणावन्यादेः" [ ४. १. ४८. ] इत्योकारे 'लोलूय' इत्यतोऽप्रत्यये पूर्वाकारलोपे स्त्रियामापि च– **लोलूया** । "डुकृंग् करणे" कर्तुमिच्छेति सनि "स्वर-हन०" [ ४. १. १०४. ] इति दीर्घे "ऋतां क्ङितीर्" [ ४. ४. ११६. ] इति इरादेशे द्वित्वे पूर्वस्य कस्य "कङश्चञ्" [ ४. १. ४६. ] इति चे "भ्वादे०" [२. १. ६३.] इति दीर्घे सस्य षत्वे 'चिकीर्ष' इत्यस्य– **चिकीर्षा** । पुत्रमिच्छतीतीच्छायाम् "अमाव्ययात् क्यन् च" [ ३. ४. २३. ] इति पुत्रशब्दात् क्यन् काम्यश्च प्रत्ययो भवति, तत्र काम्ये 'पुत्रकाम्य' इत्यस्य क्रियार्थत्वेन धातुत्वात् तस्मादप्रत्यये पूर्वाकारलोपे स्त्रियामापि च– **पुत्रकाम्या,** क्यनि तु "क्यनि" [ ४. ३. ११२. ] इत्यवर्णस्य ईत्वे 'पुत्रीय' इत्यस्य– **पुत्रीया** । गौरिवाचरतीत्याचारार्थे "कर्तुः क्विप्, गल्भ-क्लीब-होडात् तु ङित्" [ ३. ४. २५. ] इति क्विपि तल्लोपेऽपि प्रत्ययलक्षणन्यायेन गोशब्दस्य प्रत्ययान्तत्वात् तस्मादप्रत्ययेऽवादेशे स्त्रियामापि च– **गवा,** एवं– गल्भ इवाचरतीति आचारार्थे क्विपि अप्रत्यये च –**गल्भा,** एवं श्येन इवाचरतीति आचारार्थे "क्यङ्" [ ३. ४. २६. ] इति क्यङि "दीर्घश्च्वि०" [ ४. ३. १०८. ] इति दीर्घे 'श्येनाय' इत्यस्य– **श्येनाया** । अपटत् पटत् करोति भवेत् स्याद् वेति च्व्यर्थे "डाच्-लोहिता०" [ ३. ४. ३०. ] इति डाच्प्रत्ययान्तात् क्यङ् भवति, "अव्यक्तानुकरणादनेकस्वरात् कृभ्वस्तिनाऽनितौ द्विश्च" [ ७. २. १४५. ] इति डाच् द्वित्वं च भवति, "डाच्यादौ" [ ७. २. १४९. ] इति पूर्वस्य तो लुग् भवति, "डित्यन्त्यस्वरादेः" [ २. १. ११४. ] इत्यन्त्यस्वरादेश्च, तथा च 'पटपटाय' इत्यस्य **'पटपटाया'** इति सिद्धं भवति । शंसेः 'संयोगपरो गुरुः' इति गुरुमत्त्वेन व्यञ्जनान्तत्वेन च परसूत्रेणैवाप्रत्यये सिद्धेऽस्य वैयर्थ्यमाशङ्क्याह– **शंसूः क्तेऽनिट् इति वचनमिति**– 'शंस्' धातोरूदित्त्वात् "ऊदितो वा" [ ४. ४. ४२. ] इति क्त्वायां वेट्त्वम्, वेट्त्वाच्च क्ते परे "वेटोऽपतः" [ ४. ४. ६२. ] इति इटो निषेधात् "क्तेटो गुरोर्व्यञ्जनात्" [ ५. ३. १०६. ] इति 'अ'प्रत्ययो न प्राप्नोति, तत्र क्तेट इत्युक्तत्वात्, तथा च 'अ'प्रत्ययविधानार्थमत्र शंसेरुपादानमावश्यकमिति भावः ॥ ५. ३. १०५. ॥

## क्तेटो गुरोर्व्यञ्जनात् । ५. ३. १०६. ॥

**त० प्र०–क्तस्येट् यस्मात् स क्तेट्, क्तेटो गुरुमतो व्यञ्जनान्ताद् धातोर्भावाऽकर्त्रोः स्त्रियामः प्रत्ययो भवति । ईहा, ऊहा, ईक्षा, उक्षा, कुण्डा, हुण्डा, शिक्षा, भिक्षा, व्यतीहा, व्यतीक्षा । क्तेट इति किम् ? स्रस्तिः, ध्वस्तिः, आप्तिः, दीप्तिः, अक्तिः, राद्धिः, चाय्– अपचितिः, स्फुर्छा– स्फूर्तिः, मुर्छा– मूर्तिः । गुरोरिति किम् ? स्फुर्– स्फूर्त्तिः, निपठितिः । व्यञ्जनादिति किम् ? संशीतिः ॥१०६॥**

**श० म० न्यासानुसन्धानम्– क्तेटो० । क्तस्येट् यस्मात् स क्तेट्** इति– यदव्यवहितपरस्य क्तस्येट् भवति तस्माद् धातोरयं प्रत्यय इत्यर्थः । क्त इत्यनेन क्त-क्तवतू गृह्येते । "ईहि चेष्टायाम्" अतोऽनेन 'अ'प्रत्यये स्त्रियामापि–**ईहा** । "ऊहि तर्के" तर्क उत्प्रेक्षा, अस्य– **ऊहा** । "ईक्षि दर्शने" अस्य– **ईक्षा** । "उक्ष सेचने" अस्य–**उक्षा** । "कुडुङ् दाहे" अस्य– नागमे णत्वे च– **कुण्डा** । एवं "हुडुङ् संघाते" इत्यस्य **हुण्डा** । "शिक्षि विद्योपादाने" अस्य– **शिक्षा** । परस्परमीहनमीक्षणं वेति– **व्यतीहा, व्यतीक्षे**ति–अत्र "व्यतिहारेऽनीहादिभ्यो ञः" [ ५. ३. ११६. ] इत्यत्रेहादिवर्जनात् क्त्यादीनामपवादोऽपि ञो न भवतीति भावः । पदप्रयोजनं पृच्छति– **क्तेट इति किमिति,** उत्तरयति– **स्रस्तिः, ध्वस्तिरिति**– "स्रंसूङ् अवस्रंसने" "ध्वंसूङ् गतौ च" चकारादवस्रंसने, अनयोरूदित्वात् क्त्वि वेट्त्वेन "वेटोऽपतः" [ ४. ४. ६२. ] इति क्ते इटो निषेधेन क्तेऽनिट्त्वादस्याप्रवृत्त्या स्त्रियां क्तौ "नो व्यञ्जनस्या०" [ ४. २. ४५. ] इति नलोपे तथा रूपे । "आप्लृंट् व्याप्तौ" अस्यानुस्वारेत्त्वादनिट्त्वमिति– **आप्तिः** । "दीपैचि दीप्तौ" अस्यैदित्त्वात् "डीयश्व्यैदितः क्तयोः" [ ४. ४. ६१. ] इतीटो निषेधादनिट्त्वमिति– **दीप्तिः** । "अञ्जौप् व्यक्तिम्रक्षणगतिषु" व्यक्तिः प्रकटता,

म्रक्षणं घृतादिसेकः, तत्र केवलस्य म्रक्षणे एव वृत्तिः, सोपसर्गविशेषस्य तु शेषयोरिति विवेकः । अस्य औदित्त्वेन "धूगौदितः" [ ४. ४. ३८. ] इति वेट्त्वात् क्तेऽनिट्त्वमिति क्तौ– **अक्तिः**, अत्रोपान्त्यनलोपो जस्य गत्वे करवं विज्ञेयम् । "राधंट् संसिद्धौ" संसिद्धिः फलसम्पत्तिः, अस्यानुस्वारेत्त्वेनानिट्त्वमिति– **राद्धिरिति**– "अधश्चतुर्था०" [ २. १. ७९. ] इति तस्य धः । "चायृग् पूजानिशामनयोः" अस्य "अपचितः" [ ४. ४. ७७. ] इत्यनिट्त्वमिति क्तौ "अपाच्चायश्चिः" [ ४. २. ६६. ] इति 'चि' इत्यादेशे च– **अपचितिः** । "स्फुर्छा विस्मृतौ" अस्यादित्वात् "आदितः" [ ४. ४. ७१. ] इतीटो निषेधादनिट्त्वमिति स्त्रियां क्तौ "राल्लुक्" [ ४. १. ११०. ] इति छ्लोपे "म्वादेर्नामिनो०" [२. १. ६३.] इति दीर्घे च– **स्फूर्तिः** । एवं "मुर्छा मोहसमुच्छ्राययोः" इत्यस्य– **मूर्तिः** । पुनः पृच्छति– **गुरोरिति किमिति**, गुरुरहितान्मा भूदित्याशयेनोत्तरयति- **स्फूर्तिरिति**– "स्फुरत् स्फुरणे" अतः स्त्रियां क्तौ "म्वादे०" [२. १. ६३.] इति दीर्घः । "पठ व्यक्तायां वाचि" निपूर्वादितः स्त्रियां क्तौ "तेर्ग्रहादिभ्यः" [ ४. ४. ३३. ] इति ग्रहादित्वादिटि– **निपठितिरिति**, उभयत्र व्यञ्जनान्तत्वेऽपि गुरुविरहान्नास्य प्रवृत्तिरित्यर्थः । पुनः पृच्छति– **व्यञ्जनादिति किमिति**, उत्तरयति– **संशीतिरिति**– "शीङ्क् स्वप्ने" अत्र व्यञ्जनान्तत्वाभावादस्याप्रवृत्त्या स्त्रियां क्तौ– संशीतिः ॥ ५. ३. १०६. ॥

## षितोऽङ् । ५. ३. १०७. ॥

**त० प्र०– षिद्भ्यो धातुभ्यो भावाऽकर्त्रोः स्त्रियामङ् प्रत्ययो भवति । पचा, क्षमा, क्षान्तिरिति तु क्षाम्यतेः, घटा, त्वरा, प्रथा, व्यथा, जरा, "ऋवर्णदृशोऽङि" [ ४. ३. ७. ] इति गुणः । ङकारो ङित्कार्यार्थः ॥१०७॥**

**श० म० न्यासानुसन्धानम्– षितो०** । "डुपचींष् पाके" अस्य षित्वादनेन स्त्रियामङि आपि च– **पचा** । एवं "क्षमौषि सहने" इत्यस्य– **क्षमा** । "क्षान्तिः सतां भूषणम्" इत्यादौ क्तिप्रत्ययान्तरूपस्यापि प्रयुक्तत्वेन तस्य साधनोपायमाह– **क्षान्तिरिति क्षाम्यतेरिति**– "क्षमौच् सहने" इति दैवादिकस्य षित्त्वाभावादस्याप्रवृत्त्या स्त्रियां क्तौ "अहन्पञ्चमस्य०" [ ४. १. १०७. ] इत्युपान्त्यदीर्घे क्षान्तिरिति भवतीत्यर्थः । तदुक्तम्– "अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमतेः क्षमा" इति, भौवादिकस्य क्षमा, दैवादिकस्य क्षान्तिरित्युभयोः सिद्धिरिति भावः । "घटिष् चेष्टायाम्" अस्य– **घटा**, "त्वरिष् संभ्रमे" अस्य– **त्वरा** । "प्रथिष् प्रख्याने" प्रख्यानं प्रसिद्धिः, अस्य- **प्रथा** । "व्यथिष् भयचलनयोः" अस्य– **व्यथा** । "जृष्व् जरसि" अस्य– **जरा**, अङो ङित्त्वात् कथमत्र गुण इत्याशङ्कायामाह– **"ऋवर्णदृशोऽङि" [ ४. ३. ७. ] इति गुणः** इति । ङकारस्य प्रयोगेऽश्रूयमाणतया वैयर्थ्यमाशङ्क्याह– **ङकारो ङित्कार्यार्थः** इति– अत्र गुणार्थः, उत्तरत्र गुणाभावाद्यर्थश्च ॥ ५. ३. १०७. ॥

## भिदादयः । ५. ३. १०८. ॥

**त० प्र०– भिदादयः शब्दा भावाऽकर्त्रोः स्त्रियामङ्प्रत्ययान्ता यथादर्शनं निपात्यन्ते । भिदा विदारणम्, छिदा द्वैधीकरणम्, विदा विचारणा, मृजा शरीरसंस्कारः, क्षिपा प्रेरणम्, दया अनुकम्पा, रुजा रोगः, चुरा चौर्यम्, पृच्छा प्रश्नः, एतेऽर्थविशेषे । अन्यत्र–भित्तिः कुड्यम्, छित्तिश्चौर्यादिकरणाद् राजापराधः, विच्छित्तिः प्रकार इत्यादि । तथा ऋ-कृ-हृ-धृ-तृभ्यः संज्ञायां वृद्धिश्च– आरा शस्त्री, ऋतिरन्या । कारा गुप्तिः कृतिरन्या । हारा मानम्, हृतिरन्या । धारा प्रपातः खड्गादेर्वा, धृतिरन्या । तारा ज्योतिः, तीर्णिरन्या । तथा– गुहि-कुहि-वशि-वपि-तुलि-क्षपि-क्षिभ्यश्च संज्ञायाम्– गुहा पर्वतकन्दरा औषधिश्च, गूढिरन्या । कुहा नाम नदी, कुहनाऽन्या । वशा स्नेहनद्रव्यं धातुविशेषश्च, उष्टिरन्या । वपा मेदोविशेषः, उप्तिरन्या । एवं-तुला उन्मानम्, क्षपा रात्रिः, क्षिया आचारभ्रंशः । तथा संज्ञायामेव रिखि-लिखि-शुभि-सिधि-मिधि-गुधिभ्यो गुणश्च– रिखिः लिखेः समानार्थः सौत्रो धातुः, रेखा राजिः, लेखा सैव, शोभा कान्तिः, सेधा सत्त्वम्, मेधा बुद्धिः, गोधा प्राणिविशेषो दोस्त्राणं च । भिदादिराकृतिगणः, तेन चूडेत्यादि सिद्धम् ।**

> अकृतस्य क्रिया चैव प्राप्तेर्बाधनमेव च ।
> अधिकार्थविवक्षा च त्रयमेतन्निपातनात् ॥१०८॥

**श० म० न्यासानुसन्धानम्– भिदा०** । अन्यैर्भिदादिभ्योऽङ् प्रत्यय एव विहितो विशेषकार्यार्थं प्रातिस्विक-

रूपेणार्थविशेषे तत्कार्यं निपातितमिति तेषां गौरवमुद्भाव्य स्वमते सर्वेषां निपातनमेव यथाप्रयोगमर्थविशेषपरत्वेनाश्रितमित्याह– **यथादर्शनमिति**– ये यथास्वरूपा येष्वर्थेषु दृश्यन्ते ते तथैव निपातिता बोद्धव्या इति । "भिदृंपी विदारणे" अतोऽनेनाङि ङित्त्वाद् गुणाभावे स्त्रियामापि च– **भिदा विदारणमिति**– तथा च विदारणार्थे एवाङ् भवतीत्यर्थः । "छिदृंपी द्वैधीकरणे" अस्य–**छिदा द्वैधीकरणम्** । "मृजौक् शुद्धौ" अस्य– **मृजा शरीरसंस्कारः** । "क्षिपंत् प्रेरणे" अस्य– **क्षिपा प्रेरणम्** । "दयि दानगतिहिंसादहनेषु च" चकाराद् गतौ, दयनं दयन्ते प्राणिनोऽनयेति वा यथाक्रमं क्त्यनटोऽपवादेऽङि– **दया अनुकम्पा** । "रुजोंत् भङ्गे" अस्य– **रुजा रोगः** । "चुरण् स्तेये" अस्य– **चुरा चौर्यम्** । "प्रछंत् ज्ञीप्सायाम्" ज्ञीप्सा जिज्ञासा, अतः स्त्रियामङि य्वृति आपि च– **पृच्छा प्रश्नः** । **एतेऽर्थविशेषे** इति– एते भिदादयः शब्दा अर्थविशेषे दर्शिते विदारणाद्यर्थे एवाङन्ता ज्ञेयाः, अर्थान्तरे किमित्याह–**अन्यत्र–भित्तिः कुड्यमिति**– सा हि देशं भेदयति पृथक् करोति, न तु विदारयति । **छित्तिश्चौर्यादिकरणाद् राजापराधः** इति– नात्र द्वैधीकरणं द्विधा सम्पादनम्, एवं– **विच्छित्तिः प्रकार** इत्यत्रापि । वस्तुतत्त्वावधारणाय मानसो व्यापारविशेषो विचारणा, ततोऽन्यत्र ज्ञानसामान्ये लाभादौ च वित्तिरित्येव । 'मृजा शरीरसंस्कारे' इत्यत्रार्थविशेषनिर्धारणसन्नियोगेन "ऋतः स्वरे०" [४. ३. ४३.] इति वृद्ध्यभावोऽपि निपातितः, अन्यत्र च मार्ष्टिरित्येव, शोधनमात्रं तदर्थः । क्षिपा प्रेरणमित्यत्र कस्यापि वस्तुनः स्थानान्तरप्राप्तये नोदनमित्यर्थः, अन्यत्र क्षेपः क्षिप्तिर्वा निन्दाद्यर्थे । एवमन्यत्रापि । अर्थविशेषनिर्धारणेन सह येषु कार्यान्तराण्यपि निपातनीयानि तानाह– **तथा ऋ-कृ-हृ-धृ-तृभ्यः संज्ञायां वृद्धिश्च** । "ऋं प्रापणे च" चकाराद् गतौ, अतोऽङि "ऋवर्ण०" [४. ३. ७.] इति गुणे दीर्घे आपि च– **आरा शस्त्रीति**– शस्त्री काष्ठद्वैधीकरणोपकरणविशेषः, **ऋतिरन्येति**– दुःस्थितिः, गतिर्वा, आङ्पूर्वस्य तु आर्तिः । "डुकृंग् करणे" अतः स्त्रियामङि गुणे दीर्घे आपि च– **कारा गुप्तिरिति**– गुप्तिः– गोपनविशेषः, चौरादीनां निग्रहस्थानम्, अधिकरणसाधनो वाऽयम् । **कृतिरन्येति**– क्रियासामान्ये कृतिरित्येव ।

"हृंग् हरणे" इत्यतोऽङि– **हारा मानमिति**, मानादन्यार्थे हृतिरित्याह– **हृतिरन्येति** । "धृङ् अविध्वंसने" अतोऽङि– **धारा प्रपातः खड्गादेर्वा** इति– यत्र प्रपातनं तत्र धारेति, यथा जलधारा क्षीरधारेति, ततोऽन्यत्र तु किमित्याह– **धृतिरन्येति**– धारणं धैर्यं चेत्यर्थः । "तृ प्लवनतरणयोः" अतोऽङि– **तारा ज्योतिरित्यर्थः,** अन्यत्र तु क्तौ इरादेशे दीर्घे णत्वे च तीर्णिरित्याह– **तीर्णिरिति**– तरणमित्यर्थः । तथा केवलसंज्ञायामेव निपातनमित्याह– **तथा गुहि-कुहि-वशि-वपि-तुलि-क्षपि-क्षिभ्यश्च संज्ञायामिति**– "गुहौग् संवरणे" अतोऽङि– **गुहा पर्वतकन्दरा औषधिश्चेति**, अन्यत्र तु क्तौ ह्रस्व ढे तद्योगे तकारस्य धे ढे पूर्वढकारलोपे दीर्घे च गूढिरिति, तदाह– **गूढिरन्येति**, संवरणमित्यर्थः । "कुहणि विस्मापने" अतोऽङि– **कुहा नाम नदीति**, अन्यत्र तु "णि-वेत्त्या०" [५. ३. १११.] इत्यने स्त्रियामापि– कुहनेति भवति, तदाह– **कुहनाऽन्येति**– दम्भ इत्यर्थः । "वशक् कान्तौ" अतः स्त्रियामङि आपि च– **वशा स्नेहद्रव्यं धातुविशेषश्चेति**, अन्यत्र तु क्तौ य्वृति शस्य षत्वे तद्योगे तकारस्य टे– उष्टिरिति भवति, तदाह–**उष्टिरन्येति**–इच्छेत्यर्थः। "डुवपीं बीजसंताने" बीजानां सन्तानः क्षेत्रविस्तारणम्, अतः स्त्रियामङि आपि च– **वपा मेदोविशेषः** इति, अन्यत्र तु क्तौ य्वृति च उप्तिरिति भवतीत्याह– **उप्तिरन्येति** । "तुलण् उन्माने" अतः स्त्रियामङि आपि च– **तुला उन्मानम्,** अन्यत्र बाहुलकाद् "णि-वेत्त्या०" [५. ३. १११.] इत्यने **तोलना,** "भीषि-भूषि०" [५. ३. १०९.] इत्यङि च तोला, तुलयतीति तु तुलशब्दात् "णिज् बहुलम्०" [३. ४. ४२.] इति णिचि रूपम् । "क्षपण् प्रेरणे" अतः स्त्रियामङि आपि च– **क्षपा रात्रिरिति** । "क्षि क्षये" अथवा "क्षित् निवासगत्योः" अतः स्त्रियामङि इयादेशे आपि च– **क्षिया आचारभ्रंशः** । संज्ञया सह कार्यान्तरमपि निपातनीयमित्याह– **तथा संज्ञायामेव रिखि-लिखि-शुभि-सिधि-मिधि-गुधिभ्यो गुणश्चेति** । रिखेर्धातुपाठेऽदर्शनादाह– **रिखिर्लिखेः समानार्थः सौत्रो धातुरिति**– "लिखत् अक्षरविन्यासे" पठितस्तद्वदयं रिखिरपि अक्षरविन्यासार्थः, सौत्रश्च सूत्रपठितो न गणपाठपठित इत्यर्थः । अतः स्त्रियामङि आपि च– **रेखा राजिरिति**– अत्राङो ङित्त्वाद्

गुणाप्राप्तावपि निपातनाद् गुणो भवति, एवमग्रेऽपि । लिखेरङि- **लेखा सैवेति**- राजिरेवेत्यर्थः । अक्षरविन्यासेन राजिरुपलक्ष्यते, धातूनामनेकार्थत्वाद् वा राजिरर्थः । "शुभि दीप्तौ" अस्य- **शोभा कान्तिः** । "षिधूच् संराद्धौ" संराद्धिनिष्पत्तिः, अस्य- **सेधा सत्त्वम्** । स्वमते "मेधृग् संगमे च" चकारान्मेधाहिंसयोः, अस्यात्र न ग्रहणं गुणस्य सिद्धत्वात्, किन्तु अस्य स्थाने केचित् 'मिधृग्' इति पठन्ति, तस्य ग्रहणं, सौत्रो वा मिध्धातुस्तस्य ग्रहणमिति- **मेधा बुद्धिरिति** । "गुधच् परिवेष्टने" अस्य- **गोधा प्राणिविशेषो दोखाणं चेति** । एकवचनेनैव निर्वाहे "भिदादयः" इति बहुवचनमाकृतिगणार्थमित्याकृतिगणोऽयमित्याह- **भिदादिराकृतिगणः** इति, **तेन चूडेत्यादि सिद्धमिति**- "चुटण् छेदने" "चुट- अल्पीभावे" वा, चोट्यत इति **चूडा,** अनेनाङि दीर्घत्वे डत्वे च सिद्धमिदं निपातनात्, चूडा शिखेत्यर्थः । ननु वचनमन्तरा कथमुक्तार्थानां लाभ इति चेत् ? अत्राह- **अकृतस्येत्यादि**- अकृतस्य- शास्त्रेणाविहितस्य कार्यस्य, क्रिया- विधानम्; प्राप्तेः- शास्त्रप्राप्तविषयस्य बाधनम्; अधिकार्थस्य- प्रकृतिप्रत्ययालभ्यार्थस्य विवक्षा- बोधनमिति च त्रयं निपातनाल्लभ्यते इति भावः । अलाक्षणिकस्य शास्त्रप्रक्रियाऽप्राप्यस्यैवार्थस्य प्राप्तये हि निपातनमाश्रीयत इति लक्ष्यानुरोधेन यद् यदावश्यकं तत् सर्वं निपातनाद् भवतीत्याशयः ॥ ५. ३. १०८. ॥

## भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः । ५. ३. १०९. ॥

**त० प्र०- एभ्यो ण्यन्तेभ्यः स्त्रियां भावाऽकर्त्रोरङ् भवति । ण्यन्तत्वादने प्राप्ते वचनम् । भीषा, भूषा, चिन्ता, पूजा, कथा, कुम्बा, चर्चा, स्पृहा, तोला, दोला । बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवति- पीडा, ऊना ॥१०९॥**

**श० म० न्यासानुसन्धानम्- भीषि०** । भिदादिषु पाठाभावेऽप्याकृतिगणत्वेन तेषां भीषादिसिद्धौ सूत्रस्य वैयर्थ्यमिति चेत् ? अत्राह- **ण्यन्तादने प्राप्ते वचनमिति**- आकृतिगणेन हि बाधकाबाधितविषय एव प्रवर्तनं स्यात्, बाधकविषये तु स एव प्रवर्तेतेति तद्वारणाय विशिष्य विधानमावश्यकमिति भावः । "ञिभीँक् भये" हेतुकर्तृतो भये वर्तमानस्यास्य णौ "बिभेतेर्भीष् च" [३. ३. ९२.] इत्यात्वे भीषादेशेऽनेन स्त्रियामङि आपि च- **भीषा** । "भूष अलंकारे" अतो णौ स्त्रियामङि आपि च- **भूषा** । "चितुण् स्मृत्याम्" अस्य- **चिन्ता** । "पूजण् पूजायाम्"- **पूजा** "कथण् वाक्यप्रबन्धे"- **कथा** । "कुबुण् आच्छादने"- **कुम्बा** । "चर्चण् अध्ययने"- **चर्चा** । "स्पृहण् ईप्सायाम्"- **स्पृहा** । "तुलण् उन्माने"- **तोला** । "दुलण् उत्क्षेपे"- **दोला** । स्पृहेरदन्तत्वात् णौ न गुणः, एवं-कथेरुपान्त्यवृद्ध्यभावः । सर्वत्र "णेरनिटि" [ ४. ३. ८३. ] इति णिलोपः । समाहारनिर्देशेनैकवचनस्यैव प्रयोगे कर्तव्ये 'दोलिभ्यः' इति बहुवचननिर्देशो व्यर्थ इति चेत् ? अत्राह- **बहुवचनाद् यथादर्शनमन्येभ्योऽपि भवति- पीडा, ऊनेति**- तेन पीडादीनां सिद्धिरित्यर्थः, "पीडण् गहने" गहनं बाधा, "ऊनण् परिहाणे" ॥ ५. ३. १०९. ॥

## उपसर्गादातः । ५. ३. ११०. ॥

**त० प्र०- उपसर्गपूर्वेभ्य आकारान्तेभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोरङ् भवति । उपदा, उपधा, आधा, प्रदा, प्रधा, विधा, संधा, प्रमा, श्वादित्वात् क्तौ- प्रमितिः । उपसर्गादिति किम् ? दत्तिः ॥११०॥**

**श० म० न्यासानुसन्धानम्- उप०** । "डुदांग्क् दाने" "डुधांग्क् धारणे च" चकाराद् दाने, उपपूर्वाभ्यामाभ्यां स्त्रियामङि "इडेत्पुसि०" [ ४. ३. ९४. ] इत्याकारलोपे आपि च- **उपदा, उपधा**; एवं दधातेराङ्पूर्वस्य-**आधा,** प्रपूर्वात् ददातेर्दधातेश्चाङि-**प्रदा, प्रधा,** विपूर्वात् संपूर्वात् दधातेरङि- **विधा, संधा** । 'मांक् माने" प्रपूर्वादतोऽङि **प्रमा,** नन्वेवं तर्हि कथं प्रमितिरित्याह- **श्वादित्वात् क्तौ- प्रमितिरिति**- अत्र 'दोसोमास्थ इः" [ ४. ४. ११. ] इति इत्वं विज्ञेयम् । पदकृत्यं पृच्छति- **उपसर्गादिति किमिति**, अनुपसर्गान्मा भूदित्याशयेनोत्तरयति-**दत्तिरिति**- अत्र "दत्" [ ४. ४. १०. ] इति दधातेर्दतादेशः ॥ ५. ३. ११०. ॥

## णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः । ५. ३. १११. ॥

**त० प्र०- ण्यन्तेभ्यो वेत्त्यास-श्रन्थ-घट्ट-वन्दिभ्यश्च धातुभ्यः स्त्रियां भावाऽकर्त्रोरनः प्रत्ययो भवति । कारणा,**

**हारणा, कामना, लक्षणा, भावना; वेदना, आसना, उपासना, श्रन्थना, ग्रन्थेरप्यन्ये– ग्रन्थना, घट्टना, वन्दना । वेत्तीति तिव्निर्देशो ज्ञानार्थपरिग्रहार्थः ॥१११॥**

**श० म० न्यासानुसन्धानम्–णि-वेत्त्या०** । "डुकृंग् करणे" अतो णिगि वृद्धौ 'कारि' इत्यतोऽनेन स्त्रियामने "णेरनिटि" [ ४. ३. ८३. ] इति णिलोपे "आत्" [ २. ४. १८. ] इत्यापि **कारणा** । एवं "हृंग् हरणे" इत्यस्य– **हारणा,** उभयत्र "रषृवर्णा०" [ २. ३. ६३. ] इति नस्य णत्वं विज्ञेयम् । "कमूङ् कान्तौ" कान्तिरभिलाषः, "कमेर्णिङ्" [ ३. ४. २. ] इति णिङि वृद्धावुपान्त्यस्य 'कामि' इति, "अमोऽकम्यमि०" [ ४. २. २६. ] इति न ह्रस्वः कमो वर्जनात्, ततोऽनेनाने– **कामना** । "लक्षीण् दर्शनाङ्कनयोः" अङ्कनं चिह्नम्, अतो णिचि स्त्रियामनेनाने च–**लक्षणा** । भूधातोः प्राप्त्यर्थात् "भूङः प्राप्तौ णिङ्" [ ३. ४. १९. ] इति णिङि अने च– **भावना** । "विदक् ज्ञाने" अतोऽने उपान्त्यगुणे च– **वेदना** । "आसिक् उपवेशने" अतोऽने– **आसना,** उपपूर्वस्य तु– **उपासना** । "श्रथुङ् शैथिल्ये" शैथिल्यमगाढता, "श्रन्थश् मोचनप्रतिहर्षयोः" अनयोः– **श्रन्थना** । मतान्तरमाह– **ग्रन्थेरप्यन्ये–ग्रन्थने**ति । "घट्टि चलने" अस्य– **घट्टना** । "वदुङ् स्तुत्यभिवादनयोः" अस्य– **वन्दना** । "णिविदास०" इत्यादिलघुनिर्देशेनैव सिद्धौ वेत्तीति गुरुनिर्देशस्य वैयर्थ्यमाशङ्क्याह– **वेत्तीति तिव्निर्देशो ज्ञानार्थपरिग्रहार्थः** इति– तथा च वेत्तीति निर्देशस्तादृशरूपप्रकृतिभूतधातुपरिग्रहार्थः, तादृशं च रूपं ज्ञानार्थकस्यैव तस्यादादिकत्वात्, तथा च लाभाद्यर्थकान्नायं प्रत्यय इति भावः, एवं च विचारणे विदा, ज्ञाने वेदना, अन्यत्र वित्तिरिति ॥ ५. ३. १११. ॥

## इषोऽनिच्छायाम् । ५. ३. ११२. ॥

**त० प्र०– इषेरनिच्छायां वर्तमानात् स्त्रियां भावाऽकर्त्रोरनो भवति । अन्वेषणा, एषणा, पिण्डैषणा । अनिच्छायामिति किम् ? इष्टिः । कथं प्राणैषणा वित्तैषणा परलोकैषणा ? बहुलाधिकारात् ॥११२॥**

**श० म० न्यासानुसन्धानम्– इषो०** । "इषच् गतौ" "इषत् इच्छायाम्" "इषश् आभीक्ष्ण्ये" इति त्रयाणामपीषो ग्रहणेन ग्रहणे प्राप्ते इच्छार्थकात् प्रत्ययवारणाय– **अनिच्छायामित्यु**क्तम् । गत्यर्थकादनुपूर्वादनेन स्त्रियामने उपान्त्यगुणे आपि च– **अन्वेषणा,** केवलस्य तु– **एषणा,** पिण्डस्य एषणा– **पिण्डैषणा,** तत्प्रतिपादकमध्ययनमपि पिण्डैषणेति । पदकृत्यं पृच्छति– **अनिच्छायामिति कि**मिति, इच्छार्थकस्यानेनानो मा भूदित्याशयेन प्रत्युदाहरति– **इष्टि**रिति– अत्र श्रादित्वात् क्तिः, "तवर्गस्य०" [ १. ३. ६०. ] इति षयोगे तकारस्य टः । इच्छार्थकस्यापि एषणाप्रयोगं शङ्कते– **कथं प्राणैषणा वित्तैषणा परलोकैषणा ?** इति, तत्साधुत्वमन्वाचष्टे– **बहुलाधिकारा**दिति– बहुलग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वेन 'अनिच्छायाम्' इति निषेधो न प्रवर्तते इति भावः। चुरादेराकृतिगणत्वेन चेषेरपि तत्र पाठकल्पनया स्वार्थे णिचि ण्यन्तत्वे तन्निमित्तक एवान इति वा समाधेयं स्थितस्य गतेश्चिन्तनीयत्वात् ॥ ५. ३. ११२. ॥

## पर्यधेर्वा । ५. ३. ११३. ॥

**त० प्र०– पर्यधिपूर्वादिषेरनिच्छायां वर्तमानाद् भावाऽकर्त्रोः स्त्रियामनो वा भवति । पर्येषणा, परीष्टिः; अध्येषणा, अधीष्टिः । अधीष्टिरिति नेच्छन्त्यन्ये ॥११३॥**

**श० म० न्यासानुसन्धानम्– पर्य०** । अनेन वाऽने– **पर्येषणा, अध्येषणा,** पक्षे श्रादित्वात् क्तौ– **परीष्टिः, अधीष्टिः,** अत्र मतान्तरमाह– **अधीष्टिरिति नेच्छन्त्यन्ये** इति– पाणिनीये हि "परेर्वा" इत्येतावदेव वार्तिकं दृश्यते, तथा च तन्मतेऽधिपूर्वान्नित्यमेव पूर्वसूत्रेणान इत्येकमेव रूपमिति ॥ ५. ३. ११३. ॥

## क्रुत्-संपदादिभ्यः क्विप् । ५. ३. ११४. ॥

**त० प्र०– क्रुधादिभ्योऽनुपसर्गपूर्वेभ्यः पदादिभ्यश्च समादिपूर्वेभ्यो धातुभ्यः स्त्रियां भावाऽकर्त्रोः क्विप् प्रत्ययो भवति । क्रुधः– क्रुत् । युधेः–युत् । क्षुधेः– क्षुत् । तृषेः– तृट् । त्विषेः– त्विट् । रुषेः– रुट् । रुजेः–रुक् । रुचेः–रुक् । शुचेः–शुक् । मुदेः–मुत् । मृदेः–मृत् । गृ–गीः । त्रै–त्राः । दिशेः–दिक् । सृजेः–स्रक् । तथा पदेः–संपद्, विपद्, आपद्, व्यापद्, प्रतिपद् । षद्लृ – संसत्, परिषत्, उपसत्, उपनिषत् । विदेः–निवित् । शासेः–प्रशीः, आशीः । श्रु–प्रतिश्रुत्, उपश्रुत् । स्नु–परिस्नुत् । नहेः–उपानत् । वृषेः–प्रावृट् ।**

**प्रुषेः-विप्रुट्। वृतेः-नीवृत्, उपावृत्। यतेः-संयत्। इणः-समित्। भृगः-उपभृत्। इन्धेः-समित्। क्रुधादिः संपदादिश्चाकृतिगणः ॥११४॥**

**श० म० न्यासानुसन्धानम्- क्रुत्०।** पदादीनां सोपसर्गाणां पृथगुपादानात् क्रुधादीनामनुपसर्गाणामेव ग्रहणमित्याह- **क्रुधादिभ्योऽनुपसर्गपूर्वेभ्यः** इति। "क्रुधंच् कोपे" अतः क्विपि तस्य सर्वापहारे [ लोपे ] "विरामे वा" [ १. ३. ५१. ] इति धस्य वा ते- **क्रुत्**। "युधिंच् संप्रहारे" इत्यस्य- **युत्**। "क्षुधंच् बुभुक्षायाम्" इत्यस्य- **क्षुत्**। "ञितृषच् पिपासायाम्" इत्यस्य- **तृट्**, अत्र षस्य टवर्गीयः प्रथमः। "त्विषि दीप्तौ" इत्यस्य- **त्विट्**। "रुषच् रोषे" इत्यस्य- **रुट्**। "रुचि अभिप्रीत्यां च" चकाराद् दीप्तौ, अस्य- **रुक्**, अत्र "चजः कगम्" [२. १. ८६.] इति चस्य कत्वम्। "शुच शोके" अस्य- **शुक्**। "मुदि हर्षे" अस्य- **मुत्**। "मृदश् क्षोदे" अस्य- **मृत्**। "गॄत् निगरणे" "गॄश् शब्दे" अतः क्विपि "ॠतां०" [ ४. ४. ११६. ] इतीरादेशे "पदान्ते" [ २. १. ६४. ] इति दीर्घे विसर्गे च- **गीः**। "त्रैं पालने" अस्य- **त्राः**, अत्र "आत् सन्ध्यक्षरस्य" [ ४. २. १. ] इत्यात्वम्। "दिशींत् अतिसर्जने" अतिसर्जनं त्यागः, अस्य- **दिक्**, अत्र "ऋत्विज्०" [ २. १. ६९. ] इति षापवादे गत्वे तस्य कत्वं विज्ञेयम्। "सृजिंच् विसर्गे" अस्य- **स्रक्**, अत्र कर्मणि क्विपि "ऋत्विज्०" [ २. १. ६९. ] इत्यत्र 'स्रज्' इति निर्देशात् ऋतो रे जस्य गे तस्य कत्वं विज्ञेयम्। अनुपसर्गात् क्विपमुदाहृत्याथ सोपसर्गादुदाहर्तुमाह- **तथेति**। "पदिंच् गतौ" सोपसर्गादतः क्विपि- **संपद्, विपद्, आपद्, व्यापद्, प्रतिपदिति**। "षद्लृं विशरणगत्यवसादनेषु" सोपसर्गादतः क्विपि- **संसद्, परिषद्, उपसद्, उपनिषदिति**- 'परिषद् उपनिषद्' इत्यत्र "सदोऽप्रतेः०" [ २. ३. ४४. ] इत्यनेन सस्य षः। "विदक् ज्ञाने" निपूर्वादतः क्विपि- **निवित्**। "शासूक् अनुशिष्टौ" सोपसर्गादतः क्विपि "क्वौ" [ ४. ४. ११९. ] "आङः" [ ४. ४. १२०. ] इत्यास इसादेशे "पदान्ते" [ २. १. ६४. ] इति दीर्घे विसर्गे च- **प्रशीः, आशीः**। "श्रुंट् श्रवणे" अस्य- **प्रतिश्रुत्, उपश्रुत्**। "स्रुं गतौ" अस्य- **परिस्रुत्** इति- त्रिष्वपि "ह्रस्वस्य तः पित्कृति" [ ४. ४. ११३. ] इति तागमः। "णहींच् बन्धने" उपपूर्वादतः क्विपि "गति०" [ ३. २. ८५. ] इति दीर्घे "नहाहोर्धतौ" [ २. १. ८५. ] इति हस्य धे तस्य च ते- **उपानत्**। "वृषू सेचने" प्रवर्षन्ति मेघा अत्रेति- **प्रावृट्**, अत्र "गतिकारकस्य०" [ ३. २. ८५. ] इति दीर्घः, षस्य च डत्वे टत्वे च- प्रावृड्। "प्रुषू दाहे" विपूर्वादतः क्विपि- **विप्रुट्**। "वृतूङ् वर्तने" अतः क्विपि दीर्घे च- **नीवृत्, उपावृत्**। "यतैङ् प्रयत्ने" अस्य- **संयत्**। "इण्क् गतौ" सम्पूर्वादतः क्विपि तागमे च- **समित्**। "भृंग् भरणे" अतः क्विपि तागमे च- **उपभृत्**। "इन्धैपि दीप्तौ" सम्पूर्वादतः क्विपि "नो व्यञ्जनस्या०" [ ४. २. ४५. ] इति नकारलोपे च- **समित्**। समाहारनिर्देशेन एकवचनेन निर्वाहे सत्यपि बहुवचनेन निर्देश आकृतिगणार्थ इत्याह- **क्रुधादिः सम्पदादिश्चाकृतिगणः** इति ॥ ५. ३. ११४. ॥

## स्यादिभ्यो वा । ५. ३. ११५. ॥

**त० प्र०- बिभेत्यादिभ्यो धातुभ्यः स्त्रियां भावाकर्त्रोः क्विप् वा भवति। भीः, भीतिः। ह्रीः, ह्रीतिः। लूः, लूनिः। भूः, भूतिः। कण्डूः, कण्डूया। कृत्, कृतिः। भित्, भित्तिः। छित्, छित्तिः। तुत्, तुत्तिः। वृक्, वृष्टिः। नशेः-नक्, नष्टिः। युजेः-युक्, युक्तिः। ज्वरेः-जूः, जूतिः। त्वरेः-तूः, तूतिः। अवतेः-ऊः, ऊतिः। श्रिवेः-श्रूः, श्रूतिः। मवतेः-मूः, मूतिः। नौतेः-नुत्, नुतिः। शकेः- शक्, शक्तिः ॥११५॥**

**श० म० न्यासानुसन्धानम्- स्यादि०।** "ञिभींक् भये" अतोऽनेन वा क्विपि तस्य लोपे च- **भीः**, पक्षे स्त्रियां क्तौ- **भीतिः**। "ह्रींक् लज्जायाम्" अस्य- **ह्रीः**, **ह्रीतिरिति** पाठो दृश्यते बृहद्वृत्तौ, पारायणेऽभिधानचिन्तामणिवृत्तौ च क्रुत्सम्पदादित्वान्नित्यं क्विप् दर्शितो न तु क्विपो विकल्पनं क्तिर्वेति लेखककृतप्रमादः कारणान्तरं वाऽन्वेषणीयं सुधीभिरत्र। "लूगश् छेदने" अस्य क्वौ- **लूः**, क्तौ च "ॠल्वादेः०" [ ४. २. ६८. ] इति तकारस्य ने-**लूनिः**। "भू सत्तायाम्" अस्य **भूः, भूतिः**। "कण्डूग् गात्रविकर्षणे" अतः स्वार्थे यकि 'कण्डूय' इत्यतः

क्विपि अकारयकारयोर्लोपे– **कण्डूः**, "शंसि-प्रत्ययात्" [ ५. ३. १०५. ] इत्यप्रत्यये– **कण्डूया**, स्त्रियां क्तौ तु अकारयकारलोपे– कण्डूतिरित्यभिधानचिन्तामणिवृत्तौ। अत्रेत्थं लघुन्यासे– "नन्वत्र ये क्विबन्तास्ते क्रुधादिगणे पठिष्यन्ते, क्त्यन्तास्तु श्रुवादौ किमनेन, सत्यम्– कण्डूयेति तृतीयरूपार्थम्। एषु सर्वेषु स्त्रियां क्तिः" इति। कण्डूः कण्डूतिरित्यत्र "अतः" [४. ३. ८२.] इत्यल्लोपः, "य्वोः प्वय्व्यञ्जने" [ ४. ४. १२१. ] इत्यनेन च यलोपो विज्ञेयः। करोतेः क्विपि तागमे च– **कृत्**, क्तौ तु– **कृतिः**। भिदेः– **भित्, भित्तिः**। छिदेः– **छित्, छित्तिः**। "तुदींत् व्यथने" अस्य– **तुत्, तुत्तिः**, "अघोषे प्रथमो०" [ १. ३. ५०. ] इति दस्य तः। "दृशं प्रेक्षणे" अतः क्विपि "ऋत्विज्०" [२. १. ६९.] इति शस्य गत्वे कत्वे च– **दृक्**, क्तौ तु "यज-सृज०" [ २. १. ८७. ] इति शस्य षत्वे तद्योगे तकारस्य टे– **दृष्टिः**। "नशौच् अदर्शने" अतः क्विपि "नशो वा" [ २. १. ७०. ] इति शस्य वा गत्वे कत्वे च– **नक्**, क्तौ तु शस्य षत्वे तकारस्य टत्वे च– **नष्टिः**। "युजिच् समाधौ" अस्य– **युक्, युक्तिरिति**– "चजः कगम्" [ २. १. ८६. ] इति जस्य गत्वे कत्वं विज्ञेयम्। "ज्वर रोगे" अतः क्विपि "मव्यवि-श्रिवि-ज्वरि-त्वरे-रुपान्त्येन" [ ४. १. १०९. ] इत्युपान्त्येन सह वस्योटि विसर्गे च– **जूः**, क्तौ च– **जूर्तिः**। एवं– "ञित्वरिष् सम्भ्रमे" इत्यस्य– **तूः, तूर्तिः**। "अव रक्षणादौ" इत्यस्य– **ऊः, ऊतिः**। "श्रिवूच् गति-शोषणयोः" इत्यस्य– **श्रूः, श्रूतिः**। "मव बन्धने" इत्यस्य– **मूः, मूतिः**। **"पवतेः– पूः, पूतिः"** इति क्वचित् पाठः, तत्र "पूङ् पवने" इति धातुः। "णुक् स्तुतौ" अतः क्विपि तागमे च– **नुत्**, क्तौ– **नुतिः**। "शकींच् मर्षणे" मर्षणं क्षमा, "शक्लृंट् शक्तौ"– **शक्, शक्तिः** ॥ ५. ३. ११५. ॥

---

## व्यतिहारेऽनीहादिभ्यो ञः । ५. ३. ११६. ॥

**त० प्र०– व्यतिहरणं–व्यतिहारः, परस्परस्य कृतप्रतिकृतिः। व्यतिहारविषयेभ्यो धातुभ्य ईहादिवर्जितेभ्यः स्त्रियां ञः प्रत्ययो भवति। बाहुलकाद् भावे क्त्यादीनामपवादः। परस्परमाक्रोशनं–व्यावक्रोशी, व्याक्रोशी; व्यावमोषी, व्यावहासी, व्यावलेखी, व्यातिचारी, व्यावचर्ची, व्यात्युक्षी। अनीहादिभ्य इति किम्? व्यतीहा, व्यतीक्षा, व्यतिपृच्छा, व्यवहृतिः। व्यत्युक्षेत्यप्येके। "नित्यं ञिनोऽण्" [ ५. ३. ५८. ] इति स्वार्थेऽण् वक्ष्यते, तेन केवलस्य प्रयोगो न भवति। "श्वादिभ्यः" [ ५. ३. ९२. ] इति समावेशाभिधानात्–व्यवक्रुष्टिर्व्याक्रुष्टिरित्यपि भवति। स्त्रियामित्येव-व्यतिपाको वर्तते ॥११६॥**

---

**श० म० न्यासानुसन्धानम्– व्यति०**। पदार्थमाह– **व्यतिहरणं व्यतिहारः** इति, 'वि अति' इत्येतदुपसर्गपूर्वकस्य हरतेर्विनिमयोऽर्थः, तथा चाह–**परस्परस्य कृतप्रतिकृतिरिति**– यथैकेन कृतं तथाऽपरः करोति, अन्यस्य कार्यमन्यः करोतीति यावत्, कृतस्य– अन्येनाचरितस्य कार्यस्य, प्रतिकृतिरनुकरणमिति भावः, न त्विह प्रतिकृतिशब्दः प्रतीकारपरः। अनेन सूत्रेण विहितस्य ञप्रत्ययस्य न केवलं क्तिबाधकत्वमपि तु ण्यन्तेभ्योऽनस्यापि बाधनमिष्यते, तत् साधयति–**बाहुलकात् क्त्यादीनामपवादः** इति– आदिपदेनानादेर्ग्रहणम्, तेन व्यावचर्चीत्यादावनो न भवति, क्तेरारभ्य नित्यमेव बाध्यबाधकभावः "असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [ ५. १. १६. ] इत्यत्र प्राक् क्तेरिति वचनात्। "क्रुशं आह्वानरोदनयोः" परस्परमाक्रोशनमित्यनेन ञे "नित्यं ञिनोऽण्" [ ५. ३. ५८. ] इति स्वार्थेऽणि "अणञे०" [ २. ४. २०. ] इति ङ्यां च– **व्यावक्रोशी, व्याक्रोशीति**– अत्र "य्वः पदान्तात् प्रागैदौत्" [ ७. ४. ५. ] इत्यैकारो न भवति "न ञ-स्वाङ्गादेः" [ ७. ४. ६. ] इति निषेधात्। "मुषश् स्तेये" परस्परं मोषणमिति– **व्यामोषी**। "हसे हसने" परस्परं हसनमिति– **व्यावहासी**। "लिखत् अक्षरविन्यासे" परस्परं लेखनमिति– **व्यावलेखी**। "चर भक्षणे च" चकाराद् गतौ, परस्परं चरणमिति– **व्यातिचारी**। "चर्चण् अध्ययने" परस्परं चर्चेति– **व्यावचर्ची**। "उक्ष सेचने" परस्परमुक्षणमिति– **व्यात्युक्षी**। ईहादिवर्जनप्रयोजनं पृच्छति– **अनीहादिभ्य इति किम्**इति, उत्तरयति–**व्यतीहेति**– परस्परमीहेति–व्यतीहा, "ईक्षि दर्शने" परस्परमीक्षणमिति–**व्यतीक्षा**, उभयत्र "क्तेटो०" [ ५. ३. १०६. ] इति स्त्रियामप्रत्ययः। "प्रच्छंत् ज्ञीप्सायाम्" परस्परं पृच्छेति–**व्यतिपृच्छेति**–अत्र भिदाद्यङि व्युत्। "हृंग् हरणे"

परस्परं हरणमिति स्त्रियां क्तौ– **व्यवहृतिरिति** । मतान्तरमाह– **'व्यत्युक्षा' इत्यन्ये** इति । ञ्यन्तस्याण्यन्तस्यैव प्रयोगो न केवलस्येत्याह– **"नित्यं ञ-ञिनोऽण्"** इत्यादि । अनेन किं सर्वथा क्तिप्रत्ययबाधनमेवेष्टमिति चेत् ? अत्राह– **"श्वादिभ्यः" [५. ३. ९२.] इति समावेशाभिधानात्–व्यवक्रुष्टिः, व्यावक्रुष्टिरित्यपि भवतीति**–"श्वादिभ्यः" इत्यनेन क्तिप्रत्ययविधानस्य समावेशार्थत्वस्योक्तत्वात् सोऽपि भवतीति भावः । **स्त्रियामित्येवेति**–स्त्रीत्वविशिष्टे व्यतिहारे वाच्ये एवायं प्रत्ययः, पुंस्त्वविशिष्टे तु घञेवेति भावः ।। ५. ३. ११६. ।।

## नञोऽनिः शापे । ५. ३. ११७. ।।

**त० प्र०– नञः परात् धातोः शापे गम्यमाने भावाऽकर्त्रोः स्त्रियामनिः प्रत्ययो भवति । अजननिस्ते वृषल ! भूयात्, एवमजीवनिः, अकरणिः, अप्रयाणिः, अगमनिः । नञ इति किम् ? मृतिस्ते जाल्म ! भूयात् । शापे इति किम् ? अकृतिस्तस्य पटस्य ।।११७।।**

**श० म० न्यासानुसन्धानम्–नञो०** । शापोऽनिष्टार्थाशंसनम्, आक्रोश इति यावत् । "जनैचि प्रादुर्भावे" प्रादुर्भाव उत्पत्तिः, नञ्पूर्वादतोऽनेनानौ–**अजननिस्ते वृषल ! भूयादिति**–अयथाकारिणस्ते उत्पत्तिरेव माऽस्तु, उत्पन्नस्य वाऽसत्त्वं भवतु येनानुत्पन्न इव प्रतीयेथाः, वृषलः शूद्रः, नारदस्तु–"वृषो हि भगवान् धर्मस्तस्य यः कुरुते त्वलम् । वृषलं तं विजानीयात्" इत्याह । एवं– "जीव प्राणधारणे" इत्यस्य– **अजीवनिरिति**– जीवनाभाव इत्यर्थः । "डुकृंग् करणे" इत्यस्य– **अकरणिरिति**– करणाभाव इत्यर्थः । "यांक् प्रापणे" प्रपूर्वादतोऽनौ–**अप्रयाणिरिति**–प्रयाणाभाव इत्यर्थः । "गम्लृं गतौ" इत्यस्य–**अगमनिरिति**–गमनाभाव इत्यर्थः । सर्वत्र च ङस्युक्तसमासो नञश्च 'अ' इत्यादेशः । तथा च नात्र क्तिरिति फलितमिति, प्रत्युदाहरणे तु क्तिः । पदप्रयोजनं पृच्छति– **नञ इति किमिति**, उत्तरयति– **मृतिस्ते जाल्म ! भूयादिति**– "मृत् प्राणत्यागे", जाल्मो मूर्खः, अत्र शापस्य सत्त्वेऽपि नञोऽभावान्नास्य प्रवृत्तिरिति स्त्रियां क्तिः । पुनः पृच्छति– **शाप इति किमिति**, उत्तरयति– **अकृतिस्तस्य पटस्येति**– अत्र "नञ्" [३. १. ५१.] इति समासः, नात्र शापोऽपि तु तत्त्वकथनमिति नास्य प्रवृत्तिः ।। ५. ३. ११७. ।।

## ग्ला-हा-ज्यः । ५. ३. ११८. ।।

**त० प्र०– एभ्यः स्त्रियां भावाऽकर्त्रोरनिः प्रत्ययो भवति । ग्लानिः, हानिः, ज्यानिः । म्लानिरित्यपि कश्चित् ।।११८।।**

**श० म० न्यासानुसन्धानम्– ग्ला०** । "ग्लैं हर्षक्षये" हर्षक्षयो धात्वपचयः, "आत् सन्ध्यक्षरस्य" [४. २. १.] इत्यात्वेऽनेनानौ– **ग्लानिरिति**– बलहीनतेत्यर्थः । "ओहांक् त्यागे" इत्यस्य– **हानिरिति**– अपचयः । "ज्यांश् हानौ" इत्यस्य– **ज्यानिरिति**–अपचयः । मतान्तरमाह–**म्लानिरित्यपि कश्चिदिति**– "म्लैं गात्रविनामे" गात्रविनामः कान्तिक्षयः, म्लानिर्मलिनत्वम् ।। ५. ३. ११८. ।।

## प्रश्ना-ऽऽख्याने वेञ् । ५. ३. ११९. ।।

**त० प्र०– प्रश्ने आख्याने च गम्यमाने स्त्रियां भावाऽकर्त्रोर्धातोरिञ् प्रत्ययो वा भवति, वावचनाद् यथाप्राप्तं च । कां त्वं कारिमकार्षीः ?, कां कारिकां, कां क्रियां, कां कृत्यां, कां कृतिम् । आख्याने– सर्वां कारिमकार्षम्, सर्वां कारिकां, सर्वां क्रियां, सर्वां कृत्यां, सर्वां कृतिम् । कां त्वं गणिमजीगणः ?, कां गणिकां, कां गणनाम्; सर्वां गणिमजीगणम्, सर्वां गणिकाम्, सर्वां गणनाम् । एवं– पाचिं पाचिकां पक्तिं पचाम्, पाठिं पाठिकां पठितिम् । प्रश्ना-ऽऽख्यान इति किम् ? कृतिः, हृतिः ।।११९।।**

**श० म० न्यासानुसन्धानम्– प्रश्ना०** । 'प्रश्नाख्याने' इति व्याचष्टे– **प्रश्ने आख्याने च गम्यमाने** इति– द्वन्द्वसमासोऽत्र न तु षष्ठीतत्पुरुष इति भावः, आख्यानमिह प्रश्नोत्तरं प्रश्नशब्दसमभिव्याहारात् । क्तेरारभ्य [ स्त्र्यधिकारे ] नित्यमेव बाध्यबाधकभावस्य सम्मततया वाग्रहणाभावेऽयमेव स्यान्नान्ये प्रत्यया इति वाग्रहणेन तेषामप्यनुशासनमिति सूत्राशयमाह– **वावचनाद् यथाप्राप्तमिति** । स्त्र्यधिकारस्थानामेवानुमतत्वं नान्येषां स्त्रीत्वविवक्षायामन्येषां बाधनादिति तानेवोदाहरति– **कां त्वं कारिमित्यादिना**, "डुकृंग् करणे" अतोऽनेन वा इञि वृद्धौ च–**कां त्वं कारिमकार्षीः** ? इति, पक्षे "पर्याया०"

[ ५. ३. १२०. ] इति स्त्रियां णके वृद्धौ आपि च "अस्या०" [ २. ४. १११. ] इति अस्य इकारे- **कां त्वं कारिकामिति**- अकार्षीरिति सर्वत्र योज्यम् । "कृगः श च वा" [ ५. ३. १००. ] इति शः क्यप् च भवति, तत्र भावे शे "क्यः शिति" [ ३. ४. ७०. ] इति क्ये "रिः शक्याशीर्ये" [ ४. ३. ११०. ] इति ऋतो 'रि' इत्यादेशे आपि च- **क्रिया**, यदा च कर्तृभिन्नकारके शस्तदापि ऋतो रिः, ततश्च इयादेशे-**क्रियेति** समानं रूपम्, तदाह- **कां क्रियामिति**, यदा च क्यप् तदा तागमे- **कृत्येति**, **कां कृत्यामिति**, पक्षे क्तौ च- **कां कृतिमिति**, स्यादित्वात् क्विपि च- कां कृतमिति । यथा प्रश्ने तथाख्यानेऽपीत्याह- **आख्याने-सर्वां कारिमकार्षम्, सर्वां कारिकाम्, सर्वां क्रियाम्, सर्वां कृत्याम्, सर्वां कृतिमिति** । एवं "गणण् संख्याने" इत्यदन्तश्चुरादिः, अतो णिचि "अतः" [ ४. ३. ८२. ] इत्यकारलोपेऽपि तस्य स्थानिवद्भावेनोपान्त्यवृद्ध्यभावे 'गणि' इत्यत इञि णिलोपे च- **कां त्वं गणिमजीगणः ?** इति, णके- **कां गणिकाम्**, "णि-वेत्त्या०" [ ५. ३. १११. ] इत्यने- **कां गणनामिति** प्रश्नः, प्रतिवचने च तथैवेत्याह- **सर्वां गणिमजीगणम्, सर्वां गणिकाम्, सर्वां गणनामिति** । "डुपचींष् पाके" अत इञि णके चोपान्त्यवृद्धौ- **पाचिं पाचिकामिति**, स्त्रियां भावे तु "गा-पा०" [ ५. ३. ९५. ] इति किरेवेति- **पक्तिम्**, "षितोऽङ्" [ ५. ३. १०७. ] इत्यङि पच्यतेऽसाविति पचा,तां-**पचाम्** । "पठ व्यक्तायां वाचि" अत इञि णके चोपान्त्यवृद्धौ- **पाठिं पाठिकाम्**, क्तौ "तेर्ग्रहादिभ्यः" [ ४. ४. ३३. ] इतीटि- **पठितिमिति** । पदकृत्यं पृच्छति- **प्रश्नाख्यान इति किमिति**, उत्तरयति- **कृतिः, हृतिरिति**- प्रश्नाख्यानयोरभावादत्र नास्य प्रवृत्तिरित्यर्थः ॥ ५. ३. ११९. ॥

## पर्यायाऽर्हर्णोत्पत्तौ च णकः । ५. ३. १२०. ॥

**त० प्र०- एष्वर्थेषु प्रश्नाऽऽख्यानयोश्च गम्यमानयोः स्त्रियां भावाऽकर्त्रोर्धातोर्णकः प्रत्ययो भवति । क्त्याद्यपवादः । पर्यायः- क्रमः परिपाटिरिति यावत् । भवत आसिका, भवतः शायिका, भवतोऽग्रगामिका; आसितुं शयितुमग्रे गन्तुं च भवतः क्रम इत्यर्थः । अर्हणमर्हः- योग्यता । अर्हति भवान् इक्षुभक्षिकाम्, ओदनभोजिकाम्, पयःपायिकाम् । ऋणं- यत् परस्मै धार्यते । इक्षुभक्षिकां मे धारयसि । उत्पत्तिर्जन्म, इक्षुभक्षिका मे उदपादि । प्रश्ने- कां त्वं कारिकामकार्षीः ? कां त्वं गणिकामजीगणः?, आख्याने-सर्वां कारिकामकार्षम्, सर्वां गणिकामजीगणम् । बहुलाधिकारात् क्वचिन्न भवति-चिकीर्षा, बुभुक्षा मे उदपादि । प्रश्नाऽऽख्यानयोगेऽपि पर्यायादिषु परत्वात् णक एव भवति, नेञ् ॥१२०॥**

**श० म० न्यासानुसन्धानम्- पर्या०** । चकारेण प्रश्नाख्यानयोरनुकर्ष इत्याह- **प्रश्नाख्यानयोरिति** । **क्त्यादीनामपवाद** इति- आदिपदेनाकारादीनां संग्रहः । परितः सर्वतोऽयनं क्रियाया इति व्युत्पत्त्या पर्यायशब्दस्य परिपाटीपरत्वमित्याह- **पर्यायः क्रमः परिपाटिरिति यावदिति** । परिपाटिक्रमे हि सा क्रिया नैकत्र सर्वदा तिष्ठति, किन्तु परिभ्रमति, यथासमयं सा क्रिया तदर्थं नियतैः सर्वैरेव कर्तव्या भवतीति भावः । "आसिक् उपवेशने" अतोऽनेन स्त्रियां णके आपि "अस्या०" [ २. ४. १११. ] इत्यकारस्य इत्वे च- **भवत आसिका,** "कर्तरि" [ २. २. ८६. ] इति कृतः कर्तरि षष्ठी, एतावत्कालं मयाऽन्येन वाऽऽसनमधिष्ठितमिदानीं भवतः क्रमः प्राप्त इत्यर्थः । आदौ आसनं ततः शयनं ततो गमनमित्यर्थ इति केचित् । एवं- "शीङ्क् शये" अतो णके वृद्धावापि इत्वे च- **भवतः शायिका,** "गम्लृं गतौ" अतो णके उपान्त्यवृद्धावापि इत्वे च- गामिका, अग्रस्य गामिकेति "कृति" [ ३. १. ७७. ] इति समासे च- **भवतोऽग्रगामिकेति** । उक्तोदाहरणेषु पर्यायार्थं दर्शयति- **आसितुं शयितुं गन्तुं च भवतः क्रम इत्यर्थः** । अर्हपदार्थं व्याख्याति- **अर्हणमर्हः-योग्यता** । "भक्षण् अदने" इति चुरादिः, अतो णिचि णके णिलोपे आपि इत्वे च भक्षिका, इक्षूणां भक्षिकेति प्राग्वत् समासे- **अर्हति भवान् इक्षुभक्षिकाम्,** एवं-"भुजंप् पालनाभ्यवहारयोः" अतो णके उपान्त्यगुणे आपि इत्वे च- भोजिका, प्राग्वत् समासे- **ओदनभोजिकामिति**- अत्रापि 'भवानर्हति' इति योज्यम् । "पां पाने" अतो णके आत ऐकारे आयादेशे आपि इत्वे च- पायिका, पयसः पायिकेति प्राग्वत् समासे- **पयःपायिकामिति**- अत्रापि 'अर्हति भवान्'

इति योज्यम् । इक्षुभक्षणयोग्य ओदनभोजनयोग्यः पयःपानयोग्यश्च भवानित्यर्थः । ऋणपदार्थं व्याचष्टे– **ऋणं यत् परस्मै धार्यते** इति– परस्मै इत्यत्र "रुचि-कृप्त्यर्थधारिभिः" [ २. २. ५५. ] इति चतुर्थी, धनिकात् कलादिना ग्राह्यमुद्धारद्रव्यमिति भावः । तत्र– **इक्षुभक्षिकां मे धारयसी**ति– इक्षुभक्षणमृणत्वेन धारयतीत्यर्थः । उत्पत्तिपदार्थं ग्राहयति– **उत्पत्तिर्जन्मे**ति । **इक्षुभक्षिका मे उदपादी**ति– उत्पन्नेत्यर्थः । प्रश्ने प्रतिपदे च प्राग्वद्भावना । बहुलाधिकारस्य प्रकृते फलं दर्शयति– **बहुलाधिकारात् क्वचिन्न भवति– चिकीर्षा, बुभुक्षा मे उदपादी**ति– अत्र सत्यपि स्वविषये नास्य प्रवृत्तिरिति "शंसिप्रत्ययात्" [ ५. ३. १०५. ] इति स्त्रियामः प्रत्ययः । **प्रश्नाख्यानयोगेऽपि पर्यायादिषु परत्वाण्णक एव भवति, नेञ्** इति, अयमाशयः– प्रश्नाख्यानयोः पर्यायादीनां च व्याप्यव्यापकभावो नास्ति, प्रश्नाख्यानभिन्नेऽपि पर्यायादीनां सत्त्वात्, एवं पर्यायाद्यभावेऽपि प्रश्नाख्यानयोः सत्त्वात्, अतो न सामान्यविशेषभावनिमित्ता व्यवस्था सम्भविनीति द्वयोः समबलत्वेन स्पर्धस्य सत्त्वात् परत्वमूलिकैव व्यवस्थेति 'कदा भवत आसिका' इत्यादिप्रश्ने 'अद्य ममासिका' इत्युत्तरे च णक एवेति ॥ ५. ३. १२०. ॥

## नाम्नि पुंसि च । ५. ३. १२१. ॥

**त० प्र०– धातोः स्त्रियां भावाऽकर्त्रोर्नाम्नि– संज्ञायां णकः प्रत्ययो भवति, यथादर्शनं पुंसि च । प्रच्छर्दनं प्रच्छर्द्यतेऽनयेति वा– प्रच्छर्दिका, एवं– प्रवाहिका, विचर्चिका, प्रस्कन्दिका, विपादिका, एता रोगसंज्ञाः । उद्दालकपुष्पाणि भज्यन्ते यस्यां सा– उद्दालकपुष्पभञ्जिका, एवं– वारणपुष्पप्रचायिका, अभ्योषाः खाद्यन्तेऽस्यामिति–अभ्योषखादिका, एवमवोषखादिका; साला भज्यन्ते यस्यां सा– सालभञ्जिका, एवंनामानः क्रीडाः । बहुलाधिकारादिह न भवति–शिरसोऽर्दनं–शिरोर्तिः, एवं–शीर्षार्त्तिः, शिरोऽभितप्तिः, शीर्षाभितप्तिः, तथा चन्दनतक्षा क्रीडा । बहुलाधिकारादेव चार्तिरित्यत्रार्दतेरर्दयतेश्च यथाक्रममप्रत्ययमनप्रत्ययं च बाधित्वा क्तिरेव भवति । पुंसि च– अरोचनं न रोचतेऽस्मिन्निति वा– अरोचकः, अनाशकः, उत्कन्दकः, उत्कर्णकः ॥१२१॥**

**श० म० न्यासानुसन्धानम्– नाम्नि०** । "छर्दण् वमने" प्रपूर्वादितो णके– भावे प्रच्छर्दनमिति वाक्ये, करणे च प्रच्छर्द्यतेऽनयेति वाक्ये च– प्रच्छर्दिका, तदाह– **प्रच्छर्दनं प्रच्छर्द्यतेऽनयेति वा– प्रच्छर्दिके**ति– अत्र स्त्रियां णके स्वार्थिकणिचो लोपे आपि अत इत्वं विज्ञेयम् । एवं– "वहीं प्रापणे" प्रवहणं प्रोह्यतेऽनया वेति– **प्रवाहिके**ति– अत्र णके उपान्त्यवृद्धिः । "चर्चण् अध्ययने" विचर्चनं विचर्च्यतेऽनया वेति– **विचर्चिके**ति । "स्कन्दृं गतिशोषणयोः" प्रस्कन्दनं प्रपतनं, प्रस्कद्यतेऽनयेति वा– **प्रस्कन्दिका** । "पदिच् गतौ" विपदनं विपद्यतेऽनया वेति– **विपादिका** । उक्तानां संज्ञात्वं दर्शयति– **एता रोगसंज्ञा** इति– यस्मिन् रोगे वमनं भवति, स प्रच्छर्दिका, एवं यस्मिन् रोगे मलप्रवहणं भवति स प्रवाहिका, यत्र पामा भवति स विचर्चिका, यत्र प्रपतनं भवति स प्रस्कन्दिका, यत्र पादस्फोटो भवति स विपादिकेति भावः । क्रीडासंज्ञायां विगृह्योदाहरति– **उद्दालकपुष्पाणि भज्यन्ते यस्यां सा– उद्दालकपुष्पभञ्जिके**ति–अत्रान्यपदार्थः क्रीडा, उद्दालको वृक्षविशेषः, तस्य पुष्पाणि भज्यन्तेऽस्यामिति विग्रहे "भञ्जोंप् आमर्दने" इत्यतोऽधिकरणेऽनेन स्त्रियां णके भञ्जिकाशब्दं व्युत्पाद्य तद्योगे कर्मणि षष्ठ्या उद्दालकपुष्पाणां भञ्जिकेति "अकेन क्रीडाजीवे" [ ३. १. ८१. ] इति समासः, कस्याञ्चित् क्रीडायामुद्दालकपुष्पाणि भज्यन्ते तस्या इयं संज्ञाऽस्ति । अथवा भञ्जनं भञ्जिकेति विगृह्य पश्चादुद्दालकपुष्पाणामित्यनेन सम्बन्धात् समासः । न चैवमन्यपदार्थप्राधान्याभावेन क्रीडापरत्वं न स्यादिति नामत्वमस्य कथं स्यादिति शङ्कनीयम्, वस्तुतो भञ्जनस्यैव क्रीडात्वेनोद्दालकपुष्पाणां तद्विशेषणत्वेन षष्ठीसमासेऽपि क्रीडानामत्वाक्षतेः । मूलोक्तं तु प्रयोगार्थकथनमात्रम्, तस्मिन् विग्रहे समासाप्राप्तेः । लघुन्यासकारास्त्वेवमाहुः–"अत्र "कृति" [ ३. १. ७७. ] इति षष्ठीसमासः, उद्दालकपुष्पाणि भज्यन्ते यस्यामिति त्वर्थकथनम्, वाक्यं तु भज्यन्ते यस्यां भञ्जिका, उद्दालकपुष्पाणां भञ्जिकेति कार्यम्, न तु "अकेन क्रीडा०" [ ३. १. ८१. ] इति समासः, तेन कर्तृविहिताकान्तेन सह विधानात्, णकस्त्वनेन कर्तृवर्जं प्रवर्तते" इति । एतद्विमर्शः "अकेन क्रीडा०" इति सूत्रेऽनुसन्धाने कृत इति ततो विलोकनीयमिति । अतिदिशति– **एवं वारणपुष्पप्रचा-**

**यिके**ति– वारणपुष्पाणि प्रचीयन्तेऽस्यामित्यस्वपदविग्रहः, "चिग्ट् चयने" प्रपूर्वादतः प्राग्वत् णकादि । "अथेषत्पक्वे स्युरभ्यूषा-भ्योष-पोलयः" इति हैमः, ईषत्पक्वा ईषद् भृष्टा इत्यर्थः, खाद्यविशेषा अभ्योषाः, "खादृ भक्षणे" अभ्योषाः खाद्यन्तेऽस्यामिति अस्वपदविग्रहः, **अभ्योषखादिका** इति– प्राग्वत् णकादि । अतिदिशति–**एवम्–अवोषखादिके**ति–अवोषाः खाद्यन्तेऽस्यामित्यस्वपदविग्रहः । सालो वृक्षविशेषः, साला भज्यन्ते यस्यां सा– **सालभञ्जिका** । एषां क्रीडानामत्वमिति दर्शयति– **एवंनामानः क्रीडा** इति । सर्वत्र संज्ञात्वनिमित्तको णक एव न भवति, क्वचिदन्येऽपि प्रत्यया भवन्तीत्याह– **बहुलाधिकारादिह न भवती**ति । "अर्द गतियाचनयोः" "अर्दण् हिंसायाम्" **शिरसोऽर्दनं– शिरोऽर्तिः**, शीर्षस्यार्दनमिति– **शीर्षार्तिः**, शिरसः शीर्षस्य वाऽभितपनमिति– **शिरोऽभितप्तिः, शीर्षाभितप्तिरि**ति । **तथा चन्दनतक्षा क्रीडे**ति– चन्दनास्तक्ष्यन्ते यस्यामिति बाहुलकात् पुन्नाम्नि विहितोऽपि स्त्रियामपि "व्यञ्जनाद् घञ्" [ ५. ३. १३२. ] इति घञ् भवतीति लघुन्यासकारः । वस्तुतस्तु अर्दनमर्तिरिति संसाध्य पश्चाच्छिरःशब्दयोगेन योगमर्यादयैव तादृशरोगार्थलाभ इति न बाहुलकाश्रयणमावश्यकम्, अत एव शिरोऽर्तिः शीर्षार्तिः शिरोऽभितप्तिरिति शब्दान्तरैरपि स रोग उच्यते, न तु सर्वेषां नामत्वमेव । अत एव बाहुलकाश्रयणस्य मुख्यं प्रयोजनमाह–**बहुलाधिकारादेव चार्तिरित्यत्रार्दतेरर्दयतेश्च यथाक्रममप्रत्ययमनप्रत्ययं च बाधित्वा क्तिरेव भवती**ति– अर्द्धातुर्गुरुमान् व्यञ्जनान्तश्चेत्यप्रत्ययस्य प्राप्तिः, अर्दिर्ण्यन्त इति ण्यन्तत्वनिमित्तकस्यानस्य प्राप्तिरिति तद्बाधनं बाहुलकादेवेति भावः । स्त्रियामित्यधिकारात् तत्रैव प्राप्तेः 'पुंसि च' इत्येतत्करणस्य फलमाह– **पुंसि चे**त्यादिना, "रुचि अभिप्रीत्यां च" चकाराद् दीप्तौ, अतो भावेऽधिकरणे वा विगृह्याह– **अरोचनं न रोचतेऽस्मिन्निति वा– अरोचकः** इति । "नशौच् अदर्शने" अदर्शनमनुपलब्धिः, अनशनं न नश्यत्यस्मिन्निति वा– **अनाशकः** । "कदु क्रदु क्लदु रोदनाह्वानयोः" उत्कन्दनमुत्कन्द्यन्तेऽस्मिन् वा– **उत्कन्दकः** । लघुन्यासे तु "स्कन्द् गतिशोषणयोः" इत्यनेन साधितम्, तथाहि– "उत्स्कन्दनमुत्स्कद्यतेऽनेन वा– पृषोदरादित्वात् सलोपः" इति । "कर्णण् भेदे" इत्यस्य– **उत्कर्णकः** । एतान्यपि रोगनामान्येव ॥ ५. ३. १२१. ॥

### भावे । ५. ३. १२२. ॥

**त० प्र०–भावे–धात्वर्थनिर्देशे स्त्रियां धातोर्णकः प्रत्ययो भवति । आसिका, शायिका, कारिका । बहुलाधिकारात्– ईक्षा, ऊहा, ईहा, स्मरणा ॥१२२॥**

**श० म० न्यासानुसन्धानम्– भावे** । भावपदार्थं व्याचष्टे– **भावे धात्वर्थनिर्देशे** इति– भावः– भावना उत्पादना, सा च क्रिया, स एव च धातोरर्थः, तथा च क्रियामात्रनिर्देशेऽयं प्रत्यय इति भावः । "आसिक् उपवेशने" अतः स्त्रियां भावेऽनेन णके आपि "अस्या०" [ २. ४. १११. ] इत्यकारस्येत्वे च– **आसिका** । एवं "शीङ्क् स्वप्ने" इत्यस्य वृद्धावायादेशे च– **शायिका,** "जीव प्राणधारणे" इत्यस्य– **जीविका** । कृधातोः– **कारिका** । अयं च यद्यपि पूर्वेषां परेषां वा प्रत्ययानामपवादस्तथापि तेऽपि भवन्ति बहुलाधिकारादित्याह– **बहुलाधिकारात्– ईक्षा, ऊहा, ईहा, स्मरणे**ति– "ईक्षि दर्शने" "ऊहि तर्के" "ईहि चेष्टायाम्" एभ्यः "क्तेटो गुरोर्व्यञ्जनात्" [ ५. ३. १०६. ] इत्यप्रत्ययः स्त्रियाम् । "स्मृं चिन्तायाम्" ण्यन्तादस्मात् "णि-वेत्या०" [ ५. ३. १११. ] इति स्त्रियामने– स्मारणा, 'स्मरणा' इति पाठप्रामाण्ये तु उत्कण्ठायां घटादित्वात् ह्रस्वे– स्मरणा ॥ ५. ३. १२२. ॥

### क्लीबे क्तः । ५. ३. १२३. ॥

**त० प्र०– क्लीबे– नपुंसकलिङ्गे भावेऽर्थे धातोः क्तः प्रत्ययो भवति । घञाद्यपवादः । स्त्रियां भावाऽकर्त्रोरिति च निवृत्तम् । हसितं छात्रस्य, नृत्तं मयूरस्य, व्याहृतं कोकीलस्य, गतं मतंगजस्य । क्लीब इति किम् ? हसः, हासः ॥१२३॥**

**श० म० न्यासानुसन्धानम्– क्ली०** । 'क्लीबे' इत्यस्यार्थमाह– **नपुंसकलिङ्गे** इति, तथा च नपुंसकत्वेन धात्वर्थे विवक्षिते धातोः क्तप्रत्यय इति फलितम् । **घञाद्यपवाद** इति– आदिशब्दात् "ट्वितोऽथुः" [ ५. ३. ८३. ] इत्यादयः, ते हि सामान्यतो भावमात्रे विहिताः, अयं च विशेषेण क्लीबत्वविशिष्टे तस्मिन्निति विशेषविहिततया तदपवादत्वं सुवचमिति भावः । 'क्लीबे' इत्युक्तेः

स्त्रियामित्यस्य निवृत्तिः, नहि क्लीबत्वस्त्रीत्वयोरेकत्र समवस्थानं सम्भवि, 'भावे' इत्यस्य पूर्वमधिकृतत्वेन पूर्वानुसृतस्य भावाकर्त्रोरित्यस्य च निवृत्तिरित्याह– **स्त्रियां भावाकर्त्रोरिति च निवृत्तमि**ति । अत्रेदं विचार्यते– "तत् साप्यानाप्यात् कर्मभावे कृत्यक्तखलर्थाश्च" [ ३. ३. २१. ] इति सूत्रेणैव लिङ्गत्रयसाधारण्येन भावकर्मणोः क्तस्य विधानाद् भावे च नपुंसकत्वस्य स्वतः सिद्धत्वेन सामान्यसूत्रेणैव सिद्धे सूत्रमिदं व्यर्थमिति चेत्? अत्रोच्यते– 'भूते' इत्यधिकृत्य "क्तक्तवतू" [ ५. १. १७४. ] इत्यनेन क्तप्रत्ययविधानात् तस्यैवार्थो हि "तत् साप्यानाप्यात्०" [ ३. ३. २१. ] इत्यनेन भावकर्मणी कथिते, अनेन तु कालसामान्ये नपुंसके भावे क्तो विधीयते । यद्यपि 'क्लीबे' इत्यस्याभावेऽपि धात्वर्थरूपे भावे कस्यापि लिङ्गस्यासत्त्वेन सामान्ये नपुंसकमिति नियमान्नपुंसकत्वं प्राप्तम्, घञाद्यन्तानां भावार्थकत्वेऽपि सामान्यविहितत्वेऽपि च पुंस्त्वमनुशासनवशात्, तथापि सामान्यतो भावमात्रे विधाने घञादीनां बाधकत्वमस्य न स्यादिति तदर्थं नपुंसकत्वविशिष्टे भावे विधानमावश्यकम् । किञ्च "तत् साप्या०" इति सूत्रेणाकर्मकेभ्य एव क्तस्य भावे विधानमनेन च सकर्मकेभ्योऽपीति "गतं तिरश्चीनमनूरुसारथेः" इत्यादिप्रयोगाः सकर्मकेभ्योऽपि विहिताः । तथा चावश्यकमेवास्य पृथग्विधानमिति । "हसे हसने" अतोऽनेन क्ते "स्ताद्य०" [ ४. ४. ३२. ] इतीटि– **हसितमि**ति, **छात्रस्ये**त्यत्र "कर्तरि" [ २. २. ८६. ] इति षष्ठी । "नृतैच् नर्तने" अतः क्ते ऐदित्त्वात् "डीयश्व्यैदितः क्तयोः" [४. ४. ६१.] इतीटो निषेधे– **नृत्तमि**ति । व्याङ्पूर्वात् "हृंग् हरणे" इत्यतः क्तेऽनुस्वारेत्वात् "एकस्वरादनुस्वारेतः" [ ४. ४. ५६. ] इतीटो निषेधे– **व्याहृतमि**ति । "गम्लृं गतौ" अतः क्तेऽनुस्वारेत्वादिडभावे "यमि०" [ ४. २. ५५. ] इति मलोपे च– **गतमि**ति । पदकृत्यं पृच्छति– **क्लीब इति किमिति,** यत्र धात्वर्थस्य नपुंसकता न विवक्षिता तत्र मा भूदित्याशयेनोत्तरयति– **हसः, हासः** इति– अत्र क्लीबत्वाभावादस्याप्रवृत्त्या "नवा क्वण-यम-हस-स्वनः" [ ५. ३. ४८. ] इति वा अलि– हसः, पक्षे "भावाकर्त्रोः" [ ५. ३. १८. ] इति घञि– हासः ॥ ५. ३. १२३. ॥

## अनट् । ५. ३. १२४. ॥

**त० प्र०– क्लीबे भावेऽर्थे धातोरनट् प्रत्ययो भवति । गमनं भोजनं वचनं हसनं छात्रस्य । टकार उत्तरत्र ङ्यर्थः ॥१२४॥**

**श० म० न्यासानुसन्धानम्– अनट्** । "गम्लृं गतौ" "भुजंप् पालनाभ्यवहारयोः" "वचंक् भाषणे" "हसे हसने" एभ्योऽनटि– **गमनं भोजनं वचनं हसनं छात्रस्ये**ति । पूर्वत्रैव "क्लीबे क्तानट्" इति प्रत्ययद्वये पठितव्ये योगविभाग उत्तरत्रानड्मात्रस्यानुवृत्त्यर्थः, अन्यथोभयोरनुवृत्तिः स्यात्, अत एव टित्त्वं कृतम्, नहि नपुंसके टित्त्वस्य फलं सम्भवि, तत्र ङीप्रत्ययस्याप्राप्तेरित्याह– **टकार उत्तरत्र ङ्यर्थ** इति, एवं च नपुंसकत्वविशिष्टे भावे प्रत्ययद्वयमिदं विधानसामर्थ्याद् भवति ॥५. ३. १२४.॥

## यत्कर्मस्पर्शात् कर्त्रङ्गसुखं ततः । ५. ३. १२५. ॥

**त० प्र०– येन कर्मणा संस्पृश्यमानस्य कर्तुरङ्गस्य– शरीरस्य सुखमुत्पद्यते ततः कर्मणः पराद् धातोः क्लीबे भावेऽर्थेऽनट् भवति । पूर्वेणैव प्रत्यये सिद्धे नित्यसमासार्थं वचनम् । पयःपानं सुखम् । कर्मेति किम्? अपादानादिस्पर्शे मा भूत्– तूलिकाया उत्थानं सुखम् । स्पर्शादिति किम्? अग्निकुण्डस्योपासनं सुखम् । कर्त्रिति किम्? शिष्येण गुरोः स्नापनं सुखम्, स्नापयतेर्न गुरुः कर्ता, किं तर्हि! कर्म । अङ्गग्रहणं किम्? पुत्रस्य परिष्वञ्जनं सुखम्, पुत्रस्य स्पर्शान्न शरीरस्य सुखं, किं तर्हि! मानसी प्रीतिः, अन्यथा परपुत्रपरिष्वङ्गेऽपि स्यात् । सुखमिति किम्? कण्टकानां मर्दनम् । सर्वत्रासमासः प्रत्युदाहार्यः । अथवा तत इति सप्तम्यन्तात् तसुः, येन कर्मणा स्पृश्यमानस्य कर्तुरङ्गसुखमुत्पद्यते तस्मिन् कर्मण्यभिधेये सामर्थ्यात् कर्तुः पराद् धातोरनट् भवति, इत्यपरोऽर्थः । राज्ञा भुज्यन्ते– राजभोजनाः शालयः, राजाच्छादनाः प्रावाराः, राजपरिधानानि वासांसि ॥१२५॥**

**श० म० न्यासानुसन्धानम्– यत्कर्म०** । यत्कर्मस्पर्शादिति पदं व्याख्याति– **येन कर्मणा स्पृश्यमानस्ये**ति– कर्मणा कारकेण न तु क्रियया कर्तृपदसान्निध्यात्, कर्तरि शानस्य विधानाच्च । पूर्वसूत्रेणैवात्राप्यर्थेऽनट् स्या-

देवेति सूत्रस्य वैयर्थ्यमाशङ्क्याह–**नित्यसमासार्थं वचनमिति**, तथा चोपपदस्य पञ्चम्यन्त [ङस्यन्त] नाम्ना निर्दिष्टस्य "ङस्युक्तं कृता" [ ३. १. ४९. ] इति सूत्रेण नित्यमेव समासो विधीयते, एवं च तत्र स्वपदेन विग्रहोऽपि न भविष्यति, पयस्युपपदे पाधातोरनटि विहिते कृद्योगलक्षणषष्ठ्यां सत्यां "ङस्युक्तं कृता" इति समासः, पयः पीयत इति, पयसः पीतिरिति वा विग्रहः । यद्यपि पाधातुः सकर्मकः, भावप्रत्ययान्ताख्यातस्य च कर्मयोगो न भवति, तथापि कर्मपूर्वकाद् धातोर्भावे विधानसामर्थ्यादाख्यातेनापि विग्रहः कर्तुं शक्य इति । **पयःपानं सुखमिति**– पयसः पाने शरीरोपचयेन पानकालेऽपि तस्य जिह्वया स्पर्शात् शरीरे हर्षो जायत एवेति शरीरसुखोत्पत्तिर्नियता । स्पृश्यमानस्येति वर्तमानकालिकप्रत्ययनिर्देशाद्धि स्पर्शसमकालिकत्वं सुखस्यावश्यकमिति पूर्वोक्तं व्याख्यानमावश्यकम् । एवमोदनभोजनेनापि भाविसुखापेक्षया भोजनसमकालिकास्वादजन्यं शरीरसुखमेव प्रत्ययोत्पत्तौ निमित्तम्, अतश्चौषधस्य सेवनं सुखमिति तात्कालिककटुत्वनुभवजनकौषधरूपकर्मोपपदे सति नायं प्रत्ययः । ननु पयःपानं सुखमिति कथमस्योदाहरणं भवति ? यावता नात्र संस्पर्शात् सुखमुत्पद्यते, किं तर्हि ? अभ्यवहारात्, नैष दोषः– सर्वे हि तेऽभ्यवहारादयो न विना स्पर्शेन भवन्तीति नान्तरीयकत्वात् स्पर्शोऽत्र नापेक्ष्यते । पदकृत्यं पृच्छति– **कर्मेति किमिति**, उत्तरयति– **अपादानादिस्पर्शे मा भूत्– तूलिकाया उत्थानं सुखमिति**– उत्पूर्वात् स्थाधातोः पूर्ववदनटि "उदः स्था-स्तम्भः" [ १. ३. ४४. ] इति सलोपे– उत्थानमिति, अस्तीह कर्तुः शरीरसुखम्, न तु कर्मणा संस्पृश्यमानस्य, किं तर्हि ! अपादानेन तूलिकाख्येन । तूलिकोत्थितो हि जनः प्रातः स्वशरीरसुखमनुभवति, स्वापसमये च तदनुभवाभावादिति तूलिकायां शयनमिति न प्रत्युदाहृतम् । पुनः पृच्छति– **स्पर्शादिति किमिति**– यत्कर्मणः कर्त्रङ्गसुखमित्येव सूत्रयितव्यमिति तदाशयः, उत्तरयति–**अग्निकुण्डोपासनं सुखमिति**–"आसिक् उपवेशने" उपपूर्वः, अत्रास्पर्शात् सुखं भवति, अग्निकुण्डेनोपास्यमानेनोपस्पृश्यमानस्य तदुत्पत्तेः । अयं भावः–स्पर्शपदानुक्तौ येन कर्मणा हेतुभूतेन कर्तुः शरीरसुखमुत्पद्यत इत्यर्थः स्यात्, एवं चोपासने कर्मभूतेनाग्निकुण्डेनाप्याधेयाग्निद्वारा शरीरसुखमुत्पद्यत एवेति ततोऽपि स्यात्, तत्र च नित्यं समासः स्यात्, स्पर्शोक्तौ तु नाग्निकुण्डस्पर्शेन सुखमुत्पद्यते प्रत्युत हस्तदाहरूपं दुःखमेव, तदाधेयाग्निगुणभूतोष्णतानुभवात्, न चेह तस्या [ उष्णतायाः ] कर्मत्वमिति न भवति । पृच्छति–**कर्त्रिति किमिति**, उत्तरयति– **शिष्येण गुरोः स्नापनं सुखमिति**– "ष्णांक् शौचे" अतो णिगि "अर्तिरी०" [ ४. २. २१ ] इति प्वागमः । ननु चात्रापि गुरुः सुखस्य कर्ता भवतीत्यस्तीह कर्तुः सुखम्, तत् कथमिदं प्रत्युदाहरणं भवतीत्याह–**स्नापयतेर्न गुरुः कर्ता, किं तर्हि ? कर्मे**ति, अनेनैतद् दर्शयति–नात्र सुखापेक्षं कर्तृत्वं विवक्षितम्, किं तर्हि ? क्रियापेक्षम् । न चात्र स्नापनक्रियाया गुरुः कर्ता, किं तर्हि ! शिष्यः, तस्य च गुरुः कर्मैव भवति, कर्मसंज्ञा च गुरोः "गतिबोधार्थ०" [ २. २. ५. ] इत्यनेन, तस्याकर्मके स्नातावण्यन्ते कर्तृत्वात् । गुरोः कर्मत्वप्रतीतये शिष्येणेति कर्तुरप्यभिधानं कृतम् । अत्र च शिष्यो गुरुं स्नपयति तेन च शिष्यस्य मानसी प्रीतिरस्तु शरीरसुखं तु कर्मभूतस्य गुरोरेवेति नेहानेन प्रत्ययो भवति । ननु कर्तृग्रहणाभावे "यत्कर्मस्पर्शादङ्गसुखं ततः" इत्येतावत्सूत्रस्य कोऽर्थः स्यात्, 'येन कर्मणा' इत्यादिपूर्वोक्तस्यार्थस्यासम्भवात्, एवं च 'यस्य कर्मणः स्पर्शात्' इत्यादि कथनीयम्, तथा च गुरोः स्नापनं सुखमित्यत्र कर्मभूतस्य गुरोः स्पर्शात् तु न सुखमुत्पद्यतेऽपि तु स्नापनेन, ततः कथमिह प्रत्यय प्राप्तिरिति चेत् ? सत्यम्–यत्कर्मेति लुप्तषष्ठीकं पदम्, तथा च यस्य कर्मणः सुखमुत्पद्यते, कुतः स्पर्शात्, कस्य भावप्रत्ययान्तेनोच्यमानस्येत्यादिरीत्या व्याख्येयत्वात्, पदकृत्यप्रदर्शनावसरे प्रायस्तत्पदमात्रस्य सार्थक्यप्रदर्शनाय प्रयत्यते शास्त्रकृता, न च तदभावे सूत्रस्य का गतिरिति चिन्त्यते, तथा कृत्वैव प्राश्निकेन प्रश्नकरणात् तुष्यतुदुर्जनन्यायेन तन्मनोऽकूलसमाधानमात्रस्य तत्र मुख्यतया समाश्रयणात् । **अङ्गग्रहणं किमिति**–शरीरात्मवादिमतेऽङ्गादतिरिक्तस्य कर्तुरभावादङ्गग्रहणस्य वैयर्थ्यमेवेति प्रश्नः । शरीरात्मवादस्य बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्त्यादिभिर्युक्तिशतैर्दार्शनिकैः खण्डिततया शरीरभिन्नः कश्चन कर्ताऽस्तीति निश्चितम्, तथा च यत्र शरीरस्य सुखं नोत्पद्यते किन्तु मनसः करणभूतस्य तत्रापि सुखोत्पत्तिसत्त्वात् प्रत्ययः

स्यादिति प्रत्युदाहरति– **पुत्रस्य परिष्वञ्जनं सुखमिति**– "ष्वञ्जित् सङ्गे" परिपूर्वः, "स्वञ्जश्च" [ २. ३. ४५. ] इति सस्य षत्वम् । अत्र प्रत्युदाहरणत्वं निगमयति– **पुत्रस्य स्पर्शान्न शरीरस्य सुखं, किं तर्हि मानसी प्रीतिरिति**– शरीरस्य सुखं तदा विज्ञायेत यदि पुत्रे स्पृष्टे तद् दृश्येत, अस्पृष्टे न दृश्येत, न च तथा भवतीति न शरीरस्य सुखं ततः । न च पुत्रे स्पृष्टे रोमहर्षादिदर्शनादस्पृष्टे चादर्शनात् तत् शरीरसुखमेवेति वाच्यम्, तथा सति पुत्रमात्रस्पर्शनात् तत् सुखं दृश्येत, नहि परपुत्रस्पर्शे तद् दृश्यते, तथाहि– स्वजन्यत्वविशिष्टपुत्रस्पर्शज्ञानेन सुखमिति न शरीरस्य तत्, नहि शरीरसुखोत्पादकं वस्तु विज्ञातमेव सुखमुत्पादयति नाविज्ञातम्, अजानन्नपि हि स्वत्वादिना पयआदिवस्तूनि, तत्पानात् सुखमनुभवति शरीरं चास्योपचीयते, न तथा पुत्रस्पर्शेन, रोमहर्षादि तु ज्ञानजन्यमेव; न तत्र स्पर्शो हेतुः, अस्पृष्टेऽपि कस्मिंश्चिद् वस्तुनि दृष्टमात्रे स्मृतमात्रे वा तद्धर्षदर्शनात्, तथा च तत्र मानस्येव प्रीतिरिति । तदेव द्रढयति– **अन्यथा परपुत्रपरिष्वङ्गेऽपि स्यादिति** । पृच्छति– **सुखमिति किमिति**, उत्तरयति– **कण्टकानां मर्दनमिति**– "मृदश् क्षोदे" यद्यपि कस्यचन [उष्ट्रादेः] कण्टकानां मर्दनेऽपि सुखमुत्पद्यते, तथापि न सार्वत्रिकम्, किञ्च तस्य कण्टकभक्षणसामर्थ्यस्य ख्यातत्वेऽपि ततस्तस्य सुखमित्यस्यार्थस्यानिर्णीतत्वात् । प्रत्यये विशेषाभावेन प्रत्युदाहरणे यो विशेषस्तमाह– **सर्वत्रासमासः** इति– प्रत्युदाहार्यः, अनेनानटि विहिते सति "ङस्युक्तं कृता" [ ३. १. ४९. ] इति नित्यं समासो भवति, पूर्वेणानटि तु तत्र "ङस्युक्तोपपदत्वाभावात् "ङस्युक्तं कृता" इत्यस्य प्राप्तिरेव न, किन्तु "कृति" [ ३. १. ७७. ] इति वा समासः स्यादिति पक्षे समासाभावो वाक्यं भवतीत्यर्थः, न तु सर्वथा समासाभावो नवा पूर्वेणानटोऽभावः प्रत्युदाहरणेष्विति भावः । इष्टानां केषांचित् प्रयोगाणां साधनाय प्रकारान्तरेण सूत्रं व्याचष्टे– **अथवा तत इति सप्तम्यन्तात् तसुरिति**– पूर्वं पञ्चम्यन्तात् तसुर्व्याख्यातः, अधुना सप्तम्यन्तात् व्याख्यायते, तसोः सम्भवस्याद्यन्तेभ्यो दर्शनात् । तथा च नेदमुपपदपरामर्शकमपि त्वर्थपरामर्शकम्, ततश्च 'भावे' इति न सम्बध्यते, एवं च योऽर्थः सम्पन्नस्तमाह– **येन कर्मणा स्पृश्यमानस्य कर्तुरङ्गसुखमुत्पद्यते तस्मिन् कर्मण्यभिधेये** इति । अत्र ङस्युक्तत्वं [ उपपदत्वं ] कस्यापि न सूत्रेण प्रतिपादितम्, ङस्युक्तेन सह [उपपदेन सह] नित्यसमासार्थं वचनमिति पूर्वमुक्तम्, ततश्च कस्य ङस्युक्तत्व [ उपपदत्व ]मित्याशङ्कायामाह– **सामर्थ्यात् कर्तुः परात् धातोरिति**– सूत्रे कर्तृकर्मणी एवोपात्ते, तत्र कर्माऽभिधेयतया नोपपदीभवितुमर्हति, आवश्यकं च किञ्चिदुपपदमन्यथा सूत्रस्य वैयर्थ्यप्रसङ्गादिति सूत्रारम्भसामर्थ्यात् कर्तैवात्रोपपदमित्यास्थेयमिति भावः । द्विधाऽपि सूत्रार्थो दर्शितोऽन्यत्र । अत्रार्थे विगृह्योदाहरति– **राज्ञा भुज्यन्ते–राजभोजनाः शालयः** इति–ओदनमन्तरा प्रभूतेऽपि भुक्ते न देहतृप्तिरिति ओदनात् [ शालेः ] कर्तुरङ्गसुखम्, ङस्युक्तप्रकरणपठितत्वात् ङस्युक्तस्य च सामर्थ्यप्रापितत्वादुपपदसमासः [ ङस्युक्तं कृतेति समासः ] । एवं– राज्ञा आच्छाद्यन्ते– **राजाच्छादनाः प्रावाराः**, राज्ञा परिधीयन्ते–**राजपरिधानानि वासांसि** ॥५. ३. १२५.॥

## रम्यादिभ्यः कर्तरि । ५. ३. १२६. ॥

**त० प्र०–रम्यादिभ्यो धातुभ्यः कर्तर्यनट् भवति । रम्-रमणी । नन्द्-नन्दनी । कम्-कमनी । ह्लाद्-ह्लादनी । व्रश्च्-इध्मव्रश्चनः । शातिः-पलाशशातनः । बहुवचनं प्रयोगानुसरणार्थम् ॥१२६॥**

**श० म० न्यासानुसन्धानम्– रम्या०** । "रमि क्रीडायाम्" अन्तर्भावितण्यर्थोऽयं सकर्मकः, रमते [ रमयति चित्तम् ] इति अनटि टित्वात् स्त्रियां ङीप्रत्यये– **रमणी** । एवं–"टुनदु समृद्धौ" नन्दतीति– **नन्दनी** । "कमूङ् कान्तौ" कान्तिरभिलाषः, कामयते इत्यनेन– **कमनीति**–अत्र "अशवि ते वा" [ ३. ४. ४. ] इत्यनेन "कमेर्णिङ्" [ ३. ४. २. ] इति णिङो विकल्पनात् णिङभावे रूपमिदम्, णिङि तु "मोऽकमि०" [ ३. ४. २. ] इत्यत्र कमो वर्जनादुपान्त्यस्य ह्रस्वाभावे– कामनीति स्यात् । "ह्लादैङ् सुखे च" चकारात् शब्दे, ह्लादते इति– **ह्लादनी** । "ओव्रस्चौत् छेदने" वृश्चतीति– व्रश्चनः, इध्मानां व्रश्चनः– **इध्मव्रश्चनः**, "कृति" [ ३. १. ७७. ] इति समासः । "शद्लृं शातने" शातनं तनूकरणम्, अतो णौ "शदिरगतौ शात्" [ ४. २. २३. ]

इति शतादेशे– **शातिरिति** ण्यन्तो धातुः, शातयतीति शातनः, पलाशानां शातनः– **पलाशशातनः,** प्राग्वत् समासः। "रम्यादेः" इत्येकवचनेनैव निर्वाहे बहुवचनस्य वैयर्थ्यमाशङ्क्याह– **बहुवचनं प्रयोगानुसरणार्थमिति**– यत्र कर्तर्यनट् दृश्यते न च तत्पाठो रम्यादौ दृष्टः सोऽपि गणान्तःपातित्वेन परिगणनीय इति भावः ॥ ५. ३. १२६. ॥

## कारणम् । ५. ३. १२७. ॥

**त० प्र०– कृगः कर्तर्यनट् वृद्धिश्च निपात्यते । करोतीति– कारणम् । कर्तरीति किम् ? करणम् ॥१२७॥**

**श० म० न्यासानुसन्धानम्– कारणमिति**– निपातनसूत्रम्, किं निपात्यमित्याह– **कृगः** इत्यादि, करणाधिकरणयोस्त्वनटि करणमित्येव भवति ॥ ५. ३. १२७. ॥

## भुजि-पत्यादिभ्यः कर्माऽऽपादाने । ५. ३. १२८. ॥

**त० प्र०– भुज्यादिभ्यः पत्यादिभ्यश्च धातुभ्यो यथासंख्यं कर्मण्यपादाने चानट् भवति । भुज्यते इति– भोजनम् । निरदन्ति तदिति निरदनम् । आच्छादि– आच्छादनम् । अवस्रावि– अवस्रावणम् । अवसिच्– अवसेचनम् । अस्– असनम् । वस्– वसनम् । आभृग्– आभरणम् । अपादाने, पत्– प्रपतत्यस्मादिति– प्रपतनः । स्कन्दि– प्रस्कन्दनः । श्च्योति– प्रश्च्योतनः । झृष्– निर्झरणः । धृ– शङ्खोद्धरणः । दाग्– अपादानम् । बहुवचनं प्रयोगानुसरणार्थम् ॥ १२८ ॥**

**श० म० न्यासानुसन्धानम्–भुजि०** । पूर्वं तावत् कर्मणि विगृह्योदाहरति– **भुज्यते इति– भोजनमिति**– "भुजंप् पालनाभ्यवहारयोः" इति धातुरुपान्त्यगुणश्च । **निरदन्ति तदिति–निरदनमिति**–"अदंक् भक्षणे" निर्पूर्वादत्रापि कर्मणि अनट् । आङ्पूर्वात् "छदण् संवरणे" इत्यतो णिचि उपान्त्यवृद्धौ **'आच्छादि'** इति ण्यन्तो धातुः, ततोऽनेनानटि णिचो लोपे च– **आच्छादनमिति**, आच्छाद्यते इति वाक्यम्, आच्छादयन्ति तदिति वा । अवपूर्वात् "स्रुं गतौ" इत्यतः प्रयोक्तृव्यापारे णिगि वृद्धावावादेशे च **"अवस्रावि"** इति ण्यन्तो धातुः, अवस्रावयन्ति तदिति–**अवस्रावणम्** । "षिचींत् क्षरणे" अवसिञ्चन्ति तदिति– **अवसेचनम्** । "असूच् क्षेपणे" अस्यन्ति तदिति– **असनम्** । "वसिक् आच्छादने" वसते तदिति–**वसनम्** । "डुभृंग्क् पोषणे च" चकाराद् धारणे, आबिभ्रति तदिति– **आभरणम्** । अथापादाने पत्यादेरुदाहर्तुमाह–**अपादाने** इति । "पत्लृ गतौ" **प्रपतत्यस्मादिति-प्रपतनः**। "स्कन्दृं गतिशोषणयोः" प्रस्कन्दत्यस्मादिति– **प्रस्कन्दनः** । "श्च्युतृ क्षरणे" प्रश्च्योतत्यस्मादिति– **प्रश्च्योतनः** । "झृष्च् जरसि" निर्झीर्यत्यस्मादिति– **निर्झरः** । "धृंग् धारणे" उद्धरत्यस्मादिति–उद्धरणः, शङ्खानामुद्धरणः–**शङ्खोद्धरणः,** "कृति" [ ३. १. ७७. ] इति समासः । "डुदांग्क् दाने" अपाददात्यस्मादिति– **अपादानम्** । 'भुजि-पत्यादेः' इत्येकवचनेनापि सिद्धे बहुवचनस्य विफलतामाशङ्क्याह– **बहुवचनं प्रयोगानुसरणार्थमिति**– यत्र कर्मणि अपादाने वाऽनट् दृश्यते न च तत्पाठो भुजि-पत्यादिषु दृष्टः सोऽपि गणान्तःपातित्वेन परिगणनीय इति भावः ॥ ५. ३. १२८. ॥

## करणाऽऽधारे । ५. ३. १२९. ॥

**त० प्र०– करणाऽऽधारयोरर्थयोर्धातोरनट् भवति । घञाद्यपवादः । करणे–एषणी, लेखनी, विचयनी, इध्मव्रश्चनः, पलाशशातनः, अविलवनः, श्मश्रुकर्तनः । आधारे- गोदोहनी, सक्तुधानी, तिलपीडनी, शयनम्, आसनम्, अधिकरणम्, आस्थानम् ॥१२९॥**

**श० म० न्यासानुसन्धानम्–कर० । घञाद्यपवादः** इति– ते हि "भावाकर्त्रोः" [ ५. ३. १८. ] इत्यादिना सामान्यतो भावाकर्त्रोर्विहिताः, अयं तु तद्विशेषे करणे आधारे चेति विशेषविहितत्वात् "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत् ।" इति घञादीनामयमपवाद इति भावः । यथोद्देशन्यायेन पूर्वं करणे उदाहर्तुमाह– **करणे** इति । "इषत् इच्छायाम्" **इष्यतेऽनयेति– एषणी** । "लिखत् अक्षरविन्यासे" लिख्यतेऽनयेति– **लेखनी** । "चिगट् चयने" विचीयतेऽनयेति–**विचयनी** । "ओव्रस्चौत् छेदने" वृश्च्यतेऽनेनेति– व्रश्चनः, इध्मानां व्रश्चनः– **इध्मव्रश्चनः,** "कृति" [ ३. १. ७७. ] इति

समासः । "शद्लृं शातने" अतो णौ "शदिरगतौ शात्" [ ४. २. २३. ] इति शातादेशे शातयत्यनेनेति शातनः, पलाशानां शातनः– **पलाशशातनः**, प्राग्वत् समासः, एवं– "लूगश् छेदने" लूयतेऽनेनेति लवनः, अवीनामूर्णायूनां लवनः–**अविलवनः** । "कृतैत् छेदने" कृत्यतेऽनेनेति कर्तनः, श्मश्रूणां कर्तन इति– **श्मश्रुकर्तनः** । अथाधारे उदाहर्तुमाह– **आधारे** इति । "दुहींक् क्षरणे" दुह्यतेऽस्यामिति– दोहनी, गवां दोहनी– **गोदोहनी** । "डुधांग्क् धारणे च" चकाराद् दाने, धीयतेऽस्यामिति–धानी, गवां धानी– **गोधानी** । "पीडण् गहने" गहनं बाधा, पीड्यतेऽस्यामिति– पीडनी, तिलानां पीडनी– **तिलपीडनी** । "शीङ्क् स्वप्ने" शय्यतेऽस्मिन्निति–**शयनम्** । "आसिक् उपवेशने" आस्यतेऽस्मिन्निति– **आसनम्** । "डुकृंग् करणे" अधिक्रियतेऽस्मिन्निति–**अधिकरणम्** । "ष्ठा गतिनिवृत्तौ" आस्थीयतेऽस्मिन्निति– **आस्थानमिति** ॥ ५. ३. १२९. ॥

## पुंनाम्नि घः । ५. ३. १३०. ॥

**त० प्र०– पुंसो नाम–संज्ञा पुन्नाम, तत्र गम्यमाने करणाऽऽधारयोर्धातोर्घः प्रत्ययो भवति । करणे–प्रच्छदः, उरश्छदः, दन्तच्छदः, प्लवः, प्रणवः, करः, प्रत्ययः, शरः । आधारे– एत्य कुर्वन्त्यस्मिन्नित्याकरः, आलवः, आरवः, आपवः, भवः, लयः, विषयः, भरः, प्रहरः, प्रसरः, अवसरः, परिसरः, विसरः, प्रतिसरः । पुंग्रहणं किम् ? विचीयतेऽनयेति–विचयनी, प्रधीयते विकारोऽस्मिन्निति– प्रधानम् । नाम्नीति किम् ? प्रहरणो दण्डः । बहुलाधिकारात् क्वचिन्न भवति– प्रसाधनः, दोहनः । घकार "एकोपसर्गस्य च घे" [ ४. २. ३४. ] इत्यत्र विशेषणार्थः ॥१३०॥**

**श० म० न्यासानुसन्धानम्– पुं०** । पुंनाम्नीति व्याचष्टे–**पुंसो नाम संज्ञा पुंनामे**ति– "अधातुविभक्तिवाक्यमर्थवन्नाम" [ १. १. २७. ] इति पारिभाषिकं नामात्र न ग्राह्यमपि तु संज्ञारूपमित्युक्तं– संज्ञेति, **तत्र नाम्नि, गम्यमाने** प्रकृतिप्रत्ययसमुदायेन यदि संज्ञा गम्यते तदाऽयं प्रत्ययो भवति नान्यथेत्यर्थः । पूर्वं करणे उदाहर्तुमाह– **करणे** इति । "छदण् संवरणे" अतो णिचि– छादि, प्रच्छाद्यतेऽनेनेति घे "एकोपसर्गस्य च घे" [ ४. २. ३४. ] इति ह्रस्वे प्रादिसमासे च– **प्रच्छदः** पटविशेषः । एवं– छाद्यते इति छदः, दन्तानां छदः– **दन्तच्छदः**, ओष्ठ इत्यर्थः; उरसः छदः– **उरश्छदः** कवचमिति । "प्लुङ् गतौ" प्लवतेऽनेनेति – **प्लवः**, उडुप इत्यर्थः । "णुक् स्तुतौ" प्रणुवन्त्यनेनेति– **प्रणवः**, ओङ्कार इत्यर्थः । "डुकृंग् करणे" करोत्यनेनेति– **करः**, हस्तादिरित्यर्थः । "इंण्क् गतौ" प्रत्येति अनेनेति– **प्रत्ययः** । "शॄश् हिंसायाम्" शृणात्यनेनेति– **शरो** बाणादिः । अथाधारे उदाहर्तुमाह– **आधारे** इति । "डुकृंग् करणे" एत्य कुर्वन्त्यस्मिन्निति– **आकरः** खनिः । "लूगश् छेदने" एत्य लुनात्यस्मिन्निति– **आलवः** । "रुक् शब्दे" एत्य रौत्यस्मिन्निति– **आरवः** । "पूगश् पवने" एत्य पुनात्यस्मिन्निति– **आपवः** । "भू सत्तायाम्" भवन्त्यस्मिन्निति– **भवः** संसारः । "लींङ्च् श्लेषणे" "लीश् श्लेषणे" "लीण् द्रवीकरणे" लीयतेऽस्मिन्निति– **लयः**, नृत्यगीतवाद्यानामेकतानतारूपं साम्यं लयः, प्रलयकालो वा लयः । "षिग्ट् बन्धने" विसिनोत्यत्रेति– **विषयः**, "सयसितस्य" [२. ३. ४७.] इति सस्य षः, विषयो देशः, स्पर्शादिश्च । "भृश् भर्जने च" चकाराद् भरणे, भृणात्यत्रेति– **भरः**, अतिशय इत्यर्थः । "हृंग् हरणे" प्रह्रियतेऽस्मिन् कालसूचकं वाद्यमिति– **प्रहरो** यामः । "सृं गतौ" प्रसरन्त्यत्रेति **प्रसरो** युद्धादिः । अवसरन्त्यत्रेति– **अवसरः** प्रस्तावादिः, परिसरति परितः संचरन्त्यत्रेति– **परिसरः** पर्यन्तभूः । विसरन्त्यत्रेति– **विसरः** समूहादिः, प्रतिसरन्त्यत्रेति– **प्रतिसरो** वलयम् । पदकृत्यं पृच्छति– **पुंग्रहणं किमिति**, उत्तरयति– **विचीयन्तेऽनयेति– विचयनी**ति– स्त्रीनामेदमिति नास्य प्रवृत्तिः । एवं– प्रधीयन्ते विकारोऽस्मिन्निति–**प्रधानमि**ति–सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रधानम् । पृच्छति–**नाम्नीति किमि**ति, उत्तरयति– **प्रहरणो दण्डः** इति– प्रह्रियतेऽनेनेति योगार्थोऽत्र न संज्ञेति नास्य प्रवृत्तिः । सत्यपि पुंनामत्वे क्वचिन्नायं प्रत्यय इति तदुपायमाह– **बहुलाधिकारात् क्वचिन्न भवती**ति । "साधंट् संसिद्धौ" अतो ण्यन्तात् प्रसाध्यन्ते केशा अनेनेति अनटि– **प्रसाधनः** केशमार्जनः, एवं दोह्यन्तेऽत्रेति– **दोहनो** दोहनभाजनमिति । घकारानुबन्धस्य साफल्यं दर्शयति–**घकारः "एकोपसर्गस्य च घे" [ ४. २. ३४. ] इत्यत्र विशेषणार्थः** इति ॥५. ३. १३०.॥

**गोचर-संचर-वह-व्रज-व्यज-खला-ऽऽपण-निगम-बक-भग-कषाऽऽकष-निकषम् । ५. ३. १३१. ॥**

**त० प्र०–** एते शब्दाः करणाऽऽधारयोः पुंनाम्नि व्यञ्जनाद् घञि प्राप्ते घप्रत्ययान्ता निपात्यन्ते । गावश्चरन्ति अस्मिन्निति– गोचरो देशः, व्युत्पत्तिमात्रं चेदम्, विषयस्य तु संज्ञा–"अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम्" । संचरन्तेऽनेन-संचरः । वहन्ति तेन-वहः, वृषस्कन्धदेशः । व्रजन्त्यस्मिन्निति-व्रजः । विपूर्वोऽजिः, व्यजत्यनेन-व्यजः, निपातनाद्वीभावाभावः । खलन्त्यस्मिन्निति-खलः । एत्य पणायन्ति अस्मिन्निति-आपणः । निगच्छन्ति तत्रेति-निगमः । वक्तीति-बकः, बाहुलकात् कर्तरि । निपचन्त्यनेन-निपक इत्यपि कश्चित् । भज्यतेऽनेनास्मिन्निति वा-भगः, भगमिति बाहुलकात् क्लीबेऽपि घः । कषत्यस्मिन्निति-कषः, एवमाकषः, निकषः ॥१३१॥

**श० म० न्यासानुसन्धानम्– गोचर०** । निपातनसूत्रमिदं, तत्र किं निपात्यमित्याह– **एते शब्दाः करणाधारयोः पुंनाम्नी**ति । पुंनाम्नि घे विहितेऽप्येषां सिद्धिः स्यादेवेति सूत्रस्य वैयर्थ्यमाशङ्क्याह– **व्यञ्जनाद् घञि प्राप्ते** इति– "व्यञ्जनाद् घञ्" [ ५. ३. १३२. ] इत्यस्य परत्वात् तेन बाधो मा भूदिति घप्रत्ययान्ता एते निपात्यन्त इत्यर्थः । "चर भक्षणे च" चकाराद् गतौ, **गावश्चरन्त्यस्मिन्निति– गोचरो देशः** । गोचरशब्दस्य विषयवाचकत्वेन तत्र गावश्चरन्तीति प्रदर्शितव्युत्पत्तेर्विषयाभावादाह–**व्युत्पत्तिमात्रं चेदमि**ति– यदाह भाष्यकारः– अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यद्धि प्रवृत्तिनिमित्तमिति । कथञ्चित् प्रकृतिप्रत्ययसन्नियोगेन शब्दानां साधुत्वमन्वाख्येयम्, प्रवृत्तिश्च लौकिकप्रयोगाधीनेति गोचरशब्दस्य विषयार्थकत्वे न किमपि प्रतिकूलम्, तदाह– **विषयस्य तु संज्ञे**ति, तच्च गोशब्दस्य विषयवाचकत्वं शिष्टप्रयोगेऽपि दर्शयति– **"अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् ।"** इति, एतदग्रे "एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः ।" इत्युक्तं स्याद्वादमञ्जर्याम् । अनेकान्तः– इत्थंरूपतयाऽनिर्णयः, आत्मा-स्वरूपं यस्य तादृशं वस्तु, सर्वसंविदां- सर्वज्ञानाम्, गोचरः– विषय इत्यर्थ इति विषयार्थे गोचरशब्दः प्रमाणितः । अनेकान्तात्मकत्वं च सर्ववस्तूनां "घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः । नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोः ॥" इत्यादिरीत्या प्रमाणितम् । "चर भक्षणे च" चकाराद् गतौ, **संचरन्तेऽनेनेति– संचरः** कलेवरम् । "वहीं प्रापणे" **वहन्ति तेन– वहः, वृषस्कन्धदेशः** । "व्रज गतौ" **व्रजन्त्यस्मिन्निति– व्रजः**, गोसम्बन्धी समूहः । "अज क्षेपणे च" चकाराद् गतौ, विपूर्वादितो घे **व्यजत्यनेनेति–व्यजः** इति, "अघञ्०" [ ४. ४. २. ] इति कथं वीभावो नेत्यत आह– **निपातनाद् वीभावाभावः**, व्यजः–तालवृन्तमिति प्रतीयते । "खल संचये च" चकाराच्चलने, **खलन्त्यस्मिन्निति–खलः** इति, अत्र पारायणम्– "गोचर०" इति निपातनाद् घे खल्यन्ते संचीयते यशांसि धान्यानि वा यत्रेति खलः खलं रणाजिरं धान्यपवनस्थानं च । खलो दुर्जनः । अचि खलति संचिनोति पापं चलति वा गुणेभ्य इति खलो नीचः" इति । "पणि व्यवहारस्तुत्योः" एत्य पणायन्त्यस्मिन्निति– **आपणो** हट्टः, "अशवि ते वा" [ ३. ४. ४. ] इति विकल्पेनायविधानादायाभावपक्षे रूपम् । "गम्लृं गतौ" निगच्छन्ति तत्रेति **निगमो** नगरी, निगमः पन्थाः, निगच्छन्त्यनेनेत्यभिधानचिन्तामणिः, निगच्छन्ति तत्र तेन वा– निगमः पुटभेदनं शास्त्रं चेति पारायणम् । "वचंक् भाषणे" वक्तीति–**बकः**, न्यङ्क्वादित्वात् कत्वं बवयोरैक्यं च । ननु करणाधिकरणयोरेव घान्तनिपातनमिति कथं कर्तरि व्युत्पत्तिरित्याशङ्कायामाह– **बाहुलकात् कर्त**रीति । मतान्तरमाह– **निपचन्त्यनेन–निपक इति कश्चि**दिति । "भजीं सेवायाम्" भज्यतेऽनेनास्मिन् वा– **भगः**, "क्तेऽनिटः०" [ ४. १. १११. ] इति जस्य गः, भज्यते आश्रीयतेऽनेन कृत्वा लोकैरालोक इति भगः सूर्यः, भज्यतेऽनेनास्मिन् वा भगः स्त्रीचिह्नम्, पुंसि क्लीबे चायम्, ननु घान्तस्य पुंस्त्वानुशासनात् कथं क्लीबत्वमित्याह– **भगमिति बाहुलकात् क्लीबेऽपि घः** इति । "कष हिंसायाम्" कषत्यस्मिन्निति– **कषः** शाणः, अतिदिशति– **एवमिति**, आगत्य कषत्यस्मिन्निति– **आकषः**, निकषत्यस्मिन्निति– **निकषः** शाणः ॥ ५. ३. १३१. ॥

**व्यञ्जनाद् घञ् । ५. ३. १३२. ॥**

**त० प्र०–** व्यञ्जनान्ताद् धातोः पुंनाम्नि करणाऽऽधारे घञ् प्रत्ययो भवति । घस्यापवादः । विदन्त्यनेन विन्दति

**विन्दते वा- वेदः । चेष्टतेऽनेन-चेष्टो बलम् । एत्य पचन्त्यस्मिन्नित्यापाकः । आरामः, लेखः, बन्धः, नेगः, वेगः, रागः, रङ्गः, क्रमः, प्रसादः, अपामार्गः, नीमार्गः ॥१३२॥**

**श० म० न्यासानुसन्धानम्-व्यञ्ज० । घस्यापवादः** इति- "पुंनाम्नि घः" [ ५. ३. १३०. ] इति प्राप्तस्य घस्यापवादः । "विदक् ज्ञाने" "विद्लृंती लाभे" "विदिंप् विचारणे" अतः क्रमेण **विन्दन्त्यनेन विन्दति विन्दते वेति- वेदः** । "चेष्टि चेष्टायाम्" **चेष्टतेऽनेन- चेष्टो बलमि**ति । "डुपचींष् पाके" एत्य पचन्त्यस्मिन्निति- **आपाकः,** "क्तेऽनिटः०" [ ४. १. १११. ] इति चस्य कः । "रमि क्रीडायाम्" एत्य रमन्तेऽत्रेति- **आरामः,** "मोऽकमि०" [ ४. ३. ५५. ] इत्यत्र रमिवर्जनात् ह्रस्वाभावः । "लिखत् अक्षरविन्यासे" लिखत्यस्मिन्निति- **लेखः** । "बन्धंश् बन्धने" बध्नात्यस्मिन्निति- **बन्धः** । "णिजूंकी शौचे च" चकारात् पोषणे, नेनिक्तेऽस्मिन्निति- **नेगः,** घित्वात् जस्य गः । "विजूंकी पृथग्भावे" वेविक्तेऽस्मिन्निति-**वेगः** । "रञ्जीं रागे" रजत्यनेनेति-**रागः,** "घञि भावकरणे" [ ४. २. ५२. ] इत्युपान्त्यनलोपः, रजन्त्यस्मिन्निति आधारे तु- **रङ्गो** नृत्तस्थानम् । "क्रमू पादविक्षेपे" क्रामन्त्यनेनेति-**क्रमः** । "सद्लृं विशरणगत्यवसादनेषु" प्रसीदन्त्यत्रेति- **प्रासादः,** "घञ्युपसर्गस्य०" [ ३. २. ८६. ], इति दीर्घः । "मृजौक् शुद्धौ" अपमृज्यते व्याधिरनेनेति-**अपामार्गो** वृक्षविशेषः, निमृज्यतेऽनेनेति- **नीमार्गः,** [ संमार्जनी ] क्वचित् वीमार्ग इति पाठः, एषु घञि उपान्त्यगुणे "मृजोऽस्य वृद्धिः" [ ४. ३. ४२. ] इत्यत आकारे "क्तेऽनिट०" [ ४. १. १११. ] इति जस्य गे "घञ्युपसर्गस्य०" इति पूर्वस्य दीर्घः ॥ ५. ३. १३२. ॥

## अवात् तृ-स्तृभ्याम् । ५. ३. १३३. ॥

**त० प्र०- अवपूर्वाभ्यां तृ-स्तृभ्यां करणाऽऽधारयोः पुंनाम्नि घञ् भवति । अवतरन्त्यनेनास्मिन् वेति-अवतारः । अवस्तृणन्त्यनेनास्मिन्निति वा- अवस्तारः । बहुलाधिकारादसंज्ञायामपि- अवतारो नद्याः, उत्पूर्वादपि-नद्युत्तारः । करणाऽऽधार इत्येव-अवतरः । केचित् तु- संज्ञायामसंज्ञायां च भावेऽकर्तरि कारके च स्त्रो नित्यं तरतेस्तु विकल्पेन घञमिच्छन्ति । द्विवचनं करणाऽऽधार इति यथासंख्यनिवृत्त्यर्थम् ॥१३३॥**

**श० म० न्यासानुसन्धानम्- अवा०** । "तृ प्लवनतरणयोः" प्लवनं मज्जनम्, तरणमुल्लङ्घनम्, **अवतरन्त्यनेनास्मिन् वेति- अवतारः,** नद्यादीनामवतरणमार्ग इत्यर्थः । "स्तृग्श् आच्छादने" **अवस्तृणन्त्यनेनास्मिन्निति वा- अवस्तारो** जवनिका । बहुलाधिकारपठितत्वेनास्यापि क्वचिदसंज्ञायामपि प्रयोगो भवतीत्याह- **बहुलाधिकारादसंज्ञायामपी**ति, **अवतारो नद्याः** इति- येन केनाप्युपायेन नद्यामवतीर्यते यस्मिन् कस्मिन् वा स्थले स एवावतारः, न केवलं यस्य कस्यापि कुतश्चन स्थलादवतरणम्, कुत्रचित् शरीरविशेषेऽवतारशब्देनोच्यत इति न कस्यापि नियतं नामेदम् । बहुलाधिकारस्य फलान्तरमप्याह- **उत्पूर्वादपीति,** उत्तीर्यतेऽनेनास्मिन् वा- उत्तारः, नद्या उत्तारो **नद्युत्तारः** । करणाधारयोरित्यस्यानुवृत्तेर्व्यावर्त्यमाह- **करणाधारयोरित्येव- अवतरः** इति- "युवर्ण०" [ ५. ३. २८. ] इत्यलि अवतरणमवतरः । मतान्तरमाह- **केचित् तु- संज्ञायामसंज्ञायां चे**त्यादि । लाघवादेकवचनेनैव प्रयोगे कर्तव्ये द्विवचनप्रयोगः सूत्रे व्यर्थ इति चेत् ? अत्राह- **द्विवचनं करणाधार इति यथासंख्यनिवृत्त्यर्थमि**ति- एकवचनेन निर्देशे 'करणाधारे' इत्येकवचनान्तेन सह तस्य समसंख्यत्वं स्यादिति क्रमेण योगे करणे तरतेरधिकरणे स्तृणातेर्घञ् स्यात्, तच्चानिष्टमिति भिन्नसंख्यया निर्देशः कृत इति भावः ॥ ५. ३. १३३. ॥

## न्यायाऽऽवायाऽध्यायोद्याव-संहाराऽवहाराऽऽधार-दार-जारम् । ५. ३. १३४. ॥

**त० प्र०- स्वरान्तार्थ आरम्भः । एते शब्दाः पुंनाम्नि करणाधारयोर्घञि प्राप्ते घञन्ता निपात्यन्ते । निपूर्वस्येणो नीयतेऽनेनेति- न्यायः । एत्य वयन्ति वायन्ति वा तत्रेत्यावायः । अधीयतेऽनेनास्मिन् वा- अध्यायः । उद्युवन्ति तेन तस्मिन् वा- उद्यावः । संहरन्ति तेन- संहारः । अवहरन्ति तेन तस्मिन् वा- अवहारः । आध्रियते तत्रेत्याधारः । दीर्यन्ते एभिरिति- दाराः । जीर्यतेऽनेनेति- जारः । दारयन्तीति-दाराः । जरयतीति-जार इति कर्तरि केचिन्निपातयन्ति ॥१३४॥**

**श० म० न्यासानुसन्धानम्-न्याया०** । अत्र पठिता धातवः सर्वे स्वरान्ताः, तेभ्यो व्यञ्जनान्तनिमित्तकस्य

घञोऽप्राप्तेर्घेन बाधा मा भूदिति सूत्रेणानेन निपातनमाश्रितमित्याह–**स्वरान्तार्थ आरम्भ** इति । **निपूर्वस्येणः** इति–"इंणक् गतौ" निपूर्वस्यास्येत्यर्थः, तथा च निशब्दं पृथक्कृत्य इणः प्रत्यये तस्य वृद्धौ आय इति साधिते इकारस्य यकारे न्याय इति, पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति मतमाश्रितम्, पूर्वं धातुरुपसर्गेण युज्यत इति मताश्रयणे तु नाय इति स्यात् । **नीयतेऽनेनेति न्यायः** इति– नियतमीयत इति न्यायो नीतिः, लोकस्थितिः, सन्मार्गेण येन नीयत स न्याय इति भावः । "वें तन्तुसन्ताने" "ओवैं शोषणे" **एत्य वयन्ति वायन्ति वा तत्रेति– आवायः** । "इंङ्क् अध्ययने" नित्यमधिपूर्वः, **अधीयतेऽनेनास्मिन् वा–अध्यायः** । "युक् मिश्रणे" **उद्यवन्ति तेन तस्मिन् वा–उद्यावः** । "हृंग् हरणे" **संहरन्ति तेन तस्मिन् वा–संहारः, अवहरन्ति तेन तस्मिन् वा– अवहारः** । "धृंङ् धारणे" **आध्रियते तत्रेति– आधारः** । "दृश् विदारणे" **दीर्यन्ते एभिरिति–दाराः** इति– पुंसां हृदयानि, पुमांसो वेति शेषः, दारशब्दः पुंलिङ्गो बहुवचनान्तश्च, दाराः कलत्रमिति, एकवचनान्तोऽपि दृश्यते, यल्लक्ष्यम्– "धर्मप्रजासम्पन्ने दारे नान्यं कुर्वीत" इति । "जृष्च् जरसि" **जीर्यतेऽनेनेति– जारः**, सतीनां सतीत्वं कुलाचारो वेति शेषः, जार उपपतिः । पाणिनीयमतमाह– **दारयन्तीति– दाराः, जरयतीति– जार इति कर्तरि केचिन्निपातयन्ती**ति, तथाहि– [ ३. ३. २०. ] इति सूत्रव्याख्याम्, वार्तिकम्– 'दार-जारौ कर्तरि णिलुक् च' इति, दृधातुर्जृधातुश्च घटादिरपि, घटादेश्च णिचि ह्रस्वत्वं भवति, ततश्च ण्यन्ताभ्यामाभ्यां घञि कृते तन्निमित्तके णिलोपे घञाश्रया वृद्धिर्न स्यात्, णिलोपस्य स्थानिवद्भावात् । लुकि विहिते च तस्यापरनिमित्तकत्वेन लुकि स्थानिवत्त्वनिषेधाद् वा वृद्धौ दारजारशब्दौ सिध्यतः । यद्यप्येतौ धातू अर्थान्तरे घटादिबहिर्भूतावपि तथापि घटादेर्दरजरौ मा भूतामिति तद्बाधनार्थं च निपातनमाश्रितमिति वार्तिककृदाशयः । भाष्यकृता च "करणे वा वक्तव्यौ, दीर्यन्ते तैर्दाराः, जीर्यन्ते तैर्जाराः" इत्युक्तम्, अयमाशयः– करणार्थेनापि ण्यन्तत्वाभावेऽपि विवक्षितार्थलाभ इति णिलुग्विधानं नावश्यकमिति भावः । करणे च घञपवादः पुंनाम्नि घः, अनट् वा प्राप्तस्तद्बाधनाय घञ्मात्रविधानमावश्यकमिति । स्वमते चात एव निपातनमाश्रितम् ॥ ५. ३. १३४. ॥

## उदङ्कोऽतोये । ५. ३. १३५. ॥

**त० प्र०– उत्पूर्वादञ्चतेः पुंनाम्नि करणाऽऽधारयोर्घञ् निपात्यते, अतोये–तोयविषयश्चेत् धात्वर्थो न भवति, जलं चेत् तेन नोदच्यत इत्यर्थः । तैलोदङ्कः, घृतोदङ्कः । अतोय इति किम् ? उदकोदञ्चनः । "व्यञ्जनात् घञ्" [ ५. ३. १३२. ] इति सिद्धे तोये प्रतिषेधार्थं वचनम् । रूपाविशेषाद् घोऽपि न भवति ॥१३५॥**

**श० म० न्यासानुसन्धानम्– उद०** । उत्पूर्वस्याञ्चतेर्घञि तोयार्थप्रतीतेः सामानाधिकरण्येनासम्भवात् **'अतोये'** इत्यस्य तोयभिन्न इत्यर्थकरणे आनर्थक्यं प्रसज्येतेति सप्तम्या विषयार्थतया व्याख्यानमाश्रयति– **तोयविषयश्चेद् धात्वर्थो न भवती**ति । धात्वर्थस्य तोयविषयतासम्भवमुखेन प्रतिषेध्यमर्थमाह– **जलं चेत् तेन नोदच्यत इत्यर्थः** इति । "अञ्चू गतौ च" चात् पूजायाम् । तैलं घृतं वा उदच्यते उध्द्रियतेऽनेनास्मिन् वेति– **तैलोदङ्कः, घृतोदङ्कः**, चर्ममयं भाण्डम्, अर्थकथनमिदम्, उदच्यतेऽनेन– उदङ्कः, तैलस्य घृतस्य वा उदङ्कः– तैलोदङ्कः, घृतोदङ्कः, "कृति" [ ३. १. ७७. ] इति षष्ठीसमासः । घञि "क्तेऽनिटः" [ ४. १. १११. ] इति चस्य कत्वम्, "म्नां०" [ १. ३. ३९. ] इति नस्य ङत्वं चात्रावसेयमिति । पदकृत्यं पृच्छति– **अतोय इति किमिति**, उत्तरयति– **उदकोदञ्चन** इति– उदकमुदच्यतेऽनेन पात्रेणेति सः, अत्र "करणाधारे" [ ५. ३. १२९. ] इत्यनडेव भवतीति भावः । विधेरन्यतः सिद्धो नियममुखेन प्रतिषेधफलकत्वमाह– **"व्यञ्जनात् घञ्" [ ५. ३. १३२. ] इति सिद्धे तोये प्रतिषेधार्थं वचनमि**ति । ननूदकविषये घञ् माऽस्तु पुंनाम्नि घः कुतो न भवतीति चेत् ? अत्राह– **रूपाविशेषाद् घोऽपि न भवती**ति– नह्युत्पूर्वस्याञ्चतेर्घञि घे वा रूपे विशेषोऽस्तीति घञि प्रतिषिद्धे घे सति विशेषाभावेन प्रतिषेधस्य वैयर्थ्यं स्यादिति तत्सार्थक्याय घोऽपि न भवति, नहि घञा किमप्यपराद्धं येन स निषिध्यते, किन्तु तादृशं रूपमेव परिहार्यम्, तच्चेदन्ततो गले पतिष्यत्येव वैयर्थ्यं निषेधस्य स्यादिति ॥ ५. ३. १३५. ॥

## आनायो जालम् । ५. ३. १३६. ॥

**त० प्र०–आङ्पूर्वान्नयतेः करणे पुंनाम्नि घञ् निपात्यते, जालं चेत् वाच्यं भवति । आनयन्ति तेन–आनायो मत्स्यानाम्, आनायो मृगाणाम् ॥१३६॥**

**श० म० न्यासानुसन्धानम्–** आना० । "णींग् प्रापणे" **आनयन्ति तेन– आनायो मत्स्यानामिति–** मत्स्यजालमित्यर्थः । **आनायो मृगाणामिति–** मृगपाश इत्यर्थः ॥ ५. ३. १३६. ॥

## खनो ड-डरेकेकवक-घं च । ५. ३. १३७. ॥

**त० प्र०– खनेः पुंनाम्नि करणाऽऽधारयोर्ड डर इक इकवक घ घञ् च प्रत्यया भवन्ति । आखायत आखन्यते वाऽनेनास्मिन् वा– आखः, आखरः, आखनिकः, आखनिकवकः, आखनः, आखानः ॥१३७॥**

**श० म० न्यासानुसन्धानम्– खनो०** । "खनूंग् अवदारणे" अतः प्रत्ययपञ्चकं भवति, तत्र चकारेण घञोऽनुकर्षः । विग्रहमाह– **आखायते आखन्यते वाऽनेनास्मिन् वेति–** "ये नवा" [ ४. २. ६२. ] इति क्ये परे आत्वं वेति– आख्यायते, आखन्यते इति, तत्र डे डरे च परे डित्वादन्त्यस्वरादिलोपे च– **आखः, आखरः,** इके– **आखनिकः,** इकवके– **आखनिकवकः,** घे– **आखनः,** घञि चोपान्त्यवृद्धौ–**आखानः** इति, एते खनित्रवचना इति कौमुदीकारः, 'घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थम्, तेन भजेः–भगः पदम्, करणे घः' इत्यपि स एव, किञ्च घे घित्करणं पुंस्त्वानुशासनार्थमपि भवति ॥ ५. ३. १३७. ॥

## इ कि श्तिव् स्वरूपार्थे । ५. ३. १३८. ॥

**त० प्र०– धातोः स्वरूपेऽर्थे चाभिधेये 'इ कि श्तिव्' इत्येते प्रत्यया भवन्ति । भञ्जिः, क्रुधिः, वेत्तिः । अर्थे– यजेरङ्गानि, भुजिः क्रियते, पचतिर्वर्तते ॥१३८॥**

**श० म० न्यासानुसन्धानम्– इ० । धातो**रित्यनुवृत्तं तन्त्रेण पञ्चम्यन्तषष्ठ्यन्तोभयपरम्, धातोः स्वरूपेऽर्थे चाभिधेये धातोः **'इ कि श्तिव्'** इत्येते प्रत्यया भवन्तीति भावः । "भञ्जोंप् आमर्दने" इति 'भञ्ज्'धातोरिप्रत्यये– **भञ्जिः,** भञ्ज्धातुरित्यर्थः, अत्र इप्रत्ययस्य कित्त्वाभावान्नोपान्त्यलोपः । "क्रुधंच् कोपे" इति 'क्रुध्'धातोः किप्रत्यये– **क्रुधिः,** अत्र कित्त्वान्नोपान्त्यगुणः । "विदक् ज्ञाने" इति 'विद्'धातोः श्तिवि उपान्त्यगुणे च– **वेत्तिः,** 'विद्'धातुरित्यर्थः । अथ अर्थे उदाहर्तुमाह– **अर्थे** इति । "यजीं देवपूजासङ्गतिकरणदानेषु" इति 'यज्'धातोरिप्रत्यये– यजिः, अत्र कित्त्वाभावात् य्वृदभावः, अर्थपरत्वदर्शनाय तत्प्रयोगमाह– **यजेरङ्गानी**ति, यजेरित्यस्य देवपूजादेरित्यर्थः, "भुजंप् पालनाभ्यवहारयोः" इति 'भुज्'धातोः किप्रत्यये कित्त्वाद् गुणाभावे–**भुजिः क्रियते** इति– भुजिः– पालनमभ्यवहारो वा । "डुपचींष् पाके" इति श्तिवि शित्त्वात् शवि विकरणे च– **पचतिर्वर्तते** इति– पचतिः– पाकः । अत्र लघुन्यासे इत्थम्–"केचिदेतान् प्रत्ययान् कर्तरि समानयन्ति, स्वमते तु कर्तृकर्मभाव इति विशेषाभावात् सामान्येन भवन्ति, "भवतेः सिज्लुपि" "न कवतेर्यङः" इत्यादौ भावेऽपि सूत्रसामर्थ्यात् शव्, न तु क्यः । **पचतिर्वर्तते** इति– बाहुलकाद् भावेऽपि शव् क्याभावश्च" इति । पाणिनीये च प्रत्ययद्वयमेव दृश्यते, इक्-श्तिपाविति हि तत्रोक्तम् । तथाहि– "रोगाख्यायां ण्वुल् बहुलम्" [ ३. ३. १०८. ] इति सूत्रे–"इक्-श्तिपौ धातुनिर्देशे" इक्श्तिपौ प्रत्ययौ धातुनिर्देशे वक्तव्यौ । पचेर्ब्रूहि पचतेर्ब्रूहि ॥" । अत्र कैयटः– धात्वर्थनिर्देश इति– क्रियानिर्देश इत्यर्थः । इक्श्तिपाविति, बहुलवचनात् क्वचिन्न भवति, श्तिपः शित्करणादकर्तृवाचिन्यपि तस्मिन् शबादयो भवन्ति । यद्यपि क्वचिद् भवति, यथा–विभाषा लीयतेरिति, अत्र हि लीलीङोर्येका श्तिपि निर्देशः कृतः । श्यनि तु लीङ एव ग्रहणं स्यान्न तु लीनातेः" इति । नागेशस्त्वेवमाह–"शित्करणादिति–शित्करणस्य पित्त्वाद्यादेशविधानेन चारितार्थ्यादिदं चिन्त्यम् । तस्मान्निर्देशैरेव विकरणः साध्यः" इति ॥ क्वचिच्च एभ्यो विनापि स्वरूपत एव धातुनिर्देशो यथा पूर्वसूत्रे खन इति, तत्र बाहुलकात् तदभावः समाधेयः, अनुकरणत्वेन भेदविवक्षयाऽप्रवृत्तिर्वाऽस्तु ॥ ५. ३. १३८. ॥

## दुःस्वीषतः कृच्छ्राऽकृच्छ्रार्थात् खल् । ५. ३. १३९. ॥

**त० प्र०–कृच्छ्रं दुःखम्, अकृच्छ्रं सुखम्, कृच्छ्रार्थवृत्तेर्दुरः सामर्थ्यादकृच्छ्रार्थवृत्तिभ्यां स्वीषद्भ्यां परात् धातोर्भाव-कर्मणोरर्थयोः खल् प्रत्ययो भवति । कृत्यादीनाम-**

पवादः । दुःखेन शय्यत इति–दुःशयम्, सुखेन शय्यते इति–सुशयम्, ईषच्छयं भवता । दुःखेन क्रियते इति–दुष्करः । सुखेन क्रियते इति–सुकरः, ईषत्करः कटो भवता । दुष्करं सुकरम् ईषत्करं भवता । दुःस्वीषत इति किम् ? कृच्छ्रसाध्यः, सुखसाध्यः । कृच्छ्राकृच्छ्रार्थादिति किम् ? ईषल्लभ्यं धनं कृपणात्, अल्पं लभ्यमित्यर्थः । खकार उत्तरत्र मागमार्थः । लकारः 'खलर्थाश्च' इत्यत्र विशेषणार्थः । इह स्त्रीप्रत्ययात् प्रभृति असरूपविधेरभावात् स्पर्धे 'अलः स्त्रीखलनाः, स्त्रियास्तु खलनौ' परत्वाद् भवतः । तत्र 'चयः, जयः, लवः' इत्यादावलोऽवकाशः, 'कृतिः, हृतिः' इत्यादौ स्त्रीप्रत्ययस्य, 'चितिः, स्तुतिः' इत्यादौ तूभयं प्राप्नोति, अलोऽविशेषेणाभिधानात् तत्र परत्वात् स्त्रीप्रत्ययो भवति । तथा 'दुर्भेदः, सुभेदः' इत्यादौ खलोऽवकाशः, अलस्तु पूर्व एव, 'दुश्चयं सुचयम्, दुर्लवं सुलवम्' इत्यादौ तूभयप्राप्तौ परत्वात् खल् भवति । तथा 'इध्मप्रव्रश्चनः, पलाशच्छेदनः' इत्यादावनस्यावकाशः, अलस्तु पूर्वक एव, 'पलाशशातनो विलवनः' इत्यादौ तूभयप्राप्तौ परत्वादनो भवति । एवं 'हृतिः, कृतिः' इत्यादौ स्त्रीप्रत्ययस्यावकाशः 'दुर्भेदः, सुभेदः' इत्यादौ खलः 'दुर्भेदा सुभेदा' इत्यादौ तूभयप्राप्तौ परत्वात् खल् भवति । तथा 'इध्मप्रव्रश्चनः, पलाशच्छेदनः' इत्यादावनस्यावकाशः, कृतिरित्यादौ स्त्रीप्रत्ययस्य, 'सक्तुधानी, तिलपिडनी' इत्यादौ तूभयप्राप्तौ परत्वादनडेव भवति ॥१३९॥

---

श० म० न्यासानुसन्धानम्– दुः० । कृच्छ्राकृच्छ्रशब्दार्थं व्याचष्टे–**कृच्छ्रं दुःखम्, अकृच्छ्रं सुखमिति** । न चात्र 'दुर्' शब्दस्य सुखार्थत्वं सम्भवति नवा सुशब्दस्य दुःखार्थत्वम्, अर्थौ च द्वावुक्तौ शब्दास्त्रयः, तत्र कस्य शब्दस्य किं विषयत्वमिति यद्यपि न्यायेन निर्णेतुमशक्यं तथापि स्वयोग्यताबलादेव कस्य किमर्थविषयकत्वमिति निश्चेयमित्याह– **कृच्छ्रार्थवृत्तेर्दुरः, सामर्थ्यात् अकृच्छ्रार्थवृत्तिभ्यां स्वीषद्भ्यामिति**– सामर्थ्यादित्युभयान्वयि, सामर्थ्यं तदर्थाभिधानयोग्यता, तथा च यतो दुरः कृच्छ्रार्थाभिधानयोग्यताऽतस्तदर्थविषयत्वं तस्य, सुशब्दस्य सुखार्थाभिधानयोग्यतेति तदर्थपरत्वं तस्य, ईषतश्च यद्यपि नोभयमध्ये कस्याप्यर्थस्याभिधाने योग्यता दृष्टपूर्वा, तथापि दुःखमल्पमपि बहु विज्ञायते, सुखं बह्वपि स्वल्पं विज्ञायत इति लौकिकानुभवबलेन तस्य सुखविषयत्वं कल्पयितुं शक्यत इति तस्याप्यकृच्छ्रार्थपरत्वमेवेति निर्णेयमिति भावः । "तत् साप्यानाप्यात् कर्मभावे कृत्यक्तखलर्थाश्च" [ ३. ३. २१. ] इत्यनेन खलर्थस्य भावकर्मणोर्विहिततयाऽऽह– **भावकर्मणोरर्थयोरिति** । **कृत्यादीनामपवादः** इति–तेऽपि भावकर्मणोर्विधीयन्ते किन्तु सामान्यतः, अयं तु विशेषत इति तेषामपवाद इति । "शीङ्क् स्वप्ने" **दुःखेन शय्यत इति– दुःशयमिति**– "क्ङिति यि शय्" [ ४. ३. १०५. ] इति शीङः शयादेशे– शय्यते, एवं– **सुखेन शय्यत इति–सुशयम्, ईषच्छयमिति**–'भवता' इति सर्वत्र योज्यम्, एषु अकर्मकत्वात् "तत् साप्या०" [३. ३. २१.] इति भावे खल् गुणश्च । "डुकृंग् करणे" **दुःखेन क्रियत इति– दुष्करः, सुखेन क्रियते इति– सुकरः, ईषत्करः कटो भवतेति**– एषु सकर्मकत्वात् कर्मणि खल् गुणश्च । दुःखेन क्रियते इति– **दुष्करम्**, सुखेन क्रियते इति– **सुकरम्, ईषत्करं भवतेति**– अत्र कर्मणोऽविवक्षया धातोरकर्मकत्वाद् भावे खल्, भावे खलन्तस्य च नपुंसकत्वम्, कर्मणि तु कर्मानुसारं लिङ्गं विज्ञेयं सर्वत्र । 'भवता' इत्यत्र "हेतुकर्तृ०" [ २. २. ३८. ] इति कर्तरि तृतीया, न "कर्तरि" [ २. २. ८६. ] इति षष्ठी "तृन्नु०" [ २. २. ९०. ] इति निषेधात् । पदकृत्यं पृच्छति–**दुःस्वीषत इति किमिति**, उत्तरयति– **कृच्छ्रसाध्यः, सुखसाध्यः** इति– कृच्छ्रेण सुखेन च साध्यते इति वाक्यमत्र, अत्र दुरादीनामभावादस्याप्रवृत्त्या व्यञ्जनान्तलक्षणो घ्यण् भवति । पुनः पृच्छति– **कृच्छ्राकृच्छ्रार्थादिति किमिति**, दुरः सुशब्दस्य च कृच्छ्राकृच्छ्रार्थत्वं नियतमितीषच्छब्दविषये एवायं प्रश्न इति मत्वा तमेव प्रत्युदाहरति– **ईषल्लभ्यं धनं कृपणादिति**, कृपणाद् धनलाभो न सुखेनापि तु दुःखेनैवेति नियतमिति सुखार्थत्वमिहेषच्छब्दस्यासम्भवि, ततश्च स्वाभाविकाल्पपरत्वमेव तस्येत्याह– **अल्पं लभ्यमित्यर्थः** इति, तथा च दुःखसुखार्थाभावादस्य प्रवृत्तिविरहात् पवर्गान्तलक्षणे ये– ईषल्लभ्यमिति, "डुलभिष् प्राप्तौ" इति 'लभ्' धातुः । ननु च खित्कार्यं ह्रस्वादिकं "खित्यनव्यया०" [ ३. २. १११. ] इत्यनेनानव्ययस्य विधीयन्ते, ईषदादयश्चाव्ययसंज्ञा, तत् किमर्थं खलः खित्करणमित्याह– **खकार उत्तरत्र मागमार्थ** इति– उत्तरत्रानव्ययेऽप्युपपदे खल्

विधास्यते तत्र मागमो यथा स्यादित्येवमर्थं खित्करणमित्यर्थः । **लकारः खलर्थाश्चेत्यत्र विशेषणार्थः** इति– "तत् साप्यानाप्यात्०" इत्यत्रेत्यर्थः । "असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [ ५. १. १६. ] इत्यनेनासरूपप्रत्ययानामपवादानामपि परस्परं समावेशस्योक्ततया क्तेः प्राचीनानां सैव व्यवस्था । ततः परेषां व्यवस्थामाह– **इह स्त्रीप्रत्ययात् प्रभृति असरूपविधेरभावादिति,** सा च निष्प्रतिद्वन्द्वेऽनावश्यकीति स्पर्धे एव तां व्यवस्थामाह– **स्पर्धे 'अलः स्त्रीखलनाः, स्त्रियास्तु खलनौ परत्वाद् भवतः'** इति । तत्र स्पर्धं स्पष्टयति– **तत्र 'चयः, जयः, लवः' इत्यादावलोऽवकाशः** इत्यादिना, क्व स्पर्ध इत्याह–**'चितिः, स्तुतिः' इत्यादौ तूभयमिति । ननु स्त्रीत्वविवक्षायां क्तिरेव भविष्यतीति** चेत् ? अत्राह– **अलोऽविशेषेणाभिधानादिति**– अल् यदि पुंस्येव विधीयेत तर्हि तस्यात्राप्राप्तिरुद्भाव्येत, स त्वविशेषेण लिङ्गसामान्ये विहित इति तस्याप्यत्र प्राप्तिर्निराबाधैवेति भावः । व्यवस्थामाह–**परत्वात् स्त्रीप्रत्यय** इति । एवमन्यत्रापि विज्ञेयम् । उक्तार्थस्पष्टप्रतिपत्तयेऽस्मदीयो न्यायसिन्धुपाठोऽत्र दर्श्यते– ***स्त्रीखलना अलो बाधकाः, स्त्रियाः खलनौ*** ॥५५॥

सि०–प्राक् क्तेः पठितेषु प्रत्ययेषु निर्णायकतया "असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः" [ ५. १. १६. ] इति सूत्रमुक्तम्, क्तेः परतस्तन्निर्णयार्थमयं न्याय आश्रीयते । अत्र स्त्रीत्यनेन "स्त्रियां क्तिः" [ ५. ३. ९१. ] इत्यधिकारोक्ताः प्रत्यया गृह्यन्ते, स्त्रियामित्यस्याधिकारश्च "भावे" [ ५. ३. १२२. ] इति सूत्रपर्यन्तमस्ति । 'क्तिः, क्यप्, शः, यः, अः, अङ्, अनः, क्विप्, अः, इञ्, णकः' इत्येते प्रत्ययाः पठ्यन्ते, तेषां खलोऽनस्य च विषये अल् यदि प्राप्येत तर्हि ते प्रत्यया यथास्वमलो बाधका भवन्ति । 'अन' इत्यनेन अनट्ग्राह्यः, स्त्रीखलनानां परस्परस्पर्धे च स्त्रियाः खलनौ बाधकौ स्यातामिति न्यायार्थः । अयं च न्यायः स्पर्धमूलक इति "स्पर्धे" [ ७. ४. ११९. ] इत्यस्यैव प्रपञ्चरूपः, तत्र च परशब्दस्य पाठकृतपरत्वार्थकत्वमिष्टत्वार्थकत्वं चेति पूर्वस्यापि तेन संग्रहो भवति, कुत्र को विधिरिष्ट इत्यत्र लक्ष्यानुसारि शास्त्रकृद्व्याख्यानमेव शरणम् । तथा च स्वीकृते न्याये चयनमित्यर्थे चिधातोः "युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः" [ ५. ३. २८. ] इत्यल् "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिश्च प्राप्तौ, तत्र प्रकृतन्यायात् परत्वमूलके निर्णये परत्वात् क्तिरेव भवति स्त्रीप्रत्ययत्वात् । एवं दुःखेन चीयते इत्यर्थे "दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल्" [ ५. ३. १३९. ] इति खल्, पूर्ववत् "युवर्ण०" [ ५. ३. २८. ] इत्यल् च प्राप्तौ, तत्रापि परत्वात् खल् एव भवति । एवं पलाशानि शात्यन्तेऽनेनेत्यर्थे पलाशोपपदात् शातयतेः "करणाधारे" [ ५. ३. १२९. ] इत्यनटः, "युवर्ण०" [ ५. ३. २८. ] इत्यलश्च प्राप्तौ परत्वादनडेवेति प्रथमांशोदाहरणानि । तथा दुःखेन भिद्यते इत्यर्थे "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिः, "दुःस्वीषतः०" [ ५. ३. १३९. ] इति खल् च प्राप्तः, तत्र परत्वात् खलेव भवति, प्रकृतन्यायस्वारस्यात् । तथा च 'दुर्भेदा भूः' इत्येव प्रयोगः कर्मणि खलो भवनात् । एवं सक्तवो धीयन्तेऽस्यामित्यर्थे "स्त्रियां क्तिः" [ ५. ३. ९१. ] "करणाधारे" [ ५. ३. १२९. ] इत्याभ्यां क्रमात् क्त्यनटोः प्राप्तौ परत्वादनडेव भवतीति सक्तुधानीत्येव प्रयोगः । यद्यपि सर्वत्रात्र परत्वमूलिकैव व्यवस्थेति "स्पर्धे" [ ७. ४. ११९. ] इति परिभाषयैव निर्वाहः सिध्यति, तथापि कृद्विषये तस्याः परिभाषाया अपि न नैयत्येन व्यवस्थापकत्वमिति सूचयितुं न्यायस्वीकारः कृतः । तथा चास्य लक्ष्यानुरोधित्वेन क्वचिदप्रवृत्तिरपि, अत एव 'जयः' इत्यादिषु "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तेः, "युवर्ण" [ ५. ३. २८. ] इत्यलश्च प्राप्तौ पूर्वोऽप्यलेव भवति परशब्दस्येष्टवाचित्वाश्रयणात्, एवं 'शिरोऽर्तिः' इत्यादौ क्त्यनटोः प्राप्तौ क्तिप्रत्यय एव । अयमाशयः–शिरसोऽर्दनमित्यर्थे "स्त्रियां क्तिः" [ ५. ३. ९१. ] इति क्तिः, "अनट्" [ ५. ३. १२४. ] इत्यनट् च प्राप्तः, तत्र परोऽनट् न प्रवर्तते किन्तु क्तिरेवेति ॥५५॥ विशेषश्चास्य विवरणतो द्रष्टव्यः ॥ ५. ३. १३९. ॥

**च्व्यर्थे कर्त्राप्याद् भू-कृगः** । ५. ३. १४०. ॥

**त० प्र०– कृच्छ्राऽकृच्छ्रार्थेभ्यो दुःस्वीषद्भ्यः पराभ्यां च्व्यर्थे वर्तमानाभ्यां कर्तृ-कर्मवाचिभ्यां शब्दाभ्यां पराभ्यां यथासंख्यं भू-कृग्भ्यां परः खल् प्रत्ययो भवति । खानुबन्धक-**

लात् कर्तृकर्मणोरेवानन्तर्यम् । दुःखेनाऽनाढ्येनाऽऽढ्येन भूयते-दुराढ्यंभवं भवता, सुखेनाऽनाढ्येनाऽऽढ्येन भूयते-स्वाढ्यंभवं भवता, ईषदाढ्यंभवं भवता । दुःखेनाऽनाढ्य आढ्यः क्रियते- दुराढ्यंकरो मैत्रो भवता, सुखेनानाढ्य आढ्यः क्रियते- स्वाढ्यंकरश्चैत्रो भवता, ईषदाढ्यंकरश्चैत्रो भवता । सुखेनाऽकटः कटः क्रियन्ते-सुकटंकराणि वीरणानि । सुकरः कटो वीरणैरित्यत्र तु करणविवक्षा । च्व्यर्थ इति किम् ? दुराढ्येन भूयते, स्वाढ्येन भूयते, ईषदाढ्येन भूयते, आढ्य एव सन् कंचिद् विशेषमापद्यत इत्यर्थः; एवं- दुराढ्यः क्रियते इत्यादि, अभूतप्रादुर्भावेऽपि वा प्रकृतेरविवक्षणात् च्व्यर्थो नास्ति ॥१४०॥

श० म० न्यासानुसन्धानम्-च्व्यर्थे० । दुःस्वीषद्भ्यः पराभ्यां च्व्यर्थे वर्तमानाभ्यामिति- कर्तृकर्मवाचिशब्दयोर्विशेषणत्वम्, साक्षात् परत्वं तु ताभ्यामेव धातोः, अत्र च प्रमाणमग्रे प्रदर्शयिष्यति । यथासंख्यं भू-कृग्भ्यामिति- कर्तृवाचिशब्दात् परत्वं भूधातोः, कर्मवाचिशब्दात् परत्वं कृग इति भावः । अत्र दुःस्वीषतां कर्तृकर्मणोर्वाऽऽनन्तर्यं धातोरित्यस्य निर्णयमाह- खानुबन्धबलात् कर्तृकर्मणोरेवानन्तर्यमिति, अयमाशयः- खानुबन्धस्य फलं "खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च" [ ३. २. १११. ] इति मागमः, स च खित्प्रत्ययान्ते उत्तरपदे स्वरान्तस्यानव्ययस्य विहितः, तत्र दुःस्वीषतामव्ययत्वेन तेषु तत्प्राप्तिरेव नेति तेषामानन्तर्ये समाश्रिते खित्त्वं व्यर्थमेव स्यात्, अतश्च कर्तृकर्मणोरेवानन्तर्यमाश्रयणीयमिति । "भू सत्तायाम्" अतः कर्तुः परत्वे भावे विगृह्योदाहरति- दुःखेनानाढ्येनाढ्येन भूयते- दुराढ्यंभवं भवता, सुखेनानाढ्येनाढ्येन भूयते- स्वाढ्यंभवं भवता, ईषदाढ्यंभवं भवता । "डुकृंग् करणे" अतः कर्मणः परत्वे कर्मणि विगृह्योदाहरति- दुःखेनानाढ्य आढ्यः क्रियते- आढ्यंकरो मैत्रो भवता, सुखेनानाढ्य आढ्यः क्रियते- स्वाढ्यंकरश्चैत्रो भवता, ईषदाढ्यंकरश्चैत्रो भवता, सुखेनाकटः कटः क्रियन्ते-सुकटंकराणि वीरणानीति- वीरणानि तृणविशेषमूलानि, एषु खलि गुणो मागमश्च । अत्र च कर्तृकर्मणी ईषदादयश्च न प्रत्येकं प्रत्ययस्य निमित्तं, किं तर्हि ? तत्समुदायः, चकारेण ह्यत्र सन्नियोगः क्रियते, तेन कर्तृकर्मणोरीषदादीनां च युगपत् ङस्युक्तत्वं [ उपपदत्वं ] भवति, नान्यथा । यद्येवं कथं द्वयोरुपपदयोः [ ङस्युक्तयोः ] समासः, कः पुनराह युगपत् समास इति, पूर्वं हि परस्य ङस्युक्तस्य [उपपदस्य] समासं कृत्वा पश्चात् पूर्वस्य क्रियते, अथवा "ङस्युक्तं कृता" [ ३. १. ४९. ] इत्यत्रैकवचनमतन्त्रमित्यनेकस्यापि युगपदेव समासो भवति । पदकृत्यं पृच्छति- च्व्यर्थे इति किमिति, यत्र च्व्यर्थस्य न विवक्षा तत्रापि मा भूदित्याशयेन प्रत्युदाहरति- दुराढ्येन भूयते, स्वाढ्येन भूयते, ईषदाढ्येन भूयते इति । अत्र च्व्यर्थाभावं दर्शयति- आढ्य एव सन् कश्चिद् विशेषमापद्यत इत्यर्थः इति । यथा भावे प्रत्युदाहृतं तथा कर्मण्यपि प्रत्युदाहरणीयमित्याह- एवं- दुराढ्यः क्रियते इत्यादीति । ननु दुराढ्येन भूयते इत्यादौ दुःखेनाढ्येन भूयते इत्यर्थविवक्षायामपि च्व्यर्थो बलादागच्छत्येव, यथा देवदत्तेन भूयते इत्यादौ भवतेरात्मधारणमात्रमर्थस्तथा नेह, अनाढ्य एवाढ्यो भूत इहेति चेत् ? अत्राह- अभूतप्रादुर्भावेऽपि वा प्रकृतेरविवक्षणात् च्व्यर्थो नास्तीति- अस्तु नामाभूतप्रादुर्भावः किन्तु प्रकृतिविकृतिभावो न विवक्षितः, किन्तु पूर्वोक्त एव आढ्यस्य सत एव कश्चिद् विशेषः, च्व्यर्थत्वे हि प्रकृतेर्विकृतिभावस्य विवक्षा आवश्यकीति भावः । तथा चात्र च्व्यर्थो न विवक्षित इति तात्पर्यम्, विवक्षैव हि तन्नियामकत्वेनाङ्गीकृतेति ॥ ५. ३. १४०. ॥

## शासू-युधि-दृशि-धृषि-मृषातोऽनः

। ५. ३. १४१. ॥

त० प्र०- कृच्छ्राकृच्छ्रार्थदुःस्वीषत्पूर्वेभ्यः शासूप्रभृतिभ्य आकारान्तेभ्यश्च धातुभ्यो भावकर्मणोरर्थयोरनः प्रत्ययो भवति । दुःखेन शिष्यते- दुःशासनः, सुखेन शिष्यते- सुशासनः, ईषच्छासनः । एवं- दुर्योधनः, दुर्दर्शनः, दुर्धर्षणः, दुर्मर्षणः । आदन्त-दुरुत्थानं भवता, सूत्थानम्, ईषदुत्थानम् । दुष्पानं पयो भवता, सुपानम्, ईषत्पानम् । आदन्तवर्जितेभ्यः केचिद् विकल्पमिच्छन्ति, तन्मते- 'दुःशासः, दुर्योधः, दुर्दर्शः, दुर्धर्षः, दुर्मर्षः' इत्याद्यपि भवति । दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते । कथम् ईषद्दरिद्रः ? विषयेऽप्याकारस्य

**लोपेनादन्तत्वाभावात् खलेव । खलोऽपवादो योगः ॥१४१॥**

**इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधान-स्वोपज्ञशब्दानुशासनबृहद्वृत्तौ पञ्चमाध्यायस्य तृतीयः पादः ॥ ३ ॥**

**मात्रयाप्यधिकं किंचिन्न सहन्ते जिगीषवः ।**
**इतीव त्वं धरानाथ ! धारानाथमपाकृथाः ॥१॥**

---

**श० म० न्यासानुसन्धानम्- शासू०** । "शासूक् अनुशिष्टौ" अनुशिष्टिर्नियोगः । विगृह्योदाहरति- **दुःखेन शिष्यते- दुःशासनः** इति- अत्र कर्मणि अनः, एवं- **सुखेन शिष्यते- सुशासनः, ईषच्छासनः** । कर्मणि अतिदिशति- **एवमिति**, "युधिच् सम्प्रहारे" सम्प्रहारो हननम्, दुःखेन युध्यते इति- **दुर्योधनः**, अन्तर्भूतण्यर्थ इति लघुन्यासः । "दृशृं प्रेक्षणे" दुःखेन दृश्यते इति- **दुर्दर्शनः** । "मृषीच् तितिक्षायाम्" दुःखेन मृष्यते इति- **दुर्मर्षणः** । अथाकारान्तत उदाहर्तुमवतारयति- **आदन्तेति** । भावे उदाहरति- **दुरुत्थानं भवतेति**- "ष्ठां गतिनिवृत्तौ" उत्पूर्वः, दुःखेनोत्थीयते इति- दुरुत्थानं भवता, सुखेनोत्थीयते इति- **सूत्थानम्, ईषदुत्थानमिति**- "उदः स्था०" [ ४. ३. ४४. ] इति सलोपः । "पां पाने" दुःखेन पीयत इति- **दुष्पानं पयो भवता,** सुखेन पीयते इति- **सुपानम्, ईषत्पानमिति**- पयो भवतेत्यत्रापि योज्यम्, कर्मणि प्रयोगः, दुष्पानमित्यत्र "निर्दुर्बहिरा०" [ २. ३. ९. ] इति रस्य षः । मतान्तरमाह- **आदन्तवर्जितेभ्यः केचिद् विकल्पमिच्छन्तीति** । तन्मते खलपि भवतीति रूपद्वयमित्याह- **तन्मते- दुःशासः** इत्यादि । मतान्तरोक्तार्थस्य शिष्टप्रयोगानुकूलत्वं दर्शयति- **दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते** इति- आसन्नैः सुदर्शनोऽप्यन्यैर्दुर्दर्शः, राजा, आसन्नैरेव कार्याकार्यविपर्यासं कार्यत इत्यन्वयः । ये केचित् कार्याकार्ययाथातथ्यं ब्रूयुस्ते राज्ञो व्यवहिताः, आसन्नाश्च केचिद् द्वेषेणेत्थमेव राज्ञो हितमिति भ्रान्त्या वा कार्यमकारयित्वाऽकार्यमेव कारयन्तीति भावः । ननु आदन्तवर्जितेभ्य एवास्य विधेर्वैकल्पिकत्वमुक्तमादन्ताच्च नित्यमेव विधिरिति दरिद्रातेरादन्तात् कथं खलित्याशङ्कते- **कथमीषद्दरिद्र** इति, "अशित्यस०" [ ४. ३. ७७. ] इत्यशित्प्रत्ययविषयेऽपि दरिद्रातेराकारस्य लोपविधानेन प्रत्ययोत्पत्तेः पूर्वमेवाकारस्य लोपे सति आदन्तत्वमेव नास्तीति नानः, किन्तु खलेवेत्याह- **विषयेऽप्याकारस्य लोपेनादन्तत्वाभावात् खलेवेति** । कालादेः कर्मत्वविवक्षया दरिद्रातेः सकर्मकत्वेनात्र कर्मणि प्रत्ययः । अथवा दरिद्रातीति दरिद्र इति संसाध्य पश्चादीषता योग इति कर्तृप्रत्ययान्त एवायम्, किन्त्वेवं स्वीकृते शङ्कासमाधी निर्दले स्यातामिति पूर्वोक्तमेव सकर्मकत्वमाश्रयणीयमिति ॥ ५. ३. १४१. ॥

इति कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिभगवद्भिः रचिते स्वोपज्ञतत्त्वप्रकाशिकाप्रकाशे शब्दमहार्णवन्यासे त्रुटितस्थले तपोगच्छाधिपति-सूरिसम्राट्-श्रीविजयनेमिसूरीश्वरपट्टालङ्कार-कविरत्न-शास्त्रविशारद-व्याकरणवाचस्पति-श्रीविजयलावण्यसूरिनिर्मितानुसन्धानेन पूर्णतां नीते पञ्चमाध्यायस्य तृतीयः पादः समाप्तः ॥

मात्रयाऽप्यधिकं किञ्चिन्न सहन्ते जिगीषवः ।
इतीव त्वं धरानाथ ! धारानाथमपाकृथाः ॥१९॥

**अनुसन्धायकस्य-जिगीषवः** विजेतुमिच्छवो जनाः, **मात्रयाऽपि** लेशेनापि, अथ च स्वरविशेषसूचकचिह्नविशेषेणापि, **अधिकं** स्वत उत्कृष्टम्, **किञ्चित्** किमपि वस्तु, **न सहन्ते**, न मर्षयन्ति, **इतीव** इति विज्ञायेव, **धरानाथ** ! हे भूपाल !, त्वं **धारानाथं** धारानगरीपतिं भोजम्, **अपाकृथाः** अपाकार्षीः निर्जितवानित्यर्थः, त्वं धरानाथः स चात्मानं धारानाथं कथयन्, धकारव्यञ्जनयुक्तया आकारसूचिकया मात्रया आत्मानमधिकं मन्वानः, मात्रयाऽप्यधिकं किमपि सोढुमशक्नुवता त्वयाऽपाकृत इति भावः । अत्रोत्प्रेक्षालङ्कारः ॥१९॥

## ॥ अथ चतुर्थः पादः ॥

**सत्सामीप्ये सद्वद् वा । ५. ४. १. ॥**

**त० प्र०– समीपमेव सामीप्यम्, सतो– वर्तमानस्य सामीप्ये– भूते भविष्यति चार्थे वर्तमानाद् धातोः सद्वद्– वर्तमानवत् प्रत्यया वा भवन्ति। "सति" [५. २. १९.] इति सूत्रदारभ्याऽऽपादपरिसमाप्तेर्विहिताः प्रत्यया भूत-भविष्यतोर्वा अतिदिश्यन्ते। कदा चैत्रागतोऽसि ? अयमागच्छामि, आगच्छन्तमेव मां विद्धि। वावचनाद् यथा-प्राप्तं च– अयमागमम्, एषोऽस्म्यागतः। कदा मैत्र! गमिष्यसि ? एष गच्छामि, गच्छन्तमेव मां विद्धि, पक्षे-एष गमिष्यामि, गन्ताऽस्मि, गमिष्यन्तमेव मां विद्धि। वत्करणस्य साहश्यार्थत्वात् येनैव प्रकृत्युपपदोपाध्यादिना विशेषेण वर्तमाने विहितास्तेनैव विशेषेण भूत-भविष्यतोरपि भवन्ति– कदा भवान् सोमं पूतवान् पविष्यते वा ? एषोऽस्मि पवमानः। कदा भावनिष्टवान् यक्ष्यते वा ? एषोऽस्मि यजमानः। कदा भवान् कन्यामलंकृतवान् करिष्यते वा ? एषोऽस्म्यलंकरिष्णुरिति। सामीप्य इति किम् ? परुदगच्छत्, वर्षेण गमिष्यति ॥१॥**

॥ अर्हम् ॥

## अथ पञ्चमाध्ये चतुर्थः पादः।

**श० म० न्यासानुसन्धानम्– सत्सा०।** सत्सामीप्यपदार्थं व्याचिख्यासुः सामीप्यपदार्थं व्याख्याति–**समीपमेव सामीप्यमिति**, अयमाशयः– समीपस्य भावः– सामीप्यं राजादेराकृतिगणत्वात् भावे ट्यण्, समीपमेव सामीप्यं भेषजादेराकृतिगणत्वात् स्वार्थे ट्यण्, इति द्विधा सामीप्यशब्दनिष्पत्तौ कतरस्य ग्रहणमित्याशङ्कायां स्वार्थिकट्यणन्तस्य ग्रहणमित्यावेदनाय तथोक्तिः। अत्र केचिदेवमाहुः– भावार्थकस्य सामीप्यशब्दस्य ग्रहणे तस्य गुणवाचकतापत्त्या "अस्वस्थगुणैः" [ ३. १. ८७. ] इत्यनेन समासप्रतिषेधः स्यादतः स्वार्थिकप्रत्ययान्तस्यैव ग्रहणमिति। अपरे त्वेवमुपपादयन्ति– "यदि समीपस्य भावोऽभिधीयेत तद्धि स्यात्। एवं सति सतः सामीप्येन समासो न स्यात् सम्बन्धाभावात्, नहि सामीप्यस्य सता सम्बन्धोऽपि तु तत्समीपेन, तस्य तद्गुणत्वात्, ततः स्वार्थे एवायं भविष्यतीति मत्वाह–समीपमेव सामीप्यमिति" इति। एतन्मतानुसारमाचार्यस्य तथोक्तिरिति भावः। किञ्च स्वमते न समासप्रतिषेधः, तदुक्तं तस्य बृहद्वृत्तौ– "गुणशब्देन चेह रूप-रस-गन्ध-स्पर्शगुणा अभिमताः, तद्विशेषैरेव प्रतिषेधः, तेन '······वर्तमानसामीप्यम्, सत्सामीप्यम्,······' इत्यादौ न प्रतिषेधः।" इति। परम्परया सम्बन्धाच्च समासोऽपि भवति, साक्षात्सम्बन्धाभिमाने तु स्वार्थे टयण् इति विज्ञेयम्। ननु किमर्थं पुनः स्वार्थिकं टयणं विधायैवं निर्देशः क्रियते, न 'सत्समीपे' इत्येवोच्येत यतो लाघवमपि भवतीति चेत् ? अत्र केचित् टयणः स्वार्थिकत्वं ज्ञाप्यते, टयणपि स्यादनेनेति, स्वार्थे टयणपि भवतीत्यमुमर्थं ज्ञापयितुं टयण् कृत इति भावः। ज्ञापनप्रयोजनं तु चातुर्वर्ण्यचातुराश्रम्यादीनां सिद्धिरिति। अपरे तु– 'सत्समीपे' इत्यनुक्त्वा 'सत्सामीप्ये' इति कथनेन सामीप्यशब्दस्य भावप्रधानत्वमातिष्ठन्ते, तन्मते यद्यपि समासशङ्कोदेति तथापि तैः पारम्पर्येण सम्बन्धस्वीकारान्न दोषः। तथाहि–तत्र समीपद्वारा सामीप्येन सम्बन्धः, प्रतियोगितासम्बन्धेनान्वयः। वर्तमानकालप्रतियोगिसामीप्ये सति, अर्थाद् भूतभविष्यतोरित्यर्थः, वर्तमानकालो हि मध्यवर्ती, तत्प्रतियोगिकं सामीप्यमुभयोरेव सम्भवति, भूतस्य भविष्यतश्चेति भावः। एवं च भूतादौ वर्तमानसामीप्ये सति वर्तमानवत् प्रत्यया इति वाच्योऽर्थः। अथास्मिन् पक्षे गुणेन सह षष्ठीसमासप्रतिषेधः कथं नेति चेत् ? अत्राचक्षते– शुक्लादीनां गुणानामस्वस्थत्वेन विवक्षितानामेव समासप्रतिषेधः, यदि तद्गतत्वेन समवायेन ते विवक्ष्यन्ते तदा न निषेध इति। अन्ये तु ब्रुवते–गुणशब्दस्य सम्बन्धिशब्दत्वात् गुणाक्षिप्तस्य गुणिन एव समासप्रतिषेधः, न च वर्तमानः सामीप्यस्य गुणी, तस्य प्रतियोगितयान्वयस्योक्तत्वात्, गुणिनश्चानुयोगित्वात्। अनुयोगिनौ हि भूतभविष्यन्ताविति, अलं प्रसक्तानुप्रसक्तवर्णनया। 'सत्'शब्दस्यानेकार्थत्वेन प्रकृतोपयोगिनमर्थमाह– **सतो वर्तमानस्य, सामीप्ये–** सामीप्यवतीत्यर्थः, स्वार्थे ट्यणो विधानात्। तादृशसामीप्यवानिह क इत्याह– **भूते भविष्यति चार्थे** इति। सन्

इवेति सद्वत् "स्यादेरिवे" [ ७. १. ५२. ] इति सादृश्ये क्रियार्थे वत्, एतदेवाह- **वर्तमानवत् प्रत्यया वा भवन्तीति**- न केवलं वर्तमानाया एवातिदेशोऽपि तु सत्यधिकारविहितानां सर्वेषामिति द्योतयितुं प्रत्यया इति बहुवचनम् । एतदेव स्फोरयति- **"सति" [ ५. २. १९. ] इति सूत्रादारभ्ये**त्यादिना । **कदा चैत्र ! आगतोऽसीति** भूतकालेन प्रश्नवाक्यम्, **अयमागच्छामी**त्युत्तरवाक्ये भूतकालाभिव्यक्तये 'अयम्' इति प्रयोगः, तस्यायं भावः- इदानीमेवागममिति वर्तमानसमीपभूतकालद्योतनम्, तेन ह्यागमनाविनाभूतं यद् रूपं धूलिधूसरपादताप्रस्वेदादियुक्तं तत् प्रतिनिर्दिश्यते । **आगच्छन्तमेव मां विद्धी**त्यनेन स्पष्टमेव सामीप्यं प्रतिपाद्यते । एवं- **कदा मैत्र ! गमिष्यसी**ति भविष्यत्कालेन प्रश्नवाक्यम्, **एष गच्छामी**ति ह्युत्तरवाक्ये भविष्यत्कालाभिव्यक्तये 'एष' इति प्रयोगः, तेन हि इदानीमेव गमिष्यामीति वर्तमानसमीपभविष्यत्कालद्योतनम्, तथाहि- गमनाविनाभूतं यद् रूपं परिकरबन्धादियुक्तं तत् प्रतिनिर्दिश्यते, न च कदेति पदेन प्रश्ने तदुत्तरवाक्ययोः कालानुपादानादसंगतिः शङ्क्या, उत्तरवाक्ये 'अयम्-एष'-शब्दाभ्यामिदानीमिति कालवाचकपदोपक्षेपात् । विकल्पप्रयोजनमाह- **वावचनाद् यथाप्राप्तं चे**ति- सद्वद्भावस्य विकल्पेन विधानात् तन्मुक्तपक्षे यथाविधि वर्तमानसमीपे भूतेऽद्यतन्यादिप्रत्ययः, तादृशे भविष्यति च भविष्यन्त्यादिप्रत्यय इत्यर्थः । चकारो वर्तमानसमुच्चयार्थः । तादृशप्रयोगमाह- **अयमागम**मिति- इदमुत्तरवाक्यम्, "गम्लृं गतौ" अतो वर्तमानसमीपे भूतेऽद्यतन्या अम्प्रत्ययः "लृदिद्-द्युतादिपुष्यादेः" [ ३. ४. ६४. ] इत्यङ् च । एवम्- **एषोऽस्म्यागतः** इत्यत्र गत्यर्थत्वात् भूते कर्तरि क्तः, धातोरनिट्त्वाच्च नेट्, प्रत्ययस्य कित्त्वाच्च मलोपः । एवं वर्तमानसमीपे भविष्यति उदाहर्तुमाह- **पक्षे एष गमिष्यामी**ति-अत्र भविष्यन्त्याः स्यामिप्रत्ययः, "गमोऽनात्मने" [ ४. ४. ५१. ] इति चेट् । एवम्- **गन्तास्मी**ति- अत्र श्वस्तनीताप्रत्ययः, **गमिष्यन्तमेव मां विद्धी**ति-अत्र "शत्रानशावेष्यति तु सस्यौ" [५. २. २०.] इति स्यसहितः शतृप्रत्ययः । त्रीण्यप्युत्तरवाक्यानि । अत्र वत्करणं किमर्थम् ? यावता "सत्सामीप्ये सन् वा" इत्युच्यमाने वर्तमानकालविहिताः प्रत्ययाः सत्सामीप्ये भवन्तीत्येषोऽर्थो लभ्यत एवेत्यत आह- **वत्करणस्य सादृश्यार्थत्वा**दित्यादि । असति वत्करणे वर्तमानकालेन रूपमात्रमेषां प्रत्ययानामुपलक्ष्यते, न तु प्रकृत्यादय उपादीयेरन्, ततश्च धातुमात्रात् स्युः । वत्करणे तु सति सर्वसादृश्यं गम्यते तत्रैव वतो विधानात्, तेन संकरो न भवति । तमेव संकराभावं दर्शयितुमाह- **येने**त्यादि, एवं हि सर्वसादृश्यं भवति, येन विशेषेण वर्तमाने विहितास्तेनैव वर्तमानसामीप्ये भवन्ति, नान्यथा । **प्रकृत्युपपदोपाधिने**ति-आदिशब्देनोपाधेरभिधेयस्य च ग्रहणम् । तदेव प्रश्नोत्तरवाक्याभ्यामुदाहरति- **कदा भवान् सोमं पूतवान् पविष्यते वा ?** इति- अत्र 'कदा भवान् सोमं पूतवान्, कदा भवान् सोमं पविष्यते' इति प्रश्नवाक्यद्वयम्, **एषोऽस्मि पवमानः** इति एकमुत्तरवाक्यम्, एवं- **कदा भवान् इष्टवान् यक्ष्यते वा ?** इत्यत्र 'कदा भवान् इष्टवान्, कदा भवान् यक्ष्यते' इति प्रश्नवाक्यद्वयम्, उत्तरवाक्यं तु **'एषोऽस्मि पवमानः'** इत्येकमेव, "पूङ् पवने" "यजीं देवपूजादौ, आभ्यां "पूङ्-यजोः शानः" [ ५. २. २३. ] इति सति शानो विहितः, स च वर्तमानसामीप्येऽपि ताभ्यामेव भवति, न धात्वन्तरात् । **कदा भवान् कन्यामलंकृतवान् करिष्यते वा ?** इति- अत्रापि 'कदा भवान् कन्यामलंकृतवान्, कदा भवान् कन्यामलंकरिष्यते' इति प्रश्नवाक्यद्वयम्, उत्तरवाक्यं तु **'एषोऽस्म्यलंकरिष्णुः'** इत्येकमेव, "डुकृंग् करणे" अलंपूर्वादतः "भ्राज्यलंकृग्०" [ ५. २. २८. ] इत्यनेन ताच्छील्यादिविशिष्टे कर्तरि इष्णुर्विहितः, वर्तमानसामीप्येऽपि तत्पूर्वादेव भवति । पदकृत्यं पृच्छति- **सामीप्य इति किमिति,** उत्तरयति- **परुदगच्छ**दिति- तस्मिन्नेव चार्थे विप्रकर्षविवक्षायां ह्यस्तन्येव भवति । एवं- **वर्षेण गमिष्यती**ति- अत्र विप्रकर्षविवक्षायां भविष्यन्त्येव भवति ।

अत्र काशिकाकारः- "यो मन्यते गच्छामीति पदं वर्तमानकाल एव वर्तते, कालान्तरावगतिस्तु वाक्याद् भवति, न च वाक्यगम्यः कालः पदसंस्कारवेलायामुपयुज्यत इति तादृशवाक्यार्थप्रतिपत्तारं प्रति प्रकरणमिदं नारभ्यते । तथा च श्वः करिष्यति, वर्षेण गमिष्यतीति सर्वमुपपद्यते ।" इति ।

**तद्विवरणं चेत्थम्**- "यो मन्यत इत्यादिनापि प्रसि-

पत्तृविशेषं प्रति सूत्रं प्रत्याचष्टे । कालान्तरगतिस्स्वित्यादि- कालान्तरं वर्तमानसमीपो भूतो भविष्यंश्च कालः, तस्य या गतिः प्रतीतिः । आगच्छामीत्यस्य पदस्य वर्तमानकालविशेषेऽप्ययं गच्छामीत्यतो वाक्यात् कदा देवदत्त ! गमिष्यसीत्येतद्वाक्यसमनन्तरं प्रयुज्यमानाद् भवति। वाक्यगम्योऽपि कालो यदि पदसंस्कारवेलायामुपयुज्यते युज्येत सूत्रारम्भः । न चासौ तत्रोपयुज्यते यस्माच्छास्त्रेण पदस्य संस्कारः क्रियते, न वाक्यस्य । पदे संस्क्रियमाणे तद्गम्य एव काल उपयुज्यते, न वाक्यगम्य इत्यभिप्रायः। इतिकरणः प्रकृतप्रत्ययवमर्शक इति । एवं यो मन्यते अवगच्छति तं प्रतीदं नारब्धव्यमेव । यदर्थमारभ्यते तेषां प्रत्ययानां "वर्तमाने लट्" [ ३. २. १२३. ] इत्यादिनैव शास्त्रेण [ स्वमते "सति" ५-२-६, इत्यादिना ] सिद्धत्वात् । प्रकरणग्रहणेन न केवलमिदं सूत्रं नारब्धव्यमपि तु "आशंसायां भूतवच्च" [ ३. ३. १३२. ] [ स्वमते "भूतवच्चाशंस्ये वा" ५. ४. २. ] इत्यादीन्यपि नारब्धव्यानीति दर्शयति । तादृशमित्यादि-एवं च यस्तु तादृशः प्रतिपत्ता न भवति मन्दबुद्धिस्तं प्रति आरब्धव्यमेवेत्युक्तं भवति, नह्यसावेवं न्यायेन प्रतिपत्तुं समर्थः । तथा चेत्यादि- यस्मात् तत्रैवं वाक्यगम्यः कालः पदसंस्कारवेलायां नोपयुज्यते, एवं च सति श्वः करिष्यतीत्येवमाद्युपयुज्यते । तत्रापि हि करिष्यतीत्येतत् पदं भविष्यत्येव काले वर्तत इति "लृट् शेषे च" [ ३. ३. १३. ] इत्येव लृट् सिद्धः [ "भविष्यन्ती" ५. ३. ४. इत्येव भविष्यन्ती सिद्धा ] भविष्यदनद्यतनस्तु कालोऽयम् । यद्युत्तरकालः प्रतीयते तथाप्यसौ वाक्यार्थ इति पदसंस्कारे नाश्रीयते । यदि तु वाक्यगम्योऽपि कालः पदसंस्कारे समाश्रीयेत तदा तु करिष्यतीत्येवमादि नोपपद्येत भविष्यदनद्यतने लुटैव [ श्वस्तन्यैव ] भवितव्यमिति कृत्वा ।। ५. ४. १. ।।

## भूतवच्चाऽऽशंस्ये वा । ५. ४. २. ।।

**त० प्र०- अनागतस्य प्रियस्यार्थस्याशंसनं प्राप्तुमिच्छा- आशंसा, तद्विषय आशंस्यः, तस्मिन्नर्थे वर्तमानाद् धातोर्भूतवच्चकारात् सद्वच्च प्रत्यया वा भवन्ति। आशंस्यस्य भविष्यत्त्वादयमतिदेशः । वाग्रहणाद् यथाप्राप्तं च । उपाध्यायश्चेदागमत्, एते तर्कमध्यगीष्महि; उपाध्यायश्चेदागतः, एतैस्तर्कोऽधीतः; उपाध्यायश्चेदागच्छति, एते तर्कमधीमहे । पक्षे-उपाध्यायश्चेदागमिष्यति, एते तर्कमध्येष्यामहे; उपाध्यायश्चेदागन्ता, एते तर्कमध्येतास्महे । सामान्यस्यातिदेशे विशेषस्यानतिदेशात् ह्यस्तनी-परोक्षे न भवतः। आशंस्य इति किम् ? उपाध्याय आगमिष्यति तर्कमध्येष्यते मंत्रः ।।२।।**

**श० म० न्यासानुसन्धानम्- भूत० । अनागतस्ये**ति- अप्राप्तस्येति भावः । "आङः शसुङ् इच्छायाम्" आङ इति आङः पर एवायं प्रयुज्यते नान्योपसर्गान्नापि केवल इति ज्ञापनार्थम्, उदित्त्वाञ्च "क्तेटो०" [ ५. ३. १०६. ] इति स्त्रियामे आपि च- आशंसा, यद्यपीयं वर्तमाना तथापि तद्विषयस्य भविष्यत्त्वात् भविष्यत्कालेत्युच्यते । तदाह- **आशंस्यस्य भविष्यत्त्वादयमतिदेश** इति, तथा च तत्र स्वतो भूतत्ववर्तमानत्वयोरभाव इति तौ धर्मावतिदेशेनैव लभ्यौ, एवं च- आशंसाविषये आशंस्यमानक्रियावचनाद् धातोर्भूतवद् वर्तमानवच्च प्रत्यया भवन्तीत्यर्थः सम्पद्यते । पक्षे भविष्यन्ती-श्वस्तन्यावपि भवत इत्याह- **वावचनाद् यथाप्राप्तं चे**ति । **उपाध्यायश्चेदागमत्, एते तर्कमध्यगीष्महीति**-गम्धातोरद्यतन्याः प्रथमत्रिकैकवचनेऽङि- आगमदिति । "इङ्क् अध्ययने" नित्यमधिपूर्वः, अतोऽद्यतन्यास्तृतीयत्रिकबहुवचने महिप्रत्यये सिचि "वाऽद्यतनी०" [ ४. ४. २८. ] इति गीङादेशे ङित्वाद् गुणाभावे च- अध्यगीष्महीति । **उपाध्यायश्चेदागतः, एतैस्तर्कोऽधीतः** इति, भूते कर्तरि क्ते मलोपे च- आगत इति, भूते कर्मणि क्ते- अधीत इति । **उपाध्यायश्चेदागच्छति, एते तर्कमधीमहे** इति- वर्तमानातिवि शवि मस्य छादेशे- आगच्छतीति, वर्तमानामहेप्रत्यये- अधीमहे इति । अतिदेशस्य वैकल्पिकत्वात् पक्षे भविष्यत्प्रत्यय इत्याह- पक्षे- **उपाध्यायश्चेदागमिष्यति, एते तर्कमध्येष्यामहे** इति- भविष्यन्त्याः ष्यतिप्रत्यये "गमोऽनात्मने" [४. ४. ५१.] इतीटि-आगमिष्यति, भविष्यन्त्याः स्यामहेप्रत्यये-अध्येष्यामहे इति । **उपाध्यायश्चेदागन्ता, एते तर्कमध्येतास्महे** इति- श्वस्तनीताप्रत्यये- आगन्ता, तास्महेप्रत्यये तु अध्येतास्महे । ननु भूतवदित्यतिदेशाद् भूते ये प्रत्यया उक्तास्ते सर्वेऽपि स्युरिति ह्यस्तनी-परोक्षे अपि स्यातामिति चेत् ? अत्राह- **सामान्यातिदेशे विशेषा-**

**नतिदेशाद् ह्यस्तनी-परोक्षे न भवतः** इति– भूतसामान्यस्यातिदेशोऽयम्, भूतविशेषप्रत्ययौ च ह्यस्तनी-परोक्षे, सामान्यातिदेशे विशेषानतिदेशः, ताविह न भवतः। अयमाशयः– अपवादो हि स्वनिमित्ते सति प्रवर्तेत, तत्राद्यतनी सामान्यतो भूतार्थाद् धातोर्विहितेति सोत्सर्गः, ह्यस्तनीपरोक्षे तदपवादभूते, तत्र यदि परोक्षत्वेनानद्यतनत्वेन च सह भूतत्वातिदेशः स्यात् स्यात् तयोर्निमित्तं न तु तथातिदिश्यत इति निमित्ताभावात् ते न स्तः। पदकृत्यं पृच्छति– **आशंस्य इति किमिति**, उत्तरयति– **उपाध्याय आगमिष्यति तर्कमध्येष्यते मैत्रः** इति– अत्रोपाध्यायागमनं यद्यप्यनागतं तथापि नाशंसाविषयः, तदागमनस्य निश्चितत्वेन विवक्षितत्वात्, तथा चात्रापि भूतवद् वर्तमानवद् वा प्रत्ययो मास्त्विति आशंस्य इत्युक्तम् ॥ ५. ४. २. ॥

## क्षिप्राऽऽशंसाऽर्थयोर्भविष्यन्ती-सप्तम्यौ

। ५. ४. ३. ॥

**त० प्र०– क्षिप्रार्थे आशंसार्थे चोपपदे आशंस्येऽर्थे वर्तमानाद् धातोर्यथासंख्यं भविष्यन्ती-सप्तम्यौ विभक्ती भवतः। भूतवच्चेत्यस्यापवादः। उपाध्यायश्चेदागच्छति आगमत् आगमिष्यति आगन्ता, क्षिप्रमाशु त्वरितमरं शीघ्रमेते सिद्धान्तमध्येष्यामहे। क्षिप्रार्थे नेति वक्तव्ये भविष्यन्तीवचनं श्वस्तनीविषयेऽपि भविष्यन्ती यथा स्यादित्येवमर्थम्। उपाध्यायश्चेच्छ्वः शीघ्रमागमिष्यति, एते श्वः क्षिप्रमध्येष्यामहे। आशंसार्थे खल्वपि– उपाध्यायश्चेदागच्छति आगमत् आगमिष्यति आगन्ता वा, आशंसेऽवकल्पये संभावये युक्तोऽधीयीय। द्वयोरुपपदयोः सप्तम्येव भवति शब्दतः परत्वात्– आशंसे क्षिप्रमधीयीय ॥३॥**

**श० म० न्यासानुसन्धानम्– क्षिप्रा०। यथासंख्यमिति**– क्षिप्रार्थे भविष्यन्ती, आशंसावाचिनि चोपपदे श्वस्तनीत्यर्थः। अथ क्षिप्रार्थे आशंसार्थे चोपपदे आशंस्य एवार्थे वर्तमानाद् धातोर्भविष्यन्ती-सप्तम्यौ विधीयेते, तत्राशंस्यस्य भविष्यत्त्वात् भविष्यन्ती सिद्धैव, "विधिनिमन्त्रणा०" [ ५. ४. २८. ] इति सप्तम्यपि प्रार्थनारूपत्वात्, किमर्थमिदमुच्यते इत्याह– **भूतवच्चेत्यस्यापवादः** इति– "भूतवच्चाशंस्ये वा" [ ५. ४. २. ] इत्यस्मिन् प्राप्तेऽस्यारम्भात्। **उपाध्यायश्चेदागच्छति, आगमत्**, इति– अत्र पूर्वेण वर्तमाना अद्यतनी च, **आगमिष्यति, आगन्तेति**– पूर्वस्य वैकल्पिकत्वात् पक्षे भविष्यन्ती श्वस्तनी च, **क्षिप्रमाशु त्वरितमरं शीघ्रमेते सिद्धान्तमध्येष्यामहे** इति– अत्र क्षिप्रार्थे उपपदेऽनेन भविष्यन्ती। शङ्कते– **'क्षिप्रार्थे न' इति वक्तव्ये** इति, अयमाशयः– आशंसाविषये एवायमपि योगः प्रवर्तते, आशंसाविषयश्च भविष्यत्कालिक एवेति पूर्वसूत्रे समुपपादितम्, तथा च क्षिप्रार्थे उपपदे पूर्वोक्तं न भवतीति कथिते भविष्यत्कालिकी भविष्यन्ती स्यादेवेति भविष्यन्तीवचनं व्यर्थम्, क्षिप्रार्थे न, आशंसार्थे सप्तमीति पृथक् पृथक् वाक्यार्थः सम्पादनीयस्तथा च लाघवमिति। यद्यपि पदगौरवस्य योगविभागेन परिहारः क्रियते, तथापि पदगौरवाद् योगविभागो गरीयानिति न्यायानादरेण शङ्का बोध्या। **श्वस्तनीविषयेऽपि भविष्यन्ती यथा स्यादिति**, अयमाशयः– भविष्यत्कालो द्विधाऽद्यतनोऽनद्यतनश्च, तथा च यत्रानद्यतनत्वेन स विवक्ष्यते तत्र 'क्षिप्रार्थे न' इत्यनेन भूतवद् वर्तमानवत् प्रत्ययानां निवर्तनेऽपि श्वस्तनी स्यात् तस्या विशेषविहितत्वेनापवादत्वात्। प्रतिपदोक्ततया तद्विधाने हि सा पूर्वविहितां श्वस्तनीं बाधत इति तत्रापि भविष्यन्त्येव भवतीति। तदेवोदाहरति– **उपाध्यायश्चेच्छ्वः शीघ्रमागमिष्यति, एते श्वः शीघ्रमध्येष्यामहे** इति– अत्रानद्यतनभविष्यत्कालेऽपि श्वस्तनीं प्रबाध्य भविष्यन्ती जातेत्यर्थः। **एते श्वः क्षिप्रमध्येष्यामहे** इति– अत्र क्षिप्रार्थयोगेऽनेन भविष्यन्ती। अथाशंसार्थे उपपदे उदाहरणावसर इत्याह– **आशंसार्थे खल्वपीति। उपाध्यायश्चेदागच्छति आगमत्** इति– अत्र पूर्वसूत्रेण वर्तमाना अद्यतनी च, तस्य वैकल्पिकत्वात् पक्षे– अद्यतनभविष्यति भविष्यन्त्याम्– **आगमिष्यतीति**। अनद्यतनभविष्यति च श्वस्तन्याम्– **आगन्तेति**। **आशंसेऽवकल्पये सम्भावये, युक्तोऽधीयीयेति**– अत्राशंसार्थयोगेऽनेन सप्तम्यामधीयीयेति। 'आशंसे' इत्यादौ तु निसर्गजा वर्तमाना ज्ञेया वर्तमानकालवृत्तित्वादाशंसायाः। ननु क्षिप्रवाचिनि आशंसावाचिनि चोपपदे कया विभक्त्या भवितव्यमुभयोरपि निमित्तसद्भावात् पर्यायेणोभयोरपि विधानस्य प्राप्तत्वादित्याशङ्कायामाह– **द्वयो-**

**रुपपदयोः सप्तम्येव भवती**ति, तत्र मूलमाह– **शब्दतः परत्वा**दिति. अयमाशयः– परत्वं हि शब्दरूपेषु सूत्रेषु परकालोच्चरितत्वमेव, अस्ति च क्षिप्रार्थकशब्दात् परकाले आशंसार्थकशब्दस्य, भविष्यन्तीशब्दात् परकाले च सप्तमीशब्दस्योच्चरितत्वमिति । न चैकयोगे पूर्वत्वपरत्वाभाव इति किञ्चिदाचार्यवचनं प्रमाणम् । एतच्च "क्षिप्रवचने लृट्" [ ३. ३. ११३. ] इति सूत्रे भाष्येऽप्युक्तम्, तत्र यद्यपि पृथगेव सूत्रम् "आशंसावचने लिङ्" [ ३. ३. १३४. ] इति, तथापि तत्र का व्यवस्थेति शङ्कितम्, एवमेवोत्तरितं च ॥ ५. ४. ३. ॥

## संभावने सिद्धवत् । ५. ४. ४. ॥

**त० प्र०– हेतोः शक्तिश्रद्धानं-संभावनम्, तस्मिन् विषयेऽसिद्धेऽपि वस्तुनि सिद्धवत् प्रत्यया भवन्ति ।**

**समये चेत् प्रयत्नोऽभूत्, उदभूवन् विभूतयः ।**
**इषे चेन्माधवोऽवर्षीत्, समपत्सत शालयः ॥**
**जातश्चायं मुखेन्दुश्चेत्, भृकुटिप्रणयी पुनः ।**
**गतं च वसुदेवस्य, कुलं नामावशेषताम् ॥४॥**

**श० म० न्यासानुसन्धानम्– सम्भा०** । सम्भावनं व्याचष्टे– **हेतोः शक्ति श्रद्धानमि**ति–कारणे कार्योत्पादनशक्तेर्विश्वास इति भावः, यथा कारणमिदमुपपन्नं तथा विज्ञापनकार्यमप्युपपन्नमेवेति निश्चयनमिति, तत्र कारणे सति कार्यं कदाचिन्नापि भवति, यथा तृणादिसमवधानेऽपि चन्द्रकान्तमणिप्रतिबद्धेन वह्निना दाहो न जन्यते, किन्तु सर्वदा तन्न निश्चितं यद् विरोधिकारणमायास्यत्येवेति, कारणदर्शने कार्यसिद्धिः सम्भाव्यत एव । **तस्मिन् विषये** इति– सम्भावने विषयभूते सतीत्यर्थः । **समये चेत् प्रयत्नोऽभूत् उदभूवन् विभूतयः** इति– यद्यपि प्रयत्नस्याप्यनिष्पन्नत्वमेवेति कारणसत्ताप्यनिश्चिता तथापि कारणस्यापि कारणे सति कारणस्यापि सम्पन्नत्वं सम्भाव्यते, प्रयत्नकारणभूताया इच्छायाः सत्त्वेन प्रयत्नस्यापि सम्पन्नत्वेन सम्भावना । तथा च विभूत्युद्भवे कारणभूतस्य प्रयत्नस्य विभूत्युद्भावने विश्वास इह प्रयोक्तुर्विवक्षित इति । एवम्– **इषे चेन्माधवोऽवर्षीत् समपत्सत शालयः** इति– इषे आश्विने मासि । अत्रापि शालिसम्पत्तिहेतुभूताया वृष्टेः सत्त्वे शालिसम्पत्तिर्निश्चितेति विवक्षा । **जातश्चायं मुखेन्दुश्चेत्, भृकुटिप्रणयी पुनरि**ति– भ्रुवः कौटिल्येन संचारणशीलोऽयं गोपीसम्बन्धी मुखेन्दुर्जातश्चेत्, मुखेन्दौ पूर्वं सत्त्वेऽपि तत्र बाल्याद् भ्रुकुटिप्रणयित्वं नासीत्, सम्प्रति सति तारुण्ये तद्विषयत्वेनास्य जन्मान्तरसम्पत्तिरिव विवक्षिता, तत्सम्पत्तौ च वसुदेवकुलस्य नामशेषताऽपि सम्पन्नैव, वसुदेवकुलं हि वासुदेवमात्रायत्तम्, स च तन्मुखेन्दुनिघ्न इति ततोऽस्य विरत्यसम्भवेन, कः कुलं धारयिष्यति तदुचितकृत्यैरिति नाममात्रमेवावशिष्टं मन्तव्यमिति भावः । तथा च सर्वत्रासिद्धेऽपि वस्तुनि कारणसम्पत्त्या सिद्धवत्कृत्यविवक्षिते भूतवत् प्रत्यया उदाहृताः ।

पाणिनीये च नेदं सूत्रं कृतम्, तत्रेत्थं शङ्कासमाधी भाष्ये [ ३. ३. १३३. ] दृश्येते– "अनिष्पन्ने निष्पन्नशब्दः शिष्योऽनिष्पन्नत्वात् । अनिष्पन्ने निष्पन्नशब्दः शिष्यः– शासितव्यः । किं कारणम् ? अनिष्पन्नत्वात् । देवश्चेद् वृष्टो निष्पन्नाः शालयः । तत्र भवितव्यं 'सम्पत्स्यन्ते शालय' इति । सिद्धं तु भविष्यत्प्रतिषेधात् । सिद्धमेतत् । कथम् ? भविष्यत्प्रतिषेधात् । यल्लोको भविष्यद्वाचिनः शब्दस्य प्रयोगं न मृष्यति । कश्चिदाह 'देवश्चेद् वृष्टः सम्पत्स्यन्ते शालयः' इति । स उच्यते 'मैवं वोचः, सम्पन्नाः शालय इत्येवं ब्रूहि'' ।

अयमाशयः– लोकस्यायं स्वभाव एव यत् कारणसम्पत्तौ कार्यं सम्पन्नमेव, न च तत्र सन्देहविषयीभूतं भविष्यत्कालप्रयोगं सहते । तथा च लोकत एवात्र सिद्धवत् प्रयोगः सिद्ध इति नावश्यकता निष्पन्नशब्दोपपत्त्ये वचनस्येति । यदि लोकव्यवहारेणैव शास्त्रीयं प्रयोजनमेवं प्रत्याख्यायेत कृतं शास्त्रेण, अशास्त्रज्ञोऽपि लोको यथारुचि व्यवहृत्य स्वाभिप्रायं प्रकटयत्येव, तत्र हि शास्त्रेण साधुत्वान्वाख्यानं क्रियते– एवं कर्तव्यमेवं नेति, तदर्थं च वचनस्यावश्यकतेति शङ्कां मनसि संभाव्य समाधानान्तरमाह भाष्यकारः–

"हेतुभूतकालसम्प्रेक्षितत्वाद् वा । हेतुभूतकालसंप्रेक्षितत्वाद् वा पुनः सिद्धमेतत् । हेतुभूतकालं वर्षं, वर्षकाला च क्रिया । यदि तर्हि निष्पन्नोऽर्थः किं निष्पन्नकार्याणि न क्रियन्ते ? । कानि ? भोजनादीनि । अन्यदिदानीमेतदुच्यते– किं निष्पन्नकार्याणि न क्रियन्त इति । यत् तु तन्निष्पन्नोऽर्थो न निष्पन्न इति स निष्पन्नोऽर्थः । अवश्यं खल्वपि कोष्ठगतेष्वपि शालिष्ववहननादीनि प्रतीक्ष्याणि ।

एवमिहापि निष्पन्नोऽर्थोऽवश्यं तु जननादीनि प्रतीक्ष्याणि" ।

अयमाशयः– 'देवश्चेद् वृष्टः सम्पन्नाः शालयः' इत्यादौ कारणसम्बन्धी कालः कारणान्तराभावप्रतिपादनाय कार्यस्य व्यवस्थाप्यते । हेतुभूतवर्षादिर्यः कालः स एव शालिसम्पत्तिरूपकार्यस्य संप्रेक्षितः कारणस्यैव कार्यरूपतया विवक्षितत्वात्, कार्यकारणयोरभेदाध्यवसानाच्चास्य संगतिः । एतदेव भाष्ये भङ्ग्यन्तरेण प्रतिपादितं– हेतुभूतकालं वर्षमित्यादिना, हेतुभूतस्य मेघादेर्यः कालः, वृष्टेः कारणं मेघः, स च भूतकालिकस्तस्य यः कालः स एव वृष्टेः सस्यसम्पत्तेः कारणभूतायाः कालः, वर्षस्य च यः स एव सस्यनिष्पत्तिक्रियायाः । अयमत्र निष्कर्षः– मेघं दृष्ट्वैवेदृशः प्रयोगः क्रियते, तथा च वृष्टेरपि तत्रानिष्पन्नत्वमेव, एवं च मेघकाल एव वृष्टिविषये प्रयुज्यते मेघस्यावश्यं वृष्टिप्रदत्वसम्भावनया । तथा च वृष्टौ समायाता भूतकालता तत्कार्ये सम्पत्तावपि प्रयुज्यत इति न्यायसंगत एवायमर्थ इति नात्र शास्त्रेणातिदेशापेक्षेति । अत्रापरः शङ्कते– यदि निष्पन्नोऽर्थः शालिरूप इति मन्यते तर्हि तन्निमित्तकानि भोजनादीनि कार्याणि कुतो न क्रियन्त इति । अत्रोच्यते– कस्यचिद् वस्तुनो विद्यमानत्वमात्रेण न तन्निमित्तकं कार्यं भवत्येव किञ्चित् कार्यं प्रति बहूनां कारणानामावश्यकत्वात् । कार्यस्य कारणरूपतयाऽध्यवसानात् तस्य तेन रूपेण सत्त्वेऽपि जननाद्यपेक्षा– अभिव्यक्त्यपेक्षाऽस्त्येव । एतदुक्तं भवति– विद्यमानोऽप्यर्थोऽनभिव्यक्तोऽर्थक्रियां न करोति, गृहे घटः सन्नपि प्रदीपप्रकाशादिनाऽभिव्यक्त एव कार्यायोपयुज्यते, न चैतावता तस्यासत्त्वम्, कारणसामग्र्या कार्योत्पादानुमानात् । स्थूलेन रूपेणाभिव्यक्तोऽर्थक्रियां सम्पादयति, न केवलं स्थूलरूपाभिव्यक्तिरेवापेक्षिता, स्थूलतयाऽभिव्यक्तान्यपि सस्यानि कोष्ठगतानि न भोजनादिकार्यं निर्वर्तयितुमलं भवन्ति, अवघातपाकादीन्यपेक्षन्त एव । एवमिह सम्पन्ना अपि व्रीहयः कार्यसम्पादनाय स्थूलामभिव्यक्तिमपेक्षन्त इति । न च कार्यनिष्पत्तिसमधिगम्यं सामग्रीत्वं, सामग्रीनिष्पत्त्या च कार्यानुमानमित्यन्योऽन्याश्रयसत्त्वेन कथमिह वृष्टिसामग्रीसत्त्वेन कार्यवृष्ट्यनुमानं तदनुमाने च सस्य सम्पत्त्यनुमानमिति चेत् ? वृद्धपरम्परया सामग्रीत्वग्रहात् । वृद्धैः पूर्वपूर्वतरकारणेषु कार्यकारित्वस्य दृष्टतया सामग्रीत्वग्रहे निश्चितेऽस्माभिरपि तद्व्यवहारं दृष्ट्वा तथानुमानस्य कर्तुं शक्यत्वात् । तथा चावश्यंभावित्वेन कार्योत्पत्तावनुमितायां तत्र कालारोपेण भूतप्रयोगेऽपि स्थूलरूपेणाभिव्यक्तिजननोत्तरमेवक्रियाकारित्वमिति भावः । स्वमते चास्यैव लौकिकव्यवहारस्य साधुत्वानुमतये 'व्याख्यानाद् वरं करणम्' इति न्यायेन वचनमेवादृतमिति ॥ ५. ४. ४. ॥

## नाऽनद्यतनः प्रबन्धाऽऽसत्त्योः । ५. ४. ५. ॥

**त० प्र०– प्रबन्धः सातत्यम्, आसत्तिः सामीप्यम्, तच्च कालतः, सजातीयेन कालेनाव्यवहितकालतेति यावत् । धात्वर्थस्य प्रबन्धे आसत्तौ च गम्यमानायां धातोरनद्यतनविहितः प्रत्ययो न भवति । भूतानद्यतने ह्यस्तनी भविष्यदनद्यतने च श्वस्तनी विहिता तयोः प्रतिषेधः । यावज्जीवं भृशमन्नमदात्, यावज्जीवं भृशमन्नं दत्तवान्, यावज्जीवं भृशमन्नं दास्यति; यावज्जीवं युक्तोऽध्यापिपत्, यावज्जीवं युक्तोऽध्यापयिष्यति । आसत्तौ खल्वपि– येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रावर्तिष्ट, प्रवृत्तः । येयं पौर्णमास्यागामिनी अस्यां जिनमहः प्रवर्तिष्यते । द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञानाय । केचित् तु– अनद्यतनविशेषविहितानामपि परोक्षादीनां प्रतिषेधमिच्छन्ति ॥५॥**

**श० म० न्यासानुसन्धानम्– नानद्य०** । पदार्थमाह– **प्रबन्धः सातत्यमिति**– प्रवृत्तोऽनिवृत्तो बन्धः कार्यकारणप्रक्रिया, तथा च क्रियायाः सातत्यं प्रारभ्यानिवृत्तत्वं प्रबन्धशब्देनोच्यत इति भावः । आङ्पूर्वस्य सदेरव्यवहितत्वमर्थः, तदाह– **आसत्तिः सामीप्यमिति** । सामीप्यं हि द्विधा भवति– देशतः कालतश्च, तत्र कुतो ग्रहणमित्याह– **तच्च कालतः** इति । कुतः पुनः सामान्योक्तेन कालसम्बन्धिन एव सामीप्यस्यग्रहणं लभ्यते ? "सत्सामीप्ये०" इत्यत आरम्य प्रायिकत्वादस्य प्रकरणस्य, एतदपि कुतः ? सदादिशब्दानां कालशब्दत्वात् । अपि च ह्यस्तनी-श्वस्तन्योः प्रतिषेधः, ते च कालविहिते, अतो यत्र हि ते तत्र तत्सम्बन्धेनैव कालतः सामीप्यमिहाश्रीयते इति विज्ञायते । कालस्येन्द्रियागोचरतया व्यवहिताव्यवहितत्वयोर्ज्ञातुमशक्यतया सामीप्यं कथं ज्ञेयमिति चेत् ? अत्राह– **सजातीयेन कालेनाव्यवहितकालतेति**–

व्यवधानं हि सजातीयेनैव विवक्षितम्, अव्यवहितदिनमिति कथनेन हि दिनान्तरेणाव्यवधानमेव गम्यते, न तु वर्षान्तरेण व्यवधानमसम्भवात्, यथा 'यावज्जीवं लोकहितं चरेत्' इत्युक्ते नावश्यकं स्वशरीरसम्बन्धिकार्यं कुर्वंस्तस्य विधेरुल्लङ्घयिता गम्यते, अपि तु लोकसम्बन्धिक्रियान्तरेणाव्यवहितमेव हिताचरणं बोध्यते, तदुल्लङ्घयितैव विधेरुल्लङ्घको भवति, तथेहापि सजातीयेन कालेनैवाव्यवधानं सामीप्यशब्देन प्रतिपाद्यमिति भावः । किञ्च कालमात्रेण व्यवधाने गृह्यमाणे 'येयं पौर्णमास्यतिक्रान्ता तस्यां जिनमहः प्रावर्तिष्ट' इत्येवमादावुदारणे सामीप्यं न स्यात्, अमावास्ययाऽन्याभिश्च तिथिभिर्व्यवधानात्, तस्मात् समानजातीयेन व्यवधानमाश्रीयते । अनद्यतनस्य प्रतिषेध इहोक्तः, अनद्यतनश्च द्विविधः कालो भूतो भविष्यंश्च, तत्र कुत्र कस्य प्राप्तिरासीद् या प्रतिषिध्यत इति स्फोरयति–**भूतानद्यतने ह्यस्तनी**त्यादिना, तथा च सामान्यतो भूतकाले विहिताऽद्यतनी, सामान्यतो भविष्यत्काले विहिता भविष्यन्ती च भवतः । भूतमुदाहरति– **यावज्जीवं भृशमन्नमदा**दिति– दाधातोरद्यतन्यां सिचि "पिबैतिदाभूस्थः०" [ ४. ३. ६६. ] इति तस्य लोपे 'अदात्' इति, अत्र चान्नदानस्य जीवनान्तर्गतवर्षादिकालसमकालाव्यवहितत्वं गम्यम्, न तु सर्वकार्यपरित्यागपूर्वकमन्नदानमात्रपरत्वमसम्भवात्, एवमन्यत्रापि योज्यम् । अत्रेत्थं लघुन्यासे– यावन्तं कालं जीव्यते भावे "यावतो विन्दजीवः" [ ५. ४. ५५. ] [इत्यम्] यावच्छब्दात् "कालाध्व०" [ २. २. ४२. ] इति वा द्वितीया, यावज्जीवंशब्दात् तु प्रथमासिः, यावज्जीवं यावद् वर्तते तावद् ददातीत्यर्थः ।" एवं– **यावज्जीवं भृशमन्नं दत्तवा**निति– अत्रानद्यतने भूते कर्तरि क्तवतुः, तस्मिन् परे "दत्" [ ४. ४. १०. ] इति दाधातोर्दतादेशे सौ दत्तवानिति, उभयत्र न ह्यस्तनी । भविष्यदनद्यतने भविष्यन्त्यां– **यावज्जीवं भृशमन्नं दास्यती**ति–अत्र न श्वस्तनी । धात्वन्तरमुदाहरति–**यावज्जीवं युक्तोऽध्यापिपत्** इति– "इङ्क् अध्ययने" नित्यमधिपूर्वोऽयम्, अधीयानं प्रायुङ्क्तेति णौ "णौ क्रीजीङः" [ ४. २. १०. ] इत्यात्वे "अर्ति०" [ ४. २. २१. ] इति पौ "चल्याहारार्थेङ्०" [ ३. ३. १०८. ] इति परस्मैपदेऽद्यतन्यां "णि-श्रि०" [ ३. ४. ५८. ] इति ङे 'स्वरादेर्द्वितीयः" [ ४. १. ४. ] इति पीत्येतस्य द्वित्वे "स्वरादेस्तासु" [ ४. ४. ३१. ] इत्याद्यस्वरवृद्धौ "णेरनिटि" [ ४. ३. ८३. ] इति णिलोपे च– अध्यापिपत्, अत्रानद्यतनभूतेऽपि ह्यस्तनी न भवति । **यावज्जीवं युक्तोऽध्यापयिष्यती**ति– अत्र भविष्यदनद्यतनेऽपि श्वस्तनी न भवति । अथासत्तावुदाहरणावसर इति दर्शयति– **आसत्तौ खल्वपी**ति । **येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रावर्तिष्ट, प्रवृत्तः** इति– पौर्णमास्यन्तरेणाव्यवहिता या पौर्णमासी तामधिकृत्यदेमुक्तम्, सा हि यद्यप्यमावास्ययाऽन्याभिश्च तिथिभिर्व्यवहिता तथापि तुल्यजातीयेन पौर्णमास्याख्येन कालेनाव्यवहितत्वात् सामीप्यं नातिवर्तते । "वृतूङ् वर्तने" प्रपूर्वादितोऽद्यतनीते सिचि इटि गुणे अटि षत्वे च– प्रावर्तिष्ट, क्ते तु– प्रवृत्तः, ऊदित्त्वेन क्त्वि वेट्त्वात् "वेटोऽपतः" [ ४. ४. ६२. ] इति क्तस्येट् न । अत्र सत्यपि भूतानद्यतने ह्यस्तनी न भवति । **येयं पौर्णमास्यागामिनी अस्यां जिनमहः प्रवर्तिष्यते** इति– अत्र भविष्यदनद्यतनेऽपि न श्वस्तनी, "गम्लृ गतौ" आङ्पूर्वादतः "आङ्श्च णित्" [ उणा० ६२०. ] इति इनि गम्यादित्वाद् भविष्यति– आगामिनीति । ननु न अद्यतनोऽनद्यतनस्तस्य प्रतिषेध इति द्वयोर्निषेधयोरुपादानं व्यर्थमिति शङ्का, अत्राह– **द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञानाये**ति– 'अद्यतन' इत्युक्तौ हि वर्तमानापि स्यात्, साऽप्यद्यतने भवति, 'अनद्यतनो न' इत्युक्तौ हि यत्रैवानद्यतनयोग्यता स एव भवति, सा योग्यता च भूतकालिके भविष्यत्कालिके चेति तत्कालिकावेव प्रत्ययौ भवतो न वर्तमाना तयोरेव प्राप्तत्वात् । अयं भावः– नानेन किञ्चिद् विधीयते, केवलमनद्यतनप्रत्ययानां प्रतिषेधः क्रियते, तेषु प्रतिषिद्धेषु स्वैरेव वाक्यैर्विधायकैरद्यतन्यादय उत्सर्गाः स्वे स्वे कालेऽपवादनिर्मुक्ते भवन्ति, अतो यथाप्राप्ताभ्यनुज्ञापनाय प्रतिषेधद्वयमुच्यत इति । कैयटादिमतमाह– **केचित् तु अनद्यतनविशेषविहितानामपि परोक्षादीनां प्रतिषेधमिच्छन्ती**ति, तथाहि– "नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः" [ ३. ३. १३५. ] सूत्रे तेनोक्तम्– "प्रतिषेधोपादाने तु वत्करणमनद्यतनविशेषविहितानामपि प्रतिषेधार्थम्, अन्यथा वत्करणमनर्थकं स्यात्, नानद्यतन इत्येव ब्रूयात्, तेन "परोक्षे लिट् [ परोक्षा ]" [ ३. २. ११५. ] "ह-

शश्वतोर्लङ् च [ह्यस्तनी परोक्षा च]" [३. २. ११६.] "लट् स्मे [ वर्तमाना ]" [ ३. २. ११८. ] "पुरि लुङ् चास्मे [ अद्यतनी ]" [ ३. २. १२२. ] इत्येतत्सूत्रविहिता अपि प्रत्यया: प्रतिषिध्यन्ते" इति । किन्तु नवीनास्तु तन्न मन्यन्ते, तथाहि नागेशेनोक्तमुद्योते– "परं त्वत्र मानं चिन्त्यम्, भाष्ये लङ्लुटोरेवोपक्रमे उक्तेरिति। अयमाशय:– भाष्ये 'नानद्यतनवत्प्रतिषेधे लङ्लुटो: प्रतिषेध:' इति कथनेन लिट: [ परोक्षाया: ] परित्यक्तत्वात् सा स्वविषये भविष्यत्येवेति कैयटोक्तविषये किं मानमिति चिन्ताविषय: । स्वमतेऽनद्यतनशब्दमात्रेण सामान्यतो विहितानामेव प्रतिषेध:, परोक्षा च परोक्षभूतानद्यतने विहितेति विशेषविहिता, तन्निषेधो न भवतीति स्व विषये सा स्यादेव । अत एव च क्तादीनामपि न प्रतिषेधो भवति, तेऽपि यद्यप्यनद्यतने दृष्टास्तथापि 'अनद्यतन' शब्दमात्रेण विधानाभावात् तेषां प्रतिषेधबहिर्भावात् । इत्थं च सर्वमुपपन्नमिति ॥ ५. ४. ५. ॥

## एष्यत्यवधौ देशस्यार्वाग्भागे । ५. ४. ६. ॥

**त० प्र०– देशस्य योऽवधिस्तद्वाचिन्युपपदे देशस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्तमानाद् धातोरनद्यतनविहित: प्रत्ययो न भवति । अप्रबन्धार्थमनासत्त्यर्थं च वचनम् । यद्यप्यनद्यतन इति प्रकृतं तथापीहैष्यतीति वचनात् श्वस्तन्या एव निषेध: । योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे, द्वि: सक्तून् पास्याम: । योऽयमध्वा गन्तव्य आ पाटलिपुत्रात् तस्य यदवरमर्धं [ कौशाम्ब्या: ] तत्रौदनं भोक्ष्यामहे । एष्यतीति किम् ? योऽयमध्वातिक्रान्त आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र युक्ता द्विरध्यैमहि, द्वि: सक्तूनपिबाम । अवधाविति किम् ? योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्वि: सक्तून् पातास्म: । अर्वाग्भाग इति किम् ? योऽयमध्वा गन्तव्य आ शत्रुंजयात् तस्य यत् परं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्वि: सक्तून् पातास्म: ॥६॥**

**श० म० न्यासानुसन्धानम्– एष्य०** । पदानि यथान्यायं संयोज्य सूत्रं व्याख्याति– **देशस्य योऽवधिरित्यादिना** । 'देशस्य' इति पदस्य देहलीदीपकन्यायेन 'अवधौ, अर्वाग्भागे' इति पदाभ्यां सम्बन्धाय मध्यस्थतयोपादानम्, तदाह– **देशस्यार्वाग्भागे** इति– वक्तारं प्रति अर्वाक्त्वमवधे: पूर्वभागस्यैव । **अप्रबन्धार्थमनासत्त्यर्थं च वचनमिति**– न च भविष्यति देशस्यावधावुपपदे देशस्यार्वाग्भाग एव स्यादिति सूत्रार्थस्य सत्त्वेन 'अप्रबन्धार्थमनासत्त्यर्थं वचनम्' इति नोचितमिति वाच्यम्, विधिनियमसम्भवे विधेरेव ज्यायस्त्वमिति न्यायेन तत्रापि क्रियाप्रबन्धसत्त्वे आसत्तौ च सत्यां पूर्वेणैव सिद्धेरित्याशयात् । तथा चाप्रबन्धार्थमित्यादि साधूक्तमिति । पूर्वसूत्रतो नानद्यतन इति वर्तते, अनद्यतनविहित: प्रत्ययो द्विविधो ह्यस्तनी श्वस्तनी च, तत्रेह श्वस्तन्या एव निषेध इति सोपपत्तिकं दर्शयति– **यद्यप्यनद्यतन इति प्रकृतं तथापीह 'एष्यति' इति वचनात् श्वस्तन्या एव निषेध:** इति– भूतविहिततया ह्यस्तन्या विषय एव नास्तीति भाव: । उदाहरति– **योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे, द्वि: सक्तून् पास्याम:** इति– शत्रुञ्जयावधिकमार्गस्य यदवरं वलभ्या: सकाशात् तत्रेत्याद्यर्थ:, वलभ्या: पूर्वमिति यावदित्यादिक्रमेण प्रयोगार्था व्याख्येया:, "भुजंप् पालनाभ्यवहारयो:" "भुनजोऽत्राणे" [ ३. ३. ३७. ] इत्यात्मनेपदे भविष्यन्त्या: स्यामहेप्रत्यये जस्य "चज: कगम्" [ २. १. ८६. ] इति गत्वे "अघोषे प्र०" [ १. ३. ५०. ] इति गस्य कत्वे "नाम्यन्तस्था०" [ २. ३. १५. ] इति सस्य षत्वे च– भोक्ष्यामहे इति, "पां पाने" अतो भविष्यन्त्या: स्यामसि– पास्याम: इति, द्विरिति सुच्प्रत्ययान्तम्, द्वौ वाराविति तदर्थ: । गन्तव्य इत्यनेन भविष्यत्कालतां दर्शयति, तस्य यदवरमित्यनेनाध्वनो विभागम्, द्विरित्यनेनापि क्रियाप्रबन्धाभावम् । उदाहरणान्तरमाह– **योऽयमध्वा गन्तव्य आ पाटलिपुत्रात् तस्य यदवरमर्धं [ कौशाम्ब्या: ] तत्रौदनं भोक्ष्यामहे** इति । पदकृत्यं पृच्छति– **एष्यतीति किमिति**, उत्तरयति– **योऽयमध्वाऽतिक्रान्त आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र युक्ता द्विरध्यैमहि:, द्वि: सक्तूनपिबाम** इति– अतिक्रान्त इत्यनेन भूतकालतां दर्शयतीति भविष्यत्त्वाभावान्नास्य प्रवृत्ति:, "इङ्क् अध्ययने" इत्यतो ह्यस्तन्या महिप्रत्यये– अध्यैमहि, "पां पाने" इत्यतो ह्यस्तन्या मप्रत्यये "श्रौति०" [ ४. २. १०८. ] इति पिबादेशे–

अपिबाम । पुनः पृच्छति- **अवधाविति किमिति,** उत्तरयति- **योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः** इति- निरवधिक इत्यनेनावधेरभावः स्पष्ट एवेत्यस्याप्रवृत्तौ श्वस्तनी । पृच्छति- **अर्वाग्भाग इति किमिति, योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यत् परं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः** इति- अत्र यत् परमित्यनेनार्वाग्भागाभावः स्पष्ट एव ॥ ५. ४. ६. ॥

## कालस्याऽनहोरात्राणाम् । ५. ४. ७. ॥

**त० प्र०- कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैवार्वाग्भागे य एष्यन्नर्थस्तत्र वर्तमानाद् धातोरनद्यतनविहितः प्रत्ययो न भवति । अनहोरात्राणां- न चेत् सोऽर्वाग्भागोऽहोरात्राणां संबन्धी भवति । योऽयमागामी संवत्सरस्तस्य यदवरम् आग्रहायण्यास्तत्र जिनपूजां करिष्यामोऽतिथिभ्यो दानं दास्यामहे । एष्यतीत्येव- योऽयं संवत्सरोऽतीतस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता द्विरध्यैमहि । अवधावित्येव- योऽयमागामी निरवधिकः कालस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे । अर्वाग्भाग इत्येव- परस्मिन् विभाषा वक्ष्यते । अनहोरात्राणामिति किम् ? योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्ता द्विरध्येतास्महे, योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्धमासस्तत्र द्विरोदनं भोक्तास्महे । योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र द्विः सक्तून् पातास्म इति त्रिविधेऽप्यहोरात्रसंबन्धे मा भूत् । योगविभाग उत्तरार्थः । बहुवचनं कालस्येति सामानाधिकरण्यभ्रमनिरासार्थम् ॥७॥**

**श० म० न्यासानुसन्धानम्- कालस्या०** । पूर्वसूत्रं सम्पूर्णमनुवर्तते 'देशस्य' इतिवर्जम्, तथा च योऽर्थो निष्पन्नस्तमाह- **कालस्य योऽवधिरित्यादिना** । पूर्वत्रैकस्यैव षष्ठ्यन्तस्य सत्त्वेन तस्यैवोभयत्रान्वयः कृतः, इह च षष्ठीद्वयं श्रूयत इत्यर्वाग्भागस्यानहोरात्राणामित्यनेन सम्बन्धो मा ज्ञायीति बोधनायाह- **कालस्यैवार्वाग्भागे** इति । **अनहोरात्राणाम्**इत्यस्य पर्युदासपरतया व्याख्यानमाह- **न चेत् सोऽर्वाग्भागोऽहोरात्राणां सम्बन्धी भवतीति**- अहानि च रात्रयश्च- अहोरात्राः "ऋक्सामर्य०" [७. ३. ९७.] इत्यदन्तद्वन्द्वनिपातनम्, "पुण्यःसिचयनिकायरात्रधूम्राः" [लिङ्गानु०] इति कृतसमासान्तो रात्रिशब्दः पुंसीति पुंलिङ्गत्वम्, तेषामहोरात्राणाम् । **योऽयमागामी संवत्सरस्तस्य यदवरमाग्राहण्यास्तत्र जिनपूजां करिष्यामोऽतिथिभ्यो दानं दास्यामहे** इति- अग्रं हायनस्येति "द्वित्रिचतुष्पूरण०" इति समासः, "पूर्वपदस्था०" [ २. ३. ६४. ] इति णत्वे, अग्रहायणमेव प्रज्ञादित्वादणि ङ्याम्- आग्रहायणी, मार्गशीर्षादारम्य वत्सरप्रवृत्तेः, मृगशीर्षपूर्णिमेत्यर्थः । अत्रानद्यतने भविष्यत्यपि श्वस्तनी न भवति । अनुवृत्तेर्व्यावर्त्यं दर्शयति- **एष्यतीत्येव- योऽयं संवत्सरोऽतीतस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता द्विरध्यैमहि** इति- अत्र 'अतीत' इत्यनेन भूतकालता दर्शितेति भविष्यत्त्वाभावादस्याप्रवृत्त्या भूतानद्यतने ह्यस्तन्यामध्यमहीति । पुनस्तदेव दर्शयति- **अवधावित्येव- योऽयमागामी निरवधिकः कालस्तत्र यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे** इति- अत्रावधेरभावादस्याप्रवृत्त्या भविष्यदनद्यतने श्वस्तन्यामध्येतास्महे इति । **अर्वाग्भाग इत्येव- परस्मिन् विभाषा वक्ष्यते** इति- परसूत्रेण विकल्पेन निषेध इति । पदकृत्यं पृच्छति- **अनहोरात्राणामिति किमिति**- यत्राहःशब्दो रात्रिशब्दो वा प्रयुज्यते तत्राहोरात्रत्वम् । उत्तरयति- **योऽयं मास आगामी तस्य योऽवर** इति प्रत्युदाहरणत्रयेण, **त्रिविधेऽप्यहोरात्रसम्बन्धे मा भूदिति**- अहोरात्राणामित्यत्र न कर्मणि षष्ठी 'अहोरात्रकर्मके विभागे' इत्यर्थिका, अपि तु सम्बन्धसामान्ये षष्ठी, तेन यदाऽहोरात्राणामन्येन कालेन विभागः, अन्यस्य वाऽहोरात्रैः, अहोरात्राणां वाऽहोरात्रैः सर्वथा प्रतिषेधः फलितो भवति, तत्र **'योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र युक्ता द्विरध्येतास्महे'** इति प्रथमे प्रत्युदाहरणे शब्दान्तरवाच्यस्य कालस्याहोरात्रैर्विभागः, **'योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरोऽर्धमासस्तत्र द्विरोदनं भोक्तास्महे'** इति द्वितीये अहोरात्रवाच्यस्य शब्दान्तरवाच्येन कालेन विभागः, **'योऽयं त्रिंशद्रात्र आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्र द्विः सक्तून् पातास्मः'** इति तृतीये अहोरात्रवाच्यस्य कालस्याहोरात्रवाच्यकालेन विभागः । ननु यदि वचनमहोरात्रप्रतिषेधार्थमेवं सति योगविभागो-

अनर्थकः, पूर्वसूत्र एव हि प्रतिषेधो वक्तव्यः, स च सामर्थ्यात् कालविभागस्यैव प्रतिषेधो विज्ञास्यते न देशविभागस्य, नहि देशविभागस्याहोरात्रैः सह सम्बन्धोऽस्तीत्यत आह– **योगविभाग उत्तरार्थः** इति– "परे वा" इति सूत्रं कालस्यैव परस्मिन् विभागे प्रवर्ततां, न देशस्येत्येतदर्थं पृथग् योगः, अन्यथा सम्पूर्णस्य पूर्वयोगसहितस्यास्य सूत्रस्योत्तरत्रानुवृत्त्यापत्तौ देशविषयकविभागेऽपि तत्प्रवृत्तिः स्यादेव । सम्बन्धसामान्ये एकवचनषष्ठ्यापि निर्देशे उक्तार्थलाभसम्भवेऽनहोरात्राणामिति बहुवचनस्य वैयर्थ्यमाशङ्क्य समाधत्ते– **बहुवचनं कालस्येति सामानाधिकरण्यभ्रमनिरासार्थमिति**, तथा चाहोरात्रभिन्नकालस्य योऽवधिरित्यादिरूपेण सूत्रार्थः, एवं च योऽयमागामीत्यादिप्रथमे प्रत्युदाहरणेऽहोरात्रभिन्नस्यैव कालस्यावधिरिति तस्यावग्भागे सूत्रेण निषेधः स्यादेव, बहुवचनेन च तयोः सामानाधिकरण्याभावप्रतिपादनात्, भिन्नक्रमेण पूर्वोक्तव्याख्याने समाश्रिते तत्र न सूत्रं प्रवर्तत इति भावः ॥ ५. ४. ७. ॥

## परे वा । ५. ४. ८. ॥

**त० प्र०– कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैव परस्मिन् भागेऽनहोरात्रसंबन्धिनि य एष्यदर्थस्तत्र वर्तमानात् धातोरनद्यतनविहितः प्रत्ययो वा न भवति। आगामिनः संवत्सरस्याग्रहायण्याः परस्तात् द्विः सूत्रमध्येष्यामहे, अध्येतास्महे वा । प्रबन्धासत्तिविवक्षायामपि परत्वादयमेव विकल्पः–आगामिनः संवत्सरस्याग्रहायण्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे, अध्येतास्महे वा । कालस्येत्येव–आ शत्रुञ्जयाद् गन्तव्येऽस्मिन्नध्वनि वलभ्याः परस्तात् द्विरोदनं भोक्तास्महे । प्रबन्धासत्त्योस्तु नित्यं भविष्यन्ती– आ शत्रुञ्जयाद् गन्तव्येऽस्मिन्नध्वनि वलभ्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे । पर इति किम् ? अर्वाग्भागे पूर्वेण नित्यं प्रतिषेधः । एष्यतीत्येव– अतीते वत्सरे परस्तादाग्रहायण्याः सूत्रं युक्ता अध्यैमहि । अवधावित्येव– योऽयमागामी निरवधिकः कालस्तस्य यत् परमाग्रहायण्यास्तत्र द्विरध्येतास्महे । अनहोरात्राणामित्येव– योऽयं त्रिंशद्रात्र आगामी तस्य यः परः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे ॥८॥**

**श० म० न्यासानुसन्धानम्– परे वा** । 'देशस्यावग्भागे' इति पदद्वयवर्जं पूर्वसूत्रद्वयमनुवर्तते, तथा च योऽर्थ उपपन्नस्तमाह– **कालस्य योऽवधिरित्यादिना** । पूर्वसूत्रयोः प्रबन्धासत्तिविवक्षायामप्रवृत्तिः "एष्यति०" इत्यादिसूत्रे तदर्थस्योक्तत्वात्, अस्य च विकल्पविधायकत्वेन विशेषविधित्वात् प्रबन्धासत्तिविवक्षायामपि प्रवृत्तिरित्याह– **प्रबन्धासत्तिविवक्षायामित्यादिना**, स्पष्टानि उदाहरणादीनि ॥ ५. ४. ८. ॥

## सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः
## । ५. ४. ९. ॥

**त० प्र०– सप्तम्या अर्थो निमित्तं हेतु-फलकथनादिका सामग्री । कुतश्चिद् वैगुण्यात् क्रियाया अतिपतनमनभिनिर्वृत्तिः– क्रियातिपत्तिः, तस्यां सत्यामेष्यत्यर्थे वर्तमानाद् धातोः सप्तम्यर्थे क्रियातिपत्तिर्विभक्तिर्भवति । दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत्, यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यत्, अत्र दक्षिणगमनं कमलकाह्वानं च हेतुरपर्याभवनं फलम्, तयोः कुतश्चित् प्रमाणाद् भविष्यन्तीमनभिनिर्वृत्तिमवगम्यैवं प्रयुङ्क्ते । एवममोक्ष्यत भवान् घृतेन यदि मत्समीपमागमिष्यत्, स यदि गुरूनुपासिष्यत शास्त्रान्तमगमिष्यत् ॥९॥**

**श० म० न्यासानुसन्धानम्– सप्त० । 'सप्तम्यर्थे'** इति व्याख्याति– **सप्तम्या अर्थो निमित्तं हेतुफलकथनादिका सामग्रीति**– सप्तमीपदेन न स्यादिर्ग्राह्या अपि तु "यात्, याताम्, युस्०" [ ३. ३. ७. ] इति परिभाषिता त्यादिविभक्तिर्ग्राह्या, अर्थपदेन न धनादि ग्राह्यमपि तु निमित्तम्, "वर्त्स्यति हेतुफले" [ ५. ४. २५. ] इति हेतुफलकथने सप्तमी विधीयते, आदिपदेन "कामोक्तावकच्चिति" [ ५. ४. २६. ] इत्यादिसूत्रोक्तसप्तमीनिमित्तस्य संग्रहः । **'क्रियातिपत्तौ'** इति व्याचष्टे– **कुतश्चिद् वैगुण्यात् क्रियाया अतिपतनमनभिनिर्वृत्तिः क्रियातिपत्तिः, तस्यां सत्यामिति**, कुतश्चिद् वैगुण्यादिति– विधुरप्रत्ययोपनिपातात् कारणान्तरवैकल्याद् वा, कस्यापि क्रियासाधनभूतस्य वस्तुनो वैगुण्यं– स्वकार्यसाधनाक्षमत्वं, साधनाभाव एव वा क्रियायां वैगुण्यं तस्मादिति भावः, अतिपतनम्– अतिक्रम्य स्वसमयं पतनं सम्पत्तिः । तथा च यस्मिन् तया क्रियया

भवितव्यं तस्मिन् समये तस्यानभिनिवृत्तिरित्यायातम् । **क्रियातिपत्तिरि**त्यस्यार्थमाह– **क्रियातिपत्तिर्विभक्तिर्भवतीति**– "स्यत्, स्यताम्, स्यन्०" [ ३. ३. १६. ] इति परिभाषिता स्यादिर्विभक्तिर्भवतीत्यर्थः । अथोदाहरति– **दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यदि**ति– "यांक् प्रापणे" इत्यस्य 'अयास्यत्' इति, पर्याङ्पूर्वस्य "भू सत्तायाम्" इत्यस्य च 'पर्याभविष्यत्' इति । **यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यदिति**– "ह्वेंग् स्पर्धाशब्दयोः" इत्यस्य आङ्पूर्वस्य 'आह्वास्यत्' इति । प्रयोगे सूत्रार्थं सङ्गमयति– **अत्र दक्षिणगमनं कमलकाह्वानं च हेतुरपर्याभवनं फलमि**ति– एतेन सप्तमीनिमित्तं हेतुफलभावं दर्शयति । असकृत् प्राग् दक्षिणगमने कमलकाह्वाने च सति शकटस्यापर्याभवनं दृष्ट्वा भाविनोऽपि दक्षिणगमनस्य कमलकाह्वानस्य च शकटापर्याभवनहेतुत्वं बुद्ध्वा, तदतिपत्तिं च– दक्षिणगमनस्योपद्रुतत्वादिना कमलाह्वानस्य देशान्तरगमनादिना, शकटापर्याभवनस्य च गुरुभारोपणादिना लिङ्गेनातिपत्तिमवगम्य वक्ता वाक्यं प्रयुङ्क्ते– दक्षिणेन चेदयास्यदित्यादि । हेतुफलयोराह्वानापर्याभवनयो भविष्यत्कालविषययोरतिपत्तिरितो वाक्यादवगम्यते । एतदेवाह– **कुतश्चित् प्रमाणाद् भविष्यन्तीमनभिनिवृत्तिमवगम्यैवं प्रयुङ्क्ते** इति । यद्वाऽयमुपपादनप्रकारः– ननु भविष्यतोऽर्थस्यानभिनिर्वृत्तिः कथं ज्ञायत इति चेत् ? अत्राह– **कुतश्चित् प्रमाणादि**ति । न च नास्मिन् प्रमाणेऽबाधितत्वं विनिगमकम्, सम्भावनयैव प्रयोगकरणात्, तथा च हेत्वभावसंभावनया फलाभावकथनमिहेति पर्यवसितम्, सर्वत्र भविष्यद्विषये एवमेव स्वीकार्यम् । भूते चाग्रे वक्ष्यमाणे सिद्ध एवार्थो हेत्वभाव इति तत्र प्रमाणान्तरापेक्षैव नेत्यग्रे स्फुटीभविष्यति, तत्र च फलाभावोऽपि सिद्ध एव प्रकाश्यते । अतिदिश्योदाहरति– **एवम्– अभोक्ष्यत भवान् घृतेन यदि मत्समीपमागमिष्यदि**ति– "भुजंप् पालनाभ्यवहारयोः" इत्यस्य "भुनजोऽत्राणे" [ ३. ३. ३७. ] इत्यात्मनेपदे– 'अभोक्ष्यत' इति, "गम्लृं गतौ" आङ्पूर्वस्यास्य "गमोऽनात्मने" [ ४. ४. ५१. ] इतीटि– 'आगमिष्यत्' इति, अत्र घृतभक्षणं हेतुः, समीपागमनं फलम् । **स यदि गुरूनुपासिष्यत शास्त्रान्तमगमिष्यदि**ति– उपपूर्वस्य "आसिक् उपवेशने" इत्यस्य 'उपासिष्यत' इति, अत्र गुरूपासनं हेतुः, शास्त्रान्तगमनं फलम् । अथ 'क्रियातिपत्तौ' इत्यत्र किमर्थं क्रियाग्रहणम् ? 'सप्तम्यर्थेऽतिपत्तौ क्रियातिपत्तिः' इत्येतावद् वक्तव्यम्, धात्वधिकारात् विनाऽपि क्रियाग्रहणेन धात्वर्थस्यातिपत्ताविति विशेषोऽर्थो लभ्यते, ततोऽनर्थकं क्रियाग्रहणमिति चेत् ? न–'सप्तम्यर्थे' इति श्रूयते, प्रकृतस्य सम्बन्धाच्छ्रुतस्य सम्बन्धो बलवानिति सप्तमीनिमित्तस्यैवातिपत्तिर्विज्ञायते, ततश्च "सप्तम्युताप्योर्बाढे" [ ५. ४. २१. ] इति बाढार्थातिपत्तौ सप्तमी प्रसज्येत, तस्मात् क्रियाग्रहणं कर्तव्यम् ॥ ५. ४. ९. ॥

---

## भूते । ५. ४. १०. ॥

**त० प्र०– भूतेऽर्थे वर्तमानाद् धातोः क्रियातिपत्तौ सत्यां सप्तम्यर्थे क्रियातिपत्तिविभक्तिर्भवति । "सप्तम्युताऽप्योर्बाढे" [ ५. ४. २१. ] इत्यारभ्य सप्तम्यर्थेऽनेन विधानम्, ततः प्राक् "वोतात् प्राक्" [ ५. ४. ११. ] इति विकल्पो वक्ष्यते । दृष्टो मया भवतः पुत्रोऽन्नार्थी चंक्रम्यमाणः, अपरश्चातिथ्यर्थी, यदि स तेन दृष्टोऽभविष्यत् उताभोक्ष्यत अप्यभोक्ष्यत, न तु दृष्टोऽन्येन पथा गत इति न भुक्तवान् ॥१०॥**

---

**श० म० न्यासानुसन्धानम्– भूते** । 'सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः' इति सर्वमनुवर्तते, पूर्वेण भविष्यति विधानं सम्प्रति भूते विधीयते । इदं चाधिकारसूत्रं विधिसूत्रं च, ततश्चाग्रे गच्छताऽनेन कार्यं विधीयते, तत्रानेन नित्यं विधीयते, "वोतात् प्राक्" [५. ४. ११.] इति सूत्रेण च "सप्तम्युताप्योर्बाढे" [ ५. ४. २१. ] इति पर्यन्तं विकल्प्य विधानमनुज्ञायते, तथा चानेन नित्यं तेन विकल्प इति विकल्पनित्ययोः कथमेकत्र समवस्थानमित्याशङ्कायामाह–**"सप्तम्युताप्योर्बाढे" इत्यारभ्य सप्तम्यर्थेऽनेन विधानमि**ति, तथा च तत आरभ्य नित्यं विधिः, ततः पूर्वं च विकल्पेनेत्याह– **ततः प्राक् "वोतात् प्राक्" इति विकल्पो वक्ष्यते** इति । तथा च "सप्तम्युताप्योर्बाढे" इति सूत्रानुसारमेवास्योदाहरणमाह– **दृष्टो मया तत्र भवतः पुत्रोऽन्नार्थी**त्यादिना, भवतः पुत्रोऽन्नार्थी, अपरश्च कश्चनातिथ्यर्थी, पृथक् चङ्क्रम्यमाणौ, तयोर्यदि परस्परं मेलनं स्यात् स्यादवश्यं भवतः पुत्रो भुक्तवान्, स चातिथिलाभेन कृतकृत्यः स्यात्, किन्तु मार्ग-

भेदेन तयोर्गमनात् क्रिया न सम्पन्नेति कथनाभिप्रायः, तथा च हेतुहेतुमद्भावविवक्षया न तत्र सप्तमी किन्त्वनेन क्रियातिपत्तिनिमित्ता क्रियातिपत्तिरेव, सा च नित्येति न पाक्षिकी सप्तमी । **दृष्टोऽभविष्यदि**त्यत्राश्रद्धाया गम्यमानत्वात् "जातु-यद्-यदा०" [ ५. ४. १७. ] इति सप्तमीनिमित्तम्, **उताभोक्ष्यते**त्यत्र च "सप्तम्युताप्योर्बाढे" [ ५. ४. २१. ] इति सप्तमीनिमित्तम् ॥ ५. ४. १०. ॥

## वोतात् प्राक् । ५. ४. ११. ॥

**त० प्र०- "सप्तम्युताप्योर्बाढे" [ ५. ४. २१. ] इत्यत्र यद् उतशब्दसंकीर्तनं ततः प्राक् सप्तमीनिमित्ते क्रियातिपत्तौ सत्यां भूतेऽर्थे वर्तमानाद् धातोर्वा क्रियातिपत्तिर्भवति । कथं नाम संयतः सन्ननागाढे तत्रभवान् आधायकृतमसेविष्यत, धिग् गर्हामहे । वावचनाद् यथाप्राप्तं च- कथं सेवेत, धिग् गर्हामहे । उताद् प्रागिति किम् ? कालो यदभोक्ष्यत भवान् । भूत इत्येव- एष्यति नित्यमेव ॥११॥**

**श० म० न्यासानुसन्धानम्- वोता०** । 'वा उतात् प्राक्' इति पदत्रयं सूत्रे, तत्र 'उतात् प्राक्' इत्यस्यार्थमाह- **"सप्तम्युताप्योर्बाढे" [ ५. ४. २१. ] इत्यत्र यद् उतशब्दसंकीर्तनं ततः प्रागिति**- उतशब्दोच्चारणात् प्रागिदं सूत्रं वाग्रहणं प्रवर्तयति, तथा च तत्पर्यन्तं विधीयमानायाः सप्तम्या निमित्ते सति क्रियातिपत्तावनेन विकल्पेन क्रियातिपत्तिविधानमिति फलति । उदाहरति- **कथं नाम संयतः सन्ननागाढे तत्रभवान् आधायकृतमसेविष्यत, धिग् गर्हामहे** इति- संयतः सन्- माधुकरीं वृत्तिं भजमानो मुनिजनः सन्, अनागाढे-प्रबलकारणाभावेऽपि, तत्रभवान्- पूज्यः, आधाय कृतमिति "अव्ययं प्रवृद्धादिभिः" [ ३. १. ४८. ] इति समासः, भवन्तं मनसिकृत्य भवत्कृते कृतमाहारमिति यावत्, "सेवृङ् सेवने" इत्यस्य 'असेविष्यत' इति, 'संयतः सन्' इति कथनेन तस्य तादृशकार्यकरणस्य बुद्धिपूर्वकत्वं ध्वनयति, अत एव गर्हा, अबुद्धिकृते हि कर्मणि क्षमा कर्तुं शक्यते, न बुद्धिकृते । "कथमि सप्तमी च वा" [ ५. ४. १३. ] इति सप्तमीनिमित्तमत्र । वाशब्दप्रयोजनमाह- **वावचनाद् यथाप्राप्तं चेति**- सप्तमीत्यर्थः, सप्तम्या एवार्थेऽनेन विधानादनेन मुक्ते तस्या एव प्रवृत्त्यौचित्यमिति सा भवति । तदेवाह- **कथं सेवेत, धिग् गर्हामहे** । पदकृत्यं पृच्छति- **उतात् प्रागिति किमिति**, उत्तरयति- **कालो यदभोक्ष्यत भवान्** इति- "सप्तमी यदि" [ ५. ४. ३४. ] इति सप्तमीनिमित्तस्य उतात् परत्वेनास्याप्रवृत्त्या "भूते" [ ५. ४. १०. ] इति क्रियातिपत्तिः । भूतानुवृत्तेर्व्यावर्त्यं दर्शयति- **भूत इत्येव- एष्यति नित्यमेवेति**- तत्र "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" [ ५. ४. ९. ] इत्यस्यैव प्रवृत्तिरिति भावः ॥ ५. ४. ११. ॥

## क्षेपेऽपि-जात्वोर्वर्तमाना । ५. ४. १२. ॥

**त० प्र०- भूत इति निवृत्तम् । क्षेपो-गर्हा, तस्मिन् गम्यमानेऽपि-जात्वोरुपपदयोर्धातोर्वर्तमाना विभक्तिर्भवति । कालसामान्ये विधानात् कालविशेषे विहिता अपि प्रत्ययाः परत्वादनेन बाध्यन्ते । अपि तत्रभवान् जन्तून् हिनस्ति, जातु तत्रभवान् भूतानि हिनस्ति, अपि संयतः सन्ननागाढे तत्रभवानाधायकृतं सेवते, धिग् गर्हामहे । इह सप्तमीनिमित्ताभावात् क्रियातिपतने क्रियातिपत्तिर्नोदाह्रियते ॥१२॥**

**श० म० न्यासानुसन्धानम्- क्षेपे० । भूत इति निवृत्तमिति**- भूतार्थस्य क्रियातिपत्तिसम्बद्धत्वात् तस्याश्चाभावात् भूतार्थस्याप्यसम्बन्ध इति भावः । एष्यतीति पूर्वमेव निवृत्तम्, भूत इत्यस्य निवृत्तिरुक्तैव, वर्तमानाया विशेषविधानाद् यदि वर्तमानार्थे एवास्य प्रवृत्तिः स्यात् तर्हि तद्विधानस्यानावश्यकत्वेन वर्तमानकालेऽपि नास्य निमित्तमिति कालसामान्ये विधानं फलितमित्याह- **कालसामान्ये विधानात् कालविशेषे विहिता अपि प्रत्यया** इति, तथा च कालसामान्येऽनेन विशिष्य विधानात् यदि विशेषविहिताः प्रत्ययाः स्वस्वकालेस्युरेव तर्ह्यस्य वैयर्थ्यमेव स्यात्, नहि कालत्रयातिरिक्तं किञ्चित् कालसामान्यमस्ति, तथा च तेषामयमपवाद एव परोऽपीति, तदाह- **परत्वादनेन बाध्यन्ते** इति । भूते कालविशेषे ह्यस्तनी अद्यतनी परोक्षा च प्रत्यया विहिता, भविष्यति च श्वस्तनी भविष्यन्ती च प्रत्ययौ, तान् सर्वान् कालसामान्ये विधीयमाना वर्तमाना परत्वाद् बाधत इति भावः । उदाहरति- **तत्रभवान् जन्तून्**

हिनस्तीत्यादिना, "हिसुप् हिंसायाम्" इत्यस्य 'हिनस्ति' इति, "गर्हि कुत्सने" इत्यस्य 'गर्हामहे' इति । क्रियातिपत्तेः प्रकरणादेतदर्थविषयिणी क्रियातिपत्तिः कुतो नेति शङ्कायामाह- **इह सप्तमीनिमित्ताभावात् क्रियातिपतने क्रियातिपत्तिर्नोदाह्रियते** इति- यद्यपि क्रियातिपतनं विवक्ष्यते तथापि हेतुफलादिनिमित्ताभावादिह क्रियातिपत्तिर्न भवतीति भावः ॥ ५. ४. १२. ॥

---

## कथमि सप्तमी च वा । ५. ४. १३. ॥

**त० प्र०- कथंशब्दे उपपदे क्षेपे गम्यमाने धातोः सर्वेषु कालेषु सप्तमी चकाराद् वर्तमाना च विभक्ती वा भवतः । वावचनाद् यथाप्राप्तं च । कथं नाम तत्रभवान् मांसं भक्षयेत्, मांसं भक्षयति, धिग् गर्हामहे, अन्याय्यमेतत् । पक्षे- अबभक्षत्, अभक्षयत्, भक्षयांचकार, भक्षयिता, भक्षयिष्यति । अत्र सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिर्भवति- कथं नाम तत्रभवान् मांसमभक्षयिष्यत्, भक्षयेत्, भक्षयति, अबभक्षत्, अभक्षयत्, भक्षयांचकार । भविष्यति तु क्रियातिपतने नित्यमेव क्रियातिपत्तिः- कथं नाम तत्रभवान् मांसमभक्षयिष्यत्, न तु वर्तमाना-सप्तमी-भविष्यन्ती-श्वस्तन्यः । क्षेप इत्येव-कथं नाम तत्रभवान् साधूनपूपुजत्, एवं-यथाप्राप्ति वर्तमानादयो भवन्ति ॥१३॥**

---

**श० म० न्यासानुसन्धानम्- कथमि०** । क्षेपे इत्यनुवर्तते, अत आह- **क्षेपे गम्यमाने** इति- क्षेपश्च गर्हेत्युक्तमेव । चकारेण समुच्चेयमाह- **चकाराद् वर्तमानेति** । वाग्रहणप्रयोजनमाह- **वावचनाद् यथा प्राप्तं चेति**- वाकथनं यथास्वं कालविषये विहितानामबाधनार्थमित्यर्थः, अयं भावः- यस्मिन् काले क्रियातिपत्त्यादयो विहितास्तेषां बाधनं मा भूदित्येवमर्थं वाग्रहणम् । यद्येवमनर्थकश्चकारो वाग्रहणादेव हि वर्तमानाया अप्यबाधितत्वात् सिध्यत्येव, सत्यम्- सिध्यति वर्तमाने, कालान्तरे तु न सिध्यति, नहि तत्र कथमित्युपपदे वर्तमानायाः प्राप्तिरिति, तत् कथं वाग्रहणेन सिध्यति ? तस्माद् वर्तमानार्थश्चकारः कर्तव्यः । "भक्षण् अदने" इति चौरादिकस्य सप्तम्यां- **भक्षयेदिति**, वर्तमानायां- **भक्षयतीति**, मांसभक्षणस्य निन्द्यत्वादन्याय्यत्वाच्चाह- **धिग् गर्हामहे, अन्याय्यमेतदिति** । अस्य वैकल्पिकत्वादाह- **पक्षे** इति, अद्यतन्याम्- **अबभक्षत्**, ह्यस्तन्याम्- **अभक्षयत्**, परोक्षायां- **भक्षयाञ्चकार**, श्वस्तन्यां- **भक्षयिता**, भविष्यन्त्यां- **भक्षयिष्यति** । सप्तमीनिमित्ते क्रियातिपत्तिर्भवति, तदिहाप्यस्तीत्याह- **सप्तमीनिमित्तमस्तीति**- कथमित्येतद् गर्हा च, तत्र विशेषमाह- **भूते क्रियातिपतने वा क्रियातिपत्तिर्भवतीति**- "वोतात् प्राक्" [ ५. ४. ११. ] इति वा क्रियातिपत्तिरित्यर्थः, तदेवोदाहरति- **कथं नाम तत्रभवान् मांसमभक्षयिष्यदिति**- अत्र क्रियातिपत्तिः, पक्षे- **भक्षयेदित्यादि**, भविष्यति व्यवस्थामाह- **भविष्यति तु क्रियातिपतने नित्यमेव क्रियातिपत्तिरिति**- "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" [ ५. ४. ९. ] इति नित्यं क्रियातिपत्तिः, तदेवोदाहरति- **कथं नाम तत्रभवान् मांसमभक्षयिष्यदिति**, एवकारव्यवच्छेद्यमाह- **न तु वर्तमाना-सप्तमी-भविष्यन्ती-श्वस्तन्यः** इति- इमा यथा भूते भवन्ति तथा नात्रेत्यर्थः । क्षेपानुवृत्तेर्व्यावर्त्यमाह- **कथं नाम तत्रभवान् साधूनपूपुजदिति**- कथं केन प्रकारेणेत्यर्थः, अत्रास्याप्रवृत्त्या भूतेऽद्यतनी, एवं यथास्वकालमन्या अपि विभक्तय इत्याह्- **एवं यथाप्राप्ति वर्तमानादयो भवन्तीति** ॥ ५. ४. १३. ॥

---

## किंवृत्ते सप्तमी-भविष्यन्त्यौ । ५. ४. १४. ॥

**त० प्र०- किंवृत्ते उपपदे क्षेपे गम्यमाने धातोः सप्तमी-भविष्यन्त्यौ भवतः । सर्वविभक्त्यपवादः । किं तत्रभवाननृतं ब्रूयात्, किं तत्रभवान् अनृतं वक्ष्यति, को नाम कतरो नाम कतमो नाम यस्मै तत्रभवाननृतं ब्रूयात्, अनृतं वक्ष्यति । अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः- किं तत्रभवाननृतमवक्ष्यत्, पक्षे- ब्रूयात् वक्ष्यति च । भविष्यति तु नित्यम्- तत्रभवाननृतमवक्ष्यत् । क्षेप इत्येव- किं तत्रभवान् देवानपूपुजदित्यादि ॥१४॥**

---

**श० म० न्यासानुसन्धानम्- किंवृत्ते० । किंवृत्ते** इति- किमो वृत्तं किंवृत्तम्, किं पुनः किमो वृत्तमिति चेत् ? उच्यते- वृत्तग्रहणेन तद् विभक्त्यन्तं प्रतीयात्, तदित्यनेन किंशब्दः सम्बध्यते, किमित्येतच्छब्दरूपं विभक्त्यन्तं प्रतीयात् । डतरडतमौ चेति परिसंख्यानं सम-

यंते । "यत्-तत्-किमन्यात्" [ ७. ३. ५३. ] "बहूनां प्रश्ने डतमश्च वा" [ ७. ३. ५४. ] इत्येतौ प्रत्ययौ किंशब्दसम्बन्धिनावेव वृत्तग्रहणेन प्रतीयात्, प्रत्ययग्रहणपरिभाषया च डतरडतमान्तं प्रतीयादित्येषोऽर्थो वेदितव्यः, परिसंख्यानं नियम इत्यर्थः, तेन 'किन्तरां किंगोः किंपुरुषः' इत्येवमादिषूपपदेषु न भवति, तेषां किंवृत्तत्वस्य परिगणनेन निरस्तत्वादिति । वाग्रहणे नोत्तरत्र विकल्पानुवृत्तिरिति नात्र विकल्पः । ननु "किंवृत्ते भविष्यन्ती च" इति कस्मान्नोक्तम् ? प्रकृता हि सप्तमी, ततश्चकारेण तस्या एव समुच्चयो विज्ञास्यते, किं सप्तमीग्रहणेनेति चेत् ? उच्यते– असति हि सप्तमीग्रहणे यथा प्रकृतत्वाच्चकारेण सप्तमी समुच्चीयते तथा वर्तमानापि समुच्चीयेत, साऽपि प्रकृतैव, तस्माद् वर्तमानानिवृत्त्यर्थं सप्तमीग्रहणं कृतम् । किञ्च चानुकृष्टं नोत्तरत्रेति सप्तम्या अनुवृत्तिरप्युत्तरत्र न स्यादिति तदर्थमपि विज्ञेयम् । सर्वास्वपि विभक्तिषु किंवृत्तमुपपदं सम्भवति, तत्र कया कया विभक्त्या भवितव्यमित्याशङ्कायामाह– **सर्वविभक्त्यपवादः** इति– विशेषविहितत्वात् तत्रायं योगोऽपवादत्वात् प्रवर्तते, सप्तमीभविष्यन्त्यावेव भवत इति भावः । उदाहरति– **किं तत्रभवाननृतं ब्रूयादि**त्यादि, "ब्रूंग्क् व्यक्तायां वाचि" इत्यस्य सप्तम्यां 'ब्रूयाद्' इति, भविष्यन्त्यां तु "अस्तिब्रुवोर्भू-वचावशिति" [ ४. ४. १. ] इति वचादेशे– 'वक्ष्यति' इति, किमिति च विभक्त्यन्तत्वात् किंवृत्तम्, एवं **क्व** इति विभक्त्यन्तम्, **कतर** इति डतरप्रत्ययान्ततया **कतम** इति च डतमप्रत्ययान्ततया च किंवृत्तमिति । सर्वविभक्त्यपवाद इति यदुक्तं तत्र विशेषमाह– **अत्रापि सप्तमीनिमित्तमस्ती**ति, तथा च क्रियातिपत्त्या भवितव्यमित्यर्थः, अत्रापि व्यवस्थामाह– **भूते क्रियातिपतने वा क्रियातिपत्तिरि**ति– "वोतात् प्राक्" [ ५. ४. ११. ] इति वा क्रियातिपत्तिरित्यर्थः, एतदेवोदाहरति– **किं तत्रभवान् अनृतमवक्ष्यद्**इति, पक्षेऽस्य प्रवृत्तिरित्याह– **पक्षे ब्रूयात् वक्ष्यति च,** भविष्यति व्यवस्थामाह– **भविष्यति तु नित्यमि**ति– "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" [ ५. ४. ९. ] इति नित्यं क्रियातिपत्तिरित्यर्थः, तदेवोदाहरति– **किं तत्रभवाननृतमवक्ष्यद्**इति । क्षेपानुवृत्तेर्व्यावृत्त्यं दर्शयति– **क्षेप इत्येव– किं तत्रभवान् देवानपूपुजद्**इत्यादि, आदिशब्देन यथास्वमन्यासां विभक्तीनां संग्रहः ॥ ५. ४. १४. ॥

## अश्रद्धाऽमर्षेऽन्यत्रापि । ५. ४. १५. ॥

**त० प्र०– क्षेप इति निवृत्तम् । अश्रद्धा–असंभावना, अमर्षोऽक्षमा, अन्यत्र– अकिंवृत्ते, अपिशब्दात् किंवृत्ते चोपपदेऽश्रद्धा-ऽमर्षयोर्गम्यमानयोर्धातोः सप्तमी-भविष्यन्त्यौ भवतः । सर्वविभक्त्यपवादः । वचनभेदाद् यथासंख्यं नास्ति । अश्रद्धायाम्–न श्रद्दधे न संभावयामि नावकल्पयामि तत्रभवान् नामाऽदत्तं गृह्णीयात्, ग्रहीष्यति । किंवृत्तेऽपि– न श्रद्दधे न संभावयामि नावकल्पयामि किं तत्रभवान् नामाऽदत्तमाददीत, अदत्तमादास्यते । अमर्षे– न मर्षयामि न क्षमे, धिग् मिथ्या, नैतदस्ति, तत्रभवान् नामाऽदत्तं गृह्णीयात्, अदत्तं ग्रहीष्यति । किंवृत्तेऽपि– न मर्षयामि न क्षमे, धिग् मिथ्या, नैतदस्ति, किं तत्रभवानदत्तं गृह्णीयात्, अदत्तं ग्रहीष्यति । अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिर्भवति– न श्रद्दधे न मर्षयामि तत्रभवानदत्तमग्रहीष्यत्, पक्षे– गृह्णीयात् ग्रहीष्यति च । भविष्यति तु नित्यम्– न श्रद्दधे न मर्षयामि तत्रभवानदत्तमग्रहीष्यत् । अन्यत्रापीति किम् ? यदाऽर्थात् प्रकरणाद् वाऽश्रद्धाऽमर्षयोर्गम्यमानत्वात् तद्वाचकेनाप्युपपदेन धातोर्न योगस्तदा मा भूत् ॥१५॥**

श० म० न्यासानुसन्धानम्–अश्रद्धा० । **क्षेप इति निवृत्तमि**ति– व्याख्यानादिति भावः । श्रद्धाया आदरक्रियारूपतया प्रसिद्धाया अभाव इत्यर्थो मा ज्ञायीत्यत आह– **अश्रद्धा असम्भावने**ति– तथा च विश्वासरूपा श्रद्धेह प्रतिषिध्यत इत्यसम्भावनारूपत्वे पर्यवस्यति । **अमर्षोऽक्षमे**ति– अक्षमा असहनम् । **अन्यत्रे**त्यस्यार्थमाह–**अकिंवृत्ते** इति, पूर्वसूत्रस्य किंवृत्तविषयत्वात् ततोऽन्यस्य तदभावरूपत्वादित्यर्थः । अपिशब्दसमुच्चेयमाह– **अपिशब्दात् किंवृत्ते चे**ति । अत्रापि सर्वविभक्तिसम्भव इत्याह– **सर्वविभक्त्यपवादः** इति । अत्र हि द्वावर्थौ प्रत्ययावपि द्वावेव, ततश्च यथासंख्येन भवितव्यमिति कस्यचिद् भ्रान्तिः स्यादतस्तन्निराकर्तुमाह– **वचनभेदाद् यथासंख्यं नास्ती**ति– 'सप्तमी-भविष्यन्त्यौ' इति द्विवचनम्, 'अश्रद्धाऽमर्षे' इत्येकवचनमिति वचनभेदः । लघुन्यासकारस्त्वेवमाह– "**अन्यत्रापी**ति– अपिशब्दसमु-

च्चितेन किंवृत्तेन द्वित्वाद् अश्रद्धाऽमर्षाभ्यां सहात्र सूत्रे यथासंख्यं न "राष्ट्रक्षत्रियात्०" [ ६. १. ११४. ] इति सूत्रेऽपत्याधिकारे सति 'राज्ञ्यपि' इति कर्तव्ये अपत्यग्रहणात्, अन्यथा अपिशब्दसमुच्चितेनाधिकृतेनापत्येन सिद्धत्वादपत्यग्रहणं व्यर्थं स्यात् ।" इति । यथोद्देशन्यायेन पूर्वमश्रद्धायामुदाहर्तुमवतारयति– **अश्रद्धायामिति । न श्रद्दधे न सम्भावयामि नावकल्पयामि०** इति– अत्र "सति" [ ५. २. १९. ] इति वर्तमाना, श्रत्पूर्वस्य दधातेः श्रद्दधे, सम्पूर्वस्य ण्यन्तस्य भवतेः सम्भावयामि, अवपूर्वस्य ण्यन्तस्य "क्लपौङ् सामर्थ्ये" इत्यस्य अवकल्पयामि, त्रीण्यपि समानार्थानि, नञा योगोदसम्भावना गम्यते । **तत्रभवान् नामादत्तं गृह्णीयात् ग्रहीष्यतीति**– अत्रानेन सप्तमीभविष्यन्त्यौ, धातुश्च "ग्रहीश् उपादाने" इति । उक्तोऽकिंवृत्ते प्रयोगः, अथ किंवृत्ते प्रयोगमुदाहर्तुमाह– **किंवृत्तेऽपीत्यादि**– अत्र "डुदांग्क् दाने" इति दाधातुः, शेषं प्राग्वत् । अथामर्षार्थे उदाहरणावसर इत्याह– **अमर्षे– न मर्षयामीत्यादि**– "मृषिण् तितिक्षायाम्" इति यौजादिकस्य णिचि– मर्षयामीति, "क्षमौषि सहने" इत्यस्य क्षमे इति, शेषं प्राग्वत् । **अत्रापि सप्तमीनिमित्तमस्तीत्यादि** प्राग्वद् विज्ञेयम् । पदकृत्यं पृच्छति– **अन्यत्रापीति किमिति**, उत्तरयति– **यदाऽर्थात् प्रकरणाद् वाऽश्रद्धाऽमर्षयोर्गम्यमानत्वात् तद्वाचकेनाप्युपपदेन धातोर्न योगस्तदा मा भूदिति**, अत्रेत्थं लघुन्यासे–"पूर्वसूत्रात् किंवृत्तानुवृत्त्यभावात् किंवृत्तेऽकिंवृत्ते च भविष्यति, किमन्यत्रापीत्येनेनेत्याशङ्का, **तद्वाचकेनापीति**– यथा किंवृत्तेऽकिंवृत्ते च विभक्ती स्तो न तथाऽश्रद्धाऽमर्षयोर्गम्यमानयोः, किन्तु पदैः प्रयुज्यमानयोरेव, एतच्चास्मिन्नेव सूत्रे ज्ञातव्यं नोत्तरत्र, यतः "शेषे भविष्यन्त्ययदौ" [ ५. ४. २०. ] इत्यत्र 'आश्चर्यं यदि स भुञ्जीत, चित्रं यदि सोऽधीयीत' अत्राश्रद्धाऽप्यस्तीति कथयिष्यति ।" इति ॥ ५. ४. १५. ॥

## किंकिलाऽस्त्यर्थयोर्भविष्यन्ती । ५. ४. १६. ॥

**त० प्र०– किंकिलेति समुदायशब्देऽस्त्यर्थे च शब्दे उपपदेऽश्रद्धाऽमर्षयोर्गम्यमानयोर्धातोर्भविष्यन्ती भवति । सप्तम्यपवादः । वचनभेदादश्रद्धामर्ष इति यथासंख्यं नास्ति । न श्रद्दधे न मर्षयामि किंकिल नाम तत्रभवान् परदारानुपकरिष्यते, "गन्धना०" [ ३. ३. ७६. ] दिसूत्रेण साहसे आत्मनेपदम् । अस्त्यर्था अस्ति-भवति-विद्यतयः । न श्रद्दधे न मर्षयामि अस्ति नाम भवति नाम विद्यते नाम तत्रभवान् परदारानुपकरिष्यते । अत्र सप्तमीनिमित्तं नास्तीति क्रियातिपतने क्रियातिपत्तिर्न भवति ॥ १६ ॥**

**श० म० न्यासानुसन्धानम्–किंकिला० । किंकिलेति समुदायशब्दे** इति– एतेन किं-किलशब्दयोः प्रत्येकमुपपदत्वं निरस्यति, कस्मात् पुनस्तयोश्च प्रत्येकमुपपदत्वं न भवति ? केवलस्य किंशब्दस्याश्रद्धाऽमर्षयोर्वृत्त्यसम्भवात् समुदायस्य च सम्भवात् । किंकिलेति समुदायः क्रोधव्यञ्जकः । **अस्त्यर्था अस्ति-भवति-विद्यतय** इति वक्ष्यति । **वचनभेदाद् अश्राऽमर्ष इति यथासंख्यं नास्तीति**– पूर्वसूत्रनिर्दिष्टस्य 'अश्रद्धामर्षे' इति पदस्यैकवचनान्तत्वमिह निर्दिष्टस्य किंकलास्त्यर्थयोरिति पदस्य च द्विवचनान्तत्वमिति समत्वाभावान्न यथासंख्यं– किंकिलेत्यस्याश्रद्धायामस्त्यर्थस्यामर्षे चान्वयोऽपि तु यथायोगमुभयोरुभयत्रान्वय इति भावः । तदाह– **न श्रद्दधे न मर्षयामि किंकिलेत्यादि** । अश्रद्धायाः कारणमुखेन विशेषणमाह– **तत्र भवानिति**, अमर्षस्य कारणं **परदारानिति**, योऽस्माकमादरणीयो भवान् स परदारानुपकरिष्यते इति न श्रद्धाविषयः, अथ चेत् सत्यं तर्हि क्षन्तव्योऽपि नेति वक्तुरभिप्रायः । साहसार्थे 'उपकरिष्यते' इत्यत्रात्मनेपदम्, साहसं चाविमृश्य प्रवृत्तिः । तत्रभवत्कर्तृकं परदारोपकरणमस्ति नाम, न तत् श्रद्दधे इत्यादिक्रमेणान्वयः । पूर्वसूत्रप्राप्तसप्तमीं प्रबाध्य केवलं भविष्यन्ती विधीयते, तथा च सप्तम्या निमित्ताभावः स्पष्ट एवेति "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" [५. ४. ९.] इत्यस्याप्राप्तिरित्याह– **अत्र सप्तमीनिमित्तं नास्तीति क्रियातिपतने क्रियातिपत्तिर्न भवतीति** ॥ ५. ४. १६. ॥

## जातु-यद्-यदा-यदौ सप्तमी । ५. ४. १७. ॥

**त० प्र०– 'जातु यद् यदा यदि' इत्येतेषूपपदेषु अश्रद्धाऽमर्षयोर्गम्यमानयोर्धातोः सप्तमी भवति । भविष्यन्त्यपवादः । न श्रद्दधे न क्षमे– जातु तत्रभवान् सुरां पिबेत्, यत् तत्रभवान् सुरां पिबेत्, यदा तत्रभवान् सुरां पिबेत्, यदि तत्रभवान् सुरां पिबेत् । अत्र सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिः– न श्रद्दधे न क्षमे**

**जातु तत्रभवान् सुरामपास्यत्, पक्षे– पिबेत् । भविष्यति तु नित्यम्– जातु तत्रभवान् सुरामपास्यत् ॥१७॥**

**श० म० न्यासानुसन्धानम्– जातु० । भविष्यन्त्यपवादः** इति–"अश्रद्धामर्षेऽन्यत्रापि" [५. ४. १५.] इत्यनेन हि सप्तमी-भविष्यन्त्योरुभयोः प्राप्त्याऽनेन सूत्रेण सप्तमीमात्रस्य विधानाद् भविष्यन्तीं तत्रत्यां बाधत इत्यायाति । **न श्रद्दधे न क्षमे** इति– अत्र सति वर्तमाना, **जातु तत्रभवान् सुरां पिबेदिति**– "पां पाने" इत्यतोऽनेन सप्तम्यां "श्रौति-कृवु०" [ ४. २. १०८ ] इत्यनेन पिबादेशे– 'पिबेत्' इति, एवं वक्ष्यमाणोदाहरणत्रयेऽपि ज्ञेयम्, 'न श्रद्दधे न क्षमे' इति च सम्बन्धनीयम् । सप्तमीनिमित्तसद्भावात् क्रियातिपत्तिमाह– **अत्र सप्तमीनिमित्तमस्तीत्यादिना**, अनेन च कालसामान्ये विधानाद् भूतभविष्यतोरुभयोरपि कालयोः सप्तमीनिमित्तमस्तीति "वोतात् प्राक्" [ ५. ४. ११. ] इति भूते वा क्रियातिपत्तिरिति पक्षेऽनेन सप्तमी, भविष्यति तु "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" [ ५. ४. ९. ] इति नित्यं क्रियातिपत्तिः, तत्र भूते उदाहरति– **न श्रद्दधे न क्षमे– तत्रभवान् सुरामपास्यत्**, पक्षे **पिबेदिति**, भविष्यति नित्यमुदाहरति– **जातु तत्रभवान् सुरामपास्यदिति** ॥ ५. ४. १७. ॥

## क्षेपे च यच्च-यत्रे । ५. ४. १८. ॥

**त० प्र०– यच्च-यत्रशब्दयोरुपपदयोः क्षेपेऽश्रद्धाऽमर्षयोश्च गम्यमानयोर्धातोः सप्तमी भवति । अश्रद्धाऽमर्षयोर्भविष्यन्त्याः, क्षेपे तु सर्वविभक्तीनामपवादः । धिग् गर्हामहे– यच्च तत्रभवानस्मानाक्रोशेत्, यत्र तत्रभवानस्मानाक्रोशेत्, न श्रद्दधे न क्षमे– यच्च तत्रभवान् परिवादं कथयेत्, यत्र तत्रभवान् परिवादं कथयेत् । अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिर्भवति– धिग् गर्हामहे न श्रद्दधे न क्षमे– यच्च यत्र वा तत्रभवानस्मानाक्रोक्ष्यत्, पक्षे– आक्रोशेत् । भविष्यति तु नित्यम्– धिग् गर्हामहे, न श्रद्दधे न क्षमे– यच्च यत्र वा तत्रभवान् परिवादमकथयिष्यत् ॥१८॥**

**श० म० न्यासानुसन्धानम्– क्षेपे०** । चकारेणाश्रद्धामर्षयोरनुकर्ष इत्याह– **अश्रद्धामर्षयोश्चेति** । अत्रार्थत्रयं निमित्तत्वेनोपात्तम्, तत्राश्रद्धामर्षयोः सप्तमी-भविष्यन्त्योः प्राप्तिः "अश्रद्धामर्षेऽन्यत्रापि" [ ५. ४. १५. ] इत्यनेन, क्षेपे तु कालसामान्ये– तत्तत्काले सर्वासां विभक्तीनां प्राप्तिरिति सप्तमीमात्रस्य विधानात् पूर्वत्र भविष्यन्त्याः, क्षेपे तु सर्वासां विभक्तीनामपवादोऽयमित्याह– **अश्रद्धामर्षयोर्भविष्यन्त्याः क्षेपे तु सर्वविभक्तीनामपवाद** इति । क्षेपे– **धिग् गर्हामहे, यच्च तत्रभवानस्मानाक्रोशेदिति**, अश्रद्धामर्षयोः– **न श्रद्दधे न क्षमे– यच्च तत्रभवान् परिवादं कथयेदिति, यत्र तत्रभवानि**त्युदाहरणेऽपि 'न श्रद्दधे न क्षमे' इति योजनीयम् । अत्रापि क्रियातिपतने भूते वा, भविष्यति नित्यं क्रियातिपत्तिः ॥ ५. ४. १८. ॥

## चित्रे । ५. ४. १९. ॥

**त० प्र०– चित्रमाश्चर्यम्, तस्मिन् गम्यमाने यच्च-यत्रयोरुपपदयोर्धातोः सप्तमी भवति । सर्वविभक्त्यपवादः । चित्रमाश्चर्यमद्भुतं विस्मनीयं–यच्च तत्रभवानकल्प्यं सेवेत, यत्र तत्रभवानकल्प्यं सेवेत । अत्रापि सप्तमीनिमित्तमस्तीति भूते क्रियातिपतने वा क्रियातिपत्तिर्भवति– चित्रं यच्च यत्र वा तत्र भवानकल्प्यमसेविष्यत्, पक्षे–सेवेत । भविष्यति तु नित्यम्– चित्रं यच्च वा तत्रभवानकल्प्यमसेविष्यत ॥१९॥**

**श० म० न्यासानुसन्धानम्– चित्रे०** । चित्रपदार्थमाह– **चित्रमाश्चर्यम्** । कालविशेषानिर्देशात् तत्तत्काले सर्वासां विभक्तीनां सम्भवादाह– **सर्वविभक्त्यपवादः** इति– विशेषविधानादित्यर्थः । **चित्रमाश्चर्यमद्भुतमि**ति– त्रीण्यपि चित्रार्थानि पदानीत्यर्थः । **यच्च तत्रभवानकल्प्यं सेवेते**ति– अत्रानेन सप्तमी, एवं यत्रघटितोदाहरणेऽपि । प्राग्वदत्रापि सप्तमीनिमित्तसद्भावात् क्रियातिपतने भूते वा, भविष्यति तु नित्यं क्रियातिपत्तिः ॥ ५. ४. १९. ॥

## शेषे भविष्यन्त्ययदौ । ५. ४. २०. ॥

**त० प्र०– शेषे यच्च-यत्राभ्यामन्यस्मिन्नुपपदे चित्रे गम्यमाने धातोर्भविष्यन्ती विभक्तिर्भवति, 'अयदौ–यदिशब्दश्चेन्न प्रयुज्यते । सर्वविभक्त्यपवादः । चित्रमाश्चर्यमन्धो नाम पर्वतमारोक्ष्यति, बधिरो नाम व्याकरणं श्रोष्यति, मूको नाम धर्मं कथयिष्यति । अत्र सप्तमीनि-**

मित्तं नास्तीति न क्रियातिपत्तिः । शेष इति किम् ? यच्च-यत्रयोः पूर्वेण सप्तम्येव । अयदाविति किम् ? आश्चर्यं यदि स भुञ्जीत, चित्रं यदि सोऽधीयीत, अत्र अश्रद्धाऽप्यस्तीति "जातु-यद्-यदा-यदौ सप्तमी" [ ५. ४. १७.] इत्यनेन सप्तमी ॥२०॥

**श० म० न्यासानुसन्धानम्– शेषे०** । शेषे इति व्याख्याति– **शेषे–यच्चयत्राभ्यामन्यस्मिन्नुपपदे** इति– अनेन यच्चयत्रापेक्षं शेषं दर्शयति, चित्रापेक्षया शेषो न शक्यते विज्ञातुम्, चित्रस्य स्वर्यमाणत्वात् । 'अयदौ' इति व्याख्याति– **यदिशब्दश्चेन्न प्रयुज्यते** इति– प्रसज्यप्रतिषेध इत्यर्थः । कालविशेषानुपादानात् तत्तत्काले सर्वासां विभक्तीनां प्राप्तिरत आह– **सर्वविभक्त्यपवादः** इति । उदाहरति–**चित्रमाश्चर्यमद्भुतमन्धो नाम पर्वतमारोक्ष्यतीति**– "रुहं जन्मनि" आङ्पूर्वादितोऽनेन भविष्यन्त्यां "हो धुट्पदान्ते" [ २. १. ८२. ] इति हस्य ढे "षढोः कः सि" [ २. १. ६२. ] इति ढस्य कत्वे च– आरोक्ष्यतीति । **बधिरो नाम व्याकरणं श्रोष्यतीति**– "श्रुंट् श्रवणे" इत्यस्य श्रोष्यतीति । **मूको नाम धर्मं कथयिष्यतीति**– "कथण् वाक्यप्रबन्धे" इत्यदन्तस्य चौरादिकस्य कथयिष्यतीति, चित्रमाश्चर्यमद्भुतमिति सर्वत्र योजनीयम् । प्राग्वदत्र न क्रियापत्तिरित्याह– **अत्र सप्तमीनिमित्तं नास्तीति न क्रियातिपत्तिरिति**– पूर्वत्र तु तेन तेन सूत्रेण सप्तमीविधानमिह तु न तथा किन्तु भविष्यन्तीविधानमिति विशेषादित्यर्थः । पदकृत्यं पृच्छति–**शेष इति किमिति**, उत्तरयति– **यच्चयत्रयोः पूर्वेण सप्तम्येवेति**– "चित्रे" इत्यनेनेत्यर्थः । पुनः पृच्छति– **अयदाविति किमिति**, उत्तरयति– **आश्चर्यं यदि स भुञ्जीत, चित्रं यदि सोऽधीयीतेति**– नात्रानेन भविष्यन्तीत्यर्थः, केनात्र सप्तमीत्याह–**अत्राश्रद्धाऽप्यस्तीति "जातु-यद्-यदा-यदौ सप्तमी" [ ५. ४. १७. ] इत्यनेन सप्तमीति**– अश्रद्धाऽपीत्यपिशब्देन न केवलं यदिशब्दयोग इत्यावेदयति ॥ ५. ४. २०. ॥

**सप्तम्युताप्योर्बाढे** । ५. ४. २१. ॥

**त० प्र०– बाढेऽर्थे वर्तमानयोरुताप्योरुपपदयोर्धातोः सप्तमी भवति । सर्वविभक्त्यपवादः । उत कुर्यात्, अपि कुर्यात्, बाढं करिष्यतीत्यर्थः । बाढ इति किम् ? उत दण्डः पतिष्यति ?, अपिधास्यति द्वारम्, प्रश्नः पिधानं च यथाक्रमं गम्यते । बोतात् प्रागिति निवृत्तम् । इतः प्रभृति सप्तमीनिमित्ते सति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः– उताऽकरिष्यत्, अप्यकरिष्यत् ॥२१॥**

**श० म० न्यासानुसन्धानम्– सप्त०** । यद्यप्येतयोरुपपदयोरन्यार्थत्वमपि तथापि यत्रानयोर्बाढमित्यर्थस्तत्रैवेदं सूत्रं प्रवर्तत इति बाढमित्यस्य न सप्तमीविभक्तिनिमित्तत्वमपि त्वनयोर्विशेषणत्वमित्याह– **बाढेऽर्थे वर्तमानयोरिति**, यद्यपि बाढमित्यव्ययं क्रियाविशेषणं वा ततश्च तस्मादुत्पन्ना विभक्तिर्लुप्येत द्वितीयान्तमेव वा प्रयुज्येत, तथापि तस्य विभक्तिप्रतिरूपकाव्ययत्वेन तादृशरूपस्यैवाव्ययत्वम्, अनुकरणस्थले च न तत्त्वमिति बाढे इति सप्तम्यन्तनिर्देशो नासङ्गतः, बाढेऽर्थे इत्यस्य बाढशब्दप्रतिपाद्येऽर्थे इत्यर्थः । शब्दार्थयोस्तादात्म्याद् वा तथानिर्देशो विज्ञेयः । **सर्वविभक्त्यपवादः** इति– कालमात्रे विधानात् तत्तत्काले प्रातिस्विकरूपेण सर्वासां प्राप्तेः सर्वविभक्त्यपवादत्वमस्याः स्पष्टमेव । उदाहरति– **उत कुर्यात्, अपि कुर्यादिति**– "डुकृंग् करणे" अतोऽनेन सप्तम्यां "कृग्-तनादेरुः" [ ३. ४. ८३. ] इत्युप्रत्यये "नामिनो गुणो०" [ ४. ३. १. ] इति ऋतो गुणे "कृगो यि च" [ ४. २. ८८. ] इत्युलोपे "अतः शित्युत्" [४. २. ८९. ] इत्यत उकारे "कुरुच्छुरः" [ २. १. ६६. ] इति दीर्घनिषेधे च–'कुर्यात्' इति, अत्र 'उतापी' बाढार्थे वर्तेते, तदाह– **बाढं करिष्यतीत्यर्थः** इति– भविष्यदर्थे विग्रहः, भूतादौ स्वयमूहनीयमिति भावः, न तु तन्मात्रस्य विग्रहे तात्पर्यम् । पदकृत्यं पृच्छति– **बाढ इति किमिति**, उत्तरयति– **उत दण्डः पतिष्यति ?, अपिधास्यति द्वारमिति**– बाढार्थाभावादत्र नास्य प्रवृत्तिः । एवं तर्हि कस्यार्थस्यावगतिरित्याह– **प्रश्नः पिधानं च यथाक्रमं गम्यते** इति– प्रथमे उतशब्देन प्रश्नः, द्वितीये अपिशब्देन पिधानमाच्छादनं गम्यते इत्यर्थः । पूर्वोक्तं स्मारयति– **बोतात् प्रागिति निवृत्तमिति**– तदवधिरितः पूर्वमेव वृत्त इति स्मरणीयमिति भावः, न तु तन्निवृत्तये व्याख्यानस्यावश्यकता । निवृत्तेः फलं स्फोरयति– **इतः प्रभृति सप्तमीत्यादि**, तथा चाग्रे सप्तमीनिमित्ते सति भूते

भविष्यति च नित्यं क्रियातिपत्तिरुदाहार्येति भावः ॥ ५. ४. २१. ॥

## संभावनेऽलमर्थे तदर्थानुक्तौ । ५. ४. २२. ॥

**त० प्र०– अलमोऽर्थः सामर्थ्यं तद्विषये संभावने– श्रद्धाने गम्यमाने तदर्थस्यालमर्थार्थस्य शब्दस्यानुक्तावप्रयोगे धातोः सप्तमी भवति । सर्वविभक्त्यपवादः । शक्यसंभावने–अपि मासमुपवसेत्, अपि पुण्डरिकाध्ययनमह्नाऽधीयीत, अपि स्कन्दकोद्देशं यामेनाधीयीत । अशक्यसंभावने– अपि शिरसा पर्वतं भिन्द्यात्, अपि खारीपाकं भुञ्जीत, अपि समुद्रं दोर्भ्यां तरेत् । अलमर्थ इति किम् ? निदेशस्थायी मे जिनदत्तः प्रायेण गमिष्यति । तदर्थानुक्ताविति किम् ? वसति चेत् सुराष्ट्रेषु वन्दिष्यतेऽलमुज्जयन्तम्, शक्तश्चैत्रो धर्मं करिष्यति । अत्र सप्तमीनिर्निमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिर्भवति– अपि पर्वतं शिरसाऽभेत्स्यत् । तथा 'काकिन्या हेतोरपि मातुः स्तनं छिन्द्यात्' इत्यत्र "क्षेपेऽपि-जात्वोर्वर्तमाना" [ ५. ४. १२. ] इति वर्तमानां बाधित्वा, चित्रमाश्चर्यमपि शिरसा पर्वतं भिन्द्यादित्यत्र तु "शेषे भविष्यन्त्ययदौ" [ ५. ४. २०. ] इति भविष्यन्तीं च बाधित्वा परत्वादनेन सप्तम्येव भवति ॥२२॥**

**श० म० न्यासानुसन्धानम्– संभा०।** पदार्थमाह– **अलमोऽर्थः सामर्थ्यमिति**– अलंशब्दस्य भूषणनिषेधपर्याप्तीनामर्थानां प्रसिद्धत्वेऽपीह ग्राह्यं सामर्थ्यमेवार्थ इति तात्पर्यम्, सामर्थ्यं च प्रौढिः पर्याप्तिर्वा । सम्भावन इत्यस्यार्थः– **श्रद्धान** इति– तत्र योग्यताध्यवसायः । तदर्थानुक्ताविति व्याचष्टे–**तदर्थस्यालमर्थार्थस्य शब्दस्यानुक्तावप्रयोगे** इति– तत् पदमलमर्थपरं तस्य चार्थेन सह बहुव्रीहिः,तथा चालमर्थः सामर्थ्यमर्थो यस्य तादृशस्य शब्दस्याप्रयोगे सतीति फलितम् । **सर्वविभक्त्यपवादः** इति– सर्वविभक्तिविषयेऽस्य विधानात् सर्वविभक्त्यपवादत्वमित्यर्थः । सम्भावनं च द्विविधम्– शक्यविषयस्याशक्यविषयस्य च, तत्र प्रथमं सावतरणमाह– **शक्यसंभावने– अपि मासमुपवसेदिति**– शक्यमनेन मासोपवासायेत्यर्थः, एमन्यत्रापि संगमनीयम् । **अपि पुण्डरीकाध्ययनमह्नाऽधीयीतेति**– उत्तराध्ययनसूत्रगतं पुण्डरीकाभिधानमध्ययनमेकेन दिवसेनाध्येतुं शक्यमित्यर्थः । **अपि स्कन्दकोद्देशं यामेनाधीयीतेति**–भगवतीसूत्रगतः स्कन्दकाभिधानः प्रविभागविशेष एकेन प्रहरेणाध्येतुं शक्य इत्यर्थः । अथाशक्यसम्भावने सावतरणमुदाहरति– **अशक्यसम्भावने–अपि शिरसा पर्वतं भिन्द्यादिति**– शिरसा पर्वतभेदनमशक्यं तस्य सम्भावनमत्र । **अपि खारीपाकं भुञ्जीतेति**–खारी मानविशेषः, तत्परिमितपाकभोजनमशक्यं तस्यात्र सम्भावनम् । **अपि समुद्रं दोर्भ्यां तरेदिति**–बाहुभ्यां समुद्रतरणमशक्यं तस्यात्र संभावनम् । पदकृत्यं पृच्छति–**अलमर्थ इति किमिति**, उत्तरयति– **निदेशस्थायी मे जिनदत्तः प्रायेण गमिष्यतीति**–नात्र तस्य गमने सामर्थ्यं, नवा श्रद्धानं यतः प्रायेण गमिष्यतीत्युक्तेः, निदेशस्थायिनाऽसमर्थेनापि गन्तव्यमेव, तत्रापि प्रायेणेत्युक्त्याऽसामर्थ्यमपि व्यज्यते, यद्यपि श्रद्धाऽभावोऽप्यत्र तथापि न स वाच्य इति न द्व्यङ्गविकलता । पृच्छति– **तदर्थानुक्ताविति किमिति**, उत्तरयति–**वसति चेत् सुराष्ट्रेषु वन्दिष्यतेऽलमुज्जयन्तमिति**–अत्र यद्यपि सुराष्ट्रवासिन उज्जयन्तवन्दने न सामर्थ्यं गम्यते तथाप्यलंशब्दोच्चारणेन तत् कथ्यते, तथा चैकाङ्गवैकल्यमेव, एवं **शक्तश्चैत्रो धर्मं करिष्यतीत्य**त्रापि ज्ञेयम् । अत्र क्रियातिपतने क्रियातिपत्तिर्भवतीत्याह– **अत्र सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिर्भवतीति**–भूतकाले "भूते" [ ५. ४. १०. ] इत्यनेन भविष्यत्काले च "सप्तम्यर्थे०" [ ५. ४. ९. ] इत्यनेन च नित्यं क्रियातिपत्तिरिति भावः । उभयसाधारणमुदाहरणमाह– **अपि पर्वतं शिरसाऽभेत्स्यदिति** । परत्वात् पूर्वसूत्रविषयेऽपि प्रवृत्तिमाह–**तथा काकिन्या हेतोरपि मातुः स्तनं छिन्द्यादिति**– अत्र मातुः स्तनच्छेदनेऽपि तस्य चरमकोटिकनीचकार्यकरणसामर्थ्यं व्यज्यतेऽतोऽलमर्थसत्त्वमिति तात्पर्यम्, अत्र क्षेपे वर्तमाना प्राप्ता, **चित्रमाश्चर्यमपि शिरसा पर्वतं भिन्द्यादिति**– अत्र भविष्यन्ती प्राप्ता, उभयीं परत्वाद् बाधित्वाऽनेन सप्तमी भवति, न तु वर्तमाना-भविष्यन्त्याविति ॥ ५. ४. २२. ॥

## अयदि श्रद्धाधातौ नवा । ५. ४. २३. ॥

**त० प्र०– श्रद्धा–संभावना, तदर्थे धातावुपपदेऽलमर्थविषये संभावने गम्यमाने धातोः सप्तमी वा भवति,**

अयदि-यच्छब्दश्चेन्न प्रयुज्यते । पूर्वेण नित्यं प्राप्ते विकल्पः । श्रद्दधे संभावयामि अवकल्पयामि– भुञ्जीत भवान् । पक्षे यथाप्राप्तम्–भोक्ष्यते भवान्, अभुक्त भवान्, अभुङ्क्त भवान् । अयदीति किम् ? संभावयामि यद् भुञ्जीत भवान्, श्रद्धाधाताविति किम् ? अपि शिरसा पर्वतं भिन्द्यात्, उभयत्र पूर्वेण नित्यं सप्तमी । अत्रापि सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः– संभावयामि नाभोक्ष्यत भवान् ॥२३॥

---

**श० म० न्यासानुसन्धानम्–अयदि०** । श्रद्धापदं तदर्थपरत्वेन व्याचष्टे–**श्रद्धा सम्भावना, तदर्थे धातावुपपदे** इति । पूर्वसूत्रस्याप्यनुवृत्तेराह– **अलमर्थविषये सम्भावने गम्यमाने** इति । अयदीति प्रसज्यप्रतिषेध इत्याह– **यच्छब्दश्चेन्न प्रयुज्यते** इति । पूर्वसूत्रेण समानविषयत्वादेवाह– **पूर्वेण नित्यं प्राप्ते विकल्पः** इति । श्रद्धापदस्य तदर्थपरतया व्याख्यानस्योदाहरणमाह– **श्रद्दधे, सम्भावयामि, अवकल्पयामि– भुञ्जीत भवानि**ति– "कृपण् अवकल्कने" अवकल्कनं मिश्रीकरणं सामर्थ्यं च, अवकल्पने इत्यन्ये, कल्पयति वृत्तिं राजा, चन्द्रस्तु भूकृपौ अवकल्कने चिन्तने इति व्याख्यत्, सम्भावयति, अवकल्पयति । अस्य वैकल्पिकत्वात् पक्षे किमित्याह– **पक्षे यथाप्राप्तमि**ति– भविष्यति भूते च यथाप्राप्ति भविष्यन्त्यादय इत्यर्थः, **भोक्ष्यते भवानि**त्यत्र भविष्यन्ती, **अभुक्त भवानि**त्यत्राद्यतनी, **अभुङ्क्त भवानि**त्यत्र च ह्यस्तनी । पदकृत्यं पृच्छति– **अयदीति किमि**ति, उत्तरयति– **संभावयामि यद् भुञ्जीत भवानि**ति– अत्र यदः प्रयोगान्नास्य प्रवृत्तिः । पुनः पृच्छति– **श्रद्धाधाताविति किमि**ति, उत्तरयति– **अपि शिरसा पर्वतं भिन्द्यादि**ति–अत्र विदारणार्थो भिद्धातुरुपपदं, न तु श्रद्धार्थो धातुरिति नास्य प्रवृत्तिः, एवं तर्हि केनोभयत्र सप्तमीत्याह–**उभयत्र पूर्वेण नित्यं सप्तमी**ति– "सम्भावने०" [ ५. ४. २२. ] इत्यनेन नित्यं सप्तमीत्यर्थः । क्रियातिपतने तु नित्यं क्रियातिपत्तिरित्याह– **अत्रापि सप्तमीनिमित्तमस्तीत्या**दि । सर्वत्र प्रथमवाक्ये वर्तमाना तु "सति" [ ५. २. १९. ] इत्यनेन ॥ ५. ४. २३. ॥

## सतीच्छार्थात् । ५. ४. २४. ॥

**त० प्र०– सति-वर्तमानेऽर्थे वर्तमानादिच्छार्थाद् धातोः सप्तमी वा भवति, पक्षे तु वर्तमानैव । इच्छेत् इच्छति, उश्यात् वष्टि, कामयेत कामयते, वाञ्छेत् वाञ्छति । "क्षेपेऽपि-जात्वोर्वर्तमाना" [ ५. ४. १२. ] इत्यादावपि परत्वादयमेव विकल्पः– अपि संयतः सन्नकल्प्यं सेवितुमिच्छेत्, अपि संयतः सन्नकल्प्यं सेवितुमिच्छति, धिग् गर्हामहे । भूत-भविष्यतोरभावात् सत्यपि सप्तमीनिमित्ते सत्यपि च क्रियातिपतने क्रियातिपत्तिर्न भवति ॥२४॥**

---

**श० म० न्यासानुसन्धानम्–सती०** । **सती**ति व्याचष्टे– **वर्तमानार्थे वर्तमानादि**ति । धातोः प्रकृतत्वादाह– **इच्छार्थाद् धातोः** । वर्तमानार्थे विधानादस्याभावे वर्तमानैवोचितेत्याह– **पक्षे तु वर्तमानैवे**ति । नात्रोपपदाद्यपेक्षेति साधारणतः क्रियामात्रमुदाहरति– **इच्छेत्, इच्छती**ति– "इषत् इच्छायाम्" इतः सप्तम्यां वर्तमानायां परतः शविकरणे "गमिषद्०" [ ४. २. १०६. ] इति षस्य छे तस्य "स्वरेभ्यः" [ १. ३. ३०. ] इति द्वित्वे "अघोषे प्रथमोऽशिटः" [ १. ३. ५०. ] इति पूर्वस्य चे–इच्छेत्, इच्छतीति । "वशक् कान्तौ" कान्तिरिच्छा, "वशेरयङि" [ ४. १. ८३. ] इति य्वृति– **उश्यात्**, "यज-सृज०" [ २. १. ८७. ] इति शस्य षे तकारस्य "तवर्गस्य" [ १. ३. ६०. ] इति टे च– **'वष्टि'** इति । "कमूङ् कान्तौ" कान्तिरिच्छा, "कमेर्णिङ्" इति णिङि– **कामयेत, कामयते** । "वाछु इच्छायाम्" अस्योदित्त्वात् "उदितः स्वरान्नोऽन्तः" [ ४. ४. ९८. ] इति ने "म्नां" [ १. ३. ३९. ] इति नस्य ञे– **वाञ्छेत्**, वाञ्छतीति । क्षेपादौ यद्यपि पूर्वोक्ता वर्तमाना विशेषविहिता तथापीच्छार्थकधातोः केवलाद् विधानेनायमपि विशेषविधिरेवेत्युभयोः परस्परावकाशसत्त्वेन स्पर्ध एव, स्पर्धे च परत्वमूलिकैव व्यवस्थेत्याह– **"क्षेपेऽपि-जात्वोर्वर्तमाना" [ ५. ४. १२. ] इत्यादावपि परत्वादयमेव विकल्पः** इति, तदेवोदाहरति– **अपि संयतः सन्नकल्प्यं सेवितुमिच्छेत्, अपि संयतः सन्नकल्प्यं सेवितुमिच्छति, धिग् गर्हामहे** इति । क्रियातिपत्तेरेतद्विषयेऽ-

भावमाह– **भूतभविष्यतोरभावात् सत्यपि सप्तमीनिमित्ते सत्यपि च क्रियातिपतने क्रियातिपत्तिर्न भवतीति**– यद्यपि क्रियातिपतनरूपं तन्निमित्तमस्ति तथापि भूतभविष्यतोरेव तद्विधानेन, अत्र च तदभावान्न सा विभक्तिर्भवतीति भावः । तथा च तत्रापीयमेवेति ॥ ५. ४. २४. ॥

---

## वर्त्स्यति हेतु-फले । ५. ४. २५. ॥

**त० प्र०– हेतुः कारणं फलं कार्यम्, हेतुभूते फलभूते च वर्त्स्यत्यर्थे वर्तमानाद् धातोः सप्तमी वा भवति । यदि गुरूनुपासीत शास्त्रान्तं गच्छेत्, यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यति, अत्र गुरूपासनं हेतुः शास्त्रान्तगमनं फलम् । वर्त्स्यतीति किम् ? दक्षिणेन चेद् याति न शकटं पर्याभवति । केचित् तु वा सर्वेषु कालेषु सर्वविभक्त्यपवादं सप्तमीं मन्यन्ते–दक्षिणेन चेद् यायान्न शकटं पर्याभवेत्, दक्षिणेन चेद् यास्यति न शकटं पर्याभविष्यति, दक्षिणेन चेद् याति न शकटं पर्याभवति, दक्षिणेन चेदयासीन्न शकटं पर्याभूत । अत्रापि सप्तमीनिमित्तमस्तीति भविष्यति क्रियातिपतने क्रियातिपत्तिः–दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत् । कथम्–**

**"अमङ्क्ष्यद् वसुधा तोये च्युतशैलेन्द्रबन्धना ।**
**नारायण इव श्रीमान् यदि त्वं नाधरिष्यथाः ॥"**

**इति ? वर्त्स्यत्स्येवायं प्रयोगः । केचित् तु भूत इच्छन्ति । हनिष्यतीति पलायिष्यते वर्षिष्यतीति धाविष्यतीत्यत्र तु हेतुफलभावस्येतिशब्देनैव द्योतितत्वात् सप्तमी न भवति ॥२५॥**

---

**श० म० न्यासानुसन्धानम्– वर्त्स्य०** । हेतुफलशब्दस्य द्वन्द्वपरतया व्याख्यानमिष्टं तदनुसारमनयोः शब्दयोरर्थमाह– **हेतुः कारणं फलं कार्यमिति**, द्वे क्रिये इह निर्देश्ये तयोर्हेतुहेतुमद्भावेनान्वयविवक्षेह निमित्तमिति भावः । उदाहरति–**यदि गुरूनुपासीत शास्त्रान्तं गच्छेदिति**– उपपूर्वात् "आसिक् उपवेशने" इत्यतोऽनेन सप्तम्यामुपासीतेति, "गम्लृं गतौ" अतोऽनेन सप्तम्यां "गमिषद्य०" [ ४. २. १०६. ] इति मस्य छे द्वित्वे पूर्वस्य चे च– गच्छेदिति । अस्य वैकल्पिकत्वात् पक्षे भविष्यति भविष्यन्तीत्याह– **यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यतीति**– गमोऽनुस्वारेत्त्वेऽपि "गमोऽनात्मने" [ ४. ४. ५१. ] इतीट्–गमिष्यति । प्रयोगे हेतुफलभावं संगमयति– **अत्र गुरूपासनं हेतुः शास्त्रान्तगमनं फलमिति**–अनयोर्हि हेतुफलभावः प्रसिद्ध एवान्वयव्यतिरेकस्य दृष्टत्वात् । पदकृत्यं पृच्छति– **वर्त्स्यतीति किमिति**, उत्तरयति– **दक्षिणेन चेद् याति न शकटं पर्याभवतीति**– अत्र भविष्यत्कालाभावान्नास्य प्रवृत्तिः । मतान्तरमाह– **केचित् तु सर्वेषु कालेषु सर्वविभक्त्यपवादं सप्तमीं वा मन्यन्ते** इति । तदनुसारमुदाहरति– **दक्षिणेन चेद् यायान्न शकटं पर्याभवेदिति**–इदं सर्वकालविषयं सप्तम्युदाहरणम्, पक्षे भविष्यति– **दक्षिणेन चेद् यास्यति न पर्याभविष्यति**, वर्तमाने– **दक्षिणेन चेद् याति शकटं न पर्याभवति**, भूते– **दक्षिणेन चेदयासीन्न शकटं पर्याभूत्** । अत्रापि क्रियातिपत्तिमाह–**अत्रापि सप्तमीनिमित्तमस्तीति भविष्यति क्रियातिपतने क्रियातिपत्तिरिति** । तदेवोदाहरति– **दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यदिति** । ननु यदि स्वमते भविष्यत्येवात्र सप्तमीविधिस्तर्हि भूते हेतुफलभावे निमित्तत्वाभावात् कथं तत्र क्रियातिपतननिमित्ता क्रियातिपत्तिरिति शङ्कते–**कथम् "अमङ्क्ष्यद् वसुधा तोये** इत्यादि– नारायण इव त्वं यदि [ वसुधां ] न अधरिष्यथाः, तर्हि वसुधा तोये अमङ्क्ष्यदित्यन्वयः । अत्र स्वमतमाह– **वर्त्स्यत्स्येवायं प्रयोगः** इति, तथा च यदि त्वं न धरिष्यसि तर्हि वसुधा तोये मङ्क्ष्यतीति विवक्षितमिति भावः । सर्वेषु कालेषु सप्तमीतिवादिनां मतमाह– **केचित् तु भूत इच्छन्तीति**– भूतेऽपि सप्तमीमनुशासत इह भूते क्रियातिपत्तिमिच्छन्तीत्यर्थः । अप्रवृत्तिस्थलमाह– **हनिष्यतीति पलायिष्यते, वर्षिष्यतीति धाविष्यतीत्यत्र तु हेतुफलभावस्येतिशब्देनैव द्योतितत्वात् सप्तमी न भवतीति**– हेतुफलभावद्योतनायैव सप्तमी विधीयते, स च हेतुफलभाव इतिशब्देनैवोक्त इति * उक्तार्थानामप्रयोगः * इति न्यायेन न सप्तमी भवतीति भावः ॥ ५. ४. २५. ॥

---

## कामोक्तावकच्चिति । ५. ४. २६. ॥

**त० प्र०– वेति निवृत्तम् । काम इच्छा, तस्योक्तिः प्रवेदनं, तस्यां गम्यमानायां धातोः सप्तमी भवति, अक-**

ञ्चिति– न चेत् कञ्चिच्छब्दः प्रयुज्यते । सर्वविभक्त्यपवादः । कामो मे भुञ्जीत भवान्, इच्छा मे, अभिप्रायो मे, श्रद्धा मे, अभिलाषो मे, अधीयीत भवान् । अकञ्चितीति किम् ? कञ्चिज्जीवति मे माता । अत्र सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिः– कामो मे भोक्ष्यत भवान् ॥२६॥

श० म० न्यासानुसन्धानम्– **कामो०** । **वेति निवृत्तमिति**– लक्ष्यानुसारिव्याख्यानादिति भावः । कामोक्ताविति पदं व्याख्याति– **काम इच्छेति**– अभिलाषः स्वाभिप्राय इति यावदिति । **तस्योक्तिः प्रवेदनमिति**– प्रवेदनमाविष्करणं प्रकाशनमिति यावत् । अकञ्चितीत्यत्र प्रसज्यप्रतिषेध इत्याह– **न चेत् कञ्चिच्छब्दः प्रयुज्यते** इति । वत्स्यतीतीत्यस्याननुवर्तनात् कालविशेषविषयत्वाभावात् सामान्यतः कालमात्रे विधानादाह– **सर्वविभक्त्यपवादः** इति । उदाहरति– **कामो मे भुञ्जीत भवानिति**–"भुजंप् पालनाभ्यवहारयोः" "भुनजोऽत्राणे" [ ३. ३. ३७. ] इत्यनेनात्मनेपदेऽनेन सप्तम्यां–भुञ्जीत । **इच्छा मे, अभिप्रायो मे, श्रद्धा मे, अभिलाषो मे** इति चात्वार्यपि वाक्यानि समानार्थानि, एकैकस्य च– **'अधीयत भवान्'** इत्यत्रान्वयः । अधिपूर्वात् "इंङ्क् अध्ययने" इत्यतोऽनेन सप्तम्याम्–अधीयीत । पदकृत्यं पृच्छति– **अकञ्चितीति** किमिति, प्रत्युदाहरणमुखेनोत्तरयति– **कञ्चिज्जीवति मे मातेति**– मातुर्जीवनमभिलषितमिति कञ्चिच्छब्देन प्रवेदयति, स्वाभिप्रायप्रवेदनपूर्वके प्रश्ने तस्य प्रयोगादिति प्राप्तिः । सम्पूर्णं पद्यमित्थम्–

"कच्चिज्जीवति मे माता, कच्चिज्जीवति ते पिता ।
माराविद ! त्वां पृच्छामि कच्चिज्जीवति पार्वती ॥"

इति । अत्रापि क्रियातिपत्तिर्भवतीत्याह– **अत्र सप्तमीनिमित्तमस्तीति भूते भविष्यति च क्रियातिपतने नित्यं क्रियातिपत्तिरिति**–भूते "भूते" [ ५. ४. १०. ] इत्यनेन, भविष्यति च "सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः" [ ५. ४. ९. ] इत्यनेनेत्यर्थः, तदेवोदाहरति– **कामो मेऽभोक्ष्यत भवानिति** ॥ ५. ४. २६. ॥

**इच्छार्थे सप्तमी-पञ्चम्यौ** । ५. ४. २७. ॥

**त० प्र०– इच्छार्थे धातावुपपदे कामोक्तौ गम्यमानायां धातोः सप्तमी-पञ्चम्यौ भवतः । सर्वविभक्त्यपवादौ । इच्छामि भुञ्जीत भवान्, इच्छामि भुङ्क्तां भवान्, कामये, प्रार्थये, अभिलषामि, वश्मि, अधीयीत भवान्, अधीतां भवान् । कामोक्तावित्येव-इच्छया इच्छतः, कामयमानः कामयमानस्य भुङ्क्ते, नात्र प्रयोक्तुः कामोक्तिः । अत्र सत्यपि सप्तमीनिमित्ते इच्छार्थ उपपदे कामोक्तौ क्रियातिपतनस्यासामर्थ्येनासंभवात् क्रियातिपत्तिर्न भवति । केचित् तु "सप्तम्युताऽप्योर्वाढे" [ ५. ४. २१. ] इत्यत आरभ्य यत्र सप्तम्या एव केवलाया निमित्तमस्ति न विभक्त्यन्तरसहितायास्तत्रैव क्रियातिपतने क्रियातिपत्तिर्भवतीति मन्यन्ते ॥२७॥**

श० म० न्यासानुसन्धानम्– **इच्छा०** । **सर्वविभक्त्यपवादाविति**– कालसामान्ये विधानादिति भावः । उदाहरति–**इच्छामि भुञ्जीत भवानिति**– अत्र सप्तमी, **इच्छामि भुङ्क्तां भवानिति**– अत्र पञ्चमी, उभयत्र "इषत् इच्छायाम्" इतीच्छार्थको धातुरुपपदमस्ति । इच्छामीत्यत्र वर्तमाना तु "सति" [ ५. २. १९. ] इत्यनेन ज्ञेया, एवमग्रेऽपि । "कमूङ् कान्तौ" कान्तिरिच्छा, अतो णिङि– **कामये,** "अर्थणि उपयाचने" उपयाचनमिच्छा, अतो णिचि– **प्रार्थये,** "लषी कान्तौ" कान्तिरिच्छा, अभिपूर्वस्य– **अभिलषामि,** "वशक् कान्तौ" अस्य– **वश्मि,** चत्वार्यप्येकार्थकान्युपपदानि, सति वर्तमानान्तानि च, एकैकस्याग्रे वाक्यद्वयेऽप्यन्वयः, **अधीयीत भवानित्यत्र** सप्तमी, **अधीतां भवानित्यत्र** पञ्चमी च प्रकृतसूत्रेण । 'कामोक्तौ' इत्यस्यानुवर्तमानस्य व्यावर्त्यं दर्शयितुमाह– **कामोक्तावित्येवेति, इच्छया इच्छतः–कामयमानः कामयमानस्य भुङ्क्ते** इति– इच्छया इच्छापूर्वकमित्यर्थः, कामयमान इति भावः, इच्छतः कामयमानस्य, यो हि तं भोजयितुमिच्छति तस्यान्नं भुङ्क्ते इत्यर्थः, अत्र यद्यपीच्छाऽस्ति किन्तु इच्छुना स्वेच्छा न प्रवेदितेति न भवति, तदाह– **नात्र प्रयोक्तुः कामोक्तिरिति** । कामप्रवेदने पूर्वत्र सूत्रे क्रियातिपत्तेरुदाहृतत्वेनेहापि सा स्यादेवेत्याशङ्कया तां वारयति–**अत्र सत्यपि सप्तमीनिमित्ते** इत्यादिना, तत्र हेतुमाह–**इच्छार्थे उपपदे कामोक्तौ क्रियातिपतनस्यासामर्थ्येनाभावादिति**, यद्यपि पूर्वत्रापि कामो मे भुञ्जीत भवानि-

त्यत्र भोजयितुः कामस्य सत्त्वेन, भोक्तुश्च तस्यानुकूलतया क्रियातिपतनस्य सम्भवो नास्ति, नहि 'इच्छामि कामये' इत्यनयोरर्थभेदोऽस्ति तथापि तत्र शब्दस्वाभाव्येन क्रियातिपतनं सम्बध्यते, अत्र नेति स्वभाव एव तत्र प्रमाणम्। पूर्वत्रापि वा न क्रियातिपत्तिरुदाहार्येति।

"यश्चोभयोः समो दोषः परिहारोऽपि वा समः।
नैकः पर्यनुयोज्यः स्यात् तादृशार्थविचारणे॥"

इति न्यायेन। मतान्तरमाह– **केचित् तु** इत्यादिना, तथा च तन्मते न काऽपि शङ्केति भावः। अत्र केचित्– वस्तुतः कामोक्तौ क्रियातिपतनं नैव सम्बध्यत इत्येव वरम्, केचित् त्वित्यादिना कथितस्यार्थस्य प्रमाणयितुमशक्यत्वात्, "सप्तम्युताप्योः" इत्यतः पूर्वमपि विकल्पेन विधानात् केवलायाः सप्तम्या निमित्तत्वाभावात् तत्रापि क्रियातिपत्तेरसम्भवात्, तथा च यदि तत्र क्रियातिपत्तिर्भवतीहापि भाव्यमिति पूर्वोक्तन्यायस्य प्रसरोऽवश्यमेव स्यात्, तत्र क्रियातिपत्तेरुक्तत्वेनास्वीकर्तुमशक्यत्वादिति ॥ ५. ४. २७. ॥

## विधि-निमन्त्रणा-ऽऽमन्त्रणा-ऽधीष्ट-संप्रश्न-प्रार्थने ॥ ५. ४. २८. ॥

**त० प्र०– विध्यादिविशिष्टेषु कर्तृ-कर्म-भावेषु प्रत्ययार्थेषु धातोः सप्तमी-पञ्चम्यौ भवतः, सर्वप्रत्ययापवादौ। विधिरप्राप्ते नियोगः, क्रियायां प्रेरणेति यावत्; अज्ञातज्ञापनमित्येके। कटं कुर्यात् करोतु भवान्, प्राणिनो न हिंस्यात् न हिनस्तु भवान्। प्रेरणायामेव यस्यां प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम्, इच्छामन्तरेणापि नियोगतः कर्तव्यमिति यावत्। द्विसंध्यमावश्यकं कुर्यात् करोतु भवान्, सामायिकमधीयीत अधीतां भवान्। यत्र प्रेरणायामेव प्रत्याख्याने कामचारस्तदामन्त्रणम्। इहासीत आस्तां भवान्, इह शयीत शेतां भवान्, यदि रोचते। प्रेरणैव सत्कारपूर्विकाऽधीष्टम् अध्येषणम्। तत्त्वज्ञानं नः प्रसीदेयुः प्रसीदन्तु गुरुपादाः, व्रतं रक्षेत् रक्षतु भवान्। संप्रश्नः संप्रधारणा। किन्नु खलु भो व्याकरणमधीयीय अध्ययै, उत सिद्धान्तमधीयीय अध्ययै। प्रार्थनं याच्ञा। प्रार्थना मे व्याकरणमधीयीय अध्ययै, तर्कमधीयीय अध्ययै॥२८॥**

**श० म० न्यासानुसन्धानम्– विधि०।** इहार्थं विध्यादिरर्थः प्रकृत्यर्थविशेषणं वा स्यात्, प्रत्ययार्थो वा प्रत्ययार्थविशेषणं वा ?, तत्र यद्याद्यः पक्ष आश्रीयते तदा यत्र प्रकृतिरेव विध्यादीनर्थानाचष्टे तत्र न सिध्येत्– विदध्यात् निमन्त्रयेत आमन्त्रयेत अधीच्छेदिति, नह्यत्र प्रकृत्यर्थादन्ये विशेषणभूता विध्यादयः सन्तीत्येष दोषः प्रतिविधेयः स्यात्, प्रतिविधीयमानेऽपि तस्मिन् प्रतिपत्तिगौरवं स्यात्। अथ द्वितीयः, भावकर्मकर्तृप्रत्ययार्थानां विध्यादयो वाचकाः स्युरित्येवमनयोर्दोषदर्शनात् तृतीयः पक्ष आश्रयणीयः– विध्यादयः प्रत्ययार्थविशेषणमिति, प्रत्ययार्थास्तु भावकर्मकर्तारः, तेषु च "तत् साप्या०" [ ३. ३. २१. ] इत्यादिना प्रत्ययस्य विधानात् तेषामयं विध्यादिरर्थो विशेषणमित्याह– **विध्यादिविशिष्टेषु कर्तृकर्मभावेषु प्रत्ययार्थेष्विति**। विध्यादीनां सामान्यत एकरूपतया प्रतीतेस्तेषां परस्परं भेदं दर्शयति– **विधिरप्राप्ते नियोगः** इति, अप्राप्ते–कर्त्रा स्वभावतोऽक्रियमाणे कार्ये, नियोगः– प्रेरणम्, तदाह– **क्रियायां प्रेरणेति यावदिति**–भृत्यादेः कस्याञ्चित् क्रियायां नियोजनमिति भावः। अप्राप्तशब्दस्याज्ञातार्थपरत्वेन व्याख्यातॄणां मतमाह– **अज्ञातज्ञापनमित्येके** इति– 'स्वर्गकामो यजेत' इत्यादौ यागस्य स्वर्गजनकताऽज्ञाता वाक्येनानेन ज्ञाप्यत इति तेषामाशयः। उदाहरति विधौ– **कटं कुर्यात् करोतु भवान्, प्राणिनो न हिंस्यात् न हिनस्तु भवानिति**। निमन्त्रणे प्रेरणांशसत्त्वेऽपि यो विशेषस्तमाह– **प्रेरणायामेव यस्यां प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणमिति**– असत्यामपीच्छायामकरणे सति अधर्मोत्पत्तेर्नियमेनावश्यम्भावेन यत् करणं तन्निमन्त्रणमिति भावः, एतदेवाह– **इच्छामन्तरेणापि नियोगतः कर्तव्यमिति यावदिति**। उदाहरति– **द्विसन्ध्यमावश्यकं कुर्यात् करोतु भवान्, सामायिकमधीयीत अधीतां भवानिति**– सामायिकं नाम आवश्यकसूत्रस्याद्यमध्ययनम्, कटं कुर्यादित्यत्र कटकरणाय प्रेरितोऽकुर्वन्नपि न प्रत्यवायभाग् भवति, सन्ध्ययोरावश्यकमकुर्वाणश्च प्रत्यवैतीति विधिनिमन्त्रणयोर्भेदः स्पष्टः। आमन्त्रणे प्रेरणांशसत्त्वेऽपि विशेषमाह– **यत्र प्रेरणायामेव प्रत्याख्याने कामचारस्तदामन्त्रणमिति**– कामचार इच्छाप्रचारः, इच्छयैव यत् करणं नानिच्छयाऽकरणेऽपि दोषाभावात् तदामन्त्रणमित्यर्थः, प्रत्याख्याने प्रत्यवाय-कामचारोभय-

कृत एव निमन्त्रणामन्त्रणयोर्विशेष इति भावः। **इहासीत आस्तां भवान्, इह शयीत शेतां भवानित्यु**दाहरणे कामचारं दर्शयति– **यदि रोचते** इति। प्रेरणाया एव विशेषोऽधीष्टमित्याह– **प्रेरणैव सत्कारपूर्विकाऽधीष्टमिति**, आचार्यादिः पूज्यस्य क्वचनविषये सत्कारपूर्वकं प्रेरणमिति भावः, अधीष्टमित्यत्र भावे क्तप्रत्यय इत्यावेदयितुमाह– **अध्येषणमिति**। उदाहरति– **तत्त्वज्ञानं नः प्रसीदेयुः, प्रसीदन्तु गुरुपादाः, व्रतं रक्षेत् रक्षतु भवानिति**, अत्र लघुन्यासकारः– "तत्त्वज्ञानं कर्मतापन्नं नोऽस्मभ्यं प्रसादपूर्वकं दद्युः प्रसीदेयुः गुरुपादाः, अथवा तत्त्वज्ञानरूपक्रियाविशेषणमिदम्, नोऽस्माकं प्रसीदेयुः" इति। संप्रश्नं व्याचष्टे– **संप्रश्नः संप्रधारणा**। तत्रोदाहरति–**किं नु खलु भो** इत्यादिना। प्रार्थनमाह– **प्रार्थनं याच्ञेति**। तत्रोदाहरति– **प्रार्थना मे व्याकरणमित्यादिना**।

**अत्र** वैयाकरणभूषणसारे–

"ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः।"

इति कारिकाव्याख्यावरे विध्यादीनां सर्वेषां स्वरूपं व्याख्याय–

एतच्चतुष्टयानुगतप्रवर्तनात्वेन वाच्यता लाघवात्। उक्तं च– "अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया॥
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।
विध्यादीनामुपादानं चतुर्णामादितः कृतम्॥" [हरिकारिका] इति।

अस्यार्थः– चतुर्ष्वपि– विधिनिमन्त्रणामन्त्रणाधीष्टेषु, प्रवर्तनारूपं– प्रवर्तनात्वम्, अनुस्यूतम्– अनुगतमस्ति, तत्रैव सप्तमी विभक्तिर्विधेया यद्यपि, तथापि शब्दशक्तिविषयाणां स्पष्टतया व्युत्पादनायावान्तरविशेषनिघ्नं भेदमाश्रित्य चतुर्णां पार्थक्येनोपादानं क्रियते इति। प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्, तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्यर्थः। यद्यप्येतत् कृतिसाध्यत्वस्यापि यतस्तदपि प्रवर्तकं तथापि यागादौ तल्लोकत एवावगम्यत इत्यन्यलभ्यत्वान्न तच्छक्यम्। बलवदनिष्टाननुबन्धित्वज्ञानं च न हेतुर्द्वेषाभावेनान्यथासिद्धत्वात्, आस्तिककामुकस्य नरकसाधनताज्ञानदशायमप्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च, तस्मादिष्टसाधनत्वमेव प्रवर्तना। यदाह मण्डनमिश्रः–

"पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्॥" इति।

अस्यार्थः–इष्टाभ्युपायत्वात्– इष्टसाधन[त्वज्ञान]त्वादन्यः क्रियासु प्रवर्तको नास्ति, प्रवृत्तिहेतुभूतमेव धर्मं प्रवर्तनां वदन्तीतीष्टसाधनतैव प्रवर्तनेति। मञ्जूषायां च– "निमन्त्रणादिशब्दानां प्रयोजकनिष्ठव्यापारवाचकत्वं सर्वसम्मतमिति विधिशब्दस्यापि प्रयोजकनिष्ठव्यापारवाचित्वं, न त्विष्टसाधनत्वादिबोधकत्वम्, स च व्यापारोऽत्र प्रयुज्यमानलिङादि[सप्तम्यादि]रूप एव, स च व्यापारः प्रेरणात्वेनैव सप्तम्योच्यते, प्रेरणात्वं चाखण्डोपाधिः। न चात्र व्यापाररूपत्वं तद्वाचकत्वं चोभयमपि सप्तम्यां कथमुपपद्यत इति वाच्यम्, रूपभेदेनोभयोः सम्भवात्।" इत्याद्युक्तम्। तथा च प्राचीनानामिष्टसाधनत्वरूपप्रवर्तनायाः सप्तम्यर्थत्वं नवीनैः खण्डितमित्यवसेयम्। अत्रत्यविशेषो मञ्जूषादौ विस्तृतस्तथापि तस्येहाप्राकरणिकत्वेन प्रतीयमानतया न विविच्य प्रदर्शनं कृतमित्यवसेयमिति॥ ५. ४. २८.॥

## प्रैषा-ऽनुज्ञा-ऽवसरे कृत्य-पञ्चम्यौ। ५. ४. २९.॥

**त० प्र०– प्रैषादिविशिष्टे कर्त्रादावर्थे धातोः कृत्यप्रत्ययाः पञ्चमी च विभक्तिर्भवति। न्यत्कारपूर्विका प्रेरणा–प्रैषः, अनुज्ञा–कामचारानुमतिः, अतिसर्ग इति यावत्। अवसरः–प्राप्तकालता निमित्तभूतकालोपनतिः। भवता खलु कटः कार्यः कर्तव्यः करणीयः कृत्यः, भवान् कटं करोतु, भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे। यद्यपि कृत्याः सामान्येन भाव-कर्मणोर्विहितास्तथापि सर्वप्रत्ययापवादभूतया पञ्चम्या बाध्येरन्निति पुनर्विधीयन्ते। अनुज्ञायां केचित् सप्तम्येवेत्याहुः– अतिसृष्टो भवान् ग्रामं गच्छेत्॥२९॥**

**श० म० न्यासानुसन्धानम्–प्रैषा०**। अत्रापि सूत्रनिर्दिष्टानामर्थाना कर्त्राद्यर्थविशेषणत्वमेवेत्याह– **प्रैषादिविशिष्टे कर्त्रादावर्थे** इति। प्रैषादीन् व्याचष्टे– **न्यत्कारपूर्विका प्रेरणा–प्रैषः** इति–न्यत्कारो नीचैः करणं पूर्वं यत्र तादृशी प्रेरणा, यत्र त्वं मे नियोज्यस्त्वया मदीयं वचनमवश्यमनुष्ठेयमिति सूचनपूर्वकं प्रेष्यः प्रेष्यते स प्रैष

इति भावः । उक्तं च वाल्मीकीयरामायणे– "नहि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ।" इति । **अनुज्ञा-कामचारानुमतिरिति**, तत्पर्यायमाह– **अतिसर्ग इति-यावदिति**, कामचारो हि स्वत एव सिद्धः केवलं कृत्यादिप्रयोगेण सोऽनुमन्यते– तत्र स्वानुमतिः सूच्यत इति भावः । **अवसरः–प्राप्तकालतेति**–प्राप्तः कालः कृतिनिमित्तभूतो यस्य स प्राप्तकालः, तस्य भावस्तथेति भावः, तदाह– **निमित्तभूतकालोपनतिरिति** । प्रथमं तावत् कृत्यसंज्ञकमुदाहरति– **भवता खलु कटः कार्यः कर्तव्यः करणीयः कृत्यः** इति– 'भवता' इत्यत्र "कृत्यस्य वा" [ २. २. ८८. ] इति षष्ठीविकल्पनात् कर्तरि तृतीया, 'खलु' इत्यवधारणाद्द्योतकमव्ययम्, कृत्येन कर्मण उक्तत्वात् कट इत्यत्र प्रथमा । 'घ्यण् तव्य अनीय य क्यप्' इति पञ्च कृत्याः, तत्र चतुर्णां सम्भवः, तत्र "ऋवर्ण०" [ ५. १. १७. ] इति घ्यणि वृद्धौ–कार्यः, "तव्यानीयौ" [ ५. १. २७. ] इति तव्ये अनीये च गुणे– कर्तव्यः करणीयः, "कृगः श च वा" [ ५. १. १००. ] इति वा क्यपि तागमे च–कृत्यः । पञ्चमीमुदाहरति– **भवान् कटं करोतु** इति । एकत्रैव प्रयोगे यथाप्रकरणमर्थत्रयस्य संगतिं दर्शयति–**भवान् हि प्रेषितोऽनुज्ञातः, भवतोऽवसरः कटकरणे** इति । कृत्यप्रत्ययानां विशेषविधिमन्तरेणापि सिद्धिमाशङ्क्यानन्यथासिद्धिमाह– **यद्यपि कृत्याः सामान्येन भावकर्मणोर्विहितास्तथापि सर्वप्रत्ययापवादभूतया पञ्चम्या बाध्येरन्निति पुनर्विधीयन्ते** इति, अयमाशयः– यद्यपि भावकर्मणोः कृत्याः सामान्यतः सर्वत्र विधीयन्ते, ते च प्रैषादिविषयेऽपि भावादौ स्युरेवेति पृथग् विधानं नावश्यकम्, तथापि 'प्राक् क्तेः' इति वचनात् स्त्र्यधिकारात् परतोऽसरूपप्रत्ययानां नित्यमेव बाध्यबाधकभावसत्त्वेन पञ्चम्या कृत्यानां बाधः स्यादिति प्रैषादिविशिष्टेषु भावादिषु कृत्या न स्युरिति विशिष्य विधानमावश्यकम् ।

एवञ्च "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" [ ३. ३. १६३. ] इति सूत्रे भाष्येऽप्युक्तम् । तथाहि– "किमर्थं प्रैषादिष्वर्थेषु कृत्या विधीयन्ते, नाविशेषेण विहिताः कृत्यास्ते प्रैषादिषु भविष्यन्त्यन्यत्र च । प्रैषादिषु कृत्यानां वचनं नियमार्थम् । प्रैषादिषु कृत्यानां वचनं क्रियते । किं प्रयोजनम् ? नियमार्थम् । नियमार्थोऽयमारम्भः । प्रैषादिष्वेव कृत्या यथा स्युरिति । प्रैषादिषु कृत्यानां वचनं नियमार्थमिति चेत् ? तदनिष्टम् ॥ नहि प्रैषादिष्वर्थेष्वेव कृत्या इष्यन्ते । किं तर्हि ? अविशेषेणेष्यन्ते । बुसोपेन्ध्यम् । तृणोपेन्ध्यम् । घनघात्यम् । विध्यर्थं तु क्रियाः प्रागिति वचनात् । विध्यर्थं तु प्रैषादिषु कृत्यानां वचनम् । अयं प्रैषादिष्वर्थेषु लोड् विधीयते [ पञ्चमी विधीयते ] स विशेषविहितः सामान्यविहितान् कृत्यान् बाधेत । बाऽसरूपेण कृत्या अपि भविष्यन्ति । न स्युः । किं कारणम् ? । क्रियाः प्रागिति वचनात् । प्राक् क्रिया वाऽसरूपः ।" इति ।

अयमाशयः– यदि मन्यते–कृत्याः प्राप्ता एवेति, तर्हि प्राप्ते विधिर्नियमार्थ इति रीत्या तस्य नियमार्थत्वं युक्तम्, नियमश्चार्थमूलक एव, तथा च प्रैषादिष्वेव कृत्याः स्युर्नान्यत्र, एवं च प्रैषादिरहिते बुसोपेन्ध्यम्, तृणोपेन्ध्यमिति, घनघात्यमिति च प्रयोगो न स्यात्,बुसेन उपेध्यते तृणेन उपेध्यते इति विग्रहे अग्निस्तोकं बुसेन तृणेन वा ज्वलनीयमिति वस्तुस्वरूपमेव कथनीयं न तु प्रैषादिप्रतीतिस्तत्र कृत्यप्रत्ययो न स्यात् । घनेन घात्यते इति विग्रहे घनघात्यमित्यत्र कठिनत्वाद्येव प्रतिपाद्यम्, न तु प्रैषादिरिति कृत्यो न स्यात्, अतश्च नियमार्थत्वपक्षो न युक्तः । तथा चास्य विध्यर्थत्वमेव । तच्चेत्थम्– पञ्चमी विशेषविहिता प्रैषादिविशिष्टयोर्भावकर्मणोरपि कृत्यान् बाधेत । असरूपोऽपवाद इति नियमश्च स्त्रियामित्यधिकारात् पूर्वमेव प्रवर्तते । तथा चाप्राप्ताः कृत्या इत्यप्राप्तप्रापणार्थस्यास्य विध्यर्थत्वमेवेति । एतच्च स्वमतस्याप्यनुकूलमेवेति ।

मतान्तरमाह– **अनुज्ञायां सप्तम्येवेति केचिदिति**, तन्मतेनोदाहरति– **अतिसृष्टो भवान् ग्रामं गच्छेदिति** ॥ ५. ४. २९. ॥

## सप्तमी चोर्ध्वमौहूर्तिके । ५. ४. ३०. ॥

**त० प्र०–ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य भवोऽर्थ ऊर्ध्वमौहूर्तिकः, तस्मिन् वर्तमानाद् धातोः प्रैषादिषु गम्यमानेषु सप्तमी कृत्याः पञ्चमी च भवन्ति । ऊर्ध्वं मुहूर्तात् कटं कुर्याद् भवान्, कार्यः कर्तव्यः करणीयः कृत्यः कटो भवता, कटं करोतु भवान्, भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे ॥३०॥**

**श० म० न्यासानुसन्धानम्- सप्त०** । ऊर्ध्वमौहूर्तिकशब्दस्य योगार्थमाह- **ऊर्ध्वं मुहूर्तादिति**, एतदेव विशदयति- **उपरि मुहूर्तस्येति**, भवार्थेऽत्र इकण् इत्यावेदयति- **भवोऽर्थ ऊर्ध्वमौहूर्तिक** इति, "कालादन्यत्र "वर्षाकालेभ्यः" [ ६. ३. ८०. ] इति न सिध्यतीति "अध्यात्मादिभ्य इकण्" [ ६. ३. ७८. ]" इति लघुन्यासकारः । प्रैषादीनामनुवर्तनादस्यापि तेष्वर्थेष्वेव विधानमित्याह- **प्रैषादिषु गम्यमानेषु** इति, अयमाशयः- प्रैशादयः प्रत्ययार्थविशेषणतया गम्यमानाः, ऊर्ध्वमौहूर्तिकोऽर्थस्तु धातुवाच्य इति भावः । चकारेण कृत्यपञ्चम्योरनुकर्ष इत्याह- **सप्तमी कृत्याः पञ्चमी च भवन्तीति** । क्रमेणोदाहरति- **ऊर्ध्वं मुहूर्तात् कटं कुर्यात् भवानिति**- अत्र सप्तमी । **कार्यः कर्तव्यः करणीयः कृत्यः कटो भवतेति**- अत्र कृत्याः । **कटं करोतु भवानिति**- अत्र पञ्चमी, सर्वत्र 'ऊर्ध्वं मुहूर्तादिति योजनीयम् । अर्थत्रयस्यापि पूर्वप्रयोगेषु सङ्गतिमाह- **भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे** इति- ऊर्ध्वमौहूर्तिके करणे तादृशकरणस्य च भवतोऽवसर इति वा यथाप्रकरणं प्रतीयते ।। ५. ४. ३०. ।।

## स्मे पञ्चमी । ५. ४. ३१. ।।

**त० प्र०-स्मशब्द उपपदे प्रेषादिषु गम्यमानेषु ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद् धातोः पञ्चमी भवति । कृत्यानां सप्तम्याश्चापवादः । ऊर्ध्वं मुहूर्ताद् भवान् कटं करोतु स्म, भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे इति ।।३१।।**

**श० म० न्यासानुसन्धानम्-स्मे०** । स्मशब्दः स्पष्टार्थ इति लघुन्यासकारः । 'प्रेषानुज्ञावरे' इत्यस्य 'ऊर्ध्वमौहूर्तिके' इत्यस्य चानुवर्तनादस्यापि तेष्वथेष्वेव विधानमत आह- **प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्तिकेऽर्थे** इति । **कृत्यानां सप्तम्याश्चापवादः** इति- प्रैषादिष्वर्थे कृत्यानामपि प्राप्तिः, ऊर्ध्वमौहूर्तिके च सप्तम्याः पूर्वेण प्राप्तिरिति तेषां सर्वेषामयमपवाद इति भावः । उदाहरति- **ऊर्ध्वं मुहूर्ताद भवान् कटं करोतु स्मेति**, अर्थत्रयस्याप्युदाहरणे संगतिमाह- **भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे** इति ।। ५. ४. ३१. ।।

## अधीष्टौ । ५. ४. ३२. ।।

**त० प्र०-ऊर्ध्वमौहूर्तिक इति निवृत्तम्, पृथग्योगात् । स्म उपपदेऽधीष्टावध्येषणायां गम्यमानायां धातोः पञ्चमी भवति । सप्तम्यपवादः । अङ्ग स्म विद्वन्नणुव्रतानि रक्ष, शिक्षाः प्रतिपद्यस्व ।।३२।।**

**श० म० न्यासानुसन्धानम्- अधीष्टौ** । पूर्वसूत्रादस्य धात्वर्थविषयेऽपि भेदमाह-**ऊर्ध्वमौहूर्तिक इति निवृत्तमिति** । निवृत्तौ हेतुमाह- **पृथग्योगादिति**- अन्यथा पूर्वसूत्र एवाधीष्टाविति पठनीयं स्यादिति भावः । न च स्मेऽधीष्टाविति क्रियमाणे स्मे उपपदेऽधीष्टावेव गम्यमानायां पञ्चमी स्यान्न तु प्रैषादिषु अर्थभेदश्रवणादिति वाच्यम्, स्मेऽधीष्टौ चेति करणेन पूर्वोक्तार्थानामपि संग्रहसम्भवात् । **सप्तम्यपवादः** इति- "विधिनिमन्त्रणा०" [ ५. ४. २८. ] इति सूत्रेण सामान्यतोऽधीष्टार्थे प्राप्तायाः सप्तम्याः स्मयोगे विशेषविहितेयं पञ्चमी बाधिकेति भावः, स्मयोगाभावे तु सैवास्याप्राप्तेरिति । अधीष्टिः सत्कारपूर्विका प्रेरणा । उदाहरति- **अङ्ग स्म विद्वन् ! अणुव्रतानि रक्ष, शिक्षाः प्रतिपद्यस्वेति**- अङ्गशब्दः प्रकाशे कोमलामन्त्रणे वा, अणूनि साधूनां महाव्रतापेक्षयाऽल्पविषयाणि व्रतानि स्थूलप्राणातिपातविरमणादीनि, शिक्षाः समायिकादीनि चत्वारि शिक्षाव्रतानि, प्रतिपद्यस्व स्वीकुरु ।। ५. ४. ३२. ।।

## काल-वेला-समये तुम् वाऽवसरे । ५. ४. ३३. ।।

**त० प्र०- काल-वेला-समयशब्देषूपपदेष्ववसरे गम्यमाने धातोस्तुम् प्रत्ययो वा भवति । कालो भोक्तुम्, वेला भोक्तुम्, समयो भोक्तुम् । वावचनाद् यथाप्राप्तं च-कालो भोक्तव्यस्य । 'ऊर्ध्वं मुहूर्तात् कालो भोक्तुम्, ऊर्ध्वं मुहूर्ताद् भोक्तुं स्म कालः, अङ्ग स्म राजन् ! भोक्तुं काल' इत्येतेषु परत्वात् तुमेव । अवसर इति किम् ? कालः पचति भूतानि, कालोऽत्र द्रव्यं न त्ववसरः ।।३३।।**

**श० म० न्यासानुसन्धानम्-काल०** । सूत्रार्थः स्पष्टः । उदाहरति- **कालो भोक्तुम्, वेला भोक्तुम्, समयो भोक्तुमिति**- "भुजंप् पालनाभ्यवहारयोः" अतोऽनेन तुमि गुणे "चजः कगम्" [ २. १. ८६. ] इति जस्य गत्वे "अघोषे प्रथमोऽशिटः" [ १. ३. ५०. ] इति गस्य

कत्वे- भोक्तुमिति । "प्रैषानुज्ञा०" [ ५. ४. २६. ] इति प्राप्तेऽयं विकल्प इति भुज्यतां भोक्तव्यस्य चेति वाक्ये तुमि षष्ठ्येकवचनस्य "अव्ययस्य" [ ३. २. ७. ] इति लुप् ।" इति लघुन्यासे । पाणिनीये च सिद्धान्तकौमुद्यां "कालसमयवेलासु तुमुन्" [ ३. ३. १६७. ] इति सूत्रे पर्यायोपादानमर्थोपलक्षणार्थमित्युक्तम्, तथा च कालार्थेऽन्यस्मिन्नपि शब्दे उपपदे प्रत्ययो भवति, तथा चोदाहृतम्- अनेहा भोक्तुमिति । वावचनस्य प्रयोजनमाह- **वावचनाद् यथाप्राप्तमिति,** तदेवोदाहरति- **कालो भोक्तव्यस्येति**- "प्रैषानुज्ञा०" [ ५. ४. २६. ] इति तव्य इति भुज्यतामिति वाक्यम् । पाणिनीये च कालादिषूपपदेषु नित्यमेव तुम् विधीयते, कालो भोक्तव्यस्येत्यादयश्च बाहुलकादेव साधनीयाः । ऊर्ध्वंमौहूर्तिकादावप्यस्य प्राप्तिरित्याह-**'ऊर्ध्वं मुहूर्तात् कालो भोक्तुम्, ऊर्ध्वं मुहूर्ताद् भोक्तुं स्म कालः, अङ्ग स्म राजन् ! भोक्तुं कालः' इत्येतेषु परत्वात् तुमेवेति**- प्रथमे "सप्तमी चोर्ध्वंमौहूर्तिके" [ ५. ४. ३०. ] इति सप्तमी पञ्चमी च न भवति, द्वितीये "स्मे पञ्चमी" [ ५. ४. ३१. ] इति पञ्चमी न भवति, तृतीये "अधीष्टौ" [ ५. ४. ३२. ] इति पञ्चमी न भवतीत्यर्थः । न चास्य विकल्पविधायकत्वेन तेषामप्यवकाशोऽस्त्येवेति वाच्यम्, अस्य सामान्यविहिततया ऊर्ध्वंमौहूर्तिकादिविशिष्टेऽर्थे विशिष्य विहितैर्बाधाशङ्कया तेषां नित्यत्वेन पक्षेऽस्य प्रवृत्त्यभावप्रसङ्गात्, तथा च कालादिशब्दे उपपदेऽस्यापि विशेषविहितत्वेन परत्वस्यैव व्यवस्थापकत्वस्वीकारौचित्यात् परत्वादस्य प्रवृत्तौ पक्षे तेऽपि भवन्तु नाम । लघुन्यासकारोऽप्यत्राह- "ननु तुम् विकल्पेन भवति तत् कथं तुमेवेत्युक्तम्, उच्यते- विकल्पेन तुमेव भवति नाऽनडादयः, "सप्तमी चोर्ध्व०" "स्मे पञ्चमी" "अधीष्टौ" इति च यथाक्रमं प्रवर्तत एव" इति । कालादिप्रयोगसत्त्वेऽवसरः [ प्राप्तकालता ] स्वत एव प्रतीयत इति विनापि तद्ग्रहणमवसर एव भविष्यतीति तत्प्रयोजनं नास्तीति शङ्कते-**अवसर इति किमिति।** उत्तरयति- **कालः पचति भूतानीति,** कथमिह न भवतीत्याह- **कालोऽत्र द्रव्यं न त्ववसरः** इति, यद्यप्यवसररूपोऽपि कालो द्रव्यमेव द्रव्यभिन्नस्यासत्त्वात्, तथापि स कालत्वेनैव सामान्येन निर्दिष्टो न त्ववसरत्वेन [ प्राप्तकालत्वेन ] इति तत्र न भवतीत्यवसरग्रहणस्य सार्थक्यमिति । अयमाशयः- "कालः पचति भूतानि कालः संहरति प्रजाः ।" इत्यत्र "भूतानि कालः पचतीति वार्ता" इत्यादौ च कालकर्तृको वर्तमानकालिकः पाकोऽनूद्यते न त्ववसरः प्राप्त इति प्रतिपाद्यते इति न तत्र तुम् भवतीति । "क्त्वातुमम् भावे" [ ५. १. १३. ] इति भावे तुम् भवति, तदन्तस्य "क्त्वातुमम्" [ १. १. ३५. ] इत्यनेनाव्ययत्वम्, अव्ययसम्बन्धिनश्च स्यादेः "अव्ययस्य" [ ३. २. ७. ] इत्यनेन लुब् भवतीति सर्वत्र विज्ञेयमिति ॥ ५. ४. ३३. ॥

## सप्तमी यदि । ५. ४. ३४. ॥

**त० प्र०- यदि-यच्छब्दप्रयोगे सति कालादिषूपपदेषु धातोः सप्तमी भवति । तुमोऽपवादः । कालो यदधीयीत भवान्, वेला यद् भुञ्जीत भवान्, समयो यच्छयीत भवान् । बहुलाधिकारात् 'कालो यदध्ययनस्य, वेला यद् भोजनस्य, समयो यच्छयनस्य' इत्याद्यपि भवति ॥३४॥**

**श० म० न्यासानुसन्धानम्- सप्त०** । अस्य नित्यत्वेन पक्षेऽपि तुमो न प्रवृत्तिरित्याह-**तुमोऽपवादः** इति- पूर्वेण प्राप्तस्येत्यर्थः । अस्य नित्यत्वेनानडादयोऽपि न स्युरिति कालो यद् भोजनस्येत्यादयः प्रयोगाः कथमिति चेत् ? अत्राह- बहुलाधिकारादित्यादि ॥ ५. ४. ३४. ॥

## शक्तार्हे कृत्याश्च । ५. ४. ३५. ॥

**त० प्र०- शक्तेऽर्हे च कर्तरि गम्यमाने धातोः कृत्याः सप्तमी च भवति । भवता खलु भारो वाह्यः, वोढव्यः, वहनीयः, उह्येत, भवान् भारं वहेत्; भवान् हि शक्तः । अर्हे-भवता खलु कन्या वाह्या, वोढव्या, वहनीया, भवान् खलु कन्यां वहेत्; भवता खलु छेदसूत्रं वाह्यम्, वोढव्यम्, वहनीयम्, भवान् खलु च्छेदसूत्रं वहेत्; भवानेतदर्हति । सप्तम्या बाधो मा भूदिति कृत्यग्रहणम् । बहुवचनमिहोत्तरत्र च यथासंख्यनिवृत्त्यर्थम् ॥३५॥**

**श० म० न्यासानुसन्धानम्- शक्ता०** । **शक्तार्हे** इत्यत्र समाहारद्वन्द्व इति दर्शयति- **शक्तेऽर्हे चेति**- अर्हतीति- अर्हः, तद्योग्यस्तस्मिन् तथा । **कर्तरि गम्ये** इति, अयमाशयः- कृत्याः कर्मणि भावे च विहिताः, ते कर्तरि वाच्ये न भविष्यन्ति, अपि तु कर्तुः शक्तौ गम्यमानायां योग्यतायां वा गम्यमानायां स्युः, सप्तमी च कर्तरि

भवत्येव, तत्र यदि अर्हताऽपि तद्वाच्या भवेन्न काचन हानिर्गम्यमानतायास्तत्राप्यक्षतेः, उभयविधस्थानसंग्रहार्थमेव गम्यमानताया आश्रयणमिति ज्ञेयम् । पूर्वं शक्तार्थे कर्मण्युदाहरति– **भवता खलु भारो वाह्यः, वोढव्यः, वहनीयः, उह्येतेति**– 'भवता' इत्यत्र कृत्यस्य कर्तरि "कृत्यस्य वा" [ २. २. ८८. ] इति षष्ठीविकल्पनात् "हेतुकर्तृ०" [ २. २. ४४. ] इति तृतीया, खलुरवधारणादौ, "वहीं प्रापणे" अतो घ्यणि "ञ्णिति" इत्युपान्त्यवृद्धौ– वाह्यः, तव्ये धातोरनुस्वारेत्त्वादिडभावे "हो धुट्पदान्ते" [ २. १. ८२. ] इति हस्य ढे "अधश्चतुर्थात् तथोर्धः" [२. १. ७९.] इति तकारस्य धे "तवर्गस्य०" [ १. ३. ६०. ] इति धस्य ढे "सहि-वहेरोच्चावर्णस्य" [ १. ३. ४३. ] इति पूर्वढलोपेऽकारस्य चौकारे– वोढव्यः, अनीये च– वहनीयः, कर्मणि सप्तम्यां क्ये च "यजादिवचेः किति" [ ७. १. ७९. ] इति य्वृति– उह्येत, एतदपेक्षया भवतेत्यत्र स्वतः कर्तरि तृतीया, सर्वे प्रत्ययाः "तत्साप्या०" [ ३. ३. २१. ] इति कर्मणि, तैः कर्मण उक्तत्वात् ततः प्रथमा विज्ञेया । अथ शक्तार्थ एव कर्तर्युदाहरति–**भवान् भारं वहेदिति**– अत्र कर्तरि सप्तमी, तथा च कर्तुरुक्तत्वात् 'भवान्' इत्यत्र प्रथमा, कर्मणोऽनुक्तत्वाच्च भारमित्यत्र द्वितीया । उक्तप्रयोगे शक्तार्थं संगमयति– **भवानिह शक्तः** इति । क्रमप्राप्तेऽर्हेऽर्थे उदाहर्तुमवतारयति– **अर्हे** इति । कर्मण्युदाहरति– **भवता खलु कन्या वाह्या, वोढव्या, वहनीया, [ उह्येत ]** । कर्तर्युदाहरति– **भवान् खलु कन्यां वहेदिति**, एवमुदाहरणान्तरमाह– **भवता खलु छेदसूत्रं वाह्यम्, वोढव्यम्, वहनीयम्; भवान् खलु छेदसूत्रं वहेदिति**– छेदसूत्रमिति आगमविशेषस्य संज्ञा, वाह्यं योगोद्वहनपूर्वकं ग्राह्यमित्यर्थः, उक्तप्रयोगेष्वर्हार्थं संगमयति–**भवानेतदर्हतीति** । कृत्यग्रहणप्रयोजनमाह–**सप्तम्या बाधो मा भूदिति कृत्यग्रहणमिति**, अयमाशयः– कृत्याः सामान्यतः सर्वत्र भावकर्मणोर्विहिता इति कर्तुरर्हतायां शक्ततायां च द्योत्यायामपि स्युरेवेति किमर्थं ते विधीयन्त इति न शङ्कनीयम्, अर्हे शक्ते च विशेषविहितया सप्तम्या बाधितास्ते न प्रवर्तेयुरिति तेषां विशिष्य विधानमावश्यकम् । "शक्तार्हे कृत्याश्च" इत्येव सूत्रयितव्ये कृत्यत्वेन सर्वेषां कृत्यानां विधानं स्यादेवेति कृत्याश्चेति बहुवचनं व्यर्थमित्याशङ्क्य समाधत्ते– **बहुवचनमिहोत्तरत्र च यथासंख्यनिवृत्त्यर्थमिति**, अयमाशयः– चकारेणात्र सप्तमी समुच्चीयतेऽनुकृष्यते वा, तथा च कृत्याः सप्तमी चेह विधेयौ, शक्तोऽर्हश्चार्थौ द्वाविति द्वाभ्यां विधेयाभ्यां सहानुवाद्ययोरपि द्वयोर्यथासंख्यं मा भूदिति तद्वारणाय बहुवचनेन निर्देशात् संख्याभेदः कृत इति । अत्र लघुन्यासकार इत्थमाह– ननु समुच्चीयमानेन सह यथासंख्यस्य "राष्ट्रक्षत्रिय०" [ ६. १. ११४. ] इत्यत्रापत्यप्रत्ययेन निरस्तत्वाद् व्यर्थं बहुवचनम्, सत्यम्– ज्ञापकज्ञापिता विधयो ह्यनित्या इति न्यायज्ञापनार्थमिति ॥ ५. ४. ३५. ॥

## णिन् चाऽऽवश्यकाऽधमर्ण्ये । ५. ४. ३६. ॥

**त० प्र०– अवश्यंभाव आवश्यकम्, ऋणेऽधमोऽधमर्णः, तस्य भाव आधमर्ण्यम् । आवश्यके आधमर्ण्ये च गम्यमाने कर्तरि वाच्ये धातोर्णिन् कृत्याश्च भवन्ति । अवश्यं करोतीति– कारी, हारी । यदा त्ववश्यमोऽपि प्रयोग उभाभ्यामपि द्योतनात् तदा मयूरव्यंसकादित्वात् समासः– अवश्यंकारी, अवश्यंहारी । अवश्यशब्दप्रयोगे तु– अवश्यकारी, अकारान्तोऽपि ह्यनव्ययमवश्यशब्दोऽस्ति । अवश्यं गेयो गायको गीतस्य, अवश्यं भव्यश्चैत्रः । आधमर्ण्ये– शतं दायी, सहस्रं दायी, कारी मे कटमसि, हारी मे भारमसि, गेयो गाथानाम् । णिना बाधो मा भूदिति कृत्यविधानम् । कृत्वाच्च कर्तरि णिनो विधानात् कृत्यानामपि कर्तर्येव विधानम्, भाव-कर्मणोस्तु सामान्येन विधानात् सिद्धा एव बाधकाभावात् ॥३६॥**

**श० म० न्यासानुसन्धानम्– णिन्०** । पदार्थमाह– **अवश्यं भाव आवश्यकमिति**– "चोरादेः" [ ७. १. ७३. ] इत्यकञ्, अवश्यमित्यव्ययं निश्चयार्थकम्, तथा चावश्यं भावो निश्चितत्वम् । **ऋणेऽधमोऽधमर्णः, तस्य भाव आधमर्ण्यमिति**–राजदन्तादित्वादधमशब्दस्य प्राग् निपातः, अत्र ऋणशब्द ऋणव्यवहारपरः, तत्राधमत्वं तस्य याचकत्वेन । आवश्यकमाधमर्ण्यं चोपाधिर्न तूपपदमित्याह– **आवश्यके आधमर्ण्ये च गम्यमाने** इति । **कर्तरि वाच्ये** इति–एतच्च कृत्वात् णिनः कर्तरि विधिरिति सामान्यतो लब्धम्, नहि सूत्राक्षरस्वारस्यात्, पूर्वत्र च शक्तार्हशब्दयोः कर्तृप्रत्ययान्तत्वेन कर्तृलब्धत्वेऽपीह

तस्य कथमपि लब्धुमशक्यत्वात्, एतच्चाग्रेऽपि विवेचयिष्यते । णिन एवावश्यकाधमर्ण्यद्योतकत्वे उदाहरणमाह– **अवश्यं करोतीति– कारी,** एवम्– अवश्यं हरतीति– **हारी** । णिनो णित्त्वादुभयत्र वृद्धिः । यत्र च स्पष्टप्रतिपत्तयेऽवश्यमित्यव्ययं प्रयुज्यते तत्र का व्यवस्थेत्याह– **यदा त्वश्यमोऽपि प्रयोगः** इति, **उभाभ्यामपि द्योतनादिति**, यद्यप्यवश्यमोऽव्ययस्यावश्यकत्ववाचकत्वमेव तथापि णिन एव तद्द्योतकत्वेनावश्यमो णिनस्तद्द्योतकद्योतकत्वमेवेति परम्परया उभयोरपि तद्द्योतकत्वमायातम्, अन्यथा तदसम्बन्धेऽसामर्थ्यात् तेन सह समासो न स्यादिति व्यवहितेऽपि प्रयोगः स्यात्– अवश्यं स कारी, कारी सोऽवश्यमित्यादि, न च स इष्यते । ननु ङस्युक्तत्वाभावात् "ङस्युक्तं कृता" [ ३. १. ४९. ] इति न समासः प्राप्नोति, न चान्यल्लक्षणमस्ति येन समासः स्यादिति यो मन्येत तं प्रत्याह– **मयूरव्यंसकादित्वात् समासः** इति, स्वरूपतः समासमाह– **अवश्यंकारी, अवश्यंहारी**ति– अवश्यं करोति हरतीति वाक्यम् । आवश्यकत्वं नावश्यम एव मान्तस्य द्योत्यमपि त्वनव्ययस्यामान्तस्यापीति तत्प्रयोगे रूपान्तरमाह– **अवश्यशब्दप्रयोगे तु– अवश्यकारी**ति । अवश्यशब्दसत्तां द्रढयति– **अकारान्तोऽपि ह्यनव्ययमवश्यशब्दोऽस्ती**ति । अथ कृत्यमुदाहरति– **अवश्यं गेयो गाथको गीतस्ये**ति– गाथको गीतमवश्यं गायतीति वाक्यम्, अत्र कर्तरि ये "य एच्चातः" [ ५. १. २८. ] इत्यनेन "आत् सन्ध्यक्षरस्य" [ ४. २. १. ] इति कृतस्याकारस्यैकारे– गेय इति, कर्तुरुक्तत्वाच्च प्रथमा, कर्मणोऽनुक्तत्वाच्च "कर्मणि कृतः" [ २. २. ८३. ] इति षष्ठ्यां– गीतस्येति । एवमवश्यं भवतीति वाक्ये कर्तरि ये गुणे "व्यक्ये" [ १. २. २५. ] इत्यवादेशे– **अवश्यं भव्यश्चैत्रः** इति– कर्तुरुक्तत्वात् प्रथमा । आधमर्ण्ये उदाहर्तुमवतारयति– **आधमर्ण्ये** इति, तत्र णिनमुदाहरति– **शतं दायी, सहस्रं दायी**ति– दाधातोर्णिनि "आत ऐः कृञ्ञौ" [ ४. ३. ५३. ] इत्यैकारे आयादेशे च– दायीति, "एष्यदृणेनः" [ २. २. ९४. ] इति षष्ठीनिषेधात् कर्मणि द्वितीयेति– शतं सहस्रमिति, आधमर्ण्यतः शतं सहस्रं वा ददातीत्यर्थः । आधमर्ण्यतो मम कटं करोति मम भारं वहति वा भवानित्यर्थे– **कारी मे कटमसि, हारी मे भारमसी**ति । कृत्यमुदाहरति– **गेयो गाथानामिति**– आधमर्ण्यतो गाथा गायतीत्यर्थः; "कर्मणि कृतः" [ २. २. ८३. ] इति षष्ठ्यां– गाथानामिति । ननु "भव्यगेय०" [ ५. १. ७. ] इत्यादिना सामान्यतः कर्तरि यो विहितः, स आवश्यादिद्योतकत्वेऽपि भविष्यत्येवेति तद्विधानमनर्थकमिति चेत् ? अत्राह– **णिना बाधा मा भूदि**ति– विशेषविहितो हि णिन् सामान्यविहितं कृत्यं बाधेतेति तस्यापि विशिष्य विधानमावश्यकमिति भावः । ननु णिन् कर्तरि विधीयते, कृत्याश्च न कर्तरि, अपि तु भावकर्मणोः, "भव्यगेय०" इत्यादि च निपातनं न कृत्यानां कर्तृवाचकत्वं प्रमाणयितुमलमिति विषयभेदात् णिना कृत्यानां बाधः कथं स्यादिति चेत् ? अत्राह– **कृत्त्वाच्च कर्तरि णिनो विधानादि**ति, अयमाशयः– कर्तृवाचकणिना साहचर्यात् तादृश एव कृत्य इह विधेयः, स च "भव्यगेय०" इत्यादिना निपातित एव नान्यः, तथा चोभयोः कर्तृवाचकत्वेन केवलणिनो विधाने तस्य कर्तृवाचककृत्यबाधकत्वं स्यादिति तस्यापि विधानमावश्यकम् । ननु "तत् साप्यानाप्यात्०" [ ३. ३. २१. ] इति विहिताः कृत्या एवेह विधीयन्त इति कुतो नाश्रीयतेऽत आह– **भावकर्मणोस्तु सामान्येन विधानादि**ति– यद्यनेनापि भावकर्मणोरेव विधानं स्यात् तर्हि तस्य सामान्यसूत्रेणैव सिद्धत्वादिह विधानमनावश्यकम् । न च णिना बाधा मा भूदिति सार्थकं तद्विधानमिति वाच्यम्, णिनः कर्तरि विधानाद् भावकर्मणोस्तस्याप्राप्तत्वात् तेन कृत्यानां बाधायोगो विषयभेदात् ॥ ५. ४. ३६. ॥

## अर्हे तृच् । ५. ४. ३७. ॥

**त० प्र०– अर्हे कर्तरि वाच्ये धातोस्तृच् प्रत्ययो भवति । भवान् कन्याया वोढा, भवान् खलु च्छेदसूत्रस्य वोढा । सप्तम्या बाधा मा भूदित्यर्हे तृज्विधानम् ॥३७॥**

**श० म० न्यासानुसन्धानम्–अर्हे०** । **अर्हे कर्तरि वाच्ये** इति– अर्हतीत्यर्ह इति कर्तृप्रत्ययान्तार्हपदसामर्थ्यात् कर्तृरर्हत्वं लब्धम्, तच्च तृच्प्रत्ययस्य वाच्यमिति कृत्त्वात् तस्य कर्तरि सामान्यतो विधानादायाति । उदाहरति– **भवान् कन्याया वोढा, भवान् खलु छेदसूत्रस्य वोढे**ति– "वहीं प्रापणे" अतोऽनेन तृचि अनुस्वारेत्त्वादिडभावे हस्य ढे तकारस्य धे ढे च पूर्वढलोपेऽवर्ण-

स्य ओकारे च– वोढा, कर्तुरुक्तत्वात् प्रथमा, कर्मणः षष्ठी च, छेदसूत्रमागमविशेषः । नन्वर्हेऽर्थे किमर्थं तृच् विधीयते, स हि "णकतृचौ" [ ५. १. ४८. ] इति सामान्येन कर्तरि विहितोऽर्हे चानर्हे च तत्र भविष्यत्येवेति चेत् ? अत्राह– **सप्तम्या बाधा मा भूदित्यर्हे तृज्विधानमिति**– "शक्तार्हे कृत्याश्च" [ ५. ४. ३५. ] इति विहिता सप्तमी सामान्यविहितं तृचं बाधेतेति तद्विधानमावश्यकम्, कृत्याश्च न तद्बाधकास्तेषां कर्तरि विधानाभावात् । शक्तार्हे इत्यनेन हि कर्तरि गम्यमान एव–कर्तुरर्हत्वे गम्यमान एव कृत्या विधीयन्ते तथैव व्याख्यानात्, न तु वाच्यता, तत्र वाचकताया अविधेयत्वात् । भवता खलु भारो वाह्य इत्यादौ हि कृत्यस्य कर्मवाचकत्वमेव न कर्तृवाचकत्वं कृत्यानां स्वभावतो भावकर्मार्थवाचकत्वात् । यदि चात्रापि अर्हतायां गम्यमानायामेव तृचो विधानमित्याश्रीयते तदा कृत्यानामप्युपलक्षणं सप्तमीपदमित्यास्थेयम्, वृत्तौ च वाच्यतापक्षमाश्रित्य कर्तरि कृत्यानामप्राप्तेरेव सप्तम्येवोक्ता ।। ५. ४. ३७. ।।

## आशिष्याशीः-पञ्चम्यौ । ५. ४. ३८. ।।

**त० प्र०– आशासनमाशीः, आशीर्विशिष्टेऽर्थे वर्तमानाद् धातोराशीः-पञ्चम्यौ विभक्ती भवतः । जीयात्, जीयास्ताम्, जीयासुः; जयतात्, जयताम्, जयन्तु । आशिषीति किम् ? चिरं जीवति मैत्रः । कश्चित् तु समर्थनायां पञ्चमीमिच्छति, परैरशक्यस्य वस्तुनोऽध्यवसायः समर्थना, कश्चिदाह-समुद्रः शोषयितुमशक्यः, स आह–समुद्रमपि शोषयाणि, पर्वतमप्युत्पाटयानि ।।३८।।**

**श० म० न्यासानुसन्धानम्– आशि०** । 'आशिषि आशीः-पञ्चम्यौ' इति पदच्छेदः । पदार्थमाह– **आशासनमाशीरिति**– "आङः शासूकि इच्छायाम्" इत्यतो भावे क्विपि "आङः" [ ४. ४. १२०. ] इति शास आस इसादेशे–आशीः । आशासनमप्राप्तस्य प्रार्थनमाशीःपदवाच्यम्, तत्र यदि आशिषः प्रत्ययार्थत्वमाश्रीयते तदा प्रत्ययस्य कर्त्रादिवाचकत्वं न स्यादित्याशयेन धात्वर्थस्यैव विशेषणत्वमाश्रयति– **आशीर्विशिष्टेऽर्थे वर्तमानाद् धातोरिति**– धात्वर्थविषयिण्यां प्रार्थनायां गम्यमानायामित्याशयः, एवं च विभक्तेराशीरर्थद्योतकत्वं पर्यवस्यति, भाष्ये तु वाचकतापक्ष एव सिद्धान्तितः, नवीनास्तु तस्य भाष्यस्योभयपक्षसाधुत्वपरतामाश्रित्यात्र प्रकरणे सर्वत्र वाच्येषु द्योत्येषु वेत्येव व्याचक्षते । न चाशीरर्थवाचकत्वेन तस्य कर्त्राद्यवाचकत्वेनाशीरादेश्चैक्यादेकवचनमेव स्यान्न द्वित्वादीति चेत् ? अस्यार्थस्य 'सुपां कर्मादयोऽप्यर्थाः' इत्यादिकारिकया भाष्यकारेणैव प्रत्याख्यातत्वात् । "जि अभिभवे" अतोऽनेनाशीःप्रत्ययेषु "दीर्घश्च्विवयङ्यक्क्येषु च" [ ४. ३. १०८. ] इति दीर्घे– **जीयात्, जीयास्ताम्, जीयासुरित्यादि** । पञ्चम्यां च शवि गुणादौ च– **जयतात्, जयताम्, जयन्तु** इत्यादि । पदकृत्यं पृच्छति– **आशिषीति किमिति**, उत्तरयति– **चिरं जीवति मैत्रः** इति– नात्र प्रार्थनमपि तु वस्तुस्थितिकथनमिति नास्य प्रवृत्तिः । मतान्तरमाह– **कश्चिदाहेति**, अध्यवसायमाह– **कश्चिदाहेति**, अत्र समुद्रशोषणं पराशक्यं सोऽध्यवस्यति कर्तुमुद्युङ्क्ते ।। ५. ४. ३८. ।।

## माङ्यद्यतनी । ५. ४. ३९. ।।

**त० प्र०– माङ्युपपदे धातोरद्यतनी भवति । सर्वविभक्त्यपवादः । मा कार्षीदधर्मम्, मा हार्षीत् परस्वम् । कथं 'मा भवतु तस्य पापं, मा भविष्यति' इति ? असाधुरेवायम् । केचिदाहुरङितो माशब्दस्यायं प्रयोगः ।।३९।।**

**श० म० न्यासानुसन्धानम्– माङ्य०** । **सर्वविभक्त्यपवादः** इति– कस्मिंश्चिदर्थविशेषे कालविशेषे चास्य विधानाभावात् सर्वत्र प्राप्तेः । तत्र तत्तत्कालेऽर्थे वा तैस्तैर्विशेषसूत्रैराक्रान्तत्वादस्य क्वापि विषयो न स्यादित्यनेन सर्वेषां बाधः फलित इति भावः । उदाहरति– **मा कार्षीदधर्मम्, मा हार्षीत् परस्वमिति**– "डुकृंग् करणे" "हृंग् हरणे" आभ्यामनेनाद्यतनीदिप्रत्यये सिचि "दि-स्योरीट्" [ ४. ४. ८९. ] इतीटि "सिचि परस्मै समानस्याङिति" [ ४. ३. ४४. ] इति वृद्धौ "अड् धातो०" [ ४. ४. २९. ] इत्यत्र 'अमाङा' इति वचनादडभावे– कार्षीत्, हार्षीदिति । अव्याप्तिं शङ्कते– **कथं मा भवतु तस्य पापम्, मा भविष्यतीति**– माङः प्रयोगेऽपि कथमद्यतन्या अभाव इति प्रश्नाशयः, स्वमतेनोत्तरमाह– **असाधुरेवायमिति**– अनुशासनविरुद्धत्वादसाधुत्वं स्पष्टमिति भावः, न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यमिति भाष्योक्त्या लक्षणविरुद्धप्रयोगनिषेधस्य सर्वसम्मतत्वात् । मतान्तरोक्तं समाधानमाह–**केचि-**

**दाहुः– अङितो माशब्दस्यायं प्रयोगः** इति– स्थितस्य गतिश्चिन्तनीयेति कृत्वेदम् । वस्तुतस्तु क्रियायोगे तादृशमाशब्दप्रयोगो न शिष्टसम्मतः, माशब्दयोगे सर्वत्र तैरद्यतन्या एव व्यवह्रियमाणत्वात्, तत्र तत्र क्वचिच्छिष्टप्रयोगेष्वपि पुराणादौ विभक्त्यन्तरदर्शनादिदं समाधानं स्यादेवेत्यन्ये ॥ ५. ४. ३९. ॥

## सस्मे ह्यस्तनी च । ५. ४. ४०. ॥

**त० प्र०– स्मशब्दसहिते माङ्युपपदे धातोर्ह्यस्तनी चकारादद्यतनी च भवति । मा स्म करोत्, मा स्म कार्षीत्; मा चैत्र ! स्म हरः परद्रव्यम्, मा चैत्र ! स्म हार्षीः परद्रव्यम् ॥४०॥**

**श० म० न्यासानुसन्धानम्– सस्मे०** । स्मशब्दस्य माशब्दार्थद्योत्यप्रत्यायकत्वेन माशब्दात् पूर्वं न प्रयोगः शब्दशक्तिस्वाभाव्यात्, परन्तु व्यवहिताव्यवहितत्वे न किमपि विनिगमकमित्युभयविधोदाहरणमाह– **मा स्म करोत्, मा स्म कार्षीत्; मा चैत्र ! स्म हरः परद्रव्यम्, मा स्म हार्षीः परद्रव्यमिति**– एवं च स्मसहितत्वं तस्य व्यवहिताव्यवहितसाधारणमिति मन्तव्यम्, साहित्यमिहैकार्थद्योतने सहचरितत्वमेवेति स्पष्टम् ॥ ५. ४. ४०. ॥

## धातोः संबन्धे प्रत्ययाः । ५. ४. ४१. ॥

**त० प्र०– धातुशब्देन धात्वर्थ उच्यते, धात्वर्थानां संबन्धे–विशेषणविशेष्यभावे सति, अयथाकालमपि प्रत्ययाः साधवो भवन्ति । विश्वदृश्वाऽस्य पुत्रो भविता, कृतः कटः श्वो भविता, भावि कृत्यमासीत् । विश्वदृश्वेति भूतकालः प्रत्ययो भवितेति भविष्यत्कालेन प्रत्ययेनाभिसंबध्यमानः साधुर्भवति । एवं-कृतः कटः श्वो भवितेति । भावि कृत्यमासीदित्यत्र तु भावीति भविष्यत्कालः प्रत्यय आसीदिति भूतकालेन प्रत्ययेनाभिसंबध्यमानः साधुर्भवति । विशेषणं गुणत्वाद् विशेष्यकालमनुरुध्यते, तेन विपर्ययो न भवति । तथा त्याद्यन्तमपि यदाऽपरं त्याद्यन्तं प्रति विशेषणत्वेनोपादीयते तदा तस्यापि समुदायवाक्यार्थापेक्षया कालान्यत्वं भवत्येव ।**

**"साटोपमुर्वीमनिशं नदन्तो,<br>यैः प्लावयिष्यन्ति समन्ततोऽमी ।<br>तान्येकदेशान्निभृतं पयोधेः,<br>सोऽम्भांसि मेघान् पिबतो ददर्श ॥"** [रघु० ३ सर्गे],

**अत्र प्लावयिष्यन्तीति भविष्यदर्थस्य ददर्शेति भूतानुगमः । बहुवचनात् अधात्वधिकारविहिता अपि प्रत्ययास्तद्धिता धातुसंबन्धे सति कालभेदे साधवो भवन्ति–गोमानासीत्, गोमान् भविता, अस्तिविवक्षायां हि मतुरुक्तः स कालान्तरे न स्यादिति ॥४१॥**

**श० म० न्यासानुसन्धानम्–भृशा०** । अभिधेयेऽभिधानोपचारं कृत्वा धात्वर्थोऽत्र धातुशब्देन निर्दिष्ट इत्याह– **धातुशब्देन धात्वर्थ उच्यते** इति– भ्वादिष्वेवायं धातुशब्दो वर्तते, स्वार्थे गुणीभूतस्य धातुशब्दस्य शब्दान्तरेण सम्बन्धो न स्यात्, तस्माद् धात्वर्थ एवायं धातुशब्दो वर्तते, न भ्वादिषु, ततश्च धातुसम्बन्ध इत्यस्य धात्वर्थसम्बन्ध इत्येषोऽर्थो विज्ञायते । धातुशब्देन धात्वर्थोक्तावपि सूत्रमव्यावर्तकमेव, नहि क्वचिदपि धातोरसम्बन्धः, धातोः कारकसम्बन्धस्य कारकाणां वा धातुसम्बन्धस्य सार्वत्रिकत्वात्, अतो **धातोरि**त्येकवचनं जातिविवक्षयेति मत्वा बहुवचनेन व्याख्याति– **धात्वर्थानां सम्बन्धे** इति । कः पुनः सम्बन्ध इत्याह– **विशेष्यविशेषणभावे सतीति** । **अयथाकालमपि प्रत्ययाः साधवो भवन्तीति**– यो यस्यात्मीयकालो यथाकालम् "यथाऽथा" [ ३. १. ४१. ] इति वीप्सायां समासः, न यथाकालमयथाकालम् । एतदुक्तं भवति– स्वैः स्वैर्विधायकवाक्यैर्यत्र यस्मिन् यस्मिन् काले ये ये विहितास्ततोऽन्यत्र कालेऽपि प्रयुक्ताः प्रत्ययाः साधवो भवन्तीति ।

उदाहरति– **विश्वदृश्वाऽस्य पुत्रो भवितेति**– "दृशृं-दृश् प्रेक्षणे" विश्वं दृष्टवानिति विश्वदृश्वा, "दृशः क्वनिप्" [ ५. १. १६६. ] इति क्वनिप्, तत्र वन् अवशिष्यते, "ङस्युक्तं कृता" [ ३. १. ४९. ] इति समासः, "अनद्यतने श्वस्तनी" [ ५. ३. ५. ] इति श्वस्तनीताप्रत्यये च–भविता । **कृतः कटः श्वो भविता** इति–करोतेः क्ते– कृतः, "क्त-क्तवतू" [ ५. १. १७४. ] इति भूते "तत् साप्या०" [ ३. ३. २१. ] इति कर्मणि क्तः । **भावि कृत्यमासीदि**ति– भविष्यतीति– भावि, "भुवो वा" [ उणा० ६२२. ] इति णित् इन्, "वर्त्स्यति गम्यादिः" [ ५. ३. १. ] इति च भविष्यत्त्वम्, "असक् भुवि" अतो ह्यस्तनीदिवि–आसीदिति । सर्वत्र त्याद्यन्तवाच्योऽर्थो विशेष्यः, स्याद्यन्तवाच्यस्तु विशेषणम् ।

प्रयोगे कालान्तराणां कालान्तरैः सह सम्बन्धं प्रकटयति– **विश्वदृश्वेति भूतकालः प्रत्ययः** इति– भूतः कालोऽस्येति बहुव्रीहिः, भूतकालत्वं तु क्वनिपो भूते विधानात्, **भवितेति भविष्यत्कालेन प्रत्ययेनाभिसम्बध्यमानः साधुर्भवतीति**– भविष्यन् कालो यस्येति बहुव्रीहिरेव, भविष्यत्कालत्वं तु भविष्यदनद्यतने श्वस्तन्या विधानात्, भूतकाल-भविष्यत्कालयोर्मध्ये यो भूतकालः स भविष्यत्कालेन सम्बध्यमानः साधुर्भवति, विश्वदृश्वेति भूतकालो भवितेति भविष्यत्कालेनापि सम्बध्यमानो भविष्यत्काल एव सम्पद्यते । द्वितीयेऽप्युदाहरणे कृत इति भूतकालो भूते क्तविधानात्, भवितेति भविष्यत्कालः पूर्ववदेव, तत्र भूतकाल इतरेणापि सम्बध्यमान साधुर्भवति । तृतीयेऽपि भावीति भविष्यत्कालो भविष्यति णिनो विधानात्, आसीदिति भूतकालो भूतानद्यतने ह्यस्तनीविधानात्, तत्र भविष्यत्कालो भूतकालेनापि सम्बध्यमानः साधुर्भवति । इह विश्वदृश्वाऽस्य पुत्रो भवितेति भूतकालो भविष्यत्कालेनापि सम्बध्यमानो भविष्यत्कालः सम्पद्यते, तथाहि– अयमत्रार्थः प्रतीयते– सोऽस्य पुत्रो भविता यो विश्वं द्रष्टेति, न च भविष्यत्कालो भूतकालेनाभिसम्बध्यमानो भूतकालतां प्रतिपद्यते, नह्यत्रायमर्थः प्रतीयते– सोऽस्य पुत्रो भूतो यो विश्वं दृष्टवानिति, इतरयोरप्युदाहरणयोर्विशेषणं विशेष्यकालतां प्रतिपद्यते, यतस्तत्रायमर्थः प्रतीयते– स श्वो भविता कटो यः करिष्यते, तत् कृत्यमासीत् यद् भूतमिति । तदेतत् कथं भवति ? विपर्ययः कस्मान्न भवति ? इत्याह– **विशेषणं गुणत्वात् विशेष्यकालमनुरुध्यते, तेन विपर्ययो न भवतीति**– विशेषणं हि परार्थत्वाद् गुणोऽप्रधानमित्यर्थः, तेन च प्रधानकालस्य विशेष्यस्योपकारः कर्तव्यः, न च तत् प्रधानमपरित्यज्य स्वकालं प्रधानकालमप्रतिपद्यमानं प्रधानोपकारक्रियां कर्तुं समर्थं भवतीति प्रधानस्य यः कालस्तमनुरुध्यते, विशेष्यं तूपकार्यत्वात् प्रधानम्, न च प्रधानस्य गुणकालापत्तिर्युक्ता, अन्यथा यदि गुणकालं प्रधानकालः प्रतिपद्येत तदा तस्य प्रधानत्वं हीयेत, तेन न भवति विपर्ययः । आख्यातवाच्यक्रियायामेव सर्वेषां कारकाणामन्वयात् तस्याः प्राधान्यम्, कर्त्रादीनि कारकाणि च तदुपकारकत्वात् तद्विशेषणानीति विश्वदृश्वेति प्रथमान्तं कर्तृतया तत्र [ क्रियायां ] विशेषणमिति विशेष्यस्यानुरोधित्वं तस्यावश्यकम्, तेनाख्यातवाच्यक्रियाया एव भूतत्वेन प्रतीतिरूपो विपरीतक्रमो नेति भावः ।

एतच्च भाष्येऽपीत्थमुक्तं "धातुसम्बन्धे प्रत्ययाः" [ ३. ४. १. ] इति पाणिनीयसूत्रे । तथाहि– "इह पश्यामि– भूतकालो भविष्यत्कालेनाभिसम्बध्यमानो भविष्यत्कालः सम्पद्यते । कस्मान्न भविष्यत्कालो भूतकालेनाभिसम्बध्यमानो भूतकालः सम्पद्यते ? धातुसम्बन्धे प्रत्ययस्य यथाकालविधानात् सिद्धम् । धातुसम्बन्धे प्रत्ययस्य यथाकालविधानात् सिद्धमेतत् । यथाकालविहिता एवैते प्रत्ययाः स्वेषु स्वेषु कालेषु प्रयुज्यन्ते । कथं तर्हि कालान्यत्वं गम्यते ? उपपदस्य तु कालान्यत्वम् । उपपदस्यैतत् कालान्यत्वम् ।।" इति ।।

अयमाशयः– कालभेदे साधुत्वाभ्यनुज्ञानाय सूत्रमिदमित्युक्तम्, तत्र विशेषानुपादानाद् यथा भूतकालपरित्यागेन भवितेत्येतत्सम्बन्धाद् भूतकालिकः क्वनिप् भविष्यति भवति, तथा भवितेति श्वस्तनी भविष्यत्कालपरित्यागेन विश्वदृश्वेत्येतत्सम्बन्धाद् भूते कस्मान्न भवतीति प्रश्नः । तत्र च भाष्यकृता सूत्राभावेऽपि स्वस्वकालविधानेनैव तादृशप्रत्ययानां साधुत्वं समर्थयतोत्तरमुक्तम् । तस्यायमाशयः– सर्वे प्रत्ययाः स्वेषु स्वेष्वेव कालेषु विधीयन्ते, किन्तु यथा– 'अस्य सूत्रस्य शाटकं वय' इत्युक्तौ यदि वातव्यो न शाटकः, यदि शाटको न वातव्य इति विप्रतिपत्तौ प्राप्तायां– मन्ये स वातव्यो यस्योतस्य शाटक इत्येषा संज्ञा भविष्यतीति प्रतीतिस्वीकारेण भाविव्यपदेश आश्रीयते, तथेहापि विश्वदृश्वाऽस्य पुत्रो भवितेत्यादौ 'अस्य पुत्रो भविता येन विश्वदर्शनं निर्वर्तितम्' इति व्यपदेशो भविष्यति, इति भाविभूतकालिकत्वव्यपदेशविज्ञानादस्य प्रयोगस्य सूत्रं विनापि साधुत्वमुपपादयितुं शक्यते, उपपदभूतस्य विशेषणभूतस्य वाक्यार्थवशात् कालान्यत्वं सूत्रं विनापि समर्थयितुं शक्यते, विशेष्याया आख्यातादिपदवाच्यायाः क्रियायाः प्राधान्यात् स्वकाल एवावस्थानं, विशेषणभूतायाश्चोपलक्षणभावेनोपादानाद् भाविभूतव्यपदेशविषयताप्रतिपादनात् कालान्यत्वं प्रतीयत इति भावः ।

नन्वेवं यत्र स्याद्यन्तं प्रति अन्यस्य भिन्नकालार्थकस्य कर्त्रादिवाचकपदस्य प्रयोगस्तत्र व्यवस्थाऽस्तु, यत्र तूभयमपि स्याद्यन्तमेव तत्र कथं व्यवस्था, कुत्र काला-

न्यत्वं प्रतीयेतेत्याशङ्कायामाह– **तथा स्याद्यन्तमपीत्यादि** । **समुदायवाक्यार्थापेक्षयेति**, अयमाशयः– नह्येकवाक्ये क्रियाद्वयप्राधान्यं सम्भवति 'एकतिङ् [तिव्] वाक्यम्' इति हि वैयाकरणानां समयः, 'एकतिङ्' इत्यस्य हि- एकतिङन्ता[स्याद्यन्ता]र्थनिष्ठमुख्यविशेष्यतानिरूपितप्रकारताशालि अर्थवाचकपदसमुदायरूपं वाक्यमित्यभिप्रायः, तथा चानेकस्याद्यर्थघटितवाक्येऽप्येकस्य कस्यचन विशेष्यत्वमपरस्य च विशेषणत्वमास्थेयम्, तच्च वाक्यार्थमपेक्ष्यैव प्रकृतार्थानुसारमेव स्यादिति तदपेक्षयैव विशेषणभूतस्याद्यन्ते कालान्यत्वं प्रत्येतव्यमिति समुदितोऽर्थः ।

कुत्रेदृशः प्रयोग इति चेत् ? अत्राह– **साटोपमुर्वीमनिशं नदन्तः** इति– रघुवंशे त्रयोदशे सर्गे रामस्य प्रत्यावर्तनसमये पद्यमिदम् । "अनीशं साटोपं नन्दन्तोऽमी यैः [ अम्भोभिः ] उर्वीं समन्ततः प्लावयिष्यन्ति तानि अम्भांसि पयोधेरेकदेशात् निभृतं पिबतो मेघान् स ददर्श" इत्यन्वयः । अत्र कस्य प्राधान्यं कश्चानुगन्तेति विवेचयति– **प्लावयिष्यन्तीति भविष्यदर्थस्य ददर्शेति भूतानुगमः** इति– प्रधानकर्ता तत्पदप्रतिपाद्यो रामः, तस्य क्रिया ददर्शेति पदप्रतिपाद्या भूतकालिकदर्शनरूपेति साऽप्यन्यकर्तृकक्रियापेक्षया प्रधानम्, प्लावयिष्यन्तीति पदप्रतिपाद्या भविष्यत्कालिकी प्लावनक्रिया चानुवाद्यतया निर्दिष्टेति तस्या अप्राधान्यं स्पष्टम्, तथा च भूतकालिकप्लावनकर्तृमेघकर्मकं रामकर्तृकं भूतकालिकं दर्शनमिति बोधः ।

पद्यस्य भावार्थश्चायम्– एते मेघाः पयोधेरेकदेशकोणादेव जलं नीत्वा धरणीं प्लावयन्तः स्वकीयवैभवगर्वभरितास्तथा गर्जन्ति यथा– इदमेषामेव धनं भवेत् तेन चैते महान्त इति, किन्तु एते पयोधिधनिनो धनं तूष्णीमेव चोरयित्वा स्वकीयां कीर्तिं वितन्वन्तीति विजानतां कृते तेषामिदं कर्म कियत् श्लाघ्यमिति ।

अत्र केचनैवमाहुः– वस्तुतस्त्वत्र न प्लावयिष्यन्तीति भविष्यता सह ददर्शेति भूतस्य विरोधः कश्चित्, प्लावनं हि न दर्शनक्रियया कथञ्चित् सम्बद्धम्, तद्धि भविष्यत्त्वेनैव प्रतिपाद्यते, किन्तु पिबतो ददर्शेति वर्तमानभूतयोर्विरोधः, वर्तमानस्य कर्मणो भूतकालिकं दर्शनं कथं जातमिति । तथा चाम्भांसि पिबतो मेघान् ददर्शेति सम्बन्धो योजनीय इति साधु प्रतिभाति, विचारणीयं चैतत् सुधीभिः । तथा च स्याद्यन्तमपीत्यादिना प्रतिपादितस्यार्थस्येदमुदाहरणं न स्यात् । जलपानसमय एव जलेनोर्वीप्लावनस्य भूततानुगमश्च न शोभते, दर्शनसमये च तस्य जलस्य पीतता [ भूतकालिकपानकर्मता ] प्रतीतिरूपपादयितुं शक्यत इति पिबत इति वर्तमानकालिकशतृप्रत्ययस्यैव भूततानुगम उपपद्यते ।।

'धातोः सम्बन्धे प्रत्ययाः' इत्यनेन न केवलं भिन्नकालविहिता धातुसम्बन्धिनः प्रत्यया कालान्तरे साधुतयाऽन्वाख्यायन्ते, किन्तु तद्धितादयोऽपीत्याह– **बहुवचनाद् अधात्वधिकारविहिता अपि प्रत्ययास्तद्धिता धातुसम्बन्धे सति कालभेदे साधवो भवन्तीति**–कालभेदे– अस्मात् कालादन्यस्मिन् काले इत्यर्थः । अयमाशयः– 'धातोः सम्बन्धे प्रत्ययः' इत्येतावदुक्तावपि प्रत्ययत्वेन सर्वधातुप्रकृतिकानां सर्वेषां प्रत्ययानां संग्रहसिद्धौ प्रत्यया इति बहुवचननिर्देशोऽनर्थकः सन् कालसम्बन्धे विधीयमानप्रत्ययमात्रस्य स्वभिन्नकालेऽपि साधुत्वाख्यायकः सम्पद्यते । **गोमान् आसीदिति**– गावो विद्यन्तेऽस्येति वर्तमानकालिकसत्त्वविवक्षायां "तदस्यास्त्यस्मिन्निति मतुः" [ ७. २. १. ] इत्यनेन वर्तमानकालमस्तीत्युपादाय विहितो मतुः 'आसीत्' इति भूतकालान्वयिनि कर्तरि न स्यादतोऽनेन तस्य साधुत्वमन्वाख्यायते, एवं– **'गोमान् भविता'** इत्यत्रापि भविष्यत्कालान्वयिनि कर्तरि योज्यमिति, अस्तित्वविवक्षायां हि मतुरुक्तः, स कालान्तरे न स्यादिति । अनेन सूत्रेण भूतभविष्यत्कालाभ्यां सम्बध्यमानो मतुः साधुर्भवतीति भावः ।

एतच्च "धातुसम्बन्धे प्रत्ययाः" [ ३. ४. १. ] इति पाणिनीयसूत्रे भाष्येऽप्युक्तम् । तथाहि– "प्रत्ययः" इति वर्तमाने पुनः प्रत्ययग्रहणं किमर्थम् ? । अधातुप्रत्ययानामपि धातुसम्बन्धे साधुत्वं यथा स्यात्– गोमान् आसीत्, भविता ।" इति ।

अत्रोक्तं कैयटेन– "यद्यपि स्वरूपपदार्थकः प्रत्ययशब्दः प्रकृतः, तथापीह संज्ञिनिर्देशाभावात् संज्ञिपदार्थको विज्ञास्यते ।" इति ।

अयमाशयः– "प्रत्ययः" [ ३. १. १. ] इति सूत्रेणाधिकृतं प्रत्यय इति पदमापञ्चमसमाप्तेरधिक्रियते । तच्च प्रत्ययपदं स्वरूपपरं तैस्तैः सूत्रैर्विहितैः प्रत्ययैः सम्बध्यते । तथा च न तत्र तत् पदं प्रत्ययबोधकम्, इह च

प्रत्ययस्य विशिष्य विधानाभावात् प्रत्ययत्वेन प्रत्ययमात्रबोधनाय संज्ञिपरं प्रत्ययपदमपेक्ष्यते, तच्च न सम्भवति संज्ञापरस्य तस्य संज्ञिपरत्वस्य लब्धुमशक्यत्वात्, तथापीह संज्ञिनः कस्यचन निर्देशाभावात् पूर्वतोऽधिकृतं संज्ञापरमपि प्रत्ययपदं संज्ञिपरं सम्पत्स्यते इति नास्त्यावश्यकतेह प्रत्ययग्रहणस्येति कृतं प्रत्ययग्रहणं धातुप्रत्ययप्रकरणेऽप्यधातुप्रत्ययानामपि तद्धितानां कालभेदे साधुत्वान्वाख्यापकं भवति ।

न च "तदस्यास्त्यस्मिन्०" [ ५. २. ६४. ] इति सूत्रेऽस्तीत्येकवचनस्याविवक्षया यथा गावोऽस्य सन्तीति बहुवचनेनापि विग्रहे कृते प्रत्ययो भवति, तथाऽस्तीत्यन्यत्र कालविशेषस्याप्यविवक्षया भूतभविष्यतोरपि स प्रत्ययः स्वभावत एव स्यादिति नावश्यकमनेन सूत्रेण साधुत्वान्वाख्यानमिति वाच्यम्, तथा सति दण्डिनमानयेत्युक्तेऽतीतदण्डवतोऽप्यानयनापत्तेः । एतच्च तत्र सूत्रे भाष्येऽपि स्पष्टम् । तथा चास्य सूत्रस्य प्रवृत्तिं विना तत्र भूतादौ मतोर्विधानमसम्भवि स्यादिति प्रत्ययग्रहणसामर्थ्याश्रयणं युक्तमिति ।

भाष्यकृता च सूत्रमेतत् प्रत्याख्यातप्रायमित्युक्तं प्राक् संक्षेपेण, तदेव च सूत्रशेषे भाष्ये सिद्धान्तितप्रायम् । तथाहि– [कस्य कालपरिवर्तनमुचितमित्यस्य विनिगमकाभावे प्राप्ते सति ] "एवं तर्हि वाक्यमेवैतदेवंजातीयकं प्रयुज्यते– अग्निष्टोमयाजीत्येतस्मिन् भविता । कस्मिन् ? योऽस्य पुत्रो जनिता । कदा– यदाऽनेनाग्निष्टोमेनेष्टं भवति ।।" इति ।

तस्यायमाशयः– विश्वदृश्वाऽस्य पुत्रो भवितेत्यादौ क्वनिप् अपि स्वकाले भूत एव, भवितेति अनद्यतन्यपि [ श्वस्तन्यपि ] तत्रैव, किन्तु तत्र वाक्यार्थ एवं योजनीयः– विश्वदृश्वेति प्रयोगोऽस्य जनिष्यमाणे पुत्रे प्रयोक्ष्यते– यदा तेन विश्वदर्शनं निर्वर्तितं स्यादिति ।

अत्रोक्तं कैयटेन– "अवश्यं च स्वकाल एव प्रत्ययविधिरेष्टव्यः । भावि कृत्यमासीदित्यत्र भाविशब्दस्य भूतकालत्वे भाव्यासीच्छब्दयोः पर्यायत्वाद् युगपत् प्रयोगो न स्यात् ।" इति ।

अयमाशयः– भावि कृत्यमासीदित्यादौ यदि यत्कालं भावि भावितया व्यवहृतं तदाऽऽसीदित्यर्थ आश्रीयते, तदा तु स्वकाले प्रत्ययविधानेनैवेष्टसिद्धिः । यदि चातीतमासीदित्यर्थं आश्रीयते तदा भाविशब्दासीच्छब्दयोः पर्यायत्वं स्पष्टमिति तयोरेकत्र– भावि कृत्यमासीदित्यत्र प्रयोगोऽनुचितः ।

अत्रोक्तं नागेशेन– "एवं प्रत्याख्याते सूत्रे वसन् ददर्शेत्यादौ वर्तमानत्वमारोप्य शता । तत्फलं तु तत्समानकालत्वस्य दर्शने लाभः, शतृस्थले क्रिययोः समानकालत्वप्रतीतेः । यद्वा दर्शनकालिकं वासस्य वर्तमानत्वमाश्रित्य प्रत्ययः । एवमेव 'ननु चोत्पततैवं वचनलोपे चोदिताः स्म' इति सरूपसूत्रस्थ [ १. २. ६४. ] भाष्यप्रयोगोपपत्तिः । गोमान् आसीदित्यत्र देवदत्तस्य विद्यमानत्वेऽपि गोमत्त्वस्यातीतत्वाद् भूते प्रत्ययः, तत्रार्थाद् गवामप्यतीतत्वप्रतीतिः ।" इति ।

अयमाशयः–भावि कृत्यमासीदित्यादौ पर्यायत्ववारणाय एतादृशस्थले स्वकाल एव प्रत्ययविधानस्य सिद्धान्तित्वे–

"श्रियः पतिः श्रीमति शासितुं जग-
ज्जगन्निवासो वसुदेवसद्मनि ।
वसन् ददर्शावतरन्तमम्बरात्,
हिरण्यगर्भाङ्गभुवं मुनिं हरिः ।।१।।" शिशुपालवधे– १, १ ।

इति श्लोके वसुदेवसद्मनि वसन् हरिर्मुनिं ददर्शेति भूतकालिकाख्यातार्थेन कथमन्वय इति समाधेयम् । तत्र द्वयी विधा– वासे वर्तमानत्वमारोप्य तथाप्रयोग इत्येकः पक्षः, परमसौ नोचितो लक्षणाया जघन्यवृत्तित्वाम्युपगमात् । तथा च दर्शनकालिकं वासस्य वर्तमानत्वमाश्रित्य तथाप्रयोगः क्रियत इत्येव पक्षान्तरमुचितम्, तथा सति पूर्वोक्तभाष्यमप्यनुकूलं स्यादिति। गोमान् आसीदित्यादिस्थले च न मतुर्भूतेऽपि तु गोमतः सत्त्वेऽपि गोमत्त्वस्य भूतताप्रतीतिः, गोमान् देवदत्तादिर्विद्यमान एव, किन्तु तस्य गोमत्त्वमतीतम्, गोमत्त्वं च तस्य तदासीद् यदाऽस्य गावः सन्तीति प्रतीतिरासीत् । एवं च गावोऽस्य सन्तीति प्रतीतेरेवासीदित्यनेनातीतोच्यते, तत्रार्थाद् गवामतीतताप्रतीतिः पार्ष्णिकी केन वार्यताम्, किन्तु तत्रातीतताप्रतीतये मतोर्विधानं नावश्यकमिति ।

नवीनैस्तु भाष्यरीत्या सूत्रस्यानर्थक्यं व्युत्पाद्य लक्षणया शब्दाध्याहारादिक्लेशेन च सूत्रप्रत्याख्यानापेक्षया सूत्रकरण एव लाघवमिति वर्णितं तत्त्वबोधिन्यादावित्यलं पल्लवितेनेति ।। ५. ४. ४१. ।।

## भृशा-ऽऽभीक्ष्ण्ये हि-स्वौ यथाविधि, त-ध्वमौ च तद्युष्मदि । ५. ४. ४२. ॥

**त० प्र०**– गुणक्रियाणामधिश्रयणादीनां क्रियान्तरैरव्यवहितानां साकल्यं फलातिरेको वा भृशत्वम्, प्रधानक्रियाया विक्लृदादेः क्रियान्तरैरव्यवहितायाः पौनःपुन्यमाभीक्ष्ण्यम्, तद्विशिष्टे सर्वकालेऽर्थे वर्तमानाद् धातोः सर्वविभक्ति-सर्ववचनविषये हि-स्वौ पञ्चमीसंबन्धिनौ भवतः, यथाविधि धातोः संबन्धे– यत एव धातोर्यस्मिन्नेव कारके हि-स्वौ विधीयेते तस्यैव धातोस्तत्कारकविशिष्टस्यैव संबन्धेऽनुप्रयोगरूपे सति; तथा त-ध्वमौ हि-स्वसाहचर्यात् पञ्चम्या एव संबन्धिनौ, तयोः त-ध्वमोः संबन्धी बहुत्वविशिष्टो युष्मत्, तस्मिंस्तद्युष्मदि अभिधेये भवतः, चकाराद्धि-स्वौ च यथाविधि धातोः संबन्धे ।

लुनीहि लुनीहीत्येवायं लुनाति, अनुप्रयोगात् कालवचनभेदोऽभिव्यज्यते । लुनीहि लुनीहीत्येवेमौ लुनीतः, लुनीहि लुनीहीत्येवेमे लुनन्ति; लुनीहि लुनीहीत्येव त्वं लुनासि, युवां लुनीथः, यूयं लुनीथ; लुनीहि लुनीहीत्येवाहं लुनामि, आवां लुनीवः, वयं लुनीमः; एवं लुनीहि लुनीहीत्येवायमलावीत्, लुनीहि लुनीहित्येवायमलुनात्, लुनीहि लुनीहीत्येवाऽयं लुलाव, लुनीहि लुनीहीत्येवायं लविष्यति, लुनीहि लुनीहीत्येवायं लविता, लुनीहि लुनीहीत्येवायं लुनीयात्, लुनीहि लुनीहीत्येवायं लुनातु, लुनीहि लुनीहीत्येवायं लूयात् ।

एवमधीष्वाऽधीष्वेत्येवायमधीते, इमावधीयाते, इमेऽधीयते; अधीष्वाऽधीष्वेत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे; अधीष्वाऽधीष्वेत्येवाऽहमधीये, आवामधीवहे, वयमधीमहे । तथा– अधीष्वाऽधीष्वेत्येवायमध्यगीष्ट, अधीष्वाऽधीष्वेत्येवायमध्यैत, अधीष्वाऽधीष्वेत्येवायमधिजगे, अधीष्वाऽधीष्वेत्येवायमध्येष्यते, अधीष्वाऽधीष्वेत्येवायमध्येता, अधीष्वाऽधीष्वेत्येवायमधीयीत, अधीष्वाऽधीष्वेत्येवाऽयमधीताम्, अधीष्वाऽधीष्वेत्येवायमध्येषीष्ट । एवं सर्वविभक्तिवचनान्तरेष्वपि हि-स्वावुदाहरणीयौ ।

एवं भावकर्मणोरपि–शय्यस्व शय्यस्वेत्येव शय्यते अशायि शायिष्यते भवता, लूयस्व लूयस्वेत्येव लूयते अलावि लाविष्यते केदारः ।

तध्वमौ च तद्युष्मदि–लुनीत लुनीतेत्येव यूयं लुनीथ, लुनीहि लुनीहीत्येव यूयं लुनीथ; अधीध्वमधीध्वमित्येव यूयमधीध्वे, अधीष्वाधीष्वेत्येव यूयमधीध्वे । तथा लुनीत लुनीतेत्येव यूयमलाविष्ट, लुनीहि लुनीहीत्येव यूयमलाविष्ट । अधीध्वमधीध्वमित्येव यूयमध्यैढ्वम्, अधीष्वाऽधीष्वेत्येव यूयमध्यगीढ्वम् । एवं ह्यस्तन्यादिष्वप्युदाहार्यम् ।

यथाविधीति किम् ? लुनीहि लुनीहीत्येवायं लुनाति, छिनत्ति लूयते वेति धातोः संबन्धे मा भूत् । अधीष्वाऽधीष्वेत्येवायमधीते, पठति अधीयते वेति धातोः संबन्धे मा भूत् । लुनीत लुनीतेत्येव यूयं लुनीथ, छिन्थेति धातोः संबन्धे मा भूत् । अधीध्वमधीध्वमित्येव यूयमधीध्वे, पठथेति धातोः संबन्धे मा भूत् । लुनीहि लुनीहीत्यादौ च भृशाभीक्ष्ण्ये द्विर्वचनम् ।

ननु च भृशाभीक्ष्ण्ययोर्यङपि विधीयते न तु तत्र द्विर्वचनम्, इह तु द्विर्वचनमित्यत्र को हेतुः ? उच्यते– यङ् स्वार्थिकत्वात् प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये समर्थोऽवद्योतयितुमिति तदभिव्यक्तये द्विर्वचनं नापेक्षते, हि-स्वादयस्तु कर्तृ-कर्म-भावार्थत्वेनास्वार्थिकत्वादसमर्थाः प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये अवद्योतयितुमिति तदवद्योतनाय द्विर्वचनमपेक्षन्ते इति ॥४२॥

---

**श० म० न्यासानुसन्धानम्– भृशा० ।** **भृशाऽऽभीक्ष्ण्ये** इति– समाहारद्वन्द्वात् सप्तमी । अथ किमिदं भृशत्वमाभीक्ष्ण्यं चेत्याह– **गुणक्रियाणामधिश्रयणादीनां क्रियान्तरैरव्यवहितानां साफल्यमिति**– 'साफल्यमिति स्थाने 'साकल्येन सम्पत्तिः' इति पाठोऽन्यत्र, पचादयो धातवोऽधिश्रयणादिके विक्लेदाद्यन्ते क्रियात्मनि समुदाये स्वेषामवयवानां प्रतिक्षणविनाशिनां युगपदभावात् साकल्येन निर्वृति-दर्शनयोरभावेऽप्यन्वयव्यतिरेकादवसीयमानतद्रूपत्वादेकदेशानामेकदेशे निर्वृति-दर्शनयोर्निर्वृत्तिदर्शनभाजि प्रवर्तन्ते, तत्र केचन क्रियाभागा गुणाः परार्था भवन्ति, केचन मुख्या यदर्थास्ते गुणाः, यथा– पचावधिश्रयोदकावसेचन-तण्डुलावपनैधोपकर्षण-परिघट्टनावस्रावणोद्वर्तना-ऽवतारणादिलक्षणाः क्रियाभागाः कर्तृव्यापाररूपा विक्लृत्तये तण्डुलानामोदनभावाय भवन्तो गुणाः, विक्लृतिस्तु व्यापारो मुख्यः क्रियाभागस्तादर्थ्यादधिश्रयणादीनाम् । तत्र या गुणक्रिया अधिश्रयणादयस्ताः

कश्चित् साकल्येन निर्वर्तयति कश्चिच्च न, कश्चित् साकल्येन निर्वर्तयन् क्रियान्तरैरतत्क्रियावयवैस्तां व्यवदधाति, कश्चित् तु क्रियान्तरेभ्यो व्यावृत्तस्ता एवाधिश्रयणादिकाः सम्पादयति, तत्र तासां गुणक्रियाणामधिश्रयणादीनां क्रियान्तरैरव्यवहितानां साकल्येन कार्त्स्न्येन सर्वासां या सम्पत्तिर्भावस्तद् भृशत्वम्, एवं हि सा समुदायरूपा क्रिया सम्पूर्णावयवाऽन्यूना भृशा भवति । साफल्यमिति पाठे साफल्यं– गुणक्रियाफलभूतविक्लित्तिसम्पादकत्वम् । क्वचित् साकल्यमित्यपि पाठः । इदं वा भृशत्वमित्याह– **फलातिरेको वा भृशत्वमिति**– फलस्यातिरेकः– फलसमाप्तावपि क्रियानुपरतिः, यावता प्रमाणेनार्थस्ततोऽधिकप्रमाणता वा प्रकर्षः । आभीक्ष्ण्यमाह– **प्रधानक्रियाया विक्लेदादेः क्रियान्तरैरव्यवहितायाः पौनःपुन्यमाभीक्ष्ण्यमिति**– पचौ विक्लेदः प्रधानक्रिया, तां कश्चिदवसाय्य क्रियान्तरमारभ्य पुनस्तामेव क्रियामारभते, तदर्थमेवाधिश्रयणादिकां क्रियां प्रवर्तयति, कश्चिद् तु तामेव क्रियान्तरेण व्यवधत्ते, तत्र क्रियान्तराव्यवधानेन तस्याः क्रियायाः पौनःपुन्यं– पुनः पुनर्भाव आवृत्तिः– आभीक्ष्ण्यमित्यर्थः ॥

अत्र 'धातोः सम्बन्धे' इति पूर्वतोऽनुवृत्तं, तद्धि 'यथाविधि' इत्यनेन सम्बध्यते, तथा च वाक्यद्वयं सम्पाद्य सूत्रं व्याख्याति– **तद्विशिष्टे सर्वकालेऽर्थे वर्तमानादित्यादिना** । भृशाभीक्ष्ण्येऽर्थे वर्तमानादित्यनेन 'भृशाभीक्ष्ण्ये' इति प्रकृतेर्विशेषणं न प्रत्ययस्येति विज्ञायते, यमर्थमभिधातुं प्रकृतिरसमर्था सामर्थ्यात् स प्रत्ययार्थतया पर्यवस्यति, यथा– अपत्यादिकोऽर्थो दाशरथिरित्यादौ, दशरथशब्दो हि स्वार्थमेव बोधयति नापत्यार्थमिति, अत्र तु प्रकृतिरेव तमर्थमभिधातुमलमिति कथं प्रत्ययस्यासावर्थः कथ्यतामिति । ननु किं प्रकृतेरयमर्थः सम्भवतीति सम्भवमात्रेण प्रकृत्यर्थो न प्रत्ययार्थोऽयं हन्त ! तर्हि धातोः क्रियावाचित्वात् प्रकृतिधर्मोऽपि भृशाभीक्ष्ण्यार्थः प्रत्ययवाच्यः स्यादिति प्रत्ययस्याप्यसावर्थः सम्भवतीति प्रत्ययार्थोऽपि न कस्मादयम्; उच्यते– अन्तरङ्गत्वात् प्रकृतिविशेषणत्वे च प्रत्ययस्यासौ भवत्येवार्थः, तस्यार्थान्तरानिर्देशादनिर्दिष्टार्थत्वात् स्वार्थे एवोत्पत्तेः, स्वार्थश्चास्य प्रकृत्यर्थ इति । प्रकृतिविशेषणत्वे चोभयानुग्रहः कृतो भवति, प्रत्ययविशेषणत्वे च तस्यैवायमर्थः स्यान्न प्रकृतेरिति प्रकृत्यर्थविशेषणमेतत् । **सर्वकालेऽर्थे** इति– सर्वे– भूत-भविष्यद्-वर्तमानाः कालाः [ अधिकरणानि ] सन्त्यस्येति बहुव्रीहिः, अत्र नैकस्मिन्नर्थे सर्वकालत्वं सम्भवति, किन्तु 'अर्थे' इत्यत्र जातावेकवचनम्, **तद्विशिष्टे** इति, तथा च सर्वकालेष्वर्थेषु इत्यर्थो बोध्यः । **तद्विशिष्टे** इति– अस्य लाभस्तु 'भृशाभीक्ष्ण्ये' इत्यत्र सप्तम्या वैशिष्ट्यार्थकतया, अर्थे हि शब्दस्य वृत्तिर्नाधिकरणभावोऽपि तु वाच्यवाचकभाव एव, वाच्यमधिकरणं वाचकमाधेयम् । अत्र परस्मैपदिभ्यो हिः, आत्मनेपदिभ्यश्च स्वः, तत्र हिः कर्तर्येव, स्वस्तु भाव-कर्म-कर्तृषु आत्मनेपदस्य सर्वत्र विधानात्; एवं च मध्यमपुरुषैकवचनीयप्रत्ययद्वयमिदमिति मध्यमपुरुषैकवचन एव प्रयुज्येतेत्याशङ्कावारणायाह– **सर्वविभक्तिसर्ववचनविषये** इति– यदि मध्यमपुरुषैकवचन एवानयोर्विधानमभिमतं स्यात् तर्हि त-ध्वमोर्विषयेऽप्यनयोर्विधानमनुचितं स्यात् । **पञ्चमीसम्बन्धिनाविति** स्वरूपकथनं विभक्तिसंज्ञालाभाय, हि-स्वयोः पञ्चमीसम्बन्धस्य प्रसिद्धत्वेऽपि प्रत्ययान्तरत्वव्यावर्तनाय तथाकथमावश्यकमेव, अन्यथा तयोर्विभक्तित्वाभावेन तदन्तस्य पदत्वं न स्यात् । किमविशेषेण हि-स्वयोर्विधानम् ? नेत्याह– **यथाविधि धातोः सम्बन्धे** इति । धातोः सम्बन्धस्य विध्यनतिक्रमं दर्शयति– **यत एव धातोरि**त्यादिना, अयमाशयः– हि-स्वौ सकलविभक्तिवचनविषये भवत इति पूर्वमुक्तम्, तथा च वचनविभक्तिभेदावगमो न स्यात्, न च तथा सति साधीयसी अर्थप्रतीतिर्भवतीति स एव धातुर्यथोचितविभक्तिवचनेन सहानुप्रयुज्यत इति ततः पुरुषवचनयोरभिव्यक्तिर्भवतीति वक्ष्यति– **अनुप्रयोगात् कालवचनभेद** इत्यादिना ।

द्वितीयवाक्यार्थमाह– **तथा त-ध्वमौ** इत्यादिना **यथाविधि धातोः सम्बन्धे** इत्यन्तेन, यथाविधीत्यस्य देहलीदीपन्यायेनोभयवाक्येऽपि सम्बन्धात् तदन्वयि 'धातोः सम्बन्धे' इत्यप्युभयत्रान्वेतीति भावः । तद्युष्मदीत्यस्यार्थमाह– **तयोरि**त्यादिना **अभिधेये** इत्यन्तेन, त-ध्वमौ हि बहुत्वविशिष्टे युष्मद्यभिधेये भवतः, इत्येतद्विहितावपि तौ तत्रैवाभिधेये भविष्यतः ॥

उदाहरति– **लुनीहि लुनीहीत्येवायं लुनातीति**– अतिशयेन पौनःपुन्येन वा लवनमिति 'लुनीहि लुनीहि' इत्यस्यार्थः, एककर्तृकं वर्तमानकालिकं लवनमिति 'लुनाति'

इत्यस्यार्थः, **इतिशब्दस्तु** अभेदान्वये तात्पर्यं ग्राहयति, एवं चातिशयेन पौनःपुन्येन वा लवनाभिन्नं वर्तमानकालिकमेककर्तृकं लवनं– वाक्यार्थः । इतिशब्दाभावे च प्रयोगेण सहानुप्रयोगस्यान्वयो न स्यात्, आख्यातयोरसत्वरूपार्थवाचकयोः स्वतः सम्बन्धस्य दुरुपपादत्वात् । ननु इतिशब्देन व्यवधानात् 'लुनाति' इत्यस्यानुप्रयोगत्वं कथम् ? अनु– पश्चादव्यवधानेन प्रयोगो ह्यनुप्रयोग इति चेत् ? इतिशब्दस्य पूर्ववाक्यार्थानुवादकत्वमात्रेण व्यवधायकत्वाभावान्न दोषः, व्यवधानं हि परेण भवति, इतिशब्दश्च पूर्वोक्तार्थमेवानुवदतीति तस्य न व्यवधायकत्वमिति भावः । एवं वर्तमानायां तिवि उदाहृत्य सर्ववचनविषयत्वं दर्शयितुं तसाद्यष्टकेऽप्युदाहरति– **लुनीहि लुनीहीत्येवेमौ लुनीतः** इत्यादिना । अथ सर्वविभक्तिविषयत्वं दर्शयितुमद्यतन्यां ह्यस्तन्यां परोक्षायां भविष्यन्त्यां श्वस्तन्यां सप्तम्यां पञ्चम्यामाशिषि च दिक्प्रदर्शनार्थैकैकं प्रयोगमुदाहरति– एवं– **लुनीहि लुनीहीत्येवायमलावीदित्यादिना क्रमेण** ।

हिप्रत्ययमुदाहृत्य तत्क्रमेणैव स्वप्रत्ययमुदाहर्तुमाह– **एवम्– अधीष्वाऽधीष्वेत्येवायमधीते** इत्यादिना । अद्यतन्यादिष्वेकवचनेनैवोहृतं, न द्विवचनबहुवचनाभ्यामिति न्यूनतेति शङ्कामपाकर्तुमाह– **एवं– सर्वविभक्तिवचनान्तरेष्वपि हि-स्वावुदाहरणीयाविति**– ग्रन्थगौरवभिया दिङ्मात्रप्रदर्शनाय तथोदाहृतमिति सर्वासामद्यतन्यादीनां विभक्तीनां द्विवचनबहुवचनाभ्यामुक्तरीत्या हि-स्वावुदाहरणीयाविति भावः । पूर्वत्र "लूग्श् छेदने" इति लूधातुः प्वादित्वाच्च शिति ह्रस्वः, परत्र "इंङ्क् अध्ययने" इति नित्यमधिपूर्वो हि 'इ' धातुः, तस्याद्यतन्यां गीङ्, परोक्षायां च गादेशो विज्ञेयः । क्रियातिपत्तौ तु न सम्भव इति तत्र नोदाहृतमित्याभाति ॥

कर्तरि प्रयोगा दर्शिताः, अथ भावे कर्मणि वा भवति वा नवेति संदिहानं प्रत्याह– **भाव-कर्मणोरपीति** । तत्र पूर्वं भावे उदाहरति– **शय्यस्व शय्यस्वेत्येव शय्यते** इति– "शीङ्क्– शी शयने" अतो भावे वर्तमानातेप्रत्यये "क्यः शिति" [ ३. ४. ७०. ] इति क्ये "क्ङिति यि शय्" [ ४. ३. १०५. ] इति शयादेशे च– शय्यते इति । अद्यतन्यां तु– **'अशायि'** इति– अत्राद्यतन्यास्तप्रत्यये ञिचि तलुकि वृद्धौ च– अशायि । भविष्यन्त्यां स्यतेप्रत्यये "स्वस्ग्रह०" [ ३. ४. ६९. ] इति वा ञिटि वृद्धौ च– **शायिष्यते, भवतेति** कर्तृपदं तृतीयान्तम् । एवं कर्मणि लूधातोः– **लूयस्व लूयस्वेत्येव– लूयते अलावि लाविष्यते केदारः** इति– केदार इति कर्म, उक्तत्वाच्च प्रथमा ।

द्वितीयं वाक्यार्थमाश्रित्योदाहर्तुमवतारयति–**त-ध्वमौ च तद्युष्मदीति**, उदाहरति– **लुनीत लुनीतेत्येव यूयं लुनीथ**, पक्षे हिमुदाहरति– **लुनीहि लुनीहीत्येव यूयं लुनीथ** । ध्वम उदाहरणमाह– **अधीध्वमधीध्वमित्येव यूयमधीध्वे,** पक्षे स्वमुदाहरति– **अधीष्वाधीष्वेत्येव यूयमधीध्वे** इति, वर्तमानायामुदाहृत्याथाद्यतन्यामुदाहरति– **तथा– लुनीत लुनीतेत्येव यूयमलाविष्ट**, पक्षे हिमुदाहरति– **लुनीहि लुनीहीत्येव यूयमलाविष्ट** । ध्वममुदाहरति– **अधीध्वमधीध्वमित्येव यूयमध्यैढ्वम्**, पक्षे स्वमुदाहरति– **अधीष्वाधीष्वेत्येव यूयमध्यगीढ्वमिति** । "वाऽद्यतनी-क्रियातिपत्त्योर्गीङ्" [ ४. ४. २८. ] इति इङोऽद्यतन्यां वा 'गीङ्– गी' इत्यादेशः ॥ एतावता वर्तमानायामद्यतन्यामुदाहृतम्, शेषास्वतिदिशति– **एवं ह्यस्तन्यादिष्वप्युदाहार्यमिति** ॥

अथ पदकृत्यं पृच्छति– **यथाविधीति किमिति**, उत्तरयति– **लुनीहि लुनीहीत्येवायं लुनाति, छिनत्ति लूयते वेति धातोः सम्बन्धे मा भूदिति**– 'यथाविधि' इत्यस्य 'यत एव धातोर्यस्मिन्नेव कारके०' इत्याद्यर्थं दर्शयताऽऽचार्येण सूचितम्– धातुभेदे कारकभेदे च नेदं सूत्रं प्रवर्तत इति, प्रकृतप्रयोगे च 'छिनत्ति' इत्यस्यानुप्रयोगे धातुभेदः, 'लूयते' इत्यस्यानुप्रयोगे च कारकभेदः, धातुसाम्येऽपि 'लुनाति' इत्यस्य कर्तरि प्रयोगात् 'लूयते' इत्यस्य कर्मणि प्रयोगात्, तत्रास्य प्रवृत्तिवारणाय यथाविधिग्रहणमावश्यकमिति भावः । एवम्– **'अधीष्वाधीष्वेत्येवायमधीते'** इति प्रयोगे 'अधीते'स्थाने **पठतीति** प्रयोगे धातुभेदः, **'अधीयते'** इति प्रयोगे च कारकभेदः, **'लुनीत लुनीतेत्येव लुनीथ'** इति प्रयोगे 'लुनीथ' इत्यस्य स्थाने **'छिन्त्थ'** इति प्रयोगे धातुभेदः, एवम्–**'अधीध्वमधीध्वमित्येव यूयमधीध्वे'** इति प्रयोगे 'अधीध्वे' इत्यस्य स्थाने **'पठथ'** इति प्रयोगे धातुभेदस्तत्र तत्र नास्य प्रवृत्तिरिति भावः ।

एकेनैव लुनीहीति पदेन सिद्धे द्विः प्रयोगः कृत इत्या-

शङ्कायां समाधत्ते– **भृशाभीक्ष्ण्ये द्विर्वचनमिति**– "भृशाऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः" [ ७. ४. ७३. ] इति भृशाभीक्ष्ण्ये द्योत्ये द्विर्वचनं भवतीति भावः ।

अथ लुनीहि लुनीहीति कथमत्र द्विर्वचनम् ? यावता धातुनैव भृशाभीक्ष्ण्यमवगमितं तद्विशिष्टक्रियावचनाद् धातोः पञ्चम्या ह्यादेर्विधानात् । अथवाऽवगमिते सति तस्मिन् द्विर्वचनं भवतीति चेत् ? एवं यङन्तस्यापि द्विर्वचनं स्यादित्यत आह– **भृशाभीक्ष्ण्ये द्विर्वचनमिति**– भृशाभीक्ष्ण्ययोरभिव्यक्त्यै– द्योतनाय पञ्चमीह्यादिर्द्विर्वचनमपेक्षते इत्यर्थः । यद्यपि भृशाभीक्ष्ण्यविशिष्टक्रियाभिधायिनो धातोः पञ्चमीह्यादिर्भवति, तथापि या तस्य भृशाभीक्ष्ण्याभिव्यव्यक्तिः सा धातुना न क्रियते, किं तर्हि ? ह्यादिनैव, स च तां कर्तुं द्विर्वचनसहित एव समर्थो भवति न केवलः, तत्र तस्याविधानात्, स हि कर्तृ-कर्म-भावेषु विधीयते न भृशाभीक्ष्ण्ये, तस्मात् तदभिव्यक्तौ कर्तव्यायां ह्यादिः स्वयमसमर्थ इति द्विर्वचनमपेक्षते, तेन तदन्तस्य द्विर्वचनं भवतीति भावः । भृशाभीक्ष्ण्ये यथाऽनेन हिस्वौ विधीयते तथा तत्रैवार्थे सूत्रान्तरेण यङ् विधीयते धातोः । तत्रेह द्विर्वचनं तत्र नेति वैषम्यं कुत इत्याशङ्क्य समाधत्ते– **भृशाभीक्ष्ण्योर्यङपी**त्यादिना, उभयोरपि भृशाभीक्ष्ण्ययोरर्थयोर्विधानेऽपि यङः प्रकृत्यर्थगतयोस्तयोरर्थयोरवद्योतनाय शक्तिरस्ति, प्रकृत्यैव तत्र भृशाभीक्ष्ण्ये उक्ते, यङ् केवलं द्योतयतीत्युक्तार्थत्वात् तत्र न द्विर्वचनम्, ह्यादेस्तु केवलस्य न तदवद्योतनशक्तिरिति तत्र भवति द्विर्वचनमिति भावः ॥

ननु यङन्तस्यापि द्विर्वचनं दृश्यते– पापच्यते पापच्यते इति, तत् कथमिति चेत् ? उच्यते– यदा भृशार्थयङन्तादाभीक्ष्ण्यविवक्षा तदा भवत्येवानुक्तार्थत्वात्, तथा भृशार्थयङन्तादाभीक्ष्ण्ये आभीक्ष्ण्ययङन्ताद् वा भृशार्थे विवक्षिते यदा पञ्चमी केवला तदा सा केवला तदर्थद्योतनेऽसमर्थेति तदर्थद्योतने द्विर्वचनमपेक्षते– पापच्यस्व पापच्यस्वेति । अयमाशयः– द्विविधो हि यङर्थः– पौनःपुन्यं भृशत्वं चेति, तत्र यदा पौनःपुन्ये यङ् तदा तत्रैव नास्ति द्विर्वचनम्, यदा तु भृशार्थे तदा पौनःपुन्यद्योतनाय द्विर्वचनं न विरुध्यते ।

अत्रेदं विचार्यते– भृशाभीक्ष्ण्ययोरर्थयोर्यङपि विधीयते हि-स्वावपि विधीयेते, तत्र केन भाव्यमिति । ननु भृशाभीक्ष्ण्ययङोऽपि विप्रतिषेधेन पञ्चमी भवति, यङोऽवकाशो यो धातुरेकस्वरो व्यञ्जनादिर्भृशाभीक्ष्ण्ये वर्ततेऽधातुसम्बन्धश्च– लोलूयते, पोपूयते; पञ्चम्यवकाशो यः स्वरादिरनेकस्वरो भृशाभीक्ष्ण्यवृत्तिर्धातुसम्बन्धश्च– स भवानीहस्वेहस्वेत्येवायमीहते; इहोभयं प्राप्नोति– स भवान् लुनीहि लुनीहीत्येवायं लुनाति; पञ्चमी भवति विप्रतिषेधेन, सामान्यविशेषभावेन क्रियाभेदाश्रयोऽत्र धातुसम्बन्धः । न तर्हीदानीमिदं भवति– स भवान् लोलूयस्व लोलूयस्वेत्येवायं लोलूयत इति, भवति च भिन्नविषयत्वाद् विप्रतिषेधाभावात् । कर्तृ-कर्मणोर्हि हि-स्वौ विधीयेते, क्रियाविशेषे स्वार्थे यङ्, तत्रान्तरङ्गत्वाद् यङा भवितव्यम्, बहिरङ्गत्वं तु पञ्चम्याः कर्त्राद्यपेक्षणाद् धातुसम्बन्धापेक्षणाच्च । भृशार्थपौनःपुन्ययोः प्रतिपिपादयिषितत्वादेकतरस्मिन् यङ्प्रत्ययोऽपरस्मिंस्तु हि-स्वौ, तयोश्च केवलयोर्भृशाभीक्ष्ण्येऽभिव्यङ्क्तुमसामर्थ्यात् तदन्तस्य द्विर्वचनं प्रवर्तते । कथं तर्हि लुनीहि लुनीहीत्येवायं लुनातीति, अन्तरङ्गत्वाद् यङ एव प्राप्तेः, सत्यम्– एतदर्थमेव यङ्विधायके वाग्रहणमिति ॥ ५. ४. ४२. ॥

## प्रचये नवा सामान्यार्थस्य । ५. ४. ४३. ॥

**त० प्र०– भृशा-ऽऽभीक्ष्ण्ये यथाविधीति च नानुवर्तते । प्रचयः– समुच्चयः, स्वतः साधनभेदेन वा भिद्यमानस्य एकत्रानेकस्य धात्वर्थस्याध्यावाप इति यावत्, तस्मिन् गम्यमाने सामान्यार्थस्य धातोः संबन्धे सति धातोः परौ हि-स्वौ, त-ध्वमौ च तद्युष्मदि वा भवतः । व्रीहीन् वप लुनीहि पुनीहीत्येव यतते चेष्टते समीहते, यत्यते चेष्ट्यते समीह्यते, पक्षे– व्रीहीन् वपति लुनाति पुनातीत्येव यतते, यत्यते । देवदत्तोऽद्धि गुरुदत्तोऽद्धि जिनदत्तोऽद्धि इत्येव भुङ्क्ते, भुज्यते, पक्षे– देवदत्तोऽत्ति गुरुदत्तोऽत्ति जिनदत्तोऽत्तीत्येव भुङ्क्ते भुज्यते । ग्राममट वनमट गिरिमटेत्येवाटति घटते, अट्यते घट्यते, पक्षे– ग्राममटति वनमटति गिरिमटतीत्येवाटति घटते अट्यते घट्यते । सक्तून् पिब धानाः खाद ओदनं भुङ्क्ष्वेत्येवाभ्यवहरति अभ्यवह्रियते, पक्षे– सक्तून् पिबति धानाः खादति ओदनं भुङ्क्ते इत्येवाभ्यवहरति अभ्यवह्रियते । सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवाधीते**

**पठति अधीयते पठ्यते, पक्षे– सूत्रमधीते निर्युक्तिमधीते भाष्यमधीते इत्येवाधीते पठति, अधीयते पठ्यते ।**

**त-ध्वमौ तद्युष्मदि– व्रीहीन् वपत लुनीत पुनीतेत्येव यतध्वे चेष्टध्वे समीहध्वे; व्रीहीन् वप लुनीहि पुनीहीत्येव यतध्वे चेष्टध्वे, समीहध्वे, पक्षे पक्षे– व्रीहीन् वपथ लुनीथ पुनीथेत्येव यतध्वे चेष्टध्वे समीहध्वे । ग्राममटत वनमटत गिरिमटतेत्येवाटथ घटध्वे, ग्राममट वनमट गिरिमटेत्येवाटथ घटध्वे, पक्षे– ग्राममटथ वनमटथ गिरिमटथेत्येवाटथ घटध्वे । सूत्रमधीध्वं निर्युक्तिमधीध्वं भाष्यमधीध्वमित्येवाधीध्वे पठथ, सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येवाधीध्वे पठथ, पक्षे– सूत्रमधीध्वे निर्युक्तिमधीध्वे भाष्यमधीध्वे इत्येवाधीध्वे पठथ । एवं– वचनान्तरे त्रिकान्तरे विभक्त्यन्तरेऽप्युदाहार्यम् । सामान्यार्थस्येति किम् ? व्रीहीन् वप लुनीहि पुनीहीत्येव वपति लुनाति पुनातीति मा भूत्, ग्राममट वनमट गिरिमटेत्येव ग्राममटति वनमटति गिरिमटतीति च मा भूत्, कारकभेदेनाटतीत्यस्य सामान्यार्थत्वाभावात् ॥४३॥**

---

**श० म० न्यासानुसन्धानम्– प्रचये०** । प्रचये भृशाभीक्ष्ण्ययोरन्वयोऽनभिलषितः, सामान्यार्थस्य धातोश्च प्रयोगे 'यथाविधि' धातोः सम्बन्धोऽनुपपन्न इति तयोः पदयोरिहानावश्यकत्वेनाह– **'भृशाभीक्ष्ण्ये' 'यथाविधि' इति च नानुवर्तत** इति । प्रकर्षेण चयनं प्रचयः, प्रकर्षश्च सम्यक्त्वमेवेत्याह– **प्रचयः समुच्चयः** इति । समुच्चयश्च परस्परनिरपेक्षस्यानेकस्यैकत्रान्वय इति प्राचां लक्षणं, तदेव व्याख्यानपूर्वकमाह– **स्वतः साधनभेदेन वा भिद्यमानस्ये**ति । अत्र हि धातोः प्रत्यये विधीयमाने तदर्थस्यैव समुच्चय आश्रयणीयः, समुच्चयश्चानेकत्वनिबन्धनः, अनेकत्वं च भेदनिबन्धनमिति भेद एवोपपाद्यते– **स्वत** इत्यादिना, धात्वर्थानां भेदस्य द्वयी विधा– स्वरूपभेदः साधनकृतभेदश्च, तथा च स्वरूपतः साधनभेदेन वा भिद्यमानस्यानेकस्य धात्वर्थस्यैकत्राध्यावापोऽन्वय इति समुच्चयशब्दार्थः । **सामान्यार्थस्ये**ति– स्वतः साधनभेदेन वा भिद्यमानयोर्धात्वोर्धातूनां वा मध्ये योऽर्थः सामान्यतया भासते सर्वेषु स एवार्थो विशिष्य यस्य धातोस्तादृशस्य धातोरनुप्रयोगे सतीति भावः । तथा च **'व्रीहीन् वप लुनीहि पुनीहि'** इत्यत्र धात्वर्थानां स्वरूपत एव भेदः, **'देवदत्तोऽद्धि गुरुदत्तोऽद्धि जिनदत्तोऽद्धि'** इत्यादौ च स्वरूपतो भेदाभावेऽपि साधनभेदेन धात्वर्थभेदः, साधनमिह कर्तृकारकम्, वपनलवनपवनानां धात्वर्थानां मध्ये यत्नरूपोऽर्थः सामान्यतया भासत इति तदर्थक एव धातुः– यतिः, चेष्टिः, ईहिर्वाऽनुप्रयुज्यते, तत्र कर्तृत्वविवक्षायां **'यतते'** इत्यादि, भावविवक्षायां **'यत्यते'** इत्यादि चेति सर्वत्र प्रयोगे स्वयमूहनीयम् ।

परस्मैपदिनो हिः, आत्मनेपदिनः स्वश्च प्रयोगे भवति, अनुप्रयोगश्च सर्वकालविभक्तिवचनेषु भवतीति प्रागुक्तमेव, तत्र दिक्प्रदर्शनाय वर्तमाने उदाहृत्य शेषेष्वतिदेक्ष्यति । तत्र प्रथमं हि वर्तमानैकवचने कर्तरि भावे च स्वरूपतो धात्वर्थभेदे उदाहरति– **'व्रीहीन् वप लुनीहि पुनीहीत्येव'** इति प्रयोगः, **'यतते, चेष्टते, समीहते'** इति कर्तर्यनुप्रयोगः, **'यत्यते, चेष्ट्यते, समीह्यते'** इति भावेऽनुप्रयोगः, अस्य वैकल्पिकत्वात् पक्षे यथाप्राप्तमाह–**पक्षे– 'व्रीहीन् वपति लुनाति पुनातीत्येव, यतते यत्यते'** इति, अत्रानुप्रयोगार्थेन सामान्येन सह समुच्चीयविशेषाणामभेदान्वयः, तथा च वपनाद्यभिन्नो वर्तमानकालिको यत्न इत्यादिरूपेण वाक्यार्थ ऊहनीयः, एवं यथासम्भवमन्यत्रापि विज्ञेयमिति । अथ कारकभेदेन धात्वर्थभेदे उदाहरति– **'देवदत्तोऽद्धि, गुरुदत्तोऽद्धि, जिनदत्तोऽद्धीत्येव'** इति प्रयोगः, **'भुङ्क्ते, भुज्यते'** इत्यनुप्रयोगः, पक्षे यथाप्राप्तम्– **'देवदत्तोऽत्ति, गुरुदत्तोऽत्ति, जिनदत्तोऽत्तीत्येव भुङ्क्ते भुज्यते'** इति, अत्र कर्तृकारककृतो भेदः । अथ कर्मकारककृते भेदे उदाहरति– **'ग्राममट वनमट गिरिमटेत्येव'** इति प्रयोगः, **'अटति घटते, अट्यते घट्यते'** इत्यनुप्रयोगः । अथ हि स्वं चोभयं स्वरूपतो धात्वर्थभेदे उदाहरति– **'सक्तून् पिब धानाः खाद ओदनं भुङ्क्ष्वेत्येव'** इति प्रयोगः, **'अभ्यवहरति अभ्यवह्रियते'** इत्यनुप्रयोगः, वैकल्पिकत्वात्, पक्षे **'सक्तून् पिबति धानाः खादति ओदनं भुङ्क्ते इत्येव, अभ्यवहरति अभ्यवह्रियते'** इति ।

"टुवपीं– वप् बीजसन्ताने" "लूग्श– लू छेदने" "पूग्श्– पू पवने" "यतैङ्– यत् प्रयत्ने" "चेष्टि– चेष्ट् चेष्टायाम्" "ईहि– ईह् चेष्टायाम्" "अदं– अद् भक्षणे" "भुजंप्– भुज् पालनाभ्यवहारयोः" "अट– अट् गतौ" "घटिष्– घट् चेष्टायाम्" "पां– पा पाने" "खाद–

खाद् भक्षणे" "हृंग्- हृ हरणे" अयमभ्यवपूर्वक आहारे, इतीह धातवः प्रयुक्ताः ।

अथ स्वं कर्मकारककृतधात्वर्थभेदे कर्तरि भावे कर्मणि चोदाहरति- **'सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येव'** इति प्रयोगः, **'अधीते पठति, अधीयते पठ्यते'** इति चानुप्रयोगः, वैकल्पिकत्वादस्य पक्षे- **सूत्रमधीते निर्युक्तिमधीते भाष्यमधीते इत्येव, अधीते पठति, अधीयते पठ्यते'** इति । "इंङ्क्- इ अध्ययने" इति नित्यमधिपूर्वः, "पठ-पठ् व्यक्तायां वाचि" इतीह धातू । "सूत्रं सूचनकृत्" सूच्यते ग्रथ्यत इति सूत्रं पुं-क्लीबलिङ्गः, सूचनाद् वा "पुत्रादयः" [ उणा० ४४५. ] इति निपात्यते, सुवतीति वा "सूमूखन्युषिभ्यः कित्" [ उणा० ४४६. ] इति त्रट्, सूचनं करोति सूचनकृत् । "निरुक्तिः पदभञ्जनम्" वर्णागमादिभिः निर्वचनं निरुक्तिः, पदानि भज्यन्तेऽस्मिन्निति पदभञ्जनम्, भाष्यं सूत्रोक्तार्थप्रपञ्चकम् ।

अथ त-ध्वमावुदाहर्तुमवतारयति- **त-ध्वमौ तद्युष्मदीति** । **'व्रीहीन् वपत लुनीत पुनीतेत्येव'** इति ते स्वरूपतो धात्वर्थभेदे प्रयोगः, **'यतध्वे चेष्टध्वे समीहध्वे'** इति चानुप्रयोगः । त-ध्वमोर्विषये हि-स्वयोर्वा विधानादाह- **'व्रीहीन् वप लुनीहि पुनीहीत्येव'** इति प्रयोगः, अनुप्रयोगश्च **'यतध्वे चेष्टध्वे समीहध्वे'** इति, वैकल्पिकत्वात् पक्षे यथाप्राप्तमाह- **पक्षे- 'व्रीहीन् वपथ लुनीथ पुनीथेत्येव, यतध्वे चेष्टध्वे समीहध्वे'** इति । अथ कारकभेदेन धात्वर्थभेदे उदाहरति- **'ग्राममटत वनमटत गिरिमटतेत्येव'** इति प्रयोगः, **'अटथ घटध्वे'** इत्यनुप्रयोगः, विकल्पेन हिप्रवृत्तौ **'ग्राममट वनमट गिरिमटेत्येव, अटथ घटध्वे'** इति, वैकल्पिकत्वात् पक्षे यथाप्राप्तमाह- **पक्षे-'ग्राममटथ वनमटथ गिरिमटथेत्येव, अटथ घटध्वे'** इति ।

अथ ध्वममुदाहरति- **'सूत्रमधीध्वं निर्युक्तिमधीध्वं भाष्यमधीध्वमित्येव'** इति प्रयोगः, **'अधीध्वे पठथ'** इत्यनुप्रयोगः, वा स्वप्रवृत्तौ- **'सूत्रमधीष्व निर्युक्तिमधीष्व भाष्यमधीष्वेत्येव, अधीध्वे पठथ'** इति, पक्षे यथाप्राप्तमाह- **पक्षे- 'सूत्रमधीध्वे निर्युक्तिमधीध्वे भाष्यमधीध्वे इत्येव, अधीध्वे पठथ'** इति ।

अतिदिशति- **एवं वचनान्तरे त्रिकान्तरे विभक्त्यन्तरेऽप्युदाहार्यमिति**- एतच्च हि-स्वौ प्रत्येव ज्ञातव्यं न त-ध्वमौ प्रति तयोरेव घटनात् ।

पदकृत्यं पृच्छति- **सामान्यार्थस्येति किमिति**, उत्तरति- **व्रीहीन् वपे**त्यादिना, प्रथमेऽनुप्रयोगे स्वरूपत एव विशेषात् सामान्यार्थत्वाभावः, द्वितीये धात्वर्थस्य समानत्वेऽपि कारककृतभेदात् सामान्यार्थत्वाभाव इति भावः ।

सर्वविशेषप्रयोगनिवृत्त्यर्थमिदं वचनं, यदीदं नारभ्येत तदा यावद्भ्यो धातुभ्यः पञ्चमी विहिता तावतामेवानुप्रयोगः प्रसज्येत, ततस्तन्निवृत्त्यर्थमेमत् । ननु चान्तरेणापीदं वचनं लाघवात् सामान्यवचनस्यैवानुप्रयोगो भविष्यति, सर्वविशेषानुप्रयोगे ह्योदनं भुङ्क्ष्व सक्तून् पिब धानाः खाद इत्येवायं भुङ्क्ते पिबति खादतीति विशेषेष्वनुप्रयुज्यमानेषु गौरवं स्यादिति चेत् ? न- लाघवं लौकिके शब्दव्यवहारे नाद्रियते, यदि लौकिके शब्दव्यवहारे लाघवमाद्रियेत तदा तरुशब्दस्यैव प्रयोगः स्यात्, वनस्पतिशब्दप्रभृतयस्तूच्छिद्येरन् ॥ ५. ४. ४३. ॥

## निषेधेऽलं-खल्वोः क्त्वा । ५. ४. ४४. ॥

**त० प्र०- निषेधे वर्तमानयोरलं-खलुशब्दयोरुपपदयोर्धातोः क्त्वा प्रत्ययो वा भवति । अलं कृत्वा, खलु कृत्वा, न कर्तव्यमित्यर्थः; पक्षे यथाप्राप्तम्- अलं वत्स ! रोदनेन, अलं रुदितम्, क्त्वान्तयोग एव खलुशब्दो निषेधवाचीति पक्षे खलुशब्दो नोदाह्रियते । अन्ये तु- 'खलु कृतेन, खलु भोजनेन, खलु भोजनम्' इत्यप्युदाहरन्ति । निषेध इति किम् ? अलंकारः स्त्रियाः, सिद्धं खलु । अलं-खल्वोरिति किम् ? मा कारि भवता ॥४४॥**

**श० म० न्यासानुसन्धानम्- निषेधे०** । अलं-खलुशब्दयोरनेकार्थत्वेऽपीह निषेधार्थयोरेव ग्रहणमित्याह- **निषेधे वर्तमानयोरिति । क्त्वा प्रत्ययो वा भवतीति**- 'अव्ययकृतो भावे' इति वचनेन "क्त्वा तुमम् भावे" [ ५. १. १३. ] इति सूत्रेण च क्त्वाप्रत्ययस्य भावे विधानम्, भावे च- अनः क्तोऽन्ये च प्रत्यया विधीयन्ते, तेषामप्यवकाशाय पूर्वसूत्रात् नवाग्रहणमनुवर्त्य विकल्पेन क्त्वा प्रत्ययो विधीयते, अन्यथाऽत्र वाऽसरूप-

विधेर्निवर्तनेन नित्यमेव तेषां बाधः स्यात् । उदाहरति- **अलं कृत्वा, खलु कृत्वेति**- क्त्वः कित्वाद् गुणाभावः, निषेधार्थं सङ्क्रमयति- **न कर्तव्यमित्यर्थः** इति । अस्य वैकल्पिकत्वात् पक्षे किमित्याह- **पक्षे यथाप्राप्तमिति**, प्राप्तिश्च भावेऽनस्य क्तस्य चेत्याह- **अलं वत्स ! रोदनेनेति**- "रुदृक्- रुद् अश्रुविमोचे" अतो भावेऽनट्, "कृताद्यैः" [ २. २. ४७. ] इति तृतीया, रोदनेन किमित्यर्थः. **अलं रुदितमिति**- अत्र भावे क्तः, न रोदितव्यमित्यर्थः। अलंशब्दोपपदत्वे एवोदाहरणस्य तात्पर्यमाह- **क्त्वान्तयोग एव खलुशब्दो निषेधवाचीति पक्षे खलुशब्दो नोदाह्रियते** इति- खलुशब्दो निश्चयार्थो निषेधार्थकश्च, तत्र निषेधार्थकस्य क्त्वान्तेन सहाविनाभाव इति तं विना क्त्वाप्रत्ययसत्त्वेऽपि क्त्वाप्रत्ययं विना तस्यासत्त्वमेवेति क्त्वाप्रत्ययाभावे प्रत्ययान्तरं नोदाहृतमिति स्वमतम् । मतान्तरमाह- **अन्ये त्वित्यादि**- शास्त्रीयविधेयेन सह खलुशब्दस्य बहुशः प्रयोगेऽपि न चोदाहरणमादरणीयमिति भाष्यादिरीत्या प्रत्ययान्तरेण सह तस्य प्रयोगे बाधकाभाव इति तेषां मतम् । पदकृत्यं पृच्छति- **निषेध इति किमिति**, उत्तरयति- **अलंकारः स्त्रियाः** इति- अत्र भावे घञ्, भूषणवचनश्चालंशब्दः । **सिद्धं खलु** इति- अत्र भावे क्तः, खलुशब्दश्च निश्चयार्थकः । पुनः पृच्छति- **अलं-खल्वोरिति किमिति**, 'निषेधे' इत्येतावताऽपि तयोरुपपदत्वे सेत्स्यत्येवेति शङ्काशयः, निषेधार्थकमाङादियोगे मा भूदित्यावश्यकत्वं तयोरित्याशयेनोत्तरयति- **मा कारि भवतेति**- अत्रास्याप्रवृत्त्या माङा योगेऽद्यतनीत्यर्थः ॥ ५. ४. ४४. ॥

## परा-ऽवरे। ५. ४. ४५. ॥

**त० प्र०- परे अवरे च गम्यमाने धातोः क्त्वा वा भवति । अतिक्रम्य नदीं पर्वतः, नद्याः परः पर्वत इत्यर्थः; बाल्यमतिक्रम्य यौवनम् । अवरे- अप्राप्य नदीं पर्वतः, नद्या अर्वाक् पर्वत इत्यर्थः; अप्राप्य यौवनं बाल्यम् । नदी-पर्वतयोर्बाल्य-यौवनयोर्वा परावरत्वमात्रं प्रतीयते, अस्ति प्राप्यत इति वा, न द्वितीया क्रियेति तुल्यकर्तृकक्रियान्तराभावात् "प्राक्काले" [ ५. ४. ४७. ] इति न सिध्यतीति वचनम् । वाऽधिकाराद् यथाप्राप्तं च- नद्यतिक्रमेण पर्वतः, नद्यप्राप्त्या पर्वतः ॥४५॥**

**श० म० न्यासानुसन्धानम्- परेति** । **परे अवरे च गम्यमाने** इति- इहेमौ परावरशब्दौ सम्बन्धिशब्दौ, पूर्वं चापेक्ष्य परो भवति, परं चापेक्ष्यावरो भवति, सम्बन्धिशब्दाश्च नियतमेव प्रतियोगिनमुपस्थापयन्ति, तस्मात् सूत्रे यद्यपि विशिष्टप्रतियोगी न निर्दिश्यते तथापि पूर्वापरयोरेव परावराभ्यां योगो गम्यत इति विज्ञेयम् । उदाहरति- **अतिक्रम्य नदीं पर्वतः** इति- गङ्गादिनदीत उत्तरवासिनामुक्तिरियम्, तेषां कृते गङ्गामतिक्रम्य विन्ध्यादेः सत्त्वात्, नद्यतिक्रमणकर्तृदेशस्थः पर्वत इति वाक्यार्थः, स्वयं प्रयोगार्थमाह- **नद्याः परः पर्वत इत्यर्थः** । "क्रमू-क्रम् पादविक्षेपे" अतः क्त्वि ऊदित्त्वादिड्भावे "अतिरतिक्रमे च" [ ३. १. ४५.] इति समासे "अनञः क्त्वो यप्" [ ३. २. १५४. ] इति क्त्वो यबादेशे- 'अतिक्रम्य' इति । **बाल्यमतिक्रम्य यौवनमिति**- बाल्यात् परं यौवनमित्यर्थः । अवरे गम्ये उदाहर्तुमवतारयति- **अवरे** इति । उदाहरति- **अप्राप्य नदीं पर्वतः** इति- विन्ध्योत्तरवासिनामुक्तिरियम्, गङ्गाप्राप्तिविरहविशिष्टदेशस्थः पर्वत इति वाक्यार्थबोधात्, स्वयं प्रयोगार्थमाह- **नद्या अर्वाक् पर्वत इत्यर्थः** । **अप्राप्य यौवनं बाल्यमिति** प्रयोगः, बाल्यात् परं यौवनमिति तदर्थः । पूर्वत्र पर्वतात् पूर्वं नदीति प्रतीतिः, परपर्वतयोगो नद्या इति भावः, परत्र नद्याः पूर्वं पर्वत इति प्रतीतेः परनदीयोगः पर्वतस्य प्रतीयत इति पूर्वेण परस्य परेण च पूर्वस्य योगः स्पष्टः । नन्वत्र क्रियान्तरस्याध्याहार आवश्यक इति समानकर्तृकक्रियान्तरसत्त्वात् "प्राक्काले" [ ५. ४. ४७. ] इत्यनेनैव सिद्धेरेतत् सूत्रं व्यर्थमित्याशङ्कायामाह- **नदीपर्वतयोर्बाल्ययौवनयोर्वे**त्यादिना, तथा च द्वितीयक्रियाया अवश्यप्रयोगसत्त्व एव तस्य प्राप्तिः, इह च क्रियान्तरं विनाऽपि बोधे बाधकाभावात् न तस्य प्राप्तिरिति सूत्रमिदमावश्यकमिति भावः । वस्तुतस्तु- अत्र देशकृतमेव पूर्वत्वं परत्वं वा प्रतीयते, न कालकृतमिति "प्राक्काले" इत्यस्य प्राप्तिरेव नास्ति, कालिकपूर्वत्वविवक्षायामेव तस्य प्रवृत्तेरिष्टत्वात्, एवं च नद्यतिक्रमणकालानन्तरं पर्वतस्थितिकालः, नदीप्राप्तिविरहविशिष्टकालानन्तरं पर्वतस्थितिकाल इति वाक्यार्थं मत्वा प्रश्नः, 'तुष्यतु दुर्जन' न्यायेन तदनुकूलमेव समाधानं कृत्वा कथञ्चिद् वृत्तिग्रन्थः समर्थनीय इति प्रतिभाति । विक-

ल्पाधिकारप्रयोजनमाह–**वाऽधिकाराद् यथाप्राप्तं चे**ति, तदेव विशदयति– **नद्यतिक्रमेण पर्वतः, नद्यप्राप्त्या पर्वतः** इति– अत्र भावे घञ् क्तिश्च ॥ ५. ४. ४५. ॥

## निमील्यादिमेङस्तुल्यकर्तृके । ५. ४. ४६. ॥

**त० प्र०– तुल्यो धात्वर्थान्तरेण कर्ता यस्य स तुल्यकर्तृकस्तस्मिन्नर्थे वर्तमानेभ्यो निमील्यादिभ्यो मेङश्च धातोः संबन्धे सति क्त्वा वा भवति । निमील्यादीनां समानकालार्थो मेङस्तु परकालार्थ आरम्भः । स्वभावात् मेङ् व्यतिहार एव वर्तते । अक्षिणी निमील्य हसति, मुखं व्यादाय स्वपिति, पादौ प्रसार्य पतति, दन्तान् प्रकाश्य जल्पति, शिशुरयं मातरं भक्षयित्वोपजातः । मेङ्– अपमाय अपमित्य याचते, अपमातुं प्रतिदातुं याचत इत्यर्थः, पूर्वं ह्यसौ याचते पश्चादपमयत इति । याचेस्तु पूर्वकालेऽपि क्त्वा न भवति मेङः परकालभाविन्या क्त्वया याचिप्राक्कालस्योक्तत्वात् । पक्षे– याचित्वाऽपमयते, अपमातुं याचते । तुल्यकर्तृक इति किम् ? चैत्रस्याक्षिनिमीलने मैत्रो हसति, चैत्रस्यापमाने मैत्रो याचते ॥४६॥**

**श० म० न्यासानुसन्धानम्– निमील्या०** । इह धात्वधिकारगते धातुसम्बन्धिनि कार्ये समानकर्तृकत्वं क्रिययोरेव सम्भवतीत्याशयेनाह– **तुल्यो धात्वर्थान्तरेणे**ति– तुल्यत्वं च भेदनियतमिति क्रियान्तरसत्त्वमावश्यकमिति भावः । **यस्ये**त्यन्यपदार्थेनापि धात्वर्थ एव गृह्यत इति तादृशेऽर्थे वर्तमानत्वं निमील्यादीनां मेङश्चावश्यकम् । "प्राक्काले" इत्यग्रिमसूत्रेणैव सिद्धेरस्य वैयर्थ्यमाशङ्क्योत्तरयति– **निमील्यादीनां समानकालार्थः** इति– अक्षिणी निमील्य हसतीत्यत्र हसन-नेत्रमीलनयोः [ यदैव हसति तदैव संमीलयतीति ] समानकालत्वेन पूर्वकाले कस्यापि धात्वर्थस्याभावादप्राप्तिः । **मेङश्च परकालार्थ आरम्भः** इति– 'अपमित्य याचते' इत्यत्र च पूर्वं याचते पश्चादपमयते– प्रतिददातीत्यर्थात् परकालभाव्यर्थकादेव धातोः प्रत्ययो विधीयत इति तत्रापि न परसूत्रेण प्राप्तिरिति सूत्रमिदमावश्यकमिति भावः । परैर्व्यतिहार एव मेङः क्त्वा विधीयते तदर्थं च व्यतिहारग्रहणं क्रियते, स्वे तन्त्रे च व्यतिहारग्रहणाभावेऽपि तदर्थं प्रत्ययविधिं स्वभावतः समर्थयते– **स्वभावात् मेङ् व्यतिहारे वर्तते** इति– अपपूर्वकस्यापि तस्य व्यतिहार एव प्रयोगात् न व्यतिहारग्रहणमावश्यकमिति भावः ।

पाणिनीये तन्त्रे "उदीचां माङो व्यतीहारे" [ ३. ४. १९. ] इति सूत्रे व्यतीहारग्रहणं क्रियते, तत्रोक्तं भाष्ये– "उदीचां मेङ इति व्यतीहारग्रहणं न कर्तव्यं भवति । किं कारणम् ? । तद्विषयो हि सः । व्यतीहारविषय एव मयतिः ।" इत्युक्त्वा सानुबन्धकस्य कृतात्त्वस्य ग्रहणं नानुबन्धकृतमसारूप्यमिति ज्ञापनायावश्यकमिति मेङो व्यतीहारविषयस्य ग्रहणार्थं तदावश्यकमित्युक्तम् ।

उदाहरति– **अक्षिणी निमील्य हसती**ति– "मील निमेषणे" निमेषणं संकोचः, अतोऽनेन क्त्वि "ऊर्या०" [ ३. १. २. ] इति नेर्गतिसंज्ञायां "गति-कन्य०" [ ३. १. ४२. ] इति समासे क्त्वो यबादेशे च– निमील्येति, यदैव हसति तदैव नयनयुगलं संमीलयतीति नास्तीह पूर्वकालता, एवं– **मुखं व्यादाय स्वपिती**ति– अनेन व्याङ्पूर्वाद् ददातेः क्त्वि पूर्ववत् गतिसंज्ञा-समास-यबादेशेषु– व्यादायेति, यदैव स्वपिति तदैव मुखं व्याददातीति न पूर्वकालता । **पादौ प्रसार्य पतती**ति– "सृं– सृ गतौ" अतो णिगि– सारि, ततोऽनेन क्त्वि णेर्लोपे प्राग्वत् शेषकार्ये– प्रसार्येति, यदैव पतति तदैव पादौ प्रसारयतीति न पूर्वकालता । एवं– **दन्तान् प्रकाश्य जल्पती**ति– "काशृक्– काश् दीप्तौ" अतो ण्यन्तादनेन क्त्वि– प्रकाश्येति, यदैव जल्पति तदैव दन्तान् प्रकाशयतीति न पूर्वकालता । **शिशुरयं मातरं भक्षयित्वोपजातः** इति– यदैवायमुपजातस्तदैव मातरं भक्षयतीति न पूर्वकालता, इति निमील्यादिः ।

अथ मेङमुदाहर्तुमवतारयति– **मेङ्** इति । **अपमाय अपमित्य याचते** इति– "मेङ् मे प्रतिदाने" प्रतिदानं प्रत्यर्पणम्, अतोऽनेन क्त्वि तस्य यबादेशे "मेङो वा मित्" [ ४. ३. ८८. ] इति वा 'मित्' इत्यादेशे– अपमित्य, पक्षे "आत् सन्ध्यक्षरस्य" [ ४. २. १. ] इत्यात्वे– अपमाय, प्रयोगार्थमाह– **अपमातुं प्रतिदातुं याचत इत्यर्थः** इति, नन्वत्र य एवापमयतेः कर्ता स एव याचतेरपीति तुल्यकर्तृकत्वं तथा भिन्नकालत्वमपीति "प्राक्काले" इत्यनेनैव सेत्स्यतीति चेत् ? अत्राह– **पूर्वं ह्यसौ याचते पश्चादपमयतेरि**ति– अपमयतेर्नास्ति पूर्वकालतेति नोत्तरेण प्राप्तिरित्यप्राप्त एव क्त्वा विधीयत इति भावः । अस्तु नामात्रानेन विधानं किन्तु पूर्वकाल-

वृत्तियाचनार्थवाचकाद् याचेः "प्राक्काले" इत्युत्तरेण क्त्वाप्रत्ययः कुतो नेत्याशङ्कायामाह– **याचेस्तु पूर्वकालेऽपि क्त्वा न भवतीति**, तत्र बीजमाह– **मेङः परकालभाविन्या क्त्वया याचिप्राक्कालस्योक्तत्वादिति**, अयमाशयः– एकेन परकालार्थस्योक्ततयाऽर्थत एवापरस्यपूर्वकालत्वं गम्यत इति तत्र * उक्तार्थानामप्रयोगः * इति न्यायप्रसरस्य निराबाधत्वम् । यदा च न परकालबोधकः प्रत्ययस्तदा पूर्वकालप्रतीतये स्यादेव याचेः क्त्वेत्याह– **पक्षे– याचित्वाऽपमयते, अपमातुं याचते** इति– परेण क्त्वाया अपि विकल्पेन विधानात् तदभावे भावे तुमित्यर्थः । 'तुल्यकर्तृके' इत्यस्यानुवृत्तेरुत्तरत्रावश्यकत्वेऽपीहाप्यावश्यकत्वं द्योतयितुमाशङ्कते– **तुल्यकर्तृक इति किमिति**, उत्तरयति– **चैत्रस्याक्षिनिमीलने मैत्रो हसतीति**– अत्र सति सप्तमी, अकारणं नेत्रनिमीलनं हष्टेति तात्पर्यम्, अत्र नेत्रनिमीलनकर्ताऽन्यो हासकर्ता चान्य इति भिन्नकर्तृकत्वान्न भवतीति भावः । एवं– **चैत्रस्यापमाने मैत्रो याचते** इत्यत्रापि विज्ञेयमिति ॥ ५. ४. ४६. ॥

## प्राक्काले । ५. ४. ४७. ॥

**त० प्र०–परकालेन धात्वर्थेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे क्त्वा वा भवति । आसित्वा भुङ्क्ते, भुक्त्वा व्रजति, भुक्त्वा पुनर्भुङ्क्ते, स्नात्वा भुक्त्वा पीत्वा व्रजति; पक्षे-आस्यते भोक्तुमित्यपि भवति । तुल्यकर्तृक इत्येव– भुक्तवति गुरौ शिष्यो व्रजति । प्राक्काल इति किम् ? भुज्यते पीयते चानेन । अथ 'यदयनेन भुज्यते ततोऽयं पचति; यदनेनाधीयते ततोऽयं शेते' इत्यत्र कथं क्त्वा न भवति ? उच्यते– यत्र यच्छब्देन सह ततःशब्दः प्रयुज्यते तत्र ततःशब्देनैव प्राक्कालताऽभिधीयत इत्युक्तार्थत्वात् क्त्वा न भवति । 'यदनेन भुक्त्वा गम्यते ततोऽयमधीते' इत्यत्र तु भोजन-गमनयोः क्रमे क्त्वा, गमनाऽध्ययनयोस्तु ततःशब्देन क्रमस्याभिधानात् गमेर्न भवति । "प्राक्काले" इत्युत्तरत्र यथासंभवमभिधानतोऽनुवर्तनीयम् ॥४७॥**

**श० म० न्यासानुसन्धानम्– प्राक्काले** इति । **प्राक्काले** इति– प्राक् पूर्वः कालः समयोऽस्येति बहुव्रीहिः, तस्मिंस्तथा, इदं 'तुल्यकर्तृके' इत्यनुवृत्तस्य विशेष्यस्य विशेषणम्, तच्च परमेवापेक्षेत पूर्वपरयोरेव परस्परापेक्षादर्शनात् । तथा चाह– **परकालेन धात्वर्थेनेति** । उदाहरति– **आसित्वा भुङ्क्ते** इति– "आसिक्– आस् उपवेशने" अतोऽनेन क्त्वि– आसित्वा, आसनभोजनयोः समानकालत्वेऽप्यासनस्य भोजनात् पूर्वमारब्धत्वेन प्राक्कालत्वमवसेयम्, एवमन्यत्रापि वर्तमानक्रियाद्वयस्थले योजनीयम् । ननु शक्तिः कारकम्, अन्या च पूर्वकालक्रियायाः शक्तिः, अन्या चोत्तरकालक्रियायाः, तत् कुतः समानकर्तृत्वं विज्ञायत इति चेत् ? शक्ति-शक्तिमतोर्भेदस्याविवक्षितत्वात् तुल्यकर्तृकत्वाक्षतेः । अयमाशयः–यश्च शक्त्याधारो या च शक्तिस्तयोरिह भेदो न विवक्षितः, तेन शक्त्याधार एक एव देवदत्तः कर्ता, स चोभयोरपि क्रिययोरेक एवेति युक्तं तुल्यकर्तृत्वमिति । वर्तमानकालिकक्रिययोरेकस्यां पूर्वकालतां प्रतिपाद्याथ भिन्नकालिकक्रिययोरेकस्यां पूर्वकालिकत्व उदाहरति– **भुक्त्वा व्रजतीति** । अथैकस्यामेव क्रियायां कालभेदेन भिन्नायां पूर्वकालिकत्वे उदाहरति– **भुक्त्वा पुनर्भुङ्क्ते** इति । 'तुल्यकर्तृके' इत्यत्रैकवचनस्य नान्तरीयकतया समुच्चारणेन तस्याविवक्षितत्वाद् बह्वीनामपि तुल्यकर्तृकाणामपि क्रियाणां सत्त्वे प्रयोगो भवतीत्याह– **स्नात्वा भुक्त्वा पीत्वा व्रजतीति**– तुल्यकर्तृकपदस्य समानकर्तृकक्रियान्तरापेक्षं पौर्वकाल्यं यस्यास्तादृशक्रियाप्रतिपादनमात्रे तात्पर्यं न तु क्रियागतसंख्यायाम्, अतोऽनेकक्रियास्वपि प्रत्ययो भवतीति भावः । नवेत्यनुवृत्तेः प्रयोजनमाह–**पक्षे–आस्यते भोक्तुमित्यपि भवतीति**– इदं प्रथमोदाहरणमाश्रित्योक्तमेवमन्योदाहरणेऽपि यथासम्भवमवसेयम् । ननु यदा क्त्वोऽभावे 'आस्यते भोक्तुम्' इत्यत्र वर्तमाना भवति तदा 'आसित्वा भुङ्क्ते' इत्यत्र भुजेस्तुम् कस्मान्न भवतीति चेदत्रोच्यते– यदा त्वासेः क्त्वा भवति तदा तुम् न भवति, अनभिधानात्; नह्यासित्वा भोक्तुमित्याद्यभिधानमस्ति, तस्माद् त्यादय एव भुजेर्भवन्ति–आसित्वा भुङ्क्ते इति । अयमाशयः– तुमन्तार्थस्य स्वार्थफलकक्रियां प्रति विशेषणत्वमिति नियमः, क्त्वान्तार्थस्य स्वोत्तरकालक्रियां प्रति विशेषणत्वमिति च नियमः, तथोभयोर्विशेषणतया गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यादिति न्यायेन परस्परमसम्बन्धान्नैकदा द्वयोः प्रयोगः सम्भवतीति । **'तुल्यकर्तृके' इत्यनुवृत्तेर्व्यावर्त्यं दर्शयति–तुल्यकर्तृक इत्येव–**

**भुक्तवति गुरौ शिष्यो व्रजतीति**– यद्यप्यत्र भोजनगमनयोः पौर्वापर्यमस्ति तथापि भुजिक्रियाया गुरुः कर्ता, व्रजतिक्रियायास्तु शिष्यः कर्तेति समानकर्तृकत्वाभावान्न भवतीति भावः । पदकृत्यं पृच्छति– **प्राक्काल इति किमिति**, उत्तरयति– **भुज्यते पीयते चानेनेति**– अत्र क्रियाद्वयसद्भावेऽपि न पौर्वापर्यविवक्षेति न भवतीति भावः। सत्यपि प्राक्कालत्वे क्वचिन्न भवति तत् कस्मादिति शङ्कते– अथ **'यदनेन भुज्यते ततोऽयं पचति, यदनेनाधीयते ततोऽयं शेते'** इत्यत्र **कथं न क्त्वा भवतीति**, समाधत्ते– **उच्यते** इति, अयमाशयः– प्राक्काल्ये द्योत्ये क्त्वा विधीयते न तु तद्विषयतायाम्, तथा च प्राक्कालस्य ततश्शब्देनाभिहितत्वाद् द्योत्याभावाद् द्योतकः क्त्वा प्रत्ययो न भवतीति । ननु ततश्शब्देनोक्ते वाक्ये यदि न भवति तर्हि **'यदनेन भुक्त्वा गम्यते ततोऽयमधीते'** इति वाक्ये कथं क्त्वान्तस्य प्रयोग इति चेत् ? अत्राह– **भोजनगमनयोः क्रमे क्त्वेति**. अयमाशयः– यद्विषयकमेव प्राक्काल्यमुक्तं स्यात् तत्रैव क्त्वाप्रत्ययो न स्यात्, न तु तादृशे वाक्ये एव क्त्वाप्रत्ययान्तप्रयोगोऽयुक्त इति स्वमतम्, तथा चोक्तवाक्ये ततश्शब्देन गमनाध्ययनयोरेव पौर्वापर्यमुक्तं न तु भोजनगमनयोरिति गमनापेक्षया भोजनस्य पौर्वकाल्ये द्योत्ये स्यादेव क्त्वाप्रत्यय इति । ययोस्तु पौर्वकाल्यमनुक्तं तत्र स्यादेवेत्याह– **गमनाध्ययनयोस्त्वि**त्यादिना । पूर्वं भुङ्क्ते पश्चाद् व्रजतीत्यत्र तु स्वशब्देनोक्तत्वान्न भवति, अत्रायमाशयः– पूर्वशब्देनैव पौर्वकाल्यमभिहितमित्युक्तार्थत्वान्न भवतीति । ननु "पूर्वाग्रेप्रथमे" [ ५. ४. ४९. ] इति परसूत्रेण कस्मान्न भवति तस्य पूर्वशब्दयोगेऽपि प्रवृत्तेरिति चेत् ? न– पूर्वादीनां साधनपौर्वकाल्यविषयाणां तत्र ग्रहणात्, अत्र हि पूर्वशब्देन क्रियायाः पौर्वकाल्यमुच्यते न साधनस्य, अत एव पूर्वं भुक्त्वा ततो व्रजतीत्यत्र भवत्येव क्त्वा, तत्र हि भुजेः पूर्वकालता– भोक्तृरूपसाधनसाध्या, द्विविधा हि पूर्वकालता– व्रजिक्रियापेक्षा एका, भोक्त्रन्तरसाध्यभुजिक्रियापेक्षा द्वितीया, तत्र प्रथमायामनेन क्त्वाप्रत्ययो भवति, द्वितीयां पूर्वकालतां पूर्वादयः शब्दाः कथयन्ति, ततश्च भोक्तृगतभोक्त्रन्तरसापेक्षपूर्वतायां पूर्वादिशब्दैरुक्तायामपि व्रजिक्रियापेक्षायां पूर्वकालतायामग्रिमसूत्रे ख्णम् विकल्पेन विधास्यते । तत्सूत्रव्याख्यायामेव चैतत् स्पष्टीभविष्यतीतीह विरम्यते ॥ ५. ४. ४७. ॥

---

## ख्णम् चाभीक्ष्ण्ये । ५. ४. ४८. ॥

**त० प्र०– आभीक्ष्ण्यविशिष्टे परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धि ख्णम्, चकारात् क्त्वा च भवति । भोजं भोजं व्रजति, भुक्त्वा भुक्त्वा व्रजति; पायं पायं गच्छति, पीत्वा पीत्वा गच्छति; अग्रे भोजं भोजं व्रजति, अग्रे भुक्त्वा भुक्त्वा व्रजति । अत्र क्त्वा-ख्णमोर्हिस्वादिवत् प्रकृत्यर्थोपाधिद्योतने सामर्थ्यं नास्तीत्याभीक्ष्ण्याभिव्यक्तये द्विर्वचनं भवति । इह कस्मात् ख्णम् न भवति-यदयं पुनः पुनर्भुक्त्वा व्रजति, अधीते एव ततः परम्, आभीक्ष्ण्यस्य स्वशब्देनैवोक्तत्वात् । क्त्वापि तर्हि न प्राप्नोति ? मा भूदाभीक्ष्ण्ये, प्राक्काल्ये भविष्यति । वाऽधिकारेणैव पक्षे क्त्वाप्रत्ययस्य सिद्धौ चकारेण तस्य विधानं वर्तमानादिप्रत्ययान्तरनिषेधार्थम् । ननु क्त्वादिभिर्भावे विधीयमानैः कर्तुरनभिहितत्वादोदनं पक्त्वा भुङ्क्ते देवदत्त इत्यादिषु कर्तरि तृतीया प्राप्नोति, नैवम्–भुजिप्रत्ययेनैव कर्तुरभिहितत्वान्न भवति 'प्रधानशक्त्यभिधाने हि गुणशक्तिरभिहितवत् प्रकाशते' इति । खित्वं 'चौरंकारमाक्रोशति, खादुंकारं भुङ्क्ते' इत्युत्तरार्थम् ॥४८॥**

---

**श० म० न्यासानुसन्धानम्– ख्णम्०** । 'आभीक्ष्ण्ये' इति पदेन सह 'प्राक्काले' इत्यस्य सम्बन्धार्थमाभीक्ष्ण्यपदस्य मत्वर्थीयात्प्रत्ययान्तत्वमाश्रित्य तद्वैशिष्ट्यपरत्वेन व्याख्याति– **आभीक्ष्ण्यविशिष्टे** इति । **'प्राक्काले'** इत्यस्य प्राक्कालविशिष्टार्थपरत्वम्, तथा चाभीक्ष्ण्यविशिष्टे प्राक्कालविशिष्टार्थे धातोर्वर्तमानत्वमिह निमित्तमिति भावः । 'ख्णम्' इत्यत्र 'अम्' अवशिष्यते, खकारणकारौ चानुबन्धौ, एतस्मिन् परे "लघोरुपान्त्यस्य" [ ४. ३. ४. ] इति गुणे च– **भोजं भोजं व्रजतीति**, क्त्वः कित्त्वाद् गुणाभावे– **भुक्त्वा भुक्त्वा व्रजतीति**– पौनःपुन्यविशिष्टभोजनान्तरपरकालिकगमनाश्रयो देवदत्त इत्यादिबोधप्रकारः । "पां– पा पाने" अतः ख्णमि "आत ऐः०" [ ४. ३. ५३. ] इत्यात ऐकारे तस्यायादेशे च– **पायं पायं गच्छतीति**, क्त्वि तु "ईर्व्यञ्जने०" [ ४. ३. ९७. ] इत्यात ईकारे– **पीत्वा पीत्वा गच्छतीति** । 'अग्रे'शब्देन

योगेऽप्याभीक्ष्ण्येऽस्य प्रवृत्तिरित्याह– **अग्रे भोजं भोजं व्रजति, अग्रे भुक्त्वा भुक्त्वा व्रजती**ति । सर्वत्राभीक्ष्ण्ये द्वित्वम् । ननु प्रत्ययेनैवाभीक्ष्ण्यस्योक्तत्वात् तत्र द्वित्वं न स्यादित्याशङ्कायामाह– **अत्र क्त्वा-णमोर्हि-स्वादिवत् प्रकृत्यर्थोपाधिद्योतने सामर्थ्यं नास्तीत्याभीक्ष्ण्याभिव्यक्तये द्विर्वचनं भवती**ति– हि-स्वयोर्यथाद्वित्वं विना नाभीक्ष्ण्यद्योतकत्वं समुपपद्यते शब्दशक्तिस्वाभाव्यात्, उपपादितं च तत् तद्विधायकसूत्रव्याख्यायामेव, तथा च क्त्वा-णमोरप्याभीक्ष्ण्यव्यभिचारस्य दृष्टत्वान्न तयोर्नैयत्येनाभीक्ष्ण्यद्योतकत्वमिति तद्द्योतनाय द्वित्वमावश्यकमिति भावः । अनुक्ते एवाभीक्ष्ण्यार्थे भवतीति बोधनाय शङ्कते–**इह कस्मात् णम् न भवति–'यदयं पुनः पुनर्भुक्त्वे**ति, अनभिहितत्वाभावादित्युत्तरयति– **आभीक्ष्ण्यस्य स्वशब्देनैव द्योतितत्वादि**ति–स्वस्य-आभीक्ष्ण्यार्थस्य वाचकः शब्दः पुनःपुनःशब्दस्तेनेत्यर्थः । ननु यथा णमनेनाभीक्ष्ण्ये विहितस्तथा क्त्वाऽपि सन्नियोगशिष्टत्वेनोभयोरेकार्थत्वौचित्यात्, तथा च णमोऽभावे क्त्वापि मास्त्विति शङ्कते– **क्त्वाऽपि तर्हि न प्राप्नोती**ति । परोक्तं स्वीकृत्योत्तरयति– **मा भूदाभीक्ष्ण्ये, प्राक्काल्ये भविष्यती**ति– पूर्वसूत्रेणेति शेषः । **वाऽधिकारेणैवे**ति, अयमाशयः– पूर्वतो नवेत्यस्यानुवर्तनाद् विकल्पेन खण्मो विधाने पक्षे प्राक्कालमात्रार्थे क्त्वा भविष्यत्येवेति तद्विधानाय चकारो यद्यपि नावश्यकस्तथापि क्त्वाप्रत्ययस्यापि पाक्षिकत्वेन तेन मुक्ते 'आस्यते भोक्तुम्' इत्यादिवत् पक्षे वर्तमानापि स्यादिति तन्निवृत्तये चकारेण क्त्वाप्रत्ययस्य विशिष्य विधानमाश्रीयते, तत्सामर्थ्याच्च पूर्वानुसृतस्य विकल्पस्य बाधेन तावेव भवतो न वर्तमानादिरिति । शङ्कते– **ननु क्त्वादिभिर्भावे विधीयमानै**रित्यादिना **तृतीया प्राप्नोती**त्यन्तेन, अयमाशयः– इह द्वौ धातू– पचिर्भुजिश्च, तत्र भुजेः कर्तृत्वं वर्तमानयाऽभिहितमिति तदपेक्षया यदि कर्तरि देवदत्ते प्रथमा, तर्हि पचिनिरूपितं कर्तृत्वमनुक्तमिति तदपेक्षया तत्र तृतीया प्राप्नोत्येव, तथा च तत्र विनिगमकाभावात् कदाचित् पक्त्वा भुङ्क्ते देवदत्त इति, कदाचिच्च देवदत्तेन भाव्यमिति । उत्तरयति– **नैवमि**त्यादिना, **अभिहितवत् प्रकाशते** इति, अयमाशयः– अस्तु नाम पचिनिरूपितकर्तृत्वमनुक्तं तथापि वाक्ये एकैव क्रिया प्रधानम्, सा चाख्यातक्रियैव, प्रधानानुगामिना चाप्रधानेन भवितव्यम्, तथा च यदि भुजिक्रियायाः प्रधानभूतायाः कर्ता उक्तस्तर्हि गुणभूतायाः पचिक्रियाया अपि कर्ता अभिहितवदेव भासते । किञ्च न केवलं कर्तृविषय एवेदमपि तु कारकान्तरेऽपि समानम्, तथाहि– भुजेः कर्मणि प्रत्यये कर्मण उक्तत्वेन पचिनिरूपितमपि कर्मत्वमुक्तमेवेति तत्र पक्त्वौदनो भुज्यते देवदत्तेनेत्येव भवति, न तु पचिनिरूपितमोदनस्य कर्मत्वनिबन्धनं द्वितीयान्तत्वमिति ।

खकारस्य प्रयोगेऽश्रवणादानर्थक्यमाशङ्कयाह– **खित्त्व 'चौरंकारमाक्रोशति, स्वादुंकारं भुङ्क्ते' इत्युत्तरार्थमि**ति, णमः खित्त्वस्य प्रकृतसूत्रे प्रयोजनाभावेऽप्युत्तरत्रानुवर्तमानस्य तस्य खित्त्वस्य प्रयोजनमस्त्येव, यथा– "शापे व्याप्यात्" [ ५. ४. ५२. ] इत्यनेन णमि चौरंकारमाक्रोशतीति भवति, अत्र खित्त्वात् "खित्यनव्यायरुषो मों०" [३. २. १११.] इत्यनेन मागमे तस्यानुस्वारे च– चौरंकारमिति, करोतिरिहोच्चारणे, चौरं कृत्वा– चौरशब्दमुच्चार्य आक्रोशति, चौरोऽसीत्याक्रोशतीत्यर्थः । एवं "स्वाद्वर्थाददीर्घात्" [ ५. ४. ५३. ] इत्यनेन णमि मागमे च– 'स्वादुंकारं भुङ्क्ते' इति सिध्यति, उभयत्र ङस्युक्तसमासः । णकारस्तु वृद्धयाद्यर्थ इति तु प्रागुक्तमेव ॥ ५. ४. ४८. ॥

## पूर्वा-ऽग्रे-प्रथमे । ५. ४. ४९. ॥

**त० प्र०– 'पूर्व अग्रे प्रथम' इत्येतेषूपपदेषु परकालेन तुल्यकर्तृके प्राक्कालेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे णम् वा भवति । अनाभीक्ष्ण्यार्थं वचनम् । पूर्वं भोजं व्रजति, पूर्वं भुक्त्वा व्रजति । अग्रे भोजं व्रजति, अग्रे भुक्त्वा व्रजति । प्रथमं भोजं व्रजति, प्रथमं भुक्त्वा व्रजति । वर्तमानादयोऽपि– पूर्वं भुज्यते ततो व्रजति, अग्रे भुज्यते ततो व्रजति, प्रथमं भुज्यते ततो व्रजति । पूर्वादयश्चात्र व्यापारान्तरापेक्षे प्राकाल्ये, व्रज्यापेक्षे तु क्त्वा-ण्मावित्ति नोक्तार्थता, ततश्चायमर्थोऽन्यभोक्तृभुजिक्रियाभ्यः स्वक्रियान्तरेभ्यो वा पूर्वं भोजनं कृत्वा व्रजतीत्यर्थः । पूर्वप्रथमसाहचर्यात् अग्रेशब्दः कालवाची ॥४९॥**

**श० म० न्यासानुसन्धानम्**– पूर्वा० । पूर्वेणैव सिद्धे सूत्रस्य वैयर्थ्यमाशङ्कयाह–**अनाभीक्ष्ण्यार्थं वचनमि**ति–

पूर्वसूत्रस्याभीक्ष्ण्य एव प्रवृत्तिरिति तद्रहिते पूर्वं भुक्त्वा व्रजतीत्यादौ न स्यादिति तत्र विधानार्थं सूत्रमिदमिति भावः। उदाहरति– **पूर्वं भोजं व्रजती**ति– अत्र णमि उपान्त्यगुणः, अस्य वैकल्पिकत्वात् पक्षे क्त्वि क्त्वि किस्वाद् गुणाभावे– **पूर्वं भुक्त्वा व्रजती**ति, अत्राभीक्ष्ण्याभावान्न द्वित्वम्। एवम्–अग्रे-प्रथमयोरुपपदत्वेऽपि ज्ञेयम्। क्त्वोऽपि वैकल्पिकत्वात् तन्मुक्ते वर्तमानादयोऽपि भवन्तीत्याह– **वर्तमानादयोऽपी**ति, **पूर्वं भुज्यते ततो व्रजती**त्यादिना। अत्र पूर्वादिशब्दैरेव प्राक्कालस्योक्ततया तद्बोधकौ प्रययाविमौ न स्त इत्याशङ्कां वारयति– **पूर्वादयश्चात्र व्यापारान्तरापेक्षे प्राक्काल्ये** इति, अयमाशयः– प्रागादयः शब्दाः सापेक्षाः, पूर्वं परं चावधिमपेक्षन्ते, यद्यपि तत्र पूर्वोऽवधिर्नापेक्षितः केवलं परावधिरेवापेक्ष्यते, तथापि तत्र न सर्वतः पूर्वत्वमपि तु स्वपरस्थितादेवेति ज्ञानाय पूर्वोऽप्यवधिरपेक्षित एव, किञ्च, उपात्तोऽनुपात्तश्चेति द्विविधोऽवधिः, यथा पाटलिपुत्रात् पूर्वो राजगिरिरित्युक्ते काश्या अपि तस्य पूर्वत्वमायातमेव, एवमिहापि भोजन**स्य** न केवलं व्रजनापेक्षया पूर्वत्वमपि तु व्यापारान्तरापेक्षयाऽपि। किञ्च न केवलं स्वव्यापारापेक्षया पूर्वत्वमपि तु कर्त्रन्तरव्यापारापेक्षयाऽपि, तथाहि– देवदत्तजिनदत्तगुरुदत्तेषु जिगमिषुषु मध्ये देवदत्तः पूर्वं भुक्त्वा व्रजतीत्युक्तौ कर्त्रन्तरापेक्षमपि पूर्वत्वं प्रतीयत एव, ततश्च पूर्वशब्दः स्वव्यापारान्तरापेक्षया कर्त्रन्तरगतभोजनापेक्षया च पूर्वत्वस्य प्रतिपादनाय पूर्वशब्दः प्रयुक्तो व्रजनापेक्षया पूर्वत्वं बोधयितुमसमर्थ इति तद्बोधनाय क्त्वाणमौ भवत इति भावः। तदाह– **ततश्चायमर्थं** इत्यादिना। अग्रेशब्दस्याग्रावयवाधिकरणार्थबोधकत्वस्यापि दृष्टत्वेनेह तस्य ग्रहणं नवेत्याशङ्कायामाह–**पूर्वप्रथमसाहचर्या**दिति–यद्यपि पूर्वशब्दः पूर्वदेशवाचकोऽपि न केवलं कालवाचक एव, एवं प्रथमशब्दोऽपि 'अ-पर'व्यक्तिदेशादिपरोऽपि, तथापि प्राक्कालाधिकारात् कालपरावेव तौ गृह्येते, तथा च कालवाचकाभ्यां ताभ्यां साहचर्यात् कालवाचक एव 'अग्रे'शब्दोऽपि ग्रहीतव्य इति तात्पर्यम् ॥५.४.४९.॥

## अन्यथैवंकथमित्थमः कृगोऽनर्थकात्
॥ ५. ४. ५०. ॥

**त० प्र०–एभ्यः परात् तुल्यकर्तृकेऽर्थे वर्तमानात् करोतेरनर्थकात् धातोः संबन्धे णम् वा भवति। अन्यथाकारं भुङ्क्ते, एवंकारं भुङ्क्ते, कथंकारं भुङ्क्ते, इत्थंकारं भुङ्क्ते; पक्षे क्त्वैव-अन्यथा कृत्वा, एवं कृत्वा, कथं कृत्वा, इत्थं कृत्वा भुङ्क्ते। एवमुत्तरत्रापि। आनर्थक्यं करोतेरन्यथादिभ्यः पृथगर्थाभावात्। यावदुक्तं भवति 'अन्यथा भुङ्क्ते' तावदुक्तं भवति 'अन्यथाकारं भुङ्क्ते' इति। अनर्थकादिति किम्? अन्यथा कृत्वा शिरो भुङ्क्ते, अत्रान्यथाशब्दः शिरःप्रकारे, करोतेश्च शिरः कर्म, तन्न करोतिना विना गम्यत इति ॥५०॥**

**श० म० न्यासानुसन्धानम्– अन्य०**। उदाहरति– **अन्यथाकारं भुङ्क्ते** इति– कृधातोः णमि वृद्धावारादेशे ङस्युक्तसमासे च– अन्यथाकारमिति, अस्य वैकल्पिकत्वात् पक्षे किमित्याह– **पक्षे– क्त्वैवे**ति– एवकारेण वर्तमानादिव्यवच्छेदः। **अन्यथा कृत्वे**ति–क्त्वि किस्वाद् गुणाभावे "ह्रस्वस्य तः पित्कृति" [ ] इति तागमे– कृत्वेति, ङस्युक्तत्वाभावान्नात्र समासः। नन्वर्थबोधनायैव शब्दः प्रयुज्यते, अर्थरहितश्चेत् कृग् तदा कुतस्तस्य प्रयोग इत्याशङ्कायामाह– **आनर्थक्यं करोतेरन्यथादिभ्यः पृथगर्थाभावा**दिति– अन्यथादयः शब्दा यमर्थमभिदधति तस्यैवानुवादकत्वेन तस्यानर्थक्यं न त्वर्थाभाववत्त्वेनेति भावः। तदेवानर्थक्यं स्फोरयति– **यावदुक्तं भवति 'अन्यथा भुङ्क्ते' तावदुक्तं भवति 'अन्यथाकारं भुङ्क्ते' इती**ति– 'अन्यथा भुङ्क्ते' इति यावानेवार्थः करोतावप्रयुज्यमाने गम्यते तावानेवार्थः 'अन्यथाकारं भुङ्क्ते' इति करोतौ प्रयुज्यमानेऽपि, तस्मादनर्थकः करोतिः। ननु कथं पुनः प्रयुज्यमान एवानर्थको भवतीति चेदुच्यते– अन्यथादय एते प्रकारवचनाः, ते यदाऽनुप्रयोगधातोरर्थस्य प्रकारमाचक्षते तदा कृगपि तैर्विशेष्यमाणस्तदीयप्रकारमाचष्टे, स चान्यत एवावगत इत्यनर्थको भवति। यद्येवमवगतार्थत्वात् तस्य प्रयोगो न प्राप्नोति, नैवम्– अवगतार्थस्यापि प्रयोगो दृश्यते, यथा– अपूपौ द्वावानय, पचाम्यहमिति। करोतेरप्रयोगेऽपि अन्यथादिभिः क्रियाविशेषणभूतैरन्तर्भावितकरोत्यर्थतया सोऽर्थः प्रत्यायत एव, करोतिः प्रयुक्तः संस्तमर्थं स्पष्टतया प्रतिपादयतीति क्वचित् प्रयुज्यते क्वचिन्नेति तस्यानर्थक्यमिह विवक्षितमिति फलितोऽर्थः। पदकृत्यं पृच्छति–

**अनर्थकादिति किमिति** । यत्रान्यथादयः शब्दा न क्रियामात्रविशेषणपरा अपि तु क्रियाद्वाराऽर्थान्तरं विशेषयन्ति तत्र तेषां स्वतोऽर्थान्तरेण सम्बन्धाभावात् तस्य [ करोतेः ] प्रयोग आवश्यक इति तत्र नानर्थक्यं तस्येति तत्र णम् न भवति, किन्तु क्त्वाप्रत्ययमात्रमित्याशयेनोत्तरयति- **अन्यथा कृत्वा शिरो भुङ्क्ते** इति । प्रयोगे करोतेः सार्थक्यं संगमयति- **अन्यथाशब्दः शिरःप्रकारे** इति- यद्यपि अन्यथाशब्दः क्रियाविशेषणं तथापि क्रियाद्वारा क्रियाकर्मभूतशिरसःप्रकारतया भासत इति तत्त्वम् । तदेवाह- **तच्च करोतिना विनेति**- तत्- शिरःप्रकारत्वम्, गम्यते- भासते, अयमाशयः- अन्यथाशब्देनात्र शिरसः प्रकारमाख्यायते, स च विना करोतिना नावगम्यते, यदि हि करोतिर्न प्रयुज्येत भुजिक्रियागत एव प्रकारोऽन्यथाभवनलक्षणः प्रतीयेत न शिरोगतः, शिरसस्तु भुज्यमानतैवावगम्येत, तस्मान्नात्र करोतिरनर्थकः ॥ ५. ४. ५०. ॥

## यथा-तथादीर्ष्योत्तरे ॥ ५. ४. ५१. ॥

**त० प्र०- यथा-तथाशब्दाभ्यां परात् तुल्यकर्तृकेऽर्थे वर्तमानादनर्थकात् करोतेर्धातोः संबन्धे सति णम् वा भवति, ईर्ष्योत्तरे- ईर्ष्यश्चेत् पृच्छते उत्तरं ददाति । कथं भवान् भोक्ष्यत इति पृष्टोऽसूयया तं प्रत्याह- यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन, किं ते मया, यथाहं भोक्ष्ये तथाऽहं भोक्ष्ये इत्यर्थः । ईर्ष्योत्तर इति किम् ? यथा कृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि । अनर्थकादित्येव- यथा कृत्वाऽहं शिरो भोक्ष्ये तथा कृत्वाऽहं शिरो भोक्ष्ये किं तवानेन ॥५१॥**

**श० म० न्यासानुसन्धानम्-यथा० । यथा-तथा-दिति** समाहारात् पञ्चमी, समाहारत्वात् नपुंसकत्वेन ह्रस्वत्वम्, लाघवाय समाहारकरणेऽपि पृथक् शब्दद्वयं ग्राह्यमिति व्याख्याति- **यथा-तथाशब्दाभ्यामिति** । **'ईर्ष्योत्तरे'** इति पदं विवृणोति- **ईर्ष्योत्तरे- ईर्ष्यश्चेत् पृच्छते उत्तरं ददातीति**- 'पृच्छते' इत्यत्र चतुर्थी, 'ईर्ष्योत्तरे' इत्यत्र तु सति सप्तमी, ईर्ष्यस्योत्तरमीर्ष्योत्तरं तस्मिन् सति । **'कथं भवान् भोक्ष्यते ?'** इति प्रश्नः, तमभिहितः पृष्टः । 'ईर्ष्योत्तरे' इत्यस्यार्थं प्रयोगे ग्राहयितुं मूलमाह- **असूयया तं प्रत्याहेति**- असूया हि गुणेषु दोषाविष्करणम्, प्रश्नकारो हि यदि शुभेच्छयाऽपि पृच्छति तथापि तस्य दोषमेव परिगणयन् प्रत्याहेत्यर्थः । **'यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये'** इत्युत्तरम् । **किं तवानेनेति**- नायं तव व्यापारो यन्मम भोजनप्रकारं जिज्ञाससे इति भावः । यदि च प्रष्टुमनर्हः पृच्छति तदा तु- असूयाशब्दस्य केवलं दोषाविष्करणपरत्वमेवाश्रयणीयम्, अनर्हस्य पृच्छा हि दोष एव, तस्य प्रकटनं प्रतिवक्त्रा कृतमिति । स्वयमेव प्रयोगार्थमाह- **यथाऽहं भोक्ष्ये तथाऽहं भोक्ष्ये इत्यर्थः** इति । पदकृत्यं पृच्छति- **ईर्ष्योत्तर इति किमिति, यथा कृत्वाऽहं भोक्ष्ये तथा त्वं द्रक्ष्यसि** इति- नात्रासूयया प्रतिवचनम्, किं तर्हि ! तत्त्वाख्यानमिति गृहाण । अनर्थकादित्यस्यानुवृत्तेर्व्यावर्त्यं दर्शयति- **अनर्थकादित्येव- यथा कृत्वाऽहं शिरो भोक्ष्ये तथा कृत्वाऽहं शिरो भोक्ष्ये किं तवानेनेति**- अत्र कृग् नानर्थकः किन्तु सार्थकः, तद्भावना प्रागुक्तदिशा विज्ञेया ॥ ५. ४. ५१. ॥

## शापे व्याप्यात् । ५. ४. ५२. ॥

**त० प्र०- अनर्थकादिति निवृत्तम् । व्याप्यात् कर्मणः परात् तुल्यकर्तृकेऽर्थे वर्तमानात् करोतेर्धातोः संबन्धे णम् वा भवति, शापे- आक्रोशे गम्यमाने । चौरंकारमाक्रोशति, करोतिरिहोच्चारणे, चौरं कृत्वा- चौरशब्दमुच्चार्याक्रोशति, चौरोऽसीत्याक्रोशतीत्यर्थः । एवं- दस्युंकारमाक्रोशति, व्याधंकारमाक्रोशति । शाप इति किम् ? चौरं कृत्वा हेतुभिः कथयति ॥५२॥**

**श० म० न्यासानुसन्धानम्- शापे० । अनर्थकादिति निवृत्तमिति**- शापेऽसम्भवाद् व्याप्ये इति भणनाच्चेत्यर्थः । **'शापे'** इति व्याख्याति- **शापे- आक्रोशे गम्यमाने** इति । उदाहरति- **चौरंकारमाक्रोशतीति**- अत्रानेन कृगः णमि वृद्धौ मागमे तस्यानुस्वारे इत्युक्तसमासे च- चौरंकारमिति । कश्चित् कञ्चित् चौरोऽसीत्युच्चैः श्रावयति येनान्येऽपि तस्य चौरत्वं जानीयुरित्येतदस्योदाहरणस्थलम्, कृधातोरुत्पादनानुकूले व्यापारे प्रयोगात् किमस्य चौरत्वमाक्रोशकर्त्रैव सम्पाद्यत इत्याशङ्कामपनेतुमाह- **करोतिरिहोच्चारणे** इति- धातूनामनेका-

थंत्वेन तस्योच्चारणे वृत्तिरित्यर्थः । अथवा चौरशब्दस्य नार्थपरत्वमपि तु शब्दस्वरूपपरत्वमेव, तथा च शब्दस्वरूपस्य स्वतः सिद्धत्वेनोत्पत्तेः फलस्य तत्रान्वयायोगाद् व्यापारमात्रपरत्वं धातोः, स च व्यापारः शब्दसान्निध्यादुच्चारणपरतया प्रतिभासत इति तात्पर्यम् । उच्चारणार्थं दर्शयति– **चौरं कृत्वा– चौरशब्दमुच्चार्याक्रोशतीति**, शापार्थगर्भितमुच्चारणं दर्शयति– **चौरोऽसीत्याक्रोशतीत्यर्थः** इति । अतिदिशति– **एवं– दस्युंकारमाक्रोशति, व्याधंकारमाक्रोशतीति** । पदकृत्यं पृच्छति– **शाप इति किमिति**, उत्तरयति– **चौरं कृत्वा हेतुभिः कथयतीति**– अत्र हि न तस्याक्रोशेऽभिप्रायः किन्तु तस्य चौरत्वप्रकटने, तदर्थमेव चौरत्वकारणप्रतिपादनमिति । चौरोऽसीत्याक्रोशवाक्ये चौरशब्दस्य यदुच्चारणं तदाक्रोशस्यैव सम्पादनार्थम्, नहि तेन विनाऽऽक्रोशः शक्यते प्रतिपादयितुम्, न त्वसौ चौरः क्रियतेऽशक्यत्वात्, न च चौरोऽसीति शतकृत्वोऽपि ब्रुवता पुरुषस्य शक्यते चौरत्वमुत्पादयितुमिति ॥ ५. ४. ५२. ॥

## स्वाद्वर्थाददीर्घात् । ५. ४. ५३. ॥

**त० प्र०– स्वादोरर्थे वर्तमानाच्छब्दाददीर्घान्ताद् व्याप्यात् परस्मात् तुल्यकर्तृके वर्तमानात् करोतेर्धातोः संबन्धे ख्णम् भवति वा । स्वादुंकारं भुङ्क्ते, संपन्नंकारं भुङ्क्ते, मिष्टंकारं भुङ्क्ते, लवणंकारं भुङ्क्ते; पक्षे- स्वादुं कृत्वा, मिष्टं कृत्वा, लवणं कृत्वा, भुङ्क्ते । अदीर्घादिति किम् ? स्वाद्वीं कृत्वा, स्वादूकृत्य, संपन्नां कृत्वा, यवागूं भुङ्क्ते । 'स्वादुंकारं यवागूं भुङ्क्ते, अस्वादुं स्वादुं कृत्वा-स्वादुंकारं भुङ्क्ते' इत्यत्र तु ङी-च्व्योर्विकल्पितत्वात् न दीर्घ इति भवति । 'संपन्नंकारं यवागूं भुङ्क्ते' इति तु सामान्येन पदं निष्पाद्य पश्चाद् यवाग्वा संबन्धे भविष्यति ॥५३॥**

**श० म० न्यासानुसन्धानम्– स्वाद्वर्था०** । 'स्वाद्वर्थात्' इत्यस्यार्थमाह– **स्वादोरर्थे वर्तमानाच्छब्दादिति**, 'अदीर्घाद्' इति व्याख्याति– **अदीर्घान्तादिति**– "विशेषणमन्तः" [ ७. ४. ११३. ] इति तदन्तविज्ञानादयमर्थः । उदाहरति– **स्वादुंकारं भुङ्क्ते** इति । सम्पन्नमिष्टादयः शब्दा वृत्तिविषये स्वाद्वर्थाः, ततस्तानुदाहरति– **सम्पन्नंकारं भुङ्क्ते** इत्यादिना, अस्य वैकल्पिकत्वात् पक्षे क्त्वेत्याह– **पक्षे– स्वादुं कृत्वेत्यादि**, ख्णमि ङस्युक्तत्वात् समासः, क्त्वि तु न ङस्युक्तत्वाभावात्, क्त्वा हि "प्राक्काले" [ ५. ४. ४७. ] इत्यनेन विधीयते, तत्र न ङस्युक्तनाम्नो ग्रहणमिति । पदकृत्यं पृच्छति– **अदीर्घादिति किमिति**, दीर्घान्तात् परत्वे मा भूदित्याशयेनोत्तरयति– **स्वाद्वीं कृत्वेति– यवागूं भुङ्क्ते** इति योजनीयमिह उत्तरयोश्च, अत्र ङ्यन्तत्वाद् दीर्घान्तत्वम्, **स्वादूकृत्येति**– अस्वादुं स्वादुं कृत्वेति च्वौ दीर्घे गतिसंज्ञायां गतिसमासे क्त्वो यबादेशे च– स्वादूकृत्येति; **सम्पन्नां कृत्वेति**– अत्र सम्पन्नशब्दस्याबन्तत्वाद् दीर्घत्वम्, एवं दीर्घस्थलेऽस्याप्रवृत्त्या क्त्वैवेत्यर्थः । ननु स्त्रीलिङ्गे शब्दे विशेष्ये सन्निहिते ङीप्रत्ययेन, . अभूततद्भावे च च्विप्रत्ययेनावश्यं भाव्यमिति 'स्वादुंकारं यवागूं भुङ्क्ते' इत्यत्र ङीः, 'अस्वादुं स्वादुं कृत्वा भुङ्क्ते' इत्यर्थे च्विश्च कुतो न, सतोश्च तयोर्दीर्घान्तत्वेनायं प्रयोगो न स्यादिति चेत् ? अत्राह– **ङी-च्व्योर्विकल्पितत्वाद् न दीर्घ इति भवतीति**–गुणवचनेभ्यो ङीर्विकल्पितः "स्वरादुतो गुणादखरोः" [ २. ४. ३५. ] इति सूत्रेण, च्विश्च तद्धितप्रत्ययः, तत्र च "वाऽऽद्यात्" [ ६. १. १५. ] इत्यधिकृतमिति सोऽपि विकल्पित एवेत्युभयोरभावपक्षे- स्वादुंकारमिति रूपम्, अन्यत्र [ ङी-च्व्योर्विधानस्थले ] च– 'स्वाद्वीं कृत्वा, स्वादूकृत्य' इत्येव प्रयोग इति भावः । नन्वस्तु तत्रायं प्रकारो यत्र च 'आप्' नित्यं प्राप्तस्तत्र 'सम्पन्नंकारं यवागूं भुङ्क्ते' इति प्रयोगः कथम् ? यवागूशब्दसान्निध्ये हि आपो दुर्वारत्वादिति चेत् ? अत्राह– **सामान्येन पदं निष्पाद्य पश्चाद् यवाग्वा सम्बन्धे भविष्यतीति**, अयमाशयः– 'संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते, तेषां यथेष्टमभिसम्बन्धो भवति' इति भाष्यादिवचनेन पूर्वं सम्पन्नंकारमिति प्रयोगः सामान्यविवक्षया निष्पादनीयः, सामान्ये च न स्त्रीत्वं, क्लीबत्वस्यैव तत्र विधानात्, तथा च तत्रापोऽभावे रूपसिद्धौ न बाधकम् । पश्चाच्च यवागूसम्बन्धेऽपि * जातः संस्कारो न निवर्तते * इति न्यायान्न प्रत्ययनिवृत्तिरिति । न च * अकृतव्यूहाः पाणिनीयाः * इति न्यायेन * निमित्तापाये नैमित्तिकस्याप्यपायः * इति न्यायेन वा पूर्वमेव ख्णमो निमित्तस्यादीर्घान्तत्वस्य विनाशसम्भावनायां न

रूणम् भविष्यति, कृतेऽपि वा यवागूपदसान्निध्ये आपः प्रवृत्तौ निवर्तिष्यत इति वाच्यम्, प्रथमस्य भाष्यकृता प्रत्याख्यातत्वात्, द्वितीयस्य चेह विषयाभावात्, यतश्च रूणमो निमित्तमदीर्घत्वं हि तदाऽपेक्ष्यति यत्रत्रापः प्राप्तिः स्यात्, कृते च रूणमि मान्तत्वे तस्य प्राप्तिरेव नेति सर्वमुपपन्नमिति ॥ ५. ४. ५३. ॥

## विद्-दृग्भ्यः कार्त्स्न्ये णम् । ५. ४. ५४. ॥

**त० प्र०— कार्त्स्न्यविशिष्टाद् व्याप्यात् परेभ्यस्तुल्यकर्तृके प्राक्कालेऽर्थे वर्तमानेभ्यो विदिभ्यो दृशेश्च धातोः संबन्धे णम् वा भवति । विद्यतेरकर्मकत्वात् तद्वर्जास्त्रयो विदयो गृह्यन्ते । अतिथिवेदं भोजयति, यं यमतिथिं जानाति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः । कन्यादर्शं वरयति, यां यां कन्यां पश्यति तां तां सर्वां वरयति । बहुवचनात् त्रयाणामपि विदीनां ग्रहणम्, अन्यथा ※ निरनुबन्धग्रहणे न सानुबन्धकस्य ※ इत्युपतिष्ठेत । कार्त्स्न्य इति किम् ? अतिथिं विदित्वा भोजयति, कन्यां दृष्ट्वा वरयति ॥५४॥**

**श० म० न्यासानुसन्धानम्— विद्०** । 'कार्त्स्न्ये' इति न प्रत्ययविशेषणं प्रत्ययार्थस्य "क्त्वातुमम् भावे" [ ५. १. १३. ] इत्यनेन भावतया निर्णीतत्वात् प्रकृतेर्विशेषणत्वं त्वसम्भवीति प्रकृतिविशेषणस्य व्याप्यादित्यनुवृत्तस्य विशेषणमित्याह— **कार्त्स्न्यविशिष्टाद् व्याप्यादिति** । व्याप्यात् परत्वं सकर्मकस्यैव सम्भाव्यते । तत्र चत्वारो विदयः—"विदिंच् सत्तायाम्" "विदक् ज्ञाने" "विदॢंती लाभे" "विदिंप् विचारणे" इति, तत्र सत्तार्थकोऽकर्मक इति तं वर्जयित्वाऽन्ये त्रयोऽपि गृह्यन्ते, तदाह— **विद्यतेरकर्मकत्वात् तद्वर्जास्त्रयोऽपि विदयो गृह्यन्ते** इति । उदाहरति— **अतिथिवेदं भोजयतीति**— अत्रोपान्त्यगुणो मागमो ङस्युक्तसमासश्च पूर्ववत् । अर्थत्रयमप्युदाहरणे संगमयति— **यं यमतिथिं जानाति लभते विचारयति** वेति । "दृशं प्रेक्षणे" **कन्यादर्शं वरयतीति**, कार्त्स्न्यमभिव्यक्तुं प्रयोगार्थं दर्शयति—**यां यां कन्यां पश्यति तां तां सर्वां वरयतीति** । नन्वेकस्मादेव विदेर्विधीयां त्रयाणां ग्रहणे किं मूलमिति चेत् ? अत्राह— **बहुवचनात् त्रयाणामपि विदीनां ग्रहणमिति**— एकस्यैव ग्रहणेऽभिलषिते "विद्-दृशः" इत्येवोच्येत द्विवचनेन वा निर्देशः क्रियेत, कृतं बहुवचनमनर्थकं सदुक्तार्थज्ञापनाय भवतीति भावः । नन्वेकवचननिर्देशेऽपि कस्य ग्रहणमिति विनिगमकाभावात् सर्वेषां सकर्मकाणां ग्रहणं भविष्यतीति बहुवचनं व्यर्थमेवेति चेत् ? अत्राह— **अन्यथा ※ निरनुबन्धग्रहणे न सामान्यस्य ※ इत्युपतिष्ठेतेति**, तथा च निरनुबन्धकस्य ग्रहणं विनिगतं स्यादिति भावः । पदकृत्यं पृच्छति— **कार्त्स्न्य इति किमिति**, उत्तरयति— **अतिथिं विदित्वा भोजयतीति**— अत्र हि भोजनेऽतिथित्वज्ञानं हेतुः, न त्वतिथ्यन्वेषणे तात्पर्यम्, तथा च न कार्त्स्न्यमिति भावः । एवम्— कन्यां दृष्ट्वा वरयतीत्यत्रापि विज्ञेयम् । णकारानुबन्ध उत्तरार्थः ॥ ५. ४. ५४. ॥

## यावतो विन्द-जीवः । ५. ४. ५५. ॥

**त० प्र०— कार्त्स्न्यविशिष्टाद् व्याप्यात् यावच्छब्दात् पराभ्यां विन्द-जीविभ्यामेककर्तृकेऽर्थे वर्तमानाभ्यां धातोः संबन्धे णम् वा भवति । विन्देति शनिर्देशाल्लाभार्थस्य ग्रहणम् । यावद्वेदं भुङ्क्ते, यावल्लभते तावद् भुङ्क्ते इत्यर्थः । यावज्जीवमधीते, यावज्जीवति तावदधीते इत्यर्थः । जीवेः पूर्वकालासंभवाद अपूर्वकाल एव विधिः ॥५५॥**

**श० म० न्यासानुसन्धानम्— यावतो०** । 'विद-जीवः' इत्येव वक्तव्ये 'विन्द' इति विकृतगुरुभूतनिर्देशस्य प्रयोजनमाह— **विन्देति शनिर्देशाल्लाभार्थस्य ग्रहणमिति**— शसन्नियोगेनैव हि विदेर्विकारो भवतीति विकृतनिर्देशः, शविकरणविदेर्लाभार्थस्य परिग्रहार्थ इति भावः । उदाहरति— **यावद्वेदं भुङ्क्ते** इति, कार्त्स्न्यार्थं दर्शयति— **यावल्लभते तावद् भुङ्क्ते** इति । **यावज्जीवमधीते** इत्युदाहरणम्, **'यावज्जीवति तावदधीते'** इति प्रयोगार्थप्रदर्शनम् । यावच्छब्दस्यात्र स्वमते जीवधातुविषय एव कालवाचकत्वमित्यभिप्रायेण विशेषमाह— **जीवे पूर्वकालासम्भवादपूर्वकाल एव विधिरिति**— जीवनस्य धात्वन्तरार्थापेक्षया पूर्वकालत्वं यावच्छब्दयोगे न सम्भवति, नहि जीवनकालव्याप्त्यनन्तरं किमपि कार्यं कोऽपि कर्तुं क्षमते, ततश्च तस्मात् पूर्वकाले विधानं न युक्तमिति विधानसामर्थ्यात् पूर्वकालाभावेऽपि प्रत्ययो विधीयत इति भावः । यद्यपि 'जीवित्वाऽधीते' इत्यर्थविवक्षायाः सम्भवेन पूर्व-

कालस्य सम्भवोऽस्त्येव, नहि तथाकथनेऽध्ययनात् पूर्वमेव समाप्तत्वमावश्यकं ततः परमपि जीवने क्षत्यभावात्, एवं च 'जीवेः पूर्वकालासम्भवाद्' इति ग्रन्थो जीवनस्य समाप्तत्वाभावपर एव, न पूर्वकालत्वेन पूर्वकालरूपार्थे प्रत्ययविधानपर इत्यास्थेयम् ॥ ५. ४. ५५. ॥

## चर्मोदरात् पूरेः । ५. ४. ५६. ॥

**त० प्र०— व्याप्याभ्यां चर्मोदरशब्दाभ्यां परादेककर्तृकेऽर्थे वर्तमानात् पूरयतेर्धातोः संबन्धे णम् वा भवति। चर्मपूरमास्ते, चर्म पूरयित्वाऽऽस्ते इत्यर्थः । उदरपूरं शेते, उदरं पूरयित्वा शेते इत्यर्थः ॥५६॥**

**श० म० न्यासानुसन्धानम्— चर्मो०** । पूरेरिति— "पूरैचि— पूर् आप्यायने" इत्यस्य धातुनिर्देशार्थेन 'इ'-प्रत्ययेन, णिगा वा निर्देश इति सन्देहे आह— **पूरयतेरिति**— ण्यन्तस्यैव निर्देशस्तस्यैव सकर्मकत्वात्, अण्यन्तस्याकर्मकत्वेन चर्मोदराभ्यां कर्मभ्यां सम्बन्धानुपपत्तेः । अकर्मका हि धातवो ण्यन्ताः सकर्मका भवन्ति, तस्माद् ण्यन्तस्यैवेदं ग्रहणमिति भावः। उदाहरति—**चर्मपूरमास्ते** इति, प्रयोगार्थमाह— **चर्म पूरयित्वाऽऽस्त इत्यर्थ** इति, यद्यपीहासनेन चर्म पूरयतीत्येवार्थः, एवं च चर्मपूरणस्य नासनपूर्वकालिकत्वमपि तु समानकालत्वमेव, तथापि चर्म पूरयेयमिति कृत्वा मनसि आस्त इत्यर्थस्य विवक्षितत्वेन मानसिकपूरणस्य पूर्ववृत्तत्वमादाय पूर्वकालत्वसंगतिः । लघुन्यासकारस्त्वेवमाह— 'यावत् पूरणं न सम्पन्नं तावदासनं शयनं च न करोतीति प्राक्कालता, अतः पर्यायः क्त्वान्तो दर्शितः' इति । एवं— **'उदरपूरं शेते'** इत्युदाहरणम्, **'उदरं पूरयित्वा शेते'** इति प्रयोगार्थप्रदर्शनम्, अत्र शयनपूर्वकालिकत्वमुदरपूरणस्य सम्भवतीति न शङ्का । 'चर्मपूरमास्ते' इत्यस्य केनचिद् वस्तुना चर्म पूरयित्वाऽऽस्ते इति नार्थः, किन्तु पूर्वोक्त एव तस्यैव प्राकरणिकत्वप्रतीतेः, अन्यथा चर्मपूरणासनयोरसम्बन्धः स्यात् । आसनेन चर्म पूरयतीत्यस्य च चर्मण आसनाधारत्वेन सूपपन्नत्वात् । न च तथा सति प्राक्कालिकत्वाभावः, पूर्वोक्तरीत्या तत्सम्भवात्, असम्भवे च पूर्ववदपूर्वकाल एव प्रत्ययविधेरभ्युपेयत्वात् । क्त्वाप्रत्ययान्तेन चर्म पूरयित्वेति विग्रहश्च चर्मपूरणविशिष्टा आसनक्रियेत्यर्थकः, विशेष्यविशेषणभावपरिचयार्थः । अत एव तत्त्वबोधिन्यामुक्तम्— 'इह पूर्वकाल इति न सम्बध्यतेऽसम्भवात्' इति । स्वमते च पूर्वकालत्वज्ञापनायैव तदुक्तम् ॥ ५. ४. ५६. ॥

## वृष्टिमान ऊलुक् चास्य वा । ५. ४. ५७. ॥

**त० प्र०—व्याप्यात् परात् पूरयतेर्धातोः संबन्धे णम् वा भवति, अस्य च पूरयतेरूकारस्य लुग् वा भवति, समुदायेन चेद् वृष्टिमानं— वृष्टीयत्ता गम्यते । गोष्पदप्रं वृष्टो मेघः, गोष्पदपूरं वृष्टो मेघः, सीताप्रं सीतापूरं वृष्टो मेघः, यावता गोष्पदादिपूरणा भवति तावद् वृष्ट इत्यर्थः । अस्येति ग्रहणादुपपदस्य न भवति— मूषकबिलपूरं वृष्टो मेघः । गोष्पदप्रमिति प्रातेर्धातोः "आतो डोऽह्वावामः" [ ५. १. ७६. ] इति डेन, गोष्पदपूरमित्यणा च क्रियाविशेषणत्वे सिध्यति, एवं— सर्वे णमन्ताः प्रयोगाः; तत्र णम्विधानमव्ययत्वेन तरामाद्यर्थमनुस्वारश्रवणार्थं च, तेन 'गोष्पदप्रंतराम्, गोष्पदप्रंतमाम्, गोष्पदप्रंरूपं गोष्पदप्रं—कल्पं देश्यं देशीयम्, गोष्पदपूरं— तरां तमां रूपं कल्पं देश्यं देशीयम्' इत्यादि सिद्धं भवति, अन्यथा हि गोष्पदप्रतरं गोष्पदपूरतरमित्याद्येव स्यात् । 'गोष्पदप्रेण, गोष्पदप्रीभवति, गोष्पदपूरेण, गोष्पदपूरीभवति' इत्यादिप्रयोगास्तु ड-घञादि-प्रत्ययान्ता द्रष्टव्याः ॥५७॥**

**श० म० न्यासानुसन्धानम्—वृष्टि०** । मीयतेऽनेनेति मानमिति करणार्थं इह न विवक्षितोऽपि तु मानक्रियामात्रमिति भावसाधन इह मानशब्द इति द्योतयितुमाह— **समुदायेन चेद् वृष्टिमानं— वृष्टीयत्ता गम्यते** इति— समुदायेन—प्रकृतिप्रत्ययोपपदसमुदायेन, एतेन वृष्टिमानस्य समुदायोपाधित्वं दर्शयति । अनेन णमि ऊकारस्य लोपे ङस्युक्तसमासे च— **गोष्पदप्रं वृष्टो मेघः** इति, लोपस्य वैकल्पिकत्वात् तदभावे— **गोष्पदपूरं वृष्टो मेघः** इति । एवं—**'सीताप्रं सीतापूरं वृष्टो मेघः'** इत्यत्रापि विज्ञेयम् । सीता हलदण्डस्य पद्धतिर्लेखेत्यर्थः । गोष्पदप्रमित्यनेन हि न वस्तुतो वृष्टिमानं गोष्पदस्यापि व्यक्तिदेशभेदेनानेकविधत्वात् तथापि तावत्येव वृष्टिर्जाता येन यथाकथञ्चित् गोष्पदपूरणमेव जातं, न तु ततोऽधिकं सस्यादिक्षेत्रपूरणादिकमिति प्रतीयत एवेतीयत्तावगतिर्भवति, तदाह—

**यावता गोष्पदादिपूरणा भवति तावद् वृष्ट इत्यर्थः** इति । 'वृष्टिमान ऊलुक्' इत्येतावन्मात्रोक्तावपि प्रकरणात् प्रत्ययोद्देश्यत्वेन प्रधानत्वाच्च धातोरेवोकारलोपो भविष्यतीति 'अस्य' इति ग्रहणमनर्थकमिति चेत् ? अत्राह– **अस्येति ग्रहणादुपपदस्य न भवती**ति, प्राप्तिस्थलं दर्शयति– **मूषकबिलपूरं वृष्टो मेघः** इति । प्रकरणादुभयोः प्राप्तिरेव, प्रधानस्य धातोः प्रत्ययविधिनाऽऽक्रान्तत्वादुपपदस्याप्यूकारलोपः स्यादिति तद्वारणाय 'अस्य' इति ग्रहणमावश्यकमित्यर्थः । अयमाशयः– यदि 'अस्य' इति नोच्येत तदा यथा वर्षप्रमाणं समुदायोपाधिर्विज्ञायत ऊकारलोपोऽपि तथा समुदायोपाधिर्विज्ञायेत– प्रकृतिप्रत्ययोपपदस्य समुदायस्य य ऊकारस्तस्य लोपो भवतीति, ततश्चोपपदस्यापि स्यात्, तस्मान्मा भूदेष दोष इत्यस्येत्युच्यत इति । धात्वन्तरात् प्रत्ययान्तरेण प्रकृतसूत्रसाध्यप्रयोगाणामन्यथासिद्धिमाह– **गोष्पदप्रमिति प्रातेर्धातोरि**त्यादिना, "प्रांक्– प्रा पूरणे" गोष्पदं प्रातीति डेऽन्त्यस्वरादिलोपे च– गोष्पदप्रमिति सिध्यति, गोष्पदं पूरयतीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यणि णिलोपे च– गोष्पदपूरमिति च सेत्स्यतीत्यर्थः । अथ डान्तस्याणन्तस्य च क्लीबत्वं कथमिति चेत् ? अत्राह– **क्रियाविशेषणत्वे सिध्यती**ति– डान्तस्याणन्तस्य च क्रियाविशेषणत्वविवक्षा, तत्र च "द्वन्द्वैकत्वाऽव्ययीभावौ क्रियाऽव्ययविशेषणे" इति लिङ्गानुशासनात् क्लीबत्वं, तत्र च द्वितीयाया अमादेशे निरुक्तप्रयोगोपपत्तिरिति भावः । अत्र परिहारमाह– **अत्र णम्विधानमव्ययत्वेन तरामाद्यर्थम्, अनुस्वारश्रवणार्थं चे**ति– "क्त्वातुमम्" [१. १. ३५.] इत्यनेन णमन्तस्याव्ययसंज्ञा भवति, सति चाव्ययत्वे ततः परयोस्तरतमप्रत्यययोरन्तस्य "किं-त्याद्ये-ऽव्ययात्०" [७. ३. ८.] इत्यनेन आमादेशो भवति, एवं तरादिप्रत्यये तद्धितवृत्तौ स्यादेर्लोपेऽपि मकारश्रवणं भवति, तदेव विशदयति– **तेन** णमो विधानेन, **गोष्पदप्रंतराम्, गोष्पदप्रंतमामि**ति– 'इत्यादि सिद्धं भवति' इत्यनेनान्वयः, इमौ गोष्पदप्रं वृष्टौ, तयोरयमतिशयेन गोष्पदप्रं वृष्ट इति– गोष्पदप्रंतरां [ वृष्टः ], "द्वयोर्विभज्ये च तरप्" [ ७. ३. ६. ] इति तरप्, इमे गोष्पदप्रं वृष्टाः, तेषामयमतिशयेन गोष्पदप्रं वृष्ट इति– गोष्पदप्रंतमां [ वृष्टः ], "प्रकृष्टे तमप्" [ ७. ३. ५. ] इति तमप्, अव्ययत्वादुभयत्र तरतमयोरन्तस्यामादेशः, अनुस्वारश्रवणं चेत्युभयफलं दर्शितम् । अथानुस्वारश्रवणफलस्थलं दर्शयति– **गोष्पदप्रंरूपमि**त्यादिना, अत्र "त्यादेश्च प्रशस्ते रूपप्" [ ७. ३. १०. ] इति रूपप् प्रत्ययः । ईषदपरिसमाप्तेऽर्थे "अतमबादे०" [ ७. ३. ११. ] इति कल्पपि– **गोष्पदप्रंकल्पम्**, देश्यपि– **गोष्पदप्रंदेश्यम्**, देशीयरि– **गोष्पदप्रंदेशीयमि**ति, ऊकारस्य लोपाभावपक्षे उदाहरति– **'गोष्पदप्रं– तरां तमां रूपं कल्पं देशीयम्'** इत्यादि **सिद्धमि**ति । सूत्राभावेऽनिष्टमाह– **अन्यथा हि गोष्पदप्रतरं गोष्पदपूरतरमित्याद्येव स्या**दिति । किमनव्ययस्य प्रयोगो न भवतीति चेत् ? अत्राह– **गोष्पदप्रेणे**त्यादि, तेऽपि प्रयोगाः साधव एवेत्यर्थः, तथाहि–गोष्पदं प्राति पूरयतीति "आतो डो०" [ ५. १. ७६. ] इति डेऽन्त्यस्वरादिलोपे ङस्युक्तसमासे च– गोष्पदप्रः, तेन– **गोष्पदप्रेण,** अगोष्पदप्रो गोष्पदप्रो भवतीति "कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः" [ ७. २. १२६. ] इति च्विप्रत्यये "ईश्च्वाववर्णस्य" [ ४. ३. १११. ] इत्यवर्णस्येकारे च्वेरप्रयोगित्वात् "अप्रयोगीत्" [ १. १. ३७. ] इति सर्वापहारे *प्रत्ययलोपे प्रत्ययलक्षणम्* इति च्व्यन्तत्वात् "ऊर्याद्यनुकरणच्वि०" [ ३. १. २. ] इति गतिसंज्ञायां प्राक् प्रयोगे च– **गोष्पदप्रीभवती**ति । पूरणं पूरः, अत्र घञ्, गोष्पदस्य पूरो गोष्पदपूरस्तेन– **गोष्पदपूरेणे**ति । अगोष्पदपूरो गोष्पदपूरो भवतीति– **गोष्पदपूरीभवती**ति ॥ ५. ४. ५७. ॥

## चेलार्थात् क्नोपेः । ५. ४. ५८. ॥

**त० प्र०–चेलार्थात् व्याप्यात् परात् क्नोपयतेस्तुल्यकर्तृकेऽर्थे वर्तमानात् वृष्टिमाने गम्यमाने धातोः संबन्धे णम् वा भवति । चेलक्नोपं वृष्टो मेघः, वस्त्रक्नोपम्, वसनक्नोपम्; यावता चेलं क्नूयते–आर्द्रीभवति तावद् वृष्ट इत्यर्थः । अर्थग्रहणादत्र स्वरूप-पर्याय-विशेषाणां त्रयाणामपि ग्रहणम्, तेन–'पटिकाक्नोपम्, कम्बलक्नोपम्' इत्यादौ चेलविशेषादपि भवति । अयमप्यप्राप्तकाले विधिः ॥५८॥**

**श० म० न्यासानुसन्धानम्– चेला०** । "क्नूयैङ्– क्नूय् शब्दोन्दयोः" उन्दनं क्लेदनम्, इहार्द्रीभावार्थकस्यैव ग्रहणं वृष्टिसान्निध्यात् । यद्यप्यार्द्रतायां जातायां शब्दोऽपि कश्चन वस्त्रेणोत्पद्यते, व्याख्यातं च तत्त्वबोधिन्यादौ–

"यथा वर्षणेन चेलानि शब्दायन्ते तथा वृष्ट इत्यर्थः" इति, तथापि तत्राप्यार्द्रीभाव एव कारणमिति स एवार्थो मुख्यतया वाच्य इति युक्तम् । नात्र केवलस्य क्नूयतेर्ग्रहणमपि तु ण्यन्तस्येत्याह– **क्नोपेरिति**– क्नूयमानं प्रयुङ्क्त इति णिगि "अर्तिरी०" [ ४. २. २१. ] इति पौ "पुस्-पौ" [४. ३. ३.] इति गुणे "य्वो:०" [४. ४. १२१.] इति यलुकि च 'क्नोपि' इति ण्यन्तो धातुः, एतदेव स्पष्टयति– **क्नोपयतेरि**ति । उदाहरति– **चेलक्नोपं वृष्टो मेघः** इति– अत्रानेन णमि "णेरनिटि" [ ४. ३. ८३. ] इति णेर्लोपः, चेलार्थकशब्दान्तरमाश्रित्योदाहरति– **वस्त्रक्नोपम्, वसनक्नोपमि**ति– 'वृष्टो मेघः' इत्यत्रापि योजनीयम् । प्रकृते वृष्टिमानमार्द्रीभावं च स्फोरयति–**यावता चेलं क्नूयते– आर्द्रीभवति तावद् वृष्ट इत्यर्थः** इति । चेलं वस्त्रमर्थो यस्य तस्मादित्यर्थग्राहकमर्थग्रहणं साभिप्रायमित्याह– **अर्थग्रहणादत्र स्वरूप-पर्याय-विशेषाणां त्रयाणामपि ग्रहणमि**ति– स्वरूपं– चेलशब्दः, पर्यायौ वस्त्रवसनशब्दौ, विशेषौ–पटिकाकम्बले, तेषां सर्वेषामपि ग्रहणेन तद्घटिता एते प्रयोगाः साधवः, द्वयोरुदाहृतं तृतीये उदाहर्तुमाह– **तेन–** त्रयाणामपि ग्रहणेन, **'पटिकाक्नोपम्, कम्बलक्नोपम्' इत्यादौ चेलविशेषादपि भवती**ति– पटिका-कम्बलशब्दावत्र वस्त्रविशेषवाचकौ । वृष्टेः पूर्वं चेलादीनामार्द्रीभावाभावादिह पूर्वकाले णमो विधानमसङ्गतं स्यादित्यपूर्वकाल एवायं विधिरित्याह– **'अयमप्यप्राक्काल एव विधि**रिति, अपिना पूर्वसूत्रस्यापि तथैवाप्राक्काले विधायकत्वं सूचितम्, तत्रापि वर्षणोत्तरमेव गोष्पदादीनां पूरणसम्भवात् । यद्यपि 'गोष्पदं पूरयित्वा, चेलं क्नोपयित्वा' इत्यादिरूपेण प्राक्कालार्थेन क्त्वाप्रत्ययान्तेनैव विग्रहः क्रियते, तथापि तत्र क्त्वाप्रत्ययस्यापि समानकर्तृकत्वविशिष्टक्रियायामेव शक्तिर्न तु प्राक्काले, गोष्पदपूरणविशिष्टा वृष्टिरित्यादिरूपेणैव प्रतीतेः शब्दस्वभावसिद्धत्वात् । अथवा गोष्पदं पूरयेयमिति मनसा पूर्वमेव पूरयित्वा ततो वृष्ट इत्यादिवर्णनया कथञ्चित् पूर्वकालार्थो व्याख्येयः, अत्यन्तसूक्ष्मकालव्यापितया वा पौर्वापर्यानवगतिरिति बोध्यम् ॥ ५. ४. ५८. ॥

## गात्र-पुरुषात् स्नः । ५. ४. ५९. ॥

**त० प्र०– गात्र-पुरुषाभ्यां व्याप्याभ्यां परादन्तर्भूतण्यर्थात् स्नातेस्तुल्यकर्तृकेऽर्थे वर्तमानात् वृष्टिमाने गम्यमाने धातोः संबन्धे णम् वा भवति । गात्रस्नायं वृष्टो मेघः, पुरुषस्नायं वृष्टो मेघः; यावता गात्रं पुरुषश्च स्नाप्यते तावद् वृष्ट इत्यर्थः । इदं केचिदेवेच्छन्ति ॥५९॥**

**श० म० न्यासानुसन्धानम्**–स्नातेरकर्मकत्वेन गात्र-पुरुषयोस्तत्कर्मत्वमनुपपन्नमिति तदुपपत्तय आह–**अन्तर्भूतण्यर्थादि**ति– ण्यर्थो हि प्रयोजकव्यापारः, सोऽन्तर्भूतो धात्वर्थ एव निहितो यस्य तस्मादिति, तथा च प्रयोजकव्यापारे सति प्रयोज्यस्य कर्मत्वमुपपन्नतरमिति भावः । उदाहरति– **गात्रस्नायं वृष्टो मेघः, पुरुषस्नायं वृष्टो मेघः** इति– "ष्णांक्– स्ना शौचे" अतो णमि "आत ऐः०"[४. ३. ५३.] इत्याकारस्य ऐकारे आयादेशे ङस्युक्तसमासे च– गात्रस्नायमित्यादि । वृष्टिमानं गमयति– **यावता गात्रं पुरुषश्च स्नाप्यते तावत् वृष्ट इत्यर्थः** इति । पाणिनीयादावस्य वचनस्यादर्शनादाह– **इदं केचिदेवेच्छन्ती**ति– न सर्वे वैयाकरणा इति शेषः, तेषां मते गात्रस्नायादीनामनभिधानमेवेति ॥ ५. ४. ५९. ॥

## शुष्क-चूर्ण-रूक्षात् पिषस्तस्यैव । ५. ४. ६०. ॥

**त० प्र०– शुष्क-चूर्ण-रूक्षेभ्यो व्याप्येभ्यः परात् पिषेर्णम् वा भवति, तस्यैव धातोः संबन्धे सति । शुष्कपेषं पिनष्टि, शुष्कं पिनष्टीत्यर्थः, एवं– चूर्णपेषम्; रूक्षपेषम्; शुष्कपेषं पिष्टः, शुष्कपेषं पेष्टव्यः, शुष्कपेषं पिष्यते, क्तादिभिरुक्तेऽपि व्याप्ये तदुपपदताऽस्त्येव । प्रयोगानुप्रयोगक्रिययोरैक्यात् तुल्यकर्तृकत्वं प्राक्कालत्वं च नास्तीत्यत्र प्रकरणे पक्षे क्त्वा न भवति । घञादय एव तु भवन्ति– शुष्कस्य पेषं पिनष्टि, सामान्यविशेषभावविवक्षया च धातुसंबन्धः । यदाहुः–सामान्यन्यपुषेरवयवपुषिः कर्म भवतीति । कश्चित् तु 'सामान्यविशेषविवक्षयाऽत्रापि क्रियाभेदोऽस्तीति तुल्यकर्तृकत्वं प्राक्कालत्वं च, तेन-क्त्वाऽपि, निमूलं कषित्वा कषति' इत्यादि मन्यते ॥६०॥**

**श० म० न्यासानुसन्धानम्– शुष्क० । शुष्कपेषं पिनष्टी**ति– "पिष्लृंप्– पिष् संचूर्णने" अतोऽनेन णमि उपान्त्यगुणे ङस्युक्तसमासे च– शुष्कपेषमिति, तदर्थमाह–

**शुष्कं पिनष्टीत्यर्थः** इति । अतिदिशति– **एवं– चूर्णपेषम्, रूक्षपेषमिति**– अत्रापि पिनष्टीति सम्बन्धनीयम् । **शुष्कपेषं पिष्टः, शुष्कपेषं पेष्टव्यः** इति– अत्र क्त-तव्यौ कर्मणि । **शुष्कपेषं पेष्यते** इति– अत्र कर्मणि क्यादिः । ननु 'शुष्कपेषं पिष्टः' इत्यादौ कर्मणि विहितेन क्तादिना तस्योक्ततया कथं तस्य व्याप्योपपदत्वमित्याशङ्कायामाह– **क्तादिभिरुक्तेऽपि व्याप्ये तदुपपदताऽस्त्येवेति**– नहि कर्मत्वे उक्ते तस्य कर्मत्वं हीयतेऽपि तु तत्र कर्मणि विहितः प्रत्यय एव न भवत्युक्तार्थत्वात्, तथा च तस्य स्वरूपतः कर्मत्वाक्षतेर्व्याप्योपपदत्वमक्षतमेव । लघुन्यासकारस्त्वेवमाह– "**तदुपपदताऽस्त्येवेति**– शुष्कलक्षणकर्मोपपदता" इति । अथ णमो वैकल्पिकत्वेन पक्षे क्त्वा कुतो नेत्याशङ्कायामाह– **प्रयोगानुप्रयोगक्रिययोरैक्यात् तुल्यकर्तृकत्वं प्राक्कालत्वं च नास्तीत्यत्र प्रकरणे क्त्वा न भवतीति**– भिन्नयोरेव धात्वोरेककर्तृकत्वं प्रत्ययहेतुः, एकस्य धातोर्हि एककर्तृकत्वं नियतमेवेति न तत् प्रत्ययनिमित्तं भवितुमर्हति, एकस्यैव धात्वर्थस्यैककर्तृकस्य समानकालत्वमेव स्यादिति तस्य पूर्वापरीभावोऽप्यनुपपन्न इति प्राक्कालिकत्वमपि नोपपद्यत एवेति निमित्तद्वयाभावान्न क्त्वाऽपि तु भावार्थको घञादिरेवेत्याह– **घञादय एव तु भवन्ति– शुष्कस्य पेषं पिनष्टीति** । एकस्यैव धातोर्द्विधा सम्बन्धः कथमित्याशङ्कायामाह– **सामान्यविशेषभावविवक्षया च धातुसम्बन्धः** इति– तथा च शुष्कपेषणाभिन्नं पेषणमित्यादिरूपेणान्वयः । ननु किमिदं स्वकल्पितमेवाथवाऽन्याभिमतमपीति चेत् ? अत्राह– **यदाहुः– 'सामान्यपुषेरवयवपुषिः कर्म भवति'** इति– सामान्ये हि विशेषा अन्तर्भूता एव, तथा चावयवभूतो विशेषभूतः पुषिर्यथा सामान्यपुषेः कर्मतया प्रतिभातीति स्वपोषं पुष्णातीत्यादौ दृष्टमितीहापि सामान्यस्य पिषेः शुष्कादिकर्मविशिष्टः पुषिरवयवभूतः कर्मतयाऽन्वेतुमर्हति, ननु शुष्कपेषमित्यादि क्रियाविशेषणं तत् कथं कर्म भवतीति चेदुच्यते–तन्मते क्रियाविशेषणस्यापि कर्मत्वस्वीकारात् । दीक्षितादिमतमाह– **कश्चित् त्वित्यादिना**, तथाहि "निमूलसमूलयोः कषः" [३.४.३४.]इति सूत्रे दीक्षितेनोक्तम्– "एकस्यापि धात्वर्थस्य निमूलादिविशेषणसम्बन्धाद् भेदः, तेन सामान्यविशेषभावेन विशेषणविशेष्यभावः" इति । अयमाशयः– सामान्यं विशेष्यं विशेषस्तु विशेषणम्, यथा– 'आम्रो वृक्षः' इत्यादावाम्रो विशेषणं वृक्षस्तु विशेष्यमिति । एवं चात्र सामान्यं [केवलं] कषणं विशेष्यं, समूलादिविशिष्टं च विशेषणमिति तयोरभेदेन विशेष्यविशेषणभाव उपपद्यत इति । तथा चैकत्र विशेष्यविशेषणभावस्य भेदकल्पनयैव साध्यत्वाद् विशेषणकृतो धात्वर्थेऽपि भेद आश्रयितव्य इति भिन्नयोरेककर्तृकत्वे विशेषस्य पूर्वकालिकत्वं सामान्यस्योत्तरकालिकत्वं चेति क्त्वाप्रत्ययनिमित्तयोः सत्त्वेन पक्षे सोऽपि भवतीत्याह– **निमूलं कषित्वा कषतीत्यादीति**, परन्तु नैतत् स्वमतानुकूलमिति 'कश्चित् तु' इत्यत्र स्थितेन तुशब्देन सूचितम्, तन्मूलं तु– औपाधिकभेदोपपादनेऽपि वस्तुतोऽभिन्नत्वेनैककर्तृकत्वस्य पूर्वापरीभावस्य चोपपादयितुमशक्यत्वमेवेति ।।५.४.६०।।

## कृग्-ग्रहोऽकृत-जीवात् । ५. ४. ६१. ।।

**त० प्र०– 'अकृत जीव' इत्येताभ्यां व्याप्याभ्यां पराभ्यां यथासंख्यं करोति-गृह्णातिभ्यां तस्यैव धातोः संबन्धे सति णम् वा भवति । अकृतकारं करोति, अकृतं करोतीत्यर्थः । जीवग्राहं गृह्णाति, जीवन्तं गृह्णातीत्यर्थः ।।६१।।**

**श० म० न्यासानुसन्धानम्– कृग्० । करोति-गृह्णातिभ्यामिति**– धातोः स्वरूपदर्शनेऽत्र श्तिव्, तथा च "डुकृंग्– कृ करणे" "ग्रहीश्– ग्रह् उपादाने" इति धातुभ्यामित्यर्थः । उदाहरति– **अकृतकारं करोतीति**, एतदर्थमाह– **अकृतं करोतीत्यर्थः** इति । **जीवग्राहं गृह्णातीति** चोदाहरणम्, तदर्थमाह– **जीवन्तं गृह्णातीत्यर्थः** इति– "जीव प्राणधारणे" जीवतीति जीव इति वर्तमानत्वविवक्षया– जीवन्तमिति, जीवन्तमेवारिं गृह्णाति न तु मारयतीत्यर्थः ।।५.४.६१.।।

## निमूलात् कषः । ५. ४. ६२. ।।

**त० प्र०– निमूलाद् व्याप्यात् परात् कषस्तस्यैव धातोः संबन्धे सति णम् वा भवति । निमूलमित्यत्रात्ययेऽव्ययीभावः, निर्गतानि मूलान्यस्येति बहुव्रीहिर्वा । निमूलकाषं कषति, निमूलं कषतीत्यर्थः, पक्षे– निमूलस्य काषं कषति ।।६२।।**

**श० म० न्यासानुसन्धानम्– निमू० । कषः** इति– 'कष शिष०' इति हिंसार्थकधातुवर्गे पठ्यते । निमूलशब्दे

कः समास इत्याकाङ्क्षायामाह– **निमूलमित्यत्रात्ययेऽव्ययीभावः** इति– अत्ययोऽतीतत्वम्, तत्र "विभक्ति०" [ ३ १. ४९. ]इत्यनेनाव्ययीभावः समासः, अव्ययीभावे ह्यस्वपदविग्रहस्यैव नियतत्वात् 'मूलस्यात्ययः' इति विग्रहः; स्वपदविग्रहस्यावश्यकत्वे त्वाह– **निर्गतानि मूलान्यस्येति बहुव्रीहिर्वे**ति– उष्ट्रमुखादित्वात् समासो गतशब्दलोपश्च, निशब्दश्च निरोऽर्थे, निर्गतेति प्रादिसमासः। उदाहरति– **निमूलकाषं कषती**ति, प्रयोगार्थमाह– **निमूलं कषतीत्यर्थः** इति– अत्र कषतेरेकत्रानर्थकत्वं सूच्यतेऽनेन, निमूलकषणाभिन्नं वर्तमानकालिकं कषणमिति प्रयोगार्थ इति भावः, उभयोः कषणयोरेकरूपत्वेन प्रतीतेरुक्तं– निमूलं कषतीति । पूर्वकालाभावात् पक्षे न क्त्वा, किन्तु षष्ठ्येवेत्याह– **पक्षे– निमूलस्य काषं कषती**ति ॥५. ४. ६२.॥

## हनश्च समूलात् । ५. ४. ६३. ॥

**त० प्र०– समूलशब्दाद् व्याप्यात् पराद्धन्तेः कषेश्च तस्यैव धातोः संबन्धे सति णम् वा भवति । समूलमिति साकल्येऽव्ययीभावो बहुव्रीहिर्वा । समूलघातं हन्ति, समूलं हन्तीत्यर्थः । समूलकाषं कषति, समूलं कषतीत्यर्थः ॥६३॥**

**श० म० न्यासानुसन्धानम्– हन० । 'हनश्च'** इत्यत्रस्थेन चकारेण कषेरनुकर्षः 'प्रकृतेः परश्चकारः प्रकृतिमनुकर्षति' इति नियमात्, तदेवाह– **कषेश्चे**ति । समूलशब्दे कः समास इत्याकाङ्क्षायामाह– **समूलमिति साकल्येऽव्ययीभावः** इति– कला अवयवाः, कलाभिः सह वर्तत इति सकलं, तस्य भावः साकल्यम्, अशेषतेति तत्पर्यायः, तत्र "विभक्ति०" [३. १. ३९.] इति समासः, मूलेन सहेति विग्रहः, उक्तार्थे बहुव्रीहेरपि विधानादाह– **बहुव्रीहिर्वे**ति– संगतानि मूलान्यस्येति विग्रहः, शेषं प्राग्वत् । उदाहरति– **समूलघातं हन्ती**ति– "हनंक्– हन् हिंसा-गत्योः" अतो णमि "ञ्णिति घात्" [ ४. ३. १००. ] इति घातादेशः, अर्थमाह– **समूलं हन्तीत्यर्थः** इति– तथा हन्ति यथा मूलमपि नश्यतीति भावः । एवं– **समूलकाषं कषती**त्युदाहरणम्, **समूलं कषती**त्यर्थप्रदर्शनम् । **'तस्यैव'** इत्यत्रत्येन तत्पदेन णम्प्रकृतिभूत एव धातुर्गृह्यते, न तु सूत्रे प्रकृतित्वेनोपात्त एव, अन्यथा सूत्रे धातुद्वयस्य प्रकृतितयोपात्तत्वात् 'समूलघातं कषति, समूलकाषं हन्ति' इत्यादिप्रयोगस्याप्यापत्तेः । पाणिनीये च स्पष्टप्रतिपत्तय एव पार्थक्येनैवोपपदधातूनां सूत्रे पाठः कृतः । सह पाठेऽपि व्याख्यानादसन्देह इति **स्वमतम्** ॥ ५. ४. ६३. ॥

## करणेभ्यः । ५. ४. ६४. ॥

**त० प्र०– करणात् कारकात् पराद्धन्तेस्तस्यैव धातोः संबन्धे सति णम् वा भवति । पाणिघातं कुड्यमाहन्ति, पादघातं शिलां हन्ति, पाणिना पादेन वा हन्तीत्यर्थः । बहुवचनं व्याप्त्यर्थम्, तेन– करणपूर्वाद्धिंसार्थादपि हन्तेरनेनैव णम्– अस्युपघातमरीन् हन्ति, शरोपघातं मृगान् हन्ति, तथा च सति नित्यसमासस्तस्यैव धातोरनुप्रयोगश्च सिध्यति ॥६४॥**

**श० म० न्यासानुसन्धानम्– करणेभ्यः** । उदाहरति– **पाणिघातं कुड्यमाहन्ती**ति– प्राग्वद् घातादेशः, एवं– **पादघातं शिलां हन्ती**त्यत्रापि, प्रयोगद्वयस्यैकवाक्येनार्थमाह–**पाणिना पादेन वा हन्तीत्यर्थः** इति । **बहुवचनं व्याप्त्यर्थमि**ति– व्याप्तिरुत्तरसूत्रविषयस्यापि व्यापनं, सैव अर्थः प्रयोजनमिति भावः । अयमाशयः– "करणात्" इत्येव वक्तव्ये "करणेभ्यः" इति बहुवचनमनर्थकमिति व्यर्थं सत् तत् करणसामान्यात् परात् हन्तेः प्रत्ययलाभार्थम्, तेन "हिंसार्थादेकाप्यात्" [५. ४. ७४.] इति परमपि णमं बाधित्वा करणपूर्वकात् हिंसार्थादपि हन्तेरनेनैव प्रत्ययो भवतीति । हन् धातुहिंसार्थोऽहिंसार्थश्च, हिंसा हि प्राणवियोगानुकूलो व्यापारः, स च प्राणिकर्मकत्व एव सम्भवति, कुड्यादिकं चाप्राणि वस्तु, तत्र हिंसार्थत्वं नास्ति, अस्युपघातमरीन् हन्तीत्यत्र प्राणवियोगस्य सत्त्वाद्धिंसा, तत्राप्यनेनैव प्रत्ययः । ननु प्रत्ययस्यैक्येन तेनास्तु अनेन वा को विशेष इति चेत् ? अत्राह– **तथा सति नित्यसमास** इति– अनेन हि प्रत्यये "ङस्युक्तं कृता" [३. १. ४९.] इति नित्यं समासो ङस्युक्तत्वात्, तेन प्रत्यये च "तृतीयोक्तं वा" [३. १. ५०.] इति विकल्पेन समासे 'असिनोपघातमस्युपघातमिति विकल्पेन प्रयोगः स्यात्, प्रयोजनान्तरमप्याह– **तस्यैव धातोरनुप्रयोगश्च सिध्यती**ति–

किञ्च तत्र तस्यैव धातोरनुप्रयोग इति नियमो नास्ति, अत्र च नियम इत्यपि विशेषः ॥ ५. ४. ६४. ॥

## स्व-स्नेहनार्थात् पुष-पिषः । ५. ४. ६५. ॥

**त० प्र०— आत्मा आत्मीयं ज्ञातिर्धनं च स्वम्, स्निह्यते–सिच्यते येनोदकादिना तत् स्नेहनम्, स्वार्थात् स्नेहनार्थाच्च करणवाचिनः परात् यथासंख्यं पुषः पिषश्च तस्यैव धातोः संबन्धे सति णम् वा भवति । स्वपोषं पुष्णाति पुष्यति पोषति वा, एवम्— आत्मपोषं गोपोषं महिषीपोषं पितृपोषं मातृपोषं धनपोषं रैपोषम्, स्वादिभिः पुष्णातीत्याद्यर्थः । स्नेहनार्थात्— उदपेषं पिनष्टि, एवं— घृतपेषं, तैलपेषं, क्षीरपेषम्, उदकादिना पिनष्टीत्यर्थः ॥६५॥**

**श० म० न्यासानुसन्धानम्— स्व०** । स्वं च स्नेहनं च– स्वस्नेहने, ते अर्थावस्येति विग्रहकरणे ह्येकस्यैवोपपदस्योभयार्थत्वमायातम्, तत्र युक्तमेकस्योपपदस्योभयार्थत्वायोगात्, अनयोरिति द्विवचनान्तस्यान्यपदार्थत्वे च स्वस्नेहनार्थाभ्यामिति द्विवचनान्तत्वापत्तेः, अतः स्वस्नेहनमर्थोऽस्येति विगृह्यार्थपदस्य द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकं सम्बन्धाद् योऽर्थः सम्पन्नस्तमाह– **स्वार्थात् स्नेहनार्थादिति**, अन्यपदार्थस्य पुष-पिष इत्यस्यैकवचनान्तत्वेन तद्विशेषणस्याप्येकवचनान्तत्वमेवोचितमिति न द्विवचनान्तत्वम् । अर्थग्रहणेन च स्वशब्दार्थः, तत्पर्यायः, तद्विशेषश्च गृह्यते । आत्मा-ऽऽत्मीय-ज्ञाति-धनवचनः स्वशब्द इति स्वशब्दस्यार्थचतुष्टयम्, तत् सकलमपि ग्राह्यमित्याह– **आत्मा आत्मीयं ज्ञातिर्धनं च स्वमिति** । स्नेहनं व्याचष्टे– **स्निह्यते– सिच्यते येनोदकादिना तत् स्नेहनमिति** । "पुषश् पुष्टौ" "पुषंच् पुष्टौ" "पुष पुष्टौ" इति त्रयः पुषः, प्रकृते च 'पुष' इति सामान्येन निर्देशात् विशेषग्रहणे विनिगमकाभावाच्च सर्वेषां ग्रहणमिति तथोदाहरणप्रयोगमाह– **स्वपोषं पुष्णाति पुष्यति पोषति वेति**– अत्रात्मार्थकः स्वशब्दः, अतिदिशति– **एवम्– आत्मपोषमिति**– अत्रोत्तरत्रोदाहरणषट्के च पुष्णातीत्यादिक्रियापदत्रयं योजनीयम्, आत्मार्थकस्वशब्दपर्याय 'आत्मन्' शब्दोऽत्र । **गोपोषम्, महिषीपोषमिति**– अत्रात्मीयविशेषवाची गोशब्दो महिषीशब्दश्च । **पितृपोषं मातृपोषमिति**– अत्र ज्ञातिविशेषवाची पितृशब्दो मातृशब्दश्च । **धनपोषं, रैपोषमिति**– अत्र धनसामान्यवाची धनशब्दः, धनविशेषवाची च रैशब्दः । विशेषणस्य पुषेर्विशेष्यभूतानुप्रयुज्यमानपुषेरविशिष्टार्थतया तदर्थस्य न भानमित्याह– **स्वादिभिः पुष्णातीत्याद्यर्थः** इति । स्नेहनार्थादुदाहर्तुमाह– **स्नेहनार्थादिति, उदपेषं पिनष्टीति**– अत्रोदकशब्दस्य "उदकस्योदः पेष-धि-वास-वाहने" [ ३. २. १०४. ] इत्यनेनोदादेशः । अतिदिशति– **एवं– घृतपेषं, तैलपेषं, क्षीरपेषमिति**– पिनष्टीति प्रत्येकं योजनीयम् । प्रयोगार्थमाह– **उदकादिना पिनष्टीत्यर्थः** इति ॥ ५. ४. ६५. ॥

## हस्तार्थाद् ग्रह-वर्ति-वृतः । ५. ४. ६६. ॥

**त० प्र०— हस्तार्थात् करणवाचिनः शब्दात् परेभ्यो ग्रह-वर्ति-वृद्भ्यस्तस्यैव धातोः संबन्धे सति णम् वा भवति । हस्तग्राहं गृह्णाति, एवं– करग्राहम्, पाणिग्राहम्; हस्तेन गृह्णातीत्यर्थः । वर्ति-वृत इति वर्ततेर्ण्यन्तस्याण्यन्तस्य च ग्रहणम् । हस्तवर्तं वर्तयति, करवर्तम्, पाणिवर्तम्; हस्तेन वर्तयतीत्यर्थः । हस्तवर्तं वर्तते, करवर्तम्, पाणिवर्तम्; हस्तेन वर्तत इत्यर्थः । अण्यन्तान्नेच्छन्त्येके ॥६६॥**

**श० म० न्यासानुसन्धानम्— हस्ता०** । "ग्रहीश्–ग्रह् उपादाने" अतो णमि– **हस्तग्राहं गृह्णातीति** । अतिदिशति– **एवं– करग्राहं, पाणिग्राहमिति**– गृह्णातीति प्रत्येकं योजनीयम् । प्रयोगार्थमाह– **हस्तेन गृह्णातीत्यर्थः** इति । "वृतूङ्–वृत् वर्तने" वर्तीति ण्यन्तग्रहणेऽण्यन्तस्य ग्रहणं न स्यात्, इष्यते तूभयोरिति वृत इति पृथग्निर्देश इत्याह– **वर्ति-वृत इति वर्ततेर्ण्यन्तस्याण्यन्तस्य च ग्रहणमिति** । ण्यन्तादुदाहरति– **हस्तवर्तं वर्तयतीति**– णमि णेर्लोपः, एवं– **करवर्तं, पाणिवर्तमिति**– वर्तयतीति प्रत्येकं योजनीयम्, प्रयोगार्थमाह– **हस्तेन वर्तयतीत्यर्थः** इति । अण्यन्तादुदाहरति– **हस्तवर्तं वर्तते** इति– अत्र णम्निमित्तक उपान्त्यगुणः, एवं– **करवर्तं, पाणिवर्तमिति**– वर्तते इति प्रत्येकं योजनीयम् । प्रयोगार्थमाह– **हस्तेन वर्तत इत्यर्थ** इति । पाणिनीये च ण्यन्तस्यैव ग्रहणं न त्वण्यन्तस्येत्याह– **अण्य-**

**न्तान्नेच्छन्त्येके** इति, अयमाशयः– वर्ततिर्विद्यमानार्थकः, कर्तुर्विद्यमानत्वं च स्वत एव, न तत्र कारणापेक्षेति ण्यन्तादेव प्रत्ययविधानमुचितमिति पाणिन्यादिभिर्ण्यन्तादेव प्रत्ययविधिः स्वीकृतः । वृत्तिसाधनत्वेन विवक्षया स्वमतेऽण्यन्तादपि विधिरिति ॥ ५. ४. ६६. ॥

---

## बन्धेर्नाम्नि । ५. ४. ६७. ॥

**त० प्र०– बन्धेरिति प्रकृतिर्नामविशेषणं च । बन्धेर्बन्ध्यर्थस्य बन्धनस्य यन्नाम–संज्ञा तद्विषयात् करणवाचिनः पराद् बन्धेर्धातोस्तस्यैव धातोः संबन्धि सति णम् वा भवति ; क्रौञ्चबन्धं बद्धः, मर्कटबन्धः बद्धः, मयूरिकाबन्धं बद्धः, गोबन्धं बद्धः, महिषीबन्धं बद्धः, अट्टालिकाबन्धं बद्धः, चण्डालिकाबन्धं बद्धः, क्रौञ्चादीनि बन्धनामधेयानि, क्रौञ्चाद्याकारो बन्धः क्रौञ्चादिरित्युच्यते, तेन बन्धेन बद्ध इत्यर्थः । केचित् तु–उपपदप्रकृतिप्रत्ययसमुदायस्य क्रौञ्चबन्धमित्यादेः संज्ञात्वं मन्यन्ते, व्युत्पत्तिं च क्रौञ्चेन क्रौञ्चाय क्रौञ्चाद् वा बन्धनमित्यादि यथाकथंचित् कुर्वन्ति, तन्मतसंग्रहार्थं नाम्नीति प्रत्ययान्तोपाधित्वेन व्याख्येयम् ॥६७॥**

---

**श० म० न्यासानुसन्धानम्– बन्धे०** । नाम्नोऽपि बन्धनविषयस्यैव प्रत्ययार्थत्वमिष्टमिति तदुपायमाह– **बन्धेरिति प्रकृतिर्नामविशेषणं चे**ति– एकमेव पदं तन्त्रेणोभयत्रान्वेति, एकत्र च धातुनिर्देशे इः प्रत्ययः, परत्र च तदर्थनिर्देश इति योऽर्थः सम्पन्नस्तमाह– **बन्धेर्बन्ध्यर्थस्ये**ति । बन्ध्यर्थमाह– **बन्धनस्ये**ति– "बन्धंश् बन्धने" इति धातुपारायणम् । **नाम्नी**ति पञ्चम्यर्थे सप्तमीति स्वीकारे क्लिष्टकल्पनेत्यत आह– **तद्विषयादि**ति– करणेभ्य इत्यनुवृत्तम्, नाम्नीति सप्तमी विद्यतिक्रियाधारे, आधारश्च विषयतारूप इति भावः । एवं चोपपदस्यैव बन्धननामधेयत्वमिष्टं तदनुकूलमाह– **क्रौञ्चादीनि बन्धननामधेयानी**ति– एष्वाकारकृतो विशेष इत्याह– **क्रौञ्चाद्याकारो बन्धः क्रौञ्चादिरित्युच्यते** इति, प्रयोगार्थमाह– **तेन बन्धेन बद्ध** इत्यर्थः । नाम्नीत्यस्य प्रयोगोपाधित्वमिति स्वीकर्तॄणां मतमाह– **केचित्– तूपपदप्रकृतिप्रत्ययसमुदायस्य क्रौञ्चबन्धमित्यादेः संज्ञात्वं मन्यन्ते** इति । एतच्च पाणिनीयेऽपि दृश्यते, तथाहि– "संज्ञायाम्" [ ३. ४. ४३. ] इति सूत्रव्याख्यायामुक्तं दीक्षितेन– बन्धविशेषाणां संज्ञा एताः । एतच्च प्रयोगाणामन्ते कथितमिति समुदायस्यैव संज्ञात्वमिति तदाशयः स्पष्टः । संज्ञायाश्च यथाकथञ्चिद् व्युत्पादनमिति करणत्वेनैव क्रौञ्चादीनां विग्रहे निर्देश इति नाग्रह इत्याह–**व्युत्पत्तिं च यथाकथञ्चित् कुर्वन्ती**ति– "अधिकरणे बन्धः" [ ३. ४. ४१. ] इत्युत्तरं हि "संज्ञायाम्"[ ३. ४. ४२. ] इति सूत्रं पाणिनीये कृतम् । तथा चाधिकरणभिन्नैः सर्वैरपि कारकैर्विग्रहः शक्यः कर्तुम्, बन्धनस्य नामत्वं च समुदायस्य प्रसिद्धिलभ्यमेवेति संज्ञायामित्यस्य विशेषणार्थं तत्रोक्तम् । स्वमते च तत्संग्रहोपायमाह– **नाम्नीति प्रत्ययान्तोपाधित्वेन व्याख्येयमि**ति– बन्धननाम्नि वाच्ये करणात् बन्धेर्णमित्यर्थः कार्य इति भावः ॥ ५. ४. ६७. ॥

---

## आधारात् । ५. ४. ६८. ॥

**त० प्र०– आधारवाचिनः पराद् बन्धेस्तस्यैव धातोः संबन्धि णम् वा भवति । चक्रबन्धं बद्धः, चारकबन्धं बद्धः, कूटबन्धं बद्धः, गुप्तिबन्धं बद्धः; चक्रादिषु बद्ध इत्यर्थः । 'ग्रामे बद्धः, हस्ते बद्धः' इति बहुलाधिकारान्न भवति ॥६८॥**

---

**श० म० न्यासानुसन्धानम्– आधा०** । नाम्नीति नेहानुवर्तते, तथा च यस्मात् कस्मादाधारात् परत्वे प्रत्ययः स्यादिति ग्रामे बद्ध इत्यादावपि स्यादेवेत्याशङ्कायामाह– **'ग्रामे बद्धः, हस्ते बद्धः' इति बहुलाधिकारान्न भवती**ति– बाहुलकं हि अभिधानरक्षणार्थमिति ग्रामबन्धं बद्ध इत्यादीनामनभिधानाद् ग्रामादिषूपपदेषु णम् न भवतीति भावः । णम एव बाहुलकान्निवृत्तिरिति घञि सति तस्य क्रियाविशेषणत्वेन प्रयोगे ग्रामे बन्धं बद्ध इत्यादयः प्रयोगाः स्युरेव, णमोऽभावे केवलं समासो निवर्त्यते, अनेन णमि सति ङस्युक्तत्वात् "ङस्युक्तं कृता"[३. १. ४९.] इति समासः स्यादेव, स चानभिहित इति णम् बाहुलकान्निवर्त्यंत इति भावः । पाणिनीये भाष्ये त्वत्रेत्थं समाहितम्– "अधिकरणे बन्धः" [ ३. ४. ४१. ] इति सूत्रे– "इह कस्मान्न भवति– ग्रामे बन्ध इति । एवं वक्ष्यामि "अधिकरणे बन्धः संज्ञायाम्" [ ३. ४. ४२. ] । ततः "कर्त्रोर्जीवपुरुषयोर्ना-

शिवहोः" [ ३. ४. ४३. ] इति । कथमट्टालिकाबन्धं बद्धः, चण्डालिकाबन्धं बद्धः । "उपमाने कर्मणि च" [ ३. ४. ४५. ] इत्येवं ["व्याप्याच्चेवात्" सि० ५. ४. ६१.] इति भविष्यति । अयमाशयः– "संज्ञायाम्" इति पृथक् सूत्रम्, स्वमते "बन्धेर्नाम्नि" इति सूत्रम् । "अधिकरणे बन्धः" इति सूत्रेण, स्वमते "आधारात्" इति सूत्रेण सह पठनीयम्, तथा च संज्ञायामेवास्यापि प्रवृत्तिरिति ग्रामोपपदात् बन्धेर्न काऽपि संज्ञा निष्पद्यत इति णम् न भविष्यतीति । न चाधारस्यापि संज्ञायामेव प्रवृत्तौ चक्रबन्धं बद्ध इत्यादीनां संज्ञात्वाभावात् तत्र कथं प्रत्यय इति वाच्यम्, तेषामपि संज्ञात्वस्वीकारात् । असंज्ञात्वस्य निर्णये चोपमानत्वमाश्रित्य "व्याप्याच्चेवात्" इत्यनेनैव स्यात् । स्वमते च बाहुलकेनैव समाहितमित्यन्यत् । 'ग्रामे बद्धः, हस्ते बद्धः' इति तु न युक्तं कर्मणि क्तस्य विषये भावविषयकणमोऽप्राप्तेः, किन्तु 'ग्रामे बन्धः, हस्ते बन्धः' इत्येव प्रयोगः साधुः । यद्यपि णम्वाच्यो भावः साध्यस्वरूपः, घञ्वाच्यश्च सिद्धस्वरूपः, तथापि सिद्धत्वस्याधिक्येऽपि तथाप्रयोगे दोषाभावादिति विशेष उक्तो नागेशेन कैयटव्याख्यायामुद्योते । यद्यपि "उपमानेन कर्मणि च" [ "व्याप्याच्चेवात्" ] इत्यनेन कर्मकर्त्रोरुपपदयोर्णम् विधीयते तथापि भाष्यकारवचनप्रामाण्यादधिकरणविषयेऽपि तस्य प्रवृत्त्याऽट्टालिकाबन्धादीनां सिद्धिरिति तात्पर्यम् ।। ५. ४. ६८. ।।

## कर्तुर्जीव-पुरुषान्नश-वहः । ५. ४. ६९. ।।

**त० प्र०– कर्तृवाचिभ्यां जीव-पुरुषाभ्यां पराभ्यां यथासंख्यं नशि-वहिभ्यां तस्यैव धातोः संबन्धे सति णम् वा भवति । जीवनाशं नश्यति, जीवन् नश्यतीत्यर्थः; पुरुषवाहं वहति, पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः । कर्तुरिति किम् ? जीवेन नश्यति, पुरुषं वहति ।।६९।।**

**श० म० न्यासानुसन्धानम्– कर्तु० । जीवनाशं नश्यतीति**– "जीव प्राणधारणे" "नशौच् अदर्शने" जीवतीति जीवः, जीवो नश्यतीत्यर्थे जीवनाशं नश्यतीति, तथा च जीवपदेन वर्तमानत्वस्य विवक्षया जीवन् नश्यतीत्यर्थ आयाति, तदाह– **जीवन् नश्यतीत्यर्थः** इति । "वहीं प्रापणे" **पुरुषवाहं वहती**त्युदाहरणम्, तदर्थमाह– **पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः** इति– पुरुषशब्दस्य पृणाति नियोगमिति व्युत्पत्त्या प्रेष्यवाचकत्वमाश्रित्य पुरुषो भूत्वेति विग्रहः प्रदर्शितः, पुरुषशब्दस्य लोकेऽपि प्रेष्यार्थे बहुशो व्यवहृतत्वात् । पदकृत्यं पृच्छति– **कर्तुरिति किमिति**, उत्तरयति– **जीवेन नश्यति, पुरुषं वहती**ति, अत्रेत्थं लघुन्यासे– "इदमर्थकथनं, प्रयोगस्तु अस्मिन्नर्थे जीवनाशं नश्यतीत्यादि न भवति, जीवेन नाशं घञन्तं नश्यतीति भवति न तु जीवनाशम् । पुरुषस्य वाहमिति भवति न तु पुरुषवाहमिति" इति । परे त्वेवमाहुः– क्रियायाः पृथग् नाशरूपे भावे वाच्ये च जीवस्य नाशं जीवेन नाशं वा नश्यतीति प्रयोगोऽपि भवितुमर्हति, परं स पूर्वसूत्रप्रदर्शितनागेशोक्तरीत्याऽगतिकगतिरेवेति ।। ५. ४. ६९. ।।

## ऊर्ध्वात् पूः-शुषः । ५. ४. ७०. ।।

**त० प्र०– कर्तृवाचिन ऊर्ध्वशब्दात् परात् पूरः शुषश्च तस्यैव धातोः संबन्धे सति णम् वा भवति । पूरीत्यनिर्देशात् पूर्दैवादिको न चौरादिकः । ऊर्ध्वपूरं पूर्यते, ऊर्ध्वः पूर्यत इत्यर्थः । ऊर्ध्वशोषं शुष्यति, ऊर्ध्वः शुष्यतीत्यर्थः ।।७०।।**

**श० म० न्यासानुसन्धानम्– ऊर्ध्वा०** । 'पूर्' धातुर्द्विविधः– "पूरैचि आप्यायने" इति दैवादिकः, "पूरण् आप्यायने" इति चौरादिकश्च, तत्रोभयोर्ग्रहणे प्राप्ते चौरादिकग्रहणव्यावृत्तय आह– **पूरीत्यनिर्देशादि**ति, अयमाशयः– चौरादिकस्य ग्रहणमिष्टं स्यात् तर्हि 'पूरि' इति ण्यन्तनिर्देशः कृतः स्यात्, न चाकारि, तेन तस्य न ग्रहणमपि तु केवलस्य दैवादिकस्यैव । उदाहरति– **ऊर्ध्वपूरं पूर्यते** इति, प्रयोगार्थमाह– **ऊर्ध्वः पूर्यत इत्यर्थः** इति– घटादिरूर्ध्वमुख एव वर्षोदकादिना पूर्यत इति भावः । **ऊर्ध्वशोषं शुष्यतीति**– वृक्षादिरूर्ध्वमुख एव शुष्यति तथेति भावः । "शुषंच् शोषणे" इति धातुः ।। ५. ४. ७०. ।।

## व्याप्याच्चेवात् । ५. ४. ७१. ।।

**त० प्र०– व्याप्यात् कर्मणश्चकारात् कर्तुश्चेवात्-इवार्थादुपमानार्थात् परात् धातोस्तस्यैव धातोः संबन्धे सति णम् वा भवति । सुवर्णनिधायं निहितः, सुवर्णमिव**

निहितः इत्यर्थः । एवं– रत्ननिधायम्, घृतनिधायम् । शाकक्लेशं क्लिष्टः, ओदनपाचं पक्वः । कर्तुः– काकनाशं नष्टः, काक इव नष्ट इत्यर्थः; एवं-जमालिनाशं नष्टः; अभ्रविलायं विलीनः, अभ्रमिव विलीन इत्यर्थः ॥७१॥

**श० म० न्यासानुसन्धानम्– व्याप्या० । इवात्– इवार्थादिति**– इवशब्दो नोपमानवाचकोऽपि तु द्योतकः, तस्य सादृश्यवाचकत्वस्यैव दृष्टत्वात्, सादृश्यं चोपमानोपमेययोः सामान्यधर्मः, न स उपमानम्, तथापि यो यद्द्योतकः स तद्वाचक इत्याश्रित्य इवार्थस्योपमानत्वेन निर्देशः, अथवा इवशब्दस्यात एव प्रयोगादुपमानवाचकत्वं स्वीकार्यमिति प्रतिभाति । उदाहरति– **सुवर्णनिधायं निहितः** इति– व्याप्यात् सुवर्णात् परस्मात् निपूर्वात् "डुधांग्क् धारणे" इत्यतोऽनेन णमि "आत ऐः०" [ ४. ३. ५३. ] इत्याकारस्य ऐकारे आयादेशे ङस्युक्तसमासे च सुवर्णनिधायमिति, क्ते च "धागः" [ ४. ४. १५. ] इति धागो हीत्यादेशे– निहितः इति, प्रयोगार्थमाह– **सुवर्णमिव निहित इत्यर्थः** इति । अतिदिशति– **एवं– रत्ननिधायम्, घृतनिधायमिति**– निहित इत्यस्यात्रापि सम्बन्धः, तथा च रत्नमिव घृतमिव च निहित इत्यर्थः । "क्लिशौश् विबाधने" शाकमिव क्लिष्ट इति– **शाकक्लेशं क्लिष्टः**, ओदन इव पक्व इति– **ओदनपाचं पक्वः**, पचतेः क्ते "क्षै-शुषि-पचो मकवम्"[४. २. ७८.] इति क्तस्य वादेशे पक्वः । कर्तृतः परत्वे उदाहर्तुमवतारयति– **कर्तुरिति**, "नशौच् अदर्शने" अदर्शनमनुपलब्धिः, अकर्मकत्वात् कर्तरि क्ते औदित्त्वाद् वेट्त्वेनेडभावे शस्य षे तद्योगे तस्य टे– नष्ट इति भवति, काक इव नष्ट इत्यर्थे– **काकनाशं नष्ट** इति । अतिदिशति– **जमालिनाशं नष्ट** इति– जमालिरिव नष्ट इत्यर्थः । **अभ्रविलायं विलीनः** इत्युदाहरणम्, तदर्थमाह– **अभ्रमिव विलीन इत्यर्थः** । इति– "लींङ्च् श्लेषणे" विलीयते स्मेति कर्तरि क्ते सूयत्यादित्वात् तस्य ने– विलीन इति, उपसर्गवशाद् धातोरर्थान्तरे वृत्त्या नष्ट इत्यर्थः ॥ ५. ४. ७१. ॥

## उपात् किरो लवने । ५. ४. ७२. ॥

**त० प्र०– उपपूर्वात् किरतेर्लवनेऽर्थे वर्तमानस्यान्यस्य धातोः संबन्धे सति णम् वा भवति । लवन इति वचनात् तस्यैवेति निवृत्तम् । उपस्कारं मद्रका लुनन्ति, विक्षिपन्तो लुनन्तीत्यर्थः । लवन इति किम् ? उपकीर्य गच्छति ॥७२॥**

**श० म० न्यासानुसन्धानम्– उपा०** । "कॄत् विक्षेपे" अस्य स्वरूपनिर्देशे श्तिवि शे इरादेशे च किरतिरिति भवति, तदेकदेशमनुकृत्योक्तं सूत्रे– **किर** इति, तदेव वृत्तौ स्पष्टयति– **किरतेरिति** । **लवनार्थे वर्तमानस्यान्यस्य धातोरिति**– किरतेर्लवनार्थत्वं क्वाऽप्यदृष्टमिति तदर्थेऽन्यस्यैव धातोरनुप्रयोगरूपः सम्बन्ध एष्टव्य इति भावः । तदाह– **लवन इति निर्देशात् तस्यैवेति निवृत्तमिति** । उदाहरति– **उपस्कारं मद्रका लुनन्तीति**– "किरो लवने"[ ४. ४. ९३. ] इति लवनविषये सडादिः । तदर्थमाह– **विक्षिपन्तो लुनन्तीत्यर्थः** इति– विक्षिप्य लुनन्तीत्यर्थः । यद्यपि लवनविक्षेपणयोः समानकालिकत्वमेव, तथापि विक्षेपणस्य पूर्वं बुद्धिविषयत्वात् पूर्वकालिकत्वम्, अथवा पूर्वकालसम्बन्धाभाव एव पूर्ववदिति ध्येयम् । पदकृत्यं पृच्छति– **लवन इति किमिति**, उत्तरयति– **उपकीर्य गच्छतीति**– विक्षिप्य गच्छतीत्यर्थः, अत्र लवनार्थाभावान्न णम् किन्तु क्त्वैव, एवं लवनविषयाभावाच्च सडपि न भवतीति भावः ॥ ५. ४. ७२. ॥

## दंशेस्तृतीयया । ५. ४. ७३. ॥

**त० प्र०– तृतीयान्तेन योगे उपपूर्वात् तुल्यकर्तृकेऽर्थे वर्तमानाद् दंशेरन्यस्य धातोः संबन्धे सति णम् वा भवति । मूलकेनोपदंशं भुङ्क्ते, मूलकोपदंशं भुङ्क्ते; आर्द्रकेणोपदंशं भुङ्क्ते, आर्द्रकोपदंशं भुङ्क्ते; पक्षे-मूलकेनोपदश्य भुङ्क्ते, आर्द्रकेणोपदश्य भुङ्क्ते । मूलकाद्युपदंशेः कर्मापि प्रधानस्य भुजेः करणमिति तृतीयैव भवति । प्रधानक्रियोपयुक्ते हि कारके गुणक्रिया न स्वानुरूपां विभक्तिमुत्पादयितुमलमप्रधानत्वादेव, यथेष्यते ग्रामो गन्तुं, पक्त्वा भुज्यते ओदन इति । यदा त्ववयवक्रियापेक्षया पूर्वकालविवक्षायां क्त्वा क्रियते तदा क्रियाभेदात् संबन्धभेदे द्वितीयाऽपि भवति-मूलकमुपदश्य भुङ्क्ते इति ॥७३॥**

**श० म० न्यासानुसन्धानम्– दंशे० । तुल्यकर्तृकेऽर्थे वर्तमानादिति**– 'तस्यैव धातोः सम्बन्धे' इत्यस्य

निवृत्तयाऽन्यधातुसम्बन्धे तुल्यकर्तृकत्वरूपार्थविवक्षाया आवश्यकत्वमिति भावः। **अन्यस्य धातोः सम्बन्धे** इति– तुल्यकर्तृकार्थविवक्षामामन्यधातोः सम्बन्धः स्वाभाविक एवेति 'धातोः सम्बन्धे' इत्येत्येतावतैवान्यस्य धातोः संबन्ध इति लभ्यमिति न तदर्थं सूत्रे तद्वाचकपदापेक्षेति भावः। उदाहरति– **मूलकेनोपदंशं भुङ्क्ते, मूलकोपदंशं भुङ्क्ते** इति– "दंशं दशने" अतोऽनेन णमि "तृतीयोक्तं वा" [ ३. १. ५०. ] इति वा तत्पुरुषः, इह करणे तृतीयायां मूलकेनेति, तच्च करणमुपदंशेर्वा स्याद् भुजेर्वा, तत्रोपदंशेस्तावन्नोपपद्यते, अन्यस्मिन् ह्युपदश्यमानेऽन्यत् करणं भवति, इह च तदेव मूलकाद्युपदश्यते, नापरं किञ्चित्, भुजिं प्रति तूपपद्यत एव करणभावः। एवम्– **आर्द्रकेणोपदंशं भुङ्क्ते, आर्द्रकोपदंशं भुङ्क्ते** इत्यत्रापि द्रष्टव्यम्। अत्रोपदंशनस्य पूर्वकालभावित्वादत्र णमोऽभावपक्षे क्त्वाऽपि भवतीत्याह– **पक्षे मूलकेनोपदश्य भुङ्क्ते, आर्द्रकेणोपदश्य भुङ्क्ते** इति। अत्र मूलकमुपदंशेः कर्म, भुजेः करणमिति साक्षात्सम्बध्यमानकर्मानुरोधेन तत्र द्वितीयोचिता, न तु पश्चात्सम्बध्यमानभुजिक्रियापेक्षया तृतीयेत्याशङ्कायामाह– **प्रधानस्य भुजेः करणमिति तृतीयैव भवती**ति। कुत एतदित्याह– **प्रधानक्रियोपयुक्ते हि कारके गुणक्रिया न स्वानुरूपां विभक्तिमुत्पादयितुमलमिति**, कुत इत्याह– **अप्रधानत्वादे**वेति, आख्यातवाच्या हि क्रिया प्रधानमित्युपपादितं प्राक्, प्रधानाप्रधानसम्बन्धे च प्रधानेन सह सम्बन्धस्यैव बलवत्त्वात् तत्सम्बन्धमूलके कारकत्वे विभक्तौ जातायां गुणक्रिया दुर्बलत्वात् स्वानुरूपां विभक्तिमुत्पादयितुं नालमिति युक्तमेव। तदुदाहरणेन स्पष्टयति– **इष्यते ग्रामो गन्तुम्, पक्त्वा भुज्यते ओदन इती**ति– प्रधानक्रिया– इष्यते इति, तत्र कर्मणि प्रत्ययेन कर्मण उक्ततया गन्तुमिति क्रियापेक्षया तत्र द्वितीया न भवतीति भावः। न चैवं तस्योपदंशिनाऽसम्बन्धात् कथं तस्यासामर्थ्यात् प्रत्ययः समासश्चेति वाच्यम्, खण्डशो वाक्यार्थबोधेन तेनापि सह सम्बन्धसत्त्वात्, तथा चात्रैवं बोधः– मूलकेन भुङ्क्ते, किं कृत्वा– उपदश्य, किमुपदश्य? अर्थान्मूलकमिति। अयमाशयः– यद्यपि भुजिं प्रति मूलकादेः करणभावस्तथाप्युपदंशिना सह सामर्थ्यमुपपद्यत एव यतस्तस्य कर्म, न च भुजिना सह सम्बन्धे सति उपदंशिना सह सम्बन्धो निवर्तते विरोधाभावात्, तस्मादुपपद्यत एवोपपदत्वं तस्मिंश्च सति समासः। तदुक्तं सिद्धान्तकौमुद्यां दीक्षितेन– "यद्यप्युपदंशिना सह न शाब्दः सम्बन्धस्तथाप्यार्थोऽस्त्येव कर्मत्वात्, एतावतैव सामर्थ्येन प्रत्ययः समासश्च 'तृतीयायाम्' इति वचनसामर्थ्यात्।" इति।

अयमाशयः– तृतीयान्तेन योगे प्रत्ययविधानसामर्थ्यादुपदंशेस्तृतीयान्तेन शाब्दान्वयाभावेऽप्यार्थान्वयमादायैव सामर्थ्यमाश्रित्य प्रत्ययः समासश्च भवतीति। यदि हि तृतीयान्तेन शाब्दान्वये सत्येव प्रत्ययो भवेत् तर्हि 'करणेभ्यः' इति प्रकरण एवोपदंश इति ब्रूयात्, अत्रैव वा 'उपदंशः करणे' इति वदेत्। तथा न कृतमिति क्रियान्तरं प्रति करणत्वं सूत्रकृतोऽपीष्टमिति प्रतिभाति। तृतीयान्तेन योगे प्रत्ययविधानसामर्थ्याण्णमस्तेनैव योगे विधानेऽपि क्त्वाप्रत्ययविषये नायं नियमः, स हि द्वितीयान्तेन योगेऽपि भवतीत्याह– **यदा त्ववयवक्रियापेक्षयेत्या**दि, अयमाशयः– विवक्षावशेन हि विभक्तिर्भवति, यदि मूलकस्योभयक्रियापेक्षया कर्मत्वं विवक्ष्यते तदा द्वितीया न्यायत एव भविष्यति, किन्तु तत्र न णम् तृतीयान्तेन योगाभावादिति मूलकमुपदंशमिति प्रयोगो न भवतीति। एतद्विषये बहु प्रपञ्चितं मनोरमादौ किन्तु तदिहानुपयुक्तमिति नालेखि ॥ ५. ४. ७३. ॥

## हिंसार्थादेकाप्यात्। ५. ४. ७४. ॥

**त० प्र०– हिंसा प्राण्युपघातस्तदर्थाद् धातोः संबध्यमानेन धातुना सहैकाप्यात्– एककर्मकात् तृतीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्तमानात् णम् वा भवति। दण्डेनोपघातं गाः सादयति, दण्डोपघातं गाः सादयति। खड्गेन प्रहारं खड्गप्रहारं शत्रून् विजयते, दण्डेनाताडं दण्डाताडं गाः कलयति; पक्षे– दण्डेनोपहत्येत्यादि। हिंसार्थादिति किम्? चन्दनेनानुलिप्य जिनं पूजयन्ति। एकाप्यादिति किम्? दण्डेनाहत्य चौरं गोपालको गाः खेटयति ॥७४॥**

**श० म० न्यासानुसन्धानम्– हिंसा०।** हिंसा– **प्राण्युपघातः** इति– प्राणवियोगानुकूलव्यापारमात्रं न हिंसाऽपि तु कस्यापि प्राणिनो मानसिकं शारीरिकं वा कष्टं येन कर्मणा जायेत तदेव कर्म हिंसापदवाच्यमिति

सिद्धान्तमनुसृत्योक्तमिदम्, प्राणवियोगानुकूलव्यापारस्यैव हिंसार्थत्वमतेऽपि क्लेशमात्र उत्पन्ने प्राणिनां प्राणा एव बहिर्निगन्तुमुद्यता भवन्तीति प्रतीतेः प्राणोपघातोऽपि वस्तुगत्या प्राण्युपघात एवेति तन्मतेऽपि सम्यगेवोक्तं– हिंसा प्राण्युपघातः । धातुसम्बन्धाधिकारादनुप्रयोगेण भवितव्यम्, द्विष्ठत्वात् सम्बन्धस्य, तत्र प्रत्यासत्तेरनुप्रयोगधात्वपेक्षयैवैकाप्यत्वं विज्ञायत इत्याह– **सम्बध्यमानेन धातुना सहैकाप्यादि**ति । यद्वा. **एकाप्यादि**त्यनेन द्विकर्मकाणां निवृत्तिरिष्टेति मा ज्ञायीत्यतस्तत् पदं व्याख्यातुमाह– **सम्बध्यमानेन धातुना सहैकाप्यादि**ति– एककर्तृकादिवदेकाप्यादिति पदे एकशब्दः समानार्थक एव, एकशब्दस्य समानार्थकत्वं चोक्तमभियुक्तैः– "एकोऽन्यार्थे प्रधाने च, प्रथमे केवले तथा । साधारणे समानेऽल्पे, संख्यायां च प्रयुज्यते ॥" इति । उदाहरति– **दण्डेनोपघातं गाः सादयति, दण्डोपघातं गाः सादयती**ति– "हनंक् हिंसा-गत्योः" अस्मादुपपूर्वादनेन णमि "ञ्णिति घात्" [ ४. ३. १००. ] इति घातादेशे– उपघातमिति, गोशब्दस्य द्वितीयाबहुवचने– गाः, "षद्लृं– सद् विशरण-गत्यवसादनेषु" अतो णिगि– सादयतीति, गमयतीत्यर्थः, "तृतीयोक्तं वा" [ ३. १. ५०. ] इति वा तत्पुरुषः । एवं– **खड्गेन प्रहारं, खड्गप्रहारं विजयते** इति– "हृंग् हरणे" प्रपूर्वादतो णमि– प्रहारम्, "जि जये" विपूर्वादतः "परा-वेर्जेः" [ ३. ३. २८. ] इत्यात्मनेपदे– विजयते इति, शेषं प्राग्वत् । **दण्डेनाताडं, दण्डाताडं गाः कलयती**ति– "तडण्– तड् आघाते" आङ्पूर्वादतो णमि– आताडमिति, "कलण्– कल संख्यान-गत्योः" अतो णिचि अकारलोपे च– कलयतीति, शेषं प्राग्वत् । णमो वैकल्पिकत्वात् तदभावपक्षे क्त्वा भवतीत्याह– **पक्षे– दण्डेनोपहत्येत्यादी**ति– अत्र क्त्वि "यमि-रमि०" [ ४. २. ५५. ] इति नलोपे उपेन सह गतिसमासे क्त्वो यबादेशे च– 'उपहत्य' इति, दण्डशब्दस्य नानेन सह समासः, क्त्वाविधायके ङस्युक्तत्वाभावात् तृतीयोक्तत्वाभावाच्च । पदकृत्यं पृच्छति– **हिंसार्थादिति किमि**ति, उत्तरयति– **चन्दनेनानुलिप्य जिनं पूजयन्ती**ति– "लिपींत्– लिप् उपदेहे" उपदेहो वृद्धिः, अनुपूर्वोऽयं विलेपने वर्तते, न तु हिंसायामित्यस्याप्रवृत्त्या क्त्वि यबादेशे च– 'अनुलिप्य' इति । पुनः पृच्छति– **एकाप्यादिति किमि**ति, उत्तरयति– **दण्डेनाहत्य चौरं गोपालको गाः खेटयती**ति– "खिट उत्त्रासे" अतो णिगि– खेटयतीति, अत्र आहननस्य कर्म चौरः, खेटनस्य च गाव इति नैककर्मत्वमित्यस्याप्रवृत्त्या क्त्वैवेत्यर्थः ॥ ५. ४. ७४. ॥

## उपपीड-रुध-कर्षस्तत्सप्तम्या । ५. ४. ७५. ॥

**त० प्र०– तया तृतीयया युक्ता सप्तमी– तत्सप्तमी, तदन्तेन योगे उपपूर्वेभ्यः पीड-रुध-कर्षतिभ्यस्तुल्यकर्तृकेऽर्थे वर्तमानेभ्यो धातोः संबन्धे णम् वा भवति । पार्श्वाभ्यामुपपीडं शेते, पार्श्वोपपीडं शेते; पार्श्वयोरुपपीडं शेते, पार्श्वोपपीडं शेते; व्रजेनोपरोधं व्रजोपरोधं गाः सादयति, व्रजे उपरोधं व्रजोपरोधं गाः स्थापयति; पाणिनोपकर्षं पाण्युपकर्षं धानाः पिनष्टि, पाणावुपकर्षं पाण्युपकर्षं धाना गृह्णाति । कर्ष इति शब्निर्देशाद् भौवादिकस्य 'कर्षन्ति शाखां ग्रामम्' इति द्विकर्मकस्याकर्षणार्थस्य ग्रहणम्, न तु तौदादिकस्य यन्त्रभिर्हलैः कृषतीति विलेखनार्थस्य, तेन– भूमावुपकृष्य तिलान् वपति, हलेनोपकृष्य वपतीत्यत्र न भवति । अन्ये त्वनयोरर्थभेदमप्रतिपद्यमानास्तौदादिकादपीच्छन्ति । उपेति किम्? पार्श्वेन निपीड्य तिष्ठति । अन्ये तूपपूर्वादेव पीडेरिच्छन्ति, रुध-कर्षाभ्यां तु कामचारेण, तेन– व्रजरोधं गाः स्थापयति, हस्तरोधं दधद्धनुः, व्रजेन रोधम् । उपपूर्वादपि– व्रजोपरोधं गाः स्थापयति । अन्योपसर्गपूर्वादपि– व्रजानुरोधं गाः स्थापयति, एवं– पाणिकर्षं धाना गृह्णाति, पाणौ कर्षं, पाणिना कर्षमित्याद्यपि भवति ॥७५॥**

**श० म० न्यासानुसन्धानम्– उप०** । तत्सप्तमीपदं व्याचष्टे– **तया तृतीयया युक्ता सप्तमी– तत्सप्तमी**, शाकपार्थिवादित्वाद् युक्तशब्दलोपः, योगश्चात्र समुच्चयरूपः, तथा च 'सप्तम्या च' इत्युक्तेऽपि सिद्धे वैचित्र्यायेत्थमुक्तिः, अथवाऽत्र योगो वृत्तौ समानार्थबोधकत्वरूपः, अस्ति च 'पार्श्वाभ्यामुपपीडं पार्श्वयोरुपपीडम्' इति प्रयोगयोः समानार्थतया व्यवहार इति समानार्थकत्वमेव, किञ्च * चानुकृष्टं नोत्तरत्र * इति चकारेणानुकर्षणे तृतीयाया उत्तरत्र तदनुवृत्तिर्न स्यादिति तदनुवृत्तयेऽपि तथानिर्देशः । सप्तमी च प्रत्ययस्तत्र तदन्तविज्ञानं भवतीत्याह– **तदन्तेन योगे** इति । पूर्वं धातूनां समाहारद्वन्द्वं कृत्वा पश्चात्– उपपूर्वं पीडरुधकर्ष-

मिति विग्रहे शाकपार्थिवादिवत् उत्तरपदलोपिसमासेन निर्देशः सौत्रनिर्देशाच्चाकारस्य लोप इत्याशयेनाह– **उपपूर्वेभ्यः** इति । "पीडण्– पीड् गहने" गहनं बाधा, अस्मात् तृतीयान्तेन सप्तम्यन्तेन च योगे णमं वा समासं चोदाहरति– **पार्श्वाभ्यामुपपीडं शेते** इत्यादिना । एवं– "रुध् पी– रुध् आवरणे" अतस्तथैवोदाहरति– **व्रजेनोपरोधमि**त्यादिना, व्रजो गोकुलम् । "कृष विलेखने" अतोऽपि तथैवोदाहरति– **पाणिनोपकर्षमि**त्यादिना । अत्र 'कर्ष' इति निर्देशः शब्विकरणकृषेर्ग्रहणार्थः, अन्यथा 'कृष्' इत्येव वक्तव्ये गुरुनिर्देशो व्यर्थः स्यात्, कृषिश्च द्विविधः– भौवादिकस्तौदादिकश्च, तत्र तौदादिकः शविकरण इति तस्य गुणाभावेन 'कर्ष' इति निर्देशायोगेन तस्य न ग्रहणमित्याकर्षणार्थस्यैवेह ग्रहणं न हलोत्कर्षणार्थस्य, विलेखनार्थे एवोभयपाठेऽपि तौदादिकस्य क्षेत्रविषयकविलेखन एव प्रयोग इत्यर्थे भेदः स्पष्ट एव, तदेतत् सर्वमभिप्रेत्याह– **कर्ष इति शब्निर्देशादित्या**दिना **न भवती**त्यन्तेन । ये च सर्वथोभयधात्वोः समान एवार्थः प्रयोगविषयश्चेति मन्यते तेषां मते कस्यापि व्यवच्छेदे फलाभावात् तौदादिकस्यापि ग्रहणं स्यादेवेत्याह– **अन्ये त्वनयोरर्थभेदमप्रतिपद्यमानाः** इति । पाणिनीयेऽपि तौदादिकस्य ग्रहणं नेष्टमिति तत्त्वबोधिनीकारः । यद्यपि तत्राप्युभयोर्धात्वोः समान एवार्थे पाठस्तथापि प्रयोगव्यवस्थाऽऽश्रीयते– क्षेत्रविषयकविलेखन एव तौदादिकस्यान्यत्र भौवादिकस्येति । तथा च तन्मतेऽपि 'हलेनोपकृष्य, क्षेत्रे उपकृष्य' इत्यादिप्रयोगसिद्धये तौदादिकस्य व्युदास आवश्यक एव ।

मतान्तरमाह– **अन्ये तूपपूर्वादेव पीडेरि**ति– पीडेरेवोपपूर्वादित्यर्थः । तस्यैव सान्निध्याद् विशेषणमिति तेषामाशयः । **कामचारेणे**ति– उपपूर्वाभ्यामपि, उपसर्गरहिताभ्यां केवलाभ्यामपि, उपसर्गान्तरपूर्वाभ्यामपि, विशेषे विनिगमकाभावादिति । पाणिनीये तु *द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते* इति न्यायेनोपपूर्वेभ्य एव सर्वेभ्यः प्रत्ययविधिरिष्यत इति, तदन्यतन्त्रविषयं पूर्वोक्तमिति बोध्यम् ॥ ५. ४. ७५. ॥

**प्रमाण-समासत्त्योः** । ५. ४. ७६. ॥

**त० प्र०-आयाममानं प्रमाणं, समासत्तिः संरम्भपूर्वकः संनिकर्षः,तयोर्गम्यमानयोस्तृतीयान्तेन सप्तम्यन्तेन च योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः सम्बन्धे, सति णम् वा भवति । द्व्यङ्गुलेनोत्कर्षं द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति, द्व्यङ्गुले उत्कर्षं द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति । समासत्तौ–केशैर्ग्राहं केशग्राहं युध्यन्ते, केशेषु ग्राहं केशग्राहं युध्यन्ते, एवं– हस्तग्राहम्, अस्युपनोदं युध्यन्ते, युद्धसंरम्भादत्यन्तं संनिकृष्य युध्यन्त इत्यर्थः । पक्षे– द्व्यङ्गुलेनोत्कृष्य द्व्यङ्गुले उत्कृष्य गण्डिकाश्छिनत्ति, केशैर्गृहीत्वा केशेषु गृहीत्वा युध्यन्ते ॥७६॥**

**श० म० न्यासानुसन्धानम्– प्रमाणा०** । प्रमाणशब्दस्य लोके मानसाधारणतया प्रसिद्धेः शास्त्रे तदर्थस्य यो विवेकस्तमाह– **आयामं प्रमाणमि**ति– "ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः ॥" इत्यभियुक्तोक्तपरिभाषया प्रमाणशब्दस्य तादृशार्थपरताया व्यवस्थापितत्वादिति भावः । आसत्तिपदेनैव सन्निकृष्टार्थे लब्धे 'सम्' इत्युपसर्गस्य विशिष्टार्थसूचकत्वमित्याह– **संरम्भपूर्वकः सन्निकर्षः** इति– संरम्भो मनःक्षोभपूर्वको वाक्कायविकारविशेषः, स पूर्वो यस्य तादृशः सन्निकर्षः सामीप्यादिसम्बन्धः समासत्तिरिति भावः । णमं वा समासं चोदाहरति– **द्व्यङ्गुलेनोत्कर्षं द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति** इति– द्वयोरङ्गुल्योः समाहारो द्व्यङ्गुलम् "संख्याऽव्ययादङ्गुलेः". [ ७. ३. १२३. ] इति समासान्ते डेऽन्त्यस्वरादिलोपः, तेन द्व्यङ्गुलेन गण्डिकानां दैर्घ्यं परिच्छिद्यते । तृतीयान्तेन योगे उदाहृत्य सप्तम्यन्तयोगे उदाहरति– **द्व्यङ्गुले उत्कर्षं द्व्यङ्गुलोत्कर्षं गण्डिकाश्छिनत्ती**ति– गण्डिका धनुरादिपर्व । अथ समासत्तौ उदाहर्तुमवतारयति– **समासत्तावि**ति, तृतीयान्तयोगे सप्तम्यन्तयोगे च वा समासे च– **केशैर्ग्राहं केशग्राहं युध्यन्ते, केशेषु ग्राहं केशग्राहं युध्यन्ते** इति, अतिदिशति–**एवं–हस्तग्राहम्, अस्युपनोदं युध्यन्ते** इति । समासत्तिं संगमयति– **युद्धसंरम्भादत्यन्तं सन्निकृष्य युध्यन्त इत्यर्थः** इति– युद्धाय संरम्भो युद्धसंरम्भः, तस्मादत्यन्तं प्रत्यासन्नीभूय युध्यन्ते इति भावः, एतेन– ग्रहणेनैव सन्निकर्षे लब्धे तत्रासन्निकर्षार्थव्यवच्छेदाय समासत्तिपदमनावश्यकमेवेति शङ्का निरस्ता । अयमाशयः– केशहस्तादीनां

ग्रहणं भवतु वा मा वास्तु सन्निकर्षमात्रप्रतीतिरिहेति प्रतिपादनपरं समासत्तिपदमिति । सम्भ्रमपूर्वक इति प्रदर्शितार्थघटनाय युद्धसंरम्भादिति पदमिति । णमो वैकल्पिकत्वात् तदभावे क्त्वा भवतीत्याह– **द्व्यङ्गुलेनोत्कृष्येत्यादि**– उत्कृष्येत्यत्र प्राग्वत् गतिसमासादिकम्, तृतीयान्तस्य सप्तम्यन्तस्य च क्त्वान्तेन न समासः, क्त्वाविधायके "प्राक्काले" [ ५. ४. ४७. ] इत्यत्र तृतीयान्तसप्तम्यन्तयोर्ग्रहणाभावात् ॥ ५. ४. ७६. ॥

## पञ्चम्या त्वरायाम् । ५. ४. ७७. ॥

**त० प्र०– त्वरा परीप्सा औत्सुक्यमिति यावत्, तस्यां गम्यमानायां पञ्चम्यन्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोः सम्बन्धे सति णम् वा भवति । शय्याया उत्थायं शय्योत्थायं धावति, एवं नाम त्वरते यदावश्यकादिकमपि नापेक्षते । स्तनरन्ध्रादपकर्षं स्तनरन्ध्रापकर्षं पयः पिबति, एवं नाम त्वरते यत् पात्रे दोहमप्यप्रतीक्ष्य मुख एव पयः पिबतीत्यर्थः । पक्षे– शय्याया उत्थाय धावति । त्वरायामिति किम् ? आसनादुत्थाय गच्छति ॥७७॥**

**श० म० न्यासानुसन्धानम्– पञ्चम्या०** । त्वरापदार्थं विवृणोति– **त्वरा परीप्सा, औत्सुक्यमिति यावदिति**– परितः सर्वतो भावेन व्याप्तुमिच्छा परीप्सा, यथाकथञ्चिदपि झटिति कार्यमिदं साधयेयमित्यौत्सुक्यमिति भावः । उदाहरति– **शय्याया उत्थायं शय्योत्थायं धावतीति**– "ष्ठां– स्था गतिनिवृत्तौ" उत्पूर्वादतो णमि आत ऐकारे आयादेशे "उदः स्था-स्तम्भः सः" [ १. ३. ४४. ] इति सलोपे दस्य ते च– उत्थायमिति, प्राग्वत् वा समासश्च, अत्र त्वरां दर्शयति– **एवं नाम त्वरते यद् आवश्यकमपि नापेक्षते** इति– शय्याया उत्थितेनावश्यकं देवस्मरणादिकं शरीरशौचादिकं च विधाय किमपि कार्यमारभ्यत इति हि क्रमः, तत् परित्यज्य धावनमौत्सुक्यातिशयमेव प्रकटयतीति भावः । एवं– **स्तनरन्ध्रादपकर्षं स्तनरन्ध्रापकर्षं पयः पिबतीति**– अपपूर्वात् कृषेर्णमि उपान्त्यगुणे प्रागिव शेषकार्ये अपकर्षमिति समासविकल्पाच्च वाक्यद्वयम् । अत्र त्वरां दर्शयति– **एवं नाम त्वरते यत् पात्रे दोहमप्यप्रतीक्ष्य मुखे एव पयः पिबतीति**– दुग्धं हि पात्रे दोह्यं तदनु वस्त्रेण संशोध्यं तदनु पेयमिति हि क्रमः, **औत्सुक्यमूलिकया** त्वरया चात्र तदतिक्रम इति भावः । स्तनरन्ध्रादेवापकृष्य मुखेन पिबतीत्यर्थः । णमो वैकल्पिकत्वादाह– **पक्षे– शय्याया उत्थाय धावतीति**– अत्र क्त्वि तस्य यबादेशे 'उत्थाय' इति । पदकृत्यं पृच्छति– **त्वरायामिति किमिति**, उत्तरयति– **आसनादुत्थाय गच्छतीति**– गमनाय हि आसनादुत्थानमावश्यकमिति तस्मादुत्तिष्ठतीति न तत्र कश्चन क्रमः परित्यज्यत इति न त्वराप्रतीतिरिति णम् न भवति, किन्तु क्त्वैवेति भावः ॥ ५. ४. ७७. ॥

## द्वितीयया । ५. ४. ७८. ॥

**त० प्र०– द्वितीयान्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानात् त्वरायां गम्यमानायां धातोः सम्बन्धे णम् वा भवति । लोष्टान् ग्राहं लोष्टग्राहं युध्यन्ते, यष्टीर्ग्राहं यष्टिग्राहं युध्यन्ते, दण्डमुद्यामं दण्डोद्यामं धावति, एवं नाम योद्धुं त्वरन्ते यदायुधग्रहणमपि नाद्रियन्ते यत्किञ्चिदासन्नं तद् गृह्णन्ति; पक्षे-लोष्टान् यष्टीर्गृहीत्वा युध्यन्ते । त्वरायामित्येव-खड्गं गृहीत्वा युध्यन्ते । योगविभाग उत्तरार्थः ॥७८॥**

**श० म० न्यासानुसन्धानम्– द्वि०** । पूर्वसूत्रसमानमेतत्, केवलं पूर्वत्र पञ्चम्यन्तेन योगेऽत्र तु द्वितीयान्तेन योगे प्रवृत्तिरिति विशेषः । "ग्रहीश्– ग्रह् उपादाने" अतो णमि उपान्त्यवृद्धौ वा समासे च– **लोष्टान् ग्राहं लोष्टग्राहं युध्यन्ते** इति–लोष्टान् ग्राहमित्यत्र लोष्टानां कृदन्तस्य कर्मत्वेन "कर्मणि कृतः"[ २. २. ८३. ] इति प्राप्ताऽपि षष्ठी "तृन्नुदन्ताव्यय०"[ २. २. ९०. ] इति निषिध्यत इति "कर्मणि" [ २. २. ४०. ] इति द्वितीयैव, निषेधश्चात्र णमन्तस्य "क्त्वातुमम्" [१. १. ३४.] इत्यनेनाव्ययसंज्ञयाऽव्ययत्वात्, एवमन्यत्रापि विज्ञेयम् । एवं– **'यष्टीर्ग्राहं यष्टिग्राहं युध्यन्ते'** इत्यत्रापि ज्ञेयम् । "यमूं– यम् उपरमे" उत्पूर्वादतो णमि– **दण्डमुद्यामं दण्डोद्यामं धावतीति** । त्वरामेव दर्शयति– **एवं नाम योद्धुं त्वरन्ते यद् आयुधग्रहणमपि नाद्रियन्ते यत् किञ्चिदासन्नं तद् गृह्णन्तीति**– युद्धे हि तथा गन्तव्यं यथाऽरिः सर्वथा विजित एव स्यात्, न च लोष्टादिभिर्योधने तत् सम्भवति, अपि तु घातकैः शस्त्रैरेव, तथापि त्व-

रया शस्त्रादीनामग्रहणम्, यत् किञ्चिदग्रे लब्धं तेनैव युद्धप्रयास इति भावः। णमो वैकल्पिकत्वादाह– **पक्षे– लोष्टान् गृहीत्वा युध्यन्ते** इति– अत्र क्त्वि व्वृति दीर्घत्वे च– 'गृहीत्वा' इति। त्वरानुवृत्तेर्व्यावर्त्यं दर्शयति– **त्वरायामित्येव– खड्गं गृहीत्वा युध्यन्ते** इति– युद्धे हि खड्ग्रहणमावश्यकमेव, नात्र त्वरया खड्गपरित्यागो नवा त्वरासूचकमन्यदेव यत् किञ्चिद् गृह्यत इति त्वराविरहः स्पष्ट एव। **योगविभाग उत्तरार्थः** इति– "पञ्चमी-द्वितीयाभ्याम्"* इत्येकयोगेन निर्वाहेऽपि "द्वितीयया" इति पृथक् सूत्रकरणमुत्तरत्र द्वितीयामात्रसम्बन्धार्थमिति भावः॥ ५. ४. ७८.॥

## स्वाङ्गेनाऽध्रुवेण। ५. ४. ७९.॥

**त० प्र०– "अविकारोऽद्रवं मूर्तम्" इत्यादिलक्षणं स्वाङ्गम्, यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणी न म्रियते तदध्रुवम्, अध्रुवेण स्वाङ्गेन द्वितीयान्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे वर्तमानात् धातोः संबन्धे णम् वा भवति। भ्रुवौ विक्षेपं भ्रूविक्षेपं जल्पति, अक्षिणी निकाणमक्षिनिकाणं हसति, केशान् परिधायं केशपरिधायं नृत्यति, प्रतिमायाः पादावनुलेपं पादानुलेपं प्रणमति। पक्षे– भ्रुवौ विक्षिप्य जल्पतीत्यादि। स्वाङ्गेनेति किम्? कफमुन्मूल्य जल्पति। अध्रुवेणेति किम्? शिर उत्क्षिप्य कथयति॥७९॥**

**श० म० न्यासानुसन्धानम्– स्वाङ्गे०**। पदद्वयमपि साम्प्रदायिकव्याख्यापेक्षीति तथा व्याख्याति– **"अविकारोऽद्रवं मूर्तम्०" इत्यादिलक्षणं स्वाङ्गमि**ति– सम्पूर्णकारिका चेयम्–

"अविकारोऽद्रवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु॥" इति,

इयं च "असह०" [ २. ४. ३८. ] इति सूत्रस्य बृहद्वृत्तौ तन्न्यासे च स्वयमाचार्येण व्याख्यातेति ततो विलोकनीयम्। अध्रुवमिति पदं व्याख्याति– **यस्मिन् अङ्गे छिन्ने भिन्ने वा प्राणी न म्रियते तदध्रुवमि**ति– यद्यपि सर्वाण्यप्यङ्गान्यध्रुवाण्येव शरीरस्यैवाध्रुवत्वात्, तथापीह प्राणिनः स्थित्यपेक्षयैव ध्रुवत्वाध्रुवत्वयोर्निर्धारणमावश्यकमिति यावज्जीवस्तिष्ठति तावत्पर्यन्तं येषामङ्गानां स्थितिर्नियता तानि ध्रुवाणि, यानि पुनः सत्यपि जीवे स्थिरे छिन्नानि भिन्नानि दृष्टानि तान्यध्रुवाणीति भावः। भ्रूप्रभृतीनामभावेऽपि प्राणिनो जीवत्वादध्रुवत्वं तेषां स्पष्टम्, शिरसि च्छिन्ने तु न कश्चिज्जीवतीति तद् ध्रुवमिति तदनुसारमुदाहरणप्रत्युदाहरणयोः संगतिः कार्या।

"क्षिपंच् प्रेरणे" "क्षिपींत् प्रेरणे" विपूर्वादितो णमि उपान्त्यगुणे वा समासे च– **भ्रुवो विक्षेपं भ्रूविक्षेपं जल्पतीति**– औप्रत्यये "भ्रूश्नोः" [ २. १. ५३. ] इत्युवादेशे– 'भ्रुवौ' इति। "कणण् निमीलने" अतो णमि– **अक्षिणी निकाणमक्षिनिकाणं हसतीति**। **केशान् परिधायं केशपरिधायं नृत्यतीति**– "डुधांग्क्– धा धारणे च" चकाराद् दाने, परिपूर्वादितो णमि आत ऐकारे आयादेशे च– 'परिधायम्' इति। **प्रतिमायाः पादावनुलेपं पादानुलेपं प्रणमतीति**– अत्र "लिपींत् लिप् उपदेहे" इत्यनुपूर्वो लिप्धातुः, शेषं प्राग्वत्। णमो वैकल्पिकत्वादाह– **पक्षे– भ्रुवौ विक्षिप्य जल्पतीत्यादि**। पदकृत्यं पृच्छति– **स्वाङ्गेनेति किमिति**, उत्तरयति– **कफमुन्मूल्य जल्पतीति**– कफस्य द्रवत्वान्न स्वाङ्गत्वमित्यस्याप्रवृत्त्या क्त्वैव भवतीत्यर्थः। पुनः पृच्छति– **अध्रुवेणेति किमिति**, उत्तरयति– **शिर उत्क्षिप्य कथयतीति**– शिरसो ध्रुवाङ्गत्वादस्याप्रवृत्त्या क्त्वैव भवतीत्यर्थः॥ ५. ४. ७९.॥

## परिक्लेश्येन। ५. ४. ८०.॥

**त० प्र०– परि–समन्तात् क्लिश्यमानं–पीड्यमानं–परिक्लेश्यम्, तेन स्वाङ्गेन द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे णम् वा भवति। ध्रुवार्थोऽयमारम्भः। उरांसि प्रतिपेषमुरःप्रतिपेषं युध्यन्ते, शिरांसि च्छेदं शिरश्छेदं युध्यन्ते, उरांसि परितः पीडयन्तः शिरांसि छिन्दन्तो युध्यन्त इत्यर्थः। पक्षे– उरांसि प्रतिपिष्य, शिरांसि छित्वा॥८०॥**

**श० म० न्यासानुसन्धानम्–परि०**। "क्लिशौश्– क्लिश् विबाधने" विबाधनं पीडा, परिपूर्वादितः कर्मणि ये– **परिक्लेश्येनेति**। प्रत्येकमर्थमाह– **परि– समन्तात्, क्लिश्यमानं– पीड्यमानं– परिक्लेश्यम्, तेन** तथेति। पूर्वसूत्रेणैव क्लिश्यमानेनाक्लिश्यमानेन च स्वाङ्गेन योगे प्रत्ययः स्यादेवेति सूत्रस्य वैयर्थ्यमाश-

द्धयाह– **ध्रुवार्थोऽयमारम्भः** इति– पूर्वसूत्रमध्रुवेणैव स्वाङ्गेन योगे प्रवर्तत इति तद् विहायेदं ध्रुवेण स्वाङ्गेन योगे प्रत्ययविधानार्थमिति भावः । उरःशिरःप्रमुखानि ध्रुवाणि स्वाङ्गानीहोदाहरणीयानीत्याह– **उरांसि प्रतिपेषमुरःप्रतिपेषं युध्यन्ते** इति– "पिष्लृं प्-पिष् संचूर्णने" प्रतिपूर्वादतो णमि उपान्त्यगुणे– प्रतिपेषमिति, शेषं प्राग्वत् । परस्परमेकोऽन्यस्योरः पिष्ट्वा– संपीड्य युध्यन्ते इति भावः, योधने हि नोरस एकदेशः क्लिश्यतेऽपि तु सर्वमेवोर इति परिक्लिश्यमानत्वम् । एवं– **शिरांसि छेदं शिरश्छेदं युध्यन्त** इति– "छिदृंपी-छिद् द्वैधीकरणे" इति धातुरत्र । प्रयोगद्वयस्यार्थं स्वयमाह–**उरांसि परितः पीडयन्तः शिरांसि छिन्दन्तो युध्यन्त इत्यर्थः** इति । णमो वैकल्पिकत्वादाह–**उरांसि प्रतिपिष्य, शिरांसि छित्त्वे**ति– अत्र क्त्वा प्रत्ययः ॥ ५. ४. ८०. ॥

## विश-पत-पद-स्कन्दो वीप्सा-ऽऽभीक्ष्ण्ये । ५.४.८१. ॥

**त० प्र०– श्रुतत्वाद् विश्यादिक्रियाभिः साकल्येनोपपदार्थानां व्याप्तुमिच्छा-वीप्सा, प्रकृत्यर्थस्य पौनःपुन्येनासेवनम्-आभीक्ष्ण्यम्, यदाहुः-सुप्सु वीप्सा, तिङ्क्षु अव्ययकृत्सु चाभीक्ष्ण्यमिति । द्वितीयान्तेन योगे विशादिभिस्तुल्यकर्तृकेऽर्थे वर्तमानेभ्यो वीप्सायामाभीक्ष्ण्ये च गम्यमाने धातोः सम्बन्धे सति णम् वा भवति । गेहं गेहमनुप्रवेशं गेहानुप्रवेशमास्ते, गेहमनुप्रवेशमनुप्रवेशं गेहानुप्रवेशमास्ते; गेहंगेहमनुप्रपातं गेहानुप्रपातमास्ते, गेहमनुप्रपातमनुप्रपातं गेहानुप्रपातमास्ते; गेहं गेहमनुप्रपादं गेहानुप्रपादमास्ते, गेहमनुप्रपादमनुप्रपादं गेहानुप्रपादमास्ते; गेहं गेहमवस्कन्दं गेहावस्कन्दमास्ते, गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते । पक्षे– 'गेहं गेहमनुप्रविश्यास्ते, गेहमनुप्रविश्याऽनुप्रविश्यास्ते' इत्यादि । वीप्सायामुपपदस्य, आभीक्ष्ण्ये तु धातोर्द्विर्वचनम् । 'गेहानुप्रवेशमास्ते' इत्यादौ तु वीप्साभीक्ष्ण्ये शब्दशक्तिस्वाभाव्यात् समासेनैवोक्ते, इति द्विर्वचनं न भवति । आभीक्ष्ण्ये णम् सिद्ध एव विकल्पेनोपपदसमासार्थं वचनम्, तेन हि समासाभावः स्यात् । वीप्साभीक्ष्ण्य इति किम् ? गेहमनुप्रविश्यास्ते ॥८१॥**

---

**श० म० न्यासानुसन्धानम्– विश०** । "आप्लृंट् व्याप्तौ" विपूर्वादत इच्छासनि "ज्ञप्यापो ज्ञीपीप् न च द्विः" [ ४. १. १६. ] इति धातोरीपादेशे स्त्रियां भावेऽङि आपि च– वीप्सा, एतदेवाह– **व्याप्तुमिच्छा वीप्से**ति, सा च क्रियाकरणिकैवान्यस्यादर्शनादित्याह– **श्रुतत्वाद् विश्यादिक्रियाभिः साकल्येनोपपदार्थानां व्याप्तुमिच्छा– वीप्से**ति– विश्यादयः साक्षाच्छ्रुता अन्यस्यानुमेयस्यापेक्षया बलवन्तः *श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्* इति न्यायात् । व्याप्तिपद एव साकल्यस्यान्तर्भूतत्वेऽपि स्पष्टप्रतिपादनाय साकल्येनेति, व्याप्तिर्हि विश्वग् आपनमेव, तद् तु साकल्येनैवेति प्रसिद्धमप्येकदेशेन सम्बन्धेऽपि व्याप्तिपदस्य बाहुल्येन प्रयोगात् तद्व्यावृत्तये साकल्येनेत्यावश्यकम्,विश्यादिक्रियाभिरित्यत्रादिपदेन पत्यादित्रयाणां ग्रहणम्, पदार्थानामित्यस्य गेहादीनामित्यर्थः । आभीक्ष्ण्यं व्याचष्टे– **प्रकृत्यर्थस्य पौनःपुन्येनासेवनम्– आभीक्ष्ण्यमि**ति– प्रकृतिर्विश्यादिस्तदर्थस्यासेवनमाभीक्ष्ण्यमित्यस्यैव स्पष्टतार्थं पौनःपुन्येति, आसेवनपदान्तर्गतस्य आङः पौनःपुन्यार्थत्वात् । तथा चोपपदार्थविषयिणी वीप्सा, धात्वर्थविषयमाभीक्ष्ण्यमिति फलितम्, तत्र प्राचां सम्मतिमाह– **यदाहुः– सुप्सु वीप्सा, अव्ययकृत्सु [अव्ययसंज्ञककृत्सु] चाभीक्ष्ण्यमि**ति– आभीक्ष्णस्य क्रियानिष्ठधर्मत्वात् तिङन्तस्य [ त्याद्यन्तस्य ] क्रियाप्रधानत्वात्, अव्ययसंज्ञककृतां च भावप्रधानत्वेन क्रियाप्रधानत्वादाभीक्ष्ण्यधर्मित्वयोग्यत्वात्, तथा च पारिशेष्यात् वीप्साया सुब्विषयत्वम् [स्याद्यन्तविषयत्वम् ] ।

उदाहरति– **गेहं गेहमनुप्रवेशं गेहानुप्रवेशमास्ते, गेहमनुप्रवेशमनुप्रवेशमास्ते गेहानुप्रवेशमास्ते** इति– वीप्सायां "वीप्सायाम्" [ ७. ४. ८०. ] इति स्याद्यन्तस्य द्वित्वे– गेहं गेहमिति, "विशंत् प्रवेशने" अनुप्रपूर्वादतोऽनेन णमि उपान्त्यगुणे गतिसमासे च– अनुप्रवेशमिति, "आसिक्– आस् उपवेशने" इत्यस्य– आस्ते इति, "तृतीयोक्तं वा" [ ३. १. ५०. ] इति वा समासे– गेहानुप्रवेशमिति, अत्र समासेन वीप्सा द्योतितेति तदर्थं न द्वित्वमिति वक्ष्यति । आभीक्ष्ण्यार्थे "भृशाभीक्ष्ण्या०" [ ७. ४. ७३. ] इति अव्ययसंज्ञककृदन्तस्य द्वित्वे– अनुप्रवेशमनुप्रवेशमिति, वा समासे तु– गेहानुप्रवेशमिति, अत्राप्याभीक्ष्ण्यं समासेनोक्तमिति न तदर्थं द्वित्वमिति, एवं वक्ष्यमाणोदाहरणत्रिकेऽपि विज्ञेयम्, तत्र

प्रथमे "पत्लृ–पत् गतौ" इति धातुः, द्वितीये "पदिच्–पद् गतौ" इति, तृतीये तु "स्कन्दृ– स्कन्द् गति–शोषणयोः" इति। णमो वैकल्पिकत्वादाह– **पक्षे– 'गेहं गेहमनुप्रविश्यास्ते, गेहमनुप्रविश्यानुप्रविश्यास्ते'** इत्यादि।

कश्चिल्लक्ष्ये उपपदस्य क्वचिच्च धातोर्द्वित्वमिति भेदस्य मूलमाह– **वीप्सायामुपपदस्य, आभीक्ष्ण्ये तु धातोर्द्वित्वमिति**– क्रिययोपपदस्य व्याप्तिरिति व्याप्यमानस्यैव द्वित्वमुचितं वीप्सायाम्, आभीक्ष्ण्ये च क्रियाया एव पौनःपुन्यमिति तद्वाचिनो धातोरेव द्वित्वमुचितमिति भावः। यद्यपि समासे तदभावे च वीप्साभीक्ष्ण्ये समानतया प्रतीयेते इत्युभयत्र द्वित्वस्यावश्यकता, नहि वीप्सायामाभीक्ष्ण्ये वा समासो विधीयते, तथापि शब्दे तादृशी विचित्रा शक्तिर्यद् व्यासे द्वित्वं विना वीप्साया आभीक्ष्ण्यस्य च न प्रतीतिः, समासे च विनापि द्वित्वं प्रतीयत इति कः पर्यनुयोज्योऽत्र विषये। तदाह– **'गेहानुप्रवेशमास्ते' इत्यादौ तु वीप्साभीक्ष्ण्ये शब्दशक्तिस्वाभाव्यात् समासेनैवोक्ते इति द्विर्वचनं न भवती**ति– यद्यपि समासस्तयोरर्थयोर्न विधीयते तथापि स्वभाव एव तेन तयोरर्थयोरभिधानम्, नहि शब्दैरर्थाभिधानं वाचनिकमपि तु स्वाभाविकमिति भावः। एकदेशे सिद्धसाधनत्वमाह– **आभीक्ष्ण्ये णम् सिद्ध एवेति**– "ख्णम् चाभीक्ष्ण्ये" [ ५. ४. ४८. ]इत्यनेनेति भावः। परिहरति– **विकल्पेनोपपदसमासार्थं वचनमिति**– "तृतीयोक्तं वा" [ ३. १. ५०. ] इति विकल्पेनोपपदेन सह समासो विधीयते, स यथा स्यादित्येवमर्थमित्यर्थः। नन्वस्तु तेनैव प्रत्ययस्तथापि विकल्पेन समासः सिद्ध एव, सर्वसमासानां वैकल्पिकत्वस्य सर्वसम्मतत्वादित्याशङ्कायामाह– **तेन हि समासाभावः स्यादिति**– तस्य तृतीयोक्तत्वाभावात् पाक्षिकोऽपि समासो न स्यादिति भावः। पदकृत्यं पृच्छति– **भृशाभीक्ष्ण्य इति किमिति**, उत्तरयति– **गेहमनुप्रविश्यास्ते** इति– नात्र वीप्सा नवाभीक्ष्ण्यमित्यस्याप्रवृत्त्या क्त्वैव भवतीत्यर्थः॥ ५. ४. ८१.॥

## कालेन तृष्यस्वः क्रियान्तरे। ५. ४. ८२.॥

**त० प्र०**– क्रियामन्तरयतीति–क्रियान्तरः क्रियाव्यवधायकः, तस्मिन्नर्थे वर्तमानाभ्यां तृष्यसूभ्यां धातुभ्यां द्वितीयान्तेन कालवाचिना योगे धातोः सम्बन्धे णम् वा भवति। द्व्यहं तर्षं द्व्यहतर्षं गावः पिबन्ति, द्व्यहमत्यासं द्व्यहात्यासं गावः पिबन्ति, तर्षणात्यासेन च गवां पानक्रिया व्यवधीयते, अद्य पीत्वा द्व्यहमतिक्रम्य पिबन्तीत्यर्थः। अन्तर्मुहूर्तमत्यासमन्तर्मुहूर्तात्यासं सम्यक् पश्यन्ति, सम्यग् दृष्ट्वाऽन्तर्मुहूर्तं मिथ्यात्वमनुभूय पुनः सम्यग्दृष्टयो भवन्तीत्यर्थः। कालेनेति किम्? योजनं तर्षित्वा गावः पिबन्ति, योजनमत्यस्य गावः पिबन्ति। तृष्यस्व इति किम्? द्व्यहमुपोष्य भुङ्क्ते। क्रियान्तरे इति किम्? अहरत्यस्येषून् गतः, इहात्यासेनाहरिषवश्च व्याप्यन्ते न तु गतिक्रिया व्यवधीयते॥८२॥

**श० म० न्यासानुसन्धानम्– कालेन०**। अन्या क्रिया क्रियान्तरमिति शङ्का मा भूदिति तत्पदं व्याचष्टे– **क्रियामन्तरयतीति– क्रियान्तरः** इति– अन्तरं करोतीति "णिज् बहुलं नाम्नः कृगादिषु" [ ३. ४. ४२. ] इति णिच्, क्रियामन्तरयतीति "कर्मणोऽण्" [ ५. १. ७२. ] इत्यण्, णिचो लोपश्च, अन्तरशब्दश्चायमिह व्यवधाने वर्तत इति दर्शयन्नाह– **क्रियाव्यवधायकः** इति। उदाहरति– **द्व्यहं तर्षं द्व्यहतर्षं गावः पिबन्ती**ति– द्वयोरह्नोः समाहारः, द्वे अहनी समाहृते वा "द्विगोरन्नह्नोऽट्" [ ७. ३. ९९. ] इत्यटि "नोऽपदस्य तद्धिते" [ ७. ४. ६१. ] इत्यन्त्यस्वरादिलोपे "कालाध्वनोर्व्याप्तौ" [ २. २. ४२. ] इति द्वितीयायां– द्व्यहमिति, "ञितृषच्– तृष् पिपासायाम्" अतोऽनेन णमि उपान्त्यगुणे च– तर्षमिति, वा समासे च– द्व्यहतर्षमिति, "पां पाने" इत्यस्य पिबादेशे– पिबन्तीति। एवं– **द्व्यहमत्यासं द्व्यहात्यासं गावः पिबन्ती**ति– "असूच्– असू क्षेपणे" इति धातुः, शेषं प्राग्वत्। क्रियाव्यवधायकत्वं दर्शयति– **तर्षणात्यासेन च गवां पानक्रिया व्यवधीयते** इति– यच्चाद्य पानं यच्च द्व्यहेऽतीते पानं भविता तन्मध्यवर्तित्वात् तर्षात्यासयोर्व्यवधायकत्वं विच्छेदकत्वं पानक्रियायाः स्पष्टम्। प्रयोगार्थमाह– **अद्य पीत्वा द्व्यहमतिक्रम्य पिबन्तीत्यर्थः** इति। अद्य पीत्वा द्व्यहं तर्षं– तृषां जनयित्वा पुनः पिबन्तीत्याशये तृषिक्रिया पानक्रियां व्यवधत्त इति भावः। पुनरुदाहरति– **अन्तर्मुहूर्तमत्यासमन्तर्मुहूर्तात्यासं सम्यक् पश्यन्ती**ति– मुहूर्तं घटिकाद्वयम्, तस्यान्तर्मध्यमिति– अन्तर्मुहूर्तमिति,

व्यत्यासं व्यतिक्रम्य, सम्यक्-यथावत्, पश्यन्ति जानन्ति, तत्त्वार्थश्रद्धानं सम्यग्दर्शनं तद्वन्तो भवन्तीत्यर्थः । प्रयोगार्थं व्यवधानं च दर्शयति– **सम्यग् दृष्ट्वाऽन्तर्मुहूर्तं मिथ्यात्वमनुभूय पुनः सम्यग्दृष्टयो भवन्तीत्यर्थः** इति– मोहनीयकर्मजनितं विपरीतदर्शनं मिथ्यात्वम्, शेषं प्राग्वत् । पदकृत्यं पृच्छति–**कालेनेति किमिति**, उत्तरयति– **योजनं तर्षित्वा गावः पिबन्ति, योजनमत्यस्य गावः पिबन्तीति**–अत्राध्ववाचकं व्यवधायकं न तु कालवाचकमिति तेन योगे नास्य प्रवृत्तिरिति क्त्वैव भवतीत्यर्थः । धातोः प्रकरणात् तेनैव निर्वाहे धातुविशेषग्रहणं किमर्थमिति पृच्छति–**तृष्यस्व इति किमिति**, अन्यधातोर्मा मा भूदित्याशयेनोत्तरयति–**द्व्यहमुपोष्य भुङ्क्ते** इति– "वसं निवासे" अतः क्त्वि "यजादिवचेः किति" [ ४. १. ७९. ] इति य्वृत् क्त्वो यबादेशः "घस्-वसः" [ २. ३. ३६. ] इति सस्य षत्वं शेषं प्राग्वत्, अत्रोपवसने भुजिक्रियाव्यवधायके वसिर्वर्तते, तत्र 'तृष्यस्व:' इति नोच्येत तदेहापि स्यादित्यर्थः । पुनः पृच्छति– **क्रियान्तर इति किमिति**, उत्तरयति–**अहरत्यस्येषून् गतः** इति, व्यवधायकत्वाभावं भावयति–**इहात्यासेनाहरिषवश्च व्याप्यन्ते, न तु गतिक्रिया व्यवधीयते** इति–यथा मूलोदाहरणे तर्षेणात्यासेन च मध्यवर्तिना पानक्रिया व्यवधीयते न तथेह गतिः, तत्राहन्छब्दात् "कालाध्वनोर्व्याप्तौ" [ २. २. ४२. ] इति द्वितीया सकलस्याह्न इष्वत्यासेन व्याप्तत्वात्, इषुशब्दात् तु कर्मण्येव, अस्यतिर्नात्रातिवाहनार्थकोऽपि तु क्षेपणार्थकः, एवं चाहर्व्याप्येषून् क्षिप्त्वा गत इत्यर्थः ।। ५. ४. ८२. ।।

## नाम्ना ग्रहा–ऽऽदिशः । ५. ४. ८३. ।।

**त० प्र०–** नामशब्देन द्वितीयान्तेन योगे तुल्यकर्तृकेऽर्थे वर्तमानाद् ग्रहेरादिशश्च धातोः संबन्धे णम् वा भवति । नामानि ग्राहं नामग्राहमाह्वयति, नाम्नी देवदत्तो ग्राहं नामग्राहं देवदत्त आह्वयति; नामान्यादेशं नामादेशं ददाति । पक्षे-नाम गृहीत्वा दत्ते, नामाऽऽदिश्य दत्ते ।।८३।।

**श० म० न्यासानुसन्धानम्–** नाम्ना० । **नामानि ग्राहं नामग्राहमाह्वयतीति**– 'नामन्'शब्दस्य द्वितीयाबहुवचने– 'नामानि' इति । "ग्रहीश्– ग्रह् उपादाने" अतोऽनेन णमि उपान्त्यवृद्धौ च– 'ग्राहम्' इति, वा समासे च– 'नामग्राहम्' इति, "ह्वेंग् स्पर्धा-शब्दयोः" आङ्पूर्वादतो वर्तमानातिवि– आह्वयतीति । 'द्वितीयान्तेन योगे' इत्यनेन सम्बन्धमात्रं विवक्षितं न त्वव्यवधानमित्याशयेन व्यवहितमप्युपपदं प्रयुज्योदाहरति– **नाम्नी देवदत्तो ग्राहं नामग्राहं देवदत्त आह्वयती**ति– नाम्नी इति द्वितीयाद्विवचने, असमासे कामचारः, समासे त्वव्यवधानमेवेति भावः । "दिशींत्– दिश् अतिसर्जने" आङ्पूर्वादतो णमि– **नामान्यादेशं नामादेशं ददातीति** । णमो वैकल्पिकत्वादाह– **पक्षे– नाम गृहीत्वा दत्ते, नामादिश्य दत्ते** इति– अत्र क्त्वि य्वृति दीर्घे च– गृहीत्वेति, गतिसमासे क्त्वो यबादेशे च– 'आदिश्य' इति ।। ५. ४. ८३. ।।

## कृगोऽव्ययेनाऽनिष्टोक्तौ क्त्वा-णमौ । ५.४.८४. ।।

**त० प्र०–** अव्ययेन योगे करोतेस्तुल्यकर्तृकेऽर्थे वर्तमानादनिष्टायामुक्तौ गम्यमानायां धातोः सम्बन्धे क्त्वा-णमौ भवतः । ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि वृषल ! नीचैः कृत्वा नीचैःकृत्य कथयसि, किं तर्हि नीचैर्वृषल ! कारं वृषल ! नीचैःकारं कथयसि, उच्चैर्नाम प्रियमाख्येयम् । ब्राह्मण ! कन्या ते गर्भिणी, किं तर्हि वृषल ! उच्चैः कृत्वा, उच्चैःकृत्य, कथयसि, किं तर्हि उच्चैर्वृषल ! कारं वृषलोच्चैःकारं कथयसि, नीचैर्नामाप्रियमाख्येयम् । अनिष्टोक्ताविति किम् ? उच्चैः कृत्वाऽऽचष्टे-ब्राह्मण ! पुत्रस्ते जात इति, नीचैः कृत्वाऽऽचष्टे-ब्राह्मण ! कन्या ते गर्भिणी जातेति । अव्ययेनेति किम् ? ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि वृषल ! मन्दं कृत्वा कथयसि, ब्राह्मण ! कन्या ते गर्भिणी जातेति किं तर्हि वृषल ! तारं कृत्वा कथयसि । वाऽधिकारेणैव पक्षे क्त्वायाः सिद्धौ समासार्थं तद्विधानम्, अन्यथा हि णम एव पाक्षिकः समासः स्यात्, न तु क्त्वः । क्त्वा चेत्यकृत्वा णम्विधानमुत्तरत्रोभयानुवृत्त्यर्थम् ।।८४।।

**श० म० न्यासानुसन्धानम्–कृगो० । अनिष्टोक्ताविति–** अनिष्टोक्तिः– प्रियस्योच्चैरप्रियस्य नीचैः कथनमिष्टम्, तद्विपरीतमनिष्टम्, तथा चाप्रियस्योच्चैरुक्तिः प्रियस्य नीचैरनिष्टोक्तिरिति फलितम्, तदनुकूलमेव लक्ष्येषु सङ्गतिः स्पष्टीकृत्य प्रदर्शयिष्यते । तथा चात्रानिष्टा चासौ उक्तिश्चेति व्याख्येयं

न त्वनिष्टस्योक्तिरिति । तथा सति पुत्रजन्मोक्तौ किं तर्हीति पर्यनुयोगोऽयुक्तः स्यात् तत्रेष्टस्यैव कथनात् । एतत् सर्वं व्यञ्जयितुमाह– **अनिष्टाख्यामुक्ताविति**– कस्य वस्तुन उच्चैः कथनमिष्टं कस्य च नीचैरिति विवेकस्तूदाहरणेषु पर्यनुयोगेनैव ज्ञास्यत इति । "डुकृंग्–कृ करणे" अतोऽनेन क्त्वि तागमे च– **कृत्वा,** वा समासे क्त्वो यबादेशे च– **नीचैःकृत्य,** अनेन णमि च वृद्धावारादेशे–**कारम्,** वा समासे च **नीचैः कारम्** । वाक्येऽव्ययस्य व्यवधानेऽव्यवधाने च भवति, समासे त्वव्यवधानमेवाश्रितम्, एतत् सर्वं मनसिकृत्योदाहरति– **ब्राह्मण! पुत्रस्ते जातः, किं तर्हि वृषल! नीचैःकृत्वा, नीचैःकृत्य कथयसि, किं तर्हि नीचैर्वृषल! कारं, वृषल ! नीचैः कारं कथयसिति,** कथमत्रानिष्टोक्तिरित्याह– **उच्चैर्नाम प्रियमाख्येयमिति**– पुत्रजन्मन इष्टत्वेऽपि मन्दस्वरेण तदभिधानं नेष्टमिति भावः । अनिष्टवस्तुविषयकमुदाहरणमाह– **ब्राह्मण ! कन्या ते गर्भिणीत्यादिना,** कथमिहानिष्टोक्तिरित्याह–**नीचैर्नामाप्रियमाख्येयमिति**– कन्याया गर्भिणीत्वस्यानिष्टत्वेऽपि नीचैराख्यानं नानिष्टमपि तूच्चैरेवेति भावः । पदकृत्यं पृच्छति–**अनिष्टोक्ताविति किमिति,** उत्तरयति–**उच्चैः कृत्वाऽऽचष्टे–ब्राह्मण ! पुत्रस्ते जात इति, नीचैः कृत्वाऽऽचष्टे–ब्राह्मण ! कन्या ते गर्भिणी जातेति** च, अत्र प्रियस्योच्चैराख्यानमप्रियस्य च नीचैरिति नानिष्टोक्तिरिति भावः । पुनः पृच्छति–**अव्ययेनेति किमिति,** प्रत्युदाहरणद्वयेनोत्तरयति– **ब्राह्मणे**त्यादिना, अत्र प्रथमे मन्दमिति द्वितीये तारमिति च नाव्ययमिति नास्य प्रवृत्तिः, किन्तु "प्राक्काले" [ ५. ४. ४७. ] इत्यनेन क्त्वैव, तत्र च न समासस्तृतीयोक्तत्वाभावात् । णमोऽनुवृत्त्या विकल्पस्य च प्राकरणिकतया पक्षे क्त्वायाः सिद्धावपि तस्यैतत्प्रकरणविधेयत्वाभावेन तेन सह विकल्पेन समासो न स्यादिति तस्यापि विधानमाश्रितमिति समर्थयति– **वाऽधिकारेणैवे**त्यादिना । चकारेणैव णमः समुच्चये सिद्धेऽपि णमो विधानं किमर्थमित्याशङ्कायामाह– **उत्तरत्रोभयानुवृत्त्यर्थमिति**– चकारेण णमोऽनुकर्षणे तस्यान्वाचीयमानता विज्ञायेत, ततश्चोत्तरत्र तस्याप्रधान्यादनुवृत्तिर्न स्यात्, पुनर्णमो ग्रहणे सति सह निर्देशात् क्त्वाणमोर्गुणप्रधानभावो न भवतीति द्वयोरप्यनुवृत्तिर्भवति, एतन्मूलकश्चायं न्यायः * चानुकृष्टं नोत्तरत्र * इति ॥ ५. ४. ८४. ॥

## तिर्यचाऽपवर्गे । ५. ४. ८५. ॥

**त० प्र०– अपवर्गः–क्रियासमाप्तिः समाप्तिपूर्वको** वा **विरामः, त्यागो वा । तस्मिन् गम्यमाने 'तिर्यच्' इत्यनेनाव्ययेन योगे करोतेस्तुल्यकर्तृकेऽर्थे वर्तमानात् धातोः सम्बन्धे क्त्वा-णमौ प्रत्ययौ भवतः । तिर्यक्कृत्वा तिर्यक्कृत्य तिर्यक्कारमास्ते, समाप्य विरम्य वा उत्सृज्य वाऽऽस्ते इत्यर्थः । अपवर्ग इति किम् ? तिर्यक् कृत्वा काष्ठं गतः ॥८५॥**

**श० म० न्यासानुसन्धानम्– तिर्य०** । अपवर्गशब्दस्य समाप्तौ फलप्राप्तौ मोक्षे च प्रवृत्तत्वेनेह प्रायोगिकमर्थं ग्राहयितुमाह– **अपवर्गः–क्रियासमाप्तिरिति** । अपवृज्यते त्यज्यतेऽत्रावस्थायामिति यौगिकार्थस्य तत्र कथं प्रतीतिरिति चेत् ? अत्राह–**समाप्तिपूर्वको वा विरामस्त्यागो वेति**– क्रियाया इति शेषः, तावद्धि क्रियाऽऽरभ्यते यावत् तस्याः समाप्तिर्न भवेदिति समाप्य क्रियां फलमुखीं दृष्ट्वा यत्र सा क्रिया त्यज्यते तत्रायं शब्दः प्रयुज्यत इति भावः । तिरसस्तिर्यदिशो हि नात्र युक्त इति "तिरश्चाऽपवर्गे" इति प्रयोक्तव्ये 'तिर्यचा' इति रूपप्रयोगः किमर्थं इत्याशङ्कायामाह– **'तिर्यच्' इत्यव्ययेनेति**– 'तिरश्चा' इति निर्देशे 'तिर्यच्' शब्दोऽव्ययमिह गृह्यतेऽव्ययाधिकारादिति स्वरूपनिर्णयो न स्यादिति तत्स्वरूपरक्षणायैवं निर्दिश्याव्ययस्यास्य ग्रहणं प्रमापितमिति भावः, अव्ययभिन्नस्य ग्रहणे हि 'तिर्यच्' शब्दात् समासाभावपक्षे द्वितीया स्यात्– तिर्यञ्चं कृत्वेति, अतश्चाव्ययस्यैव ग्रहणमेष्टव्यमिहेति तत्त्वम् । "तॄ प्लवन-तरणयोः" अतः "मिथि०" [ उणा० ९७१. ] इति किदसि प्रत्यये "ऋतां०" [ ४. ४. ११६. ] इति इरादेशे च– 'तिरस्' अन्तर्ध्यवज्ञातिर्यग्भावेषु, "स्वरादयोऽव्ययम्" [ १. १. ३०. ] इत्यव्ययत्वमस्य, "अञ्चू गतौ च" चात् पूजायाम्, तिरोऽञ्चतीति बाहुलकादौणादिके क्विपि "अञ्चोऽनर्चायाम्" [४. २. ४६. ] इत्युपान्त्यनकारलोपे "तिरसस्तिर्यति" [ ३. २. १२४. ] इति तिर्यादेशे– 'तिर्यच्' इति, स्वरादिगणपाठाच्चास्याप्यव्ययत्वम्, तथा च तस्य व्ययाभावात्, औणादिकानामव्युत्पन्नत्वपक्षाश्रयणाच्च "अच् च् प्राग्दीर्घश्च"[ २. १. १०४. ] इति न

चादेशो नवा दीर्घत्वं किन्तु अनुकरणशब्दत्वमाश्रित्य तृतीयायां 'तिर्यंचा' इति । एतेन योगे कृगः क्त्वि तागमे च- **तिर्यक् कृत्वेति**- "चजः कगम्"[ २. १. ८६. ] इति चस्य ककारः, वा समासे क्त्वो यबादेशे च- **तिर्यक्कृत्येति**, णमि तु वृद्धौ- **तिर्यक् कारमिति**, वा समासे तु- **तिर्यक्कारमिति** । अपवर्गार्थं संगमयति- **समाप्य विरम्य वा उत्सृज्य वाऽऽस्ते इत्यर्थः** इति । पदकृत्यं पृच्छति- **अपवर्ग इति किमिति**, अपवर्गादन्यत्र मा भूदित्याशयेनोत्तरयति- **तिर्यक् कृत्वा काष्ठं गतः** इति- अनृजुः कृत्वा, पार्श्वतः कृत्वेत्यर्थः, नह्यत्र कस्याश्चन क्रियायाः समाप्तिः विरामस्त्यागो वा गम्यत इत्यस्याप्रवृत्त्या "प्राक्काले"[ ५. ४. ४७. ]इति क्त्वैव भवतीति भावः ॥ ५. ४. ८५. ॥

---

## स्वाङ्गतस्च्व्यर्थे नाना-विना धार्थेन भुवश्च ।५.४.८६.॥

**त० प्र०- स्वाङ्गमुक्तलक्षणम्, तस्प्रत्ययान्तेन स्वाङ्गेन च्व्यर्थवृत्तिभिर्नाना-विनाभ्यां धार्थप्रत्ययान्तैश्च योगे भुवः कृगश्च तुल्यकर्तृकेऽर्थे वर्तमानात् धातोः सम्बन्धे क्त्वा-णमौ भवतः । वचनभेदाद् धातु-प्रत्ययययथासंख्यं नास्ति । मुखतो भूत्वा मुखतोभूय मुखतोभावमास्ते । मुखतः कृत्वा मुखतःकृत्य मुखतःकारमास्ते । पार्श्वतो भूत्वा पार्श्वतोभूय पार्श्वतोभावं शेते । पार्श्वतः कृत्वा पार्श्वतःकृत्य पार्श्वतःकारं शेते । अनाना नाना भूत्वा गतः- नाना भूत्वा नानाभूय नानाभावं गतः । अनाना नाना कृत्वा गतः- नाना कृत्वा नानाकृत्य नानाकारं गतः । एवं- विना भूत्वा विनाभूय विनाभावं गतः । विना कृत्वा विनाकृत्य विनाकारं गतः । धाऽर्था धा-धमञ्-एधा-ध्यमञः । द्विधा भूत्वा द्विधाभूय द्विधाभावमास्ते । द्विधा कृत्वा द्विधाकृत्य द्विधाकारं गतः । द्वैधं भूत्वा द्वैधंभूय द्वैधंभावमास्ते । द्वैधं कृत्वा द्वैधंकृत्य द्वैधंकारं गतः । द्वेधा भूत्वा द्वेधाभूय द्वेधाभावमास्ते । द्वेधा कृत्वा द्वेधाकृत्य द्वेधाकारं गतः । ऐकध्यं भूत्वा ऐकध्यंभूय ऐकध्यंभावमास्ते । ऐकध्यं कृत्वा ऐकध्यंकृत्य ऐकध्यकारं गतः । धणस्तु प्रकारविचालवदर्थत्वेनाधार्थत्वाद् अव्ययाधिकाराच्च निरासः । अस्यापि ग्रहणमित्यन्ये । अव्ययाधिकारादेव च - 'मुखे तस्यति- मुखतः कृत्वा गत' इत्यत्र न भवति । स्वाङ्गेति किम् ? सर्वतो भूत्वाऽऽस्ते । तसिति किम् ? मुखे भूत्वा गतः । च्व्यर्थेति किम् ? नाना कृत्वा भक्ष्याणि भुङ्क्ते, द्विधा कृत्वा काष्ठानि गतः ॥८६॥**

---

**श० म० न्यासानुसन्धानम्- स्वाङ्ग०** । **'स्वाङ्गतस्'** इति शब्दस्वरूपं न ग्राह्यमपि तु तस्प्रत्ययान्तं स्वाङ्गं व्याख्यानात्, तथा च न स्वाङ्गशब्द इहोपपदमपि तु तद्वाचकं शब्दमात्रं तस्प्रत्ययान्तम्, तत्र स्वाङ्गस्य स्वमङ्गं स्वाङ्गमिति नार्थोऽपि तु पूर्वपरिभाषितं स्वाङ्गमित्याह- **स्वाङ्गमुक्तलक्षणमिति**- "अविकारोऽद्रवं मूर्तम्०" इत्यादिना लक्षितमित्यर्थः । नाना च विना च धार्थाश्चेति विग्रहेऽत्र समास इति स्वाभिप्रायमाह- **नाना-विनाभ्यां धार्थप्रत्ययान्तैश्चेति** । चकारेण कृगोऽनुकर्षः, तथा चेह द्वौ धातू प्रकृती-कृग् भूश्च, प्रत्ययावपि द्वौ- क्त्वा णम् च, एवं च यथासंख्यनिमित्तमिति यथासंख्येन-कृगः क्त्वा, भुवश्च णम् स्यादित्याशङ्कायामाह- **वचनभेदाद् धातुप्रत्ययथासंख्यं नास्तीति**- 'क्त्वा-णमौ' इत्यत्र द्विवचनम्, प्रकृत्योरेकवचनमिति वचनभेदोऽस्तीति समसंख्यत्वाभावान्न यथासंख्यमिति भावः ।

प्रथमं तावद् भुव उदाहरति- **मुखतो भूत्वा मुखतोभूय मुखतोभावमास्ते** इति- स्वाङ्गवाचकान्मुखशब्दाद् "आद्यादिभ्यः"[ ७. २. ८४. ] इति सम्भवद्विभक्त्यन्तात् तसौ- 'मुखतः' इति, "भू सत्तायाम्" अतः क्त्वि 'भूत्वा', इति, वा समासे क्त्वो यबादेशे- 'मुखतोभूय' इति; णमि वृद्धावावादेशे च- 'भावम्' इति, वा समासे तु- 'मुखतोभावम्' इति । एवं- कृगोऽपि ज्ञेयम् । स्वाङ्गवाचकात् पार्श्वशब्दादपि प्राग्वत् तसुः, तद्घटितोदारणभावना च विज्ञेया । 'स्वाङ्गतः' इति पृथग्निर्देशान्न तस्य च्व्यर्थवृत्तित्वमिह विवक्षितम् । अथ च्व्यर्थे नानादियोगे उदाहरणावसरः, तत्राह- **अनाना नाना भूत्वा गतः** इति च्व्यर्थप्रदर्शकं वाक्यम्, क्त्वि वा समासे च- **नाना भूत्वा नानाभूयेति**, णमि तु- **नानाभावं गतः** इति । एवं कृगोऽपि, विनाशब्दयोगे चोभयतोऽपि ज्ञेयम् । धार्थाः के प्रत्यया इत्याकाङ्क्षायामाह- **धार्था धा-धमञ्-एधा-ध्यमञः** इति । द्वाभ्यां प्रकाराभ्यामिति प्रकारार्थे एको राशिर्द्वौ इति विचलार्थे च "विचाले च" [ ७. २. १०५. ] इति धाप्रत्यये- **द्विधा**, "द्वि-त्रेर्धमञेधौ वा" [७. २. १०७. ] इति तु धमञि [ भमि ] **द्वैधम्**,

एधाप्रत्यये च द्वैधा, एकशब्दाच्च "वैकाद् ध्यमञ्" [ ७. २. १०६. ] ध्यमञि [ ध्यमि ] **ऐकध्यमिति** भवति । एतैर्घटितान्युदाहरणानि प्राग्वत् भावनीयानि । ननु धाप्रत्ययः प्रकारार्थे विचाले गम्यमाने विधीयते संख्यार्थात्, तथा सति धण्प्रत्ययस्थलेऽपि तथात्वात् धणपि धार्थप्रत्ययसंग्रहस्थले कथं न संगृहीत इति चेत् ? अत्राह- **धणस्तु प्रकारविचालवदर्थत्वेनाधार्थत्वाद्, अव्ययाधिकाधिकाराच्च निरासः** इति । अयमाशयः- दर्शिता धार्थप्रत्ययाः प्रकारे विचाले च विधीयन्ते, धण्प्रत्ययस्तु "तद्वति धण्" [ ७. २. १०८. ] इत्यनेन प्रकारवति विचालवति चार्थे विधीयत इति तस्य न धार्थत्वम्, किञ्च "कृगोऽनव्ययेन०" [ ५. ४. ८४. ] इत्यतोऽव्ययेनेत्यधिकृतमिहापि वर्तत एव, शेषधार्थप्रत्ययानाम् "अधण्तस्वाद्या शसः" [ १. १. ३२. ] इत्यव्ययत्वेऽपि तत्र धणो वर्जनान्न तदन्तस्याव्ययत्वमिति तस्यासंग्रहः । 'स्वाङ्गतस्' इत्यस्य तस्प्रत्ययान्तेत्यर्थः । कृतस्तस्य मूलकथनपूर्वकं फलमाह- **अव्ययाधिकारादेव च- 'मुखे तस्यति- मुखतः कृत्वा गतः' इत्यत्र न भवतीति**- "तसू-तस् उपक्षये" "क्विप्" [ ५. १. १४८. ] इति नाम्नः पराद् धातोर्यथालक्ष्यं क्विप् भवतीति मुखे तस्यतीति क्विपि 'मुखतस्' इति, एवं तसि प्रत्ययेऽपि 'मुखतस्' इति भवति, तथा च तस्- प्रत्ययो धातुश्च, तत्र धातोस्तस्रूपत्वेऽपि नाव्ययसंज्ञायोग्यत्वमिति तन्निरासः । पदकृत्यं पृच्छति- **स्वाङ्गेति किमिति**, **सर्वतो भूत्वाऽऽस्ते** इति-नात्र सर्वशब्दस्य स्वाङ्गवाचकत्वमिति नास्य प्रवृत्तिः, किन्तु "प्राक्काले" इति क्त्वैव । पृच्छति- **तसिति किमिति**, उत्तरयति- **मुखे भूत्वा गतः** इति- मुखस्य स्वाङ्गत्वेऽपि न तसन्तत्वमित्यर्थः । पुनः पृच्छति- **च्व्यर्थे इति किमिति**, उत्तरयति-**नाना कृत्वा भक्ष्याणि भुङ्क्ते** इति- भक्ष्याणि हि स्वभावत एव भिन्नानि, न तत्र च्व्यर्थसम्भव इति भावः । **द्विधा कृत्वा काष्ठानि गतः** इति- काष्ठानां द्विधा करणं मार्गादिनिराबाधाय, तानि हि स्वत एव द्विधा भूतानि, केवलं मार्गस्योभयोः पार्श्वयोः स्थापनमेव क्रियत इति न च्व्यर्थ इत्याशयः ॥ ५. ४. ८६. ॥

## तूष्णीमा । ५. ४. ८७. ॥

**त० प्र०- तूष्णींशब्देन योगे भवतेर्धातोः संबन्धे क्त्वा-णमौ भवतः । तूष्णीं भूत्वा तूष्णींभूय तूष्णींभावमास्ते ॥८७॥**

**श० म० न्यासानुसन्धानम्- तूष्णी० । तूष्णीं भूत्वेति**- तूष्णींशब्दो न केवलं मौनार्थकोऽपि तु मौनवत्यपि प्रयुज्यते, तथा च पूर्वम् अमौनो- मौनाभाववान्, मौनः-मौनवान्, भूत्वेति तात्पर्यमिहोन्नेयमिति ॥ ५.४.८७. ॥

## आनुलोम्येऽन्वचा । ५. ४. ८८. ॥

**त० प्र०- आनुलोम्यमनुकूलता परचित्ताराधनम्, 'अन्वच्' इत्यनेनाव्ययेन योगे भवतेस्तुल्यकर्तृकेऽर्थे वर्तमानादानुलोम्ये गम्यमाने धातोः संबन्धे क्त्वा-णमौ भवतः । अन्वग् भूत्वा अन्वग्भूय अन्वग्भावमास्ते, अनुकूलो भूत्वा तिष्ठतीत्यर्थः । आनुलोम्य इति किम् ? अन्वग् भूत्वा विजयते शत्रुः, पश्चाद् भूत्वेत्यर्थः । तिर्यचाऽन्वचेति शब्दानुकरणात्, तिरश्चाऽनूचेति न भवति ॥८८॥**

**श० म० न्यासानुसन्धानम्- आनु०** । आनुलोम्यं व्याख्याति- **आनुलोम्यमनुकूलतेति**, स्वस्यानुकूलत्वं सर्वस्यैवेति न तत्र वैशिष्ट्यमिति परस्यैवानुकूलत्वं गम्यते, तदनुकूलत्वं च तच्चित्ताराधनमेव, अत आह-**परचित्ताराधनमिति**, यद्यप्यज्ञस्य हितकरणे तदानुकूल्येऽपि तच्चित्ताराधनं न जायते तथापि तत्रानुकूल्यमपि प्रथमं न प्रतीयते, पश्चात् तु प्रतीयत एवेति नाव्याप्तिः । उदाहरति- **अन्वग् भूत्वा अन्वग्भूय अन्वग्भावमास्ते** इति, प्रयोगार्थमाह- **अनुकूलो भूत्वा तिष्ठतीत्यर्थः** इति । अनुपूर्वादञ्चतेर्बाहुलकादौणादिके क्विपि उपान्त्यनकारलोपे स्वरादिगणपाठादव्ययत्वे 'अन्वच्' इति, तदनुकरणात् तृतीयैकवचने 'अन्वचा' इति निर्देशः कृतः, एवं "तिर्यचाऽपवर्गे" [ ५. ४. ८५. ] इत्यत्रापि 'तिर्यचा' इति; नन्विह तृतीयायाम् "अच्च् प्राग्दीर्घश्च" [२. १. १०४.] इति चादेशे 'तिरश्चा' इति, चादेशे दीर्घे च 'अनूचा' इति निर्देशेनैव भाव्यमिति चेत् ? अत्राह- **'तिर्यचा' 'अन्वचा' इति शब्दानुकरणात् 'तिरश्चा' 'अनूचा' इति न भवतीति**, अयमाशयः- सर्वत्र ह्यनुकरणं शब्दः "शब्दस्वरूपस्यैवानुकरणम्, एतावांस्तु विशेषः- क्वचिच्छब्दपदार्थस्यानुकरणं क्वचिदर्थपदार्थस्येति । तत्रानुकरणमित्येतावति वक्तव्ये शब्दरूपग्रहणं शब्दरूपमात्रस्यार्थरहितस्यैतदनुकरणमिति ज्ञापनार्थम् । एतदुक्तं भवति- शब्दपदार्थ-

को यस्तिर्यक्छन्दस्तस्येदमनुकरणम्, न तु स एव, तेन शब्दान्तरत्वात् चादेशो न भवतीति भावः । नन्वेवमपि *प्रकृतिवदनुकरणं भवति* इति न्यायेन भवितव्यमेवात्र प्रकृतिकार्येण चादेशेनेति चेन्न- अनुक्रियमाणरूपविनाश प्रसङ्गात्, यद्यत्र प्रकृतिकार्यं स्यात् ततो यादृशमनुकरणं तिर्यगिति शब्दस्वरूपं तस्य विनाशोऽनुपलब्धिः स्यात्, यादृशमनुकर्तुमिष्टमकृतचादेशं तादृशं न प्रतीयेतेत्यर्थः । यत एवं प्रकृतिवदनुकरणभावे सत्येव दोष आपतति ततो नेह प्रकृतिवदनुकरणेन भवितव्यम् । प्रकृतिवदनुकरणं भवतीत्यस्यावकाशस्तु यत्रार्थपदार्थस्यानुकरणं तत्र । न्यायसमुच्चये च *व्याख्यातोऽयं न्याय* इत्यलं पल्लवितेन ॥ ५. ४. ८८. ॥

**इच्छार्थे कर्मणः सप्तमी** । ५. ४. ८९. ॥

**त० प्र०- इच्छार्थे धाता उपपदे तुल्यकर्तृकेऽर्थे वर्तमानात् कर्मभूताद् धातोः सम्बन्धे सप्तमी विभक्तिर्भवति । कर्मत्वं तुल्यकर्तृकत्वं च धातोः श्रुतत्वादुपपदापेक्षे । भुञ्जीयेतीच्छति, भुञ्जीयेति वाञ्छति, भुञ्जीयेति कामयते । इच्छार्थ इति किम् ? भोजको व्रजति । कर्मण इति किम् ? इच्छन् करोति, अत्र करोतीच्छत्योर्लक्ष्य-लक्षणभावो न तु कर्म-क्रियाभावः । तुल्यकर्तृके इति किम् ? इच्छामि भुङ्क्तां भवान् ॥८९॥**

**श० म० न्यासानुसन्धानम्- इच्छा० । इच्छार्थे धाता उपपदे इति**- उपपदं च यद्यपि प्रकृतप्रकृत्यपेक्षया पूर्वं प्रयुज्यते तथापि 'उप-समीपे उच्चारितं पदमुपपदम्' इति व्युत्पत्त्यनुरोधेन पश्चादपि प्रयोग उपपदत्वमक्षतमेव । "भुजंप्-भुज् पालनाभ्यवहारयोः" अभ्यवहारो भोजनम्, "भुनजोऽत्राणे" [ ३. ३. ३७. ] इत्यात्मनेपदे सप्तम्यां तृतीयपुरुषैकवचने ईयप्रत्यये- **भुञ्जीय,** "इषत् इच्छायाम्" अतो वर्तमानातिवि "गमिषद्०" [ ४. २. १०६. ] इत्यन्त्यस्य छादेशे- **इच्छति,** "वाछु इच्छायाम्" इत्यस्य- **वाञ्छति,** "कमूङ् कान्तौ" कान्तिरिच्छा, अतः "कमेर्णिङ्" [ ३. ४. २. ] इति णिङि- **कामयते** इति । पदकृत्यं पृच्छति- **इच्छार्थ इति किमिति**, उत्तरयति- **भोजको व्रजतीति**-"व्रज गतौ" इत्यस्य- व्रजति, । पुनः पृच्छति-**कर्मण इति किमिति**, उत्तरयति- **इच्छन् करोतीति**, कर्मत्वाभावमुपपादयति- **अत्र करोतीच्छत्योर्लक्ष्य-लक्षणभावो न कर्म-क्रियाभावः** इति- क्रिययैव हीच्छा लक्ष्यते, अनिच्छतः स्वतः क्रियायामप्रवृत्तेरिति क्रिया लक्षणम्, इच्छा तु लक्ष्यमिति तात्पर्यम्, पृच्छति- **तुल्यकर्तृके इति किमिति**, उत्तरयति-**इच्छामि भुङ्क्तामिति** -इहेच्छाया अन्यः कर्ता भोजनस्य चान्य इति तुल्यकर्तृत्वाभाव इति भावः ॥ ५. ४. ८९. ॥

**शक-घृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-ग्ला-घटा-ऽस्ति-समर्थार्थे च तुम्** । ५. ४. ९०. ॥

**त० प्र०- शक्याद्यर्थेषु धातुषु समर्थार्थेषु नामसु च चकारादिच्छार्थेषु धातुषूपपदेषु कर्मभूताद् धातोस्तुम् प्रत्ययो भवति । शक्नोति पारयति वा भोक्तुम्, घृष्णोत्यध्यवस्यति वा भोक्तुम्, जानाति वेत्ति वा भोक्तुम्, आरभते प्रक्रमते वा भोक्तुम्, लभते विन्दते वा भोक्तुम्, सहते क्षमते वा भोक्तुम्, अर्हति प्राप्नोति वा भोक्तुम्, ग्लायति म्लायति वा भोक्तुम्, घटते युज्यते वा भोक्तुम्, अस्ति विद्यते वा भोक्तुम्, समर्थोऽलं प्रभवति ईष्टे वा भोक्तुम् । समर्थार्थप्रतीतावपि भवति- द्रष्टुं चक्षुः, योद्धुं धनुः । 'शक्त्या भुज्यते, सामर्थ्येन भुज्यते' इत्यादौ त्वनभिधानान्न भवति । इच्छार्थेषु- इच्छति भोक्तुम्, भोक्तुं वाञ्छति, भोक्तुम् वष्टि, भोक्तुमभिलषति, समर्थार्थत्वादेव सिद्धे शकग्रहणमसमर्थार्थम् । कर्मण इति च सामर्थ्याच्छकादिष्वर्हपर्यन्तेषु इच्छार्थेषु चोपपदेषु सत्सु सम्बन्धनीयम् । अन्ये तु शकादिषु घटान्तेषु स्वरूपोपपदेष्वेवेच्छन्ति, न तदर्थेषु । अतादर्थ्यार्थमक्रियोपपदार्थं चेवं प्रस्तूयत इति ॥९०॥**

**इत्याचार्य श्रीहेमचन्द्र विरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनबृहद्वृत्तौ पञ्चमस्याध्यायस्य चतुर्थः पादः ॥४॥**

**पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥**

**क्षुण्णाः क्षोणिभृतामनेककटका भग्नाऽथ धारा ततः,**
**कुण्ठः सिद्धपतेः कृपाण इति रे मा मंसत क्षत्रियाः ! ॥**
**आरूढप्रबलप्रतापदहनः संप्राप्तधारश्चिरात्,**
**पीत्वा मालवयोषिदश्रुसलिलं हन्ताऽयमेधिष्यते ॥२०॥**

**श० म० न्यासानुसन्धानम्–शक०** । पाणिनीये चार्थग्रहणमस्तिनैव सम्बध्यत इति निर्णीतम्, स्वमते च सर्वैरेव सहान्वय इत्याह– **शक्याद्यर्थेषु** इति, तत्र *अनन्तरस्य विधिर्वा भवति **प्रतिषेधो** वा* इति न्यायेन तस्यैव सामीप्याद् विशेषणमिति पाणिनीयमतम्, स्वमते च *द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते* इति न्यायेन सर्वेषु सम्बन्ध इति योजनीयम्, तदनुकूलमेव सर्वेषु लक्ष्येषु पठितधातूनां तदर्थकानामन्येषां च प्रयोगः कृतः । "भुजंप् पालनाभ्यवहारयोः" अभ्यवहारो भोजनम्, अस्मात् तुमि अनुस्वारेत्त्वादिडभावे उपान्त्यगुणे च– **भोक्तुमि**ति– "चजः कगम्" [ २. १. ८६. ] इति जस्य गत्वम् "अघोषे प्र०" [ १. ३. ५०. ] इति गस्य कत्वमवसेयम् । "शक्लृंट्– शक् शक्तौ" इत्यस्य–**शक्नोती**ति । "पार तीरण् कर्मसमाप्तौ" इति पठितस्य– **पारयती**ति । "ञिधृषाट्– धृष् प्रागल्भ्ये" इत्यस्य– **धृष्णोती**ति । "षोंच् अन्तकर्मणि" इत्यस्याध्यवपूर्वस्य– **अध्यवस्यती**ति । "ज्ञांश् अवबोधने" "जा ज्ञाजनोऽत्यादौ" [ ४. २. १०४. ] इति जादेशे– **जानाती**ति । "विदक् ज्ञाने" इत्यस्य– **वेत्ती**ति । "रभिं राभस्ये" राभस्यमुपक्रमः, आङ्पूर्वस्यास्य– **आरभते** इति । "क्रमू पादविक्षेपे" प्रपूर्वस्यास्य "प्रोपादारम्भे" [ ३. ३. ५१. ] इत्यात्मनेपदे– **प्रक्रमते** इति । "डुलभिंष् प्राप्तौ" अस्य– **लभते** इति । "विद्लृंती लाभे" अस्य मुचादित्वान्ने– **विन्दते** इति । "षहि मर्षणे" इत्यस्य– **सहते** इति । "क्षमौषि सहने" इत्यस्य– **क्षमते** इति । "अर्हं पूजायाम्" इत्यस्य– **अर्हती**ति । "आप्लृंट् व्याप्तौ" इत्यस्य प्रपूर्वस्य– **प्राप्नोती**ति । "ग्लैं हर्षक्षये" हर्षक्षयो धात्वपचयः, अस्य– **ग्लायती**ति । "म्लैं गात्रविनामे" गात्रविनामः कान्तिक्षयः, अस्य– **म्लायती**ति । "घटिष् चेष्टायाम्" इत्यस्य– **घटते** इति । "युजिच् समाधौ" इत्यस्य– **युज्यते** इति । "असक् भुवि" इत्यस्य– **अस्ती**ति । "विदिच् सत्तायाम्" इत्यस्य– **विद्यते** इति । "भू सत्तायाम्" प्रपूर्वस्यास्य– **प्रभवती**ति । "ईशिक् ऐश्वर्ये" इत्यस्य "यज-सृज०" [ २. १. ८७. ] इति शस्य षत्वे तद्योगे "तवर्गस्य०" [ १. ३. ६०. ] इति तकारस्य टत्वे– **ईष्टे** इति । गम्यमानाऽपि क्रिया प्रयोजिकेतिवत् समर्थार्थस्यापि प्रयोग एव न प्रत्ययोऽपि तु तदर्थस्य गम्यमानत्वेऽपीत्याह– **समर्थार्थप्रतीतावपि भवतीति, तेन– द्रष्टुं चक्षुः, योद्धुं धनुरिति**– समर्थमिति प्रतीयत इति भावः, "दृशृं प्रेक्षणे" अस्मात् तुमि शस्य षत्वे तकारस्य टत्वे "अः सृजि-दृशोऽकिति" [ ४. ४. १११. ] इति स्वरात् परतोऽकारे ऋकारस्य रेफे– द्रष्टुमिति, "युधिच् सम्प्रहारे" अस्मात् तुमि उपान्त्यगुणे "अधश्चतुर्थात् तथोर्धः" [ २. १. ७९. ] इति तस्य धे– योद्धुमिति । अव्याप्तिं परिहरति– **'शक्त्या भुज्यते, सामर्थ्येन भुज्यते' इत्यादौ त्वनभिधानान्न भवती**ति– शिष्टैरिहाप्रयुक्तत्वाद् बाहुलकात् तुम् न भवतीत्यर्थः । इच्छार्थेषूपपदेषूदाहर्तुमवतारयति– **इच्छार्थेषु** इति । "वाञ्छु इच्छायाम्" इत्यस्य– **वाञ्छती**ति । "वशक् कान्तौ" कान्तिरिच्छा, अस्य– **वष्टि** । "लषी कान्तौ" अस्याभिपूर्वस्य–**अभिलषती**ति । शक्नोतीत्यस्य पारयतीति समानार्थधातुना सह समानार्थत्वं दर्शितं, न समर्थार्थेन, तद्बीजमाह– **समर्थार्थत्वादेव सिद्धे शकग्रहणमसमर्थार्थमि**ति– शक्धातुरपि समर्थार्थक एव, किन्तु तस्य पृथग्ग्रहणेन तस्य समपानार्थत्वमिह ग्राह्यमिति भावः । ग्ला-घटादीनामकर्मकत्वेन कर्मण इत्यनेन सह कथं सम्बन्ध इत्याशङ्कायामाह– **कर्मण इति सामर्थ्याच्छकादिष्वर्हपर्यन्तेषु इच्छार्थेषु चोपपदेषु सत्सु सम्बन्धनीयमि**ति– सामर्थ्यं हि योग्यता, सकर्मकाणामेव कर्मवत्त्वं न्याय्यमिति भावः । पाणिनीयमतमाह– **अन्ये तु शकादिषु घटान्तेष्वि**ति– एतन्मूलमुक्तं प्रागेव– अर्थग्रहणस्यास्तिनैव सम्बन्ध इति । तुमः सामान्येन पूर्वं विहितत्वेनास्य वैयर्थ्यमाशङ्क्याह– **अतादर्थ्यार्थमक्रियोपपदार्थं चेदं प्रस्तूयते** इति– "क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती" [ ५. ३. १३. ] इति सूत्रेण हि क्रियायां क्रियार्थायामुपपदे तुम् विहित इति तदभावेऽपि यथा स्यादित्येवमर्थमित्यर्थः । अयमाशयः– अक्रियार्थेष्वपि शकादिषु तुम् यथा स्यादित्येवमर्थोऽयमारम्भः, नहि शक्नोति भोक्तुमित्यादौ क्रियार्थोपपदं गम्यते, किं तर्हि ? अर्थान्तरमन्यदेव, इह तावच्छक्नोति भोक्तुमुत्सहते भोक्तुं, जानाति भोक्तुमिति प्रावीण्यं गम्यते, ग्लायति भोक्तुमिति तदशक्तता गम्यते, घटते भोक्तुमर्हति भोक्तुमिति तद्योग्यतामात्रम्, आरभते भोक्तुं प्रक्रमते भोक्तुमिति भुजेरेवाद्यावस्था न क्रियान्तरम्, लभते भोक्तुमिति अप्रत्याख्यानम्,

अस्ति भोक्तुमित्यादौ सम्भवमात्रमिति ।। ५. ४. ६०. ।।

इति कलिकालसर्वज्ञ- **श्रीहेमचन्द्रसूरि**भगवद्विरचिते स्वोपज्ञतत्त्वप्रकाशिकाप्रकाशे **शब्दमहार्णवन्यासे** त्रुटितस्थले तपोगच्छाधिपति-सूरिसम्राट्**श्रीविजयनेमिसूरी**श्वरपट्टालंकार-कविरत्न-शास्त्रविशारद-व्याकरणवाचस्पति-**श्रीविजयलावण्यसूरि**निर्मितानुसन्धानेन पूर्णतां नीते पञ्चमाध्यायस्य

**चतुर्थः पादः समाप्तः ।।**

**समाप्तोऽयं पञ्चमाध्यायः ।।**

*अनुसन्धायकस्य*– **हे क्षत्रियाः** ! सिद्धराजविरोधिनो राजानः ! [ अनेन सिद्धनृपतिकृपाणेन ] **क्षोणिभृतां** राज्ञाम्, **अनेककटकाः** बहूनि सैन्यानि, अथ च **क्षोणिभृतां** पर्वतानां, **अनेककटकाः** नितम्बभागाः, **क्षुण्णाः** द्विधा कृताः, **ततः** पश्चात्, ततः कारणाद् वा, **धारा** नगरी फलरूपा वा, **भग्ना** लुण्ठिता त्रुटिता वा, इति **सिद्धपतेः** सिद्धराजस्य, **कृपाणः** खड्गः, **कुण्ठः** नष्टधारतयाऽग्रे किमपि छेत्तुमसमर्थः, इति **मा मंसत** नैव विचारयत, कुत इति चेत् ? अत्राह– **आरूढप्रबलप्रतापदहनः** आरूढोऽधिष्ठितः प्रबलस्तीव्रः प्रताप एव सिद्धराजप्रभाव एव दहनोऽग्निर्येन तथाभूतः, **संप्राप्तधारः** संप्राप्ता धारा नगरी फलं वा येन तथाभूतः, **चिरात्** बहुकालपर्यन्तम्, **मालवयोषिदश्रुसलिलं** मालवयोषितां मालवाधीशधारापतिपत्नीनाम्, अश्रूणि नयनवारीण्येव सलिलं जलम्, पीत्वा, **अयं** कृपाणः, **एधिष्यते** वृद्धिं प्राप्स्यति, इति **हन्त !** भवतां दुःखजनिका वार्ता ।

अयमाशयः– सिद्धराजकृपाणेन पर्वतप्रान्तभागा इव राज्ञां कटकाः क्षुण्णाः, ततश्चाश्मनिपातेनेव तत्फलस्य भग्नता सम्भाव्यते, तच्च श्रुतमपि 'धारा' भग्नेति । यद्यपि तद् धारानगरीभङ्गसूचकं वाक्यं किन्तु भवद्भिः कृपाणधाराभङ्गतया निश्चितं स्यादिति सम्भावनया भवतः प्रतिबोधयामि यत्– धाराभङ्गसम्भावनायामपि सिद्धराजप्रतापाग्नितप्तः, अथ च सम्प्राप्तधारानगररूपफलः, कृतमालवीनेत्राम्बुपानश्चायं कृपाणः पुनरपि भवतां दलनाय पर्याप्त एव, भवति हि कृपाणादीनां भग्नधाराणामग्निसंतापेन धारायोजनेन जलसेकेन च धारावृद्धिरिति कुण्ठता नात्र सम्भावनीयेति । श्लेषालङ्कारः ।।२०।।

卐 卐 卐

## – श्रीविजयनेमिसूरीश्वरजी ग्रन्थमालाना प्रकाशित ग्रन्थरत्नोनी सूचि –

| | रु० न०पै० | | रु० न०पै० |
|---|---|---|---|
| धातुरत्नाकर प्रथम भाग प्रथमावृत्ति | ८ ० | *नूतनतीर्थस्तवनमाला | १ ५० |
| धातुरत्नाकर प्रथम भाग द्वितीयावृत्ति | १२ ० | *कण्ड्वादिप्रकाशः | १ ५० |
| धातुरत्नाकर द्वितीय भाग | ६ ० | *सविधिपञ्चप्रतिक्रमणादिसंग्रह प्रथमावृत्ति | २ ५० |
| *धातुरत्नाकर तृतीय भाग | २ ० | धातुरत्नाकर सप्तम भाग | ५ ० |
| *धातुरत्नाकर चतुर्थ भाग प्रथमावृत्ति | २ ० | *स्तुति चोवीशी | अमूल्य |
| देवगुर्वष्टक स्वोपज्ञवृत्ति सहित | ० ५० | विधियुक्तपञ्चप्रतिक्रमणादिसंग्रह भाग १ थी ४ [ आवृत्ति–१, २, ३ ] | ३ ५० |
| देवगुर्वष्टक तथा कदम्बाष्टक | ० २५ | *जीवविचार पद्यानुवाद तथा टीप्पण प्रथमावृत्ति | ० १३ |
| धातुरत्नाकर पंचम भाग | ४ ० | सिद्धहेमदीपिका अष्टाध्यायीयुक्ता | २ ० |
| धातुरत्नाकर षष्ठ भाग | २ ५० | तत्त्वार्थ त्रिसूत्री प्रकाशिका सहित | ४ ५० |
| *नूतनजिनस्तवनमालादिसंग्रह ८ मी आवृत्ति | अमूल्य | *प्रथमकर्मग्रन्थ पद्यानुवाद सहित प्रथमावृत्ति | ० ३७ |
| *महावीरस्तवनमाला | ,, | *जिनसंगीतसरिता प्रथमा-द्वितीयावृत्ति | ० ७५ |
| *महावीरछत्रीश | ,, | सिद्धहेमदीपिका प्रकाश प्रथम भाग | ० ८७ |
| धातुपारायण तथा कण्ड्वादिप्रकाशः | १ ५० | | |

| | रु० | न०पै० |
|---|---|---|
| चैत्यवन्दन भाष्य पद्यानुवादादि सहित | ० | ५० |
| स्याद्यन्त रत्नाकर प्रथम विभाग | १ | २५ |
| तिलकमञ्जरीमहाकाव्यटीकात्रयोपेता प्रथम भाग | २ | ० |
| नयरहस्य प्रकरण सटीक | ३ | ० |
| सप्तभंगीनयप्रदीप प्रकरण सटीक | २ | ० |
| सिद्धहेमदीपिका प्रकाश द्वितीय भाग | १ | ७५ |
| *शासनसम्राट् जीवन सौरभ | अमूल्य | |
| *सिद्धहेमलघुवृत्ति पूर्वार्द्ध | ,, | |
| *सिद्धहेमलघुवृत्ति उत्तरार्ध | ,, | |
| *सिद्धहेमशब्दानुशासन बृहद्वृत्ति बृहन्न्यासादिसह प्रथम भाग | २५ | ० |
| अनेकान्तव्यवस्था सटीक पूर्वार्द्ध | ५ | ० |
| सिद्धहेमलघुवृत्ति सम्पूर्ण | ८ | ० |
| नयोपदेश टीकाद्वयसह प्रथम भाग | ६ | ० |
| तिलकमंजरी महाकाव्य टीकाटीप्पणसहित प्रथम भाग | ६ | ० |
| द्वात्रिंशिका प्रथमा सटीक | १ | ० |
| द्वात्रिंशिका द्वितीया सटीक | १ | ० |
| शास्त्रवार्तासमुच्चय प्रथम भाग सटीक | ४ | ० |
| तिलकमंजरी महाकाव्य टीकाटीप्पणसह द्वितीय भाग | ६ | ० |
| द्वात्रिंशिका तृतीया सटीक | १ | ० |
| धातुरत्नाकर प्रथम भाग | १ | ० |
| नयोपदेश टीकाद्वयसहित द्वितीय भाग | ६ | ० |
| शास्त्रवार्तासमुच्चय द्वितीय भाग सटीक | ४ | ० |
| काव्यानुशासन प्रथम भाग नव्यटीकासह | ४ | ० |
| द्वात्रिंशिका चतुर्थी | १ | ० |
| तिलकमंजरी महाकाव्य टीकाटीप्पण सह तृतीय भाग | ६ | ० |
| न्यायसमुच्चय सिन्धु-तरंग टीका सह | ६ | ० |
| सिद्धहेमशब्दानुशासन बृहद्वृत्ति बृहन्न्यासादि-सह द्वितीय भाग | २५ | ० |
| नवतत्व प्रकरण [ पद्यानुवाद विवेचनादि सहित ] | २ | ० |
| अनेकान्तव्यवस्थाप्रकरणम् सटीक उत्तरार्ध | ५ | ० |
| शास्त्रवार्तासमुच्चय सटीक तृतीय भाग | ४ | ० |
| सिद्धहेमशब्दानुशासन बृहद्वृत्ति बृहन्न्यासादि सहित तृतीय भाग | १५ | ० |
| धातुरत्नाकर चतुर्थ भाग द्वितीयावृत्ति | २ | ० |
| प्रथमकर्मग्रन्थ पद्यानुवादादिसहित परिशिष्टादि भूषित द्वितीयावृत्ति | २ | ० |
| समाससारांश | ० | २५ |
| जीवविचार पद्यानुवाद विविधपरिशिष्टयुक्त द्वितीयावृत्ति | ० | ५० |
| नयगोचर भ्रमनिवारणम् | ० | ५० |
| हेमचन्द्रिका व्याकरणम् | १ | ५० |
| सिद्धहेमशब्दानुशासनबृहद्वृत्तिबृहन्न्यासादिसह षष्ठविभाग | १८ | ० |

卐 卐 卐

## श्रीनेमि-लावण्यसूरीश्वरग्रंथमाला तथा श्रीनेमि-लावण्य-दक्ष-सुशील ग्रंथमाला तरफथी प्रकाशित थयेली पुस्तिकाओ

| | | रु. आ. पा. |
|---|---|---|
| (१) | श्रीहैमशब्दानुशासन सुधा [ प्रथम-विभाग ] 'श्रीसिद्धहैम' व्याकरणोपयोगी अपूर्व ग्रंथ | ५–४–० |
| (२) | श्रीरत्नाकर-पञ्चविंशतिका-वृत्तिः | १–०–० |
| (३) | श्रीगौतमस्वाम्यष्टक-वृत्तिः | १–०–० |
| (४) | आत्मनिन्दाद्वात्रिंशिका [ प्रकाशवृत्ति-सहिता ] | १–४–० |
| (५) | काव्यानुशासनम् [ अवचूरिसहित ] | २–८–० |
| (६) | दीक्षानो दिव्य-प्रकाश [ विभाग १–२–३, परिशिष्ट ४ सहित ] | १–०–० |
| (७) | श्रीगुरुवन्दनभाष्यनो छंदोबद्धभाषानुवाद [ विवेचनादि सहित ] | १–४–० |
| (८) | श्रीवर्द्धमानजिनस्तोत्र-दीपिका [ शब्दार्थ-स्पष्टार्थ सहित ] | ०–४–० |
| (९) | जैनधर्म अने तेनी प्राचीनता | ०-१२-० |
| (१०) | प्रभु महावीर-जीवनसौरभ | १–४–० |
| (११) | श्रीसिद्धचक्रकुसुम-वाटिका | ०–५–० |
| (१२) | आत्मजागृतिशतक | ०–४–० |
| (१३) | तेरकाठीया | ०–६–० |
| (१४) | रात्रिभोजननो निषेध | ०–५–० |
| (१५) | श्रीसुशीलसाहित्यसंग्रह [ विभाग १–२ ] | ३–८–० |
| (१६) | श्रीनमस्कार महामंत्र-मौक्तिकमाला | १–०–० |
| (१७) | आत्मिक प्रश्नोत्तरी | १–०–० |
| (१८) | प्रश्नोत्तर रत्नमाला | १–०–० |
| (१९) | वर्द्धमान-पंचाशिका | ०–८–० |
| (२०) | ऋषभ-पंचाशिका | ०–८–० |
| (२१) | नमस्कार द्वात्रिंशिका | ०–४–० |
| (२२) | शुभनामस्मरणस्तोत्र | ०–४–० |
| (२३) | संघोपमा द्वात्रिंशिका | ०–४–० |